ऋग्वेदः सूक्तं ९.१

दे. पवमानः सोमः। गायत्री

स्वादि॑ष्ठया॒ मदि॑ष्ठया॒ पव॑स्व सोम॒ धार॑या ।

इन्द्रा॑य॒ पात॑वे सु॒तः ॥१॥

र॒क्षो॒हा वि॒श्वच॑र्षणिर॒भि योनि॒मयो॑हतम्!

द्रुणा॑ सधस्थमासदत् ॥२॥

वरिवोधातमो भव मंहिष्ठो वृत्रहन्तमः ।

पर्षि राधो मघोनाम् ॥३॥

अभ्यर्ष महानां देवानां वीतिमन्धसा ।

अभि वाजमुत श्रवः ॥४॥

त्वामच्छा चरामसि तदिदर्थं दिवेदिवे ।

इन्दो त्वे न आशसः ॥५॥

पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता ।

वारेण शश्वता तना ॥६॥

तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश ।

स्वसारः पार्ये दिवि ॥७॥

तमीं हिन्वन्त्यग्रुवो धमन्ति बाकुरं दृतिम् ।

त्रिधातु वारणं मधु ॥८॥

अभीममघ्न्या उत श्रीणन्ति धेनवः शिशुम् ।

सोममिन्द्राय पातवे ॥९॥

अस्येदिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते ।

शूरो मघा च मंहते ॥१०॥

सायणभाष्यम्

ऋग्वेदसंहिता

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

॥ अथ नवमं मण्डलम् ॥

नवमे मण्डले सप्तानुवाकाः । तत्र प्रथमेऽनुवाके चतुर्विंशतिसंख्याकानि सूक्तानि । तत्र ‘ स्वादिष्ठया' इति दशर्चं प्रथमं सूक्तम् । अत्रानुक्रम्यते--- स्वादिष्ठया दश मधुच्छन्दाः' इति । वैश्वामित्रो मधुच्छन्दा ऋषिः । प्राग्वत्सप्रीयपरिभाषया गायत्री छन्दः । ‘ नवमं मण्डलं पावमानं सौम्यम्' (अनु.) इति वचनात् पवमानगुणविशिष्टः सोमो देवता । ग्रावस्तोत्रेऽर्बुदसूक्तस्य प्रागुत्तमाया इदमादिकं सर्वं पावमानं विकल्पेनावपनीयम् । सूत्रितं च---’ प्रैते वदन्त्वित्यर्बुदं प्रागुत्तमाया आ व ऋञ्जसे प्र वो ग्रावाण इति सूक्तयोरन्तरोपरिष्टात्पुरस्ताद्वा पावमानीरोप्य यथार्थमा वा ग्रहग्रहणात्' (आश्व. श्रौ. ५, १२) इति । उपाकर्मणि मण्डलादिग्रहण आद्या ! सूत्रं पूर्वमेवोदाहृतम् ॥

स्वादिंष्ठया॒ मदिंष्ठया॒ पवंस्व सोम॒ धारंया ।

इन्द्रांय॒ पातंवे सु॒तः ॥ १

स्वादिंष्ठया । मदिंष्ठया । पवंस्व । सो॒म॒ । धारंया ।

इन्द्रांय । पातंवे । सु॒तः ॥१

स्वादिष्ठया । मदिष्ठया । पवस्व । सोम । धारया ।

इन्द्राय । पातवे । सुतः ॥१

हे सोम “इन्द्राय “पातवे पातुं “सुतः अभिषुतः त्वं स्वादिष्ठया स्वादुतमया “मदिष्ठया अतिशयेन मादयित्र्या “धारया “पवस्व क्षर ॥

र॒क्षो॒हा वि॒श्वच॑र्षणिर॒भि योनि॒मयो॑हतम् ।

द्रुणा॑ स॒धस्थ॒मास॑दत् ॥ २

र॒क्षः॒ऽहा । वि॒श्वऽच॑र्षणिः । अ॒भि । योनि॑म् । अयः॑ऽहतम् ।

द्रुणा॑ । स॒धऽस्थ॑म् । आ । अ॒स॒द॒त् ॥२

रक्षःऽहा । विश्वऽचर्षणिः । अभि । योनिम् । अयःऽहतम् ।

द्रुणा । सधऽस्थम् । आ । असदत् ॥२

“रक्षोहा रक्षसां हन्ता “विश्वचर्षणिः विश्वस्य द्रष्टा सोमः अयोहतं हिरण्येन हतम् । तथा च ब्राह्मणं - ' हिरण्यपाणिरभिषुणोति' इति । “द्रुणा द्रोणकलशेनाधिषवणफलकाभ्यां वा “सधस्थं सहस्थानं “योनिम् अभिषवस्थानम् "अभि “आसदत् अभ्यासीददिति ॥

व॒रि॒वो॒धात॑मो भव॒ मंहि॑ष्ठो वृत्र॒हन्त॑मः ।

पर्षि॒ राधो॑ म॒घोना॑म् ॥ ३

व॒रि॒वः॒ऽधात॑मः । भ॒व॒ । मंहि॑ष्ठः । वृ॒त्र॒हन्ऽत॑मः ।

पर्षि॑ । राधः॑ । म॒घोना॑म् ॥३

वरिवःऽधातमः । भव । मंहिष्ठः । वृत्रहन्ऽतमः ।

पर्षि । राधः । मघोनाम् ॥३

हे सोम त्वं “वरिवोधातमः अतिशयेन धनानां दाता “भव । वेदो वरिवः' इति धननामसु पाठात् । “मंहिष्ठः दातृतमश्च भव । सर्वदातृत्वमत्रोच्यत इत्यपुनरुक्तिः । “वृत्रहन्तमः अतिशयेन शत्रूणां हन्ता भव । किंच “मघोनां धनवतां शत्रूणां “राधः धनं च “पर्षि अस्मभ्यं प्रयच्छ ।।

अ॒भ्य॑र्ष म॒हानां॑ दे॒वानां॑ वी॒तिमन्ध॑सा ।

अ॒भि वाज॑मु॒त श्रव॑ः ॥ ४

अ॒भि । अ॒र्ष॒ । म॒हाना॑म् । दे॒वाना॑म् । वी॒तिम् । अन्ध॑सा ।

अ॒भि । वाज॑म् । उ॒त । श्रवः॑ ॥४

अभि । अर्ष । महानाम् । देवानाम् । वीतिम् । अन्धसा ।

अभि । वाजम् । उत । श्रवः ॥४

हे सोम त्वं “महानां महतां देवानां “वीतिं यज्ञम् “अन्धसा धानाद्यन्नेन सह “अभ्यर्ष अभिगच्छ । "उत अपि चाभिगच्छंस्त्वं “वाजं बलं “श्रवः अन्नं चाभिगमयास्मानित्यर्थः ॥

त्वामच्छा॑ चरामसि॒ तदिदर्थं॑ दि॒वेदि॑वे ।

इन्दो॒ त्वे न॑ आ॒शस॑ः ॥ ५

त्वाम् । अच्छ॑ । च॒रा॒म॒सि॒ । तत् । इत् । अर्थ॑म् । दि॒वेऽदि॑वे ।

इन्दो॒ इति॑ । त्वे इति॑ । न॒ः । आ॒ऽशसः॑ ॥५

त्वाम् । अच्छ । चरामसि । तत् । इत् । अर्थम् । दिवेऽदिवे ।

इन्दो इति । त्वे इति । नः । आऽशसः ॥५

हे "इन्दो यागेषु क्लिद्यमान सोम “त्वामच्छ त्वां प्रति “चरामसि वयं चरामः। “दिवेदिवे प्रतिदिनमस्माकं “तदित् तदेव त्वत्परिचरणमेव “अर्थं कार्यं नान्यत्कार्यमस्ति । “नः अस्माकम् “आशसः आशंसनान्यपि “त्वे त्वय्येव नान्यत्र ॥ ॥ १६ ॥

पु॒नाति॑ ते परि॒स्रुतं॒ सोमं॒ सूर्य॑स्य दुहि॒ता ।

वारे॑ण॒ शश्व॑ता॒ तना॑ ॥ ६

पु॒नाति॑ । ते॒ । प॒रि॒ऽस्रुत॑म् । सोम॑म् । सूर्य॑स्य । दु॒हि॒ता ।

वारे॑ण । शश्व॑ता । तना॑ ॥६

पुनाति । ते । परिऽस्रुतम् । सोमम् । सूर्यस्य । दुहिता ।

वारेण । शश्वता । तना ॥६

हे सोम “ते तव “परिस्रुतं क्षरन्तं “सोमं सोमरसं “सूर्यस्य "दुहिता श्रद्धा देवी “वारेण वालेन “शश्वता शाश्वतेन “तना विस्तृतेन “पुनाति । तथा च वाजसनेयिन आमनन्ति-: श्रद्धा वै सूर्यस्य दुहिता श्रद्धा ह्येनं पुनाति' इति ॥

तमी॒मण्वी॑ः सम॒र्य आ गृ॒भ्णन्ति॒ योष॑णो॒ दश॑ ।

स्वसा॑र॒ः पार्ये॑ दि॒वि ॥ ७

तम् । ई॒म् । अण्वी॑ः । स॒ऽम॒र्ये । आ । गृ॒भ्णन्ति॑ । योष॑णः । दश॑ ।

स्वसा॑रः । पार्ये॑ । दि॒वि ॥७

तम् । ईम् । अण्वीः । सऽमर्ये । आ । गृभ्णन्ति । योषणः । दश ।

स्वसारः । पार्ये । दिवि ॥७

"समर्ये समनुष्ये यज्ञे “पार्ये “दिवि सौत्येऽहनि “योषणः स्त्रियः “स्वसारः स्वयं सरन्त्यो दशसंख्याकाः “अण्वीः अण्व्योऽङ्गुलयः । ‘अग्रुवः अण्व्यः' इत्यङ्गुलिनामसु पाठात् । “तमीं तमेनं सोमम् "आ "गृभ्णन्ति आगृह्णन्ति ॥

तमीं॑ हिन्वन्त्य॒ग्रुवो॒ धम॑न्ति बाकु॒रं दृतिं॑म् ।

त्रि॒धातु॑ वार॒णं मधु॑ ॥ ८

तम् । ई॒म् । हि॒न्व॒न्ति॒ । अ॒ग्रुव॑ः । धम॑न्ति । बा॒कु॒रम् । दृतिं॑म् ।

त्रि॒ऽधातु॑ । वा॒र॒णम् । मधु॑ ॥८

तम् । ईम् । हिन्वन्ति । अग्रुवः । धमन्ति । बाकुरम् । दृतिम् ।

त्रिऽधातु । वारणम् । मधु ॥८

“तमीम् एनं सोमम् “अग्रुवः अङ्गुलयः “हिन्वन्ति अभिषवदेशं प्रति प्रेरयन्ति । प्रेरयित्वा च “बाकुरं भासमानं “दृतिं दृतिसदृशांशुमेनं सोमं “धमन्ति अभिषुण्वन्ति । यद्यपि धमतिरभिषवकर्मा न भवति तथाप्यौचित्यादत्राभिषवपरो भविष्यति । तदेतत् सोमात्मकं “मधु वस्तु “त्रिधातु त्रिस्थानम् । द्रोणकलश आधवनीयः पूतभृदिति त्रिधातवः । “वारणं शत्रूणां वारकं च भवति ॥

अ॒भी३॒ममघ्न्या॑ उ॒त श्री॒णन्ति॑ धे॒नव॒ः शिशुं॑म् ।

सोम॒मिन्द्रा॑य॒ पात॑वे ॥ ९

अ॒भि । इ॒मम् । अघ्न्या॑ः । उ॒त । श्री॒णन्ति॑ । धे॒नव॑ः । शिशुं॑म् ।

सोम॑म् । इन्द्रा॑य । पात॑वे ॥९

अभि । इमम् । अघ्न्याः । उत । श्रीणन्ति । धेनवः । शिशुम् ।

सोमम् । इन्द्राय । पातवे ॥९

“उत अपि च “इमम् एनं “शिशुं बालं “सोमम् “अघ्न्याः अस्तब्धाः अहन्तव्याः “धेनवः गावः “इन्द्राय “पातवे पातुम् “अभि “श्रीणन्ति । स्वकीयेन पयसा संस्कुर्वन्तीत्यर्थः ॥

अ॒स्येदिन्द्रो॒ मदे॒ष्वा विश्वा॑ वृ॒त्राणि॑ जिघ्नते ।

शूरो॑ म॒घा च॑ मंहते ॥ १०

अ॒स्य । इत् । इन्द्रः॑ । मदे॑षु । आ । विश्वा॑ । वृ॒त्राणि॑ । जि॒घ्न॒ते॒ ।

शूरः॑ । म॒घा । च॒ । मं॒ह॒ते॒ ॥१०

अस्य । इत् । इन्द्रः । मदेषु । आ । विश्वा । वृत्राणि । जिघ्नते ।

शूरः । मघा । च । मंहते ॥१०

“शूरः वीरः “इन्द्रः “अस्येत् अस्य सोमस्यैव "मदेषु “विश्वा विश्वानि “वृत्राणि शत्रून् “आ जिघ्नते आहन्ति । “मघा मघानि धनानि “च “मंहते यजमानेभ्यः प्रयच्छति ॥ ॥ १७ ॥

टिप्पणी

सोम उपरि आरम्भिक टिप्पणी (http://puraana.tripod.com/pur_index30/soma.htm)

९.१.१ स्वादिष्ठया मदिष्ठयेति

सꣳहितम् साम (https://sa.wikisource.org/s/1z76)

शैशवम् (https://sa.wikisource.org/s/2hmh)

अभिषेकानन्तरं -- अथास्मै सुराकंसं हस्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुत इत्याधाय शान्तिं वाचयति नाना हि वां देवहितं सदस्कृतम्मा सं सृक्षाथाम्परमे व्योमनि सुरा त्वमसि शुष्मिणी सोम एष राजा मैनं हिंसिष्टं स्वां योनिमाविशन्ताविति - ऐ.ब्रा. ८.८ (https://sa.wikisource.org/s/w25) , ८.२० (https://sa.wikisource.org/s/w25)

दशमे अहनि आर्भवपवमानस्य स्तोत्रीयं -- स्वादिष्ठया मदिष्ठया"इति गायत्री भवति मदवद्वै रसवत् तृतीयसवनं मदमेव तद्रसं दधाति। गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम्। संहितं भवति द्व्यक्षरणिधनं प्रतिष्ठायै प्रतिष्ठायैवोत्तिष्ठन्ति। सफं भवति सफेन वै देवा इमान् लोकान् समाप्नुवन्त् सामाप्नुवंस्तत् सफस्य सफत्वमिमानेवैतेन लोकान् समाप्योत्तिष्ठन्ति - तांब्रा. १५.११ (https://sa.wikisource.org/s/tvt)

वा.सं. २६.२५ (https://sa.wikisource.org/s/1zf1)

धीतम् इव वै तृतीयसवनम्। जागतं सुपर्ण आहरन्न् अधयत्। तद् एतद् पीडितम् इव। स्वादिष्ठया इति। स्वदयन्त्य् एवैनत् तेन। मदिष्ठया इति। रसम् एवास्मिंस् तन्मदं दधति। - जैब्रा १.१५६ (https://sa.wikisource.org/s/ehd)

उच्चा त इति पुंसो रूपं, स्वादिष्ठयेति स्त्रियै। तद् एतन् मिथुनं प्रजननं क्रियते। जैब्रा. २.४२२ (https://sa.wikisource.org/s/eg5)

स्वादिष्ठया मदिष्ठयेत्य् आर्भवस्य पवमानस्य मद्वतीर् गायत्र्यो भवन्ति। रसो वै मदः। धीतम् इवैतद् यत् तृतीयसवनम्। तद् यद् एता मद्वतीर् भवन्ति, रसम् एवास्मिन्न् एतद् दधत्य्, ऐवैनद् एतेन प्याययन्ति। जैब्रा. ३.२९५ (https://sa.wikisource.org/s/ee7)

निरुक्तं ११.३

पवस्व सोम धारया इति - सोमयागे केचन ग्रहाः भवन्ति येषां सोमग्रहणं धारातः भवति। अन्ये ग्रहा भवन्ति येषां पूरणं धारातः न भवति।



आग्रयण स्थाली

९.१.८ तमीं हिन्वन्ति इति

तम् इति वै पुंसो रूपम्, अग्रुव इति स्त्रियै। उभयम् उ ह वा एतद् भूत्वा प्रजापतिः प्रजज्ञे। - जै.ब्रा. २.९ (https://sa.wikisource.org/s/ef4)

मण्डल ९

ऋग्वेदः सूक्तं ९.२

ऋग्वेदः - मण्डल ९
← सूक्तं ९.१ सूक्तं ९.२ सूक्तं ९.३ →
मेधातिथिः काण्वः

दे. पवमानः सोमः। गायत्री

पवस्व देववीरति पवित्रं सोम रंह्या ।

इन्द्रमिन्दो वृषा विश ॥१॥

आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः ।

आ योनिं धर्णसिः सदः ॥२॥

अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ।

अपो वसिष्ट सुक्रतुः ॥३॥

महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः ।

यद्गोभिर्वासयिष्यसे ॥४॥

समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।

सोमः पवित्रे अस्मयुः ॥५॥

अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।

सं सूर्येण रोचते ॥६॥

गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः ।

याभिर्मदाय शुम्भसे ॥७॥

तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे ।

तव प्रशस्तयो महीः ॥८॥

अस्मभ्यमिन्दविन्द्रयुर्मध्वः पवस्व धारया ।

पर्जन्यो वृष्टिमाँ इव ॥९॥

गोषा इन्दो नृषा अस्यश्वसा वाजसा उत ।

आत्मा यज्ञस्य पूर्व्यः ॥१०॥

सायणभाष्यम्

‘पवस्व ' इति दशर्चं द्वितीयं सूक्तं काण्वस्य मेधातिथेरार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तं- पवस्व मेधातिथिः' इति । उक्तो विनियोगः ।।

पव॑स्व देव॒वीरति॑ प॒वित्रं॑ सोम॒ रंह्या॑ ।

इंद्र॑मिंदो॒ वृषा विं॑श ॥१

पव॑स्व । दे॒व॒ऽवीः । अति॑ । प॒वित्र॑म् । सो॒म॒ । रंह्या॑ ।

इन्द्र॑म् । इ॒न्दो॒ इति॑ । वृषा॑ । आ । वि॒श॒ ॥१

पवस्व । देवऽवीः । अति । पवित्रम् । सोम । रंह्या ।

इन्द्रम् । इन्दो इति । वृषा । आ । विश ॥१

हे “सोम "देववीः देवकामस्त्वं “रंह्या वेगेन “पवित्रं यथा भवति तथा “अति “पवस्व अतिक्षर । किंच हे “इन्दो “वृषा सेचकस्त्वम् “इन्द्रम् “आ “विश प्रविश ॥

आ व॑च्यस्व॒ महि॒ प्सरो॒ वृषें॑दो द्यु॒म्नव॑त्तमः ।

आ योनिं धर्णसिः सदः ॥२

आ । वच्यस्व । महि । प्सरः । वृषा । इन्दो इति । द्युम्नवत्ऽतमः ।

आ । योनिम् । धर्णसिः । सदः ॥२

आ । वच्यस्व । महि । प्सरः । वृषा । इन्दो इति । द्युम्नवत्ऽतमः ।

आ । योनिम् । धर्णसिः । सदः ॥२

हे “इन्दो सोम “महि महान् “वृषा कामानां वर्षक: “द्युम्नवत्तमः यशस्वितमः “धर्णसिः धर्ता त्वं “प्सरः पानीयमन्धः “आ “वच्यस्व अस्मान् प्रत्यागमय । “योनिं स्वकीयं स्थानम् “आ “सदः आसीद च ॥

अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ।

अपो वसिष्ट सुक्रतुः ॥३

अधुक्षत । प्रियम् । मधु । धारा । सुतस्य । वेधसः ।

अपः । वसिष्ट । सुऽक्रतुः ॥३

अधुक्षत । प्रियम् । मधु । धारा । सुतस्य । वेधसः ।

अपः । वसिष्ट । सुऽक्रतुः ॥३

"सुतस्य अभिषुतस्य “वेधसः अभिलषितस्य विधातुर्यस्य सोमस्य “धारा “प्रियं प्रीतिकरं “मधु अमृतम् “अधुक्षत दुग्धे सः “सुक्रतुः सुकर्मा सोमः "अपः वसतीवरीः “वसिष्ट आच्छादयति ॥

महांतं त्वा महीरन्वापो अर्षंति सिन्धवः ।

यद्गोभिर्वासयिष्यसे ॥४

महान्तम् । त्वा । महीः । अनु । आपः । अर्षन्ति । सिन्धवः ।

यत् । गोभिः । वासयिष्यसे ॥४

महान्तम् । त्वा । महीः । अनु । आपः । अर्षन्ति । सिन्धवः ।

यत् । गोभिः । वासयिष्यसे ॥४

हे सोम त्वं “यत् यदा यज्ञे “गोभिः गोविकारैः पयोभिः “वासयिष्यसे आच्छादयिष्यते तदा “महान्तं त्वाम् “अनु प्रति “सिन्धवः स्यन्दमानाः “महीः महत्यः “आपः “अर्षन्ति गच्छन्ति ।।

स॒मु॒द्रो अ॒प्सु मा॑मृजे विष्ट॒म्भो ध॒रुणो॑ दि॒वः ।

सोमः॑ प॒वित्रे॑ अस्म॒युः ॥५

स॒मु॒द्रः । अ॒प्ऽसु । म॒मृ॒जे॒ । वि॒ष्ट॒म्भः । ध॒रुणः॑ । दि॒वः ।

सोमः॑ । प॒वित्रे॑ । अ॒स्म॒ऽयुः ॥५

समुद्रः । अप्ऽसु । ममृजे । विष्टम्भः । धरुणः । दिवः ।

सोमः । पवित्रे । अस्मऽयुः ॥५

"समुद्रः । समुद्द्रवन्त्यस्माद्रसा इति समुद्रः । “विष्टम्भः “दिवः स्वर्गस्य “धरुणः धारकश्च “अस्मयुः अस्मत्कामः “सोमः "अप्सु उदकेषु ममृजे मृज्यते “पवित्रे अभिषिच्यत इत्यर्थः ॥ ॥१८॥

अचि॑क्रदद्वृ॒षा हरि॑र्म॒हान्मि॒त्रो न द॑र्श॒तः ।

सं सूर्ये॑ण रोचते ॥६

अचि॑क्रदत् । वृषा॑ । हरिः॑ । म॒हान् । मि॒त्रः । न । द॒र्श॒तः ।

सम् । सूर्ये॑ण । रो॒च॒ते॒ ॥६

अचिक्रदत् । वृषा । हरिः । महान् । मित्रः । न । दर्शतः ।

सम् । सूर्येण । रोचते ॥६

“वृषा कामानां वर्षकः “हरिः हरितवर्णः "महान् सर्वोत्तमः “मित्रो “न यथा सखा तद्वत् “दर्शतः दर्शनीयो योऽयं सोमः “अचिक्रदत् शब्दं करोति सोऽयं सोमः “सूर्येण सह “रोचते दिवि प्रकाशते ।।

गिर॑स्त इंद॒ ओज॑सा मर्मृ॒ज्यंते॑ अप॒स्युवः॑ ।

याभि॒र्मदा॑य॒ शुंभ॑से ॥७

गिरः॑ । ते॒ । इ॒न्दो॒ इति॑ । ओज॑सा । म॒र्मृ॒ज्यन्ते॑ । अ॒प॒स्युवः॑ ।

याभिः॑ । मदा॑य । शुम्भ॑से ॥७

गिरः । ते । इन्दो इति । ओजसा । मर्मृज्यन्ते । अपस्युवः ।

याभिः । मदाय । शुम्भसे ॥७

हे “इन्दो “ते तव “ओजसा बलेन “अपस्युवः कर्मेच्छासंबन्धिन्यः ताः “गिरः स्तुतयः “मर्मृज्यन्ते शोध्यन्ते “याभिः गीर्भिस्त्वं "मदाय क्षरन् "शुम्भसे अलंक्रियसे ।।

तं त्वा॒ मदा॑य॒ घृष्व॑य उ लोककृ॒त्नुमी॑महे ।

तव॒ प्रश॑स्तयो म॒हीः ॥८

तम् । त्वा॒ । मदा॑य । घृष्व॑ये । ऊं॒ इति॑ । लो॒क॒ऽकृ॒त्नुम् । ई॒म॒हे॒ ।

तव॑ । प्रऽश॑स्तयः । म॒हीः ॥८

तम् । त्वा । मदाय । घृष्वये । ऊं इति । लोकऽकृत्नुम् । ईमहे ।

तव । प्रऽशस्तयः । महीः ॥८

हे सोम यस्य “तव "प्रशस्तयः प्रशंसाः “महीः महत्यः “घृष्वय “उ त्वत्प्रसादाच्छत्रूणां धर्षणशीलाय यजमानायैव “लोककृत्नुम् उत्तमस्य लोकस्य कर्तारं “तं त्वां सोमं “मदाय "ईमहे वयं याचामहे ॥

अ॒स्मभ्य॑मिंदविंद्र॒युर्मध्वः॑ पवस्व॒ धार॑या ।

प॒र्जन्यो॑ वृष्टि॒माँ इ॑व ॥९

अ॒स्मभ्य॑म् । इ॒न्दो॒ इति॑ । इ॒न्द्र॒ऽयुः । मध्वः॑ । प॒व॒स्व॒ । धार॑या ।

प॒र्जन्यः॑ । वृ॒ष्टि॒मान्ऽइ॑व ॥९

अस्मभ्यम् । इन्दो इति । इन्द्रऽयुः । मध्वः । पवस्व । धारया ।

पर्जन्यः । वृष्टिमान्ऽइव ॥९

हे “इन्दो सोम “इन्द्रयुः इन्द्रकामस्त्वं “मध्वः मदकरस्यामृतस्य “धारया “पर्जन्यो “वृष्टिमानिव यथा वर्षवान् पर्जन्यो मेघस्तथा “अस्मभ्यं मेधातिथिभ्यः “पवस्व क्षर

गो॒षा इं॑दो नृ॒षा अ॑स्यश्व॒सा वा॑ज॒सा उ॒त ।

आ॒त्मा य॒ज्ञस्य॑ पू॒र्व्यः ॥१०

गो॒ऽसाः । इ॒न्दो॒ इति॑ । नृ॒ऽसाः । अ॒सि॒ । अ॒श्व॒ऽसाः । वा॒ज॒ऽसाः । उ॒त ।

आ॒त्मा । य॒ज्ञस्य॑ । पू॒र्व्यः ॥१०

गोऽसाः । इन्दो इति । नृऽसाः । असि । अश्वऽसाः । वाजऽसाः । उत ।

आत्मा । यज्ञस्य । पूर्व्यः ॥१०

हे “इन्दो “यज्ञस्य “पूर्व्यः प्रत्नः “आत्मा आत्मभूतस्त्वं “गोषाः अस्मभ्यं गवां दाता “असि भवसि । “नृषाः पुत्राणां दाता चासि । “अश्वसाः अश्वानां दाता चासि । “उत अपि च “वाजसाः अन्नानां दाता चासि ॥ ॥ १९ ॥

टिप्पणी

९.२.४ महान्तं त्वा महीरनु इति

साम १०४० (https://sa.wikisource.org/s/3kj) , जै.ब्रा. ३.१३७ (https://sa.wikisource.org/s/eef)

९.२.६ अचिक्रदद्वृषा हरि इति

वार्षाहरम् (https://sa.wikisource.org/s/2i87)

मण्डल ९

ऋग्वेदः सूक्तं ९.३

ऋग्वेदः - मण्डल ९

← सूक्तं ९.२ सूक्तं ९.३ सूक्तं ९.४ →

आजीगर्तिः शुनःशेपः, कृत्रिमो वैश्वामित्रो देवरातः

दे. पवमानः सोमः। गायत्री

एष देवो अमर्त्यः पर्णवीरिव दीयति ।

अभि द्रोणान्यासदम् ॥१॥

एष देवो विपा कृतोऽति ह्वरांसि धावति ।

पवमानो अदाभ्यः ॥२॥

एष देवो विपन्युभिः पवमान ऋतायुभिः ।

हरिर्वाजाय मृज्यते ॥३॥

एष विश्वानि वार्या शूरो यन्निव सत्वभिः ।

पवमानः सिषासति ॥४॥

एष देवो रथर्यति पवमानो दशस्यति ।

आविष्कृणोति वग्वनुम् ॥५॥

एष विप्रैरभिष्टुतोऽपो देवो वि गाहते ।

दधद्रत्नानि दाशुषे ॥६॥

एष दिवं वि धावति तिरो रजांसि धारया ।

पवमानः कनिक्रदत् ॥७॥

एष दिवं व्यासरत्तिरो रजांस्यस्पृतः ।

पवमानः स्वध्वरः ॥८॥

एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।

हरिः पवित्रे अर्षति ॥९॥

एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः ।

धारया पवते सुतः ॥१०॥

सायणभाष्यम्

'एष देवः' इति दशर्चं तृतीयं सूक्तमाजीगर्तेः शुनःशेपस्यार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च - एषः शुनःशेपः' इति । उक्तो विनियोगः ॥

ए॒ष दे॒वो अम॑र्त्यः पर्ण॒वीरि॑व दीयति ।

अ॒भि द्रोणा॑न्या॒सद॑ं ॥१

ए॒षः । दे॒वः । अम॑र्त्यः । प॒र्ण॒वीःऽइ॑व । दी॒य॒ति॒ ।

अ॒भि । द्रोणा॑नि । आ॒ऽसद॑म् ॥१

एषः । देवः । अमर्त्यः । पर्णवीःऽइव । दीयति ।

अभि । द्रोणानि । आऽसदम् ॥१

“देवः द्योतमानः “अमर्त्यः मरणरहितः “एषः सोमः “द्रोणानि द्रोणकलशानि “अभि अभिलक्ष्य “आसदम् आसदनार्थं “पर्णवीरिव यथा पक्षी तथा वेगेन “दीयति गच्छति ॥

ए॒ष दे॒वो वि॒पा कृ॒तोऽति॒ ह्वरां॑सि धावति ।

पव॑मानो॒ अदा॑भ्यः ॥२

ए॒षः । दे॒वः । वि॒पा । कृ॒तः । अति॑ । ह्वरां॑सि । धा॒व॒ति॒ ।

पव॑मानः । अदा॑भ्यः ॥२

एषः । देवः । विपा । कृतः । अति । ह्वरांसि । धावति ।

पवमानः । अदाभ्यः ॥२

"विपा अङ्गुल्या । 'अथर्यो विपः' इत्यङ्गुलिनामसु पाठात् । "कृतः अभिषुतः "एषः सोमः "देवः "पवमानः क्षरन् "अदाभ्यः केनाप्यहिंसितश्च सन् "ह्वरांसि शत्रून् "अति "धावति हन्तुमभिगच्छति ॥

ए॒ष दे॒वो विप॒न्युभि॒ः पव॑मान ऋता॒युभि॑ः ।

हरि॒र्वाजा॑य मृज्यते ॥३

ए॒षः । दे॒वः । वि॒प॒न्युऽभि॑ः । पव॑मानः । ऋ॒त॒युऽभि॑ः ।

हरि॑ः । वाजा॑य । मृ॒ज्य॒ते॒ ॥३

एषः । देवः । विपन्युऽभिः । पवमानः । ऋतयुऽभिः ।

हरिः । वाजाय । मृज्यते ॥३

"पवमानः क्षरन् "एषः सोमः "देवः "विपन्युभिः स्तोतृभिः "ऋतायुभिः यज्ञकामैः "हरिः अश्व इव "वाजाय संग्रामार्थं "मृज्यते स्तुतिभिरलंक्रियते ॥

ए॒ष विश्वा॑नि॒ वार्या॒ शूरो॒ यन्नि॑व॒ सत्व॑भिः ।

पव॑मानः सिषासति ॥४

ए॒षः । विश्वा॑नि । वार्या॑ । शूर॑ः । यन्ऽइ॑व । सत्व॑ऽभिः ।

पव॑मानः । सि॒सा॒स॒ति॒ ॥४

एषः । विश्वानि । वार्या । शूरः । यन्ऽइव । सत्वऽभिः ।

पवमानः । सिसासति ॥४

“पवमानः क्षरन् “शूरः वीरः “एषः सोमो देवः “विश्वानि सर्वाणि “वार्या वरणीयाणि धनानि सत्वभिः बलैः "यन्निव गच्छन्निव “सिषासति अस्मदर्थं संभक्तुमिच्छति ॥

ए॒ष दे॒वो रं॑थर्यति॒ पवं॑मानो दशस्यति ।

आ॒विष्कृं॑णोति वग्व॒नुं ॥५

ए॒षः । दे॒वः । र॒थ॒र्य॒ति॒ । पवं॑मानः । द॒श॒स्य॒ति॒ ।

आ॒विः । कृ॒ण॒ोति॒ । व॒ग्व॒नुम् ॥५

एषः । देवः । रथर्यति । पवमानः । दशस्यति ।

आविः । कृणोति । वग्वनुम् ॥५

“पवमानः क्षरन् “एषः सोमः "देवः “रथर्यति अस्मदीयं यागं प्रत्यागमनाय रथं कामयते । “दशस्यति आगत्य चास्मभ्यमभिलषितं प्रयच्छति। “वग्वनुं शब्दम् “आविष्कृणोति । अभिषूयमाणः प्रकटयति ॥ ॥ २० ॥

ए॒ष विप्रैं॑र॒भिष्टुं॑तो॒ऽपो दे॒वो वि गा॑हते ।

दध॒द्रत्ना॑नि दा॒शुषें॑ ॥६

ए॒षः । विप्रैः॑ । अ॒भिऽस्तुं॑तः । अ॒पः । दे॒वः । वि । गा॒ह॒ते॒ ।

दधं॑त् । रत्ना॑नि । दा॒शुषें॑ ॥६

एषः । विप्रैः । अभिऽस्तुतः । अपः । देवः । वि । गाहते ।

दधत् । रत्नानि । दाशुषे ॥६

“विप्रैः मेधाविभिः स्तोतृभिः “अभिष्टुतः परितः स्तुतः “एषः सोमः "देवः “दाशुषे हविषां प्रदात्रे यजमानाय "रत्नानि रमणीयानि धनानि “दधत् धारयन् प्रयच्छन् “अपः वसतीवरीः “वि “गाहते प्रविशति ॥

ए॒ष दिवं॒ वि धा॑वति ति॒रो रजाँ॑सि॒ धारं॑या ।

पवं॑मान॒ः कनिं॑क्रदत् ॥७

ए॒षः । दिवं॑म् । वि । धा॒व॒ति॒ । ति॒रः । रजाँ॑सि । धारं॑या ।

पवं॑मानः । कनिं॑क्रदत् ॥७

एषः । दिवम् । वि । धावति । तिरः । रजांसि । धारया ।

पवमानः । कनिक्रदत् ॥७

“धारया “पवमानः क्षरन् “एषः सोमः “कनिक्रदत् अभिषूयमाणः शब्दं कुर्वन् “रजांसि लोकान् “तिरः तिरस्कुर्वन् यागात् “दिवं स्वर्गं “वि “धावति गच्छति ॥

ए॒ष दिवं॒ व्यास॑रत्ति॒रो रजां॒स्यस्पृ॑तः ।

पव॑मानः स्वध्व॒रः ॥८

ए॒षः । दिव॑म् । वि । आ । अ॒स॒र॒त् । ति॒रः । रजाँ॑सि । अस्पृ॑तः ।

पव॑मानः । सु॒ऽअ॒ध्व॒रः ॥८

एषः । दिवम् । वि । आ । असरत् । तिरः । रजांसि । अस्पृतः ।

पवमानः । सुऽअध्वरः ॥८

“पवमानः क्षरन् “एषः सोमः “स्वध्वरः सुयज्ञः "अस्पृतः कैनाप्यहिंसितश्च सन् “रजांसि लोकान् “तिरः तिरस्कुर्वन् यज्ञात् “दिवं प्रति “व्यासरत् विसरति गच्छति ॥

ए॒ष प्र॒त्नेन॒ जन्म॑ना दे॒वो दे॒वेभ्यः॑ सु॒तः ।

हरिः॑ प॒वित्रे॑ अर्षति ॥९

ए॒षः । प्र॒त्नेन॑ । जन्म॑ना । दे॒वः । दे॒वेभ्यः॑ । सु॒तः ।

हरिः॑ । प॒वित्रे॑ । अ॒र्ष॒ति॒ ॥९

एषः । प्रत्नेन । जन्मना । देवः । देवेभ्यः । सुतः ।

हरिः । पवित्रे । अर्षति ॥९

“हरिः हरितवर्णः “देवः द्योतमानः “एषः सोमः “प्रत्नेन पुराणेन “जन्मना जननेन “देवेभ्यः देवार्थं “सुतः अभिषुतः सन् "पवित्रे स्थातुम् “अर्षति गच्छति ॥

ए॒ष उ॒ स्य पु॑रुव्र॒तो ज॑ज्ञा॒नो ज॒नय॒न्निषः॑ ।

धार॑या पवते सु॒तः ॥१०

ए॒षः । ऊ॒ं इति॑ । स्यः । पु॒रु॒ऽव्र॒तः । ज॒ज्ञा॒नः । ज॒नय॑न् । इषः᳚ ।

धार॑या । प॒व॒ते॒ । सु॒तः ॥१०

एषः । ऊं इति । स्यः । पुरुऽव्रतः । जज्ञानः । जनयन् । इषः ।

धारया । पवते । सुतः ॥१०

“स्यः “एष “उ सोम एव “पुरुव्रतः बहुकर्मा “जज्ञानः जायमान एव “इषः अन्नानि “जनयन् उत्पादयन् “सुतः अभिषुतः सन् “धारया “पवते क्षरति ॥ ॥ २१ ।।

टिप्पणी

साम १२५६ (https://sa.wikisource.org/s/3km)

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.४

ऋग्वेदः - मण्डल ९

← सूक्तं ९.३ | सूक्तं ९.४ | सूक्तं ९.५ →

हिरण्यस्तूप आङ्गिरसः

दे. पवमानः सोमः। गायत्री

सना च सोम जेषि च पवमान महि श्रवः ।

अथा नो वस्यसस्कृधि ॥१॥

सना ज्योतिः सना स्वर्विश्वा च सोम सौभगा ।

अथा नो वस्यसस्कृधि ॥२॥

सना दक्षमुत क्रतुमप सोम मृधो जहि ।

अथा नो वस्यसस्कृधि ॥३॥

पवीतारः पुनीतन सोममिन्द्राय पातवे ।

अथा नो वस्यसस्कृधि ॥४॥

त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः ।

अथा नो वस्यसस्कृधि ॥५॥

तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् ।

अथा नो वस्यसस्कृधि ॥६॥

अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम् ।

अथा नो वस्यसस्कृधि ॥७॥

अभ्यर्षानपच्युतो रयिं समत्सु सासहिः ।

अथा नो वस्यसस्कृधि ॥८॥

त्वां यज्ञैरवीवृधन्पवमान विधर्मणि ।

अथा नो वस्यसस्कृधि ॥९॥

रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर ।

अथा नो वस्यसस्कृधि ॥१०॥

सायणभाष्यम्

'सना च' इति दशर्चं चतुर्थं सूक्तमाङ्गिरसकुलस्य हिरण्यस्तूपस्थार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च- सन हिरण्यस्तूपः ' इति । उक्तो विनियोगः ॥

सना॑ च सोम॒ जेषि॑ च॒ पव॑मान॒ महि॒ श्रवः॑ ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥१

सन॑ । च॒ । सो॒म॒ । जेषि॑ । च॒ । पव॑मान । महि॑ । श्रवः॑ ।

अथ॑ । न॒ः । वस्य॑सः । कृ॒धि॒ ॥१

सन । च । सोम । जेषि । च । पवमान । महि । श्रवः ।

अथ । नः । वस्यसः । कृधि ॥१

हे “महि “श्रवः महदन्न “पवमान “सोम “सन । अस्मद्यागे यजनीयान् देवान् भज । “जेषि “च । यागविध्वंसकारिणो राक्षसांश्च जय । “अथ देवान् प्राप्य राक्षसांश्च जित्वानन्तरं “नः अस्मान “वस्यसः श्रेयसः “कृधि कुरु। श्रेयोऽस्मभ्यं देहीत्यर्थः ॥

सना॒ ज्योतिः॒ सना॒ स्व१॒॑र्विश्वा॑ च सोम॒ सौभ॑गा ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥२

सन॑ । ज्योति॑ः । सन॑ । स्व१ः । विश्वा॑ । च॒ । सो॒म॒ । सौभ॑गा ।

अथ॑ । न॒ः । वस्य॑सः । कृ॒धि॒ ॥२

सन । ज्योतिः । सन । स्वः । विश्वा । च । सोम । सौभगा ।

अथ । नः । वस्यसः । कृधि ॥२

हे "सोम त्वं "ज्योतिः तेजः "सन अस्मभ्यं प्रयच्छ । अपि च "स्वः स्वर्गं "सन अस्मभ्यं देहि । "विश्वा विश्वानि "सौभगा सौभाग्यानि "च सन । सिद्धमन्यत् ॥

सना॒ दक्ष॑मु॒त क्रतु॒मप॑ सोम॒ मृधो॑ जहि ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥३

सन॑ । दक्ष॑म् । उ॒त । क्रतु॑म् । अप॑ । सो॒म॒ । मृध॑ः । ज॒हि॒ ।

अथ॑ । न॒ः । वस्य॑सः । कृ॒धि॒ ॥३

सन । दक्षम् । उत । क्रतुम् । अप । सोम । मृधः । जहि ।

अथ । नः । वस्यसः । कृधि ॥३

हे "सोम त्वं "दक्षं बलं "सन अस्मभ्यं देहि । "उत अपि च "क्रतुं प्रज्ञानं सन । "मृधः हिंसकान् शत्रूंश्च "अप "जहि मारय । सिद्धमन्यत् ॥

पवी॑तारः पुनी॒तन॒ सोम॒मिंद्रा॑य॒ पात॑वे ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥४

पवि॑तारः । पु॒नी॒तन॑ । सोम॑म् । इन्द्रा॑य । पात॑वे ।

अथ॑ । न॒ः । वस्य॑सः । कृ॒धि॒ ॥४

पवितारः । पुनीतन । सोमम् । इन्द्राय । पातवे ।

अथ । नः । वस्यसः । कृधि ॥४

हे "पवीतारः सोमाभिषवकर्तारः यूयम् "इन्द्राय "पातवे पातुं "सोमं "पुनीतन अभिषुणुत । सिद्धमन्यत् ॥

त्वं सूर्ये॑ न॒ आ भ॑ज॒ तव॒ क्रत्वा॒ तवो॒तिभिः॑ ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥५

त्वम् । सूर्ये॑ । नः॒ । आ । भ॒ज॒ । तव॑ । क्रत्वा॑ । तव॑ । ऊ॒तिऽभिः॑ ।

अथ॑ । नः॒ । वस्य॑सः । कृ॒धि॒ ॥५

त्वम् । सूर्ये । नः । आ । भज । तव । क्रत्वा । तव । ऊतिऽभिः ।

अथ । नः । वस्यसः । कृधि ॥५

हे सोम “त्वं “तव “क्रत्वा “तव “ऊतिभिः स्वकर्तृकेण कर्मणा त्वत्कर्तृकाभी रक्षाभिश्च “नः अस्मान् “सूर्ये “आ “भज प्रापय । सिद्धमन्यत् ॥ ॥ २२ ॥

तव॒ क्रत्वा॒ तवो॒तिभि॒र्ज्योक्प॑श्येम॒ सूर्यं॑ ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥६

तव॑ । क्रत्वा॑ । तव॑ । ऊ॒तिऽभिः॑ । ज्योक् । प॒श्ये॒म॒ । सूर्य॑म् ।

अथ॑ । नः॒ । वस्य॑सः । कृ॒धि॒ ॥६

तव । क्रत्वा । तव । ऊतिऽभिः । ज्योक् । पश्येम । सूर्यम् ।

अथ । नः । वस्यसः । कृधि ॥६

हे सोम “तव “क्रत्वा प्रज्ञानेन “तव “ऊतिभिः रक्षाभिश्च “ज्योक् चिरं “पश्येम "सूर्यम् । पश्याम द्रक्ष्यामः । सिद्धमन्यत् ॥

अ॒भ्य॑र्ष स्वायुध॒ सोम॑ द्वि॒बर्ह॑सं र॒यिं ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥७

अ॒भि । अ॒र्ष॒ । सु॒ऽआ॒यु॒ध॒ । सोम॑ । द्वि॒ऽबर्ह॑सम् । र॒यिम् ।

अथ॑ । नः॒ । वस्य॑सः । कृ॒धि॒ ॥७

अभि । अर्ष । सुऽआयुध । सोम । द्विऽबर्हसम् । रयिम् ।

अथ । नः । वस्यसः । कृधि ॥७

हे "स्वायुध शोभनायुध "सोम त्वं द्विबर्हसं द्वयोर्द्यावापृथिव्योः स्थानयोः परिवृढं "रयिं धनम् "अभ्यर्ष अस्मानभिगमय । सिद्धमन्यत् ॥

अ॒भ्य॑र्षा॒नप॑च्युतो र॒यिं स॒मत्सु॑ सास॒हिः ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥८

अ॒भि । अ॒र्ष॒ । अन॑पऽच्युतः । र॒यिम् । स॒मत्ऽसु॑ । स॒स॒हिः ।

अथ॑ । नः॒ । वस्य॑सः । कृ॒धि॒ ॥८

अभि । अर्ष । अनपऽच्युतः । रयिम् । समत्ऽसु । ससहिः ।

अथ । नः । वस्यसः । कृधि ॥८

हे सोम "समत्सु संग्रामेषु अनपच्युतः शत्रुभिरनाहतः "सासहिः शत्रूणामभिभविता त्वं "रयिं धनम् "अभ्यर्ष अस्मानभिगमय । सिद्धमन्यत् ॥

त्वां य॒ज्ञैर॑वीवृध॒न्पव॑मान॒ विध॑र्मणि ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥९

त्वाम् । य॒ज्ञैः । अ॒वी॒वृ॒ध॒न् । पव॑मान । विऽध॑र्मणि ।

अथ॑ । नः॒ । वस्य॑सः । कृ॒धि॒ ॥९

त्वाम् । यज्ञैः । अवीवृधन् । पवमान । विऽधर्मणि ।

अथ । नः । वस्यसः । कृधि ॥९

हे "पवमान सोम यजमानानां विधारणाय प्रवृत्तं "त्वां "यज्ञैः "विधर्मणि आत्मनो विधारणार्थम् "अवीवृधन् यजमाना वर्धयन्ति । सिद्धमन्यत् ॥

र॒यिं न॑श्चि॒त्रम॒श्विन॒मिंदो॑ वि॒श्वायु॒मा भ॑र ।

अथा॑ नो॒ वस्य॑सस्कृधि ॥१०

र॒यिम् । नः॒ । चि॒त्रम् । अ॒श्विन॑म् । इन्दो॒ इति॑ । वि॒श्वऽआ॑युम् । आ । भ॒र॒ ।

अथ॑ । नः॒ । वस्य॑सः । कृ॒धि॒ ॥१०

रयिम् । नः । चित्रम् । अश्विनम् । इन्दो इति । विश्वऽआयुम् । आ । भर ।

अथ । नः । वस्यसः । कृधि ॥१०

हे “इन्दो यागेषु क्लिद्यमान सोम त्वं “चित्रं नानाविधम् “अश्विनम् अश्ववन्तं च “विश्वायुं सर्वगामिनं “रयिं “नः अस्मभ्यम् “आ “भर आहर । सिद्धमन्यत् ॥ ॥ २३ ॥

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.५

ऋग्वेदः - मण्डल ९

← सूक्तं ९.४ | सूक्तं ९.५ | सूक्तं ९.६ →

कश्यपोऽसितो देवलो वा।

दे. आप्रीसूक्तं (१ इध्मः समिद्धोऽग्निर्वा, २ तनूनपात्, ३ इळा, ४ बर्हिः, ५ देवीर्द्वारः, ६ उषासानक्ता, ७ दैव्यौ होतारौ प्रचेतसौ, 8 तिस्रो देव्यः सरस्वतीळाभारत्यः, ९ त्वष्टा, १० वनस्पतिः, ११ स्वाहाकृतयः)। गायत्री, ८-११ अनुष्टुप्

समिद्धो विश्वतस्पतिः पवमानो वि राजति ।

प्रीणन्वृषा कनिक्रदत् ॥१॥

तनूनपात्पवमानः शृङ्गे शिशानो अर्षति ।

अन्तरिक्षेण रारजत् ॥२॥

ईळेन्यः पवमानो रयिर्वि राजति द्युमान् ।

मधोर्धाराभिरोजसा ॥३॥

बर्हिः प्राचीनमोजसा पवमान स्तृणन्हरिः ।

देवेषु देव ईयते ॥४॥

उदातैर्जिहते बृहद्द्वारो देवीर्हिरण्ययीः ।

पवमानेन सुष्टुताः ॥५॥

सुशिल्पे बृहती मही पवमानो वृषण्यति ।

नक्तोषासा न दर्शते ॥६॥

उभा देवा नृचक्षसा होतारा दैव्या हुवे ।

पवमान इन्द्रो वृषा ॥७॥

भारती पवमानस्य सरस्वतीळा मही ।

इमं नो यज्ञमा गमन्तिस्रो देवीः सुपेशसः ॥८॥

त्वष्टारमग्रजां गोपां पुरोयावानमा हुवे ।

इन्दुरिन्द्रो वृषा हरिः पवमानः प्रजापतिः ॥९॥

वनस्पतिं पवमान मध्वा समङ्ग्धि धारया ।

सहस्रवल्शं हरितं भ्राजमानं हिरण्ययम् ॥१०॥

विश्वे देवाः स्वाहाकृतिं पवमानस्या गत ।

वायुर्बृहस्पतिः सूर्योऽग्निरिन्द्रः सजोषसः ॥११॥

सायणभाष्यम्

'समिद्धः' इत्येकादशर्चं पञ्चमं सूक्तं काश्यपस्यासितस्य देवलस्य वार्षम् । अष्टम्याद्याश्चतस्रोऽनुष्टुभः शिष्टाः सप्त गायत्र्यः । नराशंसवर्जिताः समिदादयः क्रमेण प्रत्यृचं देवताः । तथा चानुक्रान्तं - समिद्ध एकादश काश्यपोऽसितो देवलो वा विंशतिः सूक्तान्याद्यमाप्रियश्चतुरनुष्टुबन्तम् इति । काश्यपस्य पावमानमिदमाप्रीसूक्तम् । सूत्रितं च- समिद्धो अद्येति सर्वेषां यथर्षि वा (आश्व. श्रौ. ३. २) इति ॥

समि॑द्धो वि॒श्वत॒स्पतिः॒ पव॑मानो॒ वि रा॑जति ।

प्री॒णन्वृषा॒ कनि॑क्रदत् ॥१

सम्ऽइ॑द्धः । वि॒श्वतः॑ । पतिः॑ । पव॑मानः । वि । रा॒ज॒ति॒ ।

प्री॒णन् । वृषा॑ । कनि॑क्रदत् ॥१

सम्ऽइद्धः । विश्वतः । पतिः । पवमानः । वि । राजति ।

प्रीणन् । वृषा । कनिक्रदत् ॥१

आप्रीवत्सोमस्तुतिरत्र । “समिद्धः सम्यग्दीप्तः “विश्वतस्पतिः सर्वतः स्वामी “वृषा कामानां वर्षिता “पवमानः सोमः “कनिक्रदत् अभिषूयमाणः शब्दं कुर्वन् “प्रीणन् देवान् प्रीणयन् “वि “राजति यागेषु प्रकाशते ।।

तनूनपा॒त्पव॑मान॒ः शृंगे॒ शिशा॑नो अर्षति ।

अं॒तरि॑क्षेण॒ रार॑जत् ॥२

तनू॒ऽ३॒ऽनपा॑त् । पव॑मानः । शृङ्गे॒ इति॑ । शिशा॑नः । अ॒र्ष॒ति॒ ।

अ॒न्तरि॑क्षेण । रार॑जत् ॥२

तनूऽनपात् । पवमानः । शृङ्गे इति । शिशानः । अर्षति ।

अन्तरिक्षेण । रारजत् ॥२

“तनूनपात् “पवमानः सोमः । तनूनपादत्र सोमो भवति । तथा च श्रूयते-’ अद्भ्योंऽशवो जायन्ते ततः सोमो जायते' इति । “शृङ्गे दीप्ते उन्नतप्रदेशे। ‘ हृणिः शृङ्गाणि ' इति ज्वलन्नामसु पाठात् । “शिशानः तीक्ष्णीकुर्वन् “अन्तरिक्षेण “रारजत् “अर्षति । द्रोणकलशं प्रति गच्छति । तथा चाम्नायते-- द्वाभ्यां धाराभ्यामाग्रयणं गृह्णाति' इति ॥

ई॒ळेन्य॒ः पव॑मानो र॒यिर्वि रा॑जति द्यु॒मान् ।

मधो॒र्धारा॑भि॒रोज॑सा ॥३

ई॒ळेन्यः॑ । पव॑मानः । र॒यिः । वि । रा॒ज॒ति॒ । द्यु॒ऽमान् ।

मधोः॑ । धारा॑भिः । ओज॑सा ॥३

ईळेन्यः । पवमानः । रयिः । वि । राजति । द्युऽमान् ।

मधोः । धाराभिः । ओजसा ॥३

“ईळेन्यः स्तुत्यः “पवमानः सोमः “रयिः अभीष्टस्य दाता “द्युमान् दीप्तिमांश्च सन् “मधोः उदकस्य “धाराभिः सह क्षरन् "ओजसा बलेन “वि “राजति प्रकाशते ।।

ब॒र्हिः प्रा॒चीन॒मोज॑सा॒ पव॑मानः स्तृ॒णन्हरिः॑ ।

दे॒वेषु॑ दे॒व ईय॑ते ॥४

ब॒र्हिः । प्रा॒चीन॑म् । ओज॑सा । पव॑मानः । स्तृ॒णन् । हरिः॑ ।

दे॒वेषु॑ । दे॒वः । ई॒य॒ते॒ ॥४

बर्हिः । प्राचीनम् । ओजसा । पवमानः । स्तृणन् । हरिः ।

देवेषु । देवः । ईयते ॥४

“हरिः हरितवर्णः "देवः द्योतमानः सोमः “पवमानः “देवेषु यज्ञेषु “बर्हिः “प्राचीनं प्राचीनाग्रं “स्तृणन् स्तारयन “ओजसा बलेन “ईयते गच्छति ॥

उदातै॒र्जिहते बृ॒हद्द्वारो॑ दे॒वीर्हि॑र॒ण्ययीः॑ ।

पव॑माने॒न सुष्टु॑ताः ॥५

उत् । आतैः॑ । जि॒ह॒ते॒ । बृ॒हत् । द्वारः॑ । दे॒वीः । हि॒र॒ण्ययीः॑ ।

पव॑मानेन । सुऽस्तु॑ताः ॥५

उत् । आतैः । जिहते । बृहत् । द्वारः । देवीः । हिरण्ययीः ।

पवमानेन । सुऽस्तुताः ॥५

“हिरण्ययीः हिरण्मय्यः “द्वारो “देवीः द्वारो देव्यः “पवमानेन सोमेन सह "सुष्टुताः स्तोतृभिः सम्यक् स्तुताः सत्यः “बृहत् बृहतीभ्यो महतीभ्यः “आतैः आताभ्यो दिग्भ्यः । ‘आता आशाः इति दिङ्नामसु पाठात् । "उत् “जिहते उद्गच्छन्ति ॥ ॥ २४ ॥

सु॒शि॒ल्पे बृ॑ह॒ती म॒ही पव॑मानो वृषण्यति ।

नक्तो॒षासा॒ न द॑र्श॒ते ॥६

सु॒शि॒ल्पे इति॑ सु॒ऽशि॒ल्पे । बृ॒ह॒ती इति॑ । म॒ही इति॑ । पव॑मानः । वृ॒ष॒ण्य॒ति॒ ।

नक्तो॒षसा॑ । न । द॒र्श॒ते इति॑ ॥६

सुशिल्पे इति सुऽशिल्पे । बृहती इति । मही इति । पवमानः । वृषण्यति ।

नक्तोषसा । न । दर्शते इति ॥६

“सुशिल्पे सुरूपे “बृहती परिवृढे "मही महत्यौ “न संप्रति “दर्शते दर्शनीये "नक्तोषासा नक्तोषासौ “पवमानः सोमः “वृषण्यति कामयते ॥

उ॒भा दे॒वा नृ॒चक्ष॑सा॒ होता॑रा॒ दैव्या॑ हुवे ।

पव॑मान॒ इंद्रो॒ वृषा॑ ॥७

उ॒भा । दे॒वा । नृ॒ऽचक्ष॑सा । होता॑रा । दैव्या॑ । हु॒वे॒ ।

पव॑मानः । इन्द्रः॑ । वृषा॑ ॥७

उभा । देवा । नृऽचक्षसा । होतारा । दैव्या । हुवे ।

पवमानः । इन्द्रः । वृषा ॥७

“नृचक्षसा मनुष्याणां द्रष्टारौ “दैव्या दैव्यौ देवसंबन्धिनौ “होतारा होतारौ “उभा उभौ “देवा देवौ “हुवे आह्वयामि यज्ञे। “पवमानः सोमः “इन्द्रः दीप्तः । तथा च यास्कः-’ इन्द्र इरां दृणातीति वेरां दारयत इति वेरां धारयतीति वेन्धे भूतानीति वा तद्यदेनं प्राणैः समैन्धत तदिन्द्रस्येन्द्रत्वमिति विज्ञायते' (निरु. १०. ८) इति । “वृषा कामानां वर्षिता च भवतीति ।।

भार॑ती॒ पव॑मानस्य॒ सर॑स्व॒तीळा॑ म॒ही ।

इ॒मं नो॑ य॒ज्ञमा ग॑मंति॒स्रो दे॒वीः सु॒पेश॑सः ॥८

भार॑ती । पव॑मानस्य । सर॑स्वती । इळा॑ । म॒ही ।

इ॒मम् । नः॒ । य॒ज्ञम् । आ । ग॒म॒न् । ति॒स्रः । दे॒वीः । सु॒ऽपेश॑सः ॥८

भारती । पवमानस्य । सरस्वती । इळा । मही ।

इमम् । नः । यज्ञम् । आ । गमन् । तिस्रः । देवीः । सुऽपेशसः ॥८

“भारती भारत्याख्या “सरस्वती सरस्वत्याख्या च “मही महती इळाख्या च “तिस्रः “सुपेशसः सुरूपाः "देवीः देव्यः “नः अस्माकं “पवमानस्य सोमस्य संबन्धिनम् “इमं “यज्ञं प्रति “आ “गमन् आगच्छन्तु ॥

त्वष्टा॑रमग्र॒जां गो॒पां पु॑रो॒यावा॑न॒मा हु॑वे ।

इंदु॒रिंद्रो॒ वृषा॒ हरि॒ः पव॑मानः प्र॒जाप॑तिः ॥९

त्वष्टा॑रम् । अ॒ग्र॒ऽजाम् । गो॒पाम् । पु॒रः॒ऽयावा॑नम् । आ । हु॒वे॒ ।

इन्दुः॑ । इन्द्रः॑ । वृषा॑ । हरिः॑ । पव॑मानः । प्र॒जाऽप॑तिः ॥९

त्वष्टारम् । अग्रऽजाम् । गोपाम् । पुरःऽयावानम् । आ । हुवे ।

इन्दुः । इन्द्रः । वृषा । हरिः । पवमानः । प्रजाऽपतिः ॥९

“अग्रजाम् अग्रे जातं “गोपां प्रजानां पालयितारं “पुरोयावानं देवानां पुरस्ताद्गन्तारं “त्वष्टारं देवम् "आ “हुवे अहमाह्वयामि यज्ञे । “हरिः हरितवर्णः “पवमानः “इन्दुः सोमः “इन्द्रः देवानामीश्वरः “वृषा कामानां वर्षिता च "प्रजापतिः प्रजानां पालयिता च भवतीति ।

वनस्पतिं पवमान मध्वा समंग्धि धारया ।

सहस्रवल्शं हरितं भ्राजमानं हिरण्ययं ॥१०

वनस्पतिम् । पवमान । मध्वा । सम् । अङ्ग्धि । धारया ।

सहस्रऽवल्शम् । हरितम् । भ्राजमानम् । हिरण्ययम् ॥१०

वनस्पतिम् । पवमान । मध्वा । सम् । अङ्ग्धि । धारया ।

सहस्रऽवल्शम् । हरितम् । भ्राजमानम् । हिरण्ययम् ॥१०

हे “पवमान सोम “हरितं हरितवर्णं “हिरण्ययं कदाचिद्धिरण्मयवर्णं व “भ्राजमानं दीप्यमानं “सहस्रवल्शं सहस्रशाखं “वनस्पतिं देवं “धारया धारामयेण “मध्वा मधुना “समङ्ग्धि अङ्क्ष्व । संस्कुर्वित्यर्थः ॥

विश्वे देवाः स्वाहाकृतिं पवमानस्या गंत ।

वायुर्बृहस्पतिः सूर्योऽग्निरिंद्रः सजोषसः ॥११

विश्वे । देवाः । स्वाहाऽकृतिम् । पवमानस्य । आ । गत ।

वायुः । बृहस्पतिः । सूर्यः । अग्निः । इन्द्रः । सऽजोषसः ॥११

विश्वे । देवाः । स्वाहाऽकृतिम् । पवमानस्य । आ । गत ।

वायुः । बृहस्पतिः । सूर्यः । अग्निः । इन्द्रः । सऽजोषसः ॥११

हे “विश्वे “देवाः “वायुः “बृहस्पतिः च "सूर्यः च “अग्निः च “इन्द्रः च सर्वे यूयं “सजोषसः संगताः सन्तः “पवमानस्य सोमस्य “स्वाहाकृतिं स्वाहाकारं प्रति “आ “गत आगच्छत ॥ ॥२५॥

मण्डल ९

टिप्पणी

According to Sayana (RV I.13), there are 12 āprī sukta. Of the ten āprī sukta, Ṛgveda commented by Gargya Narayana, RV I.13 and I.142 invoke Narāśaṁsa and Tanūnapāt manifestations of Agni. RV I.188, III.4, IX.5 and X.110 invoke only Tanūnapāt manifestation. RV II.3, V.5, VII.2 and X.70 invoke only Narāśaṁsa manifestation.

इध्मः

ध्मा प्रपूरणशब्दो य इध्मा नाम प्रकीर्त्यते । पूरितस्यागतिर्येन तेनेध्मस्त्वं भविष्यसि ।। वराहपुराणम् १८.२६ ।। ध्मा शब्दस्य विनियोजनं प्रायः अयसः ध्मानाय एव भवति। किन्तु अत्र प्रपूरणे अस्ति। यथा उल्लिखितमस्ति, इध्मस्य उन्नतं रूपं समित् अस्ति। समित् अर्थात् समिति, सममिति। अस्मिन् जगते सममितेः ह्रासं अस्ति, येन कारणेन सममितेः प्रपूरणाय वयं भोजनं कुर्वामः। सममितेः आधुनिकं व्याख्या श्री गोवान (http://johnagowan.org/appendix1.html) कृतमस्ति। विष्णु पुराणस्य १.८.१९ कथनमस्ति - लक्ष्मी इध्मा, विष्णुः कुशः। कुशोपरि टिप्पणी (https://vedastudy.yolasite.com/kusha1.php)

ऋग्वेदः सूक्तं ९.६

ऋग्वेदः - मण्डल ९

← सूक्तं ९.५ सूक्तं ९.६ सूक्तं ९.७ →

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

मन्द्रया सोम धारया वृषा पवस्व देवयुः ।

अव्यो वारेष्वस्मयुः ॥१॥

अभि त्यं मद्यं मदमिन्दविन्द्र इति क्षर ।

अभि वाजिनो अर्वतः ॥२॥

अभि त्यं पूर्व्यं मदं सुवानो अर्ष पवित्र आ ।

अभि वाजमुत श्रवः ॥३॥

अनु द्रप्सास इन्दव आपो न प्रवतासरन् ।

पुनाना इन्द्रमाशत ॥४॥

यमत्यमिव वाजिनं मृजन्ति योषणो दश ।

वने क्रीळन्तमत्यविम् ॥५॥

तं गोभिर्वृषणं रसं मदाय देववीतये ।

सुतं भराय सं सृज ॥६॥

देवो देवाय धारयेन्द्राय पवते सुतः ।

पयो यदस्य पीपयत् ॥७॥

आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः ।

प्रत्नं नि पाति काव्यम् ॥८॥

एवा पुनान इन्द्रयुर्मदं मदिष्ठ वीतये ।

गुहा चिद्दधिषे गिरः ॥९॥

सायणभाष्यम्

'मन्द्रया' इति नवर्चं षष्ठं सूक्तं काश्यपस्यासितस्य देवलस्य वार्षं गायत्रं पवमानसोमदेवताकम् ॥

मं॒द्रया॑ सोम॒ धार॑या॒ वृषा॑ पवस्व देव॒युः ।

अव्यो॒ वारे॑ष्वस्म॒युः ॥१

म॒न्द्रया॑ । सो॒म॒ । धार॑या । वृषा॑ । प॒व॒स्व॒ । दे॒व॒ऽयुः ।

अव्यः॑ । वारे॑षु । अ॒स्म॒ऽयुः ॥१

मन्द्रया । सोम । धारया । वृषा । पवस्व । देवऽयुः ।

अव्यः । वारेषु । अस्मऽयुः ॥१

हे “सोम “वृषा कामानां वर्षिता “देवयुः देवकामः “अस्मयुः अस्मत्कामश्च “अव्यः अवेः “वारेषु वालेषु दशापवित्रे “मन्द्रया मदकरया “धारया पवस्व क्षर ॥

अ॒भि त्यं मद्यं॒ मद॒मिं॒द॒विंद्र॒ इति॑ क्षर ।

अ॒भि वा॒जिनो॒ अर्व॑तः ॥२

अ॒भि । त्यम् । मद्य॑म् । मद॑म् । इन्दो॒ इति॑ । इन्द्रः॑ । इति॑ । क्ष॒र॒ ।

अ॒भि । वा॒जिनः॑ । अर्व॑तः ॥२

अभि । त्यम् । मद्यम् । मदम् । इन्दो इति । इन्द्रः । इति । क्षर ।

अभि । वाजिनः । अर्वतः ॥२

हे "इन्दो सोम त्वम् "इन्द्रः ईश्वरः "इति कृत्वा "त्यं तं "मद्यं मदकरं "मदं रसम् "अभि "क्षर वर्ष । "वाजिनः बलवतः "अर्वतः अश्वांश्च अस्मदर्थम् अभि क्षरेत्यर्थः ।।

अ॒भि त्यं पू॒र्व्यं मदं॑ सुवा॒नो अ॑र्ष प॒वित्र॒ आ ।

अ॒भि वाज॑मु॒त श्रवः॑ ॥३

अ॒भि । त्यम् । पू॒र्व्यम् । मद॑म् । सु॒वा॒नः । अ॒र्ष॒ । प॒वित्रे॑ । आ ।

अ॒भि । वाज॑म् । उ॒त । श्रवः॑ ॥३

अभि । त्यम् । पूर्व्यम् । मदम् । सुवानः । अर्ष । पवित्रे । आ ।

अभि । वाजम् । उत । श्रवः ॥३

हे सोम "सुवानः अभिषूयमाणस्त्वं "पूर्व्यं प्रत्नं "त्यं तं प्रसिद्ध "मदं मदकरं रसं "पवित्रे "आ समन्तात् "अभि "अर्ष अभिगमय । "वाजं बलमस्मान् "अभि अर्ष । "उत अपि च "श्रवः अन्नमभ्यर्ष ।।

अनु॑ द्र॒प्सास॒ इंद॑व॒ आपो॒ न प्र॒वता॑सरन् ।

पु॒ना॒ना इंद्र॑माशत ॥४

अनु॑ । द्र॒प्सासः॑ । इन्द॑वः । आपः॑ । न । प्र॒ऽवता॑ । अ॒स॒र॒न् ।

पु॒ना॒नाः । इन्द्र॑म् । आ॒श॒त॒ ॥४

अनु । द्रप्सासः । इन्दवः । आपः । न । प्रऽवता । असरन् ।

पुनानाः । इन्द्रम् । आशत ॥४

"द्रप्सासः द्रुतगतयः "पुनानाः क्षरन्तः "इन्दवः सोमाः "प्रवता प्रवणेन मार्गेण "आपो "न आप इव "इन्द्रम् "अनु "असरन् अनुगच्छन्ति । "आशत व्याप्नुवन्ति च ।।

यमत्य॑मिव वा॒जिनं॑ मृ॒जंति॒ योष॑णो॒ दश॑ ।

वने॒ क्रीळँ॑त॒मत्य॑विं ॥५

यम् । अत्य॑म्ऽइव । वा॒जिन॑म् । मृ॒जन्ति॑ । योष॑णः । दश॑ ।

वनें । क्रीळ॑न्तम् । अति॑ऽअविम् ॥५

यम् । अत्यम्ऽइव । वाजिनम् । मृजन्ति । योषणः । दश ।

वने । क्रीळन्तम् । अतिऽअविम् ॥५

“अत्यविं दशापवित्रमतिक्रम्य “वने अरण्ये “क्रीळन्तं वर्तमानं “यं सोमं “दश दशसंख्याकाः “योषणः स्त्रियः। अङ्गुलय इत्यर्थः। तथा च निगमान्तरं - ‘तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश' (ऋ. सं. ९.१.७) इति । “वाजिनं बलिनम् “अत्यमिव अश्वमिव “मृजन्ति परिचरन्ति । उत्तरया सहान्वयः ॥ ॥ २६ ॥

तं गोभि॒र्वृष॑णं॒ रसं॒ मदा॑य दे॒ववी॑तये ।

सु॒तं भरा॑य॒ सं सृ॑ज ॥६

तम् । गोभि॑ः । वृष॑णम् । रस॑म् । मदा॑य । दे॒वऽवी॑तये ।

सु॒तम् । भरा॑य । सम् । सृ॒ज॒ ॥६

तम् । गोभिः । वृषणम् । रसम् । मदाय । देवऽवीतये ।

सुतम् । भराय । सम् । सृज ॥६

“वृषणं कामानां वर्षितारं “देववीतये देवानां पानाय "मदाय “सुतम् अभिषुतं “तं “रसं “भराय संग्रामाय “गोभिः पयोभिः “सं “सृज संयोजय ।।

दे॒वो दे॒वाय॒ धार॒येंद्रा॑य पवते सु॒तः ।

पयो॒ यद॑स्य पी॒पय॑त् ॥७

दे॒वः । दे॒वाय॑ । धार॑या । इन्द्रा॑य । प॒व॒ते॒ । सु॒तः ।

पय॑ः । यत् । अ॒स्य॒ । पी॒पय॑त् ॥७

देवः । देवाय । धारया । इन्द्राय । पवते । सुतः ।

पयः । यत् । अस्य । पीपयत् ॥७

“देवाय द्योतमानाय “इन्द्राय "सुतः अभिषुतः “देवः द्योतमानः सोमः “धारया “पवते क्षरति । “यत् यस्मात् “अस्य सोमस्य “पयः “पीपयत् इन्द्रमाप्यायितवत् । तस्माद्धारया पवत इत्यर्थः ।।

आ॒त्मा य॒ज्ञस्य॒ रंह्या॑ सुष्वा॒णः प॑वते सु॒तः ।

प्र॒त्नं नि पा॑ति॒ काव्यँ॑ ॥८

आ॒त्मा । य॒ज्ञस्य॑ । रंह्या॑ । सु॒स्वा॒नः । प॒व॒ते॒ । सु॒तः ।

प्र॒त्नम् । नि । पा॒ति॒ । काव्य॑म् ॥८

आत्मा । यज्ञस्य । रंह्या । सुस्वानः । पवते । सुतः ।

प्रत्नम् । नि । पाति । काव्यम् ॥८

"यज्ञस्य “आत्मा आत्मभूतः “सुतः अभिषुतः सोमः “सुष्वाणः यजमानेभ्यः कामान् प्रेरयन “रंह्या वेगेन “पवते क्षरति । “प्रत्नं पुरातनं “काव्यम् आत्मनः कवित्वं च “नि “पाति अभिरक्षति ॥

ए॒वा पु॑ना॒न इँ॒द्र॒युर्मदँ॑ मदिष्ठ वी॒तयें॑ ।

गुहा॑ चिद्दधिषे॒ गिरः॑ ॥९

ए॒व । पु॒ना॒नः । इ॒न्द्र॒ऽयुः । मदँ॑म् । म॒दि॒ष्ठ॒ । वी॒तयें॑ ।

गुहा॑ । चि॒त् । द॒धि॒षे॒ । गिरः॑ ॥९

एव । पुनानः । इन्द्रऽयुः । मदम् । मदिष्ठ । वीतये ।

गुहा । चित् । दधिषे । गिरः ॥९

हे “मदिष्ठ अतिशयेन मदकर सोम “इन्द्रयुः इन्द्रकामस्त्वं “वीतये इन्द्रस्य पानाय “एव एवं “मदं “पुनानः क्षरन् “गुहा गुहायाम् । यज्ञशालायामित्यर्थः । “गिरः “चित् शब्दानपि “दधिषे । अभिषववेलायामुपरवेषु धारयसि । करोषीत्यर्थः ॥ ॥ २७ ॥

टिप्पणी

देवल उपरि पौराणिकसंदर्भाः (http://puranastudy.freevar.com/pur%20index14/pva28.htm)

दैवतसौविष्टकृतैडचातुर्धाकारणिकानामुत्तरमुत्तरं ज्यायः। - आप.श्रौ.सू. 2.21.4 (https://sa.wikisource.org/s/24qr)

रुद्रांशश्चैव दुर्वासाः प्रत्यूषः सप्तमो वसुः । दत्तात्रेयमयो योगी प्रभासश्चाष्टमो वसुः ।। - भविष्यपु. ३.४.१७.८२ (https://sa.wikisource.org/s/hub)

पुराणेषु देवलः सप्तमवसोः प्रत्यूषस्य पुत्रः अस्ति। अष्टमवसोः प्रभासस्य पुत्रः विश्वकर्मा अस्ति।

धैवतस्वरोपरि टिप्पणी (https://sites.google.com/site/vedastudy/sangama-satyaloka/sangita2)

मण्डल ९

ऋग्वेदः सूक्तं ९.७

ऋग्वेदः - मण्डल ९
← सूक्तं ९.६ सूक्तं ९.७ सूक्तं ९.८ →
कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः ।

विदाना अस्य योजनम् ॥१॥

प्र धारा मध्वो अग्रियो महीरपो वि गाहते ।

हविर्हविष्षु वन्द्यः ॥२॥

प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने ।

सद्माभि सत्यो अध्वरः ॥३॥

परि यत्काव्या कविर्नृम्णा वसानो अर्षति ।

स्वर्वाजी सिषासति ॥४॥

पवमानो अभि स्पृधो विशो राजेव सीदति ।

यदीमृण्वन्ति वेधसः ॥५॥

अव्यो वारे परि प्रियो हरिर्वनेषु सीदति ।

रेभो वनुष्यते मती ॥६॥

स वायुमिन्द्रमश्विना साकं मदेन गच्छति ।

रणा यो अस्य धर्मभिः ॥७॥

आ मित्रावरुणा भगं मध्वः पवन्त ऊर्मयः ।

विदाना अस्य शक्मभिः ॥८॥

अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये ।

श्रवो वसूनि सं जितम् ॥९॥

सायणभाष्यम्

‘असृग्रम्' इति नवर्चं सप्तमं सूक्तम् । ' असृग्रम्' इत्यनुक्रान्तम् । असितो देवलो वर्षिः ।। तौ च कश्यपगोत्रजौ' । गायत्रं छन्दः । सोमः पवमानो देवता । उक्तो विनियोगः ॥

अस॑ृग्र॒मिंद॑वः प॒था धर्म॑न्नृ॒तस्य॑ सु॒श्रियः॑ ।

वि॒दा॒ना अ॑स्य॒ योज॑नं ॥१

अस॑ृग्रम् । इन्द॑वः । प॒था । धर्म॑न् । ऋ॒तस्य॑ । सु॒ऽश्रियः॑ ।

वि॒दा॒नाः । अ॒स्य॒ । योज॑नम् ॥१

असृग्रम् । इन्दवः । पथा । धर्मन् । ऋतस्य । सुऽश्रियः ।

विदानाः । अस्य । योजनम् ॥१

“सुश्रियः शोभनश्रयणाः “अस्य इन्द्रस्य “योजनं संबन्धं “विदानाः जानन्तः “इन्दवः सोमाः “धर्मन् कर्मणि "ऋतस्य यज्ञस्य “पथा मार्गेण “असृग्रं सूज्यन्ते ॥

प्र धार॒ा मध्वो॑ अग्रि॒यो म॒हीर॒पो वि गा॑हते ।

ह॒विर्ह॒विष्षु॒ वंद्यः॑ ॥२

प्र । धारा॑ । मध्वः॑ । अ॒ग्रि॒यः । म॒हीः । अ॒पः । वि । गा॒ह॒ते॒ ।

ह॒विः । ह॒विष्षु॑ । वन्द्यः॑ ॥२

प्र । धारा । मध्वः । अग्रियः । महीः । अपः । वि । गाहते ।

हविः । हविष्षु । वन्द्यः ॥२

“हविष्षु हविषां मध्ये "वन्द्यः स्तुत्यः “हविः हविरात्मको यः सोमः “महीः महतीः “अपः वसतीवरीः “वि “गाहते तस्य “मध्वः सोमस्य “अग्रियः मुख्याः “धाराः “प्र पतन्तीत्यर्थः ॥

प्र यु॒जो वा॒चो अ॑ग्रि॒यो वृषाव॑ चक्रद॒द्वने॑ ।

सद्मा॒भि स॒त्यो अ॑ध्व॒रः ॥३

प्र । यु॒जः । वा॒चः । अ॒ग्रि॒यः । वृषा॑ । अव॑ । च॒क्र॒द॒त् । वने॑ ।

सद्म॑ । अ॒भि । स॒त्यः । अ॒ध्व॒रः ॥३

प्र । युजः । वाचः । अग्रियः । वृषा । अव । चक्रदत् । वने ।

सद्म । अभि । सत्यः । अध्वरः ॥३

एतदेव दर्शयति । “वृषा कामानां वर्षकः “सत्यः सत्यभूतः “अध्वरः हिंसावर्जितः “अग्रियः मुख्यः “सोमः “सद्म यज्ञगृहम् “अभि प्रति “वने उदके “युजः युक्ताः “वाचः “प्र “अव “चक्रदत् अवक्रन्दति । शब्दान् करोतीत्यर्थः ।।

परि॒ यत्काव्या॑ क॒विर्नृ॒म्णा वसा॑नो॒ अर्ष॑ति ।

स्व॑र्वा॒जी सिं॑षासति ॥४

परिं । यत् । काव्या॑ । क॒विः । नृ॒म्णा । वसा॑नः । अर्ष॑ति ।

स्वः॑ । वा॒जी । सि॒सा॒स॒ति॒ ॥४

परि । यत् । काव्या । कविः । नृम्णा । वसानः । अर्षति ।

स्वः । वाजी । सिसासति ॥४

“कविः क्रान्तकर्मा सोमः “नृम्णा नृम्णानि धनानि “वसानः आच्छादयन् स्तोतॄणां “काव्या काव्यानि कविकर्माणि स्तोत्राणि “यत् यदा “परि “अर्षति परिगच्छति तदा “स्वः स्वर्गे “वाजी बलवानन्नवान् वा इन्द्रः “सिषासति । यागं प्रत्यागन्तुं स्वकीयं बलं संभक्तुमिच्छति ॥

पव॑मानो अ॒भि स्पृधो॒ विशो॒ राजे॑व सीदति ।

यदी॑मृ॒ण्वंति॑ वे॒धसः॑ ॥५

पव॑मानः । अ॒भि । स्पृधः॑ । विशः॑ । राजा॑ऽइव । सी॒द॒ति॒ ।

यत् । ई॒म् । ऋ॒ण्वन्ति॑ । वे॒धसः॑ ॥५

पवमानः । अभि । स्पृधः । विशः । राजाऽइव । सीदति ।

यत् । ईम् । ऋण्वन्ति । वेधसः ॥५

"यत यदा "ईम् एनं सोमं "वेधसः कर्मणां कर्तारः "ऋण्वन्ति प्रेरयन्ति तदा "पवमानः क्षरन्नेष सोमः "स्पृधः स्पर्धमानान् यागविघ्नकारिणो राक्षसान् "विशः स्पर्धमानान् मनुष्यान् "राजेव यथा राजा तद्वत् "अभि "षीदति नाशयितुमभिगच्छति ॥ ॥ २८ ॥

अव्यो॒ वारे॒ परि॑ प्रि॒यो हरि॒र्वने॑षु सीदति ।

रे॒भो व॑नुष्यते म॒ती ॥६

अव्यः॑ । वारे॑ । परि॑ । प्रि॒यः । हरिः॑ । वने॑षु । सी॒द॒ति॒ ।

रे॒भः । व॒नु॒ष्य॒ते॒ । म॒ती ॥६

अव्यः । वारे । परि । प्रियः । हरिः । वनेषु । सीदति ।

रेभः । वनुष्यते । मती ॥६

"हरिः हरितवर्णः "प्रियः देवानां प्रियतम एव सोमः "वनेषु उदकेषु संपृक्तः "अव्यः अवेः "वारे वालोपेते "परि "षीदति । किंच "रेभः अभिषववेलायामुपरवेषु शब्दं कुर्वन् "मती मत्या स्तुत्या "वनुष्यते सेव्यते ॥

स वा॒युमिंद्रं॑म॒श्विना॑ सा॒कं मदे॑न गच्छति ।

रणा॒ यो अ॑स्य॒ धर्म॑भिः ॥७

सः । वा॒युम् । इन्द्र॑म् । अ॒श्विना॑ । सा॒कम् । मदे॑न । ग॒च्छ॒ति॒ ।

रण॑ । यः । अ॒स्य॒ । धर्म॑ऽभिः ॥७

सः । वायुम् । इन्द्रम् । अश्विना । साकम् । मदेन । गच्छति ।

रण । यः । अस्य । धर्मऽभिः ॥७

“यः यजमानः "अस्य सोमस्य “धर्मभिः कर्मभिः क्रयणाभिषवादिभिः “रण रमते "सः यजमानः “वायुमिन्द्रं च "अश्विना अश्विनौ च "मदेन "साकं सह "गच्छति प्राप्नोति ॥

आ मि॒त्रावरु॑णा॒ भगं॒ मध्वः॑ पवंत ऊ॒र्मयः॑ ।

वि॒दा॒ना अं॑स्य॒ शक्म॑भिः ॥८

आ । मि॒त्रावरु॑णा । भग॑म् । मध्वः॑ । प॒व॒न्ते॒ । ऊ॒र्मयः॑ ।

वि॒दा॒नाः । अ॒स्य॒ । शक्म॑ऽभिः ॥८

आ । मित्रावरुणा । भगम् । मध्वः । पवन्ते । ऊर्मयः ।

विदानाः । अस्य । शक्मऽभिः ॥८

येषां यजमानानां "मध्वः सोमस्य “ऊर्मयः तरङ्गाः "मित्रावरुणा मित्रावरुणौ देवौ “भगं भगाख्यं देवं च प्रति "पवन्ते क्षरन्ति ते यजमानाः "अस्य सोमस्येमं सोमं “विदानाः जानन्तः “शक्मभिः सुखैः संगच्छन्त इति शेषः ॥

अ॒स्मभ्यँ॑ रोदसी र॒यिं मध्वो॒ वाज॑स्य सा॒तये॑ ।

श्रवो॒ वसू॑नि॒ सं जि॑तं ॥९

अ॒स्मभ्य॑म् । रो॒द॒सी॒ इति॑ । र॒यिम् । मध्वः॑ । वाज॑स्य । सा॒तये॑ ।

श्रवः॑ । वसू॑नि । सम् । जि॒त॒म् ॥९

अस्मभ्यम् । रोदसी इति । रयिम् । मध्वः । वाजस्य । सातये ।

श्रवः । वसूनि । सम् । जितम् ॥९

हे "रोदसी द्यावापृथिव्यौ युवां "मध्वः देवानां मोदयितुः “वाजस्य सोमात्मकस्यान्नस्य “सातये लाभाय “अस्मभ्यं काश्यपासितेभ्यः काश्यपदेवलेभ्यो वा "रयिं धनं “श्रवः अन्नं च “वसूनि वासकान्यन्यान्यपि पश्वादीनि धनानि “सं "जितं संजयतम् । प्रयच्छतमित्यर्थः ॥ ॥ २९ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.८

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन् ।

वर्धन्तो अस्य वीर्यम् ॥१॥

पुनानासश्चमूषदो गच्छन्तो वायुमश्विना ।

ते नो धान्तु सुवीर्यम् ॥२॥

इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।

ऋतस्य योनिमासदम् ॥३॥

मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः ।

अनु विप्रा अमादिषुः ॥४॥

देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः ।

सं गोभिर्वासयामसि ॥५॥

पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः ।

परि गव्यान्यव्यत ॥६॥

मघोन आ पवस्व नो जहि विश्वा अप द्विषः ।

इन्दो सखायमा विश ॥७॥

वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि ।

सहो नः सोम पृत्सु धाः ॥८॥

नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम् ।

भक्षीमहि प्रजामिषम् ॥९॥

सायणभाष्यम्

‘एते सोमाः' इति नवर्चमष्टमं सूक्तम् । ऋष्याद्याः पूर्ववत् । अनुक्रान्तं च -- एते सोमाः ' इति । उक्तः सूक्तविनियोगः । ग्रावस्तोत्रे गाणगारिमतेनाभिरूपकरणे सोमे मृज्यमाने ' मृजन्ति त्वा इत्येषा । सूत्रितं च- अथापरमभिरूपं कुर्यादिति गाणगारिरा प्यायस्व समेतु त इति तिस्रो मृजन्ति त्वा दश क्षिपः' (आश्व. श्रौ. ५.१२) इति ।।

ए॒ते सोमा॑ अ॒भि प्रि॒यमिंद्र॑स्य॒ काम॑मक्षरन् ।

वर्धं॑तो अस्य वी॒र्यं॑ ॥१

ए॒ते । सोमाः॑ । अ॒भि । प्रि॒यम् । इन्द्र॑स्य । काम॑म् । अ॒क्ष॒र॒न् ।

वर्ध॑न्तः । अ॒स्य॒ । वी॒र्य॑म् ॥१

एते । सोमाः । अभि । प्रियम् । इन्द्रस्य । कामम् । अक्षरन् ।

वर्धन्तः । अस्य । वीर्यम् ॥१

“एते अभिषुता इमे “सोमाः "अस्य इन्द्रस्य "वीर्यं शक्तिं "वर्धन्तः वर्धयन्तः "इन्द्रस्य “कामं काम्यं "प्रियं प्रीतिकरं रसम् "अभि "अक्षरन् अभिपवन्ते अभ्यवर्षन् ।

पु॒ना॒नास॑श्चमू॒षदो॒ गच्छं॑तो वा॒युम॒श्विना॑ ।

ते नो॑ धांतु सु॒वीर्यं॑ ॥२

पु॒ना॒नासः॑ । च॒मू॒ऽसदः॑ । गच्छ॑न्तः । वा॒युम् । अ॒श्विना॑ ।

ते । न॒ः । धा॒न्तु॒ । सु॒ऽवीर्यं॑म् ॥२

पुनानासः । चमूऽसदः । गच्छन्तः । वायुम् । अश्विना ।

ते । नः । धान्तु । सुऽवीर्यम् ॥२

“ते प्रसिद्धाः सोमाः "पुनानासः पुनाना अभिषूयमाणाः “चमूषदः चमसेषु सीदन्तः "वायुम् "अश्विना अश्विनौ च "गच्छन्तः प्राप्नुवन्तः "नः अस्मभ्यं "सुवीर्यं शोभनवीर्यं “धान्तु धारयन्तु । प्रयच्छन्त्वित्यर्थः ॥

इंद्र॑स्य सोम॒ राध॑से पुना॒नो हार्दि॑ चोदय ।

ऋ॒तस्य॒ योनि॑मा॒सदं॑ ॥३

इन्द्र॑स्य । सो॒म॒ । राध॑से । पु॒ना॒नः । हार्दि॑ । चो॒द॒य॒ ।

ऋ॒तस्य॑ । योनि॑म् । आ॒ऽसद॑म् ॥३

इन्द्रस्य । सोम । राधसे । पुनानः । हार्दि । चोदय ।

ऋतस्य । योनिम् । आऽसदम् ॥३

हे "सोम "पुनानः अभिषूयमाणः "हार्दि अभिलषितस्त्वम् "इन्द्रस्य "राधसे संराधनाय "ऋतस्य यज्ञस्य “योनिं स्थानम् "आसदं यथेन्द्र आसीदति तथेन्द्रं "चोदय प्रेरय ॥

मृ॒जंति॑ त्वा॒ दश॒ क्षिपो॑ हि॒न्वंति॑ स॒प्त धी॒तयः॑ ।

अनु॒ विप्रा॑ अमादिषुः ॥४

मृ॒जन्ति॑ । त्वा॒ । दश॑ । क्षिपः॑ । हि॒न्वन्ति॑ । स॒प्त । धी॒तयः॑ ।

अनु॑ । विप्राः॑ । अ॒मा॒दि॒षु॒ः ॥४

मृजन्ति । त्वा । दश । क्षिपः । हिन्वन्ति । सप्त । धीतयः ।

अनु । विप्राः । अमादिषुः ॥४

हे सोम “त्वा त्वां “दश दशसंख्याकाः "क्षिपः अङ्गुलयः । ‘ व्रिशः क्षिपः' इत्यङ्गुलिनामसु पाठात्। "मृजन्ति परिचरन्ति । "सप्त सप्तसंख्याकाः “धीतयः होत्रकाश्च त्वा त्वां हिन्वन्ति स्वस्वव्यापारैः प्रीणयन्ति । "विप्राः मेधाविनश्च त्वाम् "अनु "अमादिषुः अनुमादयन्ति ।

दे॒वेभ्य॑स्त्वा॒ मदा॑य॒ कं सृ॑जा॒नमति॑ मे॒ष्यः॑ ।

सं गोभि॑र्वासयामसि ॥५

दे॒वेभ्यः॑ । त्वा॒ । मदा॑य । कम् । सृ॒जा॒नम् । अति॑ । मे॒ष्यः॑ ।

सम् । गोभिः॑ । वा॒स॒या॒म॒सि॒ ॥५

देवेभ्यः । त्वा । मदाय । कम् । सृजानम् । अति । मेष्यः ।

सम् । गोभिः । वासयामसि ॥५

हे सोम “मेष्यः अवेर्लोमानि “कम् उदकं च "अति अभि “सृजानं “त्वा त्वां “देवेभ्यः देवानाम् । विभक्तिव्यत्ययः । "मदाय मदार्थं “गोभिः गोविकारैः पयोभिः "सं वासयामसि संवासयामः ॥ ॥ ३० ॥

पु॒ना॒नः क॒लशे॒ष्वा वस्त्रा॑ण्यरु॒षो हरिः॑ ।

परि॒ गव्या॑न्यव्यत ॥६

पु॒ना॒नः । क॒लशे॑षु । आ । वस्त्रा॑णि । अ॒रु॒षः । हरिः॑ ।

परि॑ । गव्या॑नि । अ॒व्य॒त॒ ॥६

पुनानः । कलशेषु । आ । वस्त्राणि । अरुषः । हरिः ।

परि । गव्यानि । अव्यत ॥६

“पुनानः पूयमानः "कलशेषु कुम्भेषु निषिच्यमानः "अरुषः आरोचमानः "हरिः हरितवर्णः सोमः “गव्यानि दध्यादीनि "वस्त्राणि वासांसीव “परि “अव्यत पर्याच्छादयति ।।

म॒घोन॒ आ प॑वस्व नो ज॒हि विश्वा॒ अप॒ द्विषः॑ ।

इंदो॒ सखा॑य॒मा वि॑श ॥७

म॒घोनः॑ । आ । प॒व॒स्व॒ । नः॒ । ज॒हि । विश्वाः॑ । अप॑ । द्विषः॑ ।

इन्दो॒ इति॑ । सखा॑यम् । आ । वि॒श॒ ॥७

मघोनः । आ । पवस्व । नः । जहि । विश्वाः । अप । द्विषः ।

इन्दो इति । सखायम् । आ । विश ॥७

हे “इन्दो सोम "मघोनः धनवतः "नः अस्मान् प्रति "पवस्व क्षर ।.”विश्वाः विश्वान् "द्विषः द्वेष्टॄन् "अप "जहि मारय च । "सखायं प्रियमिन्द्रम् "आ "विश आप्नुहि च ॥

वृ॒ष्टिं दि॒वः परि॑ स्रव द्यु॒म्नं पृ॑थि॒व्या अधि॑ ।

सहो॑ नः सोम पृ॒त्सु धाः॑ ॥८

वृ॒ष्टिम् । दि॒वः । परि॑ । स्र॒व॒ । द्यु॒म्नम् । पृ॒थि॒व्याः । अधि॑ ।

सहः॑ । न॒ः । सो॒म॒ । पृ॒त्ऽसु । धा॒ः ॥८

वृष्टिम् । दिवः । परि । स्रव । द्युम्नम् । पृथिव्याः । अधि ।

सहः । नः । सोम । पृत्ऽसु । धाः ॥८

हे "सोम त्वं "दिवः द्युलोकात् "वृष्टिं वर्षं “परि “स्रव वर्ष । “पृथिव्या "अधि पृथिव्याम् । अधिः सप्तम्यर्थानुवादः । “द्युम्नम् अन्नं चोत्पादयेति शेषः । “नः अस्माकं "सहः बलं च “पृत्सु संग्रामेषु “धाः धेहि ।।

नृ॒चक्ष॑सं त्वा व॒यमिंद्र॑पीतं स्व॒र्विदं॑ ।

भ॒क्षी॒महिं प्र॒जामिषं॑ ॥९

नृ॒ऽचक्ष॑सम् । त्वा॒ । व॒यम् । इन्द्र॑ऽपीतम् । स्वः॒ऽविद॑म् ।

भ॒क्षी॒महिं । प्र॒ऽजाम् । इष॑म् ॥९

नृऽचक्षसम् । त्वा । वयम् । इन्द्रऽपीतम् । स्वःऽविदम् ।

भक्षीमहि । प्रऽजाम् । इषम् ॥९

हे सोम "नृचक्षसं नृणां द्रष्टारं “स्वर्विदं सर्वज्ञम् “इन्द्रपीतम् इन्द्रेण पीतं “त्वा त्वां पिबन्तः “वयं काश्यपासिताः काश्यपदेवला वा "प्रजां पुत्रादिकाम् “इषम् अन्नं च "भक्षीमहि भजेमहि ॥ ॥ ३१ ॥

टिप्पणी

९.८.१ एते सोम अभि प्रियम् इति

साम ११७८ (https://sa.wikisource.org/s/3kl)

मण्डल ९

ऋग्वेदः सूक्तं ९.९

ऋग्वेदः - मण्डल ९

← सूक्तं ९.८ | सूक्तं ९.९ | सूक्तं ९.१० →

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः ।

सुवानो याति कविक्रतुः ॥१॥

प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे ।

वीत्यर्ष चनिष्ठया ॥२॥

स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् ।

महान्मही ऋतावृधा ॥३॥

स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः ।

या एकमक्षि वावृधुः ॥४॥

ता अभि सन्तमस्तृतं महे युवानमा दधुः ।

इन्दुमिन्द्र तव व्रते ॥५॥

अभि वह्निरमर्त्यः सप्त पश्यति वावहिः ।

क्रिविर्देवीरतर्पयत् ॥६॥

अवा कल्पेषु नः पुमस्तमांसि सोम योध्या ।

तानि पुनान जङ्घनः ॥७॥

नू नव्यसे नवीयसे सूक्ताय साधया पथः ।

प्रत्नवद्रोचया रुचः ॥८॥

पवमान महि श्रवो गामश्वं रासि वीरवत् ।

सना मेधां सना स्वः ॥९॥

सायणभाष्यम्

'परि प्रिया' इति नवर्चं नवमं सूक्तम् । ऋष्याद्याः पूर्ववत् । परि प्रिया' इत्यनुक्रान्तम् । उक्तो विनियोगः ।।

परिं प्रि॒या दि॒वः क॒विर्वयां॑सि न॒प्त्यो॑र्हि॒तः ।

सु॒वा॒नो यां॑ति क॒विक्रं॑तुः ॥१

परिं । प्रि॒या । दि॒वः । क॒विः । वयां॑सि । न॒प्त्यो॑ः । हि॒तः ।

सु॒वा॒नः । या॒ति॒ । क॒विऽक्रं॑तुः ॥१

परि । प्रिया । दिवः । कविः । वयांसि । नप्त्योः । हितः ।

सुवानः । याति । कविऽक्रतुः ॥१

"कविः मेधावी "कविक्रतुः क्रान्तप्रज्ञः क्रान्तकर्मा वा सोमः “नप्त्योः अधिषवणफलकयोः “हितः निहितः "सुवानः अभिषूयमाणः "दिवः द्युलोकस्य "परि "प्रिया अतिप्रियाणि "वयांसि ग्राव्णः । तथा च मन्त्रवर्णः -- वयांसि श्येना अतिथयः पर्वतानां ककुभः' इति । "याति गच्छति ॥

प्रप्र॒ क्षयां॑य॒ पन्यं॑से॒ जनां॑य॒ जुष्टों अ॒द्रुहें ।

वी॒त्यं॑र्ष॒ चनिं॑ष्ठया ॥२

प्रऽप्रं । क्षयां॑य । पन्यं॑से । जनां॑य । जुष्टः॑ । अ॒द्रुहें ।

वी॒ती । अ॒र्ष॒ । चनि॑ष्ठया ॥२

प्रऽप्र । क्षयाय । पन्यसे । जनाय । जुष्टः । अद्रुहे ।

वीती । अर्ष । चनिष्ठया ॥२

हे सोम “प्रप्र अत्यन्तं "क्षयाय तव निवासभूताय "अद्रुहे अद्रोग्ध्रे च “पन्यसे स्तोत्रे “जनाय मनुष्याय "वीती वीत्यै भक्षणाय "जुष्टः पर्याप्तस्त्वं "चनिष्ठया अन्नवत्तमया धारया "अर्ष यागं प्रति गच्छ ।

स सू॒नुर्मा॒तरा॒ शुचि॑र्जा॒तो जा॒ते अ॑रोचयत् ।

म॒हान्म॒ही ऋ॑ता॒वृधा॑ ॥३

सः । सू॒नुः । मा॒तरा॑ । शुचि॑ः । जा॒तः । जा॒ते इति॑ । अ॒रो॒च॒य॒त् ।

म॒हान् । म॒ही इति॑ । ऋ॒त॒ऽवृधा॑ ॥३

सः । सूनुः । मातरा । शुचिः । जातः । जाते इति । अरोचयत् ।

महान् । मही इति । ऋतऽवृधा ॥३

“जातः उत्पन्नः "शुचिः विशुद्धः "महान् हविरुत्तमः "सः सोमाख्यः "सूनुः पुत्रः "मही महत्यौ “ऋतावृधा यज्ञस्य वर्धयित्र्यौ "जाते विश्वस्य जनयित्र्यौ "मातरा आत्मनो मातरौ द्यावापृथिव्यौ "अरोचयत् रोचयति दीपयति ॥

स स॒प्त धी॒तिभि॑र्हि॒तो न॒द्यो॑ अजिन्वद॒द्रुहः॑ ।

या एक॒मक्षि॑ वावृ॒धुः ॥४

सः । स॒प्त । धी॒तिऽभिः॑ । हि॒तः । न॒द्यः॑ । अ॒जि॒न्व॒त् । अ॒द्रुहः॑ ।

याः । एक॑म् । अक्षि॑ । व॒वृ॒धुः ॥४

सः । सप्त । धीतिऽभिः । हितः । नद्यः । अजिन्वत् । अद्रुहः ।

याः । एकम् । अक्षि । ववृधुः ॥४

“याः नद्यः यम् “एकं मुख्यं सोमम् "अक्षि अक्षीणं “ववृधुः वर्धयन्ति "सः सोमः “धीतिभिः अङ्गुलिभिः । ‘ रशना धीतयः' इत्यङ्गुलिनामसु पाठात् । “हितः निहितः सन् “अद्रुहः द्रोहवर्जिताः "सप्त सप्तसंख्याकाः "नद्यः नदीः “अजिन्वत् प्रीणयति ॥

ता अ॒भि संत॒मस्तृ॑तं म॒हे युवा॑न॒मा द॑धुः ।

इंदुंमिंद्र तवं व्रते ॥५

ताः । अभि । सन्तंम् । अस्तृंतम् । महे । युवांनम् । आ । दधुः ।

इन्दुंम् । इन्द्र । तवं । व्रते ॥५

ताः । अभि । सन्तम् । अस्तृतम् । महे । युवानम् । आ । दधुः ।

इन्दुम् । इन्द्र । तव । व्रते ॥५

हे "इन्द्र "तव त्वदीये “व्रते कर्मणि “ताः अङ्गुल्यः । पूर्वत्र धीतिभिः इत्यङ्गुलीनामुपात्तत्वात् तच्छब्देन परामर्शः । "सन्तं विद्यमानम् "अस्तृतम् अहिंसितं "युवानं नित्यतरुणम् "इन्दुं सोमं “महे महतेऽभिषवादिलक्षणाय कर्मणे “अभि “आ “दधुः ॥ ॥ ३३ ॥

अभि वह्निरमंर्त्यः सप्त पंश्यति वावंहिः ।

क्रिविर्देवीरंतर्पयत् ॥६

अभि । वह्निः । अमंर्त्यः । सप्त । पश्यति । वावंहिः ।

क्रिविः । देवीः । अतर्पयत् ॥६

अभि । वह्निः । अमर्त्यः । सप्त । पश्यति । वावहिः ।

क्रिविः । देवीः । अतर्पयत् ॥६

यः "वह्निः यज्ञस्य धुरो वोढा "अमर्त्यः मरणरहितः "वावहिः देवानां तृप्तेरत्यन्तं वोढा च सोमः "सप्त नदीः "पश्यति सोऽयं “क्रिविः कूपरूपेण पूर्णोऽवस्थितः सन् “देवीः नदीः "अतर्पयत् तर्पयति ॥

अवा कल्पेंषु नः पुमस्तमांसि सोम योध्यां ।

तानिं पुनान जंघनः ॥७

अवं । कल्पेंषु । नः । पुमः । तमांसि । सोम । योध्यां ।

तानिं । पुनान् । जङ्घनः ॥७

अव । कल्पेषु । नः । पुमः । तमांसि । सोम । योध्या ।

तानि । पुनान । जङ्घनः ॥७

हे "पुमः पुमन् सोम "कल्पेषु कल्पनीयेष्वहःसु "नः अस्मान् "अव रक्ष । अपि च "पुनान हे पवमान "सोम त्वं "योध्या योधनीयानि “तमांसि रक्षांसि यानि "तानि जङ्घनः नाशय ॥

नू नव्यं॑से॒ नवी॑यसे सू॒क्ताय॑ साधया प॒थः ।

प्र॒त्न॒वद्रो॑चया॒ रुचः॑ ॥८

नु । नव्यं॑से । नवी॑यसे । सु॒ऽउ॒क्ताय॑ । सा॒ध॒य॒ । प॒थः ।

प्र॒त्न॒ऽवत् । रो॒च॒य॒ । रुचः॑ ॥८

नु । नव्यसे । नवीयसे । सुऽउक्ताय । साधय । पथः ।

प्रत्नऽवत् । रोचय । रुचः ॥८

हे सोम "नव्यसे नव्याय नूतनाय "नवीयसे स्तुत्यायास्माकं "सूक्ताय "पथः मार्गान् "नु क्षिप्रं “साधय अभिगच्छ । अपि च "प्रत्नवत् यथापूर्वं "रुचः स्वदीप्तीः "रोचय प्रकाशय ॥

पवं॑मान॒ महि॒ श्रवो॒ गामश्वं॑ रासि वी॒रवं॑त् ।

सनां॑ मे॒धां सना॒ स्वः॑ ॥९

पवं॑मान । महिं॑ । श्रवः॑ । गाम् । अश्वं॑म् । रा॒सि॒ । वी॒रऽवं॑त् ।

सनं॑ । मे॒धाम् । सनं॑ । स्वः॑ ॥९

पवमान । महि । श्रवः । गाम् । अश्वम् । रासि । वीरऽवत् ।

सन । मेधाम् । सन । स्वः ॥९

हे "पवमान सोम यस्त्वं "वीरवत् पुत्रवत् "महि महत् "श्रवः अन्नं “गां च “अश्वं च “रासि अस्मभ्यं प्रयच्छसि स त्वं “मेधां “सन अस्मभ्यं प्रयच्छ । अपि च “स्वः यदस्मदभिलषितं तत् सर्वं “सन देहि ॥ ॥ ३३ ॥

टिप्पणी

९.९.१ परि प्रिया दिवः इति

और्णायवाद्यम् (https://sa.wikisource.org/s/2gz1)

और्णायवोत्तरम् (https://sa.wikisource.org/s/1zoc)

और्णायवे द्वे (https://sa.wikisource.org/s/2gzs) (ग्रामगेयः)

मण्डल ९

ऋग्वेदः सूक्तं ९.१०

दे. पवमानः सोमः। गायत्री।

प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः ।

सोमासो राये अक्रमुः ॥१॥

हिन्वानासो रथा इव दधन्विरे गभस्त्योः ।

भरासः कारिणामिव ॥२॥

राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते ।

यज्ञो न सप्त धातृभिः ॥३॥

परि सुवानास इन्दवो मदाय बर्हणा गिरा ।

सुता अर्षन्ति धारया ॥४॥

आपानासो विवस्वतो जनन्त उषसो भगम् ।

सूरा अण्वं वि तन्वते ॥५॥

अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः ।

वृष्णो हरस आयवः ॥६॥

समीचीनास आसते होतारः सप्तजामयः ।

पदमेकस्य पिप्रतः ॥७॥

नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा ।

कवेरपत्यमा दुहे ॥८॥

अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितम् ।

सूरः पश्यति चक्षसा ॥९॥

सायणभाष्यम्

‘ प्र स्वानासः' इति नवर्चं दशमं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘प्र स्वानासः' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

प्र स्वा॒नासो॒ रथा॑ इ॒वार्व॑न्तो॒ न श्र॑व॒स्यवः॑ ।

सोमा॑सो रा॒ये अ॑क्रमुः ॥१

प्र । स्वा॒नासः॑ । रथाः॑ऽइव । अर्व॑न्तः । न । श्र॒व॒स्यवः॑ ।

सोमा॑सः । रा॒ये । अ॒क्र॒मुः॒ ॥१

प्र । स्वानासः । रथाःऽइव । अर्वन्तः । न । श्रवस्यवः ।

सोमासः । राये । अक्रमुः ॥१

“प्र “स्वानासः अभिषववेलायामुपरवेषु शब्दं कुर्वन्तः “सोमासः सोमाः “रथाइव यथा शब्दं कुर्वन्तो रथा: “अर्वन्तो “न यथा शब्दं कुर्वन्तोऽश्वाः तथा “श्रवस्यवः शत्रुभ्योऽन्नमिच्छन्तः “राये। यजमानानां धनाय “अक्रमुः आगच्छन् ।

हि॒न्वा॒नासो॒ रथा॑ इव दधन्वि॒रे गभ॑स्त्योः ।

भरा॑सः का॒रिणा॑मिव ॥२

हि॒न्वा॒नासः॑ । रथाः॑ऽइव । द॒ध॒न्वि॒रे । गभ॑स्त्योः ।

भरा॑सः । का॒रिणा॑म्ऽइव ॥२

हिन्वानासः । रथाःऽइव । दधन्विरे । गभस्त्योः ।

भरासः । कारिणाम्ऽइव ॥२

सोमाः “रथाइव यथा रथास्तथा “हिन्वानासः हिन्वाना यागदेशं प्रति गच्छन्तः “भरासः भराः “कारिणामिव यथा भारवाहिनां बाह्वोर्धीयन्ते तथा “गभस्त्योः ऋत्विजां बाह्वोः। ' गभस्ती बाहू' इति बाहुनामसु पाठात् । “दधन्विरे धीयन्ते ॥

राजा॑नो॒ न प्रश॑स्तिभि॒: सोमा॑सो॒ गोभि॑रंजते ।

य॒ज्ञो न स॒प्त धा॒तृभि॑ः ॥३

राजा॑नः । न । प्रश॑स्तिऽभिः । सोमा॑सः । गोभि॑ः । अ॒ञ्ज॒ते॒ ।

य॒ज्ञः । न । स॒प्त । धा॒तृऽभि॑ः ॥३

राजानः । न । प्रशस्तिऽभिः । सोमासः । गोभिः । अञ्जते ।

यज्ञः । न । सप्त । धातृऽभिः ॥३

“सोमासः सोमाः “प्रशस्तिभिः प्रशस्ताभिः स्तुतिरूपाभिर्वाग्भिः “राजानो “न यथा राजानः “सप्त “धातृभिः सप्त होत्राभिः “यज्ञो “न यथा च यज्ञस्तथा “गोभिः गोविकारैः पयोभिः “अञ्जते अज्यन्ते । संस्क्रियन्त इत्यर्थः ।।

परि॑ सुवा॒नास॒ इंद॑वो॒ मदा॑य ब॒र्हणा॑ गि॒रा ।

सु॒ता अ॑र्षंति॒ धार॑या ॥४

परि॑ । सु॒वा॒नास॑ः । इन्द॑वः । मदा॑य । ब॒र्हणा॑ । गि॒रा ।

सु॒ताः । अ॒र्ष॒न्ति॒ । धार॑या ॥४

परि । सुवानासः । इन्दवः । मदाय । बर्हणा । गिरा ।

सुताः । अर्षन्ति । धारया ॥४

“सुवानासः सुवाना अभिषूयमाणाः “इन्दवः सोमाः “बर्हणा महत्या “गिरा स्तुतिरूपया वाचा “सुताः अभिषुताः सन्तः “मदाय मदार्थं “धारया "परि “अर्षन्ति परितो गच्छन्ति ।

आ॒पा॒नासो॑ वि॒वस्व॑तो॒ जन॑त उ॒षसो॒ भग॑ं ।

सूरा॒ अण्वं॒ वि त॑न्वते ॥५

आ॒पा॒नासः॑ । वि॒वस्व॑तः । जन॑न्तः । उ॒षसः॑ । भग॑म् ।

सूराः॑ । अण्व॑म् । वि । त॒न्व॒ते॒ ॥५

आपानासः । विवस्वतः । जनन्तः । उषसः । भगम् ।

सूराः । अण्वम् । वि । तन्वते ॥५

“विवस्वतः इन्द्रस्य “आपानासः अपानभूताः “उषसः “भगं “जनन्तः जनयन्तः “सूराः सरन्तः सोमाः “अण्वं “वि “तन्वते । अभिषववेलायामुपरवेषु शब्दं कुर्वन्ति ॥ ॥ ३४ ॥

अप॒ द्वारा॑ मती॒नां प्र॒त्ना ऋ॑ण्वंति का॒रवः॑ ।

वृष्णो॒ हर॑स आ॒यवः॑ ॥६

अप॑ । द्वारा॑ । म॒ती॒नाम् । प्र॒त्नाः । ऋ॒ण्व॒न्ति॒ । का॒रवः॑ ।

वृष्णः॑ । हर॑से । आ॒यवः॑ ॥६

अप । द्वारा । मतीनाम् । प्रत्नाः । ऋण्वन्ति । कारवः ।

वृष्णः । हरसे । आयवः ॥६

"मतीनां स्तुतीनां “कारवः कर्तार ऋत्विजः “प्रत्नाः पुराणाः “वृष्णः सेचकस्य सोमस्य “हरस आहरस आहर्तारश्च “आयवः मनुष्याः “द्वारा यज्ञस्य द्वाराणि "अप “ऋण्वन्ति ।।

स॒मी॒ची॒नास॑ आसते॒ होता॑रः स॒प्तजा॑मयः ।

प॒दमेक॑स्य॒ पिप्र॑तः ॥७

स॒म्ऽई॒ची॒नासः॑ । आ॒स॒ते॒ । होता॑रः । स॒प्तऽजा॑मयः ।

प॒दम् । एक॑स्य । पिप्र॑तः ॥७

सम्ऽईचीनासः । आसते । होतारः । सप्तऽजामयः ।

पदम् । एकस्य । पिप्रतः ॥७

“समीचीनासः समीचीनाः “जामयः जामिसदृशाः “एकस्य सोमस्य “पदं स्थानं "पिप्रतः पूरयन्तः “सप्त “होतारः सप्त होत्रकाः “आसते यज्ञ उपविशन्ति ॥

नाभा॒ नाभिं॑ न॒ आ द॑दे॒ चक्षु॑श्चि॒त्सूर्ये॒ सचा॑ ।

क॒वेरप॑त्य॒मा दु॑हे ॥८

नाभा॑ । नाभि॑म् । नः॒ । आ । द॒दे॒ । चक्षुः॑ । चि॒त् । सूर्ये॑ । सचा॑ ।

क॒वेः । अप॑त्यम् । आ । दु॒हे॒ ॥८

नाभा । नाभिम् । नः । आ । ददे । चक्षुः । चित् । सूर्ये । सचा ।

कवेः । अपत्यम् । आ । दुहे ॥८

"नाभिं यज्ञस्य नाभिभूतं सोमं “नः अस्माकं “नाभा नाभौ अहम् “आ “ददे । पिबामीत्यर्थः । पीतसोमानामस्माकं चक्षुश्चित् चक्षुरपि “सूर्ये “सचा संगतं भवति । किंच “कवेः क्रान्तकर्मणः सोमस्य “अपत्यम्' अंशुम् “आ “दुहे आपूरयामि । ।

अ॒भि प्रि॒या दि॒वस्प॒दम॑ध्व॒र्युभि॒र्गुहा॑ हि॒तं ।

सूरः॑ पश्यति॒ चक्ष॑सा ॥९

अ॒भि । प्रि॒या । दि॒वः । प॒दम् । अ॒ध्व॒र्युऽभिः॑ । गुहा॑ । हि॒तम् ।

सूरः॑ । प॒श्य॒ति॒ । चक्ष॑सा ॥९

अभि । प्रिया । दिवः । पदम् । अध्वर्युऽभिः । गुहा । हितम् ।

सूरः । पश्यति । चक्षसा ॥९

"सूरः सुवीर्य इन्द्रः “चक्षसा चक्षुषा “दिवः दीप्तस्यात्मनः “प्रिया प्रियं “पदम् “अध्वर्युभिः “गुहा गुहायां हृदये “हितं निहितं पीतं सोममपि “अभि “पश्यति ।। ॥ ३५ ॥

टिप्पणी

९.१०.१ प्र स्वानासो इति

साम ११११ (https://sa.wikisource.org/s/3kk)

मण्डल ९

ऋग्वेदः सूक्तं ९.११

ऋग्वेदः - मण्डल ९
← सूक्तं ९.१० सूक्तं ९.११ सूक्तं ९.१२ →
कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

उपास्मै गायता नरः पवमानायेन्दवे ।

अभि देवाँ इयक्षते ॥१॥

अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः ।

देवं देवाय देवयु ॥२॥

स नः पवस्व शं गवे शं जनाय शमर्वते ।

शं राजन्नोषधीभ्यः ॥३॥

बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे ।

सोमाय गाथमर्चत ॥४॥

हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन ।

मधावा धावता मधु ॥५॥

नमसेदुप सीदत दध्नेदभि श्रीणीतन ।

इन्दुमिन्द्रे दधातन ॥६॥

अमित्रहा विचर्षणिः पवस्व सोम शं गवे ।

देवेभ्यो अनुकामकृत् ॥७॥

इन्द्राय सोम पातवे मदाय परि षिच्यसे ।

मनश्चिन्मनसस्पतिः ॥८॥

पवमान सुवीर्यं रयिं सोम रिरीहि नः ।

इन्दविन्द्रेण नो युजा ॥९॥

सायणभाष्यम्

‘ उपास्मै ' इति नवर्चमेकादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । उपास्मै इत्यनुक्रान्तम् । उक्तः सूक्तविनियोगः । अभिष्टवे घर्मदुघावत्सेऽपनीयमाने 'नमसेदुप' इत्येषा । सूत्रितं च-’ नमसेदुप सीदत संजानाना उप सीदन्नभिज्ञु' (आश्व. श्रौ. ४.७) इति ॥

उपा॑स्मै गायता नरः॒ पव॑माना॒येंद॑वे ।

अ॒भि दे॒वाँ इय॑क्षते ॥१

उप॑ । अ॒स्मै॒ । गा॒य॒त॒ । न॒रः॒ । पव॑मानाय । इन्द॑वे ।

अ॒भि । दे॒वान् । इय॑क्षते ॥१

उप । अस्मै । गायत । नरः । पवमानाय । इन्दवे ।

अभि । देवान् । इयक्षते ॥१

हे “नरः नेतार ऋत्विजः यज्ञस्य "देवान् इन्द्रादीन् “अभि “इयक्षते (http://puranastudy.byethost14.com/pur_index24/yaksha.htm) आभिमुख्येन यष्टुमिच्छते “पवमानाय क्षरते “अस्मै अभिषूयमाणाय “इन्दवे सोमाय “उप (https://sa.wikisource.org/s/h7g) “गायत उपगानं कुरुत ॥

अ॒भि ते॒ मधु॑ना॒ पयोऽथ॑र्वाणो अशिश्रयुः ।

दे॒वं दे॒वाय॑ देव॒यु ॥२

अ॒भि । ते॒ । मधु॑ना । पयः॑ । अथ॑र्वाणः । अ॒शि॒श्र॒यु॒ः ।

दे॒वम् । दे॒वाय॑ । दे॒व॒ऽयु ॥२

अभि । ते । मधुना । पयः । अथर्वाणः । अशिश्रयुः ।

देवम् । देवाय । देवऽयु ॥२

हे सोम “ते तव “देवं देवनशीलं “देवयु देवयुं देवकामं रसं “देवाय देवनशीलायेन्द्राय “मधुना “पयः गव्येन पयसा “अथर्वाणः ऋषयः “अभि "अशिश्रयुः अभ्यश्रीणन् । समस्कुर्वन्नित्यर्थः ॥

स नः॑ पवस्व॒ शं गवे॒ शं जना॑य॒ शमर्व॑ते ।

शं रा॑ज॒न्नोष॑धीभ्यः ॥३

सः । नः॒ । प॒व॒स्व॒ । शम् । गवे॑ । शम् । जना॑य । शम् । अर्व॑ते ।

शम् । रा॒ज॒न् । ओष॑धीभ्यः ॥३

सः । नः । पवस्व । शम् । गवे । शम् । जनाय । शम् । अर्वते ।

शम् । राजन् । ओषधीभ्यः ॥३

हे “राजन् दीप्यमान सोम “सः प्रसिद्धस्त्वं “नः अस्माकं “गवे “शं सुखं “पवस्व क्षर । “जनाय पुत्रादये च “शं पवस्व । “अर्वते अश्वाय च “शं पवस्व । “ओषधीभ्यः च “शं पवस्व ॥

ब॒भ्रवे॒ नु स्वत॑वसेऽरु॒णाय॑ दिवि॒स्पृशे॑ ।

सोमा॑य गा॒थम॑र्चत ॥४

ब॒भ्रवे॑ । नु । स्वऽत॑वसे । अ॒रु॒णाय॑ । दि॒वि॒ऽस्पृशे॑ ।

सोमा॑य । गा॒थम् । अ॒र्च॒त॒ ॥४

बभ्रवे । नु । स्वऽतवसे । अरुणाय । दिविऽस्पृशे ।

सोमाय । गाथम् । अर्चत ॥४

हे स्तोतारः “बभ्रवे बभ्रुवर्णाय “स्वतवसे स्वबलाय “अरुणाय कदाचिदरुणवर्णाय “दिविस्पृशे दिवं स्पृशते “सोमाय “नु क्षिप्रं “गाथं स्तुतिरूपां वाचम् “अर्चत । उच्चारयतेत्यर्थः ॥

हस्त॑च्युतेभि॒रद्रि॑भिः सु॒तं सोमं॑ पुनीतन ।

मधा॒वा धा॑वता॒ मधु॑ ॥५

हस्त॑ऽच्युतेभिः । अद्रि॑ऽभिः । सु॒तम् । सोम॑म् । पु॒नी॒त॒न॒ ।

मधौ॑ । आ । धा॒व॒त॒ । मधु॑ ॥५

हस्तऽच्युतेभिः । अद्रिऽभिः । सुतम् । सोमम् । पुनीतन ।

मधौ । आ । धावत । मधु ॥५

हे ऋत्विजः "हस्तच्युतेभिः हस्तप्रच्युतैः "अद्रिभिः अभिषवग्रावभिः "सुतम् अभिषुतं "सोमं "पुनीतन पवित्रे पावयत । अपि च "मधौ मदकरे सोमे "मधु गव्यं पयः "आ "धावत प्रक्षिपत ॥ ॥३६॥

नम॒सेदुप॑ सीदत द॒ध्नेद॒भि श्री॑णीतन ।

इंदु॒मिंद्रे॑ दधातन ॥६

नम॑सा । इत् । उप॑ । सी॒द॒त॒ । द॒ध्ना । इत् । अ॒भि । श्री॒णी॒त॒न॒ ।

इन्दु॑म् । इन्द्रे॑ । द॒धा॒त॒न॒ ॥६

नमसा । इत् । उप । सीदत । दध्ना । इत् । अभि । श्रीणीतन ।

इन्दुम् । इन्द्रे । दधातन ॥६

हे ऋत्विजः "नमसेत् नमस्कारेणैव "उप "सीदत सोममुपगच्छत । "दध्नेत् दध्नैव "अभि "श्रीणीतन अभिश्रीणीत च । "इन्द्रे "इन्दुं सोमं "दधातन धत्त च ।

अ॒मि॒त्र॒हा विच॑र्षणिः॒ पव॑स्व सोम॒ शं गवे॑ ।

दे॒वेभ्यो॑ अनुकाम॒कृत् ॥७

अ॒मि॒त्र॒ऽहा । विऽच॑र्षणिः । पव॑स्व । सो॒म॒ । शम् । गवे॑ ।

दे॒वेभ्यः॑ । अ॒नु॒का॒म॒ऽकृत् ॥७

अमित्रऽहा । विऽचर्षणिः । पवस्व । सोम । शम् । गवे ।

देवेभ्यः । अनुकामऽकृत् ॥७

हे सोम “अमित्रहा अमित्राणां हन्ता “विचर्षणिः विद्रष्टा “देवेभ्यः “अनुकामकृत् अभीष्टस्य कर्ता त्वं “गवे अस्माकं गवे “शं सुखं “पवस्व क्षर ।।

इंद्रा॑य सोम॒ पात॑वे॒ मदा॑य॒ परि॑ षिच्यसे ।

म॒न॒श्चिन्मन॑स॒स्पतिः॑ ॥८

इन्द्रा॑य । सो॒म॒ । पात॑वे । मदा॑य । परि॑ । सि॒च्य॒से॒ ।

म॒नः॒ऽचित् । मन॑सः । पतिः॑ ॥८

इन्द्राय । सोम । पातवे । मदाय । परि । सिच्यसे ।

मनःऽचित् । मनसः । पतिः ॥८

हे "सोम "मनश्चित् मनसो “ज्ञाता “मनसस्पतिः ईश्वरस्त्वम् “इन्द्राय इन्द्रस्य “पातवे पानाय “मदाय च “परि “षिच्यसे परितः पात्रेषु सिच्यसे ।।

पव॑मान सु॒वीर्यं॑ र॒यिं सो॑म रिरीहि नः ।

इंद॒विंद्रे॑ण नो यु॒जा ॥९

पव॑मान । सु॒ऽवीर्य॑म् । र॒यिम् । सो॒म॒ । रि॒री॒हि॒ । नः॒ ।

इन्दो॒ इति॑ । इन्द्रे॑ण । नः॒ । यु॒जा ॥९

पवमान । सुऽवीर्यम् । रयिम् । सोम । रिरीहि । नः ।

इन्दो इति । इन्द्रेण । नः । युजा ॥९

हे “इन्दो क्लिद्यमान “पवमान “सोम त्वं “सुवीर्यं शोभनवीर्योपेतं “रयिं धनं “नः अस्माकं संबन्धिना “इन्द्रेण “युजा सहायेन “नः अस्मभ्यं “रिरीहि देहि ॥ ॥ ३७ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.१२

ऋग्वेदः - मण्डल ९

← सूक्तं ९.११ सूक्तं ९.१२ सूक्तं ९.१३ →

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

सोमा असृग्रमिन्दवः सुता ऋतस्य सादने ।

इन्द्राय मधुमत्तमाः ॥१॥

अभि विप्रा अनूषत गावो वत्सं न मातरः ।

इन्द्रं सोमस्य पीतये ॥२॥

मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् ।

सोमो गौरी अधि श्रितः ॥३॥

दिवो नाभा विचक्षणोऽव्यो वारे महीयते ।

सोमो यः सुक्रतुः कविः ॥४॥

यः सोमः कलशेष्वाँ अन्तः पवित्र आहितः ।

तमिन्दुः परि षस्वजे ॥५॥

प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि ।

जिन्वन्कोशं मधुश्चुतम् ॥६॥

नित्यस्तोत्रो वनस्पतिर्धीनामन्तः सबर्दुघः ।

हिन्वानो मानुषा युगा ॥७॥

अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति ।

विप्रस्य धारया कविः ॥८॥

आ पवमान धारय रयिं सहस्रवर्चसम् ।

अस्मे इन्दो स्वाभुवम् ॥९॥

सायणभाष्यम्

'सोमा असृग्रम्' इति नवर्चं द्वादशं सूक्तम् । ऋष्यायाः पूर्ववत् । 'सोमा असृग्रम्' इत्यनुक्रान्तम् । उक्तो विनियोगः ।।

सोमा॑ असृग्र॒मिंद॑वः सु॒ता ऋ॒तस्य॒ साद॑ने ।

इंद्रा॑य॒ मधु॑मत्तमाः ॥१

सोमाः॑ । अ॒सृ॒ग्र॒म् । इन्द॑वः । सु॒ताः । ऋ॒तस्य॑ । सद॑ने ।

इन्द्रा॑य । मधु॑मत्ऽतमाः ॥१

सोमाः । असृग्रम् । इन्दवः । सुताः । ऋतस्य । सदने ।

इन्द्राय । मधुमत्ऽतमाः ॥१

“सुताः अभिषुताः “मधुमत्तमाः अतिशयेन मधुमन्तः “इन्दवः “सोमाः “ऋतस्य यज्ञस्य “सादने गृहे "इन्द्राय इन्द्रार्थम् “असृग्रं सृज्यन्ते ।।

अ॒भि विप्रा॑ अनूषत॒ गावो॑ व॒त्सं न मा॒तरः॑ ।

इंद्रं॒ सोम॑स्य पी॒तये॑ ॥२

अ॒भि । विप्राः॑ । अ॒नू॒ष॒त॒ । गावः॑ । व॒त्सम् । न । मा॒तरः॑ ।

इन्द्र॑म् । सोम॑स्य । पी॒तये॑ ॥२

अभि । विप्राः । अनूषत । गावः । वत्सम् । न । मातरः ।

इन्द्रम् । सोमस्य । पीतये ॥२

“विप्राः मेधाविनः “सोमस्य “पीतये पानाय “इन्द्रं “मातरः जनयित्र्यः “गावः “वत्सं “न यथा वत्सं प्रति तद्वत् "अभि “अनूषत अभिशब्दयन्ति ।।

म॒द॒च्युत्क्षे॑ति॒ साद॑ने॒ सिंधो॑रू॒र्मा वि॑प॒श्चित् ।

सोमो॑ गौ॒री अधि॑ श्रि॒तः ॥३

म॒द॒ऽच्युत् । क्षे॒ति॒ । सद॑ने । सिन्धोः॑ । ऊ॒र्मा । वि॒प॒ऽचित् ।

सोमः॑ । गौ॒री इति॑ । अधि॑ । श्रि॒तः ॥३

मदऽच्युत् । क्षेति । सदने । सिन्धोः । ऊर्मा । विपःऽचित् ।

सोमः । गौरी इति । अधि । श्रितः ॥३

“मदच्युत् मदकरस्य रसस्य च्यावयिता सोमः “सादने । संहितायां दीर्घश्छान्दसः । स्थाने “क्षेति निवसति । एतदेव विवृणोति । “सिन्धाः नद्याः “ऊर्मा ऊर्मौ तरङ्गे। वसतीवरीष्वित्यर्थः । “विपश्चित् विद्वान् “सोमः “गौरी “अधि गौर्यामधि । अधीति सप्तम्यर्थानुवादः। माध्यमिकायां वाचि । ‘गौरी गान्धर्वी ' इति वाङ्नामसु पाठात् । “श्रितः निवसति ॥

दि॒वो नाभा॑ विचक्ष॒णोऽव्यो॒ वारे॑ महीयते ।

सोमो॒ यः सु॒क्रतुः॑ क॒विः ॥४

दि॒वः । नाभा॑ । वि॒ऽच॒क्ष॒णः । अव्यः॑ । वारे॑ । म॒ही॒य॒ते॒ ।

सोमः॑ । यः । सु॒ऽक्रतुः॑ । क॒विः ॥४

दिवः । नाभा । विऽचक्षणः । अव्यः । वारे । महीयते ।

सोमः । यः । सुऽक्रतुः । कविः ॥४

"यः “सुक्रतुः सुप्रज्ञः “कविः क्रान्तकर्मा “विचक्षणः विद्रष्टा सः “सोमः “दिवः अन्तरिक्षस्य “नाभा नाभौ नाभिभूते “अव्यः अवेः “वारे वाले “महीयते पूज्यते । पूयमानः स्तूयत इत्यर्थः ॥

यः सोमः॑ क॒लशे॒ष्वाँ अं॒तः प॒वित्र॒ आहि॑तः ।

तमिं॒दुः॒ परि॑ षस्वजे ॥५

यः । सोमः॑ । क॒लशे॑षु । आ । अ॒न्तरिति॑ । प॒वित्रे॑ । आऽहि॑तः ।

तम् । इन्दुः॑ । परि॑ । स॒स्व॒जे॒ ॥५

यः । सोमः । कलशेषु । आ । अन्तरिति । पवित्रे । आऽहितः ।

तम् । इन्दुः । परि । सस्वजे ॥५

“यः “सोमः “कलशेषु कुम्भेषु “आ आस्ते यश्च “पवित्र पवित्रस्य “अन्तः मध्ये “आहितः निहितः “तं स्वांशभूतं सोमम् “इन्दुः सोमो देवः “परि “षस्वजे प्रविशति ॥ ॥ ३८ ॥

प्र वाच॒मिं॑दु॑रिष्यति समु॒द्रस्याधि॑ वि॒ष्टपि॑ ।

जिन्व॒न्कोशं॑ मधु॒श्चुतं॑ ॥६

प्र । वाच॑म् । इन्दुः॑ । इ॒ष्य॒ति॒ । स॒मु॒द्रस्य॑ । अधि॑ । वि॒ष्टपि॑ ।

जिन्व॑न् । कोश॑म् । म॒धु॒ऽश्चुत॑म् ॥६

प्र । वाचम् । इन्दुः । इष्यति । समुद्रस्य । अधि । विष्टपि ।

जिन्वन् । कोशम् । मधुऽश्चुतम् ॥६

“इन्दुः सोमः “मधुश्चुतं मधुनश्च्यावकं “कोशं मेघम् । असुरः कोशः' इति मेघनामसु पाठात् । “जिन्वन् प्रीणयन् “समुद्रस्य अन्तरिक्षस्य “अधि “विष्टपि विष्टब्धे स्थाने “वाचं “प्र “इष्यति प्रेरयति । पवित्रे पूयमानः शब्दं करोतीत्यर्थः ॥

नित्य॑स्तोत्रो॒ वन॒स्पति॑र्धी॒नाम॒ंतः स॑ब॒र्दुघः॑ ।

हि॒न्वा॒नो मानु॑षा यु॒गा ॥७

नित्य॑ऽस्तोत्रः । वन॒स्पतिः॑ । धी॒नाम् । अ॒न्तरिति॑ । स॒बः॒ऽदुघः॑ ।

हि॒न्वा॒नः । मानु॑षा । यु॒गा ॥७

नित्यऽस्तोत्रः । वनस्पतिः । धीनाम् । अन्तरिति । सबःऽदुघः ।

हिन्वानः । मानुषा । युगा ॥७

“नित्यस्तोत्रः संततस्तोत्रः "सबर्दुघः अमृतस्य दोग्धा “वनस्पतिः वनानां पालयिता सोमः “मानुषा मानुषाणि "युगा युगानि अहीनैकाहात्मकानि “हिन्वानः प्रीणयन् “धीनां कर्मणाम् “अन्तः मध्ये निवसतीत्यर्थः ॥

अ॒भि प्रि॒या दि॒वस्प॒दा सोमो॑ हिन्वा॒नो अ॑र्षति ।

विप्र॑स्य॒ धार॑या क॒विः ॥८

अ॒भि । प्रि॒या । दि॒वः । प॒दा । सोमः॑ । हि॒न्वा॒नः । अ॒र्ष॒ति॒ ।

विप्र॑स्य । धार॑या । क॒विः ॥८

अभि । प्रिया । दिवः । पदा । सोमः । हिन्वानः । अर्षति ।

विप्रस्य । धारया । कविः ॥८

“कविः क्रान्तकर्मा “सोमः “दिवः अन्तरिक्षात् “हिन्वानः प्रेर्यमाणः “विप्रस्य मेधाविनः स्वस्य “धारया “प्रिया प्रियाणि "पदा पदानि स्थानानि “अभि “अर्षति अभिगच्छति ॥

आ प॑वमान धारय र॒यिं स॒हस्र॑वर्चसं ।

अ॒स्मे इं॑दो स्वा॒भुवं॑ ॥९

आ । प॒व॒मा॒न॒ । धा॒र॒य॒ । र॒यिम् । स॒हस्र॑ऽवर्चसम् ।

अ॒स्मे इति॑ । इ॒न्दो॒ इति॑ । सु॒ऽआ॒भुव॑म् ॥९

आ । पवमान । धारय । रयिम् । सहस्रऽवर्चसम् ।

अस्मे इति । इन्दो इति । सुऽआभुवम् ॥९

हे "पवमान “इन्दो सोम त्वं सहस्रवर्चसं बहुदीप्तिं "स्वाभुवं शोभनभवनं “रयिं धनम् “अस्मे अस्मासु “धारय । प्रक्षिपेत्यर्थः ॥ ॥ ३९ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये षष्ठाष्टके सप्तमोऽध्यायः ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.१३

ऋग्वेदः - मण्डल ९
← सूक्तं ९.१२ सूक्तं ९.१३ सूक्तं ९.१४ →
कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।

वायोरिन्द्रस्य निष्कृतम् ॥१॥

पवमानमवस्यवो विप्रमभि प्र गायत ।

सुष्वाणं देववीतये ॥२॥

पवन्ते वाजसातये सोमाः सहस्रपाजसः ।

गृणाना देववीतये ॥३॥

उत नो वाजसातये पवस्व बृहतीरिषः ।

द्युमदिन्दो सुवीर्यम् ॥४॥

ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम् ।

सुवाना देवास इन्दवः ॥५॥

अत्या हियाना न हेतृभिरसृग्रं वाजसातये ।

वि वारमव्यमाशवः ॥६॥

वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः ।

दधन्विरे गभस्त्योः ॥७॥

जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् ।

विश्वा अप द्विषो जहि ॥८॥

अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।

योनावृतस्य सीदत ॥९॥

सायणभाष्यम्

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

षष्ठस्य सप्तमोऽध्यायः संग्रहात्संप्रदर्शितः ।

अथाष्टमः सुमतिना संगमेन प्रदर्श्यते ॥

तत्र सोमः पुनानः' इति नवचं त्रयोदशं सूक्तम् । असितो देवलो वर्षिः। सोमो देवता । ' पवमानगुणः सोमो विज्ञेयः काश्यपावृषी । इति विद्यादनुक्तेऽपि लाघवाया दृळहच्युतात् ॥ 'सोमः इत्यनुक्रान्तम् । गतो विनियोगः ॥

सोमः॑ पुना॒नो अ॑र्षति स॒हस्र॑धारो॒ अत्य॑विः ।

वा॒योरिं॑द्र॑स्य निष्कृ॒तं ॥१

सोमः॑ । पु॒ना॒नः । अ॒र्ष॒ति॒ । स॒हस्र॑ऽधारः । अति॑ऽअविः ।

वा॒योः । इन्द्र॑स्य । नि॒ःऽकृ॒तम् ॥१

सोमः । पुनानः । अर्षति । सहस्रऽधारः । अतिऽअविः ।

वायोः । इन्द्रस्य । निःऽकृतम् ॥१

अयं “पुनानः पावकः “सोमः “अर्षति गच्छति । कीदृशोऽयं पवमानः। “सहस्रधारः अपरिमितधारः “अत्यविः । अत्राविशब्देन तल्लोमान्युच्यन्ते । अविलोमभिर्निष्पादितं दशापवित्रमित्यर्थः । तदतिक्रम्य गच्छतीत्यत्यविः । किमर्थम् । “वायोरिन्द्रस्य च पानायेति शेषः । किं प्रति । “निष्कृतम् । निरित्येष समित्येतस्मिन्नर्थे । संस्कृतं पात्रं प्रति ॥

पव॑मानमवस्यवो॒ विप्र॑म॒भि प्र गा॑यत ।

सु॒ष्वा॒णं दे॒ववी॑तये ॥२

पव॑मानम् । अ॒व॒स्य॒वः॒ । विप्र॑म् । अ॒भि । प्र । गा॒य॒त॒ ।

सु॒स्वा॒नम् । दे॒वऽवी॑तये ॥२

पवमानम् । अवस्यवः । विप्रम् । अभि । प्र । गायत ।

सुस्वानम् । देवऽवीतये ॥२

हे “अवस्यवः रक्षणकामा उद्गात्रादयः यूयं “पवमानं शोधकं “विप्रं विशेषेण देवानां प्रीणयितारं विप्रवच्छुद्धं वा । अथवा विप्र इति मेधाविनाम। मेधाविनम्। “देववीतये देवपानाय “सुष्वाणं सूयमानम् "अभि “प्र “गायत आभिमुख्येन प्रकर्षेण स्तुत ॥

पव॑न्ते॒ वाज॑सातये॒ सोमा॑ः स॒हस्र॑पाजसः ।

गृ॒णा॒ना दे॒ववी॑तये ॥३

पव॑न्ते । वाज॑ऽसातये । सोमा॑ः । स॒हस्र॑ऽपाजसः ।

गृ॒णा॒नाः । दे॒वऽवी॑तये ॥३

पवन्ते । वाजऽसातये । सोमाः । सहस्रऽपाजसः ।

गृणानाः । देवऽवीतये ॥३

“पवन्ते क्षरन्ति “सोमाः । किमर्थम् । “वाजसातये अन्नस्य लाभाय । कीदृशाः । “सहस्रपाजसः बहुबलाः । पातॄणां बलप्रदा इत्यर्थः । “गृणानाः । कर्मणि कर्तृप्रत्ययः । स्तूयमानाः । पुनः किमर्थम् । “देववीतये । देवानां वीतिर्गतिः प्राप्तिर्भक्षणं वा यस्मिन् स देववीतिर्यज्ञः । तदर्थम् । यज्ञसिद्धिः साक्षात् प्रयोजनं तद्द्वारा अन्नलाभ इत्यर्थः ॥

उ॒त नो॒ वाज॑सातये॒ पव॑स्व बृह॒तीरिष॑ः ।

द्यु॒मदि॑न्दो सु॒वीर्य॑ं ॥४

उ॒त । न॒ः । वाजं॑ऽसातये । पवं॑स्व । बृ॒ह॒तीः । इषः॑ ।

द्यु॒ऽमत् । इ॒न्दो॒ इति॑ । सु॒ऽवीर्यं॑म् ॥४

उत । नः । वाजऽसातये । पवस्व । बृहतीः । इषः ।

द्युऽमत् । इन्दो इति । सुऽवीर्यम् ॥४

“उत अपि च “नः अस्माकं “वाजसातये अन्नलाभाय हे “इन्दो सोम “बृहतीरिषः महतीः रसधाराः “द्युमत् दीप्तिमत् “सुवीर्यं शोभनसामर्थ्यं च “पवस्व क्षर । शोभनसामर्थ्योपेता धाराः पवस्वेत्यर्थः । अथवा । वाजसातये संग्रामाय बृहतीरिषो द्युमत् सुवीर्यं संपादयितुं पवस्वेति योज्यम् ॥

ते नः॑ सह॒स्रिणं॑ र॒यिं पवं॑ता॒मा सु॒वीर्यं॑ ।

सु॒वा॒ना दे॒वास॒ इंद॑वः ॥५

ते । न॒ः । स॒ह॒स्रिणं॑म् । र॒यिम् । पवं॑न्ताम् । आ । सु॒ऽवीर्यं॑म् ।

सु॒वा॒नाः । दे॒वासः॑ । इन्दं॑वः ॥५

ते । नः । सहस्रिणम् । रयिम् । पवन्ताम् । आ । सुऽवीर्यम् ।

सुवानाः । देवासः । इन्दवः ॥५

“ते “इन्दवः सोमाः “नः अस्माकं “सहस्रिणं सहस्रसंख्योपेतं “रयिं धनं “सुवीर्यं च “आ “पवन्ताम् । कीदृशास्ते । "सुवानाः सूयमानाः “देवासः द्योतनादिगुणयुक्ताः ॥ ॥ १ ॥

अत्या॑ हिया॒ना न हे॒तृभि॒रसृ॑ग्रं॒ वाजं॑सातये ।

वि वार॒मव्यं॑मा॒शवः॑ ॥६

अत्याः॑ । हि॒या॒नाः । न । हे॒तृऽभिः॑ । असृं॑ग्रम् । वाजं॑ऽसातये ।

वि । वारं॑म् । अव्यं॑म् । आ॒शवः॑ ॥६

अत्याः । हियानाः । न । हेतृऽभिः । असृग्रम् । वाजऽसातये ।

वि । वारम् । अव्यम् । आशवः ॥६

“वाजसातये संग्रामाय “हियानाः प्रेर्यमाणाः “अस्याः “न अश्वा इव ते यथा प्रेरकैः प्रेर्यमाणाः संग्रामाय शीघ्रं धावन्ति तद्वत् “हेतृभिः प्रेरकैः प्रेर्यमाणाः “आशवः शीघ्रगामिनः सोमाः वाजसातये अन्नलाभाय “अव्यं “वारं दशापवित्रं “वि “असृग्रं व्यतिसृज्यन्ते ॥

वा॒श्रा अ॑र्ष॒न्तीन्द॑वो॒ऽभि व॒त्सं न धे॒नवः॑ ।

द॒ध॒न्वि॒रे गभ॑स्त्योः ॥७

वा॒श्राः । अ॒र्ष॒न्ति॒ । इन्द॑वः । अ॒भि । व॒त्सम् । न । धे॒नवः॑ ।

द॒ध॒न्वि॒रे । गभ॑स्त्योः ॥७

वाश्राः । अर्षन्ति । इन्दवः । अभि । वत्सम् । न । धेनवः ।

दधन्विरे । गभस्त्योः ॥७

“वाश्राः शब्दयन्तः “इन्दवः सोमाः “अभि “अर्षन्ति अभिगच्छन्ति पात्रं प्रति वाश्राः शब्दकारिण्यः “धेनवः “न । ता यथा शब्दयन्त्यः “वत्सं प्रत्यागच्छन्ति तद्वत् । त एव “गभस्त्योः बाह्वोः “दधन्विरे ध्रियन्ते च ।।

जुष्ट॒ इन्द्रा॑य मत्स॒रः पव॑मान॒ कनि॑क्रदत् ।

विश्वा॒ अप॒ द्विषो॑ जहि ॥८

जुष्टः॑ । इन्द्रा॑य । म॒त्स॒रः । पव॑मान । कनि॑क्रदत् ।

विश्वाः॑ । अप॑ । द्विषः॑ । ज॒हि॒ ॥८

जुष्टः । इन्द्राय । मत्सरः । पवमान । कनिक्रदत् ।

विश्वाः । अप । द्विषः । जहि ॥८

"इन्द्राय "जुष्टः प्रियः पर्याप्तः “मत्सरः सोमो भवतीति शेषः। 'मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः ' (निरु. २.५) इति निरुक्तम् । हे "पवमान त्वं “कनिक्रदत् शब्दयन् “विश्वाः “द्विषः सर्वानस्माकं द्वेष्टॄन् "अप "जहि ॥

अ॒प॒घ्नन्तो॒ अरा॑व्णः॒ पव॑मानाः स्व॒र्दृशः॑ ।

योना॑वृ॒तस्य॑ सीदत ॥९

अ॒प॒ऽघ्नन्तः॑ । अरा॑व्णः । पव॑मानाः । स्वः॒ऽदृशः॑ ।

योनौ॑ । ऋ॒तस्य॑ । सी॒द॒त॒ ॥९

अपऽघ्नन्तः । अराव्णः । पवमानाः । स्वःऽदृशः ।

योनौ । ऋतस्य । सीदत ॥९

हे “पवमानाः “अराव्णः अदानानयजमानान् “अपघ्नतः हिंसन्तः “स्वर्दृशः सर्वत्र द्रष्टारश्च यूयम् “ऋतस्य “योनौ यज्ञस्य स्थाने "सीदत । अथवा । सोमपानार्थमुक्तलक्षणा देवा ऋतस्य योनौ सीदतेति योज्यम् ॥ ॥ २ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.१४

ऋग्वेदः - मण्डल ९
← सूक्तं ९.१३ सूक्तं ९.१४ सूक्तं ९.१५ →
कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः ।

कारं बिभ्रत्पुरुस्पृहम् ॥१॥

गिरा यदी सबन्धवः पञ्च व्राता अपस्यवः ।

परिष्कृण्वन्ति धर्णसिम् ॥२॥

आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत ।

यदी गोभिर्वसायते ॥३॥

निरिणानो वि धावति जहच्छर्याणि तान्वा ।

अत्रा सं जिघ्नते युजा ॥४॥

नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा ।

गाः कृण्वानो न निर्णिजम् ॥५॥

अति श्रिती तिरश्चता गव्या जिगात्यण्व्या ।

वग्नुमियर्ति यं विदे ॥६॥

अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम् ।

पृष्ठा गृभ्णत वाजिनः ॥७॥

परि दिव्यानि मर्मृशद्विश्वानि सोम पार्थिवा ।

वसूनि याह्यस्मयुः ॥८॥

सायणभाष्यम्

'परि प्र' इत्यष्टर्चं चतुर्दशं सूक्तम् । ऋष्यादि पूर्ववत् । "परि प्राष्टौ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

परि॒ प्रासि॑ष्यदत्क॒विः सिंधो॑रू॒र्मावधि॑ श्रि॒तः ।

का॒रं बिभ्र॑त्पुरु॒स्पृह॑ं ॥१

परि॑ । प्र । अ॒सि॒स्य॒द॒त् । क॒विः । सिन्धोः॑ । ऊ॒र्मौ । अधि॑ । श्रि॒तः ।

का॒रम् । बिभ्र॑त् । पु॒रु॒ऽस्पृह॑म् ॥१

परि । प्र । असिस्यदत् । कविः । सिन्धोः । ऊर्मौ । अधि । श्रितः ।

कारम् । बिभ्रत् । पुरुऽस्पृहम् ॥१

"परि "प्रासिष्यदत् परिप्रस्यन्दते "कविः मेधावी सोमः "सिन्धोरूर्मौ तरङ्गे वस्तीवर्युदकरसे "अधि "श्रितः आश्रितः । "पुरुस्पृहं बहुभिः स्पृहणीयं "कारं शब्दं "बिभ्रत् धारयन् परिस्यन्दत इति संबन्धः ॥

गि॒रा यदी॒ सब॑ंधव॒ः पंच॒ व्राता॑ अप॒स्यवः॑ ।

प॒रि॒ष्कृ॒ण्वंति॑ धर्ण॒सिं ॥२

गि॒रा । यदि॑ । सऽब॑न्धवः । पञ्च॑ । व्राताः॑ । अ॒प॒स्यवः॑ ।

प॒रि॒ऽकृ॒ण्वन्ति॑ । ध॒र्ण॒सिम् ॥२

गिरा । यदि । सऽबन्धवः । पञ्च । व्राताः । अपस्यवः ।

परिऽकृण्वन्ति । धर्णसिम् ॥२

“सबन्धवः समानबन्धनाः “पञ्च “व्राताः पञ्च जना मनुष्या यजमानाः “अपस्यवः कर्मेच्छवः यद्यदा ईमेनं “धर्णसिं धारकं सोमं “गिरा स्तुत्या “परिष्कृण्वन्ति अलंकुर्वन्ति । अस्योत्तरत्रान्वयः ॥

आद॑स्य शु॒ष्मिणो॒ रसे॒ विश्वे॑ दे॒वा अ॑मत्सत ।

यदी॒ गोभि॑र्वसा॒यते॑ ॥३

आत् । अ॒स्य॒ । शु॒ष्मिणः॑ । रसे॑ । विश्वे॑ । दे॒वाः । अ॒म॒त्स॒त॒ ।

यदि॑ । गोभिः॑ । व॒सा॒यते॑ ॥३

आत् । अस्य । शुष्मिणः । रसे । विश्वे । देवाः । अमत्सत ।

यदि । गोभिः । वसायते ॥३

“आत् परिष्करणानन्तरमेव “शुष्मिणः बलवतः “अस्य सोमस्य “रसे “विश्वे “देवाः “अमत्सत अमाद्यन्त। “यदि यदा “गोभिः गोविकारैः । विकारे प्रकृतिशब्दः । क्षीरादिभिः । “वसायते आच्छाद्यते ॥

नि॒रि॒णा॒नो वि धा॑वति॒ जह॒च्छर्या॑णि॒ तान्वा॑ ।

अत्रा॒ सं जि॑घ्नते यु॒जा ॥४

नि॒ऽरि॒णा॒नः । वि । धा॒व॒ति॒ । जह॑त् । शर्या॑णि । तान्वा॑ ।

अत्र॑ । सम् । जि॒घ्न॒ते॒ । यु॒जा ॥४

निऽरिणानः । वि । धावति । जहत् । शर्याणि । तान्वा ।

अत्र । सम् । जिघ्नते । युजा ॥४

अयं सोमः “निरिणानः दशापवित्रादधो गच्छन् “वि “धावति विविधं धावति - - - - यदा “तान्वा । तनु देशापवित्रवस्त्रम् । तत्संबन्धीनि “शर्याणि द्वाराणि “जहत् अधः सरति । “अत्र अस्मिन् यज्ञे “युजा सखिभूतेनेन्द्रेण सह "सं “जिघ्नते संगतो भवति । वस्त्रसुषिराद्विनिर्गत्य दशापवित्रादधः सत् पात्रं विविधं गच्छन् होमद्वारेणेन्द्रेण संगतो भवतीत्यर्थः ।।

न॒प्तीभि॒र्यो वि॒वस्व॑तः शु॒भ्रो न मा॑मृ॒जे युवा॑ ।

गाः कृ॑ण्वा॒नो न नि॒र्णिज॑ं ॥५

न॒प्तीभि॑: । यः । वि॒वस्व॑तः । शु॒भ्रः । न । म॒मृ॒जे । युवा॑ ।

गाः । कृ॒ण्वा॒नः । न । निः॒ऽनिजं॑म् ॥५

नप्तीभिः । यः । विवस्वतः । शुभ्रः । न । ममृजे । युवा ।

गाः । कृण्वानः । न । निःऽनिजम् ॥५

“यः सोमः "विवस्वतः परिचरणवतो यजमानस्य “नप्तीभिः पौत्रस्थानीयाभिः । तस्य हस्तः पुत्रोऽङ्गुलयः पौत्रस्थानीया इत्यभिप्रायः। मामृजे मृज्यते “शुभ्रो “न दीप्तोऽश्वः "युवा इव । यथाप्रवृद्धोऽश्वो मृज्यते स्वपरिचारकैस्तद्वत् स एव युवा मिश्रणशीलः सोमः “निर्णिजम्। निर्णिक्' इति रूपनाम । स्वकीयं रूपं “गाः “न “कृण्वानः गोविकारांश्च कुर्वाणो भवतीति शेषः ॥ ॥ ३ ॥

अति॑ श्रि॒ती ति॑र॒श्चता॑ ग॒व्या जि॑गा॒त्यण्व्या॑ ।

व॒ग्नुमि॑यर्ति॒ यं वि॒दे ॥६

अति॑ । श्रि॒ती । ति॒र॒श्चता॑ । ग॒व्या । जि॒गा॒ति॒ । अण्व्या॑ ।

व॒ग्नुम् । इ॒य॒र्ति॒ । यम् । वि॒दे ॥६

अति । श्रिती । तिरश्चता । गव्या । जिगाति । अण्व्या ।

वग्नुम् । इयर्ति । यम् । विदे ॥६

“अण्व्या अङ्गुल्याभिषूयमाणः सोमः “गव्या गव्यानि “श्रिती श्रित्यै श्रयणार्थं “तिरश्चता तिरश्चीनम् “अति “जिगाति । अंशुमतिक्रम्य गच्छति । तथाङ्गुल्याभिषूयमाणः “वग्नुं शब्दम् इयर्ति प्रेरयति ॥

अ॒भि क्षिप॒: सम॑ग्मत म॒र्जय॑न्तीरि॒षस्पति॑ ।

पृ॒ष्ठा गृ॑भ्णत वा॒जिन॑: ॥७

अ॒भि । क्षिप॑: । सम् । अ॒ग्म॒त॒ । म॒र्जय॑न्तीः । इ॒षः । पति॑म् ।

पृ॒ष्ठा । गृ॒भ्ण॒त॒ । वा॒जिन॑: ॥७

अभि । क्षिपः । सम् । अग्मत । मर्जयन्तीः । इषः । पतिम् ।

पृष्ठा । गृभ्णत । वाजिनः ॥७

“क्षिपः अङ्गुलयः “मर्जयन्तीः अभिमृशन्त्यः “इषस्पतिम् अन्नानां स्वामिनं सोमम् “अभि “समग्मत अभिसंगच्छन्ते । संगत्य च “वाजिनः बलवतः सोमस्य “पृष्ठा पृष्ठानि “गृभ्णत गृह्णन्त्यभिषवाङगुलयः ॥

परिं दि॒व्यानि॒ मर्मृ॑श॒द्विश्वा॑नि सोम॒ पार्थि॑वा ।

वसू॑नि याह्यस्म॒युः ॥८

परिं । दि॒व्यानिं । मर्मृ॑शत् । विश्वा॑नि । सो॒म॒ । पार्थि॑वा ।

वसू॑नि । या॒हि॒ । अ॒स्म॒ऽयुः ॥८

परि । दिव्यानि । मर्मृशत् । विश्वानि । सोम । पार्थिवा ।

वसूनि । याहि । अस्मऽयुः ॥८

हे “सोम “दिव्यानि पार्थिवानि च “विश्वानि सर्वाणि “वसूनि धनानि “परि “मर्मृशत् परिमृशन् परिगृह्णन् “अस्मयुः अस्मान् कामयमानः “याहि आगच्छ। एवमभिषुण्वन् रसं संबोध्य ब्रूते ॥ ॥ ४ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.१५

ऋग्वेदः - मण्डल ९

← सूक्तं ९.१४ | सूक्तं ९.१५ | सूक्तं ९.१६ →

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः ।

गच्छन्निन्द्रस्य निष्कृतम् ॥१॥

एष पुरू धियायते बृहते देवतातये ।

यत्रामृतास आसते ॥२॥

एष हितो वि नीयतेऽन्तः शुभ्रावता पथा ।

यदी तुञ्जन्ति भूर्णयः ॥३॥

एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो वृषा ।

नृम्णा दधान ओजसा ॥४॥

एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः ।

पतिः सिन्धूनां भवन् ॥५॥

एष वसूनि पिब्दना परुषा ययिवाँ अति ।

अव शादेषु गच्छति ॥६॥

एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः ।

प्रचक्राणं महीरिषः ॥७॥

एतमु त्यं दश क्षिपो मृजन्ति सप्त धीतयः ।

स्वायुधं मदिन्तमम् ॥८॥

सायणभाष्यम्

‘एष धिया' इत्यष्टर्चं पञ्चदशं सूक्तम् । ऋष्याद्याः पूर्ववत् । एष धिया' इत्यनुक्रान्तम् । गतो विनियोगः ॥

ए॒ष धि॒या या॒त्यण्व्या॒ शूरो॒ रथे॑भिरा॒शुभिः॑ ।

गच्छ॒न्निन्द्र॑स्य निष्कृ॒तं ॥१

ए॒षः । धि॒या । या॒ति॒ । अण्व्या॑ । शूरः॑ । रथे॑भिः । आ॒शुऽभिः॑ ।

गच्छ॑न् । इन्द्र॑स्य । निः॒ऽकृ॒तम् ॥१

एषः । धिया । याति । अण्व्या । शूरः । रथेभिः । आशुऽभिः ।

गच्छन् । इन्द्रस्य । निःऽकृतम् ॥१

“एषः सोमः “शूरः विक्रान्तः हे “सोम “दिव्यानि पार्थिवानि च “विश्वानि सर्वाणि “वसूनि धनानि “परि “मर्मृशत् परिमृशन् परिगृह्णन् “अस्मयुः अस्मान् कामयमानः “याहि आगच्छ। एवमभिषुण्वन् रसं संबोध्य ब्रूते ॥ ॥ ४ ॥

अण्व्या अङ्गुल्याभिषुतः “धिया कर्मणा “याति गच्छति । कं देशं प्रति । उच्यते । “इन्द्रस्य “निष्कृतं स्थानं दिवं प्रति “रथेभिः रथैः "आशुभिः शीघ्रगामिभिः “गच्छन् इन्द्रेण रथेऽवस्थाप्य स्वस्थाननयनाय । अङ्गुल्याभिषूयमाणः सन् होमद्वाराग्निं निष्पीडनद्वारा पात्रं वा गच्छतीत्यर्थः ॥

ए॒ष पु॒रू धि॑यायते बृह॒ते दे॒वता॑तये ।

यत्रा॒मृता॑स॒ आस॑ते ॥२

ए॒षः । पु॒रु । धि॒या॒ऽय॒ते॒ । बृ॒ह॒ते । दे॒वऽता॑तये ।

यत्र॑ । अ॒मृता॑सः । आस॑ते ॥२

एषः । पुरु । धियाऽयते । बृहते । देवऽतातये ।

यत्र । अमृतासः । आसते ॥२

“एषः सोमः “पुरु बहुलं “धियायते धियं कर्मेच्छति । धीशब्दाद्यकारोपजनः । यद्वा । द्वितीयार्थे तृतीया छान्दसश्चालुक् । कस्मै । “बृहते महते “देवतातये यज्ञाय। “यत्र यस्मिन् यज्ञे “अमृतासः अमृता देवाः “आसते वसन्ति तदर्थम् ॥

ए॒ष हि॒तो वि नी॑यते॒ऽंतः शु॒भ्राव॑ता प॒था ।

यदी॑ तुं॒जंति॒ भूर्ण॑यः ॥३

ए॒षः । हि॒तः । वि । नी॒य॒ते॒ । अ॒न्तरिति॑ । शु॒भ्रऽव॑ता । प॒था ।

यदि॑ । तु॒ञ्जन्ति॑ । भूर्ण॑यः ॥३

एषः । हितः । वि । नीयते । अन्तरिति । शुभ्रऽवता । पथा ।

यदि । तुञ्जन्ति । भूर्णयः ॥३

“एषः सोमः “हितः निहितः हविर्धाने “वि “नीयते तस्मात् स्थानादाहवनीयं प्रति । “अन्तः तयोर्मध्यदेशे “शुभ्रावता शोभावता “पथा मार्गेण "यदि यदा “तुञ्जन्ति प्रयच्छन्ति देवेभ्यः “भूर्णयः भरणशीला अध्वर्वाप दयः। तदा वि नीयत इति समन्वयः ॥

ए॒ष शृंगा॑णि॒ दोधु॑व॒च्छिशी॑ते यू॒थ्यो॒३॒ वृषा॑ ।

नृ॒म्णा दधा॑न॒ ओज॑सा ॥४

ए॒षः । शृङ्गा॑णि । दोधु॑वत् । शिशी॑ते । यू॒थ्यः॑ । वृषा॑ ।

नृ॒म्णा । दधा॑नः । ओज॑सा ॥४

एषः । शृङ्गाणि । दोधुवत् । शिशीते । यूथ्यः । वृषा ।

नृम्णा । दधानः । ओजसा ॥४

“एषः सोमः “शृङ्गाणि शृङ्गवदुन्नतानंशूनभिषवकाले “दोधुवत् धूनोति। “यूथ्यः यूथार्हो यूथपतिः “वृषा वृषभो यथा “शिशीते तीक्ष्णे शृङ्गे धूनोति तद्वत् । कीदृश एषः। “ओजसा बलेन “नृम्णा नृम्णानि धनानि “दधानः अस्मदर्थं धारयन् ॥

ए॒ष रु॒क्मिभि॑रीयते वा॒जी शु॒भ्रेभि॑रं॒शुभिः॑ ।

पति॒: सिंधू॑ना॒ं भव॑न् ॥५

ए॒षः । रु॒क्मिऽभिः॑ । ई॒य॒ते॒ । वा॒जी । शु॒भ्रेभिः॑ । अं॒शुऽभिः॑ ।

पतिः॑ । सिन्धू॑नाम् । भव॑न् ॥५

एषः । रुक्मिऽभिः । ईयते । वाजी । शुभ्रेभिः । अंशुऽभिः ।

पतिः । सिन्धूनाम् । भवन् ॥५

“एषः सोमः “रुक्मिभिः अध्वर्वाम्दिभिः सह “ईयते गच्छति। कीदृश एषः । “वाजी वेजनवान् “शुभ्रेभिः शुभ्रैर्दीप्तैः "अंशुभिः विशिष्टः । अथवा रुक्मिभिरित्येतदप्यंशुविशेषणम् । “सिन्धूनां स्यन्दमानानां रसानां “पतिः “भवन् य ईयत इति ।।

ए॒ष वसू॑नि पिब्द॒ना परु॑षा ययि॒वाँ अति॑ ।

अव॒ शादे॑षु गच्छति ॥६

ए॒षः । वसू॑नि । पि॒ब्द॒ना । परु॑षा । य॒यि॒ऽवान् । अति॑ ।

अव॑ । शादे॑षु । ग॒च्छ॒ति॒ ॥६

एषः । वसूनि । पिब्दना । परुषा । ययिऽवान् । अति ।

अव । शादेषु । गच्छति ॥६

“एषः सोमः “वसूनि आच्छादकानि “पिब्दना पिब्दनानि पीडितानि रक्षांसि “परुषा पर्वणा “अति अतिक्रम्य "ययिवान् गच्छन् "शादेषु शातनीयेषु रक्षःसु “अव “गच्छति ॥

ए॒तं मृ॒जंति॒ मर्ज्य॒मुप॒ द्रोणे॑ष्वा॒यवः॑ ।

प्र॒च॒क्रा॒णं म॒हीरिषः॑ ॥७

ए॒तम् । मृ॒ज॒न्ति॒ । मर्ज्य॑म् । उप॑ । द्रोणे॑षु । आ॒यवः॑ ।

प्र॒ऽच॒क्रा॒णम् । म॒हीः । इषः॑ ॥७

एतम् । मृजन्ति । मर्ज्यम् । उप । द्रोणेषु । आयवः ।

प्रऽचक्राणम् । महीः । इषः ॥७

“आयवः मनुष्या ऋत्विजः “एतं सोमं “मर्ज्यं मार्जनीयम् “उप "मृजन्ति । निष्पीडयन्तीत्यर्थः । कुत्र । “द्रोणेषु द्रोणकलशेषु । कीदृशम् । “महीरिषः महान्त्यन्नानि “प्रचक्राणं कुर्वाणम् । प्रभूतरसस्राविणमित्यर्थः ॥

ग्रावस्तोत्रे गाणगारिमतेनाभिरूपकरणे सृज्यमाने सोमे ' एतमु त्यम्' इत्येषा । सूत्रितं च-- ' एतमु त्यं दश क्षिपो मृज्यमानः सुहस्त्या' (आश्व. श्रौ. ५. १२) इति ।।

ए॒तमु॑ त्यं दश॒ क्षिपो॑ मृ॒जंति॑ स॒प्त धी॒तयः॑ ।

स्वा॒यु॒धं म॒दिंत॑मं ॥८

ए॒तम् । ऊं॒ इति॑ । त्यम् । दश॑ । क्षिपः॑ । मृ॒जन्ति॑ । स॒प्त । धी॒तयः॑ ।

सु॒ऽआ॒यु॒धम् । म॒दिन्ऽत॑मम् ॥८

एतम् । ऊं इति । त्यम् । दश । क्षिपः । मृजन्ति । सप्त । धीतयः ।

सुऽआयुधम् । मदिन्ऽतमम् ॥८

“त्यं तम् “एतमु एतमेव सोमं “दश “क्षिपः दशाङ्गुलयः “मृजन्ति परिचरन्ति । “सप्त “धीतयः सप्त ऋत्विजश्च । ऋत्विजोऽङ्गुलिभिर्मृजन्तीत्यर्थः कीदृशमेतम् । “स्वायुधं शोभनायुधं “मदिन्तमं मादयितृतमम्। रक्षोहननसामर्थ्यप्रदर्शनाय स्वायुधशब्दश्रवणम् ॥ ॥ ५ ॥

टिप्पणी

साम १२६६ (https://sa.wikisource.org/s/3km)

मण्डल ९

ऋग्वेदः सूक्तं ९.१६

ऋग्वेदः - मण्डल ९
← सूक्तं ९.१५ | सूक्तं ९.१६ | सूक्तं ९.१७ →
कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

प्र ते सोतार ओण्यो रसं मदाय घृष्वये ।

सर्गो न तक्त्येतशः ॥१॥

क्रत्वा दक्षस्य रथ्यमपो वसानमन्धसा ।

गोषामण्वेषु सश्चिम ॥२॥

अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज ।

पुनीहीन्द्राय पातवे ॥३॥

प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति ।

क्रत्वा सधस्थमासदत् ॥४॥

प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत ।

महे भराय कारिणः ॥५॥

पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः ।

शूरो न गोषु तिष्ठति ॥६॥

दिवो न सानु पिप्युषी धारा सुतस्य वेधसः ।

वृथा पवित्रे अर्षति ॥७॥

त्वं सोम विपश्चितं तना पुनान आयुषु ।

अव्यो वारं वि धावसि ॥८॥

सायणभाष्यम्

‘ प्र ते सोतारः' इत्यष्टर्चं षोडशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘प्र ते ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र तें सो॒तारं॑ ओ॒ण्यो॒३॒ रसं॒ मदा॑य॒ घृष्वं॑ये ।

सर्गो॒ न त॒क्त्येतं॑शः ॥१

प्र । ते॒ । सो॒तारः॑ । ओ॒ण्योः॑ । रसं॑म् । मदा॑य । घृष्वं॑ये ।

सर्गः॑ । न । त॒क्ति॒ । एतं॑शः ॥१

प्र । ते । सोतारः । ओण्योः । रसम् । मदाय । घृष्वये ।

सर्गः । न । तक्ति । एतशः ॥१

हे सोम “ते तव रसं “सोतारः सोमाभिषवकर्तारः “ओण्योः “रसम् । लुप्तोपममेतत् । द्यावापृथिव्यो रसमुदकमिव । अथवौण्योर्द्यावापृथिव्योर्मध्ये तयोः संबन्धिनं वा रसस् । “प्र स्रावयन्तीति शेषः । किमर्थम् । “घृष्वये शत्रुघर्षणशीलाय’ “मदाय इन्द्रस्य मदाय । अभिषवजनितः सोमः “सर्गः सृष्टः “एतशः “न अश्व इव “तक्ति गच्छति पात्रं प्रति ।।

क्रत्वा॒ दक्षं॑स्य र॒थ्यं॑म॒पो वसा॑न॒मंधं॑सा ।

गो॒षामण्वें॑षु सश्चिम ॥२

क्रत्वा॑ । दक्षं॑स्य । र॒थ्यं॑म् । अ॒पः । वसा॑नम् । अन्धं॑सा ।

गो॒ऽसाम् । अण्वें॑षु । स॒श्चि॒म॒ ॥२

क्रत्वा । दक्षस्य । रथ्यम् । अपः । वसानम् । अन्धसा ।

गोऽसाम् । अण्वेषु । सश्चिम ॥२

वयमभिषोतारः “दक्षस्य बलस्य “रथ्यं नेतारम् “अपः उदकानि रसान् “वसानम् आच्छादयन्तम् “अन्धसा श्रयणान्नेन सहितं “गोषां गवां सोतारमेवमुक्तलक्षणं सोमं “क्रत्वा कर्मणा “अण्वेषु अङ्गुलीषु “सश्चिम संयोजयामः ॥

अन॑प्तम॒प्सु दु॒ष्टरं॒ सोमं॑ प॒वित्र॒ आ सृ॑ज ।

पु॒नी॒हींद्रा॑य॒ पात॑वे ॥३

अन॑प्तम् । अ॒प्ऽसु । दु॒स्तर॑म् । सोम॑म् । प॒वित्रे॑ । आ । सृ॒ज॒ ।

पु॒नी॒हि । इन्द्रा॑य । पात॑वे ॥३

अनप्तम् । अप्ऽसु । दुस्तरम् । सोमम् । पवित्रे । आ । सृज ।

पुनीहि । इन्द्राय । पातवे ॥३

"अनप्तं शत्रुभिरनाप्तम् “अप्सु आन्तरिक्ष्यासु । वर्तमानमिति शेषः। “दुष्टरम् अन्यैरनभिभाव्यम् । न हि सोमं कश्चिदप्यतितरति । ईदृशं “सोमं “पवित्रे दशापवित्रे “आ “सृज प्रक्षिप हे अध्वर्यो । तत्रोच्यते । “इन्द्राय इन्द्रस्य “पातवे पातुं “पुनीहि ।।

प्र पु॑ना॒नस्य॒ चेत॑सा॒ सोमः॑ प॒वित्रे॑ अर्षति ।

क्रत्वा॑ स॒धस्थ॒मास॑दत् ॥४

प्र । पु॒ना॒नस्य॑ । चेत॑सा । सोमः॑ । प॒वित्रे॑ । अ॒र्ष॒ति॒ ।

क्रत्वा॑ । स॒धऽस्थ॑म् । आ । अ॒स॒द॒त् ॥४

प्र । पुनानस्य । चेतसा । सोमः । पवित्रे । अर्षति ।

क्रत्वा । सधऽस्थम् । आ । असदत् ॥४

"चेतसा स्तुत्या “पुनानस्य पूयमानस्यांशीभूतः “सोमः “पवित्रे दशापवित्रे “अर्षति गच्छति । अथ पश्चात् "क्रत्वा कर्मणा प्रज्ञानेन वा “सधस्थं सहस्थानं द्रोणकलशे “आसदत् आसीददिति ॥

प्र त्वा॒ नमो॑भि॒रिंद॑व॒ इंद्र॒ सोमा॑ असृक्षत ।

म॒हे भरा॑य का॒रिणः॑ ॥५

प्र । त्वा॒ । नमः॑ऽभिः । इन्द॑वः । इन्द्र॑ । सोमाः॑ । अ॒सृ॒क्ष॒त॒ ।

म॒हे । भरा॑य । का॒रिणः॑ ॥५

प्र । त्वा । नमः॒ऽभिः । इन्दवः । इन्द्र । सोमाः । असृक्षत ।

महे । भराय । कारिणः ॥५

हे “इन्द्र “त्वा त्वां “नमोभिः नमस्कारोपलक्षितैः स्तोत्रैरथवान्नैः सह “इन्दवः “सोमाः “प्र “असृक्षत प्राप्नुवन्ति । किमर्थम् । “महे महते “भराय संग्रामाय । कीदृशाः । “कारिणः बलकरणशीलाः ॥

पु॒ना॒नो रू॒पे अ॒व्यये॒ विश्वा॒ अर्ष॑न्न॒भि श्रियः॑ ।

शूरो॒ न गोषु॑ तिष्ठति ॥६

पु॒ना॒नः । रू॒पे । अ॒व्यये॑ । विश्वाः॑ । अर्ष॑न् । अ॒भि । श्रियः॑ ।

शूरः॑ । न । गोषु॑ । ति॒ष्ठ॒ति॒ ॥६

पुनानः । रूपे । अव्यये । विश्वाः । अर्षन् । अभि । श्रियः ।

शूरः । न । गोषु । तिष्ठति ॥६

“अव्यये अविमये "रूपे रूप्यमाणे वस्त्रे “पुनानः पूयमानः “विश्वाः सर्वाः “श्रियः शोभाः “अभि “अर्षन् अभिगच्छन् “गोषु निमित्तासु “शूरो “न शूर इव स यथा संग्रामे तिष्ठति तद्वदसौ "तिष्ठति पात्रे ॥

दि॒वो न सानु॑ पि॒प्युषी॒ धारा॑ सु॒तस्य॑ वे॒धसः॑ ।

वृथा॑ प॒वित्रे॑ अर्षति ॥७

दि॒वः । न । सानु॑ । पि॒प्युषी॑ । धारा॑ । सु॒तस्य॑ । वे॒धसः॑ ।

वृथा॑ । प॒वित्रे॑ । अ॒र्ष॒ति॒ ॥७

दिवः । न । सानु । पिप्युषी । धारा । सुतस्य । वेधसः ।

वृथा । पवित्रे । अर्षति ॥७

"दिवो “न द्युलोकादन्तरिक्षादिव "सानु समुच्छ्रितमुदकं तद्यथाधो निपतति तद्वत् "वेधसः विधातुर्बलस्य कर्तुः “सुतस्य अभिषुतस्य सोमस्य “पिप्युषी आप्याययन्ती “धारा “वृथा अनायासेनैव “पवित्रे दशापवित्रे “अर्षति गच्छति ॥

त्वं सो॑म विप॒श्चितं॒ तना॑ पुना॒न आ॒युषु॑ ।

अव्यो॒ वार॒ं वि धा॑वसि ॥८

त्वम् । सो॒म॒ । वि॒प॒ःऽचित॑म् । तना॑ । पु॒ना॒नः । आ॒युषु॑ ।

अव्य॑ः । वार॑म् । वि । धा॒व॒सि॒ ॥८

त्वम् । सोम । विपःऽचितम् । तना । पुनानः । आयुषु ।

अव्यः । वारम् । वि । धावसि ॥८

हे "सोम “त्वं “विपश्चितं स्तोतारम् "आयुषु मनुष्येषु' मध्ये रक्षसि । अथवा। तृतीयार्थे द्वितीया । विपश्चिताध्वर्युणा । “तना वस्त्रेण "पुनानः पूयमानः। अथवा। विपश्चितमिन्द्रं प्रीणयितुं तना पुनानः सन् । “अव्यो “वारम् अवेर्वालं “वि “धावसि विविधं गच्छसि ॥ ॥ ६ ॥

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.१७

ऋग्वेदः - मण्डल ९
← सूक्तं ९.१६ | सूक्तं ९.१७ | सूक्तं ९.१८ →
कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः ।

सोमा असृग्रमाशवः ॥१॥

अभि सुवानास इन्दवो वृष्टयः पृथिवीमिव ।

इन्द्रं सोमासो अक्षरन् ॥२॥

अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति ।

विघ्नन्रक्षांसि देवयुः ॥३॥

आ कलशेषु धावति पवित्रे परि षिच्यते ।

उक्थैर्यज्ञेषु वर्धते ॥४॥

अति त्री सोम रोचना रोहन्न भ्राजसे दिवम् ।

इष्णन्त्सूर्यं न चोदयः ॥५॥

अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः ।

दधानाश्चक्षसि प्रियम् ॥६॥

तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः ।

मृजन्ति देवतातये ॥७॥

मधोर्धारामनु क्षर तीव्रः सधस्थमासदः ।

चारुरृताय पीतये ॥८॥

सायणभाष्यम्

'प्र निम्नेनेव' इत्यष्टर्चं सप्तदशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'प्र निम्नेनेव' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र नि॒म्नेने॑व॒ सिंध॑वो॒ घ्नंतो॑ वृ॒त्राणि॒ भूर्ण॑यः ।

सोमा॑ असृग्रमा॒शवः॑ ॥१

प्र । नि॒म्नेन॑ऽइव । सिन्ध॑वः । घ्नन्तः॑ । वृ॒त्राणि॑ । भूर्ण॑यः ।

सोमाः॑ । अ॒सृ॒ग्र॒म् । आ॒शवः॑ ॥१

प्र । निम्नेनऽइव । सिन्धवः । घ्नन्तः । वृत्राणि । भूर्णयः ।

सोमाः । असृग्रम् । आशवः ॥१

“निम्नेन प्रवणेन देशेन “सिन्धवः नद्यः “इव तथा “वृत्राणि शत्रून् “घ्नन्तः "भूर्णयः क्षिप्रगमनाः “आशवः व्याप्ताः “सोमाः “प्र “असृग्रं प्रगच्छन्ति द्रोणकलशं प्रति ॥

अ॒भि सु॑वा॒नास॒ इंद॑वो वृ॒ष्टयः॑ पृथि॒वीमि॑व ।

इंद्रं॒ सोमा॑सो अक्षरन् ॥२

अ॒भि । सु॒वा॒नासः॑ । इन्द॑वः । वृ॒ष्टयः॑ । पृ॒थि॒वीम्ऽइ॑व ।

इन्द्र॑म् । सोमा॑सः । अ॒क्ष॒र॒न् ॥२

अभि । सुवानासः । इन्दवः । वृष्टयः । पृथिवीम्ऽइव ।

इन्द्रम् । सोमासः । अक्षरन् ॥२

“सुवानासः सूयमानाः “इन्दवः द्रवरूपाः “सोमासः सोमाः “इन्द्रं प्रीणयितुम् “अभि “अक्षरन् । किमिव । “वृष्टयः “पृथिवीमिव ।।

अत्यू॑र्मिर्मत्स॒रो मद॒ः सोम॑ः प॒वित्रे॑ अर्षति ।

वि॒घ्नन्रक्षां॑सि देव॒युः ॥३

अति॑ऽऊर्मिः । म॒त्स॒रः । मद॑ः । सोम॑ः । प॒वित्रे॑ । अ॒र्ष॒ति॒ ।

वि॒ऽघ्नन् । रक्षां॑सि । दे॒व॒ऽयुः ॥३

अतिऽऊर्मिः । मत्सरः । मदः । सोमः । पवित्रे । अर्षति ।

विऽघ्नन् । रक्षांसि । देवऽयुः ॥३

“अत्यूर्मिः । अतिक्रान्ता ऊर्मयो यस्मात् सोऽत्यूर्मिः । अतिप्रवृद्ध इत्यर्थः। “मत्सरः मादनशील: “मदः मदात्मकः “सोमः “पवित्रे “अर्षति गच्छति । किं कुर्वन् । “रक्षांसि “विघ्नन् घातयन् “देवयुः देवान् कामयमानोऽर्षतीति संबन्धः ॥

पवित्रेष्ट्यां द्वितीयाज्यभागस्य ‘आ कलशेषु' इति याज्या। सूत्रितं च- आ कलशेषु धावति पवित्रे परिषिच्यत इत्येका' (आश्व. श्रौ. ५. १२) इति ।

आ क॒लशे॑षु धावति प॒वित्रे॒ परि॑ षिच्यते ।

उ॒क्थैर्य॒ज्ञेषु॑ वर्धते ॥४

आ । क॒लशे॑षु । धा॒व॒ति॒ । प॒वित्रे॑ । परि॑ । सि॒च्य॒ते॒ ।

उ॒क्थैः । य॒ज्ञेषु॑ । व॒र्ध॒ते॒ ॥४

आ । कलशेषु । धावति । पवित्रे । परि । सिच्यते ।

उक्थैः । यज्ञेषु । वर्धते ॥४

अयं सोमः कलशेषु “आ “धावति । तदर्थं “पवित्रे “परि “षिच्यते अध्वर्युभिः । “उक्थैः स्तोत्रैः "यज्ञेषु निमित्तेषु “वर्धते प्रवृद्धो भवति ।

अति॒ त्री सो॑म रोच॒ना रोह॒न्न भ्रा॑जसे॒ दिव॑ं ।

इ॒ष्णन्त्सूर्य॒ं न चो॑दयः ॥५

अतिं । त्री । सो॒म॒ । रो॒च॒ना । रोह॑न् । न । भ्रा॒ज॒से॒ । दिव॑म् ।

इ॒ष्णन् । सूर्य॑म् । न । चो॒द॒यः॒ ॥५

अति । त्री । सोम । रोचना । रोहन् । न । भ्राजसे । दिवम् ।

इष्णन् । सूर्यम् । न । चोदयः ॥५

हे सोम त्वं “त्री “रोचना त्रीणि रोचनानि त्रीँल्लोकान् “अति अतिक्रम्य “रोहन उपरिस्थं “दिवं द्युलोकं “भ्राजसे प्रकाशयसि । तथा “इष्णन् गच्छन् “सूर्यं “न सूर्यं च “चोदयः चोदयसि प्रेरयसि । नशब्दश्चार्थे ।

अ॒भि विप्रा॑ अनूषत मू॒र्धन्य॒ज्ञस्य॑ का॒रवः॑ ।

दधा॑ना॒श्चक्ष॑सि प्रि॒यं ॥६

अ॒भि । विप्राः॑ । अ॒नू॒ष॒त॒ । मू॒र्धन् । य॒ज्ञस्य॑ । का॒रवः॑ ।

दधा॑नाः । चक्ष॑सि । प्रि॒यम् ॥६

अभि । विप्राः । अनूषत । मूर्धन् । यज्ञस्य । कारवः ।

दधानाः । चक्षसि । प्रियम् ॥६

“अभि “अनूषत अभिष्टुवन्ति “विप्राः मेधाविनः स्तोतारः । कुत्र। "यज्ञस्य “मूर्धन् मूर्धनि । शिरोवदुत्तमेऽभिषवदिवस इत्यर्थः । कीदृशास्ते । “कारवः कर्तारः परिचर्याया यागानुष्ठातारो वा । “चक्षसि दृष्टरि सोमे “प्रियं “दधानाः अभ्यनूषतेति समन्वयः ॥

तमु॑ त्वा वा॒जिनं॒ नरो॑ धी॒भिर्विप्रा॑ अव॒स्यवः॑ ।

मृ॒जंतिं दे॒वता॑तये ॥७

तम् । ऊं॒ इतिं । त्वा॒ । वा॒जिन॑म् । नरः॑ । धी॒भिः । विप्राः॑ । अ॒व॒स्यवः॑ ।

मृ॒जन्ति॑ । दे॒वऽता॑तये ॥७

तम् । ऊं इति । त्वा । वाजिनम् । नरः । धीभिः । विप्राः । अवस्यवः ।

मृजन्ति । देवऽतातये ॥७

हे सोम “तमु तमेव “त्वा त्वां “वाजिनम् अन्नवन्तं गमनवन्तं वा “नरः नेतारः “विप्राः मेधाविनोऽध्वर्वा“वदयः “धीभिः कर्मभिः "मृजन्ति शोधयन्ति “देवतातये यज्ञार्थम् । किमिच्छवः । “अवस्यवः अन्नमिच्छवः॥

मधो॒र्धारा॒मनु॑ क्षर ती॒व्रः स॒धस्थ॒मास॑दः ।

चारु॑र्ऋ॒ताय॑ पी॒तये॑ ॥८

मधोः॑ । धारा॑म् । अनु॑ । क्ष॒र॒ । ती॒व्रः । स॒धऽस्थ॑म् । आ । अ॒स॒दः॒ ।

चारुः॑ । ऋ॒ताय॑ । पी॒तये॑ ॥८

मधोः । धाराम् । अनु । क्षर । तीव्रः । सधऽस्थम् । आ । असदः ।

चारुः । ऋताय । पीतये ॥८

हे सोम त्वं “मधोः मधुररसस्य “धारामनु “क्षर प्रवहन्। "तीव्रः तीव्ररसः सन् “सधस्थं सहस्थानमभिषवस्थानं पवित्रं वा “आ “असदः सीद। “चारुः चरणशीलः सन् “ऋताय यज्ञार्थं “पीतये देवानां पानाय ॥ ॥ ७ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.१८

ऋग्वेदः - मण्डल ९

← सूक्तं ९.१७ | सूक्तं ९.१८ | सूक्तं ९.१९ →

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः ।

मदेषु सर्वधा असि ॥१॥

त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः ।

मदेषु सर्वधा असि ॥२॥

तव विश्वे सजोषसो देवासः पीतिमाशत ।

मदेषु सर्वधा असि ॥३॥

आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे ।

मदेषु सर्वधा असि ॥४॥

य इमे रोदसी मही सं मातरेव दोहते ।

मदेषु सर्वधा असि ॥५॥

परि यो रोदसी उभे सद्यो वाजेभिरर्षति ।

मदेषु सर्वधा असि ॥६॥

स शुष्मी कलशेष्वा पुनानो अचिक्रदत् ।

मदेषु सर्वधा असि ॥७॥

सायणभाष्यम्

' परि सुवानः' इति सप्तर्चमष्टादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'परि सुवानः सप्त' इत्यनुक्रान्तम् । गतो विनियोगः ॥

परिं सुवा॒नो गिंरि॒ष्ठाः प॒वित्रे॒ सोमों अक्षाः ।

मदें॑षु सर्व॒धा अं॑सि ॥१

परिं । सु॒वा॒नः । गि॒रि॒ऽस्थाः । प॒वित्रें । सोमः॑ । अ॒क्षा॒रितिं ।

मदें॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥१

परि । सुवानः । गिरिऽस्थाः । पवित्रे । सोमः । अक्षारिति ।

मदेषु । सर्वऽधाः । असि ॥१

अयं "सोमः "पवित्रे "परि "अक्षाः परिक्षरति । "सुवानः सूयमानः "गिरिष्ठाः गिरिस्थायी । ग्रावसु वर्तमान इत्यर्थः । स त्वं "मदेषु मादकेषु सोतृषु "सर्वधा "असि सर्वस्य धाता दाता वा भवसि ॥

त्वं विप्र॒स्त्वं क॒विर्मधु॒ प्र जा॒तमंधं॑सः ।

मदें॑षु सर्व॒धा अं॑सि ॥२

त्वम् । विप्रः॑ । त्वम् । क॒विः । मधुं॑ । प्र । जा॒तम् । अन्धं॑सः ।

मदें॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥२

त्वम् । विप्रः । त्वम् । कविः । मधु । प्र । जातम् । अन्धसः ।

मदेषु । सर्वऽधाः । असि ॥२

हे सोम “त्वं “विप्रः विविधं प्रीणयिता विप्रसदृशो वा “त्वं च “कविः मेधावी । अतस्त्वम् “अन्धसः अन्नात् "जातं “मधु मधुररसं “प्र यच्छसीति शेषः । ।

तव॒ विश्वे॑ स॒जोष॑सो दे॒वासः॑ पी॒तिमा॑शत ।

मदे॑षु सर्व॒धा अ॑सि ॥३

तव॑ । विश्वे॑ । स॒ऽजोष॑सः । दे॒वासः॑ । पी॒तिम् । आ॒श॒त॒ ।

मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥३

तव । विश्वे । सऽजोषसः । देवासः । पीतिम् । आशत ।

मदेषु । सर्वऽधाः । असि ॥३

हे सोम “तव “पीतिं पानं “विश्वे “देवासः देवाः “सजोषसः समानप्रीतयः सन्तः “आशत प्राप्नुवन् ॥

आ यो विश्वा॑नि॒ वार्या॒ वसू॑नि॒ हस्त॑योर्द॒धे ।

मदे॑षु सर्व॒धा अ॑सि ॥४

आ । यः । विश्वा॑नि । वार्या॑ । वसू॑नि । हस्त॑योः । द॒धे ।

मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥४

आ । यः । विश्वानि । वार्या । वसूनि । हस्तयोः । दधे ।

मदेषु । सर्वऽधाः । असि ॥४

“यः सोमः “विश्वानि “वार्या वरणीयानि “वसूनि धनानि स्तोतुः “हस्तयोः “आ “दधे करोति । प्रयच्छतीत्यर्थः । “मदेषु “सर्वधा “असि इति । अथवा स शुष्मी इत्युत्तरत्र संबन्धः ॥

य इ॒मे रोद॑सी म॒ही सं मा॒तरे॑व॒ दोह॑ते ।

मदे॑षु सर्व॒धा अ॑सि ॥५

यः । इ॒मे इति॑ । रोद॑सी॒ इति॑ । म॒ही इति॑ । सम् । मा॒तरा॑ऽइव । दोह॑ते ।

मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥५

यः । इमे इति । रोदसी इति । मही इति । सम् । मातराऽइव । दोहते ।

मदेषु । सर्वऽधाः । असि ॥५

“यः सोमः “इमे “मही महत्यौ “रोदसी द्यावापृथिव्यौ “सं “दोहते। उभयोः सारं परिगृह्णातीत्यर्थः । "मातरेव यथा द्वे मातरावेको वत्सो दोहते तद्वत् ॥

परि॒ यो रोद॑सी उ॒भे स॒द्यो वाजे॑भि॒रर्ष॑ति ।

मदे॑षु सर्व॒धा अ॑सि ॥६

परि॑ । यः । रोद॑सी॒ इति॑ । उ॒भे इति॑ । स॒द्यः । वाजे॑भिः । अर्ष॑ति ।

मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥६

परि । यः । रोदसी इति । उभे इति । सद्यः । वाजेभिः । अर्षति ।

मदेषु । सर्वऽधाः । असि ॥६

“यः सोमः “उभे “रोदसी द्यावापृथिव्यौ “सद्यः तदानीमेव “वाजेभिः अन्नैः “परि “अर्षति परिगच्छति । सोमाहुत्या द्यावापृथिव्यावन्नवत्यौ करोतीत्यर्थः ॥

स शु॒ष्मी क॒लशे॒ष्वा पु॑ना॒नो अ॑चिक्रदत् ।

मदे॑षु सर्व॒धा अ॑सि ॥७

सः । शु॒ष्मी । क॒लशे॑षु । आ । पु॒ना॒नः । अ॒चि॒क्र॒द॒त् ।

मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥७

सः । शुष्मी । कलशेषु । आ । पुनानः । अचिक्रदत् ।

मदेषु । सर्वऽधाः । असि ॥७

उक्तरीत्या महान् “सः सोमः “शुष्मी बलवान् “पुनानः पूयमानः सन् “आ “अचिक्रदत् शब्दं करोति । अत्र सर्वत्र यथोचितमुत्तरपादो नेयः ॥ ॥ ८ ॥

टिप्पणी

वैदन्वतानि (https://sa.wikisource.org/s/2ibz) (ग्रामगेयः)

आद्यं वैदन्वतम् (https://sa.wikisource.org/s/1z8d) (ऊहगानम्)

तृतीयं वैदन्वतम् (https://sa.wikisource.org/s/1z8f) (ऊहगानम्)

चतुर्थं वैदन्वतम् (https://sa.wikisource.org/s/1z8e) (ऊहगानम्)

द्र. आभ्राजम् (https://sa.wikisource.org/s/2iby) (ऊह्यगानम्)

परिस्वानो गिरिष्ठा इति परिवत्यो गायत्र्यो भवन्ति सर्वस्य पर्याप्त्यै- पञ्च.ब्रा. १३.११.१ (https://sa.wikisource.org/s/tvy)

मण्डल ९

ऋग्वेदः सूक्तं ९.१९

ऋग्वेदः - मण्डल ९
← सूक्तं ९.१८ सूक्तं ९.१९ सूक्तं ९.२० →
कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु ।

तन्नः पुनान आ भर ॥१॥

युवं हि स्थः स्वर्पती इन्द्रश्च सोम गोपती ।

ईशाना पिप्यतं धियः ॥२॥

वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि ।

हरिः सन्योनिमासदत् ॥३॥

अवावशन्त धीतयो वृषभस्याधि रेतसि ।

सूनोर्वत्सस्य मातरः ॥४॥

कुविद्वृषण्यन्तीभ्यः पुनानो गर्भमादधत् ।

याः शुक्रं दुहते पयः ॥५॥

उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु ।

पवमान विदा रयिम् ॥६॥

नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर ।

दूरे वा सतो अन्ति वा ॥७॥

सायणभाष्यम्

‘ यत् सोम' इति सप्तर्चमेकोनविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् ।' यत् सोम' इत्यनुक्रान्तम् । गतो विनियोगः ॥

यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु ।

तन्नः पुनान आ भर ॥१

यत् । सोम । चित्रम् । उक्थ्यम् । दिव्यम् । पार्थिवम् । वसु ।

तत् । नः । पुनानः । आ । भर ॥१

यत् । सोम । चित्रम् । उक्थ्यम् । दिव्यम् । पार्थिवम् । वसु ।

तत् । नः । पुनानः । आ । भर ॥१

हे “सोम “यत् “चित्रं चायनीयम् “उक्थ्यं स्तुत्यं “दिव्यं दिवि भवं “पार्थिवं पृथिवीसंबद्धं च “वसु धनमस्ति “तत् “नः अस्मभ्यं “पुनानः पूयमानः सन् “आ “भर आहर ॥

युवं हि स्थः स्वर्पती इंद्रश्च सोम गोपती ।

ईशाना पिंप्यतं धियः ॥२

युवम् । हि । स्थः । स्वःपती इति स्वःऽपती । इन्द्रः । च । सोम । गोपती इति गोऽपती ।

ईशाना । पिप्यतम् । धियः ॥२

युवम् । हि । स्थः । स्वःपती इति स्वःऽपती । इन्द्रः । च । सोम । गोपती इति गोऽपती ।

ईशाना । पिप्यतम् । धियः ॥२

हे “सोम “त्वम् “इन्द्रश्च "युवं “हि युवां खलु स्वर्पती सर्वस्य स्वामिनौ “स्थः भवथः । तथा “गोपती गवां पालकौ “ईशाना ईश्वरौ सन्तौ “धियः अस्मदीयानि कर्माणि “पिप्यतं प्याययतम् ॥

वृषा॑ पुना॒न आ॒युषु॑ स्त॒नय॒न्नधि॑ ब॒र्हिषि॑ ।

हरि॒: सन्योनि॒मासं॑दत् ॥३

वृषा॑ । पु॒ना॒नः । आ॒युषु॑ । स्त॒नय॑न् । अधि॑ । ब॒र्हिषि॑ ।

हरिः॑ । सन् । योनि॑म् । आ । अ॒स॒द॒त् ॥३

वृषा । पुनानः । आयुषु । स्तनयन् । अधि । बर्हिषि ।

हरिः । सन् । योनिम् । आ । असदत् ॥३

“वृषा कामानां वर्षकः सोमः “आयुषु मनुष्येष्वध्वर्य्वादिषु “पुनानः पूयमानः सन् 'स्तनयन् शब्दं कुर्वन् “अधि “बर्हिषि । अधीति सप्तम्यर्थानुवादी । आस्तीर्णे दर्भे “हरिः हरितवर्णः “सन् “योनिं स्वकीयं स्थानम् “आसदत् आसीदति ॥

अवा॑वशंत धी॒तयो॑ वृष॒भस्याधि॒ रेतं॑सि ।

सू॒नोर्व॒त्सस्य॑ मा॒तरः॑ ॥४

अवा॑वशन्त । धी॒तयः॑ । वृ॒ष॒भस्य॑ । अधि॑ । रेतं॑सि ।

सू॒नोः । व॒त्सस्य॑ । मा॒तरः॑ ॥४

अवावशन्त । धीतयः । वृषभस्य । अधि । रेतसि ।

सूनोः । वत्सस्य । मातरः ॥४

“धीतयः धीयमानाः सोमाख्येन वत्सेन पीयमाना वसतीवर्यः । क्तिन् व्यत्ययेनान्तोदात्तः । “अधि “रेतसि स्वकीये सारे “वृषभस्य वर्षकस्य सोमस्य । सोममित्यर्थः । “अवावशन्त पुनः कामयन्ते । सोममाप्यायियितुं कामयन्त इत्यर्थः । तदेवाह। "सूनोः स्वपुत्रस्थानीयस्य “वत्सस्य सोमस्य “मातरः निर्मात्र्यः प्रवृद्धिकामा मातृस्थानीया अवावशन्तेति समन्वयः ॥

कु॒विद्वृ॑ष॒ण्यंती॑भ्यः पुना॒नो गर्भ॑मा॒दधं॑त् ।

याः शु॒क्रं दु॑ह॒ते पयः॑ ॥५

कु॒वित् । वृ॒ष॒ण्यन्ती॑भ्यः । पु॒ना॒नः । गर्भ॑म् । आ॒ऽदधं॑त् ।

याः । शुक्रम् । दुहते । पयः ॥५

कुवित् । वृषण्यन्तीभ्यः । पुनानः । गर्भम् । आऽदधत् ।

याः । शुक्रम् । दुहते । पयः ॥५

“वृषण्यन्तीभ्यः वृषणं सोममात्मन इच्छन्तीभ्यो वसतीवरीभ्यः “पुनानः पूयमानो मिश्रयमाणः “गर्भं स्वगर्भस्थानीयं रसं “कुवित् बहु प्रभूतम् "आदधत् करोति । “याः आपः “शुक्रं दीप्तं “पयः “दुहते स्ववत्साय सोमाय ताभ्यो गर्भमादधत् ॥

उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु ।

पवमान विदा रयिं ॥६

उप । शिक्ष । अपऽतस्थुषः । भियसम् । आ । धेहि । शत्रुषु ।

पवमान । विदाः । रयिम् ॥६

उप । शिक्ष । अपऽतस्थुषः । भियसम् । आ । धेहि । शत्रुषु ।

पवमान । विदाः । रयिम् ॥६

हे “पवमान सोम “उप “शिक्ष त्वं समीपे कुरु । कान् । “अपतस्थुषः अपक्रम्य स्थितान् । अस्मदभिमतानित्यर्थः। “शत्रुषु अस्मद्विरोधिषु “भियसं भयम् “आ “धेहि कुरु जनय । अस्माकं तेषां शत्रूणां “रयिं धनं “विदाः विन्दसि ।।

नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर ।

दूरे वा सतो अंतिं वा ॥७

नि । शत्रोः । सोम । वृष्ण्यम् । नि । शुष्मम् । नि । वयः । तिर ।

दूरे । वा । सतः । अन्ति । वा ॥७

नि । शत्रोः । सोम । वृष्ण्यम् । नि । शुष्मम् । नि । वयः । तिर ।

दूरे । वा । सतः । अन्ति । वा ॥७

हे अभिषूयमाण “सोम त्वं “शत्रोः “वृष्ण्यं वर्षकं बलं “नि “तिर । निपूर्वस्तिरतिर्नाशार्थः । नाशय । तथा शत्रोः “शुष्मं शोषकं तेजः “नि तिर । तस्यैव “वयः अन्नं च “नि तिर । कीदृशस्य शत्रोः । “दूरे “वा "सतः अस्मत्तो दूरे वर्तमानस्य “अन्ति वा सतोऽन्तिके वर्तमानस्य वा ॥ ॥९॥

टिप्पणी

शैशवम् (https://sa.wikisource.org/s/2h7e)

मण्डल ९

ऋग्वेदः सूक्तं ९.२०

दे. पवमानः सोमः। गायत्री।

प्र कविर्देववीतयेऽव्यो वारेभिरर्षति ।

साह्वान्विश्वा अभि स्पृधः ॥१॥

स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति ।

पवमानः सहस्रिणम् ॥२॥

परि विश्वानि चेतसा मृशसे पवसे मती ।

स नः सोम श्रवो विदः ॥३॥

अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम् ।

इषं स्तोतृभ्य आ भर ॥४॥

त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ ।

पुनानो वह्ने अद्भुत ॥५॥

स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः ।

सोमश्चमूषु सीदति ॥६॥

क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि ।

दधत्स्तोत्रे सुवीर्यम् ॥७॥

सायणभाष्यम्

‘प्र कविः' इति सप्तर्चं विंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘प्र कविः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र क॒विर्दे॒ववी॑त॒येऽव्यो॒ वारे॑भिरर्षति ।

सा॒ह्वान्विश्वा॑ अ॒भि स्पृधः॑ ॥१

प्र । क॒विः । दे॒वऽवी॑तये । अव्यः॑ । वारे॑भिः । अ॒र्ष॒ति॒ ।

स॒ह्वान् । विश्वाः॑ । अ॒भि । स्पृधः॑ ॥१

प्र । कविः । देवऽवीतये । अव्यः । वारेभिः । अर्षति ।

सह्वान् । विश्वाः । अभि । स्पृधः ॥१

“कविः मेधावी सोमः "देववीतये देवानां पानाय “अव्यः अवेः “वारेभिः वारैः दशापवित्रेण “प्र “अर्षति प्रकर्षेण गच्छति । “साह्वान् शत्रूणां सोढा सोमः “विश्वाः “स्पृधः सर्वान् संग्रामान हिंसकान् वा “अभि भवतीति शेषः ॥

स हि ष्मा॑ जरि॒तृभ्य॒ आ वाजं॒ गोमं॑त॒मिन्व॑ति ।

पव॑मानः सह॒स्रिणं॑ ॥२

सः । हि । स्म॒ । ज॒रि॒तृऽभ्यः॑ । आ । वाजं॑म् । गोऽमं॑न्तम् । इन्व॑ति ।

पव॑मानः । स॒ह॒स्रिणं॑म् ॥२

सः । हि । स्म । जरितृऽभ्यः । आ । वाजम् । गोऽमन्तम् । इन्वति ।

पवमानः । सहस्रिणम् ॥२

“स “हि “ष्म स खलु “पवमानः सोमः "जरितृभ्यः स्तोतृभ्यः “गोमन्तं बहुभिर्गोभिर्युक्तं “सहस्रिणं सहस्रसंख्याकं “वाजम् अन्नम् “आ अभिमुखम् “इन्वति व्याप्नोति । प्रयच्छतीत्यर्थः ॥

परि॒ विश्वा॑नि॒ चेत॑सा मृ॒शसे॒ पव॑से म॒ती ।

स नः॑ सोम॒ श्रवो॑ विदः ॥३

परि॑ । विश्वा॑नि । चेत॑सा । मृ॒शसे॑ । पव॑से । म॒ती ।

सः । न॒ः । सो॒म॒ । श्रवः॑ । वि॒द॒ः ॥३

परि । विश्वानि । चेतसा । मृशसे । पवसे । मती ।

सः । नः । सोम । श्रवः । विदः ॥३

हे सोम त्वं “चेतसा स्वीयेनास्मदनुकूलेन चित्तेन “विश्वानि सर्वाणि धनानि “परि “मृशसे । प्रयच्छसीत्यर्थः । “मती मत्यास्मत्स्तुत्या "पवसे क्षरसि रसम्। “सः त्वं हे “सोम “नः अस्मभ्यं “श्रवः अन्नं “विदः देहि ॥

अ॒भ्य॑र्ष बृ॒हद्यशो॑ म॒घव॑द्भ्यो ध्रु॒वं र॒यिं ।

इषं॑ स्तो॒तृभ्य॒ आ भ॑र ॥४

अ॒भि । अ॒र्ष॒ । बृ॒हत् । यशः॑ । म॒घव॑त्ऽभ्यः । ध्रु॒वम् । र॒यिम् ।

इष॑म् । स्तो॒तृऽभ्यः॑ । आ । भ॒र॒ ॥४

अभि । अर्ष । बृहत् । यशः । मघवत्ऽभ्यः । ध्रुवम् । रयिम् ।

इषम् । स्तोतृऽभ्यः । आ । भर ॥४

हे सोम "बृहद्यशः महतीं कीर्तिम् “अभ्यर्ष अभिगमय । "मघवद्भ्यः हविष्मद्भ्यः अस्मभ्यं "ध्रुवं “रयिं धनं चाभ्यर्ष । किंच “इषम् अन्नं “स्तोतृभ्यः अस्मभ्यम् “आ “भर आहर ॥

त्वं राजे॑व सुव्र॒तो गिरः॑ सो॒मा वि॑वेशिथ ।

पु॒ना॒नो व॑ह्ने अद्भुत ॥५

त्वम् । राजा॑ऽइव । सु॒ऽव्र॒तः । गिरः॑ । सो॒म॒ । आ । वि॒वे॒शि॒थ॒ ।

पु॒ना॒नः । व॒ह्ने॒ । अ॒द्भु॒त॒ ॥५

त्वम् । राजाऽइव । सुऽव्रतः । गिरः । सोम । आ । विवेशिथ ।

पुनानः । वह्ने । अद्भुत ॥५

हे "सोम "सुव्रतः सुकर्मा “पुनानः “त्वं “राजेव “गिरः अस्मदीयाः स्तुतीः "आ "विवेशिथ आविशसि । हे "वह्ने वोढः “अद्भुत महन् सोम ॥

स वह्निर॒प्सु दु॒ष्टरो॑ मृ॒ज्यमा॑नो॒ गभ॑स्त्योः ।

सोम॑श्च॒मूषु॑ सीदति ॥६

सः । वह्निः॑ । अ॒प्ऽसु । दु॒स्तरः॑ । मृ॒ज्यमा॑नः । गभ॑स्त्योः ।

सोमः॑ । च॒मूषु॑ । सी॒द॒ति॒ ॥६

सः । वह्निः । अप्ऽसु । दुस्तरः । मृज्यमानः । गभस्त्योः ।

सोमः । चमूषु । सीदति ॥६

“सः “सोमः "वह्निः वोढा यज्ञादेः “अप्सु अन्तरिक्षे वर्तमानः “दुष्टरः दुःखेनान्यैस्तरणीयः "मृज्यमानः शोध्यमानः “गभस्त्योः हस्तयोरेवंभूतः सन् सः "चमूषु पात्रेषु “सीदति ॥

क्री॒ळुर्म॒खो न मं॑ह॒युः प॒वित्रं॑ सोम गच्छसि ।

दध॑त्स्तो॒त्रे सु॒वीर्यं॑ ॥७

क्री॒ळुः । म॒खः । न । मं॒ह॒युः । प॒वित्र॑म् । सो॒म॒ । ग॒च्छ॒सि॒ ।

दध॑त् । स्तो॒त्रे । सु॒ऽवीर्य॑म् ॥७

क्रीळुः । मखः । न । मंहयुः । पवित्रम् । सोम । गच्छसि ।

दधत् । स्तोत्रे । सुऽवीर्यम् ॥७

हे “सोम “क्रीळुः क्रीडनशीलस्त्वं “मंहयुः । मंहतिर्दानकर्मा । दानेच्छुः “मखो “न दानमिव “पवित्रं “गच्छसि । किं कुर्वन् । “स्तोत्रे स्तुतिकर्त्रे “सुवीर्यं शोभनवीर्यं “दधत् प्रयच्छन् ॥ ॥१०॥

मण्डल ९

ऋग्वेदः सूक्तं ९.२१

ऋग्वेदः - मण्डल ९

← सूक्तं ९.२० | सूक्तं ९.२१ | सूक्तं ९.२२ →

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

एते धावन्तीन्दवः सोमा इन्द्राय घृष्वयः ।

मत्सरासः स्वर्विदः ॥१॥

प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः ।

स्वयं स्तोत्रे वयस्कृतः ॥२॥

वृथा क्रीळन्त इन्दवः सधस्थमभ्येकमित् ।

सिन्धोरूर्मा व्यक्षरन् ॥३॥

एते विश्वानि वार्या पवमानास आशत ।

हिता न सप्तयो रथे ॥४॥

आस्मिन्पिशङ्गमिन्दवो दधाता वेनमादिशे ।

यो अस्मभ्यमरावा ॥५॥

ऋभुर्न रथ्यं नवं दधाता केतमादिशे ।

शुक्राः पवध्वमर्णसा ॥६॥

एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत ।

सतः प्रासाविषुर्मतिम् ॥७॥

सायणभाष्यम्

"एते धावन्ति' इति सप्तर्चमेकविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । एते धावन्ति' इत्यनुक्रान्तम् । गतो विनियोगः ॥

ए॒ते धा॑व॒न्तीन्द॑व॒: सोमा॒ इन्द्रा॑य॒ घृष्व॑यः ।

म॒त्स॒रास॑: स्व॒र्विद॑: ॥१

ए॒ते । धा॒व॒न्ति॒ । इन्द॑वः । सोमा॑: । इन्द्रा॑य । घृष्व॑यः ।

म॒त्स॒रास॑: । स्व॒:ऽविद॑: ॥१

एते । धावन्ति । इन्दवः । सोमाः । इन्द्राय । घृष्वयः ।

मत्सरासः । स्वःऽविदः ॥१

"एते "सोमाः "इन्द्राय "धावन्ति गच्छन्ति । कीदृशा एते । "इन्दवः क्लेदयितारो दीप्ता वा "घृष्वयः घर्षणशीलाः "मत्सरासः मादयितारः "स्वर्विदः स्वर्लोकस्य लम्भयितारः ।।

प्र॒वृ॒ण्वंतो॑ अभि॒युज॒: सुष्व॑ये वरिवो॒विद॑: ।

स्व॒यं स्तो॒त्रे व॑य॒स्कृत॑: ॥२

प्र॒ऽवृ॒ण्वन्त॑: । अ॒भि॒ऽयुज॑: । सुस्व॑ये । व॒रि॒व॒:ऽविद॑: ।

स्व॒यम् । स्तो॒त्रे । व॒य॒:ऽकृत॑: ॥२

प्रऽवृण्वन्तः । अभिऽयुजः । सुस्वये । वरिवःऽविदः ।

स्वयम् । स्तोत्रे । वयःऽकृतः ॥२

"प्रवृण्वन्तः सुवानं प्रकर्षेण संभजन्तः तथा "अभियुजः अभियोजयितारः "सुष्वये सुष्ठु अभिषवकर्त्रे "वरिवोविदः । ' वरिवः' इति धननाम । तस्य लम्भयितारः "स्वयं "स्तोत्रे "वयस्कृतः अन्नस्य कर्तारः । एते धावन्तीति संबन्धः ॥

वृथा॒ क्रीळं॑त॒ इंद॑वः स॒धस्थ॑म॒भ्येक॒मित् ।

सिंधो॑रू॒र्मा व्यं॑क्षरन् ॥३

वृथा॑ । क्रीळ॑न्तः । इन्द॑वः । स॒धऽस्थ॑म् । अ॒भि । एक॑म् । इत् ।

सिन्धोः॑ । ऊ॒र्मा । वि । अ॒क्ष॒र॒न् ॥३

वृथा । क्रीळन्तः । इन्दवः । सधऽस्थम् । अभि । एकम् । इत् ।

सिन्धोः । ऊर्मा । वि । अक्षरन् ॥३

"वृथा अनायासेन "क्रीळन्तः "इन्दवः सोमाः "एकमित् एकमेव "सधस्थं सहस्थानं द्रोणकलशं वा "अभि अक्षरन्निति शेषः । "सिन्धोरूर्मा वसतीवरीषु "व्यक्षरन् ।।

ए॒ते विश्वा॑नि॒ वार्या॒ पव॑मानास आशत ।

हि॒ता न सप्त॑यो॒ रथे॑ ॥४

ए॒ते । विश्वा॑नि । वार्या॑ । पव॑मानासः । आ॒श॒त॒ ।

हि॒ताः । न । सप्त॑यः । रथे॑ ॥४

एते । विश्वानि । वार्या । पवमानासः । आशत ।

हिताः । न । सप्तयः । रथे ॥४

"एते सोमाः "पवमानासः पूयमानाः "विश्वानि "वार्या "वार्याणि वरणीयानि धनानि "आशत व्याप्नुवन् । "रथे "हिताः स्थापिताः "नः "सप्तयः अश्वा इव । ते यथा रथमभिमतं देशं प्राप्नुवन्ति तद्वद्धनमस्माकं प्रायच्छन्नित्यर्थः ॥

आस्मिं॑न्पि॒शंग॑मिंदवो॒ दधा॑ता वे॒नमा॒दिशे॑ ।

यो अ॒स्मभ्य॒मरा॑वा ॥५

आ । अ॒स्मि॒न् । पि॒शङ्ग॑म् । इ॒न्द॒वः॒ । दधा॑त । वे॒नम् । आ॒ऽदिशे॑ ।

यः । अ॒स्मभ्य॑म् । अरा॑वा ॥५

आ । अस्मिन् । पिशङ्गम् । इन्दवः । दधात । वेनम् । आऽदिशे ।

यः । अस्मभ्यम् । अरावा ॥५

हे 'इन्दवः सोमाः “अस्मिन् यजमाने “पिशङ्गं बहुरूपं मणिमुक्ताहिरण्यादिभेदेन नानारूपं “वेनं (http://puranastudy.byethost14.com/pur_index27/vena1.htm) कामयन्तं बहुविधं कामम् “आदिशे अस्मभ्यमादेशनाय “आ “दधात आयच्छतः । “यः यजमानः “अस्मभ्यम् "अरावा ----- प्रयच्छति प्राप्तकाम एव खलु ऋत्विग्भ्यः प्रयच्छति ॥

ऋ॒भुर्न रथ्यं॒ नवं॒ दधा॑ता॒ केत॑मा॒दिशे॑ ।

शु॒क्राः प॑वध्व॒मर्ण॑सा ॥६

ऋ॒भुः । न । रथ्य॑म् । नव॑म् । दधा॑त । केत॑म् । आ॒ऽदिशे॑ ।

शु॒क्राः । प॒व॒ध्व॒म् । अर्ण॑सा ॥६

ऋभुः । न । रथ्यम् । नवम् । दधात । केतम् । आऽदिशे ।

शुक्राः । पवध्वम् । अर्णसा ॥६

“ऋभुर्न उरु भासमानो रथस्वामीव स यथा “रथ्यं रथस्य नेतारं “नवं स्तुत्यं कुशलं सारथिनमग्र आधत्ते तद्वदस्मदीयेऽस्मिन् “आदिशे स्वामिनि "केतं प्रज्ञानं “दधात स्थापयत । हे सोमाः योऽस्मभ्यं प्रयच्छति तस्मिन्नित्यर्थः। हे सोमाः "अर्णसा उदकेन “शुक्राः दीप्ताः सन्तः “पवध्वं क्षरध्वम्॥

ए॒त उ॒ त्ये अ॑वीवश॒न्काष्ठां॑ वा॒जिनो॑ अक्रत ।

स॒तः प्रासा॑विषुर्म॒तिं ॥७

ए॒ते । ऊँ॒ इति॑ । त्ये । अ॒वी॒व॒श॒न् । काष्ठा॑म् । वा॒जिनः॑ । अ॒क्र॒त॒ ।

स॒तः । प्र । अ॒सा॒वि॒षु॒ः । म॒तिम् ॥७

एते । ऊं इति । त्ये । अवीवशन् । काष्ठाम् । वाजिनः । अक्रत ।

सतः । प्र । असाविषुः । मतिम् ॥७

“त्ये ते “एत “उ एत एव सोमाः “अवीवशन् कामयन्ते यज्ञम् । कान्त्वा च “वाजिनः बलवन्तोऽन्नवन्तो वा सोमाः “काष्ठाम् “अक्रत निवासस्थानमकुर्वन् । द्रोणकलशादुद्गता ग्रहानित्यर्थः। “सतः यजमानस्य-स्तोतुर्वा “मतिं बुद्धिं स्तुतिं वा “प्रासाविषुः प्रैरयन् ॥ ॥ ११ ॥

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.२२

दे. पवमानः सोमः। गायत्री।

एते सोमास आशवो रथा इव प्र वाजिनः ।

सर्गाः सृष्टा अहेषत ॥१॥

एते वाता इवोरवः पर्जन्यस्येव वृष्टयः ।

अग्नेरिव भ्रमा वृथा ॥२॥

एते पूता विपश्चितः सोमासो दध्याशिरः ।

विपा व्यानशुर्धियः ॥३॥

एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः ।

इयक्षन्तः पथो रजः ॥४॥

एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः ।

उतेदमुत्तमं रजः ॥५॥

तन्तुं तन्वानमुत्तममनु प्रवत आशत ।

उतेदमुत्तमाय्यम् ॥६॥

त्वं सोम पणिभ्य आ वसु गव्यानि धारयः ।

ततं तन्तुमचिक्रदः ॥७॥

सायणभाष्यम्

"एते सोमासः' इति सप्तर्चं द्वाविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । एते सोमासः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

ए॒ते सोमा॑स आ॒शवो॒ रथा॑ इव॒ प्र वा॒जिनः॑ ।

सर्गाः॑ सृ॒ष्टा अ॑हेषत ॥१

ए॒ते । सोमा॑सः । आ॒शवः॑ । रथाः॑ऽइव । प्र । वा॒जिनः॑ ।

सर्गाः॑ । सृ॒ष्टाः । अ॒हे॒ष॒त॒ ॥१

एते । सोमासः । आशवः । रथाःऽइव । प्र । वाजिनः ।

सर्गाः । सृष्टाः । अहेषत ॥१

"एते पूयमानाः “सोमासः सोमाः “सृष्टाः अध्वर्युणा आशवः दशापवित्रादधोगमने शीघ्राः “प्र “अहेषत प्रहेषन्ते । शीघ्रगमने दृष्टान्तद्वयम् । आजौ सृष्टाः शीघ्राः “रथाइव तथोक्तलक्षणाः “वाजिनः इव वेजनवन्तोऽश्वा इव।।

ए॒ते वाता॑ इवो॒रवः॑ प॒र्जन्य॑स्येव वृ॒ष्टयः॑ ।

अ॒ग्नेरि॑व भ्र॒मा वृथा॑ ॥२

ए॒ते । वाताः॑ऽइव । उ॒रवः॑ । प॒र्जन्य॑स्यऽइव । वृ॒ष्टयः॑ ।

अ॒ग्नेःऽइ॑व । भ्र॒माः । वृथा॑ ॥२

एते । वाताःऽइव । उरवः । पर्जन्यस्यऽइव । वृष्टयः ।

अग्नेःऽइव । भ्रमाः । वृथा ॥२

“एते सोमाः “उरवः महान्तः “वाताइव वायव इव “वृथा अनायासेन व्यानशुः इत्युत्तरत्र संबन्धनीयम् । अथवाध्याहारेण निःसरन्तीति योज्यम् । तथा “पर्जन्यस्य “वृष्टयः “इव वर्षा यथा तथैव । किंच “अग्नेः “भ्रमाः भ्रमणा ज्वालासंचाराः “इव ॥

ए॒ते पू॒ता वि॑प॒श्चित॒ः सोमा॑सो॒ दध्या॑शिरः ।

वि॒पा व्या॑नशु॒र्धियः॑ ॥३

ए॒ते । पू॒ताः । वि॒प॒ःऽचितः॑ । सोमा॑सः । दधि॑ऽआशिरः ।

वि॒पा । वि । आ॒न॒शु॒ः । धियः॑ ॥३

एते । पूताः । विपःऽचितः । सोमासः । दधिऽआशिरः ।

विपा । वि । आनशुः । धियः ॥३

"एते “सोमासः सोमाः “पूताः शुद्धाः “विपश्चितः प्राज्ञाः “दध्याशिरः दध्याश्रयणाः “विपा प्रज्ञानेन “धियः अस्मदीयानि कर्माणि “व्यानशुः व्याप्नुवन्ति ।।

ए॒ते मृ॒ष्टा अम॑र्त्याः ससृ॒वांसो॒ न श॑श्रमुः ।

इय॑क्षंतः प॒थो रजः॑ ॥४

ए॒ते । मृ॒ष्टाः । अम॑र्त्याः । स॒सृ॒ऽवांसः॑ । न । श॒श्र॒मु॒ः ।

इय॑क्षन्तः । प॒थः । रजः॑ ॥४

एते । मृष्टाः । अमर्त्याः । ससृऽवांसः । न । शश्रमुः ।

इयक्षन्तः । पथः । रजः ॥४

“एते सोमाः “मृष्टाः दशापवित्रेण शोधिताः “अमर्त्याः अमरणधर्माणः “ससृवांसः हविर्धानात् सरन्तः “पथः मार्गान् “रजः लोकांश्च “इयक्षन्तः गन्तुमिच्छन्तः “न “शश्रमुः न श्राम्यन्ति ॥

ए॒ते पृ॒ष्ठानि॒ रोद॑सोर्विप्र॒यंतो॒ व्या॑नशुः ।

उ॒तेदमु॑त्त॒मं रजः॑ ॥५

ए॒ते । पृ॒ष्ठानि॑ । रोद॑सोः । वि॒ऽप्र॒यन्तः॑ । वि । आ॒न॒शु॒ः ।

उ॒त । इ॒दम् । उ॒त्ऽत॒मम् । रजः॑ ॥५

एते । पृष्ठानि । रोदसोः । विऽप्रयन्तः । वि । आनशुः ।

उत । इदम् । उत्ऽतमम् । रजः ॥५

“एते सोमाः “रोदसोः द्यावापृथिव्योः “पृष्ठानि “विप्रयन्तः विविधं गच्छन्तः “व्यानशुः व्याप्नुवन्ति । "उत अपि च “इदमुत्तमं “रजः द्युलोकं व्यानशुः । आहुतिद्वारेणेति भावः । रोदसोरित्यत्रान्तरिक्षोऽभिप्रेतः ।।

तंतुं तन्वा॒नमु॑त्त॒ममनु॑ प्र॒वत॑ आशत ।

उ॒तेदमु॑त्त॒माय्यँ॑ ॥६

तन्तु॑म् । त॒न्वा॒नम् । उ॒त्ऽत॒मम् । अनु॑ । प्र॒ऽवतः॑ । आ॒श॒त॒ ।

उ॒त । इ॒दम् । उ॒त्त॒माय्य॑म् ॥६

तन्तुम् । तन्वानम् । उत्ऽतमम् । अनु । प्रऽवतः । आशत ।

उत । इदम् । उत्तमाय्यम् ॥६

“तन्तुं यज्ञं “तन्वानम् “उत्तमम् उत्कृष्टं सोमम् “अनु “आशत “प्रवतः नद्यः । “उत अपि च “इदं कर्म अनेन सोमेन “उत्तमाय्यम् उत्तमीकृतम्। अथवा तन्तुं तन्वानं सोमं प्रवतोऽधःस्थिताः सर्वा अन्वाशत । उतेदमुत्तमाख्यं रजः । द्युलोक इत्यर्थः । सोऽप्यन्वश्नुते पृथिव्या चान्तरिक्षेण च । उत्तमीकृतमुत्तमाय्यम् ॥

त्वं सो॑म प॒णिभ्य॒ आ वसु॒ गव्या॑नि धारयः ।

त॒तं तंतु॑मचिक्रदः ॥७

त्वम् । सो॒म॒ । प॒णिऽभ्यः॑ । आ । वसु॑ । गव्या॑नि । धा॒र॒यः॒ ।

त॒तम् । तन्तु॑म् । अ॒चि॒क्र॒दः॒ ॥७

त्वम् । सोम । पणिऽभ्यः । आ । वसु । गव्यानि । धारयः ।

ततम् । तन्तुम् । अचिक्रदः ॥७

हे "सोम “त्वं “पणिभ्यः असुरेभ्यो लुब्धकेभ्यो वा सकाशात् “गव्यानि गोहितानि “वसु वसूनि गोयूथानि वसूनि चेति वा “आ आहृत्य “धारयः धारयसि । तथा “तन्तुं यज्ञं प्रति “ततं विस्तृतं यथा भवति तथा “अचिक्रदः शब्दमकार्षीः ॥ ॥ १२ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.२३

ऋग्वेदः - मण्डल ९

← सूक्तं ९.२२ | सूक्तं ९.२३ | सूक्तं ९.२४ →

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

सोमा असृग्रमाशवो मधोर्मदस्य धारया ।

अभि विश्वानि काव्या ॥१॥

अनु प्रत्नास आयवः पदं नवीयो अक्रमुः ।

रुचे जनन्त सूर्यम् ॥२॥

आ पवमान नो भरार्यो अदाशुषो गयम् ।

कृधि प्रजावतीरिषः ॥३॥

अभि सोमास आयवः पवन्ते मद्यं मदम् ।

अभि कोशं मधुश्चुतम् ॥४॥

सोमो अर्षति धर्णसिर्दधान इन्द्रियं रसम् ।

सुवीरो अभिशस्तिपाः ॥५॥

इन्द्राय सोम पवसे देवेभ्यः सधमाद्यः ।

इन्दो वाजं सिषाससि ॥६॥

अस्य पीत्वा मदानामिन्द्रो वृत्राण्यप्रति ।

जघान जघनच्च नु ॥७॥

सायणभाष्यम्

'सोमा असृग्रम्' इति सप्तर्चं त्रयोविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'सोमा असृग्रम्' इत्यनुक्रान्तम् । गतो विनियोगः ।।

सोमा॑ असृग्रमा॒शवो॒ मधो॒र्मद॑स्य॒ धार॑या ।

अ॒भि विश्वा॑नि॒ काव्या॑ ॥१

सोमा॑ः । अ॒सृ॒ग्र॒म् । आ॒शव॑ः । मधो॑ः । मद॑स्य । धार॑या ।

अ॒भि । विश्वा॑नि । काव्या॑ ॥१

सोमाः । असृग्रम् । आशवः । मधोः । मदस्य । धारया ।

अभि । विश्वानि । काव्या ॥१

"आशवः शीघ्राः "सोमाः "असृग्रम् असृग्रन् सृज्यन्ते । "मधोः मधुरस्य "मदस्य मदकरस्य "धारया असृग्रमिति संबन्धः । किं प्रति उच्यते । "अभि लक्षीकृत्य "विश्वानि सर्वाणि "काव्या काव्यानि स्तोत्राणि प्रति । स्तोत्रसमय इत्यर्थः ।

अनु॑ प्र॒त्नास॑ आ॒यव॑ः प॒दं नवी॑यो अक्रमुः ।

रु॒चे ज॑नंत॒ सूर्यं॑ ॥२

अनु॑ । प्र॒त्नास॑ः । आ॒यव॑ः । प॒दम् । नवी॑यः । अ॒क्र॒मु॒ः ।

रु॒चे । ज॒न॒न्त॒ । सूर्य॑म् ॥२

अनु । प्रत्नासः । आयवः । पदम् । नवीयः । अक्रमुः ।

रुचे । जनन्त । सूर्यम् ॥२

“प्रत्नासः पुराणाः केचित् “आयवः शीघ्रगमना अश्वाः "नवीयः नवतरं “पदम् “अनु “अक्रमुः अनुक्रमन्ते । रूपकव्याहारेण सोमाः स्तूयन्ते । “रुचे दीप्त्यै “सूर्यं “जनन्त कुर्वन्ति । दीप्तं कुर्वन्तीत्यर्थः । सोमप्यायनेन हि चन्द्रो रोचते ।

आ प॑वमान नो भरा॒र्यो अदा॑शुषो॒ गयं॑ ।

कृ॒धि प्र॒जाव॑ती॒रिषः॑ ॥३

आ । प॒व॒मा॒न॒ । नः॒ । भ॒र॒ । अ॒र्यः । अदा॑शुषः । गय॑म् ।

कृ॒धि । प्र॒जाऽव॑तीः । इषः॑ ॥३

आ । पवमान । नः । भर । अर्यः । अदाशुषः । गयम् ।

कृधि । प्रजाऽवतीः । इषः ॥३

हे “पवमान सोम त्वं “नः अस्मभ्यम् “अर्यः अरेः “अदाशुषः अप्रयच्छतः “गयं गृहं गृहोपलक्षितं धनम् “आ “भर आहर । तथास्मभ्यं “प्रजावतीरिषः च “कृधि कुरु ।।

अ॒भि सोमा॑स आ॒यवः॒ पव॑न्ते॒ मद्यं॒ मदं॑ ।

अ॒भि कोशं॑ मधु॒श्चुतं॑ ॥४

अ॒भि । सोमा॑सः । आ॒यवः॑ । पव॑न्ते । मद्य॑म् । मद॑म् ।

अ॒भि । कोश॑म् । म॒धु॒ऽश्चुत॑म् ॥४

अभि । सोमासः । आयवः । पवन्ते । मद्यम् । मदम् ।

अभि । कोशम् । मधुऽश्चुतम् ॥४

“आयवः गन्तारः “सोमासः सोमाः “मद्यं मदकरं रसम् “अभि “पवन्ते क्षरन्ति । तथा “मधुश्चुतं मधुस्राविणं "कोशम् । रसाधारेण कोशशब्देन तत्रामिश्रितो रसो लक्ष्यते। तम् “अभि पवन्त इति शेषः ।।

सोमो॑ अर्षति धर्ण॒सिर्दधा॑न इं॒द्रि॒यं रसं॑ ।

सु॒वीरो॑ अभिशस्ति॒पाः ॥५

सोमः॑ । अ॒र्ष॒ति॒ । ध॒र्ण॒सिः । दधा॑नः । इ॒न्द्रि॒यम् । रस॑म् ।

सु॒ऽवीरः॑ । अ॒भि॒श॒स्ति॒ऽपाः ॥५

सोमः । अर्षति । धर्णसिः । दधानः । इन्द्रियम् । रसम् ।

सुऽवीरः । अभिशस्तिऽपाः ॥५

“सोमः “अर्षति गच्छति । कीदृशः सः। “धर्णसिः धारको जगतां तथा “इन्द्रियम् इन्द्रियवर्धकं “रसं “दधानः धारयन् “सुवीरः सुवीर्यः “अभिशस्तिपाः अभिशस्तेः पाता। अभितो हिंसा ततो रक्षक इत्यर्थः। सोमपानं ब्रह्महत्यादिनिन्दामनुमार्ष्टीति प्रसिद्धम् ॥

इंद्रा॑य सोम पवसे दे॒वेभ्यः॑ सध॒माद्यः॑ ।

इंदो॒ वाजं॑ सिषाससि ॥६

इन्द्रा॑य । सो॒म॒ । प॒व॒से॒ । दे॒वेभ्यः॑ । स॒ध॒ऽमाद्यः॑ ।

इन्दो॒ इति॑ । वाज॑म् । सि॒सा॒स॒सि॒ ॥६

इन्द्राय । सोम । पवसे । देवेभ्यः । सधऽमाद्यः ।

इन्दो इति । वाजम् । सिसाससि ॥६

हे सोम “सधमाद्यः । सधमादो यज्ञः । तदर्हस्त्वम् “इन्द्राय “देवेभ्यः चान्येभ्यः “पवसे क्षरसि । हे तादृश "इन्दो सोम अस्मभ्यं “वाजम् अन्नं “सिषाससि दातुमिच्छसि ।।

अ॒स्य पी॒त्वा मदा॑ना॒मिंद्रो॑ वृ॒त्राण्य॑प्र॒ति ।

ज॒घान॑ ज॒घन॑च्च॒ नु ॥७

अ॒स्य । पी॒त्वा । मदा॑नाम् । इन्द्रः॑ । वृ॒त्राणि॑ । अ॒प्र॒ति ।

ज॒घान॑ । ज॒घन॑त् । च॒ । नु ॥७

अस्य । पीत्वा । मदानाम् । इन्द्रः । वृत्राणि । अप्रति ।

जघान । जघनत् । च । नु ॥७

“मदानां मदकराणां मध्येऽतिशयेन मदकरम् “अस्य अमुं सोमं “पीत्वा “वृत्राणि शत्रून् अप्रतिगतः सन् “इन्द्रः "जघान हतवान् । “नु क्षिप्रं “जघनत् “च । हन्तु चेदानीमपि ॥ ॥१३॥

टिप्पणी

९.२३.४ अभि सोमास आयवः इति

पौरुमद्गं साम (https://sa.wikisource.org/s/1z6l)

उभयस्तोभं गौतमम् (https://sa.wikisource.org/s/1z6m)

अन्तरिक्षम् (https://sa.wikisource.org/s/1z6n)

आष्कारणिधनं काण्वं (https://sa.wikisource.org/s/2hjl)

द्विहिङ्कारवामदेव्यम् (ऊहगानम् १.८.७)

गायत्रपार्श्वम् (ऊहगानम् १.८.८)

पौरुहन्मनम् (ऊहगानम् १.८.९)

द्वैगतम् (ऊहगानम् १.८.१०)

हारायणम् (ऊहगानम् १.८.११)

अच्छिद्रम् (ऊहगानम् १.८.१२)

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.२४

ऋग्वेदः - मण्डल ९

← सूक्तं ९.२३ | सूक्तं ९.२४ | सूक्तं ९.२५ →

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। गायत्री।

प्र सोमासो अधन्विषुः पवमानास इन्दवः ।

श्रीणाना अप्सु मृञ्जत ॥१॥

अभि गावो अधन्विषुरापो न प्रवता यतीः ।

पुनाना इन्द्रमाशत ॥२॥

प्र पवमान धन्वसि सोमेन्द्राय पातवे ।

नृभिर्यतो वि नीयसे ॥३॥

त्वं सोम नृमादनः पवस्व चर्षणीसहे ।

सस्निर्यो अनुमाद्यः ॥४॥

इन्दो यदद्रिभिः सुतः पवित्रं परिधावसि ।

अरमिन्द्रस्य धाम्ने ॥५॥

पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः ।

शुचिः पावको अद्भुतः ॥६॥

शुचिः पावक उच्यते सोमः सुतस्य मध्वः ।

देवावीरघशंसहा ॥७॥

सायणभाष्यम्

'प्र सोमासः' इति सप्तर्चं चतुर्विंशं सूक्तम् । असितो देवलो वर्षिर्गायत्री छन्दः सोमो देवता । 'प्र सोमासः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र सोमा॑सो अधन्विषुः॒ पव॑मानास॒ इंद॑वः ।

श्री॒णा॒ना अ॒प्सु मृं॑जत ॥१

प्र । सोमा॑सः । अ॒धु॒न्वि॒षुः॒ । पव॑मानासः । इन्द॑वः ।

श्री॒णा॒नाः । अ॒प्ऽसु । मृ॒ञ्ज॒त॒ ॥१

प्र । सोमासः । अधन्विषुः । पवमानासः । इन्दवः ।

श्रीणानाः । अप्ऽसु । मृञ्जत ॥१

“सोमासः सोमाः “पवमानासः पूयमानाः “इन्दवः दीप्ताः “प्र “अधन्विषुः । धन्वतिर्गतिकर्मा। प्रगच्छन्ति । किंच “श्रीणानाः गोभिः श्रयमाणाः "अप्सु वसतीवरीषु च “मृञ्जत मृज्यन्ते ।

अ॒भि गावो॑ अधन्विषु॒रापो॒ न प्र॒वता॑ य॒तीः ।

पु॒ना॒ना इंद्र॑माशत ॥२

अ॒भि । गावः॑ । अ॒धु॒न्वि॒षुः॒ । आपः॑ । न । प्र॒ऽवता॑ । य॒तीः ।

पु॒ना॒नाः । इन्द्र॑म् । आ॒श॒त॒ ॥२

अभि । गावः । अधन्विषुः । आपः । न । प्रऽवता । यतीः ।

पुनानाः । इन्द्रम् । आशत ॥२

“गावः गमनशीला इन्दवः “अभि “अधन्विषुः अभिगच्छन्ति दशापवित्रम् । किमिव । “प्रवता प्रवणवता देशेन “यतीः गच्छन्त्यः "आपो “न आप इव । पश्चात् “पुनानाः “इन्द्रं प्रीणयितुम् “आशत व्याप्नुवन् । आहुतिप्रणाड्येन्द्रमेव वा व्याप्नुवन् ॥

प्र पंवमान धन्वसि सोमेंद्राय पातंवे ।

नृभिर्यतो वि नीयसे ॥३

प्र । पवमान । धन्वसि । सोम । इन्द्राय । पातंवे ।

नृऽभिः । यतः । वि । नीयसे ॥३

प्र । पवमान । धन्वसि । सोम । इन्द्राय । पातवे ।

नृऽभिः । यतः । वि । नीयसे ॥३

हे पवमान “सोम “इन्द्राय इन्द्रस्य “पातवे पानाय “प्र “धन्वसि प्रगच्छस्याहवनीयं प्रति हविर्धानात् । तदेवाह। "नृभिः नेतृभिर्ऋत्विग्भिः “यतः विनीतः “वि “नीयसे हविर्धानात् । अथवा । पवमान प्र धन्वसि पात्रं प्रतीन्द्रपानाय तदर्थं हविर्धानाद्वि नीयसे ।

त्वं सोम नृमादनः पवस्व चर्षणीसहे ।

सस्निर्यो अनुमाद्यः ॥४

त्वम् । सोम । नृऽमादनः । पवस्व । चर्षणिऽसहे ।

सस्निः । यः । अनुऽमाद्यः ॥४

त्वम् । सोम । नृऽमादनः । पवस्व । चर्षणिऽसहे ।

सस्निः । यः । अनुऽमाद्यः ॥४

हे “सोम “त्वं नृमादनः नृणां मादयिता त्वं “चर्षणीसहे । चर्षणयो मनुष्या द्वेष्टारः । तेषां समभिभवित्र इन्द्राय “पवस्व क्षर "यः त्वं “सस्निः शुद्धः “अनुमाद्यः स्तुत्यः स पवस्वेति समन्वयः ॥

इंदो यदद्रिंभिः सुतः पवित्रं परिधावसि ।

अरमिंद्रस्य धाम्ने ॥५

इन्दो इति । यत् । अद्रिंऽभिः । सुतः । पवित्रम् । परिऽधावसि ।

अर॑म् । इन्द्र॑स्य । धाम्ने॑ ॥५

इन्दो इति । यत् । अद्रिऽभिः । सुतः । पवित्रम् । परिऽधावसि ।

अरम् । इन्द्रस्य । धाम्ने ॥५

हे “इन्दो त्वं “यत् यदा “अद्रिभिः ग्रावभिः “सुतः अभिषुतः “पवित्रं दशापवित्रं “परिधावसि परिगच्छसि । तदा “इन्द्रस्य “धाम्ने स्थानायाधारकायोदराय वा “अरं पर्याप्तो भवसि ।।

पव॑स्व वृत्रहंतमो॒क्थेभि॑रनु॒माद्यः॑ ।

शुचिः॑ पाव॒को अद्भु॑तः ॥६

पव॑स्व । वृ॒त्र॒ह॒न्ऽत॒म॒ । उ॒क्थेभिः॑ । अ॒नु॒ऽमाद्यः॑ ।

शुचिः॑ । पा॒व॒कः । अद्भु॑तः ॥६

पवस्व । वृत्रहन्ऽतम । उक्थेभिः । अनुऽमाद्यः ।

शुचिः । पावकः । अद्भुतः ॥६

हे “वृत्रहन्तम शत्रूणामतिशयेन हन्तरिन्दो त्वं “पवस्व क्षर । कीदृशस्त्वम् । “उक्थेभिः शस्त्रैः “अनुमाद्यः स्तुत्यः “शुचिः शुद्धः “पावकः अन्यस्य शोधकः “अद्भुतः महान् । एवंमहानुभावः पवस्व ॥

शुचिः॑ पाव॒क उ॑च्यते॒ सोमः॑ सु॒तस्य॒ मध्वः॑ ।

दे॒वा॒वीर॑घशंस॒हा ॥७

शुचिः॑ । पा॒व॒कः । उ॒च्य॒ते॒ । सोमः॑ । सु॒तस्य॑ । मध्वः॑ ।

दे॒व॒ऽअ॒वीः । अ॒घ॒शं॒स॒ऽहा ॥७

शुचिः । पावकः । उच्यते । सोमः । सुतस्य । मध्वः ।

देवऽअवीः । अघशंसऽहा ॥७

“सुतस्य अभिषुतस्य “मध्वः मदकरस्य वल्ल्यात्मकः “सोमः रसरूपः “शुचिः स्वयं शुद्धः “पावकः शोधकश्च “उच्यते । तथा “देवावीः देवानामविता तर्पयिता “अघशंसहा । अघं पापं शंसन्तीत्यघशंसा असुराः। तेषां हन्तेति चोच्यते ॥ ॥ १४ ॥ ॥ १ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.२५

ऋग्वेदः - मण्डल ९

← सूक्तं ९.२४

सूक्तं ९.२५

सूक्तं ९.२६ →

दृळहच्युत आगस्त्यः।

दे. पवमानः सोमः। गायत्री।

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।

मरुद्भ्यो वायवे मदः ॥१॥

पवमान धिया हितोऽभि योनिं कनिक्रदत् ।

धर्मणा वायुमा विश ॥२॥

सं देवैः शोभते वृषा कविर्योनावधि प्रियः ।

वृत्रहा देववीतमः ॥३॥

विश्वा रूपाण्याविशन्पुनानो याति हर्यतः ।

यत्रामृतास आसते ॥४॥

अरुषो जनयन्गिरः सोमः पवत आयुषक् ।

इन्द्रं गच्छन्कविक्रतुः ॥५॥

आ पवस्व मदिन्तम पवित्रं धारया कवे ।

अर्कस्य योनिमासदम् ॥६॥

सायणभाष्यम्

द्वितीयेऽनुवाके षट्त्रिंशत्सूक्तानि । तत्र 'पवस्व' इति षड्टचं प्रथमं सूक्तं दृळहच्युतनाम्नोऽगस्त्यपुत्रस्यार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च-' पवस्व षड् दृळहच्युत आगस्त्यः । इति । गतो विनियोगः ॥

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।

मरुद्भ्यो वायवे मदः ॥१

पवस्व । दक्षऽसाधनः । देवेभ्यः । पीतये । हरे ।

मरुत्ऽभ्यः । वायवे । मदः ॥१

पवस्व । दक्षऽसाधनः । देवेभ्यः । पीतये । हरे ।

मरुत्ऽभ्यः । वायवे । मदः ॥१

हे "हरे हरितवर्ण पापहर्तर्वा सोम "दक्षसाधनः । दक्षो बलम् । तस्य साधकः "मदः मदकरश्च त्वं "पवस्व क्षर। "देवेभ्यः इन्द्रादिभ्यः "पीतये पानाय । तथा "मरुद्यःस "वायवे च पीतये पवस्व ॥

पवमान धिया हितो३ऽभि योनिं कनिक्रदत् ।

धर्मणा वायुमा विश ॥२

पवमान । धिया । हितः । अभि । योनिम् । कनिक्रदत् ।

धर्मणा । वायुम् । आ । विश ॥२

पवमान । धिया । हितः । अभि । योनिम् । कनिक्रदत् ।

धर्मणा । वायुम् । आ । विश ॥२

हे "पवमान सोम "धिया कर्मणास्मद्व्यापारेण अङ्गुल्या वा "हितः धृतः सन् "कनिक्रदत् शब्दं कुर्वन् "योनिं स्थानं ग्रहं वा "अभि विशेति शेषः । तदेवाह। "धर्मणाः "वायुम् । वायुसंबन्धि पात्रमित्यर्थः । तत् "आ "विश प्रविश ॥

सं दे॒वैः शोभते॒ वृषा॑ क॒विर्योना॒वधि॑ प्रि॒यः ।

वृ॒त्र॒हा दे॑व॒वीत॑मः ॥३

सम् । दे॒वैः । शो॒भ॒ते॒ । वृषा॑ । क॒विः । योनौ॑ । अधि॑ । प्रि॒यः ।

वृ॒त्र॒ऽहा । दे॒व॒ऽवीत॑मः ॥३

सम् । देवैः । शोभते । वृषा । कविः । योनौ । अधि । प्रियः ।

वृत्रऽहा । देवऽवीतमः ॥३

अयं सोमः "सं "शोभते "देवैः सह "योनौ स्थाने स्वीयेऽधिष्ठितः "वृषा कामानां वर्षकः “कविः क्रान्तप्रज्ञः "प्रियः प्रियभूतः सर्वेषां यद्वा प्रीणयिता “वृत्रहा वृत्रस्य हन्ता “देववीतमः अतिशयेन देवान् कामयमानः एवंमहानुभावः सोमः संशोभते ।।

विश्वा॑ रू॒पाण्या॑वि॒शन्पु॑ना॒नो या॑ति हर्य॒तः ।

यत्रा॒मृता॑स॒ आस॑ते ॥४

विश्वा॑ । रू॒पाणि॑ । आ॒ऽवि॒शन् । पु॒ना॒नः । या॒ति॒ । ह॒र्य॒तः ।

यत्र॑ । अ॒मृता॑सः । आस॑ते ॥४

विश्वा । रूपाणि । आऽविशन् । पुनानः । याति । हर्यतः ।

यत्र । अमृतासः । आसते ॥४

“विश्वा सर्वाणि रूपाण्याविशन् "पुनानः पूयमानः "हर्यतः कमनीयः । ‘हर्य गतिकान्त्योः । ईदृशः "याति गच्छति । "यत्र "अमृतासः अमृता देवाः "आसते तिष्ठन्ति तं देशं याति ॥

अ॒रु॒षो ज॒नय॒न्गिरः॒ सोमः॑ पवत आयु॒षक् ।

इंद्रं॒ गच्छं॑न्क॒विक्र॑तुः ॥५

अ॒रु॒षः । ज॒नय॑न् । गिरः॑ । सोमः॑ । प॒व॒ते॒ । आ॒यु॒षक् ।

इन्द्र॑म् । गच्छ॑न् । क॒विऽक्र॑तुः ॥५

अरुषः । जनयन् । गिरः । सोमः । पवते । आयुषक् ।

इन्द्रम् । गच्छन् । कविऽक्रतुः ॥५

“अरुषः आरोचमानः "सोमः "गिरः शब्दान् "जनयन् पवते क्षरति । किं कुर्वन् । "आयुषक् अनुषक्तम् "इन्द्रं "गच्छन् व्याप्नुवन् "कविक्रतुः क्रान्तप्रज्ञः ॥

आ पंवस्व मदिंतम पुवित्रं धारंया कवे ।

अुर्कस्यु योनिंमासदं ॥६

आ । पुवुस्वु । मुदिन्ऽतुमु । पुवित्रंम् । धारंया । कुवे ।

अुर्कस्यं । योनिंम् । आुऽसदंम् ॥६

आ । पवस्व । मदिन्ऽतम । पवित्रम् । धारया । कवे ।

अर्कस्य । योनिम् । आऽसदम् ॥६

हे “मदिन्तम मादयितृतम "कवे क्रान्तप्रज्ञ सोम त्वं "पवित्रम् अतिक्रम्य “धारया “आ “पवस्व । किमर्थम् । "अर्कस्य अर्चनीयस्येन्द्रस्य "योनिं स्थानम् "आसदं प्राप्तुम् ॥ ॥ १५ ॥

टिप्पणी

९.२५.१ पवस्व दक्षसाधनो इति

अदारसृक् (https://sa.wikisource.org/s/2gni)

चतुर्थे अहनि माध्यन्दिनपवमानस्य प्रथमं तृचम् -- पयस्व दक्षसाधन"इति गायत्री भवति सिध्यै। यत् पवस्वेति तद्बृहतो रूपं बार्हतं ह्येतदहः - तां.ब्रा. १२.९.१ (https://sa.wikisource.org/s/tvr)

पवस्व दक्षसाधन इति माध्यन्दिनस्य पवमानस्य दक्षवतीर् गायत्र्यो भवन्ति। अहर् एवैताभिर् दक्षयन्ति, छन्दांसि दक्षयन्ति, देवता दक्षयन्ति, षोडशिनं दक्षयन्ति। देवेभ्यः पीतये हरे मरुद्भ्यो वायवे मद इति मरुत्वतीर् भवन्ति। मरुत्वद् वै मध्यन्दिनस्य रूपम्। मध्यन्दिनस्यैव तद् रूपान् न यन्ति। सं देवैश् शोभते वृषेति वृषेति वृषण्वतीर् भवन्ति बृहतो रूपम्। बार्हतम् एतद् अहः। पवमान धिया हितो ऽभि योनिं कनिक्रदद् इति योनिमतीर् भवन्ति। योनेर् वै प्रजाः पशवः प्रजायन्ते। जनद्वद् एतस्य वैराजस्याह्नो रूपम्। धर्मणा वायुम् आ रुहेति वायुमतीर् भवन्ति - वायुर् वै शान्तिश् - शान्त्या एवानिर्दाहाय। - जैब्रा ३.६६ (https://sa.wikisource.org/s/ehl)

मण्डल ९

ऋग्वेदः सूक्तं ९.२६

ऋग्वेदः - मण्डल ९

← सूक्तं ९.२५ | सूक्तं ९.२६ | सूक्तं ९.२७ →

इध्मवाहो दार्ळच्युतः।

दे. पवमानः सोमः। गायत्री।

तममृक्षन्त वाजिनमुपस्थे अदितेरधि ।

विप्रासो अण्व्या धिया ॥१॥

तं गावो अभ्यनूषत सहस्रधारमक्षितम् ।

इन्दुं धर्तारमा दिवः ॥२॥

तं वेधां मेधयाह्यन्पवमानमधि द्यवि ।

धर्णसिं भूरिधायसम् ॥३॥

तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः ।

पतिं वाचो अदाभ्यम् ॥४॥

तं सानावधि जामयो हरिं हिन्वन्त्यद्रिभिः ।

हर्यतं भूरिचक्षसम् ॥५॥

तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम् ।

इन्दविन्द्राय मत्सरम् ॥६॥

सायणभाष्यम्

‘तममृक्षन्त' इति षड्चं द्वितीयं सूक्तं दृळ्हच्युतपुत्रस्येध्मवाहनाम्न आर्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च–' तममृक्षन्तेध्मवाहो दार्ढच्युतः' इति । गतो विनियोगः ॥

तम॑मृक्षंत वा॒जिन॑मु॒पस्थे॒ अदि॑ते॒रधि॑ ।

विप्रा॑सो॒ अण्व्या॑ धि॒या ॥१

तम् । अ॒मृ॒क्ष॒न्त॒ । वा॒जिन॑म् । उ॒पऽस्थे॑ । अदि॑तेः । अधि॑ ।

विप्रा॑सः । अण्व्या॑ । धि॒या ॥१

तम् । अमृक्षन्त । वाजिनम् । उपऽस्थे । अदितेः । अधि ।

विप्रासः । अण्व्या । धिया ॥१

“तं "वाजिनम् अश्वमश्ववदाशुम्। व्याप्तमित्यर्थः। “अदितेः पृथिव्याः “उपस्थे उत्सङ्गे। “अधि इति सप्तम्यर्थानुवादी । "अमृक्षन्त शोधितवन्तः । के। "विप्रासः मेधाविनोऽध्वर्य्वादयः । केन साधनेन । "अण्व्या अङ्गुल्या "धिया प्रज्ञया स्तुत्या वा अमृक्षन्त । अथवाण्व्या सूक्ष्मया धियाङ्गुल्येति विशेष्यविशेषणभावः ॥

तं गावो॑ अ॒भ्य॑नूषत स॒हस्र॑धार॒मक्षि॑तं ।

इंदुं॑ ध॒र्तार॒मा दि॒वः ॥२

तम् । गावः॑ । अ॒भि । अ॒नू॒ष॒त॒ । स॒हस्र॑ऽधारम् । अक्षि॑तम् ।

इन्दु॑म् । ध॒र्तार॑म् । आ । दि॒वः ॥२

तम् । गावः । अभि । अनूषत । सहस्रऽधारम् । अक्षितम् ।

इन्दुम् । धर्तारम् । आ । दिवः ॥२

“तं सोमं "गावः गन्त्र्यः स्तुतयः “अभ्यनूषत अस्तुवन् । कीदृशं तम् । "सहस्रधार बहुधारम् “अक्षितम् अक्षीणम् "इन्दुं दीप्तं "दिवः द्युलोकस्य “आ “धर्तारं सर्वतो धारकम् । सोमाधारत्वात् द्युलोकवासिनां संस्थानस्य ॥

तं वे॒धां मे॒धया॑ह्य॒न्पव॑मान॒मधि॒ द्यवि॑ ।

ध॒र्ण॒सिं भूरि॑धायसं ॥३

तम् । वे॒धाम् । मे॒धया॑ । अ॒ह्य॒न् । पव॑मानम् । अधि॑ । द्यवि॑ ।

ध॒र्ण॒सिम् । भूरि॑ऽधायसम् ॥३

तम् । वेधाम् । मेधया । अह्यन् । पवमानम् । अधि । द्यवि ।

धर्णसिम् । भूरिऽधायसम् ॥३

“वेधां विधातारं "पवमानं "तं "मेधया प्रज्ञया "अह्यन् प्रहिण्वन्ति । किं प्रति । "अधि “द्यवि द्युलोकं प्रति । पुनः कीदृशम् । “धर्णसिं सर्वस्य धारकं "भूरिधायसं बहूनां कर्तारम् ।।

तम॑ह्यन्भु॒रिजो॑र्धि॒या सं॒वसा॑नं वि॒वस्व॑तः ।

पतिं॑ वा॒चो अदा॑भ्यं ॥४

तम् । अ॒ह्य॒न् । भु॒रिजोः॑ । धि॒या । स॒म्ऽवसा॑नम् । वि॒वस्व॑तः ।

पति॑म् । वा॒चः । अदा॑भ्यम् ॥४

तम् । अह्यन् । भुरिजोः । धिया । सम्ऽवसानम् । विवस्वतः ।

पतिम् । वाचः । अदाभ्यम् ॥४

“तं सोमं "विवस्वतः परिचरत ऋत्विजः "भुरिजोः बाह्वोः “धिया अङ्गुल्या "अह्यन् प्राहिण्वन् । कीदृशं तम् । "संवसानं वसन्तं पात्रे “वाचः स्तुतेः "पतिं स्वामिनम् "अदाभ्यम् अदम्भनीयम् ॥

तं साना॒वधि॑ जा॒मयो॒ हरिं॑ हिन्व॒न्त्यद्रि॑भिः ।

ह॒र्य॒तं भूरि॑चक्षसं ॥५

तम् । सानौ॑ । अधि॑ । जा॒मयः॑ । हरि॑म् । हि॒न्व॒न्ति॒ । अद्रि॑ऽभिः ।

ह॒र्य॒तम् । भूरि॑ऽचक्षसम् ॥५

तम् । सानौ । अधि । जामयः । हरिम् । हिन्वन्ति । अद्रिऽभिः ।

हर्यतम् । भूरिऽचक्षसम् ॥५

“तं सोमं "हरिं हरितवर्णं "सानावधि समुच्छ्रिते देशे। अधीति सप्तम्यर्थानुवादी। "जामयः अङ्गुलयः “हिन्वन्ति प्रेरयन्ति । अधिषुण्वन्ति "अद्रिभिः ग्रावभिः । कीदृशम् । "हर्यतं कमनीयं "भूरिचक्षसं बहुद्रष्टारम् ॥

तं त्वा॑ हिन्वंति वे॒धस॒: पव॑मान गिरा॒वृधं॑ ।

इंदु॒विंद्रा॑य मत्स॒रं ॥६

तम् । त्वा॒ । हि॒न्व॒न्ति॒ । वे॒धसः॑ । पव॑मान । गि॒रा॒ऽवृध॑म् ।

इन्दो॒ इति॑ । इन्द्रा॑य । म॒त्स॒रम् ॥६

तम् । त्वा । हिन्वन्ति । वेधसः । पवमान । गिराऽवृधम् ।

इन्दो इति । इन्द्राय । मत्सरम् ॥६

हे "पवमान सोम “तम् उक्तगुणविशिष्टं "त्वा त्वां “हिन्वन्ति प्रेरयन्ति । कस्मै । "इन्द्राय । के। "वेधसः विधातार ऋत्विजः । कीदृशं त्वाम् । “गिरावृधं स्तुत्या वर्धमानम् “इन्दुं दीप्तं सरूपं वा "मत्सरं मदकरम् ॥ ॥ १६ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.२७

ऋग्वेदः - मण्डल ९

← सूक्तं ९.२६ | सूक्तं ९.२७ | सूक्तं ९.२८ →

नृमेध आङ्गिरसः

दे. पवमानः सोमः। गायत्री।

एष कविरभिष्टुतः पवित्रे अधि तोशते ।

पुनानो घ्नन्नप स्रिधः ॥१॥

एष इन्द्राय वायवे स्वर्जित्परि षिच्यते ।

पवित्रे दक्षसाधनः ॥२॥

एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः ।

सोमो वनेषु विश्ववित् ॥३॥

एष गव्युरचिक्रदत्पवमानो हिरण्ययुः ।

इन्दुः सत्राजिदस्तृतः ॥४॥

एष सूर्येण हासते पवमानो अधि द्यवि ।

पवित्रे मत्सरो मदः ॥५॥

एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः ।

पुनान इन्दुरिन्द्रमा ॥६॥

सायणभाष्यम्

'एष कविः' इति षडृचं तृतीयं सूक्तं नृमेधनाम्न अङ्गिरसस्यार्षं गायत्रं सौम्यम् । 'एष कविर्नृमेधः' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

ए॒ष क॒विर॒भिष्टु॑तः प॒वित्रे॒ अधि॑ तोशते ।

पु॒ना॒नो घ्नन्न॒प स्रिधः॑ ॥१

ए॒षः । क॒विः । अ॒भिऽस्तु॑तः । प॒वित्रे॑ । अधि॑ । तो॒श॒ते॒ ।

पु॒ना॒नः । घ्नन् । अप॑ । स्रिधः॑ ॥१

एषः । कविः । अभिऽस्तुतः । पवित्रे । अधि । तोशते ।

पुनानः । घ्नन् । अप । स्रिधः ॥१

"एषः सोमः "कविः मेधावी "अभिष्टुतः अभितः स्तुतः "पवित्रे "अधि दशापवित्रमतीत्य "तोशते । यद्यपि तोशतिर्वधकर्मा तथापि हनने गतिसद्भावादत्र गतिमात्रे वर्तते । गच्छतीत्यर्थः । अथवा । पवित्रेऽधि कृष्णाजिने तोशते हन्यते । पीड्यत इत्यर्थः । किं कुर्वन् । "पुनानः पूयमानः "स्रिधः शत्रून् "अप "घ्नन् अपगमयन् ।

ए॒ष इंद्रा॑य वा॒यवे॑ स्व॒र्जित्परि॑ षिच्यते ।

प॒वित्रे॑ दक्ष॒साध॑नः ॥२

ए॒षः । इन्द्रा॑य । वा॒यवे॑ । स्व॒ःऽजित् । परि॑ । सि॒च्य॒ते॒ ।

प॒वित्रे॑ । द॒क्ष॒ऽसाध॑नः ॥२

एषः । इन्द्राय । वायवे । स्वःऽजित् । परि । सिच्यते ।

पवित्रे । दक्षऽसाधनः ॥२

"एषः सोमः "स्वर्जित् स्वर्गस्य सर्वस्य वा जेता' "इन्द्राय "वायवे च "पवित्रे "परि "षिच्यते । कीदृश एषः । "दक्षसाधनः बलकारी ।।

ए॒ष नृभि॒र्वि नी॑यते दि॒वो मू॒र्धा वृषा॑ सु॒तः ।

सोमो॒ वने॑षु विश्व॒वित् ॥३

ए॒षः । नृऽभिः॑ । वि । नी॒य॒ते॒ । दि॒वः । मू॒र्धा । वृषा॑ । सु॒तः ।

सोमः॑ । वने॑षु । वि॒श्व॒ऽवित् ॥३

एषः । नृऽभिः । वि । नीयते । दिवः । मूर्धा । वृषा । सुतः ।

सोमः । वनेषु । विश्वऽवित् ॥३

“एषः "सोमः "नृभिः कर्मनेतृभिर्ऋत्विग्भिः "वि "नीयते विविधं नीयते । एष कीदृशः । "दिवः द्युलोकस्य "मूर्धा शिरोवत्प्रधानभूतः "वृषा अभिमतवर्षकः "सुतः अभिषुतः । कुत्र नीयते । “वनेषु वननीयेषु वनसंभूतद्रुमविकारेषु वा पात्रेषु । "विश्ववित् सर्वज्ञ एष इति समन्वयः ॥

ए॒ष ग॒व्युर॑चिक्रद॒त्पव॑मानो हिरण्य॒युः ।

इंदुः॑ सत्रा॒जिदस्तृ॑तः ॥४

ए॒षः । ग॒व्युः । अ॒चि॒क्र॒द॒त् । पव॑मानः । हि॒र॒ण्य॒ऽयुः ।

इन्दुः॑ । स॒त्रा॒ऽजित् । अस्तृ॑तः ॥४

एषः । गव्युः । अचिक्रदत् । पवमानः । हिरण्यऽयुः ।

इन्दुः । सत्राऽजित् । अस्तृतः ॥४

“एषः सोमः "पवमानः पूयमानः "अचिक्रदत् शब्दं करोति । कथंभूतः सन् । "गव्युः अस्माकं गा इच्छन् 'हिरण्ययुः धनमिच्छन् "इन्दुः दीप्तः सन् "सत्राजित् महतः शत्रोरसुरादेर्जेता “अस्तृतः स्वयमन्यैरहिंस्यश्च सन् ॥

ए॒ष सूर्ये॑ण हासते॒ पव॑मानो॒ अधि॒ द्यवि॑ ।

प॒वित्रे॑ मत्स॒रो मदः॑ ॥५

ए॒षः । सूर्ये॑ण । हा॒स॒ते॒ । पव॑मानः । अधि॑ । द्यवि॑ ।

प॒वित्रे॑ । म॒त्स॒रः । मदः॑ ॥५

एषः । सूर्येण । हासते । पवमानः । अधि । द्यवि ।

पवित्रे । मत्सरः । मदः ॥५

“एषः "पवमानः पूयमानः सोमः "सूर्येण देवेन “अधि “द्यवि द्युलोकेऽन्तरिक्षे "पवित्रे “हासते परित्यज्यते । "मत्सरः मदकरः “मदः सोमः । यद्यप्यध्वर्युहस्तादृशापवित्रे परित्यज्यते सोमस्तथाप्यन्तरिक्षे सूर्येण पवित्रे त्यज्यत इति भावना वीर्यवत्त्वाय । सत्स्वप्यन्यदेवेषु सोमस्रावणे सूर्यस्य कः प्रसङ्ग इति न वाच्यं सूर्यरश्मिभिरेव सोमस्याप्यायनात् ॥

ए॒ष शु॒ष्म्य॑सिष्यदद॒ंतरि॑क्षे॒ वृषा॒ हरिः॑ ।

पु॒ना॒न इं॒दु॒रिं॒द्र॒मा ॥६

ए॒षः । शु॒ष्मी । अ॒सि॒स्य॒द॒त् । अ॒न्तरि॑क्षे । वृषा॑ । हरिः॑ ।

पु॒ना॒नः । इन्दुः॑ । इन्द्र॑म् । आ ॥६

एषः । शुष्मी । असिस्यदत् । अन्तरिक्षे । वृषा । हरिः ।

पुनानः । इन्दुः । इन्द्रम् । आ ॥६

“एष "शुष्मी बलवान् सोमः "अन्तरिक्षे दशापवित्रे “असिष्यदत् स्यन्दते । कीदृश एषः । "वृषा वर्षकः "हरिः हरितवर्णः "पुनानः पूयमानः “इन्दुः दीप्तश्चैव "इन्द्रमा इन्द्रं च अभिगच्छतीति शेषः । आ इति चार्थे ॥ ॥ १७ ॥

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.२८

ऋग्वेदः - मण्डल ९

← सूक्तं ९.२७ सूक्तं ९.२८ सूक्तं ९.२९ →

प्रियमेध आङ्गिरसः।

दे. पवमानः सोमः। गायत्री।

एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः ।

अव्यो वारं वि धावति ॥१॥

एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः ।

विश्वा धामान्याविशन् ॥२॥

एष देवः शुभायतेऽधि योनावमर्त्यः ।

वृत्रहा देववीतमः ॥३॥

एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः ।

अभि द्रोणानि धावति ॥४॥

एष सूर्यमरोचयत्पवमानो विचर्षणिः ।

विश्वा धामानि विश्ववित् ॥५॥

एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति ।

देवावीरघशंसहा ॥६॥

सायणभाष्यम्

'एष वाजी' इति षडृचं चतुर्थं सूक्तं प्रियमेधस्यार्षं गायत्रं सौम्यम्। 'एष वाजी प्रियमेधः । इत्यनुक्रान्तम् । गतो विनियोगः ॥

एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः ।

अव्यो वारं वि धावति ॥१

एषः । वाजी । हितः । नृऽभिः । विश्वऽवित् । मनसः । पतिः ।

अव्यः । वारम् । वि । धावति ॥१

एषः । वाजी । हितः । नृऽभिः । विश्वऽवित् । मनसः । पतिः ।

अव्यः । वारम् । वि । धावति ॥१

“एषः सोमः “वाजी गमनशीलः “हितः अध्वर्युणा पात्रे निहितः "विश्ववित् सर्वज्ञः "मनसः स्तोत्रस्य “पतिः स्वामी । अथवा सोमस्य मनोभिमानित्वात् मनसः स्वामित्वं चन्द्रमा मनो भूत्वा हृदयं प्राविशत्' (ऐ. आ. २.४.२) इति श्रुतेः । तादृशोऽसौ “अव्यो “वारम् अवेर्वालं दशापवित्रं “वि “धावति विविधं गच्छति ॥

एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः ।

विश्वा धामान्याविशन् ॥२

एषः । पवित्रे । अक्षरत् । सोमः । देवेभ्यः । सुतः ।

विश्वा । धामानि । आऽविशन् ॥२

एषः । पवित्रे । अक्षरत् । सोमः । देवेभ्यः । सुतः ।

विश्वा । धामानि । आऽविशन् ॥२

“एषः “सोमः "देवेभ्यः देवार्थं "सुतः अभिषुतः सन् "पवित्रे “अक्षरत् स्रवति । “विश्वा सर्वाणि “धामानि देवशरीराणि "आविशन् प्रविशन् । प्रवेष्टुमित्यर्थः ।।

ए॒ष दे॒वः शु॑भाय॒तेऽधि॒ योना॒वम॑र्त्यः ।

वृ॒त्र॒हा दे॑व॒वीत॑मः ॥३

ए॒षः । दे॒वः । शु॒भा॒य॒ते॒ । अधि॑ । योनौ॑ । अम॑र्त्यः ।

वृ॒त्र॒ऽहा । दे॒व॒ऽवीत॑मः ॥३

एषः । देवः । शुभायते । अधि । योनौ । अमर्त्यः ।

वृत्रऽहा । देवऽवीतमः ॥३

“एषः सोमः “देवः “शुभायते शोभते । कुत्र । “अधि “योनौ स्वीये स्थाने । कीदृश एषः । “अमर्त्यः अमरणधर्मा “वृत्रहा शत्रुहन्ता "देववीतमः अतिशयेन देवानां कामयिता ॥

ए॒ष वृषा॒ कनि॑क्रदद्द॒शभि॑र्जा॒मिभि॑र्य॒तः ।

अ॒भि द्रोणा॑नि धावति ॥४

ए॒षः । वृषा॑ । कनि॑क्रदत् । द॒शऽभिः॑ । जा॒मिऽभिः॑ । य॒तः ।

अ॒भि । द्रोणा॑नि । धा॒व॒ति॒ ॥४

एषः । वृषा । कनिक्रदत् । दशऽभिः । जामिऽभिः । यतः ।

अभि । द्रोणानि । धावति ॥४

“एष “वृषा वर्षिता कामानां “कनिक्रदत् शब्दं कुर्वन् "दशभिर्जामिभिः अङ्गुलीभिः “यतः धृतः “द्रोणानि द्रुममयाणि पात्राणि “अभि “धावति अभिगच्छति ॥

ए॒ष सूर्य॑मरोचय॒त्पव॑मानो॒ विच॑र्षणिः ।

विश्वा॒ धामा॑नि विश्व॒वित् ॥५

ए॒षः । सूर्य॑म् । अ॒रो॒च॒य॒त् । पव॑मानः । विऽच॑र्षणिः ।

विश्वा॑ । धामा॑नि । वि॒श्व॒ऽवित् ॥५

एषः । सूर्यम् । अरोचयत् । पवमानः । विऽचर्षणिः ।

विश्वा । धामानि । विश्वऽवित् ॥५

“एषः सोमः “सूर्यमरोचयत् रोचयति स्वरसेन । "पवमानः पूयमानः “विचर्षणिः सर्वस्य द्रष्टा “विश्ववित् सर्ववित् । न केवलं सूर्यं किंतु "विश्वा सर्वाणि “धामानि तेजःस्थानानि रोचयति ॥

ए॒ष शु॒ष्म्यदा॑भ्यः॒ सोमः॑ पुना॒नो अ॑र्षति ।

दे॒वा॒वीर॑घशंस॒हा ॥६

ए॒षः । शु॒ष्मी । अदा॑भ्यः । सोमः॑ । पु॒ना॒नः । अ॒र्ष॒ति॒ ।

दे॒व॒ऽअ॒वीः । अ॒घ॒शं॒स॒ऽहा ॥६

एषः । शुष्मी । अदाभ्यः । सोमः । पुनानः । अर्षति ।

देवऽअवीः । अघशंसऽहा ॥६

“एषः “सोमः “शुष्मी बलवान् “अदाभ्यः अदम्भनीयः “पुनानः पूयमानः “अर्षति गच्छति । “देवावीः देवानामविता “अघशंसहा । अघान् शंसन्तीत्यघशंसाः । तेषां हन्ता ॥ ॥ १८ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.२९

ऋग्वेदः - मण्डल ९

← सूक्तं ९.२८ सूक्तं ९.२९ सूक्तं ९.३० →

नृमेध आङ्गिरसः।

दे. पवमानः सोमः। गायत्री।

प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा ।

देवाँ अनु प्रभूषतः ॥१॥

सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा ।

ज्योतिर्जज्ञानमुक्थ्यम् ॥२॥

सुषहा सोम तानि ते पुनानाय प्रभूवसो ।

वर्धा समुद्रमुक्थ्यम् ॥३॥

विश्वा वसूनि संजयन्पवस्व सोम धारया ।

इनु द्वेषांसि सध्र्यक् ॥४॥

रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित् ।

निदो यत्र मुमुच्महे ॥५॥

एन्दो पार्थिवं रयिं दिव्यं पवस्व धारया ।

द्युमन्तं शुष्ममा भर ॥६॥

सायणभाष्यम्

‘प्रास्य' इति षडृचं पञ्चमं सूक्तं नृमेधस्याङ्गिरसस्यार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रम्यते च – प्रास्य नृमेधः' इति । गतो विनियोगः ॥

प्रास्य॒ धारा॑ अक्षर॒न्वृष्णः॑ सु॒तस्यौज॑सा ।

दे॒वाँ अनु॑ प्र॒भूष॑तः ॥१

प्र । अ॒स्य॒ । धाराः॑ । अ॒क्ष॒र॒न् । वृष्णः॑ । सु॒तस्य॑ । ओज॑सा ।

दे॒वान् । अनु॑ । प्र॒ऽभूष॑तः ॥१

प्र । अस्य । धाराः । अक्षरन् । वृष्णः । सुतस्य । ओजसा ।

देवान् । अनु । प्रऽभूषतः ॥१

“अस्य सोमस्य "वृष्णः वर्षकस्य "सुतस्य अभिषुतस्य "देवाननु प्रभूषतः प्रभवितुमिच्छतः “ओजसा स्ववीर्येण “धाराः “प्र “अक्षरन् प्रकर्षेण क्षरन्ति ।

सप्तिं॑ मृजंति वे॒धसो॑ गृ॒णंतः॑ का॒रवो॑ गि॒रा ।

ज्योति॑र्जज्ञा॒नमु॒क्थ्य॑ं ॥२

सप्ति॑म् । मृ॒ज॒न्ति॒ । वे॒धसः॑ । गृ॒णन्तः॑ । का॒रवः॑ । गि॒रा ।

ज्योतिः॑ । ज॒ज्ञा॒नम् । उ॒क्थ्य॑म् ॥२

सप्तिम् । मृजन्ति । वेधसः । गृणन्तः । कारवः । गिरा ।

ज्योतिः । जज्ञानम् । उक्थ्यम् ॥२

“सप्तिम् अश्वस्थानीयं सर्पणस्वभावं वा सोमं “मृजन्ति शोधयन्ति । के। “गृणन्तः स्तुवन्तः “वेधसः विधातारः “कारवः कर्मकतारोऽध्वर्य्वादयः “गिरा स्तुत्या साधनेन । कीदृशं सप्तिम् । “ज्योतिः दीप्यमानं सोमं "जज्ञानं जायमानम् । प्रवृद्धमित्यर्थः । अथवा ज्योतिर्जायमानम् ‘अयं वै ज्योतिर्यत् सोमः' इति श्रुतेः । “उक्थ्यं स्तुत्यम् ॥

सु॒षहा॑ सोम॒ तानि॑ ते पुना॒नाय॑ प्रभूवसो ।

वर्धा॑ समु॒द्रमु॒क्थ्यं॑ ॥३

सु॒ऽसहा॑ । सो॒म॒ । तानि॑ । ते॒ । पु॒ना॒नाय॑ । प्र॒भु॒व॒सो॒ इति॑ प्रभुऽवसो ।

वर्ध॑ । स॒मु॒द्रम् । उ॒क्थ्य॑म् ॥३

सुऽसहा । सोम । तानि । ते । पुनानाय । प्रभुवसो इति प्रभुऽवसो ।

वर्ध । समुद्रम् । उक्थ्यम् ॥३

हे “सोम “प्रभूवसो प्रभूतधन “पुनानाय पूयमानस्य “ते तव “तानि तेजांसि “सुषहा शोभनाभिभावुकानि । यस्मादेवं तस्मात् “समुद्रं समुद्रसदृशं द्रोणकलशम् “उक्थ्यं स्तुत्यं तं "वर्ध वर्धय । पूरय रसेन ॥

विश्वा॒ वसू॑नि सं॒जय॒न्पव॑स्व सोम॒ धार॑या ।

इ॒नु द्वेषाँ॑सि स॒ध्र्य॑क् ॥४

विश्वा॑ । वसू॑नि । स॒म्ऽजय॑न् । पव॑स्व । सो॒म॒ । धार॑या ।

इ॒नु । द्वेषाँ॑सि । स॒ध्र्य॑क् ॥४

विश्वा । वसूनि । सम्ऽजयन् । पवस्व । सोम । धारया ।

इनु । द्वेषांसि । सध्र्यक् ॥४

हे “सोम "विश्वा सर्वाणि “वसूनि अस्मदर्थं “संजयन् “पवस्व क्षर “धारया । “द्वेषांसि द्वेष्याणि सर्वाणि “सध्र्यक् सहैव “इनु प्रेरय दूरदेशं प्रति ॥

रक्षा॒ सु नो॒ अर॑रुषः स्व॒नात्स॑मस्य॒ कस्य॑ चित् ।

नि॒दो यत्र॑ मुमु॒च्महे॑ ॥५

रक्ष॑ । सु । नः॒ । अर॑रुषः । स्व॒नात् । स॒म॒स्य॒ । कस्य॑ । चि॒त् ।

नि॒दः । यत्र॑ । मु॒मु॒च्महे॑ ॥५

रक्ष । सु । नः । अररुषः । स्वनात् । समस्य । कस्य । चित् ।

निदः । यत्र । मुमुच्महे ॥५

हे सोम “नः अस्मान् “सु सुष्ठु “रक्ष पालय । कस्मात् । “अररुषः अदातुः “स्वनात् शब्दात् निन्दारूपात्। किमेकस्यादानशीलस्य । न । “समस्य सर्वस्य योऽस्ति तस्य सर्वस्य कस्यचित् । कंचनामुञ्चन्नित्यर्थः । न केवलमदातुः स्वनात् । किं तर्हि । “कस्य “चित् कस्यापि “निदः निन्दकाद्रक्ष । “यत्र “मुमुच्महे यस्मिन्रक्षणे सति वयं मुक्ता भवेम तेन रक्षणेन रक्षेति ॥

एंदो॒ पार्थिवं र॒यिं दि॒व्यं पंवस्व॒ धारंया ।

द्यु॒मंतं॒ शुष्म॒मा भंर ॥६

आ । इ॒न्दो॒ इतिं । पार्थिवम् । र॒यिम् । दि॒व्यम् । प॒व॒स्व॒ । धारंया ।

द्यु॒ऽमन्तंम् । शुष्मंम् । आ । भ॒र॒ ॥६

आ । इन्दो इति । पार्थिवम् । रयिम् । दिव्यम् । पवस्व । धारया ।

द्युऽमन्तम् । शुष्मम् । आ । भर ॥६

हे “इन्दो क्लिद्यमान सोम त्वं “धारया “आ “पवस्व सर्वतः क्षर । “पार्थिवं दिव्यं च “रयिं धनं “द्युमन्तं दीप्तिमन्तं “शुष्मं बलं च “आ “भर आहरास्मभ्यम् ॥ ॥ १९ ॥

टिप्पणी

९.२९.५ रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित् ।

अररु उपरि टिप्पणी (http://puranastudy.angelfire.com/pur_index2/araru.htm)

मण्डल ९

ऋग्वेदः सूक्तं ९.३०

दे. पवमानः सोमः। गायत्री

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन् ।

पुनानो वाचमिष्यति ॥१॥

इन्दुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत् ।

इयर्ति वग्नुमिन्द्रियम् ॥२॥

आ नः शुष्मं नृषाह्यं वीरवन्तं पुरुस्पृहम् ।

पवस्व सोम धारया ॥३॥

प्र सोमो अति धारया पवमानो असिष्यदत् ।

अभि द्रोणान्यासदम् ॥४॥

अप्सु त्वा मधुमत्तमं हरिं हिन्वन्त्यद्रिभिः ।

इन्दविन्द्राय पीतये ॥५॥

सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे ।

चारुं शर्धाय मत्सरम् ॥६॥

सायणभाष्यम्

‘ प्र धाराः' इति षड्टचं षष्ठं सूक्तं बिन्दुनाम्न आङ्गिरसस्यार्षं गायत्रं पवमानसोमदेवताकम् । ‘ प्र धारा बिन्दुः' इत्यनुक्रमणिका । गतो विनियोगः ॥

प्र धारा॑ अस्य शु॒ष्मिणो॒ वृथा॑ प॒वित्रे॑ अक्षरन् ।

पु॒ना॒नो वाच॑मिष्यति ॥१

प्र । धारा॑ः । अ॒स्य॒ । शु॒ष्मिण॑ः । वृथा॑ । प॒वित्रे॑ । अ॒क्ष॒र॒न् ।

पु॒ना॒नः । वाच॑म् । इ॒ष्य॒ति॒ ॥१

प्र । धाराः । अस्य । शुष्मिणः । वृथा । पवित्रे । अक्षरन् ।

पुनानः । वाचम् । इष्यति ॥१

“शुष्मिणः बलवतः “अस्य सोमस्य “धाराः “पवित्रे दशापवित्रे “वृथा अप्रयत्नेन “अक्षरन् स्रवन्ति । तदानीं "पुनानः पूयमानः सोमः “वाचं स्तुतिं स्वीयं ध्वनिं वा “इष्यति प्रेरयति ।

इंदु॑र्हिया॒नः सो॒तृभि॑र्मृ॒ज्यमा॑नः॒ कनि॑क्रदत् ।

इय॑र्ति व॒ग्नुमिँ॑द्रि॒यं ॥२

इन्दु॑ः । हि॒या॒नः । सो॒तृऽभि॑ः । मृ॒ज्यमा॑नः । कनि॑क्रदत् ।

इय॑र्ति । व॒ग्नुम् । इ॒न्द्रि॒यम् ॥२

इन्दुः । हियानः । सोतृऽभिः । मृज्यमानः । कनिक्रदत् ।

इयर्ति । वग्नुम् । इन्द्रियम् ॥२

अयम् “इन्दुः दीप्तः सोमः “हियानः प्रेर्यमाणः व्याप्रियमाणः । कैः । “सोतृभिः ऋत्विग्भिः । पश्चाद्दशापवित्रे "मृज्यमानः शोध्यमानः “कनिक्रदत् शब्दं कुर्वन् “इन्द्रियम् इन्द्रस्य संबन्धिनमिन्द्रियमपि ----- करं “वग्नुं शब्दम् “इयर्ति प्रेरयति ग्रहणसमये ॥

आ न॒: शुष्मं॑ नृ॒षाह्यं॑ वी॒रवं॑तं पुरु॒स्पृहं॑ ।

पव॑स्व सोम॒ धार॑या ॥३

आ । न॒: । शुष्मं॑म् । नृ॒ऽसह्यं॑म् । वी॒रऽवं॑न्तम् । पु॒रु॒ऽस्पृहं॑म् ।

पव॑स्व । सो॒म॒ । धार॑या ॥३

आ । नः । शुष्मम् । नृऽसह्यम् । वीरऽवन्तम् । पुरुऽस्पृहम् ।

पवस्व । सोम । धारया ॥३

हे “सोम त्वं “धारया “आ “पवस्व । किम्। “शुष्मं बलम् । कीदृशम् । “नृषाह्यं नृणामस्मद्विरोधिनामभिभावुकं “वीरवन्तं पुत्रोपेतं “पुरुस्पृहं बहुभिः स्पृहणीयं शुष्ममा पवस्व । एतस्य लाभाय पवस्वेत्यर्थः । रसस्रावे सति होमद्वारा तत्सिद्धे शुष्मं पवस्वेत्युपचर्यते ॥

प्र सोमो॒ अति॒ धार॑या॒ पव॑मानो असिष्यदत् ।

अ॒भि द्रोणा॑न्या॒सदं॑ ॥४

प्र । सोमः॑ । अति॑ । धार॑या । पव॑मानः । अ॒सि॒स्य॒द॒त् ।

अ॒भि । द्रोणा॑नि । आ॒ऽसदं॑म् ॥४

प्र । सोमः । अति । धारया । पवमानः । असिस्यदत् ।

अभि । द्रोणानि । आऽसदम् ॥४

अयं “पवमानः “सोमः “धारया “अति अतिक्रम्य देशापवित्रं “प्र “असिष्यदत् प्रस्यन्दते । किमर्थम् । “द्रोणानि द्रोणकलशादीनि “आसदम् आसादनाय ॥

अ॒प्सु त्वा॒ मधु॑मत्तमं॒ हरिं॑ हिन्व॒त्यद्रि॑भिः ।

इंदु॒विंद्रा॑य पी॒तये॑ ॥५

अ॒प्ऽसु । त्वा॒ । मधु॑मत्ऽतमम् । हरिं॑म् । हि॒न्व॒न्ति॒ । अद्रिं॑ऽभिः ।

इन्दो॒ इति॑ । इन्द्रा॑य । पी॒तये॑ ॥५

अप्ऽसु । त्वा । मधुमत्ऽतमम् । हरिम् । हिन्वन्ति । अद्रिऽभिः ।

इन्दो इति । इन्द्राय । पीतये ॥५

हे “इन्दो सोम “अप्सु वसतीवरीषूदकेषु “मधुमत्तमम् अतिशयेन मधुमन्तं “हरिं हरितवर्णं “त्वा त्वाम् “अद्रिभिः अभिषवग्रावभिः “हिन्वन्ति प्रेरयन्ति । किमर्थम् । “इन्द्राय इन्द्रस्य “पीतये पानाय ॥

सु॒नोता॒ मधु॑मत्तमं॒ सोम॒मिंद्रा॑य व॒ज्रिणे॑ ।

चारुं॒ शर्धा॑य मत्स॒रं ॥६

सु॒नोत॑ । मधु॑मत्ऽतमम् । सोम॑म् । इन्द्रा॑य । व॒ज्रिणे॑ ।

चारु॑म् । शर्धा॑य । म॒त्स॒रम् ॥६

सुनोत । मधुमत्ऽतमम् । सोमम् । इन्द्राय । वज्रिणे ।

चारुम् । शर्धाय । मत्सरम् ॥६

हे ऋत्विजः यूयं “मधुमत्तमं मधुररसोपेतं “सोममिन्द्राय “वज्रिणे वज्रयुक्ताय “सुनोत सुनुत । पुनः कीदृशम् । “चारुं चरणीयं “मत्सरं मदकरं "शर्धाय अस्माकं बलायेन्द्रस्य पानाथ च सोमं सुनुतेति बूते यजमानः स्वीयान् ॥ ॥ २० ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.३१

दे. पवमानः सोमः। गायत्री

प्र सोमासः स्वाध्यः पवमानासो अक्रमुः ।

रयिं कृण्वन्ति चेतनम् ॥१॥

दिवस्पृथिव्या अधि भवेन्दो द्युम्नवर्धनः ।

भवा वाजानां पतिः ॥२॥

तुभ्यं वाता अभिप्रियस्तुभ्यमर्षन्ति सिन्धवः ।

सोम वर्धन्ति ते महः ॥३॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।

भवा वाजस्य संगथे ॥४॥

तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितम् ।

वर्षिष्ठे अधि सानवि ॥५॥

स्वायुधस्य ते सतो भुवनस्य पते वयम् ।

इन्दो सखित्वमुश्मसि ॥६॥

सायणभाष्यम्

‘प्र सोमासः' इति षड्ऋचं सप्तमं सूक्तं राहूगणस्य गोतमस्यार्षं सौम्यम्। 'प्र सोमासो गोतमः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र सोमा॑सः स्वा॒ध्यः१॒॑ पव॑मानासो अक्रमुः ।

र॒यिं कृ॑ण्वंति॒ चेत॑नं ॥१

प्र । सोमा॑सः । सु॒ऽआ॒ध्यः॑ । पव॑मानासः । अ॒क्र॒मुः॒ ।

र॒यिम् । कृ॒ण्व॒न्ति॒ । चेत॑नम् ॥१

प्र । सोमासः । सुऽआध्यः । पवमानासः । अक्रमुः ।

रयिम् । कृण्वन्ति । चेतनम् ॥१

“प्र “अक्रमुः प्रगच्छन्ति कलशं प्रति । के। “सोमासः सोमाः । कीदृशाः। “स्वाध्यः सुध्यानाः सुकर्माणो वा "पवमानासः पूयमानाः । ते च ”चेतनं प्रज्ञापनं “रयिं धनं “कृण्वन्ति कुर्वन्त्यस्माकम् ॥

दि॒वस्पृ॑थि॒व्या अधि॒ भवें॑दो द्युम्न॒वर्ध॑नः ।

भवा॒ वाजा॑नां॒ पतिः॑ ॥२

दि॒वः । पृ॒थि॒व्याः । अधि॑ । भव॑ । इ॒न्दो॒ इति॑ । द्यु॒म्न॒ऽवर्ध॑नः ।

भव॑ । वाजा॑नाम् । पतिः॑ ॥२

दिवः । पृथिव्याः । अधि । भव । इन्दो इति । द्युम्नऽवर्धनः ।

भव । वाजानाम् । पतिः ॥२

हे "इन्दो "वाजानाम् अन्नानां “पतिः स्वामी त्वं “दिवः द्युलोकस्य “पृथिव्याः भूलोकस्य “द्युम्नवर्धनः द्योतमानस्य हिरण्यादिलक्षणधनस्य वर्धयिता “भव । अस्माकं लोकद्वये यत् द्युम्नमस्ति तस्य वर्धयिता भवास्मभ्यमित्यर्थः ॥

तुभ्यं॒ वाता॑ अभि॒प्रिय॒स्तुभ्य॑मर्षंति॒ सिंध॑वः ।

सोम॒ वर्धं॑ति ते॒ महः॑ ॥३

तुभ्य॑म् । वाताः॑ । अ॒भि॒ऽप्रियः॑ । तुभ्य॑म् । अ॒र्ष॒न्ति॒ । सिन्ध॑वः ।

सोम॑ । वर्धं॑न्ति । ते॒ । महः॑ ॥३

तुभ्यम् । वाताः । अभिऽप्रियः । तुभ्यम् । अर्षन्ति । सिन्धवः ।

सोम । वर्धन्ति । ते । महः ॥३

हे “सोम “तुभ्यं त्वदर्थं “वाताः वायवः “अभिप्रियः अभितर्पयितारो भवन्ति । तथा “सिन्धवः स्यन्दमाना नद्यः “तुभ्यमर्षन्ति गच्छन्ति । अभिषूयमाणस्य तवाप्यायनायैवं कुर्वन्तीत्यर्थः । त उभयेऽमी “ते तव "महः महत्त्वं “वर्धन्ति वर्धयन्ति ।।

आ प्या॑यस्व॒ समे॑तु ते वि॒श्वतः॑ सोम॒ वृष्ण्यं॑ ।

भवा॒ वाज॑स्य संग॒थे ॥४

आ । प्या॒य॒स्व॒ । सम् । ए॒तु॒ । ते॒ । वि॒श्वतः॑ । सो॒म॒ । वृष्ण्य॑म् ।

भव॑ । वाज॑स्य । स॒म्ऽग॒थे ॥४

आ । प्यायस्व । सम् । एतु । ते । विश्वतः । सोम । वृष्ण्यम् ।

भव । वाजस्य । सम्ऽगथे ॥४

हे “सोम त्वं वायुभिरद्भिश्च “आ “प्यायस्व प्रवृद्धो भव । “ते त्वां “विश्वतः “वृष्ण्यं वर्षयोग्यं , बलं “समेतु संगच्छताम् । “संगथे संग्रामे “वाजस्य अन्नस्य प्रापकः “भव ॥

तुभ्यं॒ गावो॑ घृ॒तं पयो॒ बभ्रो॑ दुदु॒ह्रे अक्षि॑तं ।

वर्षिं॑ष्ठे॒ अधि॒ सान॑वि ॥५

तुभ्य॑म् । गावः॑ । घृ॒तम् । पयः॑ । बभ्रो॒ इति॑ । दु॒दु॒ह्रे । अक्षि॑तम् ।

वर्षिं॑ष्ठे । अधिं॑ । सान॑वि ॥५

तुभ्यम् । गावः । घृतम् । पयः । बभ्रो इति । दुदुह्रे । अक्षितम् ।

वर्षिष्ठे । अधि । सानवि ॥५

हे “बभ्रो बभ्रुवर्ण सोम "तुभ्यं त्वदर्थं “गावो “घृतं “पयः च “अक्षितम् अक्षीणं “दुदुहे दुहते । “वर्षिष्ठे प्रवृद्धे “अधि “सानवि समुच्छ्रिते प्रदेशे स्थिताय तुभ्यम् ॥

स्वा॒यु॒धस्य॑ ते स॒तो भुव॑नस्य पते व॒यं ।

इंदो॑ सखि॒त्वमु॑श्मसि ॥६

सु॒ऽआ॒यु॒धस्य॑ । ते॒ । स॒तः । भुव॑नस्य । प॒ते॒ । व॒यम् ।

इन्दो॒ इति॑ । स॒खि॒ऽत्वम् । उ॒श्म॒सि॒ ॥६

सुऽआयुधस्य । ते । सतः । भुवनस्य । पते । वयम् ।

इन्दो इति । सखिऽत्वम् । उश्मसि ॥६

हे “भुवनस्य भूतजातस्य “पते स्वामिन् पालक सोम। सोमस्य जगदाप्यायिकत्वेन तत्स्वामित्वम् । हे "इन्दो सोम “वयम् अनुष्ठातारः “स्वायुधस्य “ते तव “सतः “सखित्वमुश्मसि कामयामहे ॥ ॥ २१ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.३२

ऋग्वेदः - मण्डल ९
← सूक्तं ९.३१ सूक्तं ९.३२ सूक्तं ९.३३ →
श्यावाश्व आत्रेयः।

दे. पवमानः सोमः। गायत्री।

प्र सोमासो मदच्युतः श्रवसे नो मघोनः ।

सुता विदथे अक्रमुः ॥१॥

आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः ।

इन्दुमिन्द्राय पीतये ॥२॥

आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम् ।

अत्यो न गोभिरज्यते ॥३॥

उभे सोमावचाकशन्मृगो न तक्तो अर्षसि ।

सीदन्नृतस्य योनिमा ॥४॥

अभि गावो अनूषत योषा जारमिव प्रियम् ।

अगन्नाजिं यथा हितम् ॥५॥

अस्मे धेहि द्युमद्यशो मघवद्भ्यश्च मह्यं च ।

सनिं मेधामुत श्रवः ॥६॥

सायणभाष्यम्

'प्र सोमासः' इति षड्टचमष्टमं सूक्तमात्रेयस्य श्यावाश्वस्यार्षं गायत्रं सौम्यम् । अनुक्रम्यते च- प्र सोमासः श्यावाश्वः' इति । गतो विनियोगः ॥

प्र सोमा॑सो मद॒च्युत॒: श्रव॑से नो म॒घोन॑: ।

सु॒ता वि॒दथे॑ अक्रमुः ॥१

प्र । सोमा॑सः । म॒द॒ऽच्युत॑: । श्रव॑से । न॒: । म॒घोन॑: ।

सु॒ताः । वि॒दथे॑ । अ॒क्र॒मु॒: ॥१

प्र । सोमासः । मदऽच्युतः । श्रवसे । नः । मघोनः ।

सुताः । विदथे । अक्रमुः ॥१

“सोमासः सोमाः “मदच्युतः मदस्राविणः “सुताः अभिषुताः सन्तः “विदथे यज्ञे “मघोनः हविष्मतो मम “श्रवसे अन्नाय कीर्तये वा “प्र “अक्रमुः प्रगच्छन्ति ।।

आदीं॑ त्रि॒तस्य॒ योष॑णो॒ हरिं॑ हिन्व॒॑न्त्यद्रि॑भिः ।

इंदु॒मिंद्रा॑य पी॒तये॑ ॥२

आत् । ई॒म् । त्रि॒तस्य॑ । योष॑णः । हरि॑म् । हि॒न्व॒न्ति॒ । अद्रि॑ऽभिः ।

इन्दु॑म् । इन्द्रा॑य । पी॒तये॑ ॥२

आत् । ईम् । त्रितस्य । योषणः । हरिम् । हिन्वन्ति । अद्रिऽभिः ।

इन्दुम् । इन्द्राय । पीतये ॥२

“आत् अपि च “ईम् एनं “हरिं हरितवर्णं सोमं “त्रितस्य ऋषेः “योषणः अङ्गुलयः “अद्रिभिः ग्रावभिः “हिन्वन्ति प्रेरयन्ति । किमर्थम् । “इन्दुं दीप्तं सोमम् “इन्द्राय इन्द्रस्य “पीतये पानाय ॥

आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिं ।

अत्यो न गोभिंरज्यते ॥३

आत् । ईम् । हंसः । यथा । गणम् । विश्वस्य । अवीवशत् । मतिम् ।

अत्यः । न । गोभिः । अज्यते ॥३

आत् । ईम् । हंसः । यथा । गणम् । विश्वस्य । अवीवशत् । मतिम् ।

अत्यः । न । गोभिः । अज्यते ॥३

“आत् अपि च “ईम् अयं सोमः “हंसो “यथा “गणं जनसंघं स्वगतिविशेषेण स्वनेन वा प्रविशति तद्वत् “विश्वस्य सर्वस्य स्तोतृजनस्य “मतिं स्तुतिं बुद्धिं वा “अवीवशत् वशं नयति । स च सोमः “अत्यो “न अश्व इव “गोभिः गव्यैरुदकैर्वा “अज्यते सिच्यते स्निग्धीक्रियते ॥

उभे सोमावचाकशन्मृगो न तक्तो अर्षसि ।

सीदन्नृतस्य योनिमा ॥४

उभे इति । सोम । अवऽचाकशत् । मृगः । न । तक्तः । अर्षसि ।

सीदन् । ऋतस्य । योनिम् । आ ॥४

उभे इति । सोम । अवऽचाकशत् । मृगः । न । तक्तः । अर्षसि ।

सीदन् । ऋतस्य । योनिम् । आ ॥४

हे “सोम “उभे द्यावापृथिव्यौ “अवचाकशत् । पश्यतिकर्मेदम् । पश्यन् “मृगो “न मृग इव “तक्तः गव्यैः पयअदिभिर्मिश्रितः सन् । दध्ना तनक्ति ' (तै. सं. २.५.३.५) इत्यादौ तथा दृष्टत्वात् । “अर्षसि गच्छसि च। किं कुर्वन् । “ऋतस्य यज्ञस्य “योनिं स्थानम् “आ “सीदन् आश्रयन्। यज्ञसाधनाय गच्छसीत्यर्थः ॥

अभि गावो अनूषत योषा जारमिव प्रियं ।

अगन्नाजिं यथा हितं ॥५

अभि । गावः । अनूषत । योषा । जारम्ऽइव । प्रियम् ।

अगन् । आजिम् । यथा । हितम् ॥५

अभि । गावः । अनूषत । योषा । जारम्ऽइव । प्रियम् ।

अगन् । आजिम् । यथा । हितम् ॥५

हे सोम त्वा “गावः शब्दाः “अभि “अनूषत अभिष्टुवन्ति । “योषा “प्रिय “जारमिव । सा यथा तं स्तौति तद्वत् । स सोमः "आजिं गन्तव्यं “हितं मित्रमिव तं “यथा अन्यः “अगन् स्वहिताय गच्छति तद्वत् । अथवा हितं धनप्रापकत्वेन हितकरम् आजिं शूर इव । अयमागच्छति पात्रम् ॥

अ॒स्मे धे॑हि द्यु॒मद्यशो॑ म॒घव॑द्भ्यश्च॒ मह्यं॑ च ।

स॒निं मे॒धामु॒त श्रवः॑ ॥६

अ॒स्मे इति॑ । धे॒हि॒ । द्यु॒ऽमत् । यशः॑ । म॒घव॑त्ऽभ्यः । च॒ । मह्य॑म् । च॒ ।

स॒निम् । मे॒धाम् । उ॒त । श्रवः॑ ॥६

अस्मे इति । धेहि । द्युऽमत् । यशः । मघवत्ऽभ्यः । च । मह्यम् । च ।

सनिम् । मेधाम् । उत । श्रवः ॥६

हे सोम “अस्मे अस्मभ्यं “द्युमत् दीप्तिमत् “यशः अन्नं “धेहि देहि । कीदृशेभ्योऽस्मभ्यम् । “मघवद्भ्यश्च हविर्लक्षणान्नवद्भ्यश्च “मह्यं “च स्तुतिकर्त्रे च । अथवा मह्यमस्मभ्यमित्यर्थः । अस्मे मघवद्भ्यश्च मह्यं चेति तेषामेवाशंसनाभेदादुभयत्र चशब्दो युक्तः । किंच "सनिं धनं “मेधां प्रज्ञाम् “उत अपि च “श्रवः कीर्तिं च धेहि ॥ ॥ २२ ॥

टिप्पणी

सौभरे द्वे (https://sa.wikisource.org/s/2gul) (ग्रामगेयः)

संहितम् (https://sa.wikisource.org/s/1za7) (ऊहगानम्)

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.३३

दे. पवमानः सोमः। गायत्री

प्र सोमासो विपश्चितोऽपां न यन्त्यूर्मयः ।

वनानि महिषा इव ॥१॥

अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।

वाजं गोमन्तमक्षरन् ॥२॥

सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।

सोमा अर्षन्ति विष्णवे ॥३॥

तिस्रो वाच उदीरते गावो मिमन्ति धेनवः ।

हरिरेति कनिक्रदत् ॥४॥

अभि ब्रह्मीरनूषत यह्वीरृतस्य मातरः ।

मर्मृज्यन्ते दिवः शिशुम् ॥५॥

रायः समुद्राँश्चतुरोऽस्मभ्यं सोम विश्वतः ।

आ पवस्व सहस्रिणः ॥६॥

सायणभाष्यम्

'प्र सोमासः' इति षड्चं नवमं सूक्तं त्रितस्यार्षं गायत्रं पवमानसोमदेवताकम् । 'प्र सोमासस्त्रितः ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र सोमा॑सो विप॒श्चितो॒ऽपां न य॑न्त्यू॒र्मय॑: ।

वना॑नि महि॒षा इ॑व ॥१

प्र । सोमा॑सः । वि॒प॒ःऽचित॑: । अ॒पाम् । न । य॒न्ति॒ । ऊ॒र्मय॑: ।

वना॑नि । म॒हि॒षाःऽइ॑व ॥१

प्र। सोमासः । विपःऽचितः । अपाम् । न । यन्ति । ऊर्मयः ।

वनानि । महिषाःऽइव ।।१।।

“विपश्चितः मेधाविनः “सोमासः सोमाः “प्र "यन्ति प्रगच्छन्ति पात्राणि प्रति । किमिव । “अपाम् “ऊर्मयः “न । ते यथा संततमुद्भवन्ति तद्वत् । बाहुल्येऽयं दृष्टान्तो दर्शितो गमने दृष्टान्तरमभिधीयते । “वनानि “महिषाः (https://www.angelfire.com/in4/vedastudy/pur_index23/mahisha.htm) प्रवृद्धा मृगाः “इव । अथवा स्वाश्रयात् प्रपतने प्रथमो दृष्टान्तो द्वितीयस्तु दशापवित्रादधःप्रवेशे ॥

अ॒भि द्रोणा॑नि ब॒भ्रव॑: शु॒क्रा ऋ॒तस्य॒ धार॑या ।

वाजं॒ गोम॑न्तमक्षरन् ॥२

अ॒भि । द्रोणा॑नि । ब॒भ्रव॑: । शु॒क्राः । ऋ॒तस्य॑ । धार॑या ।

वाज॑म् । गोऽम॑न्तम् । अ॒क्ष॒र॒न् ॥२

अभि । द्रोणानि । बभ्रवः । शुक्राः । ऋतस्य । धारया।

वाजम् । गोऽमन्तम् । अक्षरन् ।।२।।

“अभि क्षरन्तीति शेषः । उपसर्गश्रुतेरुचितक्रियाध्याहारः। “द्रोणानि द्रोणकलशान् प्रति । यद्यपि द्रोणकलश एक एव तथापि तत्प्राधान्यादितरेऽपि पात्रा द्रोणा इत्युच्यन्ते । अथवैकस्मिन्नेव पूजार्थं बहुवचनम् । के। “बभ्रवः बभ्रुवर्णाः सोमाः “शुक्राः दीप्ताः।

केन प्रकारेण । “ऋतस्य अमृतस्य “धारया धाराकारेण। किंच “वाजम् अन्नं “गोमन्तं बहुगोयुक्तम् “अक्षरन् क्षरन्ति । अथवैकमेव वाक्यम् । उक्तविधाः सोमा द्रोणान् प्रत्यक्षरन् धारया। किं कुर्वन्तः । गोमन्तं वाजं प्रयच्छन्त इत्यर्थः ॥

सु॒ता इन्द्रा॑य वा॒यवे॒ वरु॑णाय म॒रुद्भ्यः॑ ।

सोमा॑ अर्षन्ति॒ विष्ण॑वे ॥३

सु॒ताः । इन्द्रा॑य । वा॒यवे॑ । वरु॑णाय । म॒रुत्ऽभ्यः॑ ।

सोमाः॑ । अ॒र्ष॒न्ति॒ । विष्ण॑वे ॥३

सुताः । इन्द्राय । वायवे । वरुणाय । मरुत्ऽभ्यः ।

सोमाः । अर्षन्ति । विष्णवे ॥ ३ ॥

"सुताः अभिषुताः "सोमाः “इन्द्राय इन्द्रार्थं “वायवे च "वरुणाय च "मरुद्भ्यः च “विष्णवे चैषामर्थम् “अर्षन्ति गच्छन्ति ॥

ति॒स्रो वाच॒ उदी॑रते॒ गावो॑ मिमन्ति धे॒नवः॑ ।

हरि॑रेति॒ कनि॑क्रदत् ॥४

ति॒स्रः । वाचः॑ । उत् । ई॒र॒ते॒ । गावः॑ । मि॒म॒न्ति॒ । धे॒नवः॑ ।

हरिः॑ । ए॒ति॒ । कनि॑क्रदत् ॥४

तिस्रः । वाचः । उत् । ईरते । गावः। मिमन्ति । धेनवः ।

हरिः। एति । कर्निक्रदत् ॥४॥

“तिस्रो वाचः । ऋगादिभेदेन त्रिविधा स्तुतिः । उदीरते प्रोद्गमयन्त्यृत्विजः । “धेनवः आशिरेण प्रीणयित्र्यः “गावः “मिमन्ति शब्दयन्ति दोहार्थम् । “हरिः हरितवर्णश्च सोमः "कनिक्रदत् शब्दं कुर्वन् “एति गच्छति कलशम् ॥

अ॒भि ब्रह्मी॑रनूषत य॒ह्वीरृ॒तस्य॑ मा॒तरः॑ ।

म॒र्मृ॒ज्यन्ते॑ दि॒वः शिशु॑म् ॥५

अ॒भि । ब्रह्मीः॑ । अ॒नू॒ष॒त॒ । य॒ह्वीः । ऋ॒तस्य॑ । मा॒तरः॑ ।

म॒र्मृ॒ज्यन्ते॑ । दि॒वः । शिशु॑म् ॥५

अभि । ब्रह्मीः । अनूषत । यह्वीः । ऋतस्य । मातरः ।

मर्मृज्यन्ते । दिवः । शिशुम् ॥ ५ ॥

“ब्रह्मीः ब्राह्मणप्रेरिताः "यह्वीः महत्यः । यह्वीरिति महन्नाम। "ऋतस्य यज्ञस्य “मातरः निर्मात्र्यः स्तुतयः "अभि "अनूषत स्तुवन्ति । किम् । “दिवः द्युदेवतायाः शिशुं शिशुस्थानीयं सोमम् । तमेव “मर्मृज्यन्ते मृजन्ति । ‘तृतीयस्यामितो दिवि सोम आसीत्' (तै. सं. ३. ५. ७. १) इत्यादिश्रुतेर्द्युशिशुत्वं तस्य ॥

रा॒यः सं॑मु॒द्राँश्च॒तुरो॒ऽस्मभ्यं॑ सोम वि॒श्वतः॑ ।

आ प॑वस्व सह॒स्रिणः॑ ॥६

रा॒यः । स॒मु॒द्रान् । च॒तुरः॑ । अ॒स्मभ्य॑म् । सो॒म॒ । वि॒श्वतः॑ ।

आ । प॒व॒स्व॒ । स॒ह॒स्रिणः॑ ॥६

रायः । समुद्रान् । चतुरः । अस्मभ्यम् । सोम । विश्वतः ।

आ । पवस्व । सहस्रिणः ॥ ६ ॥

"रायः धनस्य संबन्धिनः “चतुरः “समुद्रान् । धनपूर्णानित्यर्थः । तादृशान् समुद्रान् "अस्मभ्यम् अर्थाय हे “सोम विश्वतः सर्वतः “आ "पवस्व । तथा “सहस्रिणः अपरिमितान् कामान् आ पवस्व आयच्छ। चतुःसमुद्रस्थधनविशेषप्राप्तेः तन्मध्यगतभूमिस्वामित्वमन्तरेणासंभवाच्चतुःसमुद्रमुद्रितभूमण्डलस्वामित्वमेवाशास्ते यजमानः ॥ ॥ २३ ॥

टिप्पणी

प्र सोमासो विपश्चित इति गायत्री भवति प्रेत्या अभिद्रोणानि बभ्रव इत्यभिक्रान्त्यै स्तुता इन्द्राय वायव इति संस्कृत्यै प्र सोम देव वीतय इति प्रेत्यै प्र तु द्रवेति प्रेत्यै प्र वा एतेनाह्ना यन्ति गायत्रं भवति यदेव गायत्रस्य ब्राह्मणम् आश्वं भवति अश्वो वै भूत्वा प्रजापतिः प्रजा असृजत स प्राजायत बहुरभवत् प्रजायते बहुर्भवत्याश्वेन तुष्टुवानः एकाक्षरं निधनमुपयन्ति रथन्तरस्यानतिवादाय अनतिवाद्येनं भ्रातृव्यो भवति य एवं वेद - तांब्रा ११.३.१ (https://sa.wikisource.org/s/tvz)

९.३३.१ प्र सोमासो विपश्चितो इति

सोमसाम (https://sa.wikisource.org/s/1za2)

सौभरे द्वे (https://sa.wikisource.org/s/2gul) (ग्रामगेयः)

९.३३.४ तिस्रो वाच इति

पाष्ठौहं (https://sa.wikisource.org/s/1z9g)

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.३४

ऋग्वेदः - मण्डल ९

← सूक्तं ९.३३ सूक्तं ९.३४ सूक्तं ९.३५ →

त्रित आप्त्यः।

दे. पवमानः सोमः। गायत्री।

प्र सुवानो धारया तनेन्दुर्हिन्वानो अर्षति ।

रुजद्दृळ्हा व्योजसा ॥१॥

सुत इन्द्राय वायवे वरुणाय मरुद्भ्यः ।

सोमो अर्षति विष्णवे ॥२॥

वृषाणं वृषभिर्यतं सुन्वन्ति सोममद्रिभिः ।

दुहन्ति शक्मना पयः ॥३॥

भुवत्त्रितस्य मर्ज्यो भुवदिन्द्राय मत्सरः ।

सं रूपैरज्यते हरिः ॥४॥

अभीमृतस्य विष्टपं दुहते पृश्निमातरः ।

चारु प्रियतमं हविः ॥५॥

समेनमह्रुता इमा गिरो अर्षन्ति सस्रुतः ।

धेनूर्वाश्रो अवीवशत् ॥६॥

सायणभाष्यम्

‘प्र सुवानः' इति षड्टचं दशमं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘प्र सुवानः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र सु॑वा॒नो धार॑या॒ तनेन्दु॑र्हिन्वा॒नो अ॑र्षति ।

रु॒जद्दृ॒ळ्हा व्योज॑सा ॥१

प्र । सु॒वा॒नः । धार॑या । तना॑ । इन्दुः॑ । हि॒न्वा॒नः । अ॒र्ष॒ति॒ ।

रु॒जत् । दृ॒ळ्हा । वि । ओज॑सा ॥१

प्र। सुवानः । धारया। तना। इन्दुः। हिन्वानः । अर्षति ।

रुजत् । दृळ्हा। वि। ओजसा ॥१॥

इन्दुः सोमः "सुवानः सूयमानः “हिन्वानः अध्वर्युणा प्रेर्यमाणः “धारया “तना पवित्रं “प्र “अर्षति गच्छति । अथ प्रत्यक्षेणोच्यते । “दृळ्हा दृढान्यपि शत्रुपुराणि "ओजसा बलेन “वि रुजत् विरुजति विश्लथयति ॥

सु॒त इन्द्रा॑य वा॒यवे॒ वरु॑णाय म॒रुद्भ्यः॑ ।

सोमो॑ अर्षति॒ विष्ण॑वे ॥२

सु॒तः । इन्द्रा॑य । वा॒यवे॑ । वरु॑णाय । म॒रुत्ऽभ्यः॑ ।

सोमः॑ । अ॒र्ष॒ति॒ । विष्ण॑वे ॥२

सुतः । इन्द्राय । वायवे। वरुणाय । मरुत्ऽभ्यः ।

सोमः । अर्षति । विष्णवे ॥ २ ॥

अयं “सुतः अभिषुतः “सोमः इन्द्राद्यर्थम् अर्षति गच्छति ॥

वृषा॑णं॒ वृष॑भिर्य॒तं सु॒न्वन्ति॒ सोम॒मद्रि॑भिः ।

दु॒हन्ति॒ शक्म॑ना॒ पयः॑ ॥३

वृषा॑णम् । वृष॑ऽभिः । य॒तम् । सु॒न्वन्ति॑ । सोम॑म् । अद्रि॑ऽभिः ।

दु॒हन्ति॑ । शक्म॑ना । पयः॑ ॥३

वृषाणम्। वृषऽभिः । यतम् । सुन्वन्ति। सोमम् । अद्रिऽभिः ।

दुहन्ति। शक्मना। पयः ॥३॥

“वृषाणं रससेक्तारं “यतं नियतं “सोमं “वृषभिः रसस्य वर्षकैः “अद्रिभिः ग्रावभिः "सुन्वन्ति। “शक्मना कर्मणा "दुहन्ति अध्वर्य्वादयः “पयः सोमरसम् । सोमं पयो दुहन्तीति द्विकर्मकोऽयम् ॥

भुव॑त्त्रि॒तस्य॒ मर्ज्यो॒ भुव॒दिन्द्रा॑य मत्स॒रः ।

सं रू॒पैर॑ज्यते॒ हरिः॑ ॥४

भुव॑त् । त्रि॒तस्य॑ । मर्ज्यः॑ । भुव॑त् । इन्द्रा॑य । म॒त्स॒रः ।

सम् । रू॒पैः । अ॒ज्य॒ते॒ । हरिः॑ ॥४

भुवत् । त्रितस्य । मर्ज्यः । भुवत् । इन्द्राय । मत्सरः ।

सम् । रूपैः । अज्यते । हरिः ॥४॥

“त्रितस्य अपां पुत्रस्य सूक्तद्रष्टुर्ऋषेः सोऽयं मत्सरः मदकरः सोमः "मर्ज्यो “भुवत् शुद्धो भवति । तस्य यागार्थं शेषपानार्थं च । तथा “इन्द्राय इन्द्रपानाय मर्ज्यः भुवत् । “रूपैः रूपकैश्च क्षीरादिभिः “हरिः हरितवर्णः सोमः “सम् "अज्यते ॥

अ॒भीमृ॒तस्य॑ वि॒ष्टपं॑ दुह॒ते पृश्नि॑मातरः ।

चारु॑ प्रि॒यत॑मं ह॒विः ॥५

अ॒भि । ई॒म् । ऋ॒तस्य॑ । वि॒ष्टप॑म् । दु॒ह॒ते । पृश्नि॑ऽमातरः ।

चारु॑ । प्रि॒यऽत॑मम् । ह॒विः ॥५

अभि । ईम् । ऋतस्य । विष्टपम् । दुहते। पृश्निऽमातरः ।

चारु । प्रियऽतमम् । हविः ॥५॥

“ईम् एनं सोमम् “ऋतस्य “विष्टपं स्थानम् । यज्ञाश्रयमित्यर्थः । तादृशं “पृश्निमातरः मरुतः “अभि “दुहते। किम् । “प्रियतमम् इन्द्रादीनां “हविः होमसाधनं “चारु मनोहरम्। मरुत्प्रेरितवृष्ट्या सोमवृद्धेस्तद्दोग्धृत्वम् ।।

समेँनुमह्रुंता इमा गिरोँ अर्षन्ति सस्रुतः ।

धेनूर्वाश्रो अंवीवशत् ॥६

सम् । एनम् । अह्रुंताः । इमाः । गिरः । अर्षन्ति । सऽस्रुतः ।

धेनूः । वाश्रः । अवीवशन् ॥६

सम् । एनम् । अह्रुताः । इमाः । गिरः । अर्षन्ति। सऽस्रुतः।

धेनूः । वाश्रः । अवीवशत् ॥६॥

“सम् अर्षन्ति संगच्छन्ते “एनं सोमम् अह्रुताः अकुटिलाः “गिरः अस्मदीयाः स्तुतयः “सस्रुतः सरन्त्यः । ताश्च “धेनूः प्रीणयित्रीः स्तुतीः "वाश्रः शब्दयन् “अवीवशत् कामयते सोमः ॥ ॥ २४ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.३५

ऋग्वेदः - मण्डल ९

← सूक्तं ९.३४ सूक्तं ९.३५ सूक्तं ९.३६ →

प्रभूवसुराङ्गिरसः।

दे. पवमानः सोमः। गायत्री।

आ नः पवस्व धारया पवमान रयिं पृथुम् ।

यया ज्योतिर्विदासि नः ॥१॥

इन्दो समुद्रमीङ्खय पवस्व विश्वमेजय ।

रायो धर्ता न ओजसा ॥२॥

त्वया वीरेण वीरवोऽभि ष्याम पृतन्यतः ।

क्षरा णो अभि वार्यम् ॥३॥

प्र वाजमिन्दुरिष्यति सिषासन्वाजसा ऋषिः ।

व्रता विदान आयुधा ॥४॥

तं गीर्भिर्वाचमीङ्खयं पुनानं वासयामसि ।

सोमं जनस्य गोपतिम् ॥५॥

विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः ।

पुनानस्य प्रभूवसोः ॥६॥

सायणभाष्यम्

‘आ नः' इति षड्टचमेकादशं सूक्तमाङ्गिरसस्य प्रभूवसोरार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च-’ आ नः पवस्व प्रभूवसुः' इति । गतो विनियोगः ॥

आ नः॑ पवस्व॒ धार॑या॒ पव॑मान र॒यिं पृ॒थुं ।

यया॒ ज्योति॑र्वि॒दासि॑ नः ॥१

आ । नः॒ । प॒व॒स्व॒ । धार॑या । पव॑मान । र॒यिम् । पृ॒थुम् ।

यया॑ । ज्योतिः॑ । वि॒दासि॑ । नः॒ ॥१

आ । नः । पवस्व । धारया । पवमान । रयिम् । पृथुम् ।

यया । ज्योतिः । विदासि । नः ॥१

हे “पवमान सोम त्वं “धारया “नः अस्माकम् “आ “पवस्व सर्वतः क्षर। किम् । “रयिं धनं “पृथु विस्तीर्णम् । “यया धारया “ज्योतिः द्योतमानं यज्ञं स्वर्गं वा “विदासि लम्भयसि “नः अस्माकम् ॥

इंदो॑ समुद्रमींखय॒ पव॑स्व विश्वमेजय ।

रा॒यो ध॒र्ता न॒ ओज॑सा ॥२

इन्दो॒ इति॑ । स॒मु॒द्र॒म्ऽई॒ङ्ख॒य॒ । पव॑स्व । वि॒श्व॒म्ऽए॒ज॒य॒ ।

रा॒यः । ध॒र्ता । नः॒ । ओज॑सा ॥२

इन्दो इति । समुद्रम्ऽईङ्खय । पवस्व । विश्वम्ऽएजय ।

रायः । धर्ता । नः । ओजसा ॥२

हे “इन्दो सोम हे “समुद्रमीङ्खय । समुद्रमित्युदकनाम । ईङ्खयतिर्गतिकर्मा । उदकप्रेरक तथा हे “विश्वमेजय विश्वस्य सर्वस्यास्मच्छत्रोः कम्पयितः सोम त्वम् “ओजसा त्वदीयेन बलेन “नः अस्मभ्यं “रायः धनस्य “धर्ता धारकः “पवस्व । भवेत्यर्थः ।

अत्र यद्यप्युदकप्रेरणसर्वशत्रुकम्पने संबोधनान्तर्गतत्वादुद्देश्यगते तथापि यजमानस्यापेक्षिते इति रायो धर्तृत्ववदाशास्ये अधिगन्तव्ये ॥

त्वया॑ वी॒रेण॑ वीरवो॒ऽभि ष्या॑म पृतन्य॒तः ।

क्षरा॑ णो अ॒भि वार्यं॑ ॥३

त्वया॑ । वी॒रेण॑ । वी॒र॒ऽव॒: । अ॒भि । स्या॒म॒ । पृ॒त॒न्य॒तः ।

क्षर॑ । न॒: । अ॒भि । वार्य॑म् ॥३

त्वया । वीरेण । वीरऽवः । अभि । स्याम । पृतन्यतः ।

क्षर । नः । अभि । वार्यम् ॥३

हे “वीरवः वीरवन् सोम “वीरेण “त्वया साधनेन “पृतन्यतः संग्राममिच्छतः शत्रून् “अभि “ष्याम अभिभवेम । अतः “नः अस्माकं “वार्यं वरणीयं धनम् “अभि “क्षर । अभिगमयेत्यर्थः । अथवा वरणीयं सोमाख्यं धनं क्षर पवस्व ॥

प्र वाज॒मिंदु॑रिष्यति॒ सिषा॑सन्वाज॒सा ऋषि॑: ।

व्र॒ता विंदा॒न आयु॑धा ॥४

प्र । वाज॑म् । इन्दु॑: । इ॒ष्य॒ति॒ । सिसा॑सन् । वा॒ज॒ऽसाः । ऋषि॑: ।

व्र॒ता । वि॒दा॒नः । आयु॑धा ॥४

प्र । वाजम् । इन्दुः । इष्यति । सिसासन् । वाजऽसाः । ऋषिः ।

व्रता । विदानः । आयुधा ॥४

सोमः “वाजम् अन्नम् “इष्यति प्रेरयति यजमानेभ्यः । किं कुर्वन् । “सिषासन् यजमानान् संभक्तुमिच्छन् । ईदृशः “इन्दुः “वाजसाः अन्नस्य दाता “ऋषिः सर्वस्य द्रष्टा “व्रता कर्माणि आयुधानि च "विदानः जानन् ।

तं गी॒र्भिर्वा॑चमीं॑ख॒यं पु॑ना॒नं वा॑सयामसि ।

सोम॒ं जन॑स्य॒ गोप॑तिं ॥५

तम् । गी॒:ऽभिः । वा॒च॒म्ऽई॒ङ्ख॒यम् । पु॒ना॒नम् । वा॒स॒या॒म॒सि॒ ।

सोम॑म् । जन॑स्य । गोऽप॑तिम् ॥५

तम् । गीःऽभिः । वाचम्ऽईङ्खयम् । पुनानम् । वासयामसि ।

सोमम् । जनस्य । गोऽपतिम् ॥५

“तं सोमं “गीर्भिः स्तुतिवाग्भिः स्तौमीति शेषः । किंच “वाचमीङ्खयं वाचः प्रेरयितारं “पुनानं पूयमानं तं “सोमं “वासयामसि वासयामः श्रयणद्रव्यैः । कीदृशं सोमम् । “जनस्य “गोपतिं गवां पालकम् । यद्वा । एकमेव वाक्यम् । उक्तविशेषणविशिष्टं सोमं स्तुतिभिर्वासयाम इति । माधवस्तु वाचमिति पृथक्पदं तिङन्तं कृत्वा वाक्यद्वयं चकार ॥

विश्वो॒ यस्य॑ व्र॒ते जनो॑ दा॒धार॒ धर्म॑ण॒स्पतेः॑ ।

पु॒ना॒नस्य॑ प्र॒भूव॑सोः ॥६

विश्वः॑ । यस्य॑ । व्र॒ते । जनः॑ । दा॒धार॑ । धर्म॑णः । पतेः॑ ।

पु॒ना॒नस्य॑ । प्र॒भुऽव॑सोः ॥६

विश्वः । यस्य । व्रते । जनः । दाधार । धर्मणः । पतेः ।

पुनानस्य । प्रभुऽवसोः ॥६

“विश्वः सर्वः “जनः मनुष्यो यजमानः “यस्य सोमस्य “व्रते कर्मणि “दाधार धारयति मन इति शेषः । कीदृशस्य । “धर्मणः कर्मणः “पतेः पालकस्य “पुनानस्य पूयमानस्य “प्रभूवसोः प्रभूतधनस्य ॥ ॥ २५ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.३६

ऋग्वेदः - मण्डल ९
← सूक्तं ९.३५ सूक्तं ९.३६ सूक्तं ९.३७ →
प्रभूवसुराङ्गिरसः।

दे. पवमानः सोमः। गायत्री।

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः ।

कार्ष्मन्वाजी न्यक्रमीत् ॥१॥

स वह्निः सोम जागृविः पवस्व देववीरति ।

अभि कोशं मधुश्चुतम् ॥२॥

स नो ज्योतींषि पूर्व्य पवमान वि रोचय ।

क्रत्वे दक्षाय नो हिनु ॥३॥

शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः ।

पवते वारे अव्यये ॥४॥

स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा ।

पवतामान्तरिक्ष्या ॥५॥

आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि ।

वीरयुः शवसस्पते ॥६॥

सायणभाष्यम्

'असर्जि' इति षड्‍ऋचं द्वादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । असर्जि' इत्यनुक्रान्तम् । गतो विनियोगः ॥

अस॑र्जि॒ रथ्यो॑ यथा प॒वित्रे॑ च॒म्वोः॑ सु॒तः ।

कार्ष्म॑न्वा॒जी न्य॑क्रमीत् ॥१

अस॑र्जि । रथ्यः॑ । य॒था॒ । प॒वित्रे॑ । च॒म्वोः॑ । सु॒तः ।

कार्ष्म॑न् । वा॒जी । नि । अ॒क्र॒मी॒त् ॥१

असर्जि । रथ्यः । यथा । पवित्रे । चम्वोः । सुतः ।

कार्ष्मन् । वाजी । नि । अक्रमीत् ॥१

“रथ्यो “यथा रथसंबन्ध्यश्व इव स यथा विसृज्यते तद्वत् “चम्वोः अधिषवणफलकयोः “सुतः अभिषुतः सोमः "असर्जि सृष्टोऽभूत् "पवित्रे । तथाभूतः “वाजी वेजनवान् सोमाख्योऽश्वः “कार्ष्मन् । कार्ष्म युद्धमितरेतरकर्षणात् । अत्र देवानामाकर्षणवति यज्ञाख्ये संग्रामे “न्यक्रमीत् नितरां क्रामति ॥

स वह्निः॑ सोम॒ जागृ॑वि॒ः पव॑स्व दे॒ववीरति॑ ।

अ॒भि कोशं॑ मधु॒श्चुतं॑ ॥२

सः । वह्निः॑ । सो॒म॒ । जागृ॑विः । पव॑स्व । दे॒व॒ऽवीः । अति॑ ।

अ॒भि । कोश॑म् । म॒धु॒ऽश्चुत॑म् ॥२

सः । वह्निः । सोम । जागृविः । पवस्व । देवऽवीः । अति ।

अभि । कोशम् । मधुऽश्चुतम् ॥२

हे “सोम “स “वह्निः वाहकः "जागृविः जागरूकः “देववीः देवकामस्त्वं मधुश्चुतं मधुस्रावि “कोशं दशापवित्रमतिक्रम्य “अभि “पवस्व द्रोणकलशं प्रति क्षर ॥

स नो॒ ज्योतीं॑षि पूर्व्य॒ पव॑मान॒ वि रों॑चय ।

क्रत्वे॒ दक्षा॑य नो हिनु ॥३

सः । न॒ः । ज्योतीं॑षि । पू॒र्व्य॒ । पव॑मान । वि । रो॒च॒य॒ ।

क्रत्वें । दक्षा॑य । न॒ः । हि॒नु॒ ॥३

सः । नः । ज्योतींषि । पूर्व्य । पवमान । वि । रोचय ।

क्रत्वे । दक्षाय । नः । हिनु ॥३

हे “पूर्व्य पुराण “पवमान सोम “नः अस्माकं “ज्योतींषि दिव्यानि स्थानानि “वि “रोचय प्रकाशय । किंच “क्रत्वे कर्मणे यागाय “दक्षाय बलाय च बलप्रदाय यागाय वा “नः अस्मान् “हिनु प्रेरय ॥

शुं॒भमा॑न ऋता॒युभि॑र्मृ॒ज्यमा॑नो॒ गभ॑स्त्योः ।

पव॑ते॒ वारें अ॒व्ययें ॥४

शु॒म्भमा॑नः । ऋ॒त॒युऽभि॑ः । मृ॒ज्यमा॑नः । गभ॑स्त्योः ।

पव॑ते । वारें । अ॒व्ययें ॥४

शुम्भमानः । ऋतयुऽभिः । मृज्यमानः । गभस्त्योः ।

पवते । वारे । अव्यये ॥४

“ऋतायुभिः यज्ञकामैर्ऋत्विग्भिः “शुम्भमानः अलंक्रियमाणस्तेषामेव “गभस्त्योः हस्तयोः “मृज्यमानः सोमः “अव्यये अविमये “वारे वाले देशापवित्रे “पवते पूयते ॥

स विश्वा॑ दा॒शुषे॒ वसु॒ सोमों॑ दि॒व्यानि॒ पार्थि॑वा ।

पव॑ता॒मांतरिं॑क्ष्या ॥५

सः । विश्वा॑ । दा॒शुषें । वसुं । सोम॑ः । दि॒व्यानिं । पार्थिंवा ।

पव॑ताम् । आ । अ॒न्तरिं॑क्ष्या ॥५

सः । विश्वा । दाशुषे । वसु । सोमः । दिव्यानि । पार्थिवा ।

पवताम् । आ । अन्तरिक्ष्या ॥५

“सः अभिषूयमाणः “सोमः “दाशुषे हविर्दात्रे “विश्वा सर्वाणि “वसु वसूनि धनानि “पवतां प्रयच्छतु । विश्वानीयुक्तस्य विवरणं शिष्टम् । “दिव्यानि दिवि भवानि “पार्थिवा पृथिवीसंबद्धानि “अन्तरिक्ष्या अन्तरिक्षे भवानि च पवताम् ॥

आ दि॒वस्पृ॒ष्ठमं॑श्व॒युर्ग॑व्य॒युः सोम॑ रोहसि ।

वी॒र॒युः शं॑वसस्पते ॥६

आ । दि॒वः । पृ॒ष्ठम् । अ॒श्व॒ऽयुः । ग॒व्य॒ऽयुः । सो॒म॒ । रो॒ह॒सि॒ ।

वी॒र॒ऽयुः । श॒व॒स॒ः । प॒ते॒ ॥६

आ । दिवः । पृष्ठम् । अश्वऽयुः । गव्यऽयुः । सोम । रोहसि ।

वीरऽयुः । शवसः । पते ॥६

हे “सोम त्वं स्तोतॄणाम् “अश्वयुः अश्वमिच्छन् “गव्ययुः गा इच्छन् “वीरयुः पुत्रानिच्छन् “दिवस्पृष्ठं द्युलोकम् “आ “रोहसि आहुतिद्वारा हे “शवसस्पते अन्नस्य पालक ॥ ॥ २६ ॥

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.३७

ऋग्वेदः - मण्डल ९

← सूक्तं ९.३६ | सूक्तं ९.३७ | सूक्तं ९.३८ →

रहूगण आङ्गिरसः

दे. पवमानः सोमः। गायत्री।

स सुतः पीतये वृषा सोमः पवित्रे अर्षति ।

विघ्नन्रक्षांसि देवयुः ॥१॥

स पवित्रे विचक्षणो हरिरर्षति धर्णसिः ।

अभि योनिं कनिक्रदत् ॥२॥

स वाजी रोचना दिवः पवमानो वि धावति ।

रक्षोहा वारमव्ययम् ॥३॥

स त्रितस्याधि सानवि पवमानो अरोचयत् ।

जामिभिः सूर्यं सह ॥४॥

स वृत्रहा वृषा सुतो वरिवोविददाभ्यः ।

सोमो वाजमिवासरत् ॥५॥

स देवः कविनेषितोऽभि द्रोणानि धावति ।

इन्दुरिन्द्राय मंहना ॥६॥

सायणभाष्यम्

'स सुतः' इति षड्टचं त्रयोदशं सूक्तं रहूगणस्यार्षं गायत्रं सौम्यम् । अनुक्रम्यते च-स सुतो रहूगणः' इति । गतो विनियोगः ॥

स सुतः पीतये वृषा सोमः पवित्रे अर्षति ।

विघ्नन्रक्षांसि देवयुः ॥१

सः । सुतः । पीतये । वृषा । सोमः । पवित्रे । अर्षति ।

विऽघ्नन् । रक्षांसि । देवऽयुः ॥१

सः । सुतः । पीतये । वृषा । सोमः । पवित्रे । अर्षति ।

विऽघ्नन् । रक्षांसि । देवऽयुः ॥१

“सः “सोमः “पीतये इन्द्रादिपानाय “सुतः अभिषुतः “वृषा वर्षणः सन् "पवित्रे . "अर्षति गच्छति । किं कुर्वन्। “रक्षांसि “विघ्नन्’ “देवयुः देवकामः स इत्यन्वयः ॥

स पवित्रे विचक्षणो हरिरर्षति धर्णसिः ।

अभि योनिं कनिंक्रदत् ॥२

सः । पवित्रे । विऽचक्षणः । हरिः । अर्षति । धर्णसिः ।

अभि । योनिम् । कनिंक्रदत् ॥२

सः । पवित्रे । विऽचक्षणः । हरिः । अर्षति । धर्णसिः ।

अभि । योनिम् । कनिक्रदत् ॥२

“सः “सोमः "विचक्षणः । पश्यतिकर्मैतत् । सर्वस्य द्रष्टा “हरिः हरितवर्णः सोमः “धर्णसिः सर्वस्य धारकः “पवित्रे “अर्षति गच्छति । पश्चात् "कनिक्रदत् शब्दं कुर्वन् “योनिं स्थानं द्रोणकलशम् “अभि गच्छति ॥

स वा॒जी रो॑च॒ना दि॒वः पव॑मानो॒ वि धा॑वति ।

र॒क्षो॒हा वार॑म॒व्यय॑ँ ॥३

सः । वा॒जी । रो॒च॒ना । दि॒वः । पव॑मानः । वि । धा॒व॒ति॒ ।

र॒क्षः॒ऽहा । वार॑म् । अ॒व्यय॑म् ॥३

सः । वाजी । रोचना । दिवः । पवमानः । वि । धावति ।

रक्षःऽहा । वारम् । अव्ययम् ॥३

“स “वाजी वेजनवानश्वस्थानीयः “दिवः स्वर्गस्य “रोचना रोचकः “पवमानः पूयमानः “वि “धावति । कीदृशः । “रक्षोहा रक्षोहन्ता “अव्ययं “वारं दशापवित्रमतीत्य च धावति ।।

स त्रि॒तस्याधि॒ सान॑वि॒ पव॑मानो अरोचयत् ।

जा॒मिभि॑ः सूर्य॑ँ स॒ह ॥४

सः । त्रि॒तस्य॑ । अधि॑ । सान॑वि । पव॑मानः । अ॒रो॒च॒य॒त् ।

जा॒मिऽभि॑ः । सूर्य॑म् । स॒ह ॥४

सः । त्रितस्य । अधि । सानवि । पवमानः । अरोचयत् ।

जामिऽभिः । सूर्यम् । सह ॥४

“सः सोमः “त्रितस्य महर्षेः “अधि “सानवि समुच्छ्रिते यज्ञे । अधीति सप्तम्यर्थानुवादी। “पवमानः पूयमानः "जामिभिः प्रवृद्धैर्बन्धुभूतैर्वा स्वतेजोभिः “सह सहितः सन् 'सूर्यम् “अरोचयत् प्रकाशितवान् ॥

स वृ॑त्र॒हा वृषा॑ सु॒तो व॑रिवो॒विददा॑भ्यः ।

सोमो॒ वाज॑मिवासरत् ॥५

सः । वृ॒त्र॒ऽहा । वृषा॑ । सु॒तः । व॒रि॒वः॒ऽवित् । अदा॑भ्यः ।

सोम॑ः । वाज॑म्ऽइव । अ॒स॒र॒त् ॥५

सः । वृत्रऽहा । वृषा । सुतः । वरिवःऽवित् । अदाभ्यः ।

सोमः । वाजम्ऽइव । असरत् ॥५

“स “वृत्रहा “वृषा वर्षकः “सुतः अभिषुतः “वरिवोवित् यष्टुर्धनस्य लम्भकः “अदाभ्यः अन्यैरदम्भनीयः “सोमः “वाजमिव संग्राममश्व इव "असरत् गच्छति कलशम् ॥

स दे॒वः क॒विने॑षि॒तो॒३॒॑ऽभि द्रोणा॑नि धावति ।

इंदु॒रिंद्रा॑य मं॒हना॑ ॥६

सः । दे॒वः । क॒विना॑ । इ॒षि॒तः । अ॒भि । द्रोणा॑नि । धा॒व॒ति॒ ।

इन्दुः॑ । इन्द्रा॑य । मं॒हना॑ ॥६

सः । देवः । कविना । इषितः । अभि । द्रोणानि । धावति ।

इन्दुः । इन्द्राय । मंहना ॥६

"सः सोमः “देवः “इन्दुः क्लिद्यमानः “कविना क्रान्तप्रज्ञेनाध्वर्युणा “इषितः प्रेरितः सन् “द्रोणानि द्रोणकलशान् “अभि “धावति अभिगच्छति । किमर्थम् । “इन्द्राय इन्द्रार्थम् । “मंहना महान् स इति समन्वयः ॥ ॥ २७ ॥

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.३८

ऋग्वेदः - मण्डल ९
← सूक्तं ९.३७ सूक्तं ९.३८ सूक्तं ९.३९ →
रहूगण आङ्गिरसः।

दे. पवमानः सोमः। गायत्री।

एष उ स्य वृषा रथोऽव्यो वारेभिरर्षति ।

गच्छन्वाजं सहस्रिणम् ॥१॥

एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः ।

इन्दुमिन्द्राय पीतये ॥२॥

एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः ।

याभिर्मदाय शुम्भते ॥३॥

एष स्य मानुषीष्वा श्येनो न विक्षु सीदति ।

गच्छञ्जारो न योषितम् ॥४॥

एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः ।

य इन्दुर्वारमाविशत् ॥५॥

एष स्य पीतये सुतो हरिरर्षति धर्णसिः ।

क्रन्दन्योनिमभि प्रियम् ॥६॥

सायणभाष्यम्

‘एषः' इति षडृचं चतुर्दशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘एष उ स्यः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

ए॒ष उ॒ स्य वृषा॒ रथोऽव्यो॒ वारे॑भिरर्षति ।

गच्छ॒न्वाजं॑ सह॒स्रिणं॑ ॥१

ए॒षः । ऊं॒ इति॑ । स्यः । वृषा॑ । रथः॑ । अव्यः॑ । वारे॑भिः । अ॒र्ष॒ति॒ ।

गच्छ॑न् । वाज॑म् । स॒ह॒स्रिण॑म् ॥१

एषः । ऊं इति । स्यः । वृषा । रथः । अव्यः । वारेभिः । अर्षति ।

गच्छन् । वाजम् । सहस्रिणम् ॥१

“स्यः स प्रसिद्धः “एषः अभिषुतः सोमः “वृषा वर्षिता “रथः रंहणस्वभावः “अव्यो “वारेभिः अवेर्वालैर्दशापवित्रेण “अर्षति गच्छति कलशम् । “वाजम् अन्नं “सहस्रिणं सहस्रसंख्याकं यजमानाय प्रदातुं “गच्छन् द्रोणकलशं प्रविशन्नर्षतीत्यर्थः । "उ पूरणः ॥

ए॒तं त्रि॒तस्य॒ योष॑णो॒ हरिं॑ हिन्व॒न्त्यद्रि॑भिः ।

इंदु॒मिंद्रा॑य पी॒तये॑ ॥२

ए॒तम् । त्रि॒तस्य॑ । योष॑णः । हरि॑म् । हि॒न्व॒न्ति॒ । अद्रि॑ऽभिः ।

इन्दु॑म् । इन्द्रा॑य । पी॒तये॑ ॥२

एतम् । त्रितस्य । योषणः । हरिम् । हिन्वन्ति । अद्रिऽभिः ।

इन्दुम् । इन्द्राय । पीतये ॥२

"एतम् “इन्दुं क्लिद्यमानं “हरिं हरितवर्णं सोमं "त्रितस्य ऋषेः "योषणः अङ्गुलयः "अद्रिभिः “हिन्वन्ति “इन्द्राय इन्द्रस्य “पीतये पानाय ॥

ए॒तं त्यं ह॒रितो॒ दश॒ मर्मृ॒ज्यंते॑ अप॒स्युवः॑ ।

याभि॒र्मदा॑य॒ शुंभ॑ते ॥३

ए॒तम् । त्यम् । ह॒रितः॑ । दश॑ । म॒र्मृ॒ज्यन्ते॑ । अ॒प॒स्युवः॑ ।

याभिः॑ । मदा॑य । शुम्भ॑ते ॥३

एतम् । त्यम् । हरितः । दश । मर्मृज्यन्ते । अपस्युवः ।

याभिः । मदाय । शुम्भते ॥३

"एतं "त्यं तं सोममध्वर्योः "दश "हरितः हरणस्वभावा अङ्गलयः "अपस्युवः कर्मेच्छवः सत्यः "मर्मृज्यन्ते शोधयन्ति । "याभिः इन्द्रस्य "मदाय "शुम्भते दीप्यते । शोध्यत इत्यर्थः । तमेतमिति संबन्धः ॥

ए॒ष स्य मानु॑षी॒ष्वा श्ये॒नो न वि॒क्षु सीं॑दति ।

गच्छं॑जा॒रो न यो॒षितं॑ ॥४

ए॒षः । स्यः । मानु॑षीषु । आ । श्ये॒नः । न । वि॒क्षु । सी॒द॒ति॒ ।

गच्छ॑न् । जा॒रः । न । यो॒षित॑म् ॥४

एषः । स्यः । मानुषीषु । आ । श्येनः । न । विक्षु । सीदति ।

गच्छन् । जारः । न । योषितम् ॥४

"स्यः सः "एषः सोमः "मानुषीषु "विक्षु प्रजासु यजमानरूपास्वनुग्रहेण "आ "सीदति "श्येनो "न श्येन इव । पुनः क इव । "योषितं "गच्छन् अभिगच्छन् "जारो "न जार इव । यथा संकेतितस्तस्याः कामपूरणाय गूढो गच्छति तद्वदित्यर्थः ॥

ए॒ष स्य मद्यो॒ रसोऽव॑ चष्टे दि॒वः शिशुः॑ ।

य इंदु॒र्वार॒मावि॑शत् ॥५

ए॒षः । स्यः । मद्यः॑ । रसः॑ । अव॑ । च॒ष्टे॒ । दि॒वः । शिशुः॑ ।

यः । इन्दुः॑ । वार॑म् । आ । अवि॑शत् ॥५

एषः । स्यः । मद्यः । रसः । अव । चष्टे । दिवः । शिशुः ।

यः । इन्दुः । वारम् । आ । अविशत् ॥५

“स्यः सः “एषः “मद्यः मदनिमित्तः “रसः “अव “चष्टे सर्वमवपश्यति। "दिवः “शिशुः । द्युपुत्रः । तत्रोत्पत्तेः पुत्रत्वमस्य । “य “इन्दुः दीप्तः सोमः “वारं दशापवित्रम् "आविशत् आविशति स एष इति ॥

एषु स्य पी॒तये॑ सु॒तो हरि॑रर्षति धर्ण॒सिः ।

क्रंद॒न्योनि॑म॒भि प्रि॒यं ॥६

ए॒षः । स्यः । पी॒तये॑ । सु॒तः । हरिः॑ । अ॒र्ष॒ति॒ । ध॒र्ण॒सिः ।

क्रन्द॑न् । योनि॑म् । अ॒भि । प्रि॒यम् ॥६

एषः । स्यः । पीतये । सुतः । हरिः । अर्षति । धर्णसिः ।

क्रन्दन् । योनिम् । अभि । प्रियम् ॥६

“एष “स्यः स सोमः “पीतये पानाय "सुतः अभिषुतः “हरिः हरितवर्णः “धर्णसिः धारकः “प्रियं स्वप्रियभूतं "योनिं स्थानं द्रोणकलशं “क्रन्दन् शब्दयन् "अभि "अर्षति गच्छति ॥ ॥ २८॥

टिप्पणी

साम १२७४ (https://sa.wikisource.org/s/3km)

मण्डल ९

ऋग्वेदः सूक्तं ९.३९

ऋग्वेदः - मण्डल ९
← सूक्तं ९.३८ सूक्तं ९.३९ सूक्तं ९.४० →
बृहस्पतिराङ्गिरसः।

दे. पवमानः सोमः। गायत्री।

आशुरर्ष बृहन्मते परि प्रियेण धाम्ना ।

यत्र देवा इति ब्रवन् ॥१॥

परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः ।

वृष्टिं दिवः परि स्रव ॥२॥

सुत एति पवित्र आ त्विषिं दधान ओजसा ।

विचक्षाणो विरोचयन् ॥३॥

अयं स यो दिवस्परि रघुयामा पवित्र आ ।

सिन्धोरूर्मा व्यक्षरत् ॥४॥

आविवासन्परावतो अथो अर्वावतः सुतः ।

इन्द्राय सिच्यते मधु ॥५॥

समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः ।

योनावृतस्य सीदत ॥६॥

सायणभाष्यम्

‘ आशुरर्ष' इति षड़ृचं पञ्चदशं सूक्तमाङ्गिरसस्य बृहन्मतेरार्षं गायत्रं पवमानसोमदेवताकम् । ‘ आशुरर्ष बृहन्मतिः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

आ॒शुर॑र्ष बृहन्मते॒ परि॑ प्रि॒येण॒ धाम्ना॑ ।

यत्र॑ दे॒वा इति॒ ब्रव॑न् ॥१

आ॒शुः । अ॒र्ष॒ । बृ॒ह॒त्ऽम॒ते॒ । परि॑ । प्रि॒येण॑ । धाम्ना॑ ।

यत्र॑ । दे॒वाः । इति॑ । ब्रव॑न् ॥१

आशुः । अर्ष । बृहत्ऽमते । परि । प्रियेण । धाम्ना ।

यत्र । देवाः । इति । ब्रवन् ॥१

हे "बृहन्मते महामते सोम “प्रियेण देवानां प्रियतमेन “धाम्ना शरीरेण धारया “आशुः शीघ्रः सन् "परि “अर्ष परिगच्छ । “यत्र “देवाः इन्द्रादयो वर्तन्ते “इति “ब्रवन ब्रुवन् उच्चारयन् । तां दिशं गच्छामीति ब्रुवन्नित्यर्थः ॥

प॒रि॒ष्कृ॒ण्वन्ननि॑ष्कृतं॒ जना॑य या॒तय॒न्निषः॑ ।

वृ॒ष्टिं दि॒वः परि॑ स्रव ॥२

प॒रि॒ऽकृ॒ण्वन् । अनिः॑ऽकृतम् । जना॑य । या॒तय॑न् । इषः॑ ।

वृ॒ष्टिम् । दि॒वः । परि॑ । स्र॒व॒ ॥२

परिऽकृण्वन् । अनिःऽकृतम् । जनाय । यातयन् । इषः ।

वृष्टिम् । दिवः । परि । स्रव ॥२

“अनिष्कृतम् असंस्कृतं यजमानं स्थानं वा “परिष्कृण्वन् संस्कुर्वन् “जनाय यागकर्त्रे “इषः अन्नानि “यातयन् निर्गमयन् “दिवः अन्तरिक्षात् “वृष्टिं “परि “स्रव ॥

सु॒त ए॑ति प॒वित्र॒ आ त्विषिं॑ दधा॑न॒ ओजं॑सा ।

वि॒चक्षा॑णो विरो॒चय॑न् ॥३

सु॒तः । ए॒ति॒ । प॒वित्रें॑ । आ । त्विषिं॑म् । दधा॑नः । ओजं॑सा ।

वि॒ऽचक्षा॑णः । वि॒ऽरो॒चय॑न् ॥३

सुतः । एति । पवित्रे । आ । त्विषिम् । दधानः । ओजसा ।

विऽचक्षाणः । विऽरोचयन् ॥३

“सुतः अभिषुतः सोमः सन् "पवित्रे दशापवित्रे । “आ इत्यनर्थकः । "ओजसा बलेन शीघ्रम् “एति गच्छति । कीदृशः सन् । “त्विषिं दीप्तिं “दधानः धारयन् “विचक्षाणः सर्वं पश्यन् “विरोचयन् दीपयंश्च । किम् । देवानिति शेषः ।।

अ॒यं स यो दि॒वस्परिं रघु॒यामा॑ प॒वित्र॒ आ ।

सिंधो॑रू॒र्मा व्यक्षं॑रत् ॥४

अ॒यम् । सः । यः । दि॒वः । परिं । र॒घु॒ऽयामा॑ । प॒वित्रें॑ । आ ।

सिन्धोः॑ । ऊ॒र्मा । वि । अक्षं॑रत् ॥४

अयम् । सः । यः । दिवः । परि । रघुऽयामा । पवित्रे । आ ।

सिन्धोः । ऊर्मा । वि । अक्षरत् ॥४

“अयं “सः सोमः “पवित्रे “आ सिच्यमान इति शेषः । “सिन्धोः जलस्राविण्याः “ऊर्मा ऊर्मौ संघाते “व्यक्षरत् विविधं क्षरति । स इत्युक्तं क इत्याह । “यो “दिवस्परि द्युलोकस्योपरि “रघुयामा लघुगमनो देवप्राप्तौ सोऽयमिति संबन्धः ॥

आ॒विवा॑सन्परा॒वतो॒ अथो॑ अर्वा॒वतः॑ सु॒तः ।

इंद्रा॑य सिच्यते॒ मधुं॑ ॥५

आ॒ऽविवा॑सन् । प॒रा॒ऽवतः॑ । अथो॒ इतिं॑ । अ॒र्वा॒ऽवतः॑ । सु॒तः ।

इन्द्रा॑य । सि॒च्य॒ते॒ । मधुं॑ ॥५

आऽविवासन् । पराऽवतः । अथो इति । अर्वाऽवतः । सुतः ।

इन्द्राय । सिच्यते । मधु ॥५

"सुतः अभिषुतः सोमः “परावतः । दूरनामैतत् । दूरस्थान् “अथो अपि च “अर्वावतः अन्तिकस्थांश्च देवान् “आविवासन् । रसेन परिचरणायेत्यर्थः । “इन्द्राय इन्द्रार्थं "मधु मधुसदृशः सोमः “सिच्यते ॥

स॒मी॒ची॒ना अ॑नूषत॒ हरिं॑ हिन्व॒॑न्त्यद्रि॑भिः ।

योना॑वृ॒तस्य॑ सीदत ॥६

स॒म्ऽई॒ची॒नाः । अ॒नू॒ष॒त॒ । हरि॑म् । हि॒न्व॒न्ति॒ । अद्रि॑ऽभिः ।

योनौ॑ । ऋ॒तस्य॑ । सी॒द॒त॒ ॥६

सम्ऽईचीनाः । अनूषत । हरिम् । हिन्वन्ति । अद्रिऽभिः ।

योनौ । ऋतस्य । सीदत ॥६

“समीचीनाः सम्यगञ्चिताः संगताः स्तोतारः “अनूषत स्तुवन्ति । किंच सोमं “हरिं हरितवर्णं “हिन्वन्ति प्रेरयन्ति गमयन्ति “अद्रिभिः ग्रावभिः । यस्मादेवं तस्मात् “ऋतस्य यज्ञस्य “योनौ स्थाने “सीदत निषण्णा भवत हे देवाः ॥ ॥ २९ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.४०

दे. पवमानः सोमः। गायत्री

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः ।

शुम्भन्ति विप्रं धीतिभिः ॥१॥

आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः ।

ध्रुवे सदसि सीदति ॥२॥

नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः ।

आ पवस्व सहस्रिणम् ॥३॥

विश्वा सोम पवमान द्युम्नानीन्दवा भर ।

विदाः सहस्रिणीरिषः ॥४॥

स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम् ।

जरितुर्वर्धया गिरः ॥५॥

पुनान इन्दवा भर सोम द्विबर्हसं रयिम् ।

वृषन्निन्दो न उक्थ्यम् ॥६॥

सायणभाष्यम्

‘पुनानः' इति षड़ृचं षोडशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘पुनानः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

पु॒ना॒नो अ॑क्रमीद॒भि विश्वा॒ मृधो॒ विच॑र्षणिः ।

शु॒भं॑ति॒ विप्रं॑ धी॒तिभिः॑ ॥१

पु॒ना॒नः । अ॒क्र॒मी॒त् । अ॒भि । विश्वाः॑ । मृधः॑ । वि॒ऽच॑र्षणिः ।

शु॒म्भन्ति॑ । विप्र॑म् । धी॒तिऽभिः॑ ॥१

पुनानः । अक्रमीत् । अभि । विश्वाः । मृधः । विऽचर्षणिः ।

शुम्भन्ति । विप्रम् । धीतिऽभिः ॥१

“पुनानः पूयमानः “विचर्षणिः द्रष्टा सोमः “विश्वाः सर्वान् “मृधः हिंसकान् शत्रून् “अभि “अक्रमीत् अतिक्रान्तवान् । तं “विप्रं मेधाविनं “धीतिभिः कर्मभिरभिषवादिभिः स्तुतिभिर्वा “शुम्भन्ति दीपयन्ति अलंकुर्वन्ति ॥

आ योनि॑मरु॒णो रु॑ह॒द्गम॒दिंद्रं॒ वृषा॑ सु॒तः ।

ध्रु॒वे सद॑सि सीदति ॥२

आ । योनि॑म् । अ॒रु॒णः । रु॒ह॒त् । गम॑त् । इन्द्र॑म् । वृषा॑ । सु॒तः ।

ध्रु॒वे । सद॑सि । सी॒द॒ति॒ ॥२

आ । योनिम् । अरुणः । रुहत् । गमत् । इन्द्रम् । वृषा । सुतः ।

ध्रुवे । सदसि । सीदति ॥२

अयम् “अरुणः अरुणवर्णः सोमः “योनिं स्थानं द्रोणकलशम् “आ “रुहत् आरोहति । ततः “इन्द्रं “गमत् गच्छति । कुतः सन् । अयं “वृषा वर्षकः फलानां “सुतः अभिषुतः सन् गत्वा “ध्रुवे “सदसि स्थिरे स्थाने द्युलोकाख्ये “सीदति निवसति ॥

नू नों र॒यिं म॒हामिंदो॒ऽस्मभ्यं॑ सोम वि॒श्वतः॑ ।

आ प॑वस्व सह॒स्रिणं॑ ॥३

नु । न॒ः । र॒यिम् । म॒हाम् । इ॒न्दो॒ इति॑ । अ॒स्मभ्य॑म् । सो॒म॒ । वि॒श्वतः॑ ।

आ । प॒व॒स्व॒ । स॒ह॒स्रिण॑म् ॥३

नु । नः । रयिम् । महाम् । इन्दो इति । अस्मभ्यम् । सोम । विश्वतः ।

आ । पवस्व । सहस्रिणम् ॥३

हे “सोम अभिषुतस्त्वं हे “इन्दो “नः “अस्मभ्यं “नु क्षिप्रं "महां महान्तं “सहस्रिणम् असंख्यातं “रयिं धनं “विश्वतः “आ “पवस्व सर्वतः परिस्रव ॥

विश्वा॑ सोम पवमान द्यु॒म्नानीं॑दु॒वा भ॑र ।

वि॒दाः स॑ह॒स्रिणी॒रिषः॑ ॥४

विश्वा॑ । सो॒म॒ । प॒व॒मा॒न॒ । द्यु॒म्नानि॑ । इ॒न्दो॒ इति॑ । आ । भ॒र॒ ।

वि॒दाः । स॒ह॒स्रिणीः॑ । इषः॑ ॥४

विश्वा । सोम । पवमान । द्युम्नानि । इन्दो इति । आ । भर ।

विदाः । सहस्रिणीः । इषः ॥४

हे "सोम “पवमान पूयमान “इन्दो दीप्त त्वं “विश्वा सर्वाणि बहुविधानि “द्युम्नानि द्रविणानि “आ “भर आहर । “विदाः लम्भय च “सहस्रिणीः सहस्रसंख्याकानि “इषः अन्नानि ॥

स नः॑ पुना॒न आ भ॑र र॒यिं स्तो॒त्रे सु॒वीर्यं॑ ।

ज॒रि॒तुर्व॑र्धया॒ गिरः॑ ॥५

सः । न॒ः । पु॒ना॒नः । आ । भ॒र॒ । र॒यिम् । स्तो॒त्रे । सु॒ऽवीर्य॑म् ।

ज॒रि॒तुः । व॒र्ध॒य॒ । गिरः॑ ॥५

सः । नः । पुनानः । आ । भर । रयिम् । स्तोत्रे । सुऽवीर्यम् ।

जरितुः । वर्धय । गिरः ॥५

हे सोम “सः त्वं “नः अस्मभ्यं “स्तोत्रे स्तोतृभ्यः “पुनानः पूयमानोऽभिषूयमाणः “आ “भर आहर । किम् । “रयिं धनम् । कीदृशम् । “सुवीर्यं सुपुत्रम् । किंच “जरितुः स्तोतुः “गिरः स्तुतीः “वर्धय ॥

पु॒ना॒न इं॑दु॒वा भ॑र॒ सोम॑ द्वि॒बर्ह॑सं र॒यिं ।

वृष॑न्निंदो न उ॒क्थ्यं॑ ॥६

पु॒ना॒नः । इ॒न्दो॒ इति॑ । आ । भ॒र॒ । सोम॑ । द्वि॒ऽबर्ह॑सम् । र॒यिम् ।

वृष॑न् । इ॒न्दो॒ इति॑ । न॒ः । उ॒क्थ्य॑म् ॥६

पुनानः । इन्दो इति । आ । भर । सोम । द्विऽबर्हसम् । रयिम् ।

वृषन् । इन्दो इति । नः । उक्थ्यम् ॥६

हे “इन्दो “सोम “पुनानः पूयमानस्त्वम् “आ “भर आहर । किम् । “रयिं धनम् । कीदृशं धनम् । “द्विबर्हसं द्वयोः द्युपृथिव्याख्ययोः स्थानयोः परिवृद्धम् । तदेवाह । हे “इन्दो' “वृषन् वर्षक "नः अस्मभ्यम् “उक्थ्यं स्तुत्यं धनमा भर ॥ ॥ ३० ॥

टिप्पणी

९.४०.१ पुनानो अक्रमीदभि इति

अंकतेः साम, (वैरूपं) (https://sa.wikisource.org/s/2gz0)

सत्रासाहीयम् (https://sa.wikisource.org/s/1zob)

पूर्वयामम्

यामोत्तरम्

मण्डल ९

ऋग्वेदः सूक्तं ९.४१

ऋग्वेदः - मण्डल ९

← सूक्तं ९.४० | सूक्तं ९.४१ | सूक्तं ९.४२ →

मेधातिथिः काण्वः

दे. पवमानः सोमः। गायत्री

प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ।

घ्नन्तः कृष्णामप त्वचम् ॥१॥

सुवितस्य मनामहेऽति सेतुं दुराव्यम् ।

साह्वांसो दस्युमव्रतम् ॥२॥

शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः ।

चरन्ति विद्युतो दिवि ॥३॥

आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् ।

अश्वावद्वाजवत्सुतः ॥४॥

स पवस्व विचर्षण आ मही रोदसी पृण ।

उषाः सूर्यो न रश्मिभिः ॥५॥

परि णः शर्मयन्त्या धारया सोम विश्वतः ।

सरा रसेव विष्टपम् ॥६॥

सायणभाष्यम्

‘प्र ये गावः' इति षड्टचं सप्तदशं सूक्तं काण्वस्य मेध्यातिथेरार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तं- प्र ये गावो मेध्यातिथिः' इति । गतो विनियोगः ॥

प्र ये गावो॒ न भूर्ण॑यस्त्वे॒षा अ॒यासो॒ अक्र॑मुः ।

घ्नंतः॑ कृ॒ष्णामप॒ त्वचं॑ ॥१

प्र । ये । गावः॑ । न । भूर्ण॑यः । त्वे॒षाः । अ॒यासः॑ । अक्र॑मुः ।

घ्नन्तः॑ । कृ॒ष्णाम् । अप॑ । त्वच॑म् ॥१

प्र । ये । गावः । न । भूर्णयः । त्वेषाः । अयासः । अक्रमुः ।

घ्नन्तः । कृष्णाम् । अप । त्वचम् ॥१

"ये अभिषुताः सोमाः “गावो “न उदकानीव तानि यथा तूर्णमधः पतन्ति तद्वत् । एवं वोपमीयन्ते । यथा गावः स्वगोष्ठं प्रत्याशु गच्छन्ति तद्वत् । अथवा गावः स्तुतिवाचः । ता यथा स्तुत्यं प्रति क्षिप्रं प्राप्नुवन्ति तद्वत् । “भूर्णयः क्षिप्राः “त्वेषाः दीप्ताः “अयासः अया गमनशीलाः "कृष्णां “त्वचम् । कृष्णा त्वग्रक्षाः । तम् “अप “घ्नन्तः निघ्नन्तः । त्वचिः संवरणकर्मा। ईदृग्भूताः सोमाः “प्र “अक्रमुः । तान् स्तुतेति शेषः ॥

सु॒वि॒तस्य॑ मनाम॒हेऽति॒ सेतुं॑ दुरा॒व्यं॑ ।

सा॒ह्वांसो॒ दस्युं॑मव्र॒तं ॥२

सु॒वि॒तस्य॑ । म॒ना॒म॒हे॒ । अति॑ । सेतु॑म् । दुः॒ऽआ॒व्य॑म् ।

स॒ह्वांसः॑ । दस्यु॑म् । अ॒व्र॒तम् ॥२

सुवितस्य । मनामहे । अति । सेतुम् । दुःऽआव्यम् ।

सह्वांसः । दस्युम् । अव्रतम् ॥२

“सुवितस्य । शोभनं प्राप्तः सुवितः । शोभनस्य सोमस्य “सेतुं रक्षोविषयं बन्धनं “दुराव्यं दुष्टमतिं च रक्षसां बन्धनं तेषां हननबुद्धिं च सोमकर्तृकाः “मनामहे स्तुमः । कथं स्तुम इति तदुच्यते । “अव्रतम् अकर्माणं “दस्युं शत्रुं "साह्वांसः अभिभवन्तः ॥

शृ॒ण्वे वृ॒ष्टेरि॑व स्व॒नः पव॑मानस्य शु॒ष्मिणः॑ ।

चर॑ंति वि॒द्युतो॑ दि॒वि ॥३

शृ॒ण्वे । वृ॒ष्टेःऽइ॑व । स्व॒नः । पव॑मानस्य । शु॒ष्मिणः॑ ।

चर॑न्ति । वि॒ऽद्युतः॑ । दि॒वि ॥३

शृण्वे । वृष्टेःऽइव । स्वनः । पवमानस्य । शुष्मिणः ।

चरन्ति । विऽद्युतः । दिवि ॥३

“शृण्वे श्रूयते । किम् । सोमस्वनः । किमिव । “वृष्टेः वर्षणस्य "स्वनः “इव । तस्य यथा महान् स्वनः श्रूयते तद्वत् प्रभूतरसापातसमये श्रूयते । कस्य स्वन इति तत्राह । “पवमानस्य पूयमानस्य “शुष्मिणः बलवतः । तस्यैव “विद्युतः दीप्तयः “दिवि अन्तरिक्षे "चरन्ति ।

आ प॑वस्व म॒हीमिषं॒ गोम॑दिंदो॒ हिर॑ण्यवत् ।

अश्वा॑व॒द्वाज॑वत्सु॒तः ॥४

आ । प॒व॒स्व॒ । म॒हीम् । इष॑म् । गोऽम॑त् । इ॒न्दो॒ इति॑ । हिर॑ण्यऽवत् ।

अश्व॑ऽवत् । वाज॑ऽवत् । सु॒तः ॥४

आ । पवस्व । महीम् । इषम् । गोऽमत् । इन्दो इति । हिरण्यऽवत् ।

अश्वऽवत् । वाजऽवत् । सुतः ॥४

हे “इन्दो सोम “सुतः अभिषुतस्त्वं “महीमिषम् महदन्नम् “आ “पवस्व । कीदृशमन्नम् । “गोमत् बहुगोभिरुपेतमेवं “हिरण्यवत् हिरण्यैः “अश्ववत् अश्वैः “वाजवत् वाजैर्बलैश्चोपेतम् ।।

स प॑वस्व विचर्षण॒ आ म॒ही रोद॑सी पृण ।

उ॒षाः सूर्यो॒ न र॒श्मिभिः॑ ॥५

सः । प॒व॒स्व॒ । वि॒ऽच॒र्ष॒णे॒ । आ । म॒ही इति॑ । रोद॑सी॒ इति॑ । पृ॒ण॒ ।

उ॒षाः । सूर्यः॑ । न । र॒श्मिऽभिः॑ ॥५

सः । पवस्व । विऽचर्षणे । आ । मही इति । रोदसी इति । पृण ।

उषाः । सूर्यः । न । रश्मिऽभिः ॥५

हे “विचर्षणे विद्रष्टः सोम “सः त्वं “पवस्व क्षर रसम् । तथा कृत्वा तेन रसेन “मही महत्यौ “रोदसी द्यावापृथिव्यौ “आ “पृण आपूरय। “उषाः उषसः। एकदेशवाचिनोषःशब्देन तदुपलक्षितमहरुच्यते तत्प्राधान्यात् । अहानि “रश्मिभिः “सूर्यो “न सूर्य इव ॥

परिं णः शर्म॒यंत्या॒ धारं॑या सोम वि॒श्वतः॑ ।

सरा॑ र॒सेवं॑ वि॒ष्टपं॑ ॥६

परिं । न॒ः । श॒र्म॒ऽयन्त्या॑ । धारं॑या । सो॒म॒ । वि॒श्वतः॑ ।

सरं॑ । र॒साऽइ॑व । वि॒ष्टपं॑म् ॥६

परि । नः । शर्मऽयन्त्या । धारया । सोम । विश्वतः ।

सर । रसाऽइव । विष्टपम् ॥६

हे “सोम “नः अस्मभ्यं “शर्मयन्त्या सुखयन्त्या “धारया “विश्वतः सर्वतः “परि “सर परिचर । “रसेव रसेनेव “विष्टपं भूलोकम् । यद्वा । रसा नदी स्थानं सा प्रवणरूपमिव ॥ ॥ ३१ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.४२

	ऋग्वेदः - मण्डल ९	
← सूक्तं ९.४१	सूक्तं ९.४२	सूक्तं ९.४३ →
	मेध्यातिथिः काण्वः।	

दे. पवमानः सोमः। गायत्री।

जनयन्रोचना दिवो जनयन्नप्सु सूर्यम् ।

वसानो गा अपो हरिः ॥१॥

एष प्रत्नेन मन्मना देवो देवेभ्यस्परि ।

धारया पवते सुतः ॥२॥

वावृधानाय तूर्वये पवन्ते वाजसातये ।

सोमाः सहस्रपाजसः ॥३॥

दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते ।

क्रन्दन्देवाँ अजीजनत् ॥४॥

अभि विश्वानि वार्याभि देवाँ ऋतावृधः ।

सोमः पुनानो अर्षति ॥५॥

गोमन्नः सोम वीरवदश्वावद्वाजवत्सुतः ।

पवस्व बृहतीरिषः ॥६॥

सायणभाष्यम्

'जनयन्' इति षड्ऋचमष्टादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'जनयन्' इत्यनुक्रान्तम् । गतो विनियोगः ॥

ज॒नय॑न्रोच॒ना दि॒वो ज॒नय॑न्न॒प्सु सूर्यं॑ ।

वसा॑नो॒ गा अ॒पो हरिः॑ ॥१

ज॒नय॑न् । रो॒च॒ना । दि॒वः । ज॒नय॑न् । अ॒प्ऽसु । सूर्य॑म् ।

वसा॑नः । गाः । अ॒पः । हरिः॑ ॥१

जनयन् । रोचना । दिवः । जनयन् । अप्ऽसु । सूर्यम् ।

वसानः । गाः । अपः । हरिः ॥१

अयं "हरिः सोमः "दिवः द्युसंबन्धीनि "रोचना रोचनानि नक्षत्रग्रहमण्डलानि "जनयन् तथा "अप्सु अन्तरिक्षे "सूर्यं च "जनयन् तथा "गाः अधोगन्त्रीः "अपः "वसानः भूमिमात्मानं वाच्छादयन् पवत इत्युत्तरत्र संबन्धः ॥

ए॒ष प्र॒त्नेन॒ मन्म॑ना दे॒वो दे॒वेभ्य॒स्परि॑ ।

धार॑या पवते सु॒तः ॥२

ए॒षः । प्र॒त्नेन॑ । मन्म॑ना । दे॒वः । दे॒वेभ्यः॑ । परि॑ ।

धार॑या । प॒व॒ते॒ । सु॒तः ॥२

एषः । प्रत्नेन । मन्मना । देवः । देवेभ्यः । परि ।

धारया । पवते । सुतः ॥२

"एषः सोमः "प्रत्नेन पुराणेन "मन्मना मननीयेन स्तोत्रेण युक्तः "सुतः अभिषुतश्च सन् "देवेभ्यः "परि परितः "धारया स्वीयया "पवते ॥

वा॒वृ॒धा॒नाय॒ तूर्व॑ये॒ पव॑न्ते॒ वाज॑सातये ।

सोमाः॑ स॒हस्र॑पाजसः ॥३

व॒वृ॒धा॒नाय॑ । तूर्व॑ये । पव॑न्ते । वाज॑ऽसातये ।

सोमाः॑ । स॒हस्र॑ऽपाजसः ॥३

ववृधानाय । तूर्वये । पवन्ते । वाजऽसातये ।

सोमाः । सहस्रऽपाजसः ॥३

“वावृधानाय वर्धसानाय “तूर्वये क्षिप्राय “वाजसातये संग्रामायान्नलाभाय वा “पवन्ते पूयन्ते । के । “सोमाः । कीदृशाः । “सहस्रपाजसः अपरिमितबलाः । असंख्यातवेगा इत्यर्थः ॥

दु॒हा॒नः प्र॒त्नमित्पयः॑ प॒वित्रे॒ परि॑ षिच्यते ।

क्रन्द॑न्दे॒वाँ अ॑जीजनत् ॥४

दु॒हा॒नः । प्र॒त्नम् । इत् । पयः॑ । प॒वित्रे॑ । परि॑ । सि॒च्य॒ते॒ ।

क्रन्द॑न् । दे॒वान् । अ॒जी॒ज॒न॒त् ॥४

दुहानः । प्रत्नम् । इत् । पयः । पवित्रे । परि । सिच्यते ।

क्रन्दन् । देवान् । अजीजनत् ॥४

“प्रत्नमित् पुराणमेव “पयः रस “दुहानः दधानः सोमः “पवित्रे “परि “षिच्यते । किंच “क्रन्दन् शब्दं कुर्वन् "देवानजीजनत् जनयति स्वसमीपे । यत्र सोमोऽभिषूयते तत्र देवा नियतं प्रादुर्भवन्ति । अतो जनयतीत्युपचर्यते ॥

अ॒भि विश्वा॑नि॒ वार्या॒भि दे॒वाँ ऋ॑ता॒वृधः॑ ।

सोमः॑ पुना॒नो अ॑र्षति ॥५

अ॒भि । विश्वा॑नि । वार्या॑ । अ॒भि । दे॒वान् । ऋ॒त॒ऽवृधः॑ ।

सोमः॑ । पु॒ना॒नः । अ॒र्ष॒ति॒ ॥५

अभि । विश्वानि । वार्या । अभि । देवान् । ऋतऽवृधः ।

सोमः । पुनानः । अर्षति ॥५

अयं “सोमः “पुनान: पूयमानः “विश्वानि “वार्या वरणीयानि धनानि “अभि “अर्षति । तथा “ऋतावृधः यज्ञवर्धकान् "देवान् “अभि अर्षति ।।

गोमं॑न्नः सोम वी॒रव॒दश्वा॑व॒द्वाजं॑वत्सु॒तः ।

पव॑स्व बृह॒तीरिषः॑ ॥६

गोऽमं॑त् । न॒ः । सो॒म॒ । वी॒रऽवं॑त् । अश्वं॑ऽवत् । वाजं॑ऽवत् । सु॒तः ।

पव॑स्व । बृ॒ह॒तीः । इषः॑ ॥६

गोऽमत् । नः । सोम । वीरऽवत् । अश्वऽवत् । वाजऽवत् । सुतः ।

पवस्व । बृहतीः । इषः ॥६

हे “सोम “सुतः त्वं “नः अस्मभ्यं “गोमत् गोभिर्युक्तं “वीरवत् बहुभिर्वीरैरुपेतम् “अश्वावत् अश्वैर्युक्तं “वाजवत् वाजैर्बलैः संग्रामैर्वोपेतं धनं "बृहतीरिषः प्रभूतान्यन्नानि “पवस्व । प्रयच्छेत्यर्थः ॥ ॥ ३२ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.४३

	ऋग्वेदः - मण्डल ९	
← सूक्तं ९.४२	सूक्तं ९.४३	सूक्तं ९.४४ →
	मेध्यातिथिः काण्वः	

दे. पवमानः सोमः। गायत्री

यो अत्य इव मृज्यते गोभिर्मदाय हर्यतः ।

तं गीर्भिर्वासयामसि ॥१॥

तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा ।

इन्दुमिन्द्राय पीतये ॥२॥

पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः ।

विप्रस्य मेध्यातिथेः ॥३॥

पवमान विदा रयिमस्मभ्यं सोम सुश्रियम् ।

इन्दो सहस्रवर्चसम् ॥४॥

इन्दुरत्यो न वाजसृत्कनिक्रन्ति पवित्र आ ।

यदक्षारति देवयुः ॥५॥

पवस्व वाजसातये विप्रस्य गृणतो वृधे ।

सोम रास्व सुवीर्यम् ॥६॥

सायणभाष्यम्

यो अत्यइव' इति षड्चमेकोनविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । “यो अत्यइव' इत्यनुक्रान्तम् । गतो विनियोगः ॥

यो अत्यं इव मृज्यते गोभिर्मदाय हर्यतः ।

तं गीर्भिर्वासयामसि ॥१

यः । अत्यःऽइव । मृज्यते । गोभिः । मदाय । हर्यतः ।

तम् । गीःऽभिः । वासयामसि ॥१

यः । अत्यःऽइव । मृज्यते । गोभिः । मदाय । हर्यतः ।

तम् । गीःऽभिः । वासयामसि ॥१

“यः सोमः “अत्यइव अतनशीलोऽश्व इव “गोभिः वसतीवरीभिरद्भिर्गोविकारैः पय आदिभिर्वा मृज्यते मिश्र्यते । किमर्थम् । “मदाय देवानाम् । कीदृशः । यः “हर्यतः कान्तः । “तं सोमं “गीर्भिः स्तुतिभिः “वासयामसि वासयामः ॥

तं नो विश्वा अवस्युवो गिरः शुंभंति पूर्वथा ।

इंदुमिंद्राय पीतये ॥२

तम् । नः । विश्वाः । अवस्युवः । गिरः । शुम्भन्ति । पूर्वऽथा ।

इन्दुम् । इन्द्राय । पीतये ॥२

तम् । नः । विश्वाः । अवस्युवः । गिरः । शुम्भन्ति । पूर्वऽथा ।

इन्दुम् । इन्द्राय । पीतये ॥२

“तम् “इन्दुं सोमं “नः अस्माकं “विश्वाः सर्वाः “अवस्युवः । अवो रक्षणम् । तदिच्छन्त्यः “गिरः स्तुतयः “पूर्वथा पूर्वमिव पूर्वं यथा तथैवेदानीमपि “शुम्भन्ति दीपयन्ति । किमर्थम् । “इन्द्राय इन्द्रस्य “पीतये पानाय ।।

पु॒ना॒नो या॑ति हर्य॒तः सोमो॑ गी॒र्भिः परि॑ष्कृतः ।

विप्र॑स्य॒ मेध्या॑तिथेः ॥३

पु॒ना॒नः । या॒ति॒ । ह॒र्य॒तः । सोमः॑ । गीः॒ऽभिः । परि॑ऽकृतः ।

विप्र॑स्य । मेध्य॑ऽअतिथेः ॥३

पुनानः । याति । हर्यतः । सोमः । गीःऽभिः । परिऽकृतः ।

विप्रस्य । मेध्यऽअतिथेः ॥३

"पुनानः पूयमानः "हर्यतः कमनीयः "सोमो "गीर्भिः "परिष्कृतः स्तुतिभिरलंकृतः "याति कलशं प्रति । किमर्थम् । "विप्रस्य मेधाविनः "मेध्यातिथेः मम यागार्थम् । यद्वा । मम गीर्भिरिति संबन्धः॥

पव॑मान वि॒दा र॒यिम॒स्मभ्यं॑ सोम सु॒श्रियं॑ ।

इंदो॑ स॒हस्र॑वर्चसं ॥४

पव॑मान । वि॒दाः । र॒यिम् । अ॒स्मभ्य॑म् । सो॒म॒ । सु॒ऽश्रिय॑म् ।

इन्दो॒ इति॑ । स॒हस्र॑ऽवर्चसम् ॥४

पवमान । विदाः । रयिम् । अस्मभ्यम् । सोम । सुऽश्रियम् ।

इन्दो इति । सहस्रऽवर्चसम् ॥४

हे "पवमान "इन्दो "सोम "अस्मभ्यं "सुश्रियं शोभनया श्रिया युक्तं "सहस्रवर्चसं बहुदीप्तिं "रयिं धनं "विदाः । देहीत्यर्थः ।।

इंदु॒रत्यो॒ न वा॑ज॒सृत्कनि॑क्रंति प॒वित्र॒ आ ।

यदक्षा॒रति॑ देव॒युः ॥५

इन्दुः॑ । अत्यः॑ । न । वा॒ज॒ऽसृत् । कनि॑क्रन्ति । प॒वित्रे॑ । आ ।

यत् । अक्षाः॑ । अति॑ । दे॒व॒ऽयुः ॥५

इन्दुः । अत्यः । न । वाजऽसृत् । कनिक्रन्ति । पवित्रे । आ ।

यत् । अक्षाः । अति । देवऽयुः ॥५

अयम् “इन्दुः “वाजसृत् संग्रामसरणः “अत्यो “न अश्व इव “पवित्र “आ पवित्रे “कनिक्रन्ति शब्दं करोति । “यत् यदा “अक्षाः क्षरति । क्षर संचलने' इत्यस्माच्छान्दसे लुङि तिपि सिच् । ‘ बहुलं छन्दसि' इतीडभावः । इडभावे च ' रात्सस्य ' इति सलोपः । “देवयुः देवकामः सन् तदा शब्दं करोति ॥

पवंस्व॒ वाजंसातये॒ विप्रंस्य गृण॒तो वृ॒धे ।

सोम॒ रास्वं सु॒वीर्यँ ॥६

पवंस्व । वाजंऽसातये । विप्रंस्य । गृ॒ण॒तः । वृ॒धे ।

सोमं । रास्वं । सु॒ऽवीर्यंम् ॥६

पवस्व । वाजऽसातये । विप्रस्य । गृणतः । वृधे ।

सोम । रास्व । सुऽवीर्यम् ॥६

हे सोम “पवस्व क्षर । किमर्थम् । “वाजसातये अन्नलाभाय। तथा “गृणतः स्तुवतः “विप्रस्य मम मेध्यातिथेः “वृधे वर्धनाय च । हे "सोम “सुवीर्यं शोभनवीर्योपेतं पुत्रं च “रास्व देहि ॥ ॥ ३३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये षष्ठाष्टकेऽष्टमोऽध्यायः ॥

समाप्तं च षष्ठाष्टकम् ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.४४

ऋग्वेदः - मण्डल ९
← सूक्तं ९.४३ सूक्तं ९.४४ सूक्तं ९.४५ →
अयास्य आङ्गिरसः।

दे. पवमानः सोमः। गायत्री।

प्र ण इन्दो महे तन ऊर्मिं न बिभ्रदर्षसि ।

अभि देवाँ अयास्यः ॥१॥

मती जुष्टो धिया हितः सोमो हिन्वे परावति ।

विप्रस्य धारया कविः ॥२॥

अयं देवेषु जागृविः सुत एति पवित्र आ ।

सोमो याति विचर्षणिः ॥३॥

स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरम् ।

बर्हिष्माँ आ विवासति ॥४॥

स नो भगाय वायवे विप्रवीरः सदावृधः ।

सोमो देवेष्वा यमत् ॥५॥

स नो अद्य वसुत्तये क्रतुविद्गातुवित्तमः ।

वाजं जेषि श्रवो बृहत् ॥६॥

सायणभाष्यम्

॥ श्रीगणेशाय नमः ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ सप्तमाष्टकस्य प्रथमाध्याय आरभ्यते । 'प्र णः' इति षड्चं विंशं सूक्तमाङ्गिरसस्यायास्यस्यार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तं- प्र णोऽयास्यः' इति । गतो विनियोगः ॥

प्र णं इंदो म॒हे तनं ऊ॒र्मिं न बिभ्रं॑दर्षसि ।

अ॒भि दे॒वाँ अ॒यास्यः॑ ॥१

प्र । न॒ः । इ॒न्दो॒ इति॑ । म॒हे । तनं॑ । ऊ॒र्मिम् । न । बिभ्रं॑त् । अ॒र्ष॒सि॒ ।

अ॒भि । दे॒वान् । अ॒यास्यः॑ ॥१

प्र । नः । इन्दो इति । महे । तने । ऊर्मिम् । न । बिभ्रत् । अर्षसि ।

अभि । देवान् । अयास्यः ॥१

हे "इन्दो सोम त्वं "नः अस्माकं "महे महते "तने धनाय "प्र "अर्षसि प्रगच्छसि । "न संप्रति "अयास्यः चायमृषिः तव "ऊर्मिं तरङ्गं "बिभ्रत् धारयन् "देवान् "अभि गच्छति यष्टुम् ॥

म॒ती जु॒ष्टो धि॒या हि॒तः सोमो॑ हिन्वे परा॒वति॑ ।

विप्रं॑स्य॒ धारं॑या क॒विः ॥२

म॒ती । जु॒ष्टः । धि॒या । हि॒तः । सोमः॑ । हि॒न्वे॒ । प॒रा॒ऽवति॑ ।

विप्रं॑स्य । धारं॑या । क॒विः ॥२

मती । जुष्टः । धिया । हितः । सोमः । हिन्वे । पराऽवति ।

विप्रस्य । धारया । कविः ॥२

“कविः क्रान्तकर्मा “सोमः “विप्रस्य मेधाविनः स्तोतुः “मती मत्या स्तुत्या “जुष्टः सेवितः “धिया कर्मणा “हितः यज्ञे निहितः “परावति पवित्राद्दूरदेशे “धारया “हिन्वे प्रेर्यते ॥

अ॒यं दे॒वेषु॒ जागृ॑विः सु॒त ए॑ति प॒वित्र॒ आ ।

सोमो॑ याति॒ विच॑र्षणिः ॥३

अ॒यम् । दे॒वेषु॑ । जागृ॑विः । सु॒तः । ए॒ति॒ । प॒वित्रे॑ । आ ।

सोमः॑ । या॒ति॒ । विऽच॑र्षणिः ॥३

अयम् । देवेषु । जागृविः । सुतः । एति । पवित्रे । आ ।

सोमः । याति । विऽचर्षणिः ॥३

“जागृविः जागरणशीलः "अयं “सोमः "देवेषु देवार्थं "सुतः अभिषुतः “आ “एति समन्तात् गच्छति । अपि च “विचर्षणिः विद्रष्टा सोमः “पवित्रे “याति पावनाय गच्छति ॥

स नः॑ पवस्व वाज॒युश्च॑क्रा॒णश्चारु॑मध्व॒रं ।

ब॒र्हिष्मा॑ँ आ वि॑वासति ॥४

सः । न॒ः । प॒व॒स्व॒ । वा॒ज॒ऽयुः । च॒क्रा॒णः । चारु॑म् । अ॒ध्व॒रम् ।

ब॒र्हिष्मा॑न् । आ । वि॒वा॒स॒ति॒ ॥४

सः । नः । पवस्व । वाजऽयुः । चक्राणः । चारुम् । अध्वरम् ।

बर्हिष्मान् । आ । विवासति ॥४

हे सोम यं त्वां “बर्हिष्मान् ऋत्विक् “आ “विवासति परिचरति “सः त्वं “नः अस्मदर्थं "वाजयुः अन्नमिच्छन् 'अध्वरं हिंसारहितं यागं “चारु कल्याणं "चक्राणः कुर्वन् "पवस्व क्षर ॥

स नो॒ भगा॑य वा॒यवे॒ विप्र॑वीरः स॒दावृ॑धः ।

सोमो॑ दे॒वेष्वा य॑मत् ॥५

सः । न॒ः । भगा॑य । वा॒यवे॑ । विप्र॑ऽवीरः । स॒दाऽवृ॑धः ।

सोमः॑ । दे॒वेषु॑ । आ । य॒म॒त् ॥५

सः । नः । भगाय । वायवे । विप्रऽवीरः । सदाऽवृधः ।

सोमः । देवेषु । आ । यमत् ॥५

“सः पवमानः “सोमः “वायवे वायुदेवार्थं “भगाय भगदेवार्थं च “विप्रवीरः विप्रैर्मेधाविभिः स्तुत्या प्रेरितः “सदावृधः नित्यवृद्धो भवन् “नः अस्मभ्यं “देवेषु स्थितं धनम् “आ "यमत् आ प्रयच्छतु ।।

स नों अ॒द्य वसुं॑त्तये क्रतु॒विद्गा॑तु॒वित्त॑मः ।

वाजं॑ जेषि॒ श्रवों बृ॒हत् ॥६

सः । न॒ः । अ॒द्य । वसुं॑त्तये । क्र॒तु॒ऽवित् । गा॒तु॒वित्ऽत॑मः ।

वाजं॑म् । जे॒षि॒ । श्रवः॑ । बृ॒हत् ॥६

सः । नः । अद्य । वसुत्तये । क्रतुऽवित् । गातुवित्ऽतमः ।

वाजम् । जेषि । श्रवः । बृहत् ॥६

हे सोम “क्रतुवित् क्रतूनां कर्मणां लम्भकः “गातुवित्तमः पुण्यलोकानामतिशयेन मार्गस्य ज्ञाता त्वम् “अद्य अस्मिन्नहनि “नः अस्माकं “वसुत्तये धनलाभाय “बृहत् महत् “श्रवः अन्नं “वाजं बलं च “जेषि जय ॥ ॥ १ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.४५

ऋग्वेदः - मण्डल ९
← सूक्तं ९.४४ सूक्तं ९.४५ सूक्तं ९.४६ →
अयास्य आङ्गिरसः।

दे. पवमानः सोमः। गायत्री।

स पवस्व मदाय कं नृचक्षा देववीतये ।

इन्दविन्द्राय पीतये ॥१॥

स नो अर्षाभि दूत्यं त्वमिन्द्राय तोशसे ।

देवान्सखिभ्य आ वरम् ॥२॥

उत त्वामरुणं वयं गोभिरञ्ज्मो मदाय कम् ।

वि नो राये दुरो वृधि ॥३॥

अत्यू पवित्रमक्रमीद्वाजी धुरं न यामनि ।

इन्दुर्देवेषु पत्यते ॥४॥

समी सखायो अस्वरन्वने क्रीळन्तमत्यविम् ।

इन्दुं नावा अनूषत ॥५॥

तया पवस्व धारया यया पीतो विचक्षसे ।

इन्दो स्तोत्रे सुवीर्यम् ॥६॥

सायणभाष्यम्

'स पवस्व' इति षड्टचमेकविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'स पवस्व ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

स पंवस्व मदा॑य कं नृचक्षा॑ देववी॑तये ।

इंदविंद्रा॑य पीतयें ॥१

सः । पवस्व । मदा॑य । कम् । नृऽचक्षा॑ः । देवऽवी॑तये ।

इन्दो इतिं । इन्द्रा॑य । पीतयें ॥१

सः । पवस्व । मदाय । कम् । नृऽचक्षाः । देवऽवीतये ।

इन्दो इति । इन्द्राय । पीतये ॥१

हे "इन्दो सोम "नृचक्षाः नृणां नेतॄणां द्रष्टा "सः त्वं "देववीतये यज्ञाय "इन्द्राय इन्द्रस्य "पीतये पानाय च "मदाय मदार्थं च "कं सुखं यथा भवति तथा "पवस्व क्षर ॥

स नों अर्षाभि दूत्यं१ त्वमिंद्रा॑य तोशसे ।

देवान्त्सखिंभ्य आ वरं ॥२

सः । नः । अर्ष । अभि । दूत्य॑म् । त्वम् । इन्द्रा॑य । तोशसे ।

देवान् । सखिंऽभ्यः । आ । वर॑म् ॥२

सः । नः । अर्ष । अभि । दूत्यम् । त्वम् । इन्द्राय । तोशसे ।

देवान् । सखिऽभ्यः । आ । वरम् ॥२

हे सोम "त्वं "नः अस्माकं "दूत्यं दूतस्य कर्म "अर्ष अभिगच्छ । अपि च यस्त्वं "इन्द्राय इन्द्रार्थं "तोशसे पीयसे "सः त्वं "सखिभ्यः प्रियेभ्यः अस्मभ्यं "वरं श्रेष्ठं धनं "देवान् "आ याचस्वेत्यर्थः ॥

उ॒त त्वाम॑रु॒णं व॒यं गोभि॑रंज्मो॒ मदा॑य॒ कं ।

वि नो॑ रा॒ये दुरो॑ वृधि ॥३

उ॒त । त्वाम् । अ॒रु॒णम् । व॒यम् । गोभिः॑ । अ॒ञ्ज्मः॒ । मदा॑य । कम् ।

वि । नः॒ । रा॒ये । दुरः॑ । वृ॒धि॒ ॥३

उत । त्वाम् । अरुणम् । वयम् । गोभिः । अञ्ज्मः । मदाय । कम् ।

वि । नः । राये । दुरः । वृधि ॥३

“उत अपि च हे सोम यम् “अरुणम् अरुणवर्णं “त्वां “मदाय मदार्थं “वयम् अङ्गिरसायास्याः “गोभिः गोविकारैः पयोभिः “अञ्ज्मः वासयामः संस्कुर्मः। “कम् इति पूरणम् । स त्वं “नः अस्माकं “राये धनाय “दुरः द्वाराणि “वि “वृधि विवृतानि कुरु ॥

अत्यूं॑ प॒वित्र॑मक्रमीद्वा॒जी धुरं॒ न याम॑नि ।

इंदु॑र्दे॒वेषु॑ पत्यते ॥४

अति॑ । ऊं॒ इति॑ । प॒वित्र॑म् । अ॒क्र॒मी॒त् । वा॒जी । धुर॑म् । न । याम॑नि ।

इन्दुः॑ । दे॒वेषु॑ । प॒त्य॒ते॒ ॥४

अति । ऊं इति । पवित्रम् । अक्रमीत् । वाजी । धुरम् । न । यामनि ।

इन्दुः । देवेषु । पत्यते ॥४

“इन्दुः सोमः “वाजी अश्वः “यामनि गमने “धुरं “न रथस्य धुरं यथा तथा “पवित्रम् “अति “अक्रमीत् अतिगच्छति । “देवेषु देवानां मध्ये “पत्यते गच्छति च ॥

समी॒ सखा॑यो अस्वर॒न्वने॒ क्रीळं॑त॒मत्य॑विं ।

इंदुं॑ ना॒वा अ॑नूषत ॥५

सम् । ई॒मिति॑ । सखा॑यः । अ॒स्व॒र॒न् । वने॑ । क्रीळ॑न्तम् । अति॑ऽअविम् ।

इन्दु॑म् । ना॒वाः । अ॒नू॒ष॒त॒ ॥५

सम् । ईमिति । सखायः । अस्वरन् । वने । क्रीळन्तम् । अतिऽअविम् ।

इन्दुम् । नावाः । अनूषत ॥५

“अत्यविम् अतिक्रान्तं दशापवित्रं “वने उदके “क्रीडन्तं संक्रीडमानम् “ईम् एनम् “इन्दुं सोमं “सखायः प्रियस्तोतारः “सम् “अस्वरन् संस्तुवन्ति । "नावाः वाचोऽपि “अनूषत अस्तुवन् । ‘ नौरक्षरम्' इति वाङ्नामसु पाठात् ॥

तया॑ पवस्व॒ धार॑या॒ यया॑ पी॒तो वि॒चक्ष॑से ।

इंदो॑ स्तो॒त्रे सु॒वीर्यँ॑ ॥६

तया॑ । प॒व॒स्व॒ । धार॑या । यया॑ । पी॒तः । वि॒ऽचक्ष॑से ।

इन्दो॒ इति॑ । स्तो॒त्रे । सु॒ऽवीर्य॑म् ॥६

तया । पवस्व । धारया । यया । पीतः । विऽचक्षसे ।

इन्दो इति । स्तोत्रे । सुऽवीर्यम् ॥६

हे “इन्दो त्वं “यया “धारया “पीतः सन् “विचक्षसे विचक्षणाय “स्तोत्रे स्तोत्राणां कर्त्रे पुरुषाय “सुवीर्यं शोभनवीर्यं प्रयच्छसीति शेषः। “तया धारया “पवस्व क्षर ॥ ॥ २ ॥

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.४६

ऋग्वेदः - मण्डल ९
← सूक्तं ९.४५ सूक्तं ९.४६ सूक्तं ९.४७ →
अयास्य आङ्गिरसः।

दे. पवमानः सोमः। गायत्री।

असृग्रन्देववीतयेऽत्यासः कृत्व्या इव ।

क्षरन्तः पर्वतावृधः ॥१॥

परिष्कृतास इन्दवो योषेव पित्र्यावती ।

वायुं सोमा असृक्षत ॥२॥

एते सोमास इन्दवः प्रयस्वन्तश्चमू सुताः ।

इन्द्रं वर्धन्ति कर्मभिः ॥३॥



शुक्रामन्थीग्रहप्रचारः

आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना ।

गोभिः श्रीणीत मत्सरम् ॥४॥

स पवस्व धनंजय प्रयन्ता राधसो महः ।

अस्मभ्यं सोम गातुवित् ॥५॥

एतं मृजन्ति मर्ज्यं पवमानं दश क्षिपः ।

इन्द्राय मत्सरं मदम् ॥६॥

सायणभाष्यम्

' असृग्रन्' इति षड़् चं द्वाविंशं सूक्तम्। ऋष्याद्याः पूर्ववत् । " असृग्रन्' इत्यनुक्रान्तम् । गतो विनियोगः ॥

असृ॑ग्रन्दे॒ववी॑त॒येऽत्या॑सः॒ कृत्व्या॑ इव ।

क्षर॑तः पर्वता॒वृधः॑ ॥१

असृ॑ग्रन् । दे॒वऽवी॑तये । अत्या॑सः । कृत्व्याः॑ऽइव ।

क्षर॑न्तः । प॒र्व॒त॒ऽवृधः॑ ॥१

असृग्रन् । देवऽवीतये । अत्यासः । कृत्व्याःऽइव ।

क्षरन्तः । पर्वतऽवृधः ॥१

"पर्वतावृधः पर्वतैरभिषवग्रावभिर्वृद्धाः पर्वतेषु जाता वा “क्षरन्तः सोमाः “देववीतये यज्ञाथ “अत्यासः अश्वाः “कृत्व्याइव यथा कर्मण्या अश्वाः तद्वत् "असृग्रन् सृज्यन्ते ।।

परिंष्कृतास॒ इंदंवो॒ योषेंव॒ पित्र्यांवती ।

वा॒युं सोमा॑ असृक्षत ॥२

परिंऽकृतासः । इन्दंवः । योषांऽइव । पित्र्यंऽवती ।

वा॒युम् । सोमाः॑ । अ॒सृ॒क्ष॒त॒ ॥२

परिऽकृतासः । इन्दवः । योषाऽइव । पित्र्यऽवती ।

वायुम् । सोमाः । असृक्षत ॥२

“इन्दवः यागेषु क्लिद्यमानाः “सोमाः "परिष्कृतासः परिष्कृता अलंकृताः सन्तः “पित्र्यावती पितृमती “योषेव अलंकृता कन्यका यथा वरं प्रति गच्छति तद्वत् “वायुं प्रति “असृक्षत गच्छन्ति ॥

ए॒ते सोमां॑स॒ इन्दंव॒ः प्रयंस्वन्तश्च॒मू सु॒ताः ।

इन्द्रं॑ वर्धंति॒ कर्मंभिः ॥३

ए॒ते । सोमांसः । इन्दंवः । प्रयंस्वन्तः । च॒मू इतिं । सु॒ताः ।

इन्द्रंम् । व॒र्ध॒न्ति॒ । कर्मंऽभिः ॥३

एते । सोमासः । इन्दवः । प्रयस्वन्तः । चमू इति । सुताः ।

इन्द्रम् । वर्धन्ति । कर्मऽभिः ॥३

“इन्दवः दीप्ताः “प्रयस्वन्तः अन्नवन्तः “एते अस्मिन् कर्मणि वर्तमाना अमी “सोमासः सोमाः “चमू चम्वोरधिषवणफलकयोः “सुताः अभिषुताः सन्तः “कर्मभिः यागैः “इन्द्रं “वर्धयन्ति प्रीणयन्तीत्यर्थः ॥

आ धांवता सुहस्त्यः शु॒क्रा गृंभ्णीत म॒न्थिना॑ ।

गोभिः॑ श्रीणीत मत्स॒रं ॥४

आ । धा॒व॒त॒ । सु॒ऽह॒स्त्य॒ः । शु॒क्रा । गृ॒भ्णी॒त॒ । म॒न्थिना॑ ।

गोभिः॑ । श्री॒णी॒त॒ । म॒त्स॒रम् ॥४

आ । धावत । सुऽहस्त्यः । शुक्रा । गृभ्णीत । मन्थिना ।

गोभिः । श्रीणीत । मत्सरम् ॥४

हे “सुहस्त्यः शोभनहस्ता ऋत्विजः “आ “धावत । मां संप्रति आगच्छत । “मन्थिना सह “शुक्रा शुक्रं च “गृभ्णीत गृह्णीत सोमम् । “मत्सरं सोमं “गोभिः गोविकारैः पयोभिः “श्रीणीत संस्कुरुत च ॥

स प॑वस्व धनंजय प्रयु॒न्ता राध॑सो म॒हः ।

अ॒स्मभ्यं॑ सोम गातु॒वित् ॥५

सः । प॒व॒स्व॒ । ध॒न॒म्ऽज॒य॒ । प्र॒ऽय॒न्ता । राध॑सः । म॒हः ।

अ॒स्मभ्य॑म् । सो॒म॒ । गा॒तु॒ऽवित् ॥५

सः । पवस्व । धनम्ऽजय । प्रऽयन्ता । राधसः । महः ।

अस्मभ्यम् । सोम । गातुऽवित् ॥५

हे “धनंजय शत्रुसंबन्धिनां जनानां जेतः “सोम “गातुवित् अभीष्टमार्गस्य लम्भकः “अस्मभ्यं “महः महतः “राधसः धनस्य “प्रयन्ता प्रदाता च यः “सः त्वं “पवस्व क्षर ॥

ए॒तं मृ॑जन्ति॒ मर्ज्यं॒ पव॑मानं॒ दश॒ क्षिपः॑ ।

इन्द्रा॑य मत्स॒रं मदं॑ ॥६

ए॒तम् । मृ॒ज॒न्ति॒ । मर्ज्य॑म् । पव॑मानम् । दश॑ । क्षिपः॑ ।

इन्द्रा॑य । म॒त्स॒रम् । मद॑म् ॥६

एतम् । मृजन्ति । मर्ज्यम् । पवमानम् । दश । क्षिपः ।

इन्द्राय । मत्सरम् । मदम् ॥६

“मर्ज्यं मर्जनीयं शोध्यं “पवमानं क्षरन्तं “मत्सरं मदकरम् “एतम् इमं “मदं सोमं दशसंख्याकाः “क्षिपः अङ्गुलयः । ' व्रिशः क्षिपः' इत्यङ्गुलिनामसु पाठात् । इन्द्रार्थं “मृजन्ति पवित्रे शोधयन्ति ॥ ॥ ३ ॥

टिप्पणी

९.४६.४ आ धावत सुहस्त्यः इति

शुक्रोपरि टिप्पणी (http://vipin110012.tripod.com/pur_index28/shukra.htm)

मन्थनोपरि संदर्भाः (https://puranastudy.wordpress.com/%e0%a4%ae%e0%a4%a8%e0%a5%8d%e0%a4%a5%e0%a4%a8-manthana/)

मण्डल ९

ऋग्वेदः सूक्तं ९.४७

ऋग्वेदः - मण्डल ९

← सूक्तं ९.४६ | सूक्तं ९.४७ | सूक्तं ९.४८ →

कविर्भार्गवः

दे. पवमानः सोमः। गायत्री।

अया सोमः सुकृत्यया महश्चिदभ्यवर्धत ।

मन्दान उद्वृषायते ॥१॥

कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा ।

ऋणा च धृष्णुश्चयते ॥२॥

आत्सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत् ।

उक्थं यदस्य जायते ॥३॥

स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति ।

यदी मर्मृज्यते धियः ॥४॥

सिषासतू रयीणां वाजेष्वर्वतामिव ।

भरेषु जिग्युषामसि ॥५॥

सायणभाष्यम्

‘अया सोमः' इति पञ्चर्चं त्रयोविंशं सूक्तं भृगुपुत्रस्य कवेरार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तम् -- ‘अया सोमः पञ्च कविर्भार्गवः' इति । उक्तो विनियोगः ॥

अ॒या सोमः॑ सुकृ॒त्यया॑ म॒हश्चि॑द॒भ्य॑वर्धत ।

मं॒दा॒न उद्वृ॑षायते ॥१

अ॒या । सोमः॑ । सु॒ऽकृ॒त्यया॑ । म॒हः । चि॒त् । अ॒भि । अ॒व॒र्ध॒त॒ ।

म॒न्दा॒नः । उत् । वृ॒ष॒ऽय॒ते॒ ॥१

अया । सोमः । सुऽकृत्यया । महः । चित् । अभि । अवर्धत ।

मन्दानः । उत् । वृषऽयते ॥१

“सोमः "अया अनया “सुकृत्यया शोभनयाभिषवादिलक्षणया क्रियया “महश्चित् महतो देवान् प्रति अभ्यवर्धत प्रवृद्धोऽभूत् । “मन्दानः मोदमानः “उद्वृषायते वृषवदाचरति । यथा मोदमानो वृषभः शब्दं करोति तथाभिषववेलायामुपरवेषु शब्दं करोतीत्यर्थः ॥

कृ॒तानीद॑स्य॒ कर्त्वा॒ चेत॑ंते दस्यु॒तर्ह॑णा ।

ऋ॒णा च॑ धृ॒ष्णुश्च॑यते ॥२

कृ॒तानि॑ । इत् । अ॒स्य॒ । कर्त्वा॑ । चेत॑न्ते । द॒स्यु॒ऽतर्ह॑णा ।

ऋ॒णा । च॒ । धृ॒ष्णुः । च॒य॒ते॒ ॥२

कृतानि । इत् । अस्य । कर्त्वा । चेतन्ते । दस्युऽतर्हणा ।

ऋणा । च । धृष्णुः । चयते ॥२

“अस्य यस्य एतस्य सोमस्य “दस्युतर्हणा दस्यूनामसुराणां नाशकानि “कर्त्वा कर्माणि सः “इत् अस्माभिरेव सोऽयं “धृष्णुः धृष्टः सोमो यजमानानाम् "ऋणा “च ऋणान्यपि “चयते कामप्रदानेन चातयति ॥

आत्सोम॑ इं॒द्रि॒यो रसो॒ वज्रः॑ सहस्र॒सा भु॑वत् ।

उ॒क्थं यद॑स्य॒ जाय॑ते ॥३

आत् । सोमः॑ । इ॒न्द्रि॒यः । रसः॑ । वज्रः॑ । स॒ह॒स्र॒ऽसाः । भु॒व॒त् ।

उ॒क्थम् । यत् । अ॒स्य॒ । जाय॑ते ॥३

आत् । सोमः । इन्द्रियः । रसः । वज्रः । सहस्रऽसाः । भुवत् ।

उक्थम् । यत् । अस्य । जायते ॥३

“यत् यदा “अस्य इन्द्रस्य “उक्थं शस्त्रं “जायते प्रादुर्भवति तत् "आत् अनन्तरमेव “इन्द्रियः इन्द्रस्य प्रियकरः रसः बलवान् “वज्रः वज्रसदृशः केनाप्यहिंस्यः “सोमः “सहस्रसाः अस्मभ्यमपरिमितस्य धनस्य दाता भवति ॥

स्व॒यं क॒विर्वि॑ध॒र्तरि॒ विप्रा॑य॒ रत्न॑मिच्छति ।

यदीं॑ मर्मृ॒ज्यते॒ धियः॑ ॥४

स्व॒यम् । क॒विः । वि॒ऽध॒र्तरिं॑ । विप्रा॑य । रत्न॑म् । इ॒च्छ॒ति॒ ।

यदिं॑ । म॒र्मृ॒ज्यते॑ । धियः॑ ॥४

स्वयम् । कविः । विऽधर्तरि । विप्राय । रत्नम् । इच्छति ।

यदि । मर्मृज्यते । धियः ॥४

“यदि “कविः क्रान्तकर्मा अयं सोमः “धियः धीभिः। विभक्तिव्यत्ययः। धीतिभिः । अङ्गुलीभिरित्यर्थः । "मर्मृज्यते शोध्यते तर्हि “स्वयं स्वयमेव “विप्राय मेधाविने “विधर्तरि कामानां विधातरीन्द्रे “रत्नं रमणीयं धनम् “इच्छति । इन्द्रेण धनं दापयितुमिच्छतीत्यर्थः ॥

सि॒षा॒सतू॑ रयी॒णां वाजे॒ष्वर्व॑तामिव ।

भरे॑षु जि॒ग्युषा॑मसि ॥५

सि॒सा॒सतुः॑ । र॒यी॒णाम् । वाजे॑षु । अर्व॑ताम्ऽइव ।

भरे॑षु । जि॒ग्युषा॑म् । अ॒सि॒ ॥५

सिसासतुः । रयीणाम् । वाजेषु । अर्वताम्ऽइव ।

भरेषु । जिग्युषाम् । असि ॥५

हे सोम त्वं “भरेषु संग्रामेषु “जिग्युषां शत्रून् जयतां “रयीणां धनानां “सिषासतुः संभक्तुमिच्छुः “असि भवसि । शत्रून् जयद्योत् धनानि प्रयच्छसीत्यर्थः । तत्र दृष्टान्तः। “वाजेषु संग्रामेषु “अर्वतामिव अश्वानामिव । यथा संग्रामं प्रविशद्भ्योऽश्वेभ्यो घासं प्रयच्छन्ति तद्वदित्यर्थः॥ ॥ ४ ॥

टिप्पणी

९.४७.१ अया सोम सुकृत्यया इति

अयासोमीयम् (https://sa.wikisource.org/s/2mp9) (ग्रामगेयः)

मण्डल ९

ऋग्वेदः सूक्तं ९.४८

दे. पवमानः सोमः। गायत्री।

तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः ।

चारुं सुकृत्ययेमहे ॥१॥

संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् ।

शतं पुरो रुरुक्षणिम् ॥२॥

अतस्त्वा रयिमभि राजानं सुक्रतो दिवः ।

सुपर्णो अव्यथिर्भरत् ॥३॥

विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरम् ।

गोपामृतस्य विर्भरत् ॥४॥

अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे ।

अभिष्टिकृद्विचर्षणिः ॥५॥

सायणभाष्यम्

‘ तं त्वा' इति पञ्चर्चं चतुर्विंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘तं त्वा' इत्यनुक्रान्तम् । गतो विनियोगः ॥

तं त्वा॑ नृ॒म्णानि॒ बिभ्र॑तं स॒धस्थे॑षु म॒हो दि॒वः ।

चारुं॑ सुकृ॒त्यये॑महे ॥१

तम् । त्वा॒ । नृ॒म्णानि॑ । विभ्र॑तम् । स॒धऽस्थे॑षु । म॒हः । दि॒वः ।

चारु॑म् । सु॒ऽकृ॒त्यया॑ । ई॒म॒हे॒ ॥१

तम् । त्वा । नृम्णानि । विभ्रतम् । सधऽस्थेषु । महः । दिवः ।

चारुम् । सुऽकृत्यया । ईमहे ॥१

"महः “दिवः महतो द्युलोकस्य “सधस्थेषु सहस्थानेषु स्थितं “नृम्णानि धनानि “बिभ्रतम् अस्मदर्थं धारयन्तं “चारुं कल्याणं “तं पवमानं “त्वा त्वां “सुकृत्यया शोभनया क्रियया “ईमहे धनानि याचामहे ॥

संवृ॑क्तधृष्णुमु॒क्थ्यं॑ म॒हाम॑हिव्रत॒ं मदं॑ ।

श॒तं पुरो॑ रुरु॒क्षणिं॑ ॥२

संवृ॑क्तऽधृष्णुम् । उ॒क्थ्य॑म् । म॒हाऽम॑हिव्रतम् । मद॑म् ।

श॒तम् । पुरः॑ । रु॒रु॒क्षणि॑म् ॥२

संवृक्तऽधृष्णुम् । उक्थ्यम् । महाऽमहिव्रतम् । मदम् ।

शतम् । पुरः । रुरुक्षणिम् ॥२

हे सोम “संवृक्तधृष्णुम् । संवृक्ताः संछिन्ना धृष्णवो धर्षणशीलाः शत्रवो येनासौ संवृक्तधृष्णुः। तम् “उक्थ्यम् उक्थार्हं प्रशस्यं महामहिव्रतं महनीयबहुकर्माणं “मदं मदकरं “शतं बहूनि “पुरः शत्रूणां पुराणि “रुरुक्षणिं विनाशयन्तं त्वां धनानीमह इति संबन्धः ॥

अत॑स्त्वा र॒यिम॒भि राजा॑नं सुक्रतो दि॒वः ।

सु॒प॒र्णो अ॑व्य॒थिर्भ॑रत् ॥३

अतः॑ । त्वा॒ । र॒यिम् । अ॒भि । राजा॑नम् । सु॒क्र॒तो॒ इति॑ सुऽक्रतो । दि॒वः ।

सु॒ऽप॒र्णः । अ॒व्य॒थिः । भ॒र॒त् ॥३

अतः । त्वा । रयिम् । अभि । राजानम् । सुक्रतो इति सुऽक्रतो । दिवः ।

सुऽपर्णः । अव्यथिः । भरत् ॥३

हे सोम “रयिमभि धनं प्रति “राजानं “त्वा त्वाम् “अतः “दिवः अमुष्मात् द्युलोकात् “सुक्रतुः सुप्रज्ञः “अव्यथिः व्यथारहितः “सुपर्णः श्येनः “भरत् आहरत् । तथा च निगमान्तरम्-- ‘ आदाय श्येनो अभरत्सोमं सहस्रं सवाँ' (ऋ. सं. ४.२६.७) इति ॥

विश्व॑स्मा॒ इत्स्व॑र्दृ॒शे साधा॑रणं रज॒स्तुर॑॑म् ।

गो॒पामृ॒तस्य॒ विर्भ॑रत् ॥४

विश्व॑स्मै । इत् । स्वः॑ । दृ॒शे । साधा॑रणम् । र॒ज॒ःऽतुर॑म् ।

गो॒पाम् । ऋ॒तस्य॑ । विः । भ॒र॒त् ॥४

विश्वस्मै । इत् । स्वः । दृशे । साधारणम् । रजःऽतुरम् ।

गोपाम् । ऋतस्य । विः । भरत् ॥४

“रजस्तुरम् उदकस्य प्रेरकम् "ऋतस्य यज्ञस्य “गोपां गोपायितारं "विश्वस्मै सर्वस्मै “स्वदृशे सर्वदृशे देवाय “साधारणम् “इत् समानमेव सन्तं सोमं “विः पक्षी श्येनः “भरत् स्वर्गादाहरत् ॥

अधा॑ हिन्वा॒न इ॑न्द्रि॒यं ज्यायो॑ महि॒त्वमा॑नशे ।

अ॒भि॒ष्टि॒कृद्वि॑च॑र्षणिः ॥५

अध॑ । हि॒न्वा॒नः । इ॒न्द्रि॒यम् । ज्यायः॑ । म॒हि॒ऽत्वम् । आ॒न॒शे॒ ।

अ॒भि॒ष्टि॒ऽकृत् । विऽच॑र्षणिः ॥५

अध । हिन्वानः । इन्द्रियम् । ज्यायः । महिऽत्वम् । आनशे ।

अभिष्टिऽकृत् । विऽचर्षणिः ॥५

“अध अथ “विचर्षणिः कर्मणां विद्रष्टा “अभिष्टिकृत् यजमानानामभीष्टस्य फलस्य कर्ता सोमः “इन्द्रियं स्वकीयं बलं “हिन्वानः प्रेरयन् “ज्यायः प्रशस्यतरं “महित्वं महत्त्वम् “आनशे प्राप्नोति ॥ ॥ ५ ॥

मण्डल ९

सूक्तं ९.१	सूक्तं ९.३१	सूक्तं ९.६१	सूक्तं ९.९१
सूक्तं ९.२	सूक्तं ९.३२	सूक्तं ९.६२	सूक्तं ९.९२
सूक्तं ९.३	सूक्तं ९.३३	सूक्तं ९.६३	सूक्तं ९.९३
सूक्तं ९.४	सूक्तं ९.३४	सूक्तं ९.६४	सूक्तं ९.९४
सूक्तं ९.५	सूक्तं ९.३५	सूक्तं ९.६५	सूक्तं ९.९५
सूक्तं ९.६	सूक्तं ९.३६	सूक्तं ९.६६	सूक्तं ९.९६
सूक्तं ९.७	सूक्तं ९.३७	सूक्तं ९.६७	सूक्तं ९.९७
सूक्तं ९.८	सूक्तं ९.३८	सूक्तं ९.६८	सूक्तं ९.९८
सूक्तं ९.९	सूक्तं ९.३९	सूक्तं ९.६९	सूक्तं ९.९९
सूक्तं ९.१०	सूक्तं ९.४०	सूक्तं ९.७०	सूक्तं ९.१००
सूक्तं ९.११	सूक्तं ९.४१	सूक्तं ९.७१	सूक्तं ९.१०१
सूक्तं ९.१२	सूक्तं ९.४२	सूक्तं ९.७२	सूक्तं ९.१०२
सूक्तं ९.१३	सूक्तं ९.४३	सूक्तं ९.७३	सूक्तं ९.१०३
सूक्तं ९.१४	सूक्तं ९.४४	सूक्तं ९.७४	सूक्तं ९.१०४
सूक्तं ९.१५	सूक्तं ९.४५	सूक्तं ९.७५	सूक्तं ९.१०५
सूक्तं ९.१६	सूक्तं ९.४६	सूक्तं ९.७६	सूक्तं ९.१०६
सूक्तं ९.१७	सूक्तं ९.४७	सूक्तं ९.७७	सूक्तं ९.१०७
सूक्तं ९.१८	सूक्तं ९.४८	सूक्तं ९.७८	सूक्तं ९.१०८
सूक्तं ९.१९	सूक्तं ९.४९	सूक्तं ९.७९	सूक्तं ९.१०९
सूक्तं ९.२०	सूक्तं ९.५०	सूक्तं ९.८०	सूक्तं ९.११०
सूक्तं ९.२१	सूक्तं ९.५१	सूक्तं ९.८१	सूक्तं ९.१११
सूक्तं ९.२२	सूक्तं ९.५२	सूक्तं ९.८२	सूक्तं ९.११२
सूक्तं ९.२३	सूक्तं ९.५३	सूक्तं ९.८३	सूक्तं ९.११३
सूक्तं ९.२४	सूक्तं ९.५४	सूक्तं ९.८४	सूक्तं ९.११४

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.४९

ऋग्वेदः - मण्डल ९
← सूक्तं ९.४८ सूक्तं ९.४९ सूक्तं ९.५० →
कविर्भार्गवः।

दे. पवमानः सोमः। गायत्री।

पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि ।

अयक्ष्मा बृहतीरिषः ॥१॥

तया पवस्व धारया यया गाव इहागमन् ।

जन्यास उप नो गृहम् ॥२॥

घृतं पवस्व धारया यज्ञेषु देववीतमः ।

अस्मभ्यं वृष्टिमा पव ॥३॥

स न ऊर्जे व्यव्ययं पवित्रं धाव धारया ।

देवासः शृणवन्हि कम् ॥४॥

पवमानो असिष्यदद्रक्षांस्यपजङ्घनत् ।

प्रत्नवद्रोचयन्रुचः ॥५॥

सायणभाष्यम्

‘पवस्व' इति पञ्चर्चं पञ्चविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । “ पवस्व' इत्यनुक्रान्तम् । गतो विनियोगः ॥

पव॑स्व वृ॒ष्टिमा सु नो॒ऽपामू॒र्मिं दि॒वस्परि॑ ।

अ॒य॒क्ष्मा बृ॑ह॒तीरिषः॑ ॥१

पव॑स्व । वृ॒ष्टिम् । आ । सु । नः॒ । अ॒पाम् । ऊ॒र्मिम् । दि॒वः । परि॑ ।

अ॒य॒क्ष्माः । बृ॒ह॒तीः । इषः॑ ॥१

पवस्व । वृष्टिम् । आ । सु । नः । अपाम् । ऊर्मिम् । दिवः । परि ।

अयक्ष्माः । बृहतीः । इषः ॥१

हे सोम त्वं “दिवः द्युलोकात् "वृष्टिं “नः अस्माकम् “आ “पवस्व समन्तात् क्षर । एतदेव दर्शयति । “अपाम् उदकानाम् “ऊर्मिं तरङ्गं दिवः “परि आ पवस्व । अपि च "अयक्ष्माः यक्ष्मरहितानि अनामयानि “बृहतीः महान्ति “इषः अन्नानि आ पवस्व ॥

तया॑ पवस्व॒ धार॑या॒ यया॒ गाव॑ इ॒हागम॑न् ।

जन्या॑स॒ उप॑ नो गृ॒हं ॥२

तया॑ । प॒व॒स्व॒ । धार॑या । यया॑ । गावः॑ । इ॒ह । आ॒ऽगम॑न् ।

जन्या॑सः । उप॑ । नः॒ । गृ॒हम् ॥२

तया । पवस्व । धारया । यया । गावः । इह । आऽगमन् ।

जन्यासः । उप । नः । गृहम् ॥२

हे सोम त्वं “तया तादृश्या “धारया “पवस्व क्षर। कीदृश्येत्यत्राह। “यया यादृश्या त्वदीयया धारया “जन्यासः जन्याः शत्रुजनपदभवाः “गावः “इह अस्मिँल्लोके "नः अस्माकं संबन्धि “गृहम् “उप “आगमन् उपागच्छन्ति ॥

घृ॒तं प॑वस्व॒ धार॑या य॒ज्ञेषु॑ देव॒वीत॑मः ।

अ॒स्मभ्यं॑ वृ॒ष्टिमा प॑व ॥३

घृ॒तम् । प॒व॒स्व॒ । धार॑या । य॒ज्ञेषु॑ । दे॒व॒ऽवीत॑मः ।

अ॒स्मभ्य॑म् । वृ॒ष्टिम् । आ । प॒व॒ ॥३

घृतम् । पवस्व । धारया । यज्ञेषु । देवऽवीतमः ।

अस्मभ्यम् । वृष्टिम् । आ । पव ॥३

हे सोम "यज्ञेषु "देववीतमः अत्यन्तं देवकामस्त्वम् "अस्मभ्यं भार्गवेभ्यः कविभ्यः "घृतम् उदकम् । वनं घृतम्' इत्युदकनामसु पाठात् । "धारया संपातेन "पवस्व क्षर। "वृष्टिं वर्षं च "आ "पव पवस्व ॥

स न॑ ऊ॒र्जे व्य१॒॑व्यय॑ प॒वित्रं॑ धाव॒ धार॑या ।

दे॒वासः॑ शृ॒णव॒न्हि क॑ ॥४

सः । न॒ः । ऊ॒र्जे । वि । अ॒व्यय॑म् । प॒वित्र॑म् । धा॒व॒ । धार॑या ।

दे॒वासः॑ । शृ॒णव॑न् । हि । क॒म् ॥४

सः । नः । ऊर्जे । वि । अव्ययम् । पवित्रम् । धाव । धारया ।

देवासः । शृणवन् । हि । कम् ॥४

हे सोम सुतः अभिषुतस्त्वं "नः अस्माकम् "ऊर्जे अन्नाय "अव्ययम् अविमयं "पवित्रं "धारया संपातेन "वि "धाव प्राप्नुहि। "देवासः देवा अपि "हि "कं "शृणवन् गमनवेलायामुत्पन्नं तव शब्द शृण्वन्तु ॥

पव॑मानो असिष्यद॒द्रक्षां॑स्यप॒जंघ॑नत् ।

प्र॒त्न॒वद्रो॒चय॒न्रुचः॑ ॥५

पव॑मानः । अ॒सि॒स्य॒द॒त् । रक्षां॑सि । अ॒प॒ऽजङ्घ॑नत् ।

प्र॒त्न॒ऽवत् । रो॒चय॑न् । रुचः॑ ॥५

पवमानः । असिस्यदत् । रक्षांसि । अपऽजङ्घनत् ।

प्रत्नऽवत् । रोचयन् । रुचः ॥५

"रक्षांसि राक्षसान् अपजङ्घनत् अपघ्नन् "रुचः आत्मीया दीप्तीः "प्रत्नवत् पुराणवत् "रोचयन् दीपयन् "पवमानः सोमः "असिष्यदत् स्यन्दते ॥ ॥ ६ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.५०

ऋग्वेदः - मण्डल ९
← सूक्तं ९.४९ | सूक्तं ९.५० | सूक्तं ९.५१ →
उचथ्य आङ्गिरसः

दे. पवमानः सोमः। गायत्री

उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः ।

वाणस्य चोदया पविम् ॥१॥

प्रसवे त उदीरते तिस्रो वाचो मखस्युवः ।

यदव्य एषि सानवि ॥२॥

अव्यो वारे परि प्रियं हरिं हिन्वन्त्यद्रिभिः ।

पवमानं मधुश्चुतम् ॥३॥

आ पवस्व मदिन्तम पवित्रं धारया कवे ।

अर्कस्य योनिमासदम् ॥४॥

स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः ।

इन्दविन्द्राय पीतये ॥५॥

सायणभाष्यम्

‘उत्ते' इति पञ्चर्चं षड्विंशं सूक्तमाङ्गिरसस्योचथ्यस्यार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तम्---’ उत्ते शुष्मास उचथ्यः' इति । उक्तो विनियोगः ॥

उत्ते॒ शुष्मा॑स ईरते॒ सिंधो॑रू॒र्मेरि॑व स्व॒नः ।

वा॒णस्य॑ चोदया प॒विं ॥१

उत् । ते॒ । शुष्मा॑सः । ई॒र॒ते॒ । सिन्धोः॑ । ऊ॒र्मेःऽइ॑व । स्व॒नः ।

वा॒णस्य॑ । चो॒द॒य॒ । प॒विम् ॥१

उत् । ते । शुष्मासः । ईरते । सिन्धोः । ऊर्मेःऽइव । स्वनः ।

वाणस्य । चोदय । पविम् ॥१

हे सोम “ते तव “शुष्मासः शुष्मा वेगाः “उत् “ईरते उद्गच्छन्ति । तत्र दृष्टान्तः । “सिन्धोः समुद्रस्य “ऊर्मेरिव यथा तरङ्गात् “स्वनः ध्वनिरुद्गच्छति तद्वदित्यर्थः । सः त्वं “वाणस्य विसृष्टस्य बाणस्य नालस्य वा वादित्रविशेषस्य “पविं शब्दम् । “पविः भारती ' इति वाङ्नामसु पाठात् । “चोदय प्रेरय । वेगेन स्यन्दमानस्त्वं विसृष्टबाणशब्दसदृशं शब्दं कुर्वित्यर्थः ॥

प्र॒स॒वे त॒ उदी॑रते ति॒स्रो वाचो॑ मख॒स्युवः॑ ।

यदव्य॒ एषि॒ सान॑वि ॥२

प्र॒ऽस॒वे । ते॒ । उत् । ई॒र॒ते॒ । ति॒स्रः । वाचः॑ । म॒ख॒स्युवः॑ ।

यत् । अव्ये॑ । एषि॑ । सान॑वि ॥२

प्रऽसवे । ते । उत् । ईरते । तिस्रः । वाचः । मखस्युवः ।

यत् । अव्ये । एषि । सानवि ॥२

हे सोम “ते तव “प्रसवे सति “मखस्युवः यज्ञमिच्छतो यजमानस्य “तिस्रो “वाचः ऋग्यजुःसामात्मकानि त्रीणि वाक्यानि “उदीरते उद्गच्छन्ति । कदेत्यत आह । “यत् यदा “सानवि व्युच्छ्रिते “अव्ये अविभये पवित्रे “एषि त्वं गच्छसि ।

अव्यो॒ वारे॒ परि॑ प्रि॒यं हरिं॑ हिन्वं॒त्यद्रि॑भिः ।

पव॑मानं मधु॒श्चुतं॑ ॥३

अव्यः । वारे॑ । परि॑ । प्रि॒यम् । हरि॑म् । हि॒न्व॒न्ति॒ । अद्रि॑ऽभिः ।

पव॑मानम् । म॒धु॒ऽश्चुत॑म् ॥३

अव्यः । वारे । परि । प्रियम् । हरिम् । हिन्वन्ति । अद्रिऽभिः ।

पवमानम् । मधुऽश्चुतम् ॥३

"प्रियं देवानां प्रीतिकरं “हरिं हरितवर्णम् “अद्रिभिः ग्रावभिरभिषुतं “मधुश्चुतं मधुनो रसस्य च्यावयितारं “पवमानं सोमम् “अव्यः अवेः “वारे वाले “परि “हिन्वन्ति ऋत्विजः परिप्रेरयन्ति ।

आ प॑वस्व मदि॑ंतम प॒वित्रं॒ धार॑या कवे ।

अ॒र्कस्य॒ योनि॑मा॒सद॑ं ॥४

आ । प॒व॒स्व॒ । म॒दि॒न्ऽत॒म॒ । प॒वित्र॑म् । धार॑या । क॒वे॒ ।

अ॒र्कस्य॑ । योनि॑म् । आ॒ऽसद॑म् ॥४

आ । पवस्व । मदिन्ऽतम । पवित्रम् । धारया । कवे ।

अर्कस्य । योनिम् । आऽसदम् ॥४

हे "मदिन्तम मादयितृतम “कवे क्रान्तकर्मन् सोम “अर्कस्य अर्चनीयस्येन्द्रस्य “योनिं स्थानम् “आसदं प्राप्तुं "पवित्रम् अतीत्य “धारया संपातेन “आ “पवस्व आभिमुख्येन क्षर । यद्यप्येषा पूर्वस्मिन्नध्याये (ऋ. सं. ९.२५.६) व्याकृता तथापि मन्दमतीनां विस्मरणशङ्कया पुनर्व्याख्याता ॥

स प॑वस्व मदि॑ंतम॒ गोभि॑रंजा॒नो अ॒क्तुभि॑ः ।

इंदु॒विंद्रा॑य पी॒तये॑ ॥५

सः । प॒व॒स्व॒ । म॒दि॒न्ऽत॒म॒ । गोभि॑ः । अ॒ञ्जा॒नः । अ॒क्तुऽभि॑ः ।

इन्दो॒ इति॑ । इन्द्रा॑य । पी॒तये॑ ॥५

सः । पवस्व । मदिन्ऽतम । गोभिः । अञ्जानः । अक्तुऽभिः ।

इन्दो इति । इन्द्राय । पीतये ॥५

हे "मदिन्तम मादयितृतम “इन्दो सोम “अक्तुभिः अञ्जनसाधनभूतैः “गोभिः गोविकारैः पयोभिः “अञ्जानः अज्यमानः संस्क्रियमाणः “सः त्वम् “इन्द्राय इन्द्रस्य “पीतये पानाय “पवस्व

मण्डल ९

ऋग्वेदः सूक्तं ९.५१

दे. पवमानः सोमः। गायत्री

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज ।

पुनीहीन्द्राय पातवे ॥१॥

दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे ।

सुनोता मधुमत्तमम् ॥२॥

तव त्य इन्दो अन्धसो देवा मधोर्व्यश्नते ।

पवमानस्य मरुतः ॥३॥

त्वं हि सोम वर्धयन्सुतो मदाय भूर्णये ।

वृषन्स्तोतारमूतये ॥४॥

अभ्यर्ष विचक्षण पवित्रं धारया सुतः ।

अभि वाजमुत श्रवः ॥५॥

सायणभाष्यम्

‘अध्वर्यो ' इति पञ्चर्चं सप्तविंशं सूक्तमाङ्गिरसस्योचथ्यस्यार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रम्यते-' अध्वर्यो ' इति । गतः सूक्तविनियोगः ॥

अध्व॑र्यो॒ अद्रि॑भिः सु॒तं सोमं॑ प॒वित्र॒ आ सृ॑ज ।

पु॒नी॒हीन्द्रा॑य॒ पात॑वे ॥

अध्व॑र्यो॒ इति॑ । अद्रि॑ऽभिः । सु॒तम् । सोम॑म् । प॒वित्रे॑ । आ । सृ॒ज॒ ।

पु॒नी॒हि । इन्द्रा॑य । पात॑वे ॥१

अध्वर्यो इति । अद्रिऽभिः । सुतम् । सोमम् । पवित्रे । आ । सृज ।

पुनीहि । इन्द्राय । पातवे ॥१

हे “अध्वर्यो “अद्रिभिः ग्रावभिः “सुतम् अभिषुतं “सोमं “पवित्र “आ “सृज । एतदेव दर्शयति । “इन्द्राय इन्द्रस्य “पातवे पानाय “पुनीहि पावय ॥

दि॒वः पी॒यूष॑मुत्त॒मं सोम॒मिन्द्रा॑य व॒ज्रिणे॑ ।

सु॒नोता॒ मधु॑मत्तमम् ॥

दि॒वः । पी॒यूष॑म् । उ॒त्ऽत॒मम् । सोम॑म् । इन्द्रा॑य । व॒ज्रिणे॑ ।

सु॒नोत॑ । मधु॑मत्ऽतमम् ॥२

दिवः । पीयूषम् । उत्ऽतमम् । सोमम् । इन्द्राय । वज्रिणे ।

सुनोत । मधुमत्ऽतमम् ॥२

हे अध्वर्यवः यूयं “मधुमत्तमम् अतिशयेन मधुमन्तं “दिवः द्युलोकस्य “पीयूषम् अमृतम् “उत्तमं श्रेष्ठं “सोमं “वज्रिणे वज्रवते “इन्द्राय "सुनोत अभिषुणुत ॥

तव॒ त्य इ॑न्दो॒ अन्ध॑सो दे॒वा मधो॒र्व्य॑श्नते ।

पव॑मानस्य म॒रुत॑ः ॥

तव॑ । त्ये । इ॒न्दो॒ इति॑ । अन्ध॑सः । दे॒वाः । मधोः॑ । वि । अ॒श्न॒ते॒ ।

पव॑मानस्य । म॒रुतः॑ ॥३

तव । त्ये । इन्दो इति । अन्धसः । देवाः । मधोः । वि । अश्नते ।

पवमानस्य । मरुतः ॥३

हे “इन्दो सोम “तव संबन्धिनं “मधोः मदकरस्य “पवमानस्य पूयमानम् “अन्धसः अन्नम् । कर्मणि षष्ठी । “त्ये त इमे “देवाः इन्द्रादयः “मरुतः च “व्यश्नते व्याप्नुवन्ति प्राप्नुवन्तीत्यर्थः ।।

त्वं हि सो॑म व॒र्धय॑न्त्सु॒तो मदा॑य॒ भूर्ण॑ये ।

वृष॑न्त्स्तो॒तार॑मू॒तये॑ ॥४

त्वम् । हि । सो॒म॒ । व॒र्धय॑न् । सु॒तः । मदा॑य । भूर्ण॑ये ।

वृष॑न् । स्तो॒तार॑म् । ऊ॒तये॑ ॥४

त्वम् । हि । सोम । वर्धयन् । सुतः । मदाय । भूर्णये ।

वृषन् । स्तोतारम् । ऊतये ॥४

हे "सोम "सुतः अभिषुतः “त्वं “वर्धयन् देवान प्रवृद्धान् कुर्वन् “वृषन् कामान् वर्षन् “भूर्णये क्षिप्राय “मदाय “ऊतये रक्षणाय च “स्तोतारम् अभिगच्छसीत्यर्थः ॥

अ॒भ्य॑र्ष विचक्षण प॒वित्रं॒ धार॑या सु॒तः ।

अ॒भि वाज॑मु॒त श्रवः॑ ॥५

अ॒भि । अ॒र्ष॒ । वि॒ऽच॒क्ष॒ण॒ । प॒वित्र॑म् । धार॑या । सु॒तः ।

अ॒भि । वाज॑म् । उ॒त । श्रवः॑ ॥५

अभि । अर्ष । विऽचक्षण । पवित्रम् । धारया । सुतः ।

अभि । वाजम् । उत । श्रवः ॥५

हे “विचक्षण सोम "सुतः अभिषुतस्त्वं “पवित्रम् “अभि प्रति “धारया “अर्ष गच्छ। “उत अपि चास्माकं “वाजम् अन्नं “श्रव: कीर्तिं च “अभि क्षरेत्यर्थः॥ ॥ ८ ॥

टिप्पणी

द्वादशाहस्य नवममहः -- अध्वर्यो अद्रिभिस् सुतम् इति त्रिष्टुभो रूपेण प्रयन्ति। त्रैष्टुभम् एतद् अहः। सोमं पवित्र आ नय। पुनाहीन्द्राय पातवे॥ तव त्य इन्दो अन्धसा इत्य् अन्धस्वतीर् भवन्त्य् - अन्नं वा अन्धो - ऽन्नाद्यस्यैवावरुद्धयै। देवा मधोर् व्य् आशत। पवमानस्य मरुतः॥ इति मरुत्वतीर् भवन्ति। मरुत्वद् वै मध्यन्दिनस्य रूपम्। मध्यन्दिनस्यैव तद् रूपान् न यन्ति। दिवः पीयूषम् उत्तमम् इत्य् उत्तमो ह्य् एष त्र्यहः क्रियते यच् छन्दोमाः। तासु गायत्रम् उक्तब्राह्मणम्। - जै.ब्रा. ३.२०९ (https://sa.wikisource.org/s/eem)

वैरूपम् (https://sa.wikisource.org/s/2goj)

आशुभार्गवम् (https://sa.wikisource.org/s/2god)

मार्गीयवम् (https://sa.wikisource.org/s/2goe)

सौमित्रम् (https://sa.wikisource.org/s/2gof)

ऐटतम् (https://sa.wikisource.org/s/2gog)

धुरासाकमश्वम् (https://sa.wikisource.org/s/2goh)

विलम्बसौपर्णम् (https://sa.wikisource.org/s/2goi)

मण्डल ९

ऋग्वेदः सूक्तं ९.५२

दे. पवमानः सोमः। गायत्री।

परि द्युक्षः सनद्रयिर्भरद्वाजं नो अन्धसा ।

सुवानो अर्ष पवित्र आ ॥१॥

तव प्रत्नेभिरध्वभिरव्यो वारे परि प्रियः ।

सहस्रधारो यात्तना ॥२॥

चरुर्न यस्तमीङ्खयेन्दो न दानमीङ्खय ।

वधैर्वधस्नवीङ्खय ॥३॥

नि शुष्ममिन्दवेषां पुरुहूत जनानाम् ।

यो अस्माँ आदिदेशति ॥४॥

शतं न इन्द ऊतिभिः सहस्रं वा शुचीनाम् ।

पवस्व मंहयद्रयिः ॥५॥

सायणभाष्यम्

'परि द्युक्षः' इति पञ्चर्चमष्टाविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । “परि द्युक्षः' इत्यनुक्रान्तम् । उक्तो विनियोगः ।।

परिं द्युक्षः सनद्रंयिर्भरद्वाजं नो अंधंसा ।

सुवानो अंर्ष पवित्र आ ॥१

परिं । द्युक्षः । सनत्ऽरंयिः । भरंत् । वाजंम् । नः । अन्धंसा ।

सुवानः । अर्ष । पवित्रें । आ ॥१

परि । द्युक्षः । सनत्ऽरयिः । भरत् । वाजम् । नः । अन्धसा ।

सुवानः । अर्ष । पवित्रे । आ ॥१

“द्युक्षः दीप्तः “सनद्रयिः दीयमानधनः सोमः "नः अस्माकं “वाजं बलम् “अन्धसा अन्नेन सह “परि “भरत् परिभरतु प्रयच्छतु। अथ प्रत्यक्षस्तुतिः । हे सोम “सुवानः अभिषूयमाणस्त्वं “पवित्रे “आ “अर्ष क्षर ॥

तवं प्रत्नेभिरध्वंभिरव्यो वारे परिं प्रियः ।

सहस्रंधारो यात्तनां ॥२

तवं । प्रत्नेभिः । अध्वंऽभिः । अव्यः । वारें । परिं । प्रियः ।

सहस्रंऽधारः । यात् । तनां ॥२

तव । प्रत्नेभिः । अध्वऽभिः । अव्यः । वारे । परि । प्रियः ।

सहस्रऽधारः । यात् । तना ॥२

हे सोम “तव संबन्धी “प्रियः देवानां प्रीतिकरः “सहस्रधारः बहुधारः “तना विस्तृतसारो रसः “प्रत्नेभिः पुराणैः “अध्वभिः मार्गैः “अव्यः अवेः “वारे वाले दशापवित्रे “परि “यात् परिगच्छति ॥

चरुर्न यस्तमींखयेंदो न दानंमींखय ।

वधैर्वंधस्नवींखय ॥३

च॒रुः । न । यः । तम् । ई॒ङ्ख॒य॒ । इन्दो॒ इति॑ । न । दान॑म् । ई॒ङ्ख॒य॒ ।

व॒धैः । व॒ध॒स्नो॒ इति॑ वधऽस्नो । ई॒ङ्ख॒य॒ ॥३

चरुः । न । यः । तम् । ईङ्खय । इन्दो इति । न । दानम् । ईङ्खय ।

वधैः । वधस्नो इति वधऽस्नो । ईङ्खय ॥३

हे सोम “चरुर्न चरुरिव “यः पूर्णोदनो भवति “तमीङ्खय अस्मान् प्रापय । अपि च हे “इन्दो “न इदानीं “दानं देयम् ईङ्खय । हे “वधस्नो प्रहारेण प्रस्रवणशील सोम “वधैः ग्राव्णां प्रहारैः “ईङ्खय ॥

नि शुष्म॑मिंदवेषां॒ पुरु॑हूत॒ जना॑नां ।

यो अ॒स्माँ आ॒दिदे॑शति ॥४

नि । शुष्म॑म् । इ॒न्दो॒ इति॑ । ए॒षा॒म् । पुरु॑ऽहूत । जना॑नाम् ।

यः । अ॒स्मान् । आ॒ऽदिदे॑शति ॥४

नि । शुष्मम् । इन्दो इति । एषाम् । पुरुऽहूत । जनानाम् ।

यः । अस्मान् । आऽदिदेशति ॥४

हे “पुरुहूत बहुभिराहूत “इन्दो सोम त्वं “यः शुष्मो येषां शत्रुजनानां बलम् “अस्मान् “आदिदेशति बाधार्थमाह्वयति “एषां शत्रुजनानां तं “शुष्मं बलं "नि न्यक् कुर्विति शेषः ॥

श॒तं न॑ इंद ऊ॒तिभिः॑ स॒हस्रं॑ वा॒ शुची॑नां ।

पव॑स्व मंह॒यद्र॑यिः ॥५

श॒तम् । न॒ः । इ॒न्दो॒ इति॑ । ऊ॒तिऽभिः॑ । स॒हस्र॑म् । वा॒ । शुची॑नाम् ।

पव॑स्व । मं॒ह॒यत्ऽर॑यिः ॥५

शतम् । नः । इन्दो इति । ऊतिऽभिः । सहस्रम् । वा । शुचीनाम् ।

पवस्व । मंहयत्ऽरयिः ॥५

हे “इन्दो सोम “मंहयद्रयिः प्रदीयमानधनस्त्वं “नः अस्माकम् “ऊतिभिः ऊतिभ्यः । विभक्तिव्यत्ययः । रक्षार्थं “शुचीनां शुद्धानां तव अंशभूतानां सोमानां “शतं “सहस्रं “वा “पवस्व क्षर ॥ ॥ ९ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.५३

दे. पवमानः सोमः। गायत्री

उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः ।

नुदस्व याः परिस्पृधः ॥१॥

अया निजघ्निरोजसा रथसंगे धने हिते ।

स्तवा अबिभ्युषा हृदा ॥२॥

अस्य व्रतानि नाधृषे पवमानस्य दूढ्या ।

रुज यस्त्वा पृतन्यति ॥३॥

तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम् ।

इन्दुमिन्द्राय मत्सरम् ॥४॥

सायणभाष्यम्

‘उत्ते' इति चतुर्ऋचमेकोनत्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुकान्तम्-- उत्ते चतुष्कमवत्सारः' इति । उक्तो विनियोगः ॥

उत्ते॒ शुष्मा॑सो अस्थू॒ रक्षो॑ भि॒न्दंतो॑ अद्रिवः ।

नु॒दस्व॒ याः प॑रि॒स्पृधः॑ ॥१

उत् । ते॒ । शुष्मा॑सः । अ॒स्थुः॒ । रक्षः॑ । भि॒न्दन्तः॑ । अ॒द्रि॒ऽवः॒ ।

नु॒दस्व॑ । याः । प॒रि॒ऽस्पृधः॑ ॥१

उत् । ते । शुष्मासः । अस्थुः । रक्षः । भिन्दन्तः । अद्रिऽवः ।

नुदस्व । याः । परिऽस्पृधः ॥१

हे “अद्रिवः ग्राववन् सोम “ते तव “शुष्मासः शुष्मा वेगाः “रक्षः राक्षसान् “भिन्दन्तः विदारयन्तः “उत “अस्थुः उत्तिष्ठन्ति । "याः “स्पृधः स्पर्धमानाः शत्रुसेना अस्मान् प्रतिबाधन्ते तास्त्वं “नुदस्व प्रेरय । बाधस्वेत्यर्थः ॥

अ॒या निं॒ज॒घ्निरोजं॑सा रथस॒ंगे धने॑ हि॒ते ।

स्तवा॒ अबि॑भ्युषा हृ॒दा ॥२

अ॒या । नि॒ऽज॒घ्निः । ओजं॑सा । र॒थ॒ऽस॒ङ्गे । धने॑ । हि॒ते ।

स्तवै॑ । अबि॑भ्युषा । हृ॒दा ॥२

अया । निऽजघ्निः । ओजसा । रथऽसङ्गे । धने । हिते ।

स्तवै । अबिभ्युषा । हृदा ॥२

हे सोम त्वम् “अया अनेन कृतेन “ओजसा बलेन “निजघ्निः शत्रून् हन्तुं शीलवान् । तं त्वाम् “अबिभ्युषा अभीतेन “हृदा मनसा युक्तोऽहं “रथसङ्गे अस्माकं रथानां सङ्गे “हिते शत्रुषु निहिते “धने च निमित्ते “स्तवै स्तौमि ॥

अस्य॑ व्र॒ताानि॒ नाधृषे॒ पव॑मानस्य दू॒ढ्या॑ ।

रु॒ज यस्त्वा॑ पृत॒न्यति॑ ॥३

अस्य॑ । व्र॒तानि॑ । न । आ॒ऽधृषे॑ । पव॑मानस्य । दुः॒ऽध्या॑ ।

रु॒ज । यः । त्वा॒ । पृ॒त॒न्यति॑ ॥३

अस्य । व्रतानि । न । आऽधृषे । पवमानस्य । दुःऽध्या ।

रुज । यः । त्वा । पृतन्यति ॥३

हे सोम “पवमानस्य क्षरतो यस्य “अस्य तव “व्रतानि कर्माणि “दूढ्या दुर्बुद्धिना राक्षसेन “नाधृषे आधर्षयितुमशक्यानि स त्वं त्वां “यः दुर्बुद्धिः शत्रुः “पृतन्यति योद्धुमिच्छति तं "रुज बाधस्व।।

तं हिं॑न्वंति मद॒च्युत॒ं हरिं॒ न॒दीषु॑ वा॒जिनं॑ ।

इंदु॒मिंद्रा॑य मत्स॒रं ॥४

तम् । हि॒न्व॒न्ति॒ । म॒द॒ऽच्युत॑म् । हरि॑म् । न॒दीषु॑ । वा॒जिन॑म् ।

इन्दु॑म् । इन्द्रा॑य । म॒त्स॒रम् ॥४

तम् । हिन्वन्ति । मदऽच्युतम् । हरिम् । नदीषु । वाजिनम् ।

इन्दुम् । इन्द्राय । मत्सरम् ॥४

“मदच्युतं मदस्य च्यावयितारं “हरिं हरितवर्णं “वाजिनं बलिनं “मत्सरं मदकरं “तम् “इन्दुं सोमं “नदीषु वसतीवरीषु “इन्द्राय इन्द्रार्थं “हिन्वन्ति ऋत्विजः प्रेरयन्ति ॥ ॥ १० ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.५४

दे. पवमानः सोमः। गायत्री।

अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः ।

पयः सहस्रसामृषिम् ॥१॥

अयं सूर्य इवोपदृगयं सरांसि धावति ।

सप्त प्रवत आ दिवम् ॥२॥

अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।

सोमो देवो न सूर्यः ॥३॥

परि णो देववीतये वाजाँ अर्षसि गोमतः ।

पुनान इन्दविन्द्रयुः ॥४॥

सायणभाष्यम्

अस्य प्रत्नाम्' इति चतुर्ऋचं त्रिंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ' अस्य प्रत्नाम्' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

अ॒स्य प्र॒त्नामनु॒ द्युतं॑ शु॒क्रं दु॑दुह्रे॒ अह्र॑यः ।

पयः॑ सहस्र॒सामृषि॑ं ॥१

अ॒स्य । प्र॒त्नाम् । अनु॑ । द्युत॑म् । शु॒क्रम् । दु॒दु॒ह्रे॒ । अह्र॑यः ।

पयः॑ । स॒ह॒स्र॒ऽसाम् । ऋषि॑म् ॥१

अस्य । प्रत्नाम् । अनु । द्युतम् । शुक्रम् । दुदुह्रे । अह्रयः ।

पयः । सहस्रऽसाम् । ऋषिम् ॥१

"अस्य सोमस्य "प्रत्नां पुराणां "द्युतं द्योतमानां तनुम् "अनु "शुक्रं दीप्तं "सहस्रसाम् अभिलषितस्यापरिमितस्य दातारम् "ऋषिम् अतीन्द्रियस्य कर्मफलस्य द्रष्टारं "पयः पातव्यं रसम् "अह्रयः कवयः "दुदुहे दुहन्ति ॥

अ॒यं सूर्य॑ इवोप॒दृग॒यं सरां॑सि धावति ।

स॒प्त प्र॒वत॒ आ दिव॑ं ॥२

अ॒यम् । सूर्यः॑ऽइव । उ॒प॒ऽदृक् । अ॒यम् । सरां॑सि । धा॒व॒ति॒ ।

स॒प्त । प्र॒ऽवतः॑ । आ । दिव॑म् ॥२

अयम् । सूर्यःऽइव । उपऽदृक् । अयम् । सरांसि । धावति ।

सप्त । प्रऽवतः । आ । दिवम् ॥२

"अयं सोमः "सूर्यइव यथा सूर्यः सर्वस्य लोकस्योपद्रष्टा तद्वत् कर्मणाम् "उपदृक् उपद्रष्टा । अपि च "अयं सोमः "सरांसि । त्रिंशदुक्थपात्राणीति केचिद्वर्णयन्ति । अपरे तु त्रिंशदहोरात्राणि सरांसीति । तानि "धावति गच्छति । तथा च यास्कः-' तत्रैतद्याज्ञिका वेदयन्ते त्रिंशदुक्थपात्राणि माध्यंदिने सवन एकदेवतानि तान्येतस्मिन्काल एकेन प्रतिधानेन पिबन्ति तान्यत्र सरांस्युच्यन्ते । त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येति नैरुक्ताः' (निरु. ५ . ११) इति । अपि चायं सोमः "दिवम् अधिकृत्य "सप्त "प्रवतः सप्त नदीः "आ तिष्ठति ॥

अ॒यं विश्वा॑नि तिष्ठति पुना॒नो भुव॑नो॒परि॑ ।

सोमो॑ दे॒वो न सूर्यः॑ ॥३

अ॒यम् । विश्वा॑नि । ति॒ष्ठ॒ति॒ । पु॒ना॒नः । भुव॑ना । उ॒परि॑ ।

सोमः॑ । दि॒वः । न । सूर्यः॑ ॥३

अयम् । विश्वानि । तिष्ठति । पुनानः । भुवना । उपरि ।

सोमः । दिवः । न । सूर्यः ॥३

"पुनानः पूयमानः "अयं "सोमः "विश्वानि सर्वाणि "भुवना भुवनानि सर्वेषां भुवनानाम् "उपरि "तिष्ठति । तत्र दृष्टान्तमाह । "देवो "न "सूर्यः । यथा सूर्यो देवः सर्वेषां भुवनानामुपरि तिष्ठति तद्वदयं सोमोऽपीत्यर्थः ॥

परि॑ णो दे॒ववी॑तये॒ वाजाँ॑ अर्षसि॒ गोम॑तः ।

पु॒ना॒न इ॑न्दविन्द्र॒युः ॥४

परि॑ । नः॒ । दे॒वऽवी॑तये । वाजा॑न् । अ॒र्ष॒सि॒ । गोऽम॑तः ।

पु॒ना॒नः । इ॒न्दो॒ इति॑ । इ॒न्द्र॒ऽयुः ॥४

परि । नः । देवऽवीतये । वाजान् । अर्षसि । गोऽमतः ।

पुनानः । इन्दो इति । इन्द्रऽयुः ॥४

हे "इन्दो सोम "इन्द्रयुः इन्द्रकामः "पुनानः पूयमानस्त्वं "नः अस्माकं "देववीतये यज्ञाय "गोमतः गोयुक्तानि "वाजान् अन्नानि "परि "अर्षसि परितः क्षरेत्यर्थः ॥ ॥ ११ ॥

टिप्पणी

९.५४.१ अस्य प्रत्नामनु इति

भ्राजम् (https://sa.wikisource.org/s/2ibx)

ऋषभः पवमानः (https://sa.wikisource.org/s/1zer)

आहवनीयोपस्थानम् -- अस्य प्रत्नाम् अनु द्युत॑ शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसाम् ऋषिम् - तैसं. १.५.५.१ (https://sa.wikisource.org/s/1e2m)

अस्य प्रत्नाम् अनु द्युतम् इत्य् आह सुवर्गो वै लोकः प्रत्नः सुवर्गम् एव लोक॑ समारोहति । - तैसं १.५.७.१ (https://sa.wikisource.org/s/1e2m)

बृहदुपस्थानम् - अस्य प्रत्नाम् । अनु द्युतं शुक्रं दुदुह्रे अह्रयः पयः सहस्रसामृषिमिति परमा वा एषा सनीनां यत्सहस्रसनिस्तदेतस्यैवावरुद्धै तस्मादाह पयः सहस्रसामृषिमिति - माश २.३.४.१५ (https://sa.wikisource.org/s/eq4)

अस्य प्रत्नामनु द्युतं इति , असौ वै लोकः प्रत्नं , अमुत एव स्तोमं युनक्ति , अथो देवा वै प्रत्नं , तान् एव स्तोमं उपयुनक्ति , उभयत एव स्तोमं युनक्तीतश्चामुतश्च - मैसं १.५.५ (https://sa.wikisource.org/s/1ddw)

अस्य प्रत्नामनु द्युतमिति देवा वै प्रत्नं ते सत्सत्स्तोमस्तानेव प्रायुक्त स्वर्गाय - काठ.सं. ७.४ (https://sa.wikisource.org/s/1tfm)

अस्य प्रत्नामनु द्युतमित्यूध एवैतया करोति - काठ.सं. ७.५ (https://sa.wikisource.org/s/1tfm)

प्रत्नोपरि संक्षिप्त टिप्पणी (https://puranastudy.my-free.website/pratipada%20-%20tritiya)

अस्य प्रत्नाम् अनु द्युतम् इति प्रतिपदं कुर्वीत यस्य पिता वा पितामहो वा श्रेयान् स्याद् अथात्मना पापीयान् इव मन्येत। यैवास्य पित्र्या पैतामही श्रीस् ताम् एवाश्नुते॥ शुक्रं दुदुह्रे अह्रयः इति। यज्ञो वै शुक्रः पशवो ऽह्रयः। यज्ञं चैवैतेन पशूंश् वावरुन्द्ध॥ पयस् सहस्रसाम् ऋषिम् इति। पयस्वान् एव भवत्य् आस्य सहस्रसा वीरो जायते॥जैब्रा १.९३ (https://sa.wikisource.org/s/eh1) ॥

ब्रह्म वा अग्निष्टोमः। ब्रह्म प्रायणीयम् अहः। एषा वै यज्ञस्य मात्रा यद् अग्निष्टोमः। यैव यज्ञस्य मात्रा तयैवैतत् सत्र आक्रमन्ते यादृक् प्रवयणत स्पर्शस् तादृग् उपप्राञ्र्जनतः। तस्माद् अग्निष्टोमेनैव प्रयन्त्य्, अग्निष्टोमेनोद्यन्ति। मनो वै पूर्वम् अथ वाक्। मनो वै बृहद् वाग् रथन्तरम्। प्रत्नं वै बृहद् उप रथन्तरम्। तद् यद् एताः प्रत्नवतीश् चोपवतीश् च भवन्ति बृहद्रथन्तरे एवैतत् सत्राय युज्येते। प्रेति च वा एति च गायत्र्यै रूपम्। तद् यत् प्रेति चेति च भवति गायत्र्या एवैतद् रूपेण प्रयन्ति न वैता भवन्ति न वा हस्यैष युक्त्या ऋचर् चैवाहर् युज्यते यथा नद्धयुगस्य शम्या अवदध्यात् तादृक् तत्। - जैब्रा ३.१२ (https://sa.wikisource.org/s/ef3)

मण्डल ९

ऋग्वेदः सूक्तं ९.५५

दे. पवमानः सोमः। गायत्री

यवंयवं नो अन्धसा पुष्टम्पुष्टं परि स्रव ।

सोम विश्वा च सौभगा ॥१॥

इन्दो यथा तव स्तवो यथा ते जातमन्धसः ।

नि बर्हिषि प्रिये सदः ॥२॥

उत नो गोविदश्ववित्पवस्व सोमान्धसा ।

मक्षूतमेभिरहभिः ॥३॥

यो जिनाति न जीयते हन्ति शत्रुमभीत्य ।

स पवस्व सहस्रजित् ॥४॥

सायणभाष्यम्

“यवंयवं नः' इति चतुर्ऋचमेकत्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं गायत्रं पवमानसोमदेवताकम् । ‘यवंयवम्' इत्यनुक्रान्तम् । गतो विनियोगः ॥

यवं॑यवं नो॒ अंध॑सा पु॒ष्टंपु॑ष्टं॒ परिं॑ स्रव ।

सोम॒ विश्वा॑ च॒ सौभं॑गा ॥१

यव॑म्ऽयवम् । न॒ः । अन्ध॑सा । पु॒ष्टम्ऽपु॑ष्टम् । परिं॑ । स्र॒व॒ ।

सोमं॑ । विश्वा॑ । च॒ । सौभं॑गा ॥१

यवम्ऽयवम् । नः । अन्धसा । पुष्टम्ऽपुष्टम् । परि । स्रव ।

सोम । विश्वा । च । सौभगा ॥१

हे “सोम त्वं “नः अस्माकं “पुष्टंपुष्टं बहुलं "यवंयवं पुनःपुनर्युतं रसम् “अन्धसा अन्नात्मना “परि “स्रव धारया क्षर ॥ अत्र प्रार्थयितुस्तृष्णयात्यन्तं पीडितत्वात् “ आबाधे च ' (पा. सू. ८.१.१०) इति द्विर्भावः । पीडा प्रयोक्तृधर्मो नाभिधेयधर्म इत्युक्तम् ॥ अपि च “विश्वा विश्वानि “सौभगा सौभगानि धनानि परि स्रव ॥

इंदो॒ यथा॒ तव॒ स्तवो॒ यथा॑ ते जा॒तमंध॑सः ।

नि ब॒र्हिषिं॑ प्रि॒ये सं॑दः ॥२

इन्दो॒ इतिं॑ । यथा॑ । तव॑ । स्तव॑ः । यथा॑ । ते॒ । जा॒तम् । अन्ध॑सः ।

नि । ब॒र्हिषिं॑ । प्रि॒ये । स॒द॒ः ॥२

इन्दो इति । यथा । तव । स्तवः । यथा । ते । जातम् । अन्धसः ।

नि । बर्हिषि । प्रिये । सदः ॥२

हे “इन्दो सोम “अन्धसः अन्नरूपस्य “तव संबन्धी “स्तवः स्तवनं स्तोत्रं तथा “ते तव “जातं जन्म “यथा प्रादुर्भूतमस्ति तथा त्वं “प्रिये प्रीणयितरि “बर्हिषि अस्मद्यागे “नि “षदः निषण्णो भव॥

उ॒त नों॑ गो॒विद॑श्व॒वित्पव॑स्व सो॒मांध॑सा ।

म॒क्षूतं॑मेभि॒रहं॑भिः ॥३

उ॒त । न॒ः । गो॒ऽवित् । अ॒श्व॒ऽवित् । पव॑स्व । सो॒म॒ । अन्ध॑सा ।

म॒क्षुऽत॑मेभिः । अह॑ऽभिः ॥३

उत । नः । गोऽवित् । अश्वऽवित् । पवस्व । सोम । अन्धसा ।

मक्षुऽतमेभिः । अहऽभिः ॥३

“उत अपि च हे “सोम “नः अस्माकं "गोवित् गोप्रदः “अश्ववित् अश्वप्रदश्च त्वं “मक्षूतमेभिः मक्षुतमैरतिशयेन शीघ्रैः “अहभिः अहोभिर्हेतुभिः “अन्धसा अन्नेन "पवस्व धारया क्षर ॥

यो जि॒नाति॒ न जीय॑ते॒ हन्ति॒ शत्रु॑म॒भीत्य॑ ।

स प॑वस्व सहस्रजित् ॥४

यः । जि॒नाति॑ । न । जीय॑ते । हन्ति॑ । शत्रु॑म् । अ॒भि॒ऽइत्य॑ ।

सः । प॒व॒स्व॒ । स॒ह॒स्र॒ऽजि॒त् ॥४

यः । जिनाति । न । जीयते । हन्ति । शत्रुम् । अभिऽइत्य ।

सः । पवस्व । सहस्रऽजित् ॥४

हे “सहस्रजित् असंख्यानां शत्रूणां जेतः सोम "यः भवान् “जिनाति शत्रून् हन्ति “न “जीयते स्वयं शत्रुभिर्न जीयते । न हन्यत इत्यर्थः । “शत्रुमभीत्य शत्रुं स्वयमभ्येत्य “हन्ति न च स्वयं शत्रुभिरभिभूयते “सः त्वं “पवस्व क्षर ॥ ॥ १२ ॥

मण्डल ९

सूक्तं ९.२५ सूक्तं ९.५५ सूक्तं ९.८५

सूक्तं ९.२६ सूक्तं ९.५६ सूक्तं ९.८६

सूक्तं ९.२७ सूक्तं ९.५७ सूक्तं ९.८७

सूक्तं ९.२८ सूक्तं ९.५८ सूक्तं ९.८८

सूक्तं ९.२९ सूक्तं ९.५९ सूक्तं ९.८९

सूक्तं ९.३० सूक्तं ९.६० सूक्तं ९.९०

ऋग्वेदः सूक्तं ९.५६

ऋग्वेदः - मण्डल ९

← सूक्तं ९.५५

सूक्तं ९.५६

सूक्तं ९.५७ →

अवत्सारः काश्यपः।

दे. पवमानः सोमः। गायत्री।

परि सोम ऋतं बृहदाशुः पवित्रे अर्षति ।

विघ्नन्रक्षांसि देवयुः ॥१॥

यत्सोमो वाजमर्षति शतं धारा अपस्युवः ।

इन्द्रस्य सख्यमाविशन् ॥२॥

अभि त्वा योषणो दश जारं न कन्यानूषत ।

मृज्यसे सोम सातये ॥३॥

त्वमिन्द्राय विष्णवे स्वादुरिन्दो परि स्रव ।

नॄन्स्तोतॄन्पाह्यंहसः ॥४॥

सायणभाष्यम्

'परि सोमः' इति चतुर्ऋचं द्वात्रिंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । "परि सोमः' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

परि॒ सोम॑ ऋ॒तं बृ॒हदा॒शुः प॒वित्रे॑ अर्षति ।

वि॒घ्नन्रक्षां॑सि देव॒युः ॥१

परि॑ । सोमः॑ । ऋ॒तम् । बृ॒हत् । आ॒शुः । प॒वित्रे॑ । अ॒र्ष॒ति॒ ।

वि॒ऽघ्नन् । रक्षां॑सि । दे॒व॒ऽयुः ॥१

परि । सोमः । ऋतम् । बृहत् । आशुः । पवित्रे । अर्षति ।

विऽघ्नन् । रक्षांसि । देवऽयुः ॥१

"आशुः क्षिप्रकारी "देवयुः देवकामः "सोमः "पवित्रे स्थित्वा "रक्षांसि राक्षसान् "विघ्नन् निघ्नन् "बृहत् महत् "ऋतम् अन्नं "परि "अर्षति परिगमयति । अस्मभ्यं प्रयच्छतीत्यर्थः ॥

यत्सोमो॒ वाज॒मर्ष॑ति श॒तं धारा॑ अप॒स्युवः॑ ।

इंद्र॑स्य स॒ख्यमा॑वि॒शन् ॥२

यत् । सोमः॑ । वाज॑म् । अर्ष॑ति । श॒तम् । धाराः॑ । अ॒प॒स्युवः॑ ।

इन्द्र॑स्य । स॒ख्यम् । आ॒ऽवि॒शन् ॥२

यत् । सोमः । वाजम् । अर्षति । शतम् । धाराः । अपस्युवः ।

इन्द्रस्य । सख्यम् । आऽविशन् ॥२

"यत् यदा "अपस्युवः कर्मकामाः "शतं शतसंख्याकाः "धाराः सोमस्य धाराः "इन्द्रस्य "सख्यं सखित्वम् "आविशन् प्राप्नुवन्ति तदा "सोमः "वाजम् अन्नम् "अर्षति गमयति । अस्मभ्यं प्रयच्छतीत्यर्थः ॥

अ॒भि त्वा॒ योष॑णो॒ दश॑ जा॒रं न क॒न्या॑नूषत ।

मृ॒ज्यसे॑ सोम सा॒तये॑ ॥३

अ॒भि । त्वा॒ । योष॑णः । दश॑ । जा॒रम् । न । क॒न्या॑ । अ॒नू॒ष॒त॒ ।

मृ॒ज्यसे॑ । सो॒म॒ । सा॒तये॑ ॥३

अभि । त्वा । योषणः । दश । जारम् । न । कन्या । अनूषत ।

मृज्यसे । सोम । सातये ॥३

हे “सोम “त्वा त्वां याः “दश दशसंख्याकाः “योषणः अङ्गुलयः “कन्या पितृमती कन्यका “जारं “न यथा प्रियमभिशब्दायते तद्वत् “अभि “अनूषत अभिशब्दायन्ते ताभिः “सातये अस्माकं धनस्य लाभाय “मृज्यसे इन्द्रार्थं शोध्यसे ॥

त्वमिंद्रा॑य॒ विष्णं॑वे स्वा॒दुरिं॑दो॒ परिं स्रव ।

नॄन्त्स्तो॒तॄन्पा॒ह्यंह॑सः ॥४

त्वम् । इन्द्रा॑य । विष्णं॑वे । स्वा॒दुः । इ॒न्दो॒ इतिं । परिं । स्र॒व॒ ।

नॄन् । स्तो॒तॄन् । पा॒हि॒ । अंह॑सः ॥४

त्वम् । इन्द्राय । विष्णवे । स्वादुः । इन्दो इति । परि । स्रव ।

नॄन् । स्तोतॄन् । पाहि । अंहसः ॥४

हे "इन्दो सोम "स्वादुः प्रियरसस्त्वम् “इन्द्राय इन्द्रार्थं “विष्णवे विष्ण्वर्थं च “परि “स्रव परिक्षर । “नॄन् कर्मणां नेतॄन स्तोतॄन् त्वद्विषयाणां स्तुतीनां कर्तॄन् “अंहसः दुरितात् "पाहि रक्ष च ॥ ॥ १३ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.५७

दे. पवमानः सोमः। गायत्री।

प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।

अच्छा वाजं सहस्रिणम् ॥१॥

अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति ।

हरिस्तुञ्जान आयुधा ॥२॥

स मर्मृजान आयुभिरिभो राजेव सुव्रतः ।

श्येनो न वंसु षीदति ॥३॥

स नो विश्वा दिवो वसूतो पृथिव्या अधि ।

पुनान इन्दवा भर ॥४॥

सायणभाष्यम्

‘प्र ते धाराः' इति चतुर्ऋचं त्रयस्त्रिंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘प्र ते धाराः ' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

प्र ते॒ धारा॑ अस॒श्चतो॑ दि॒वो न यँ॑ति वृ॒ष्टयः॑ ।

अच्छा॒ वाजं॑ सह॒स्रिणं॑ ॥१

प्र । ते॒ । धाराः॑ । अ॒स॒श्चतः॑ । दि॒वः । न । य॒न्ति॒ । वृ॒ष्टयः॑ ।

अच्छ॑ । वाज॑म् । स॒ह॒स्रिण॑म् ॥१

प्र । ते । धाराः । असश्चतः । दिवः । न । यन्ति । वृष्टयः ।

अच्छ । वाजम् । सहस्रिणम् ॥१

हे सोम “ते तव “असश्चतः सङ्गरहिताः “धाराः “सहस्रिणम् अपरिमितसंख्याकं “वाजम् अन्नम् “अच्छ अस्मदर्थं “प्र “यन्ति प्रगच्छन्ति । तत्र दृष्टान्तः । “दिवो “न “वृष्टयः । यथा द्युलोकात् वर्षधारा निःसङ्गाः प्रजानामपरिमितमन्नं प्रयच्छन्ति तद्वदित्यर्थः ॥

अ॒भि प्रि॒याणि॒ काव्या॒ विश्वा॒ चक्षा॑णो अर्षति ।

हरि॑स्तुंजा॒न आयु॑धा ॥२

अ॒भि । प्रि॒याणि॑ । काव्या॑ । विश्वा॑ । चक्षा॑णः । अ॒र्ष॒ति॒ ।

हरिः॑ । तु॒ञ्जा॒नः । आयु॑धा ॥२

अभि । प्रियाणि । काव्या । विश्वा । चक्षाणः । अर्षति ।

हरिः । तुञ्जानः । आयुधा ॥२

“हरिः हरितवर्णः सोमः “विश्वा विश्वानि “प्रियाणि देवानां प्रीतिकराणि “काव्या काव्यानि कर्माणि “चक्षाणः पश्यन् “आयुधा स्वकीयान्यायुधानि “तुञ्जानः राक्षसान् प्रति प्रेरयंश्च “अभि “अर्षति यागं प्रति गच्छति ॥

स म॑र्मृजा॒न आ॒युभि॒रिभो॒ राजे॑व सुव्र॒तः ।

श्ये॒नो न वंसु॑ षीदति ॥३

सः । म॒र्मृ॒जा॒नः । आ॒युऽभिः॑ । इभः॑ । राजा॑ऽइव । सु॒ऽव्र॒तः ।

श्ये॒नः । न । वंसु॑ । सी॒द॒ति॒ ॥३

सः । मर्मृजानः । आयुऽभिः । इभः । राजाऽइव । सुऽव्रतः ।

श्येनः । न । वंसु । सीदति ॥३

“सुव्रतः सुकर्मा “सः सोमः “आयुभिः मनुष्यैर्ऋत्विग्भिः “मर्मृजानः शोध्यमानः “इभः गतभयः “राजेव यथा राजा “श्येनो “न यथा च श्येनस्तथा “वंसु उदकेषु वसतीवरीषु सीदति ॥

स नो॒ विश्वा॑ दि॒वो वसू॒तो पृ॑थि॒व्या अधि॑ ।

पु॒ना॒न इं॑दु॒वा भ॑र ॥४

सः । न॒ः । विश्वा॑ । दि॒वः । वसु॑ । उ॒तो इति॑ । पृ॒थि॒व्याः । अधि॑ ।

पु॒ना॒नः । इ॒न्दो॒ इति॑ । आ । भ॒र॒ ॥४

सः । नः । विश्वा । दिवः । वसु । उतो इति । पृथिव्याः । अधि ।

पुनानः । इन्दो इति । आ । भर ॥४

हे “इन्दो सोम “सः अभिषुतः “पुनानः पबमानस्त्वं “दिवः “अधि दिवि स्थितानि “उतो अपि च “पृथिव्या अधि पृथिव्यां स्थितानि । अधीति सप्तम्यार्थानुवादः । “विश्वा विश्वानि “वसु वसूनि “नः अस्मभ्यम् “आ “भर आहर ॥ ॥ १४ ॥

मण्डल ९

ऋग्वेदः सूक्तं ९.५८

ऋग्वेदः - मण्डल ९
← सूक्तं ९.५७ सूक्तं ९.५८ सूक्तं ९.५९ →
अवत्सारः काश्यपः।

दे. पवमानः सोमः। गायत्री।

तरत्स मन्दी धावति धारा सुतस्यान्धसः ।

तरत्स मन्दी धावति ॥१॥

उस्रा वेद वसूनां मर्तस्य देव्यवसः ।

तरत्स मन्दी धावति ॥२॥

ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे ।

तरत्स मन्दी धावति ॥३॥

आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे ।

तरत्स मन्दी धावति ॥४॥

सायणभाष्यम्

‘तरत्सः' इति चतुर्ऋचं चतुस्त्रिंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । “तरत्सः' इत्यनुक्रान्तम् ।। उक्तो विनियोगः ।।

तर॒त्स म॒ंदी धा॑वति॒ धारा॑ सु॒तस्यांध॑सः ।

तर॒त्स म॒ंदी धा॑वति ॥१

तर॑त् । सः । म॒न्दी । धा॒व॒ति॒ । धारा॑ । सु॒तस्य॑ । अन्ध॑सः ।

तर॑त् । सः । म॒न्दी । धा॒व॒ति॒ ॥१

तरत् । सः । मन्दी । धावति । धारा । सुतस्य । अन्धसः ।

तरत् । सः । मन्दी । धावति ॥१

“मन्दी देवानां हर्षकरः “सः सोमः “तरत् स्तोतॄन् पाप्मनः सकाशात् तारयन् “धावति पवते । तदेव दर्शयति । “सुतस्य अभिषुतस्य “अन्धसः देवानामन्नात्मकस्य सोमस्य “धारा धावतीति । पुनरपि तदेवाह अत्यन्तादरार्थं “तरत्स “मन्दी “धावति इति । यद्वा । अस्या ऋचो यास्केनोक्तोऽर्थो द्रष्टव्यः । तद्यथा-‘तरति स पापं सर्वं मन्दी यः स्तौति धावति गच्छत्यूर्ध्वाँ गतिम् । धारा सुतस्यान्धसो धारयाभिषुतस्य सोमस्य मन्त्रपूतस्य वाचा स्तुतस्य ' (निरु. १३.६) इति ॥

उ॒स्रा वे॑द॒ वसू॑ना॒ं मर्त॑स्य दे॒व्यव॑सः ।

तर॒त्स म॒ंदी धा॑वति ॥२

उ॒स्रा । वे॒द॒ । वसू॑नाम् । मर्त॑स्य । दे॒वी । अव॑सः ।

तर॑त् । सः । म॒न्दी । धा॒व॒ति॒ ॥२

उस्रा । वेद । वसूनाम् । मर्तस्य । देवी । अवसः ।

तरत् । सः । मन्दी । धावति ॥२

“वसूनां धनानाम् “उस्रा उत्सरणशीला प्रदात्री “देवी द्योतमाना स्तूयमाना वा यस्य सोमस्य धारा “मर्तस्य मनुष्यं यजमानम् “अवसः रक्षितुं वेद जानाति । सिद्धमन्यत् ॥

ध्व॒स्रयो॑ः पुरु॒षंत्यो॒रा स॒हस्रा॑णि दद्महे ।

तर॒त्स म॒ंदी धा॑वति ॥३

ध्व॒स्रयो॑ः । पु॒रु॒ऽसन्त्यो॑ः । आ । स॒हस्रा॑णि । द॒द्म॒हे॒ ।

तर॑त् । सः । म॒न्दी । धा॒व॒ति॒ ॥३

ध्वस्रयोः । पुरुऽसन्त्योः । आ । सहस्राणि । दद्महे ।

तरत् । सः । मन्दी । धावति ॥३

“ध्वस्रयोः “पुरुषन्त्योः । ध्वस्रः कश्चिद्राजा पुरुषन्तिः कश्चित् । तयोरुभयोः । अत्र इतरेतरयोगविवक्षया द्विवचनं द्रष्टव्यम् । “सहस्राणि धनानां सहस्राणि “आ “दद्महे वयं प्रतिगृह्णीमः । तदस्माभिः प्रतिगृहीतं धनमुत्तममस्त्विति ऋषिः सोमं प्रार्थयत इति सोमस्य स्तुतिः । सिद्धमन्यत् । यथावत्सार एतयोर्धनानि प्रतिजग्राह एवं तरन्तपुरुमीळ्हौ प्रतिजगृहतुः । तथा च शाट्यायनकम्--- ‘ अथ ह वै तरन्त पुरुमीळ्हौ वैददश्वी ध्वस्रयोः पुरुषन्त्योर्बहु प्रतिगृह्य गरगिराविव मेनाते तौ ह स्माङ्गुल्या सातं प्रतिममृशाते तावकामयेतामसातं नाविवेदं सातं स्यादात्तमिवैव न प्रतिगृहीतमिति तावेतञ्चतुर्ऋचमपश्यतां तेन प्रत्यैतां ततो वै तयोरसातं सातमभवदात्तमिवैव न प्रतिगृहीतं स यः प्रतिगृह्य कामयेत' इत्यादि ।।

आ ययो॑स्त्रिं॒शतं॑ तना॑ स॒हस्रा॑णि च॒ दद्म॑हे ।

तर॒त्स मं॒दी धा॑वति ॥४

आ । ययोः॑ । त्रिं॒शत॑म् । तना॑ । स॒हस्रा॑णि । च॒ । दद्म॑हे ।

तर॑त् । सः । म॒न्दी । धा॒व॒ति॒ ॥४

आ । ययोः । त्रिंशतम् । तना । सहस्राणि । च । दद्महे ।

तरत् । सः । मन्दी । धावति ॥४

“ययोः ध्वस्रपुरुषन्त्योः “त्रिंशतं त्रिशतानि “सहस्राणि “तना वस्त्राणि “आ “दद्महे वयं प्रतिगृह्णीमः तयोरस्माभिः प्रतिगृहीतं तत्सर्वमप्रतिगृहीतमस्त्विति सोमऋषिः प्रार्थयत इति सोमस्यैव स्तुतिः । सिद्धमन्यत् ॥ ॥ १५ ॥

मण्डल ९

सूक्तं ९.१ सूक्तं ९.३१ सूक्तं ९.६१ सूक्तं ९.९१

सूक्तं ९.२ सूक्तं ९.३२ सूक्तं ९.६२ सूक्तं ९.९२

सूक्तं ९.३ सूक्तं ९.३३ सूक्तं ९.६३ सूक्तं ९.९३

सूक्तं ९.४ सूक्तं ९.३४ सूक्तं ९.६४ सूक्तं ९.९४

सूक्तं ९.५ सूक्तं ९.३५ सूक्तं ९.६५ सूक्तं ९.९५

सूक्तं ९.६ सूक्तं ९.३६ सूक्तं ९.६६ सूक्तं ९.९६

सूक्तं ९.७ सूक्तं ९.३७ सूक्तं ९.६७ सूक्तं ९.९७

सूक्तं ९.८ सूक्तं ९.३८ सूक्तं ९.६८ सूक्तं ९.९८

सूक्तं ९.९ सूक्तं ९.३९ सूक्तं ९.६९ सूक्तं ९.९९

सूक्तं ९.१० सूक्तं ९.४० सूक्तं ९.७० सूक्तं ९.१००

सूक्तं ९.११ सूक्तं ९.४१ सूक्तं ९.७१ सूक्तं ९.१०१

सूक्तं ९.१२ सूक्तं ९.४२ सूक्तं ९.७२ सूक्तं ९.१०२

सूक्तं ९.१३ सूक्तं ९.४३ सूक्तं ९.७३ सूक्तं ९.१०३

सूक्तं ९.१४ सूक्तं ९.४४ सूक्तं ९.७४ सूक्तं ९.१०४

सूक्तं ९.१५ सूक्तं ९.४५ सूक्तं ९.७५ सूक्तं ९.१०५

सूक्तं ९.१६ सूक्तं ९.४६ सूक्तं ९.७६ सूक्तं ९.१०६

सूक्तं ९.१७ सूक्तं ९.४७ सूक्तं ९.७७ सूक्तं ९.१०७

सूक्तं ९.१८ सूक्तं ९.४८ सूक्तं ९.७८ सूक्तं ९.१०८

सूक्तं ९.१९ सूक्तं ९.४९ सूक्तं ९.७९ सूक्तं ९.१०९

सूक्तं ९.२० सूक्तं ९.५० सूक्तं ९.८० सूक्तं ९.११०

सूक्तं ९.२१ सूक्तं ९.५१ सूक्तं ९.८१ सूक्तं ९.१११

सूक्तं ९.२२ सूक्तं ९.५२ सूक्तं ९.८२ सूक्तं ९.११२

सूक्तं ९.२३ सूक्तं ९.५३ सूक्तं ९.८३ सूक्तं ९.११३

सूक्तं ९.२४ सूक्तं ९.५४ सूक्तं ९.८४ सूक्तं ९.११४

ऋग्वेदः सूक्तं ९.५९

ऋग्वेदः - मण्डल ९

← सूक्तं ९.५८ सूक्तं ९.५९ सूक्तं ९.६० →

अवत्सारः काश्यपः।

दे. पवमानः सोमः। गायत्री।

पवस्व गोजिदश्वजिद्विश्वजित्सोम रण्यजित् ।

प्रजावद्रत्नमा भर ॥१॥

पवस्वाद्भ्यो अदाभ्यः पवस्वौषधीभ्यः ।

पवस्व धिषणाभ्यः ॥२॥

त्वं सोम पवमानो विश्वानि दुरिता तर ।

कविः सीद नि बर्हिषि ॥३॥

पवमान स्वर्विदो जायमानोऽभवो महान् ।

इन्दो विश्वाँ अभीदसि ॥४॥

सायणभाष्यम्

‘पवस्व ' इति चतुर्ऋचं पञ्चत्रिंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ' पवस्व' इत्यनुक्रान्तम् । गतो विनियोगः ॥

पव॑स्व गो॒जिद॑श्व॒जिद्वि॑श्व॒जित्सो॑म रण्य॒जित् ।

प्र॒जाव॒द्रत्न॒मा भ॑र ॥१

पव॑स्व । गो॒ऽजित् । अ॒श्व॒ऽजित् । वि॒श्व॒ऽजित् । सो॒म॒ । र॒ण्य॒ऽजित् ।

प्र॒जाऽव॑त् । रत्न॑म् । आ । भ॒र॒ ॥१

पवस्व । गोऽजित् । अश्वऽजित् । विश्वऽजित् । सोम । रण्यऽजित् ।

प्रजाऽवत् । रत्नम् । आ । भर ॥१

हे “सोम “गोजित् शत्रूणां गवां जेता “अश्वजित् अश्वानामपि जेता “विश्वजित् विश्वस्य जगतो जेता “रण्यजित् रमणीयस्य धनस्यापि जेता त्वं “पवस्व धारया क्षर । अपि चास्मभ्यं “प्रजावत् पुत्राद्युपेतं "रत्नं रमणीयं धनम् “आ “भर आहर ॥

पव॑स्वा॒द्भ्यो अदा॑भ्यः॒ पव॒स्वौष॑धीभ्यः ।

पव॑स्व धि॒षणा॑भ्यः ॥२

पव॑स्व । अ॒त्ऽभ्यः । अदा॑भ्यः । पव॑स्व । ओष॑धीभ्यः ।

पव॑स्व । धि॒षणा॑भ्यः ॥२

पवस्व । अत्ऽभ्यः । अदाभ्यः । पवस्व । ओषधीभ्यः ।

पवस्व । धिषणाभ्यः ॥२

हे सोम त्वम् “अद्भ्यः वसतीवरीभ्यः “अदाभ्यः[१] अंशुभ्यश्च “पवस्व क्षर । अपि च "ओषधीभ्यः “पवस्व क्षर। किंच “धिषणाभ्यः ग्रावभ्यः “पवस्व क्षर ॥

त्वं सो॑म॒ पव॑मानो॒ विश्वा॑नि दुरि॒ता त॑र ।

क॒विः सी॑द॒ नि ब॒र्हिषि॑ ॥३

त्वम् । सो॒म॒ । पव॑मानः । विश्वा॑नि । दुः॒ऽइ॒ता । त॒र॒ ।

क॒विः । सी॒द॒ । नि । ब॒र्हिषि॑ ॥३

त्वम् । सोम । पवमानः । विश्वानि । दुःऽइता । तर ।

कविः । सीद । नि । बर्हिषि ॥३

हे “सोम “पवमानः पूयमानः “कविः क्रान्तकर्मा “त्वं “विश्वानि सर्वाणि दुरितानि राक्षसैः कृतान्युपद्रवाणि “तर निराकुरु । अस्मिन् “बर्हिषि “नि “षीद च ॥

पव॑मान॒ स्व॑र्विदो॒ जाय॑मानोऽभवो म॒हान् ।

इंदो॒ विश्वाँ॑ अ॒भीदं॑सि ॥४

पव॑मान । स्व॒ः॑ । वि॒द॒ः । जाय॑मानः । अ॒भ॒व॒ः । म॒हान् ।

इन्दो॒ इति॑ । विश्वा॑न् । अ॒भि । इत् । अ॒सि॒ ॥४

पवमान । स्वः । विदः । जायमानः । अभवः । महान् ।

इन्दो इति । विश्वान् । अभि । इत् । असि ॥४

हे “पवमान सोम त्वं “स्वः सर्वं “विदः यजमानाय प्रयच्छ । अपि च "जायमानः प्रादुर्भवन्नेव “महान् पूजनीयः “अभवः असि । किंच हे “इन्दो सोम त्वं “विश्वानित् सर्वानेव शत्रून् “अभि “असि तेजसाभिभवसि ॥ ॥ १६ ॥

मण्डल ९

1. *अदाभ्यग्रहः (https://sa.wikisource.org/s/h8v)*

ऋग्वेदः सूक्तं ९.६०

ऋग्वेदः - मण्डल ९
← सूक्तं ९.५९ सूक्तं ९.६० सूक्तं ९.६१ →
अवत्सारः काश्यपः

दे. पवमानः सोमः। गायत्री, ३ पुरउष्णिक्।

प्र गायत्रेण गायत पवमानं विचर्षणिम् ।

इन्दुं सहस्रचक्षसम् ॥१॥

तं त्वा सहस्रचक्षसमथो सहस्रभर्णसम् ।

अति वारमपाविषुः ॥२॥

अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति ।

इन्द्रस्य हार्द्याविशन् ॥३॥

इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे ।

प्रजावद्रेत आ भर ॥४॥

सायणभाष्यम्

'प्र गायत्रेण' इति चतुर्ऋचं षट्त्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षम्। तृतीया पुरउष्णिगाद्यद्वादशका द्व्यष्टका । शिष्टा गायत्र्यः । पवमानः सोमो देवता । तथा चानुक्रान्तं- प्र गायत्रेणोपान्त्या पुरउष्णिक्' इति । उक्तो विनियोगः ॥

प्र गा॑य॒त्रेण॑ गायत॒ पव॑मानं॒ विच॑र्षणिं ।

इन्दुं॑ स॒हस्र॑चक्षसं ॥१

प्र । गा॒य॒त्रेण॑ । गा॒य॒त॒ । पव॑मानम् । विऽच॑र्षणिम् ।

इन्दु॑म् । स॒हस्र॑ऽचक्षसम् ॥१

प्र । गायत्रेण । गायत । पवमानम् । विऽचर्षणिम् ।

इन्दुम् । सहस्रऽचक्षसम् ॥१

“विचर्षणिं विद्रष्टारं “सहस्रचक्षसं बहुदर्शनं “पवमानं पूयमानम् “इन्दुं सोमं “गायत्रेण गायत्रनामधेयेन साम्ना “प्र “गायत हे स्तोतारः गानं कुरुते । स्तुतेत्यर्थः ॥

तं त्वा॑ स॒हस्र॑चक्षस॒मथो॑ स॒हस्र॑भर्णसं ।

अति॒ वार॑मपाविषुः ॥२

त्वम् । त्वा॒ । स॒हस्र॑ऽचक्षसम् । अथो॒ इति॑ । स॒हस्र॑ऽभर्णसम् ।

अति॑ । वार॑म् । अ॒पा॒वि॒षुः॒ ॥२

त्वम् । त्वा । सहस्रऽचक्षसम् । अथो इति । सहस्रऽभर्णसम् ।

अति । वारम् । अपाविषुः ॥२

हे सोम "सहस्रचक्षसं बहुदर्शनम् “अथो अपि च “सहस्रभर्णसं बहुभरणं "तम् अभिषुतं “त्वा त्वां “वारं वालं दशापवित्रम् “अति “अपाविषुः ऋत्विजः पावयन्ति ॥

अति॒ वारा॒न्पव॑मानो असिष्यदत्क॒लशाँ॑ अ॒भि धा॑वति ।

इन्द्र॑स्य॒ हार्द्या॑वि॒शन् ॥३

अति॑ । वारा॑न् । पव॑मानः । अ॒सि॒स्य॒द॒त् । क॒लशा॑न् । अ॒भि । धा॒व॒ति॒ ।

इन्द्र॑स्य । हार्दि॑ । आ॒ऽवि॒शन् ॥३

अति । वारान् । पवमानः । असिस्यदत् । कलशान् । अभि । धावति ।

इन्द्रस्य । हार्दि । आऽविशन् ॥३

“पवमानः पूयमानः सोमः “वारान् अवेर्वालान् “अति अतिक्रम्य “असिष्यदत् स्यन्दते । अपि च “इन्द्रस्य "हार्दि हृदयम् “आविशन् “कलशान् द्रोणान् “अभि “धावति अभिगच्छति ॥

इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे ।

प्रजावद्रेत आ भर ॥४

इन्द्रस्य । सोम । राधसे । शम् । पवस्व । विऽचर्षणे ।

प्रजाऽवत् । रेतः । आ । भर ॥४

इन्द्रस्य । सोम । राधसे । शम् । पवस्व । विऽचर्षणे ।

प्रजाऽवत् । रेतः । आ । भर ॥४

हे “विचर्षणे विद्रष्टः त्वम् “इन्द्रस्य “राधसे राधनाय संसिद्ध्यै “शं सुखकरं रसं “पवस्व क्षर । अपि चास्मभ्यं “प्रजावत् पुत्राद्युपेतं "रेतः उदकमन्नं वा “आ “भर आहर । प्रयच्छेत्यर्थः॥ ॥१७॥ ॥२॥

मण्डल ९

ऋग्वेदः सूक्तं ९.६१

दे. पवमानः सोमः। गायत्री

अया वीती परि स्रव यस्त इन्दो मदेष्वा ।

अवाहन्नवतीर्नव ॥१॥

पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम् ।

अध त्यं तुर्वशं यदुम् ॥२॥

परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत् ।

क्षरा सहस्रिणीरिषः ॥३॥

पवमानस्य ते वयं पवित्रमभ्युन्दतः ।

सखित्वमा वृणीमहे ॥४॥

ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया ।

तेभिर्नः सोम मृळय ॥५॥

स नः पुनान आ भर रयिं वीरवतीमिषम् ।

ईशानः सोम विश्वतः ॥६॥

एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् ।

समादित्येभिरख्यत ॥७॥

समिन्द्रेणोत वायुना सुत एति पवित्र आ ।

सं सूर्यस्य रश्मिभिः ॥८॥

स नो भगाय वायवे पूष्णे पवस्व मधुमान् ।

चारुर्मित्रे वरुणे च ॥९॥

उच्चा ते जातमन्धसो दिवि षद्भूम्या ददे ।

उग्रं शर्म महि श्रवः ॥१०॥

एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् ।

सिषासन्तो वनामहे ॥११॥

स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।

वरिवोवित्परि स्रव ॥१२॥

उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।

इन्दुं देवा अयासिषुः ॥१३॥

तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव ।

य इन्द्रस्य हृदंसनिः ॥१४॥

अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषम् ।

वर्धा समुद्रमुक्थ्यम् ॥१५॥

पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् ।

ज्योतिर्वैश्वानरं बृहत् ॥१६॥

पवमानस्य ते रसो मदो राजन्नदुच्छुनः ।

वि वारमव्यमर्षति ॥१७॥

पवमान रसस्तव दक्षो वि राजति द्युमान् ।

ज्योतिर्विश्वं स्वर्दृशे ॥१८॥

यस्ते मदो वरेण्यस्तेना पवस्वान्धसा ।

देवावीरघशंसहा ॥१९॥

जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे ।

गोषा उ अश्वसा असि ॥२०॥

सम्मिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः ।

सीदञ्छ्येनो न योनिमा ॥२१॥

स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।

वव्रिवांसं महीरपः ॥२२॥

सुवीरासो वयं धना जयेम सोम मीढ्वः ।

पुनानो वर्ध नो गिरः ॥२३॥

त्वोतासस्तवावसा स्याम वन्वन्त आमुरः ।

सोम व्रतेषु जागृहि ॥२४॥

अपघ्नन्पवते मृधोऽप सोमो अराव्णः ।

गच्छन्निन्द्रस्य निष्कृतम् ॥२५॥

महो नो राय आ भर पवमान जही मृधः ।

रास्वेन्दो वीरवद्यशः ॥२६॥

न त्वा शतं चन ह्रुतो राधो दित्सन्तमा मिनन् ।

यत्पुनानो मखस्यसे ॥२७॥

पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।

विश्वा अप द्विषो जहि ॥२८॥

अस्य ते सख्ये वयं तवेन्दो द्युम्न उत्तमे ।

सासह्याम पृतन्यतः ॥२९॥

या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे ।

रक्षा समस्य नो निदः ॥३०॥

सायणभाष्यम्

तृतीयेऽनुवाके सप्त सूक्तानि । तत्र 'अया वीती' इति त्रिंशदृचं प्रथमं सूक्तम् । अमहीयुर्नामाङ्गिरस ऋषिः । गायत्री छन्दः । पवमानः सोमो देवता । तथा चानुक्रान्तम्- अया वीती त्रिंशदमहीयुः' इति । उक्तो विनियोगः ॥

अ॒या वी॒ती परिं स्र॒व यस्तं इंदो॒ मदे॒ष्वा ।

अ॒वाहंन्नव॒तीर्नवं ॥१

अ॒या । वी॒ती । परिं । स्र॒व॒ । यः । ते॒ । इ॒न्दो॒ इतिं । मदेंषु ।
आ ।

अ॒व॒ऽअहंन् । न॒व॒तीः । नवं ॥१

अया । वीती । परि । स्रव । यः । ते । इन्दो इति । मदेषु ।
आ ।

अवऽअहन् । नवतीः । नव ॥१

हे “इन्दो सोम “अया अनेन रसेन “वीती वीत्या इन्द्रस्य भक्षणाय “परि “स्रव परिक्षर । कीदृशेन रसेनेत्यत आह । “ते तव “यः रसः “मदेषु संग्रामेषु “नवतीर्नव इति

नवनवतिसंख्याकाश्च शत्रुपुरीः "अवाहन जघान । अमुं सोमरसं पीत्वा मत्तः सन्निन्द्र उक्तलक्षणाः शत्रुपुरीर्जघानेति कृत्वा रसो जघानेत्युपचारः ॥

पुरः॑ स॒द्य इ॒त्थाधि॑ये॒ दिवो॑दासाय॒ शंब॑रं ।

अध॒ त्यं तु॒र्वशं॒ यदुं॑ ॥२

पुरः॑ । स॒द्यः । इ॒त्थाऽधि॑ये । दिव॑ःऽदासाय । शम्ब॑रम् ।

अध॑ । त्यम् । तु॒र्वशं॑म् । यदुं॑म् ॥२

पुरः । सद्यः । इत्थाऽधिये । दिवःऽदासाय । शम्बरम् ।

अध । त्यम् । तुर्वशम् । यदुम् ॥२

“सद्यः एकस्मिन्नेवाह्नि “पुरः शत्रूणां पुराणि सोमरसोऽवाहन् । “इत्थाधिये सत्यकर्मणे “दिवोदासाय राज्ञे “शम्बरं शत्रुपुराणां स्वामिनम् "अध अथ “त्यं तं “तुर्वशं तुर्वशनामकं राजानं दिवोदासशत्रुं “यदुं यदुनामकं राजानं च वशमानयञ्च । अत्रापि सोमरसं पीत्वा मत्तः सन्निन्द्रः सर्वमेतदकार्षीदिति सोमरसे कर्तृत्वमुपचर्यते ॥

परिं णो॒ अश्वं॑मश्व॒विद्गोमं॑दिंदो॒ हिरं॑ण्यवत् ।

क्षरां सह॒स्रिणी॒रिषः॑ ॥३

परिं । न॒ः । अश्वं॑म् । अ॒श्व॒ऽवित् । गोऽमं॑त् । इ॒न्दो॒ इतिं । हिरं॑ण्यऽवत् ।

क्षरं । स॒ह॒स्रिणीः॑ । इषः॑ ॥३

परि । नः । अश्वम् । अश्वऽवित् । गोऽमत् । इन्दो इति । हिरण्यऽवत् ।

क्षर । सहस्रिणीः । इषः ॥३

हे “इन्दो सोम “अश्ववित् अश्वस्य लम्भकस्त्वं “नः अस्माकम् “अश्वं “गोमत् गोयुक्तं “हिरण्यवत् हिरण्योपेतं धनं च “परि “क्षर । अपि च “सहस्रिणीः बहूनि “इषः अन्नानि क्षर ॥

पवमानस्य ते व॒यं प॒वित्र॑मभ्यु॑द॒तः ।

स॒खि॒त्वमा वृ॑णीमहे ॥४

पवमानस्य । ते॒ । व॒यम् । प॒वित्र॑म् । अ॒भि॒ऽउ॒न्द॒तः ।

स॒खि॒ऽत्वम् । आ । वृ॒णी॒म॒हे॒ ॥४

पवमानस्य । ते । वयम् । पवित्रम् । अभिऽउन्दतः ।

सखिऽत्वम् । आ । वृणीमहे ॥४

हे सोम “पवित्रमभ्युन्दतः पवित्रमभिक्लेदयतः “पवमानस्य क्षरतश्च “ते तव “सखित्वं सख्यं “वयम् अमहीयव आङ्गिरसाः “आ “वृणीमहे प्रार्थयामहे ।।

ये तें प॒वित्रं॑मू॒र्मयों॑ऽभि॒क्षरं॑ति॒ धारं॑या ।

तेभिं॑र्नः सोम मृळय ॥५

ये । त॒ । प॒वित्रं॑म् । ऊ॒र्मयः॑ । अ॒भि॒ऽक्षरं॑न्ति । धारं॑या ।

तेभिः॑ । न॒ः । सो॒म॒ । मृ॒ळ॒य॒ ॥५

ये । ते । पवित्रम् । ऊर्मयः । अभिऽक्षरन्ति । धारया ।

तेभिः । नः । सोम । मृळय ॥५

हे “सोम “ते तव “ये “ऊर्मयः तरङ्गाः “पवित्रं “धारया “क्षरन्ति "तेभिः तैरूर्मिभिः “नः अस्मान् “मृळय सुखय ॥ ॥ १८ ॥

स नः॑ पुना॒न आ भ॑र र॒यिं वी॒रव॑ती॒मिषं॑ ।

ईशा॑नः सोम वि॒श्वतः॑ ॥६

सः । न॒ः । पु॒ना॒नः । आ । भ॒र॒ । र॒यिम् । वी॒रऽव॑तीम् । इषं॑म् ।

ईशा॑नः । सो॒म॒ । वि॒श्वतः॑ ॥६

सः । नः । पुनानः । आ । भर । रयिम् । वीरऽवतीम् । इषम् ।

ईशानः । सोम । विश्वतः ॥६

हे “सोम “विश्वतः सर्वस्य जगतः “ईशानः ईश्वरः “सः अभिषुतः “पुनानः पूयमानस्त्वं “नः अस्मभ्यं “रयिं धनं “वीरवतीं पुत्राद्युपेतम् “इषम् अन्नं च “आ “भर आहर ॥

ए॒तमु॒ त्यं दश॒ क्षिपो॑ मृ॒जंति॒ सिंधु॑मातरं ।

समा॑दि॒त्येभि॑रख्यत ॥७

ए॒तम् । ऊ॒ं इति॑ । त्यम् । दश॑ । क्षिपः॑ । मृ॒जन्ति॑ ।
सिन्धु॑ऽमातरम् ।

सम् । आ॒दि॒त्येभिः॑ । अ॒ख्य॒त॒ ॥७

एतम् । ऊं इति । त्यम् । दश । क्षिपः । मृजन्ति ।
सिन्धुऽमातरम् ।

सम् । आदित्येभिः । अख्यत ॥७

“सिन्धुमातरं यस्य सोमस्य सिन्धवो नद्यो मातरो भवन्ति “त्यं तम् “एतम् इमं सोमं “दश “क्षिपः दशसंख्याका अङ्गुलयः “मृजन्ति शोधयन्ति । अपि च सोऽयं सोमः “आदित्येभिः आदित्यैः “सम् “अख्यत संगच्छते ।।

समिंद्रेंणो॒त वा॒युनां सु॒त एंति प॒वित्र॒ आ ।

सं सूर्यंस्य र॒श्मिभिः॑ ॥८

सम् । इन्द्रेंण । उ॒त । वा॒युनां । सु॒तः । ए॒ति॒ । प॒वित्रें । आ ।

सम् । सूर्यंस्य । र॒श्मिऽभिः॑ ॥८

सम् । इन्द्रेण । उत । वायुना । सुतः । एति । पवित्रे । आ ।

सम् । सूर्यस्य । रश्मिऽभिः ॥८

“सुतः अभिषुतः सोमः “पवित्रे “इन्द्रेण “सम् “एति संगच्छते । “उत अपि च “वायुना समेति । “सूर्यस्य “रश्मिभिः मयूखैरपि “सम् एति ॥

स नो॒ भगा॑य वा॒यवे॑ पू॒ष्णे प॑वस्व॒ मधु॑मान् ।

चारु॑र्मि॒त्रे वरु॑णे च ॥९

सः । नः॒ । भगा॑य । वा॒यवे॑ । पू॒ष्णे । प॒व॒स्व॒ । मधु॑ऽमान् ।

चारुः॑ । मि॒त्रे । वरु॑णे । च॒ ॥९

सः । नः । भगाय । वायवे । पूष्णे । पवस्व । मधुऽमान् ।

चारुः । मित्रे । वरुणे । च ॥९

हे सोम “मधुमान् मधुररसः “चारुः कल्याणस्वरूपश्च “सः अभिषुतस्त्वं “नः अस्माकं यज्ञे “भगाय भगाख्याय देवाय “वायवे च “पूष्णे च “मित्रे मित्राय देवाय “वरुणे वरुणाय “च “पवस्व क्षर ॥

उ॒च्चा ते॑ जा॒तमन्ध॑सो दि॒वि षद्भूम्या द॑दे ।

उ॒ग्रं शर्म॒ महि॒ श्रव॑ः ॥१०

उ॒च्चा । ते॒ । जा॒तम् । अन्ध॑सः । दि॒वि । सत् । भूमि॑ः । आ । द॒दे॒ ।

उ॒ग्रम् । शर्म॑ । महि॑ । श्रव॑ः ॥१०

उच्चा । ते । जातम् । अन्धसः । दिवि । सत् । भूमिः । आ । ददे ।

उग्रम् । शर्म । महि । श्रवः ॥१०

हे सोम “ते तव संबन्धिनः “अन्धसः रसस्य “उच्चा उपरि “जातं जन्म अपि च “दिवि द्युलोके "सत् विद्यमानं स्वतस्तव संबन्धि “उग्रम उद्गूर्णं “शर्म सुखं “महि महत् “श्रवः अन्नं च “भूमिः “आ “ददे। भूम्या ददे इति पदत्रयमामनन्ति । विसर्जनीयलोपः सांहितिकः । भूमिर्भौमा जना मादृशाः । भूमिष्ठैरादीयत इत्यर्थः ॥ ॥ १९ ॥

ए॒ना विश्वा॑न्य॒र्य आ द्यु॒म्नानि॒ मानु॑षाणां ।

सिषा॑संतो वनामहे ॥११

ए॒ना । विश्वा॑नि । अ॒र्यः । आ । द्यु॒म्नानि॑ । मानु॑षाणाम् ।

सिसा॑सन्तः । व॒ना॒म॒हे॒ ॥११

एना । विश्वानि । अर्यः । आ । द्युम्नानि । मानुषाणाम् ।

सिसासन्तः । वनामहे ॥११

“एना एनेनानेन सोमेन "मानुषाणां मनुष्याणां विश्वा “विश्वानि “द्युम्नानि अन्नानि “आ “अर्यः अभिगच्छन्तः “सिषासन्तः संभक्तुमिच्छन्तश्च वयं “वनामहे संभजामहे ||

स न॒ इंद्रा॑य॒ यज्यं॑वे॒ वरुं॑णाय म॒रुद्भ्यः॑ ।

व॒रि॒वो॒वित्परिं स्रव ॥१२

सः । न॒ः । इन्द्रा॑य । यज्य॑वे । वरु॑णाय । म॒रुत्ऽभ्यः॑ ।

व॒रि॒व॒ःऽवित् । परि॑ । स्र॒व॒ ॥१२

सः । नः । इन्द्राय । यज्यवे । वरुणाय । मरुत्ऽभ्यः ।

वरिवःऽवित् । परि । स्रव ॥१२

हे सोम “वरिवोवित् धनस्य लम्भकः पवमानस्त्वं “नः अस्माकं “यज्यवे यष्टव्याय “इन्द्राय “वरुणाय च “मरुद्भ्यः च “परि “स्रव धारया क्षर ॥

उपो॒ षु जा॒तम॒प्तुर॒ं गोभि॑र्भ॒ंगं परि॑ष्कृतं ।

इंदुं॑ दे॒वा अ॑यासिषुः ॥१३

उपो॒ इतिं । सु । जा॒तम् । अ॒प्ऽतुरं॑म् । गोभिः॑ । भ॒ङ्गम् । परिं॑ऽकृतम् ।

इन्दुं॑म् । दे॒वाः । अ॒या॒सि॒षुः ॥१३

उपो इति । सु । जातम् । अप्ऽतुरम् । गोभिः । भङ्गम् । परिऽकृतम् ।

इन्दुम् । देवाः । अयासिषुः ॥१३

“सु “जातं सम्यक्प्रादुर्भूतम् “अप्तुरं वसतीवरीभिः प्रेरितं “भङ्गं शत्रूणां भञ्जकं “गोभिः गोविकारैः पयोभिः “परिष्कृतम् अलंकृतं संस्कृतम् “इन्दुं सोमं “देवाः इन्द्रादयः “उप “अयासिषुः उपागच्छन्ति ।

तमिद्वं॑र्धन्तु नो॒ गिरों॑ व॒त्सं सं॒शिश्वं॑रीरिव ।

य इन्द्रं॑स्य हृ॒दं॑सनिः॑ ॥१४

तम् । इत् । व॒र्ध॒न्तु॒ । नः॒ । गिरः॑ । व॒त्सम् । सं॒शिश्वं॑रीःऽइव ।

यः । इन्द्रं॑स्य । हृ॒द॒म्ऽसनिः॑ ॥१४

तम् । इत् । वर्धन्तु । नः । गिरः । वत्सम् । संशिश्वरीःऽइव ।

यः । इन्द्रस्य । हृदम्ऽसनिः ॥१४

“यः सोमः "इन्द्रस्य “हृदंसनिः हृदयस्य संभक्ता भवति “तमित् तमेव सोमं “नः अस्माकं “गिरः स्तुतिरूपा वाचः “सं “वर्धन्तु सम्यग्वर्धयन्तु । तत्र दृष्टान्तः । “वत्सं बालं “शिश्वरीरिव । यथा शिश्वर्यो बद्धपयस्का मातरो वत्सं वर्धयन्ति तद्वदित्यर्थः ॥

अर्षा णः सोम॒ शं गवे॑ धु॒क्षस्व॑ पि॒प्युषी॒मिषं॑ ।

वर्धा॑ समु॒द्रमु॒क्थ्यं॑ ॥१५

अर्ष॑ । न॒ः । सो॒म॒ । शम् । गवे॑ । धु॒क्षस्व॑ । पि॒प्युषी॑म् ।
इषं॑म् ।

वर्ध॑ । स॒मु॒द्रम् । उ॒क्थ्यं॑म् ॥१५

अर्ष । नः । सोम । शम् । गवे । धुक्षस्व । पिप्युषीम् ।
इषम् ।

वर्ध । समुद्रम् । उक्थ्यम् ॥१५

हे “सोम त्वं “नः अस्माकं “गवे “शं सुखम् “अर्ष क्षर ।
अपि च "पिप्युषीं प्रवृद्धम् “इषम् अन्नं “धुक्षस्व पूरय ।

किंच “उक्थ्यं प्रशस्यं “समुदम् उदकं “वर्ध वर्धय ॥ ॥ २०
॥

पव॑मानो अजीजनद्दि॒वश्चि॒त्रं न त॑न्य॒तुं ।

ज्योति॑र्वैश्वान॒रं बृ॒हत् ॥१६

पव॑मानः । अ॒जी॒ज॒न॒त् । दि॒वः । चि॒त्रम् । न । त॒न्य॒तुम् ।

ज्योति॑ः । वै॒श्वा॒न॒रम् । बृ॒हत् ॥१६

पवमानः । अजीजनत् । दिवः । चित्रम् । न । तन्यतुम् ।

ज्योतिः । वैश्वानरम् । बृहत् ॥१६

“पवमानः सोमः "बृहत् महत् “वैश्वानरं वैश्वानराख्यं “ज्योतिः तेजः “दिवः द्युलोकस्य “चित्रं विचित्रं “तन्यतुं “न

अशनिमिव “अजीजनत् अजनयत् ॥

पवमानस्य ते रसो मदों राजन्नदुच्छुनः ।

वि वारमव्यंमर्षति ॥१७

पवमानस्य । ते । रसः । मदः । राजन् । अदुच्छुनः ।

वि । वारंम् । अव्यंम् । अर्षति ॥१७

पवमानस्य । ते । रसः । मदः । राजन् । अदुच्छुनः ।

वि । वारम् । अव्यम् । अर्षति ॥१७

हे “राजन् दीप्यमान सोम “पवमानस्य क्षरतः “ते तव “अदुच्छुनः रक्षोवर्जितः “मदः मदकरः “रसः “अव्यम् अविमयं “वारं वालं दशापवित्रम् “अर्षति अभिगच्छति ॥

पवं॑मान॒ रस॒स्तव॒ दक्षो॒ वि रा॑जति द्यु॒मान् ।

ज्योति॒र्विश्वं॒ स्व॑र्दृ॒शे ॥१८

पवं॑मान । रसः॑ । तवं॑ । दक्षः॑ । वि । रा॒ज॒ति॒ । द्यु॒ऽमान् ।

ज्योतिः॑ । विश्वं॑म् । स्वः॑ । दृ॒शे ॥१८

पवमान । रसः । तव । दक्षः । वि । राजति । द्युऽमान् ।

ज्योतिः । विश्वम् । स्वः । दृशे ॥१८

हे “पवमान सोम “तव त्वदीयः “दक्षः वृद्धः "द्युमान् दीप्तिमान् “रसः “वि “राजति प्रकाशते । न केवलं स्वयमेव प्रकाशते किंतु “विश्वं व्याप्तं “स्वः सर्वं “ज्योतिः तेजश्च “दृशे द्रष्टुं करोतीति शेषः ।।

यस्ते॒ मदो॒ वरें॑ण्य॒स्तेना॑ पव॒स्वांध॑सा ।

दे॒वा॒वीरं॑घशंस॒हा ॥१९

यः । ते॒ । मदः॑ । वरें॑ण्यः । तेन॑ । प॒व॒स्व॒ । अन्ध॑सा ।

दे॒व॒ऽअ॒वीः । अ॒घ॒शं॒स॒ऽहा ॥१९

यः । ते । मदः । वरेण्यः । तेन । पवस्व । अन्धसा ।

देवऽअवीः । अघशंसऽहा ॥१९

हे सोम “ते तव “देवावीः देवकामः “अघशंसहा राक्षसानां हन्ता “वरेण्यः सर्वैर्वरणीयः “मदः मदकरः “यः रसो विद्यते “तेन रसेन “अन्धसा अदनीयेन “पवस्व क्षर ॥

ज॒घ्निर्वृ॒त्रम॑मि॒त्रियं॒ सस्नि॒र्वाजं॑ दि॒वेदि॑वे ।

गो॒षा उं॑ अश्व॒सा अं॑सि ॥२०

ज॒घ्निः । वृ॒त्रम् । अ॒मि॒त्रियं॑म् । सस्निः॑ । वाजं॑म् ।
दि॒वेऽदि॑वे ।

गो॒ऽसाः । उ॒ं इति॑ । अ॒श्व॒ऽसाः । अ॒सि॒ ॥२०

ज॒घ्निः । वृत्रम् । अमित्रियम् । सस्निः । वाजम् ।
दिवेऽदिवे ।

गोऽसाः । उं इति । अश्वऽसाः । असि ॥२०

हे सोम त्वम् “अमित्रियम् अमित्रभवं “वृत्रं शत्रुं “जघ्निः
हन्ता “असि भवसि । किंच “दिवेदिवे प्रतिदिनं “वाजं

संग्रामं “सस्निः संभक्तासि । किंच “गोषाः गवां दातासि । “अश्वसाः अश्वानां दाता चासि ॥ ॥ २१ ॥

सम्मिं॑श्लो अरु॒षो भ॑व सूप॒स्थाभि॒र्न धे॒नुभिः॑ ।

सीदं॑छ्ये॒नो न योनि॒मा ॥२१

सम्ऽमिं॑श्लः । अ॒रु॒षः । भ॒व॒ । सु॒ऽउ॒प॒स्थाभिः॑ । न । धे॒नुऽभिः॑ ।

सीदं॑न् । श्ये॒नः । न । योनिं॑म् । आ ॥२१

सम्ऽमिश्लः । अरुषः । भव । सुऽउपस्थाभिः । न । धेनुऽभिः ।

सीदन् । श्येनः । न । योनिम् । आ ॥२१

हे सोम त्वं “सूपस्थाभिः शोभनोपस्थानाभिः “धेनुभिः गोभिः । गोविकारैः पयोभिरित्यर्थः । “संमिश्लः संमिश्रितः “श्येनो “न यथा श्येनः शीघ्रमागत्य स्थानमासीदति तद्वत् “योनिं स्वकीयं स्थानम् “आ “सीदन् । “न संप्रत्यर्थे । इदानीम् "अरुषः आरोचमानः “भव ॥

स पंवस्व॒ य आवि॒थेंद्रं॑ वृ॒त्राय॒ हंतंवे ।

व॒व्रि॒वांसं॑ म॒हीर॒पः ॥२२

सः । प॒व॒स्व॒ । यः । आविंथ । इन्द्रंम् । वृ॒त्रायं । हन्तंवे ।

व॒व्रि॒ऽवांसंम् । म॒हीः । अ॒पः ॥२२

सः । पवस्व । यः । आविथ । इन्द्रम् । वृत्राय । हन्तवे ।

वव्रिऽवांसम् । महीः । अपः ॥२२

हे सोम “यः त्वं “महीः महतीः “अपः महान्त्युदकानि “वव्रिवांसं निरुन्धानं “वृत्राय वृत्रं “हन्तवे हन्तुम् “इन्द्रम् “आविथ अरक्षः “सः त्वं “पवस्व धारया क्षर । सोमं पीत्वा मत्तः सन्निन्द्रो महान्त्युदकानि निरुन्धानं वृत्रं जघानेत्यर्थः ॥

सु॒वीरा॑सो व॒यं धना॒ जये॑म सोम मीढ्वः ।

पु॒ना॒नो व॑र्ध नो॒ गिरः॑ ॥२३

सु॒ऽवीरा॑सः । व॒यम् । धना॑ । जये॑म । सो॒म॒ । मी॒ढ्व॒ः॒ ।

पु॒ना॒नः । व॒र्ध॒ । नः॒ । गिरः॑ ॥२३

सुऽवीरासः । वयम् । धना । जयेम । सोम । मीढ्वः ।

पुनानः । वर्ध । नः । गिरः ॥२३

“सुवीरासः सुवीराः कल्याणपुत्राः “वयम् अमहीयव आङ्गिरसाः “धना शत्रूणां धनानि "जयेम । शत्रून् जित्वा तदीयानि धनानि स्वीकुर्यामेत्यर्थः । हे "मीढ्वः सेक्तः “सोम “पुनानः पूयमानस्त्वं “नः अस्माकं “गिरः स्तुतिरूपा वाचश्च “वर्ध वर्धय ॥

त्वोतां॑सुस्तवाव॑सा॒ स्याम॑ वु॒न्वंत॑ आ॒मुरः॑ ।

सोम॑ व्र॒तेषु॑ जागृहि ॥२४

त्वाऽऊं॑तासः । तव॑ । अव॑सा । स्याम॑ । वु॒न्वन्तः॑ । आ॒ऽमुरः॑ ।

सोम॑ । व्र॒तेषु॑ । जा॒गृ॒हि॒ ॥२४

त्वाऽऊतासः । तव । अवसा । स्याम । वन्वन्तः । आऽमुरः ।

सोम । व्रतेषु । जागृहि ॥२४

हे “सोम “तव त्वदीयेन “अवसा रक्षणेन “त्वोतासः त्वया रक्षिताः सन्तः “वन्वन्तः शत्रून् भजमानाः “आमुरः तेषामभिमारकाः “स्याम भवेम । “व्रतेषु अस्माकं कर्मसु “जागृहि प्रबुद्धो भव ॥

अ॒प॒घ्नन्प॑वते॒ मृधोऽप॒ सोमो॒ अरा॑व्णः ।

गच्छ॒न्नि॑न्द्र॑स्य निष्कृ॒तं ॥२५

अ॒प॒ऽघ्नन् । प॒व॒ते॒ । मृधः॑ । अप॑ । सोमः॑ । अरा॑व्णः ।

गच्छ॑न् । इन्द्र॑स्य । निः॒ऽकृ॒तम् ॥२५

अपऽघ्नन् । पवते । मृधः । अप । सोमः । अराव्णः ।

गच्छन् । इन्द्रस्य । निःऽकृतम् ॥२५

“सोमः "मृधः हिंसकाञ्छत्रून् "अपघ्नन् मारयन् “अराव्णः शक्तौ सत्यां धनानामदातॄंश्च “अप घ्नन् “इन्द्रस्य "निष्कृतं स्थानं “गच्छन् प्राप्नुवन् “पवते धारया क्षरति ॥ ॥ २२ ॥

म॒हो नों रा॒य आ भंर॒ पवंमान ज॒ही मृधः॑ ।

रास्वेंँदो वी॒रव॒द्यशः॑ ॥२६

म॒हः । न॒ः । रा॒यः । आ । भ॒र॒ । पवंमान । ज॒हि । मृधः॑ ।

रास्वं । इ॒न्दो॒ इतिं । वी॒रऽवंत् । यशः॑ ॥२६

महः । नः । रायः । आ । भर । पवमान । जहि । मृधः ।

रास्व । इन्दो इति । वीरऽवत् । यशः ॥२६

हे “पवमान “इन्दो सोम “नः अस्माकं “महः महान्ति "रायः धनानि “आ “भर आहर । "मृधः हिंसकाञ्छत्रूंश्च "जहि मारय । “वीरवत् पुत्राद्युपेतां “यशः कीर्तिं च "रास्व अस्मभ्यं देहि ॥

न त्वां श॒तं च॒न ह्रुतो॒ राधो॒ दित्सं॑त॒मा मिं॑नन् ।

यत्पुं॑ना॒नो मं॑ख॒स्यसें ॥२७

न । त्वा॒ । श॒तम् । च॒न । ह्रुतः॑ । राधः॑ । दित्सं॑न्तम् । आ । मि॒न॒न् ।

यत् । पु॒ना॒नः । म॒ख॒स्यसें ॥२७

न । त्वा । शतम् । चन । ह्रुतः । राधः । दित्सन्तम् । आ । मिनन् ।

यत् । पुनानः । मखस्यसे ॥२७

हे सोम “राधः धनम् “आ “दित्सन्तम् आदातुमिच्छन्तं “त्वा त्वां “शतं “चन बहवोऽपि “ह्रुतः हिंसकाः शत्रवः “न “मिनन् न हिंसन्ति । कदेत्यत्राह । “यत् यदा “पुनानः पूयमानस्त्वं “मखस्यसे अस्मभ्यं धनं दातुमिच्छसि ।।

पवंस्वेंदो॒ वृषां सु॒तः कृ॒धी नों य॒शसो॒ जनें ।

विश्वा॒ अप॒ द्विषों जहि ॥२८

पवंस्व । इ॒न्दो॒ इतिं । वृषां । सु॒तः । कृ॒धि । न॒ः । य॒शसः॑ । जनें ।

विश्वाः॑ । अपं । द्विषः॑ । ज॒हि॒ ॥२८

पवस्व । इन्दो इति । वृषा । सुतः । कृधि । नः । यशसः । जने ।

विश्वाः । अप । द्विषः । जहि ॥२८

हे “इन्दो सोम “सुतः अभिषुतः “वृषा सेक्ता त्वं “पवस्व धारया क्षर। “जने जनपदेषु “नः अस्मान् “यशसः यशस्विनः “कृधि कुरु । “विश्वाः सर्वान् “द्विषः द्वेष्टॄन् शत्रून् “अप "जहि मारय च ॥

अस्यं ते स॒ख्ये व॒यं तवेंदो द्यु॒म्न उंत्त॒मे ।

सा॒स॒ह्यामं पृतन्यु॒तः ॥२९

अस्यं । ते॒ । स॒ख्ये । व॒यम् । तवं । इ॒न्दो॒ इतिं । द्यु॒म्ने । उ॒त्ऽत॒मे ।

स॒स॒ह्याम॑ । पृ॒त॒न्य॒तः ॥२९

अस्य । ते । सख्ये । वयम् । तव । इन्दो इति । द्युम्ने । उत्ऽतमे ।

ससह्याम । पृतन्यतः ॥२९

हे “इन्दो सोम “अस्य अस्मिन् यागे वर्तमानस्य “ते तव “सख्ये सखित्वे सति “वयम् अमहीयव आङ्गिरसा: “तव त्वदीये “उतमे श्रेष्ठे “द्युम्ने अन्ने तृप्तिं प्राप्ता: । तथा च यास्कः-- द्युम्नं द्योततेर्यशो वान्नं वा ' (निरु, ५. ५) इति । “पृतन्यतः युद्धमिच्छतः शत्रून् “ससह्याम अभिभवेम ॥

या तें भी॒मान्यायु॑धा ति॒ग्मानि॒ संति॒ धूर्व॑णे ।

रक्षा॑ समस्य नो नि॒दः ॥३०

या । ते॒ । भी॒मानिं । आयुंधा । ति॒ग्मानिं । सन्तिं । धूर्वंणे ।

रक्षं । स॒म॒स्य॒ । न॒ः । नि॒दः ॥३०

या । ते । भीमानि । आयुधा । तिग्मानि । सन्ति । धूर्वणे ।

रक्ष । समस्य । नः । निदः ॥३०

हे सोम “ते तव “या यानि “भीमानि शत्रूणां भयंकराणि “तिग्मानि तीक्ष्णानि “आयुधा आयुधानि “धूर्वणे शत्रुवधार्थं “सन्ति तैरायुधैः “समस्य सर्वस्य शत्रोः “निदः निन्दायाः “नः अस्मान् “रक्ष पालय ॥ ॥ २३ ॥

टिप्पणी

९.६१.७ एतमु त्यं दश क्षिपो इति

इहवद्वामदेव्यम् (https://sa.wikisource.org/s/2hgv)

९.६१.१० उच्चा ते जातमिति

उच्चैःश्रवा उपरि टिप्पणी (http://puranastudy.freeoda.com/pur_index3/uchchaish.htm)

अध्वर्युर् आग्रायणं ग्रहं गृह्णन् हिंकरोति। तद् एव हिंकृतं भवति। अथोद्गात्रैकर्चो गायत्रं गायति उच्चा ते जातम् अन्धसा इति। स उदित्येवेतो देवेभ्यो हव्यं वहति दिवि सद् भूम्य् आ ददे इत्य् अमुतो वृष्टिम् आच्यावयति। ताव् इमौ लोकौ सवासिनौ करोति। ताव् अस्मै कामं पिन्वाते। कामम् अस्मा इमौ लोकौ

पिन्वाते य एवं वेद॥ - जैब्रा १.८१ (https://sa.wikisource.org/s/eh0)

मरुत्वतीः प्रतिपदो भवन्ति। मरुत्वन्तं ग्रहं गृह्णन्ति। मरुत्वान्वा इन्द्रो वृत्रम् अहन् वार्त्रहत्याय। उच्चा ते जातम् अन्धसा इत्य् अन्धस्वतीर् भवन्ति। अहर् वा अन्धः। अह्ना एव रम्भः। यज्ञो वा अन्धः। यज्ञस्यैवारम्भः। त्रीणि यज्ञे ऽन्धांसीति ह स्म पूर्वे ब्राह्मणा मीमांसन्ते उच्चा ते जातम् अन्धसा॥ वसोर् मन्दानम् अन्धसः(८.८८.१ (https://sa.wikisource.org/s/13lb))॥ पुरोजिती वो अन्धसः इति(९.१०१.१ (https://sa.wikisource.org/s/13hx))। त्रयः पशुषु भोगाः प्रातर् मध्यंदिने सायम्। तान् एवैतेनावरुन्द्धे॥ इमे वै लोका सह सन्तौ व्यैताम्। तयोर् न किं चन समपतत्। ते देवमनुष्या अशनायन्। इतः प्रदानाद् धि त देवा

जीवन्त्य् अमुतः प्रदानान् मनुष्याः। स एताः प्रजापतिर् इति चोपश्याद् उच्चा ते जातम् अन्धसा इति। स उदित्येवेतो देवेभ्यो हव्यम् अवहत् दिवि सद् भूम्य् आददे इत्य् अमुतो वृष्टिम् अच्यावयत्। ताव् इमौ लोकौ सवासिनाव् अकरोत्। ताव् अस्मै कामम् अपिन्वाताम्। कामम् अस्मा इमौ लोकौ पिन्वाते य एवं वेद॥ तासु गायत्रम् उक्तब्राह्मणम्॥ जैब्रा १.११६ (https://sa.wikisource.org/s/eh9)

उच्चा ते जातम् अन्धसेत्य् अन्धस्वतीर् भवत्य् अन्धस्वद् वै जगत्यै रूपं - तेन जगत्यै रूपान् न यन्ति। - जैब्रा २.२३७ (https://sa.wikisource.org/s/eft)

अथ यद् वो ऽवोचं दैव्यं स्म मिथुनम् उपेतेत्य्, उच्चा ते जातम् अन्धसा, स्वादिष्ठया मदिष्ठयेत्य् एते एव वस् तद् गायत्र्याव् अवोचम् इति। एतद् वै दैव्यं मिथुनं यद् एते गायत्र्या - उच्चा त इति पुंसो रूपं, स्वादिष्ठयेति स्त्रियै। तद् एतन् मिथुनं प्रजननं क्रियते। - जैब्रा २.४२२ (https://sa.wikisource.org/s/eg5)

उच्चा ते जातम् अन्धसेति। माध्यन्दिनस्य पवमानस्यान्धस्वतीर् गायत्र्यो भवन्त्य् - अन्नं वा अन्धो - ऽन्नाद्यस्यैवावरुद्ध्यै। दिवि सद् भूम्य् आ दद इति द्यावापृथिवीया भवन्ति। अ - प्रतिष्ठितम् इव वा एतद् अहर् यद् वैरूपम्। तद् यद् एता द्यावापृथिवीया भवन्त्य् अहर् एवैताभिः प्रतिष्ठापयन्ति। स न इन्द्राय यज्यवे वरुणाय मरुद्भ्य इति मरुत्वतीर् भवन्ति। मरुत्वद् वै

मध्यन्दिनस्य रूपम्। मध्यन्दिनस्यैव तद् रूपान् न यन्ति। एना विश्वान्य् अर्य आ इति विश्ववतीर् भवन्ति। वैश्वदेवं ह्य् एतद् अहः। तासु गायत्रम् उक्तब्राह्मणम्। - जै.ब्रा ३.४० (https://sa.wikisource.org/s/eie)

आभीकम् (https://sa.wikisource.org/s/2hvu)

आजिगम् (https://sa.wikisource.org/s/2hvv) (ऊहगानम्)

आमहीयवम् (https://sa.wikisource.org/s/1z6k)

आजिगम् (https://sa.wikisource.org/s/2gpv) (ग्रामगेयः)

तृतीयमहः -- उच्चा ते जातमन्धस इति गायत्री भवति। उद्वद्वा एतदहर्यत् तृतीयं तदेव तदभिवदति। अन्धस्वती भवत्यहर्वा अन्धोऽह्न आरम्भः - तांब्रा १२.३.१ (https://sa.wikisource.org/s/tvr)

दशमेऽहनि माध्यन्दिनपवमानस्य स्तोत्रीयं तृचं -- उच्चा ते जातमन्धस इत्युद्वत्यो गायत्र्यो भवन्त्युत्थानस्य रूपम् - तांब्रा १५.९.१ (https://sa.wikisource.org/s/tvt)

९.६१.१३ उपोषु जातमप्तुरम् इति

यामानि त्रीणि (https://sa.wikisource.org/s/2i9d) (ग्रामगेयः)

श्रुध्यम् (https://sa.wikisource.org/s/1zh0)

९.६१.१९ यस्ते मदो वरेण्य इति

दक्षणिधनोमौक्षम् (https://sa.wikisource.org/s/2hlx)

अग्नेरर्कः (https://sa.wikisource.org/s/2hly)

अध्यर्ध्डेडं सोमसाम (https://sa.wikisource.org/s/2hlz)

भासम् (https://sa.wikisource.org/s/2ic1) (ग्रामगेयः)

बलभित् (https://sa.wikisource.org/s/20ir)

यस्ते मदो वरेण्य इति गायत्री भवति। मदवद्वै रसवत् तृतीयसवनं मदमेव तद्रसं दधाति - पञ्च.ब्रा. ११.१०.१ (https://sa.wikisource.org/s/tvz) , १४.५.१

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.६२

ऋग्वेदः - मण्डल ९
← सूक्तं ९.६१
सूक्तं ९.६२
सूक्तं ९.६३ →
जमदग्निर्भार्गवः।

दे. पवमानः सोमः। गायत्री।

एते असृग्रमिन्दवस्तिरः पवित्रमाशवः ।

विश्वान्यभि सौभगा ॥१॥

विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।

तना कृण्वन्तो अर्वते ॥२॥

कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम् ।

इळामस्मभ्यं संयतम् ॥३॥

असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः ।

श्येनो न योनिमासदत् ॥४॥

शुभ्रमन्धो देववातमप्सु धूतो नृभिः सुतः ।

स्वदन्ति गावः पयोभिः ॥५॥

आदीमश्वं न हेतारोऽशूशुभन्नमृताय ।

मध्वो रसं सधमादे ॥६॥

यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये ।

ताभिः पवित्रमासदः ॥७॥

सो अर्षेन्द्राय पीतये तिरो रोमाण्यव्यया ।

सीदन्योना वनेष्वा ॥८॥

त्वमिन्दो परि स्रव स्वादिष्ठो अङ्गिरोभ्यः ।

वरिवोविद्घृतं पयः ॥९॥

अयं विचर्षणिर्हितः पवमानः स चेतति ।

हिन्वान आप्यं बृहत् ॥१०॥

एष वृषा वृषव्रतः पवमानो अशस्तिहा ।

करद्वसूनि दाशुषे ॥११॥

आ पवस्व सहस्रिणं रयिं गोमन्तमश्विनम् ।

पुरुश्चन्द्रं पुरुस्पृहम् ॥१२॥

एष स्य परि षिच्यते मर्मृज्यमान आयुभिः ।

उरुगायः कविक्रतुः ॥१३॥

सहस्रोतिः शतामघो विमानो रजसः कविः ।

इन्द्राय पवते मदः ॥१४॥

गिरा जात इह स्तुत इन्दुरिन्द्राय धीयते ।

विर्योना वसताविव ॥१५॥

पवमानः सुतो नृभिः सोमो वाजमिवासरत् ।

चमूषु शक्मनासदम् ॥१६॥

तं त्रिपृष्ठे त्रिवन्धुरे रथे युञ्जन्ति यातवे ।

ऋषीणां सप्त धीतिभिः ॥१७॥

तं सोतारो धनस्पृतमाशुं वाजाय यातवे ।

हरिं हिनोत वाजिनम् ॥१८॥

आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः ।

शूरो न गोषु तिष्ठति ॥१९॥

आ त इन्दो मदाय कं पयो दुहन्त्यायवः ।

देवा देवेभ्यो मधु ॥२०॥

आ नः सोमं पवित्र आ सृजता मधुमत्तमम् ।

देवेभ्यो देवश्रुत्तमम् ॥२१॥

एते सोमा असृक्षत गृणानाः श्रवसे महे ।

मदिन्तमस्य धारया ॥२२॥

अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।

सनद्वाजः परि स्रव ॥२३॥

उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः ।

गृणानो जमदग्निना ॥२४॥

पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः ।

अभि विश्वानि काव्या ॥२५॥

त्वं समुद्रिया अपोऽग्रियो वाच ईरयन् ।

पवस्व विश्वमेजय ॥२६॥

तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।

तुभ्यमर्षन्ति सिन्धवः ॥२७॥

प्र ते दिवो न वृष्टयो धारा यन्त्यसश्चतः ।

अभि शुक्रामुपस्तिरम् ॥२८॥

इन्द्रायेन्दुं पुनीतनोग्रं दक्षाय साधनम् ।

ईशानं वीतिराधसम् ॥२९॥

पवमान ऋतः कविः सोमः पवित्रमासदत् ।

दधत्स्तोत्रे सुवीर्यम् ॥३०॥

सायणभाष्यम्

'एते असृग्रम्' इति त्रिंशदृचं द्वितीयं सूक्तं भार्गवस्य जमदग्नेरार्षं गायत्रं पवमानसोमदेवताकम् । तथा

चानुक्रान्तम्-- एते असृग्रं जमदग्निः' इति । गतो विनियोगः ॥

ए॒ते अ॑सृग्र॒मिंद॑वस्ति॒रः प॒वित्र॑मा॒शव॑: ।

विश्वा॑न्य॒भि सौभ॑गा ॥१

ए॒ते । अ॒सृ॒ग्र॒म् । इन्द॑वः । ति॒रः । प॒वित्र॑म् । आ॒शव॑: ।

विश्वा॑नि । अ॒भि । सौभ॑गा ॥१

एते । असृग्रम् । इन्दवः । तिरः । पवित्रम् । आशवः ।

विश्वानि । अभि । सौभगा ॥१

“आशवः शीघ्राः “एते पवमानाः “इन्दवः सोमाः “विश्वानि सर्वाणि “सौभगा सौभगानि धनान्यभिलक्ष्य “पवित्रं “तिरः

“असृग्रम् ऋत्विग्भिः सृज्यन्ते ॥

वि॒घ्नंतो॑ दुरि॒ता पु॒रु सु॒गा तो॒कायं॑ वा॒जिनः॑ ।

तना॑ कृ॒ण्वंतो॒ अर्वं॑ते ॥२

वि॒ऽघ्नन्तः॑ । दुः॒ऽइ॒ता । पु॒रु । सु॒ऽगा । तो॒कायं॑ । वा॒जिनः॑ ।

तना॑ । कृ॒ण्वन्तः॑ । अर्वं॑ते ॥२

विऽघ्नन्तः । दुःऽइता । पुरु । सुऽगा । तोकाय । वाजिनः ।

तना । कृण्वन्तः । अर्वते ॥२

“वाजिनः बलवन्तः सोमाः “पुरु बहूनि “दुरिता दुरितानि “विघ्नन्तः विशेषेण नाशयन्तः “तोकाय अस्माकं पुत्राय “अर्वते अश्वाय च "सुगा सुखानि “तना धनानि च “कृण्वन्तः कुर्वन्तः तिरः पवित्रं सृज्यन्त इति संबन्धः ॥

कृ॒ण्वंतो॒ वरिंवो॒ गवे॒ऽभ्यंर्षंति सुष्टु॒तिं ।

इळा॑म॒स्मभ्यं॑ सं॒यतं॑ ॥३

कृ॒ण्वन्तः॑ । वरिं॑वः । गवें । अ॒भि । अ॒र्ष॒न्ति॒ । सु॒ऽस्तु॒तिम् ।

इळां॑म् । अ॒स्मभ्यं॑म् । स॒म्ऽयतं॑म् ॥३

कृण्वन्तः । वरिवः । गवे । अभि । अर्षन्ति । सुऽस्तुतिम् ।

इळाम् । अस्मभ्यम् । सम्ऽयतम् ॥३

अस्माकं “गवे “अस्मभ्यं च “संयतं यदस्मान् संयच्छति तत् “वरिवः धनम् “इळाम् अन्नं च “कृण्वन्तः कुर्वन्तः सोमाः “सुष्टुतिम् अस्मदीयां शोभनां स्तुतिम् “अभ्यर्षन्ति आभिमुख्येन गच्छन्ति ॥

असा॑व्यं॒शुर्मदा॑या॒प्सु दक्षो॑ गिरि॒ष्ठाः ।

श्ये॒नो न योनि॒मास॑दत् ॥४

असा॑वि । अं॒शुः । मदा॑य । अ॒प्ऽसु । दक्षः॑ । गि॒रि॒ऽस्थाः ।

श्ये॒नः । न । योनि॑म् । आ । अ॒स॒द॒त् ॥४

असावि । अंशुः । मदाय । अप्ऽसु । दक्षः । गिरिऽस्थाः ।

श्येनः । न । योनिम् । आ । असदत् ॥४

“गिरिष्ठाः पर्वते जातः “अंशुः सोमः “मदाय मदार्थम् “असावि अभिषुतः । “अप्सु वसतीवरीषु “दक्षः प्रवृद्धश्च भवति । किंच “श्येनो “न यथा श्येनो वेगेनागत्य स्थानमासीदति तद्वदयं सोमो “योनिं स्वकीयं स्थानम् “आसदत् आसीदति ॥

शु॒भ्रमंधो॑ दे॒ववा॑तम॒प्सु धू॒तो नृभिः॑ सु॒तः ।

स्वदं॑ति॒ गाव॒ः पयो॑भिः ॥५

शु॒भ्रम् । अन्धः॑ । दे॒वऽवा॑तम् । अ॒प्ऽसु । धू॒तः । नृऽभिः॑ । सु॒तः ।

स्वदं॑न्ति । गावः॑ । पयः॑ऽभिः ॥५

शुभ्रम् । अन्धः । देवऽवातम् । अप्ऽसु । धूतः । नृऽभिः । सुतः ।

स्वदन्ति । गावः । पयःऽभिः ॥५

यत् "देववातं देवैः प्रार्थितं “शुभ्रं शोभनम् “अन्धः अन्नं “गावः पशवः “पयोभिः आशिरैः “स्वदन्ति स्वादयन्ति सोऽयं सोमः “नृभिः नेतृभिर्ऋत्विग्भिः “सुतः अभिषुतः सन् "अप्सु वसतीवरीषु “धूतः शोधितो भवति ॥ ॥ २४ ॥

आदी॒मश्वं॒ न हेता॒रोऽशूं॑शुभन्न॒मृता॑य ।

मध्वो॒ रसं॑ सध॒मादे॑ ॥६

आत् । ई॒म् । अश्वं॑म् । न । हेता॑रः । अशूं॑शुभन् । अ॒मृता॑य ।

मध्वः॑ । रसं॑म् । स॒ध॒ऽमादे॑ ॥६

आत् । ईम् । अश्वम् । न । हेतारः । अशूशुभन् । अमृताय ।

मध्वः । रसम् । सधऽमादे ॥६

“आत् अनन्तरं “हेतारः प्रेरका ऋत्विजः "सधमादे यज्ञे "ईम् एनं “मध्वः मदकरस्य सोमस्य “रसम् “अमृताय अमरणाय “अश्वं “न अश्वमिव “अशूशुभन् शोभयन्ति ॥

यास्ते॒ धारां मधु॒श्चुतोऽसृंग्रमिंद ऊ॒तयें ।

ताभिः॑ प॒वित्र॒मासंदः ॥७

याः । ते॒ । धाराः॑ । म॒धु॒ऽश्चुतः॑ । असृंग्रम् । इ॒न्दो॒ इतिं । ऊ॒तयें ।

ताभिः॑ । प॒वित्रंम् । आ । अ॒स॒दः॒ ॥७

याः । ते । धाराः । मधुऽश्चुतः । असृग्रम् । इन्दो इति ।
ऊतये ।

ताभिः । पवित्रम् । आ । असदः ॥७

हे “इन्दो सोम “ते तव "मधुश्चुतः मधुररसस्य श्चोतयित्र्यः “याः “धाराः “ऊतये रक्षणाय “असृग्रं सृज्यन्ते “ताभिः धाराभिस्त्वं “पवित्रम् “आसदः आसीद ॥

सो अ॒र्षेंद्रा॑य पी॒तयें ति॒रो रोमा॑ण्य॒व्यया॑ ।

सीद॒न्योना॒ वने॒ष्वा ॥८

सः । अ॒र्ष॒ । इन्द्रा॑य । पी॒तयें । ति॒रः । रोमा॑णि । अ॒व्यया॑ ।

सीदं॑न् । योना॑ । वनें॑षु । आ ॥८

सः । अर्ष । इन्द्राय । पीतये । तिरः । रोमाणि । अव्यया ।

सीदन् । योना । वनेषु । आ ॥८

हे सोम “सः अभिषुतस्त्वम् “अव्यया अव्ययानि अविमयानि “रोमाणि वालानि “तिरः तिरस्कुर्वन् “वनेषु पात्रेषु “योना योनौ स्थाने “आ “सीदन् “इन्द्राय इन्द्रस्य “पीतये पानाय “अर्ष क्षर ॥

त्वमिं॑दो॒ परिं॑ स्र॒व॒ स्वादिं॑ष्ठो॒ अंगिं॑रोभ्यः ।

व॒रि॒वो॒विद्घृ॒तं पयः॑ ॥९

त्वम् । इ॒न्दो॒ इतिं॑ । परिं॑ । स्र॒व॒ । स्वादिं॑ष्ठः । अङ्गिं॑रःऽभ्यः ।

व॒रि॒व॒ःऽवित् । घृ॒तम् । पयः॑ ॥९

त्वम् । इन्दो इति । परि । स्रव । स्वादिष्ठः । अङ्गिरःऽभ्यः
।

वरिवःऽवित् । घृतम् । पयः ॥९

हे “इन्दो सोम "स्वादिष्टः स्वादुतमः “वरिवोवित्
अस्मदभिलषितस्य धनस्य लम्भकश्च “त्वम् “अङ्गिरोभ्यः
अङ्गिरसामर्थाय “घृतम् आज्यं “पयः च "परि “स्रव परिक्षर
॥

अ॒यं विचं॑र्षणिर्हि॒तः पवं॑मान॒ः स चें॑तति ।

हि॒न्वा॒न आप्यं॑ बृ॒हत् ॥१०

अ॒यम् । विऽचं॑र्षणिः । हि॒तः । पवं॑मानः । सः । चे॒त॒ति॒ ।

हि॒न्वा॒नः । आप्यं॑म् । बृ॒हत् ॥१०

अयम् । विऽचर्षणिः । हितः । पवमानः । सः । चेतति ।

हिन्वानः । आप्यम् । बृहत् ॥१०

"विचर्षणिः विद्रष्टा “हितः पात्रेषु निहितः “पवमानः “अयं सोमः “आप्यम् अप्सु भवं “बृहत् महदन्नं “हिन्वानः प्रेरयन् “चेतति सर्वैः ज्ञायते ॥ ॥ २५ ॥

एष वृषा वृषंव्रतः पवंमानो अशस्तिहा ।

करद्वसूंनि दाशुषें ॥११

एषः । वृषां । वृषंऽव्रतः । पवंमानः । अशस्तिऽहा ।

करंत् । वसूंनि । दाशुषें ॥११

एषः । वृषा । वृषऽव्रतः । पवमानः । अशस्तिऽहा ।

करत् । वसूनि । दाशुषे ॥११

"वृषा कामानां सेक्ता “वृषव्रतः वृषकर्मा “अशस्तिहा राक्षसानां हन्ता “पवमानः “एषः सोमः “दाशुषे हविषां दात्रे यजमानाय “वसूनि धनानि "करत् करोति । प्रयच्छतीत्यर्थः ॥

आ पंवस्व सह॒स्रिणं र॒यिं गोमंतम॒श्विनं ।

पु॒रु॒श्चं॒द्रं पुंरु॒स्पृहं ॥१२

आ । प॒व॒स्व॒ । स॒ह॒स्रिणंम् । र॒यिम् । गोऽमंन्तम् ।
अ॒श्विनंम् ।

पु॒रु॒ऽच॒न्द्रम् । पु॒रु॒ऽस्पृहंम् ॥१२

आ । पवस्व । सहस्रिणम् । रयिम् । गोऽमन्तम् ।
अश्विनम् ।

पुरुऽचन्द्रम् । पुरुऽस्पृहम् ॥१२

हे सोम त्वं “सहस्रिणं बहुसंख्याकं “गोमन्तं गोभिरुपेतम् “अश्विनम् अश्ववन्तं “पुरुश्चन्द्रं बहूनां हर्षकं “पुरुस्पृहं बहुस्पृहणीयं “रयिं धनम् “आ “पवस्व परिक्षर ॥

ए॒ष स्य परिं षिच्यते मर्मृ॒ज्यमां॑न आ॒युभिः॑ ।

उ॒रु॒गा॒यः क॒विक्रं॑तुः ॥१३

ए॒षः । स्यः । परिं । सि॒च्य॒ते॒ । म॒र्मृ॒ज्यमां॑नः । आ॒युऽभिः॑ ।

उ॒रु॒ऽगा॒यः । क॒विऽक्रं॑तुः ॥१३

एषः । स्यः । परि । सिच्यते । मर्मृज्यमानः । आयुऽभिः ।

उरुऽगायः । कविऽक्रतुः ॥१३

“उरुगायः बहुस्तुतिः “कविक्रतुः क्रान्तप्रज्ञः क्रान्तकर्मा वा “स्थः सः “एषः अयं सोमः “आयुभिः मनुष्यैः मर्मृज्यमानः शोध्यमानः “परि “षिच्यते ॥

स॒हस्रो॑तिः श॒ताम॑घो वि॒मानो॒ रज॑सः क॒विः ।

इंद्रा॑य पवते॒ मदः॑ ॥१४

स॒हस्र॑ऽऊतिः । श॒तऽम॑घः । वि॒ऽमानः॑ । रज॑सः । क॒विः ।

इन्द्रा॑य । प॒व॒ते॒ । मदः॑ ॥१४

सहस्रऽऊतिः । शतऽमघः । विऽमानः । रजसः । कविः ।

इन्द्राय । पवते । मदः ॥१४

“सहस्रोतिः अपरिमितरक्षणः “शतमघः बहुधनः “रजसः लोकस्य “विमानः निर्माता “कविः क्रान्तकर्मा “मदः मदकरः सोमः “इन्द्राय इन्द्रार्थं “पवते धारया क्षरति ।।

गि॒रा जा॒त इ॒ह स्तु॒त इंदु॒रिंद्रा॑य धीयते ।

वि॒र्योना॑ वस॒ताविं॑व ॥१५

गि॒रा । जा॒तः । इ॒ह । स्तु॒तः । इन्दुः॑ । इन्द्रा॑य । धी॒य॒ते॒ ।

विः । योना॑ । व॒स॒तौऽइंव ॥१५

गिरा । जातः । इह । स्तुतः । इन्दुः । इन्द्राय । धीयते ।

विः । योना । वसतौऽइव ॥१५

“जातः प्रादुर्भूतः “गिरा स्तुत्या "स्तुतः च “इन्दुः सोमः “इह अस्मिन् यज्ञे “योना योनौ स्वस्थाने “इन्द्राय इन्द्रार्थं “वसताविव “विः यथा स्ववासे पक्षी तथा “धीयते निधीयते ॥ ॥२६॥

पव॑मानः सु̱तो नृभि̱ः सोमो̱ वाज॑मिवासरत् ।

च̱मूषु̱ शक्म॑ना̱सदं॑ ॥१६

पव॑मानः । सु̱तः । नृऽभि॑ः । सोम॑ः । वाज॑म्ऽइव । अ̱स̱र̱त् ।

च̱मूषु॑ । शक्म॑ना । आ̱ऽसद॑म् ॥१६

पवमानः । सुतः । नृऽभिः । सोमः । वाजम्ऽइव । असरत् ।

चमूषु । शक्मना । आऽसदम् ॥१६

“नृभिः नेतृभिर्ऋत्विग्भिः “सुतः अभिषुतः “सोमः "चमूषु चमसेषु “शक्मना बलेन “आसदम् उपवेष्टुं “वाजमिव युद्धमिव स्थानम् “असरत् सरति ॥

तं त्रिंपृ॒ष्ठे त्रिंवंधु॒रे रथें युंजंति॒ यातंवे ।

ऋषीणां स॒प्त धी॒तिभिः॑ ॥१७

तम् । त्रि॒ऽपृ॒ष्ठे । त्रि॒ऽव॒न्धु॒रे । रथें । यु॒ञ्ज॒न्ति॒ । यातंवे ।

ऋषींणाम् । स॒प्त । धी॒तिऽभिः॑ ॥१७

तम् । त्रिऽपृष्ठे । त्रिऽवन्धुरे । रथे । युञ्जन्ति । यातवे ।

ऋषीणाम् । सप्त । धीतिऽभिः ॥१७

“त्रिपृष्ठे त्रिषवणपृष्ठे “त्रिवन्धुरे त्रिवेदवन्धुरे “ऋषीणां “रथे यज्ञरथे “तं सोमं “सप्त सप्तभिः “धीतिभिः छन्दोभिः “यातवे देवान् प्रति गन्तुं “युञ्जन्ति ऋत्विजो योजयन्ति ॥

तं सो॑तारो धन॒स्पृत॑मा॒शुं वाजा॑य॒ यात॑वे ।

हरिं॑ हिनोत वा॒जिनं॑ ॥१८

तम् । सो॒ता॒रः॒ । ध॒न॒ऽस्पृत॑म् । आ॒शुम् । वाजा॑य । यात॑वे ।

हरि॑म् । हि॒नो॒त॒ । वा॒जिन॑म् ॥१८

तम् । सोतारः । धनऽस्पृतम् । आशुम् । वाजाय । यातवे ।

हरिम् । हिनोत । वाजिनम् ॥१८

हे “सोतारः अभिषवकर्तार ऋत्विजः “धनस्पृतं धनानां स्प्रष्टारं “वाजिनं बलिनम् “आशुं वेगवन्तं “तं सोमात्मकं “हरिम् अश्वं “वाजाय यज्ञाख्यं संग्रामं “यातवे गन्तं “हिनोत प्रेरयत । यथा योद्धारो युद्धं गन्तुं बलिनं वेगवन्तमश्वं प्रेरयन्ति तद्वत् यज्ञमभिगन्तुं बलवन्तं सोमं प्रेरयतेति भावः ॥

आ॒वि॒शन्क॒लशं॑ सु॒तो विश्वा॒ अर्ष॑न्न॒भि श्रियः॑ ।

शूरो॒ न गोषु॑ तिष्ठति ॥१९

आ॒ऽवि॒शन् । क॒लशं॑म् । सु॒तः । विश्वाः॑ । अर्ष॑न् । अ॒भि । श्रियः॑ ।

शूरः॑ । न । गोषु॑ । ति॒ष्ठ॒ति॒ ॥१९

आऽविशन् । कलशम् । सुतः । विश्वा । अर्षन् । अभि । श्रियः ।

शूरः । न । गोषु । तिष्ठति ॥१९

“सुतः अभिषुतः सोमः “कलशं द्रोणम् “आविशन् “विश्वाः सर्वाः “श्रियः संपदः “अभि “अर्षन् अस्मानभिगमयन् “गोषु शत्रूणां पशुषु “शूरो “न यथा शूरो निःशङ्कः “तिष्ठति तद्वद्यज्ञेषु निःशङ्कस्तिष्ठति ॥

आ तं इंदो॒ मदा॑य॒ कं पयो॑ दुहंत्या॒यवः॑ ।

दे॒वा दे॒वेभ्यो॒ मधु॑ ॥२०

आ । ते॒ । इ॒न्दो॒ इति॑ । मदा॑य । कम् । पयः॑ । दु॒ह॒न्ति॒ । आ॒यवः॑ ।

दे॒वाः । दे॒वेभ्यः॑ । मधु॑ ॥२०

आ । ते । इन्दो इति । मदाय । कम् । पयः । दुहन्ति ।
आयवः ।

देवाः । देवेभ्यः । मधु ॥२०

हे “इन्दो सोम “ते तव “मधु मधुभूतं “पयः पेयं रसं “देवाः स्तोतारः “आयवः मनुष्याः “मदाय “कं मदार्थं “देवेभ्यः इन्द्रादिभ्यः “आ “दुहन्ति ॥ ॥ २७ ।।

आ न॒ः सोमं॑ प॒वित्र॒ आ सृ॒जता॒ मधु॑मत्तमं ।

दे॒वेभ्यो॑ देव॒श्रुत्त॑मं ॥२१

आ । न॒ः । सोम॑म् । प॒वित्रे॑ । आ । सृ॒जत॑ । मधु॑मत्ऽतमम्
।

दे॒वेभ्यः॑ । दे॒व॒श्रुत्ऽतं॑मम् ॥२१

आ । नः । सोमम् । पवित्रे । आ । सृजत । मधुमत्ऽतमम् ।

देवेभ्यः । देवश्रुत्ऽतमम् ॥२१

हे ऋत्विजः “नः अस्माकं “देवश्रुत्तमम् अत्यन्तं देवैः श्रूयमाणं “मधुमत्तमम् अतिशयेन मधुमन्तं “सोमं “देवेभ्यः इन्द्राद्यर्थं “पवित्रे दशापवित्रे “आ “सृजत साधयत ।

ए॒ते सोमा॑ असृक्षत गृण॒ानाः श्रवं॑से म॒हे ।

म॒दिंतं॑मस्य॒ धारं॑या ॥२२

ए॒ते । सोमाः॑ । अ॒सृ॒क्ष॒त॒ । गृ॒ण॒ानाः । श्रवं॑से । म॒हे ।

म॒दिन्ऽतं॑मस्य । धार॑या ॥२२

एते । सोमाः । असृक्षत । गृणानाः । श्रवसे । महे ।

मदिन्ऽतमस्य । धारया ॥२२

“गृणानाः स्तूयमानाः “एते इमे “सोमाः “महे महते “श्रवसे अन्नाय “मदिन्तमस्य मादयितृतमस्य रसस्य “धारया “असृक्षत ऋत्विग्भिः सृज्यन्ते ।।

अ॒भि गव्या॑नि वी॒तये॑ नृ॒म्णा पु॑ना॒नो अ॑र्षसि ।

स॒नद्वा॑जः॒ परि॑ स्रव ॥२३

अ॒भि । गव्या॑नि । वी॒तये॑ । नृ॒म्णा । पु॒ना॒नः । अ॒र्ष॒सि॒ ।

स॒नत्ऽवा॑जः । परि॑ । स्र॒व॒ ॥२३

अभि । गव्यानि । वीतये । नृम्णा । पुनानः । अर्षसि ।

सनत्ऽवाजः । परि । स्रव ॥२३

हे सोम “पुनानः पूयमानो यस्त्वं “वीतये भक्षणाय “गव्यानि गोसंबन्धीनि “नृम्णा नृम्णानि धनानि क्षीरादीनि “अभि “अर्षसि अभिगच्छसि स त्वं “सनद्वाजः दीयमानान्नः सन् "परि “स्रव परिक्षर ॥

उ॒त नो॒ गोमं॑ती॒रिषो॒ विश्वा॑ अर्ष परि॒ष्टुभः॑ ।

गृ॒णा॒नो ज॒मद॑ग्निना ॥२४

उ॒त । नः॒ । गोऽमं॑तीः । इषः॑ । विश्वाः॑ । अ॒र्ष॒ । प॒रि॒ऽस्तुभः॑ ।

गृ॒णा॒नः । ज॒मत्ऽअं॑ग्निना ॥२४

उत । नः । गोऽमतीः । इषः । विश्वाः । अर्ष । परिऽस्तुभः
।

गृणानः । जमत्ऽअग्निना ॥२४

"उत अपि च हे सोम “जमदग्निना जमदग्निनाम्ना ऋषिणा मया “गृणानः स्तूयमानस्त्वं “नः अस्माकं “गोमतीः गोभिर्युक्तानि “परिष्टुभः परितः स्तोतव्यानि “विश्वाः सर्वाणि “इषः अन्नानि “अर्ष गच्छ। अस्मभ्यमेवंविधान्यन्नानि देहीत्यर्थः ।।

पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः ।

अभि विश्वानि काव्या ॥२५

पवस्व । वाचः । अग्रियः । सोम । चित्राभिः । ऊतिऽभिः ।

अ॒भि । विश्वा॑नि । काव्यां ॥२५

पवस्व । वाचः । अग्रियः । सोम । चित्राभिः । ऊतिऽभिः ।

अभि । विश्वानि । काव्या ॥२५

हे “सोम “अग्रियः मुख्यस्त्वं “चित्राभिः पूजनीयैः “ऊतिभिः रक्षणैः सह “वाचः अस्मदीयाः स्तुतीः “अभि “पवस्व । एतदेव दर्शयति । “विश्वानि सर्वाणि “काव्या काव्यानि स्तुत्यात्मकानि वाक्यानि अभि पवस्वेति ॥ ॥ २८ ॥

त्वं स॑मु॒द्रिया॑ अ॒पो॑ऽग्रि॒यो वाच॑ ई॒रय॑न् ।

पव॑स्व विश्वमेजय ॥२६

त्वम् । स॒मु॒द्रियाः॑ । अ॒पः । अ॒ग्रि॒यः । वाचः॑ । ई॒रय॑न् ।

पवंस्व । वि॒श्व॒म्ऽए॒ज॒य॒ ॥२६

त्वम् । समुद्रियाः । अपः । अग्रियः । वाचः । ईरयन् ।

पवस्व । विश्वम्ऽएजय ॥२६

हे “विश्वमेजय विश्वकम्पक सोम “अग्रियः मुख्यः “त्वं “वाचः "ईरयन् प्रेरयन् “समुद्रियाः आन्तरिक्षाणि "अपः उदकानि “पवस्व धारया क्षर ॥

तुभ्ये॒मा भुवंना कवे महि॒म्ने सोंम तस्थिरे ।

तुभ्यंमर्षंति॒ सिंधंवः ॥२७

तुभ्यं । इ॒मा । भुवंना । क॒वे॒ । म॒हि॒म्ने । सो॒म॒ । त॒स्थि॒रे॒ ।

तुभ्यंम् । अ॒र्ष॒न्ति॒ । सिन्धंवः ॥२७

तुभ्य । इमा । भुवना । कवे । महिम्ने । सोम । तस्थिरे ।

तुभ्यम् । अर्षन्ति । सिन्धवः ॥२७

हे “कवे क्रान्तकर्मन् “सोम “तुभ्य तुभ्यं तव "महिम्ने “इमा इमानि “भुवना भुवनानि “तस्थिरे तिष्ठन्ति । त्वामेव पुरस्कुर्वन्तीत्यर्थः। अपि च “सिन्धवः नद्यः “तुभ्यम् एव “अर्षन्ति गच्छन्ति । त्वदाज्ञामेवानुपालयन्तीत्यर्थः ॥

प्र ते॑ दि॒वो न वृ॒ष्टयो॒ धारा॑ यं॑त्यस॒श्चतः॑ ।

अ॒भि शु॒क्रामु॑प॒स्तिरं॑ ॥२८

प्र । ते॒ । दि॒वः । न । वृ॒ष्टयः॑ । धाराः॑ । य॒न्ति॒ । अ॒स॒श्चतः॑ ।

अ॒भि । शु॒क्राम् । उ॒प॒ऽस्तिरं॑म् ॥२८

प्र । ते । दिवः । न । वृष्टयः । धाराः । यन्ति । असश्चतः ।

अभि । शुक्राम् । उपऽस्तिरम् ॥२८

हे सोम “ते तव “असश्चतः असङ्गाः “धाराः “दिवः अन्तरिक्षात् “वृष्टयः “न वर्षाणीव “शुक्रां शुक्लवर्णां शुक्लवर्णैः अविलोमभिर्निर्मितम् “उपस्तिरम् उपस्तीर्यमाणं पवित्रम् “अभि प्रति “प्र “यन्ति ॥

इन्द्रा॒येन्दुं॑ पुनीतनो॒ग्रं दक्षा॑य॒ साध॑नं ।

ई॒शा॒नं वी॒तिरा॑धसं ॥२९

इन्द्रा॑य । इन्दु॑म् । पु॒नी॒त॒न॒ । उ॒ग्रम् । दक्षा॑य । साध॑नम् ।

ई॒शा॒नम् । वी॒तिऽरा॑धसम् ॥२९

इन्द्राय । इन्दुम् । पुनीतन । उग्रम् । दक्षाय । साधनम् ।

ईशानम् । वीतिऽराधसम् ॥२९

हे ऋत्विजः “उग्रम् उद्गूर्णं “दक्षाय बलस्य "साधनं करणम् “ईशानं धनानामीश्वरं “वीतिराधसं दत्तधनम् “इन्दुं सोमम् “इन्द्राय इन्द्रार्थं “पुनीतन पुनीत ॥

पवमान ऋतः कविः सोमः पवित्रमासदत् ।

दधत्स्तोत्रे सुवीर्यं ॥३०

पवमानः । ऋतः । कविः । सोमः । पवित्रम् । आ । असदत् ।

दधत् । स्तोत्रे । सुऽवीर्यम् ॥३०

पवमानः । ऋतः । कविः । सोमः । पवित्रम् । आ । असदत् ।

दधत् । स्तोत्रे । सुऽवीर्यम् ॥३०

“ऋतः सत्यभूतः “कविः क्रान्तकर्मा “पवमानः “सोमः अस्मदीये “स्तोत्रे “सुवीर्यं शोभनवीर्यं “दधत् प्रयच्छन् "पवित्रमासदत् आसीदति ॥ ॥ २९ ॥

टिप्पणी

९.६२.१ एते अस्रग्रमिन्दवो इति

दशरात्रे तृतीयमह- -- एते असृग्रमिन्दव इत्यनुरूपो भवति। एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इति पितृंॕ् स्तदेव तदभिवदति।

पूर्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत् पूर्वं रूपमपरेण रूपेणाऽनुवदति तदनुरूपस्यानुरूपत्वमनुरूप एनं पुत्रो जायते य एवं वेद - पंचविंशब्रा १२.१ (https://sa.wikisource.org/s/tvr)

९.६२.४ असाव्यंशुः इति

द्र. वासवं (https://sa.wikisource.org/s/2917)

शैशवानि - च्यावनानि (https://sa.wikisource.org/s/292s) (ग्रामगेयः)

सन्तनि (https://sa.wikisource.org/s/1z8j)

गौषूक्तम् (https://sa.wikisource.org/s/2t9q)

अंशु उपरि टिप्पणी (https://puranastudy.page.tl/Amsha_Amshu-%26%232309%3B%26%232306%3B%26%232358%3B_%26%232309%3B%26%232306%3B%26%232358%3B%26%232369%3B.htm)

अंशुग्रहः (https://sa.wikisource.org/s/nlf)

अदाभ्यग्रहः (https://sa.wikisource.org/s/h8v)

मण्डल ९

सूक्तं ९.११सूक्तं ९.४१सूक्तं ९.७१सूक्तं ९.१०१

सूक्तं ९.१२सूक्तं ९.४२सूक्तं ९.७२सूक्तं ९.१०२

सूक्तं ९.१३सूक्तं ९.४३सूक्तं ९.७३सूक्तं ९.१०३

सूक्तं ९.१४सूक्तं ९.४४सूक्तं ९.७४सूक्तं ९.१०४

सूक्तं ९.१५सूक्तं ९.४५सूक्तं ९.७५सूक्तं ९.१०५

सूक्तं ९.१६सूक्तं ९.४६सूक्तं ९.७६सूक्तं ९.१०६

सूक्तं ९.१७सूक्तं ९.४७सूक्तं ९.७७सूक्तं ९.१०७

सूक्तं ९.१८सूक्तं ९.४८सूक्तं ९.७८सूक्तं ९.१०८

सूक्तं ९.१९सूक्तं ९.४९सूक्तं ९.७९सूक्तं ९.१०९

सूक्तं ९.२०सूक्तं ९.५०सूक्तं ९.८०सूक्तं ९.११०

सूक्तं ९.२१सूक्तं ९.५१सूक्तं ९.८१सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

ऋग्वेदः सूक्तं ९.६३

← सूक्तं ९.६२

ऋग्वेदः - मण्डल ९

सूक्तं ९.६३

निध्रुविः काश्यपः

सूक्तं ९.६४ →

दे. पवमानः सोमः। गायत्री

आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् ।

अस्मे श्रवांसि धारय ॥१॥

इषमूर्जं च पिन्वस इन्द्राय मत्सरिन्तमः ।

चमूष्वा नि षीदसि ॥२॥

सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत् ।

मधुमाँ अस्तु वायवे ॥३॥

एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः ।

सोमा ऋतस्य धारया ॥४॥

इन्द्रं वर्धन्तो अप्तुरः कृण्वन्तो विश्वमार्यम् ।

अपघ्नन्तो अराव्णः ॥५॥

सुता अनु स्वमा रजोऽभ्यर्षन्ति बभ्रवः ।

इन्द्रं गच्छन्त इन्दवः ॥६॥

अया पवस्व धारया यया सूर्यमरोचयः ।

हिन्वानो मानुषीरपः ॥७॥

अयुक्त सूर एतशं पवमानो मनावधि ।

अन्तरिक्षेण यातवे ॥८॥

उत त्या हरितो दश सूरो अयुक्त यातवे ।

इन्दुरिन्द्र इति ब्रुवन् ॥९॥

परीतो वायवे सुतं गिर इन्द्राय मत्सरम् ।

अव्यो वारेषु सिञ्चत ॥१०॥

पवमान विदा रयिमस्मभ्यं सोम दुष्टरम् ।

यो दूणाशो वनुष्यता ॥११॥

अभ्यर्ष सहस्रिणं रयिं गोमन्तमश्विनम् ।

अभि वाजमुत श्रवः ॥१२॥

सोमो देवो न सूर्योऽद्रिभिः पवते सुतः ।

दधानः कलशे रसम् ॥१३॥

एते धामान्यार्या शुक्रा ऋतस्य धारया ।

वाजं गोमन्तमक्षरन् ॥१४॥

सुता इन्द्राय वज्रिणे सोमासो दध्याशिरः ।

पवित्रमत्यक्षरन् ॥१५॥

प्र सोम मधुमत्तमो राये अर्ष पवित्र आ ।

मदो यो देववीतमः ॥१६॥

तमी मृजन्त्यायवो हरिं नदीषु वाजिनम् ।

इन्दुमिन्द्राय मत्सरम् ॥१७॥

आ पवस्व हिरण्यवदश्वावत्सोम वीरवत् ।

वाजं गोमन्तमा भर ॥१८॥

परि वाजे न वाजयुमव्यो वारेषु सिञ्चत ।

इन्द्राय मधुमत्तमम् ॥१९॥

कविं मृजन्ति मर्ज्यं धीभिर्विप्रा अवस्यवः ।

वृषा कनिक्रदर्षति ॥२०॥

वृषणं धीभिरप्तुरं सोममृतस्य धारया ।

मती विप्राः समस्वरन् ॥२१॥

पवस्व देवायुषगिन्द्रं गच्छतु ते मदः ।

वायुमा रोह धर्मणा ॥२२॥

पवमान नि तोशसे रयिं सोम श्रवाय्यम् ।

प्रियः समुद्रमा विश ॥२३॥

अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः ।

नुदस्वादेवयुं जनम् ॥२४॥

पवमाना असृक्षत सोमाः शुक्रास इन्दवः ।

अभि विश्वानि काव्या ॥२५॥

पवमानास आशवः शुभ्रा असृग्रमिन्दवः ।

घ्नन्तो विश्वा अप द्विषः ॥२६॥

पवमाना दिवस्पर्यन्तरिक्षादसृक्षत ।

पृथिव्या अधि सानवि ॥२७॥

पुनानः सोम धारयेन्दो विश्वा अप स्रिधः ।

जहि रक्षांसि सुक्रतो ॥२८॥

अपघ्नन्सोम रक्षसोऽभ्यर्ष कनिक्रदत् ।

द्युमन्तं शुष्ममुत्तमम् ॥२९॥

अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा ।

इन्दो विश्वानि वार्या ॥३०॥

सायणभाष्यम्

‘आ पवस्व' इति त्रिंशदृचं तृतीयं सूक्तं काश्यपस्य निध्रुवेरार्षं गायत्रं पवमानसोमदेवताकम् । तथा

चानुक्रान्तम्- आ पवस्व निध्रुविः काश्यपः' इति । गतो विनियोगः ॥

आ पंवस्व सह॒स्रिणं॑ र॒यिं सोम॑ सु॒वीर्यं॑ ।

अ॒स्मे श्रवां॑सि धारय ॥१

आ । प॒व॒स्व॒ । स॒ह॒स्रिण॑म् । र॒यिम् । सो॒म॒ । सु॒ऽवीर्य॑म् ।

अ॒स्मे इति॑ । श्रवां॑सि । धा॒र॒य॒ ॥१

आ । पवस्व । सहस्रिणम् । रयिम् । सोम । सुऽवीर्यम् ।

अस्मे इति । श्रवांसि । धारय ॥१

हे "सोम त्वं “सहस्रिणं बहुसंख्याकं “सुवीर्यं शोभनवीर्यं “रयिं धनम् “आ “पवस्व आभिमुख्येन क्षर । अपि च

“अस्मे अस्मासु “श्रवांसि अन्नानि “धारय स्थापय ॥

इष॒मूर्जँ॑ च पिन्वस॒ इन्द्रा॑य मत्स॒रिन्त॑मः ।

च॒मूष्वा नि षीं॑दसि ॥२

इषं॑म् । ऊर्जं॑म् । च॒ । पि॒न्व॒से॒ । इन्द्रा॑य । म॒त्स॒रिन्ऽत॑मः ।

च॒मूषु॑ । आ । नि । सी॒द॒सि॒ ॥२

इषम् । ऊर्जम् । च । पिन्वसे । इन्द्राय । मत्सरिन्ऽतमः ।

चमूषु । आ । नि । सीदसि ॥२

हे सोम “मत्सरिन्तमः अतिशयेन मदयितृतमस्त्वम् “इन्द्राय इन्द्रार्थम् “इषम् अन्नम् “ऊर्जं रसं “च "पिन्वसे

क्षरसि । अपि च “चमूषु चमसेषु “आ “नि “षीदसि तिष्ठसि ॥

सुत इन्द्रा॑य॒ विष्ण॑वे॒ सोमः॑ क॒लशे॑ अक्षरत् ।

मधु॑माँ अस्तु वा॒यवे॑ ॥३

सु॒तः । इन्द्रा॑य । विष्ण॑वे । सोमः॑ । क॒लशे॑ । अ॒क्ष॒र॒त् ।

मधु॑ऽमान् । अ॒स्तु॒ । वा॒यवे॑ ॥३

सुतः । इन्द्राय । विष्णवे । सोमः । कलशे । अक्षरत् ।

मधुऽमान् । अस्तु । वायवे ॥३

“इन्द्राय इन्द्रार्थं “विष्णवे विष्णवर्थं च “वायवे वाय्वर्थं च “सुतः अभिषुतः यः “सोमः “कलशे द्रोणकलशे "अक्षरत्

क्षरति सोऽयं सोमः "मधुमान् मधुररसवान् “अस्तु भवतु ॥

ए॒ते अं॑सृग्रम॒ाशवोऽति॒ ह्वरां॑सि ब॒भ्रवः॑ ।

सोमा॑ ऋ॒तस्य॒ धारं॑या ॥४

ए॒ते । अ॒सृ॒ग्र॒म् । आ॒शवः॑ । अतिं॑ । ह्वरां॑सि । ब॒भ्रवः॑ ।

सोमाः॑ । ऋ॒तस्यं॑ । धारं॑या ॥४

एते । असृग्रम् । आशवः । अति । ह्वरांसि । बभ्रवः ।

सोमाः । ऋतस्य । धारया ॥४

"बभ्रवः बभ्रुवर्णाः “आशवः शीघ्राः “एते इमे “सोमाः “ऋतस्य उदकस्य “धारया “असृग्रं सृज्यन्ते । "ह्वरांसि रक्षांस्यभिगच्छन्ति च ॥

इन्द्रं॒ वर्धं॑तो अ॒प्तुरः॑ कृ॒णवन्तो॒ विश्व॒मार्यं॑ ।

अ॒प॒घ्नन्तो॒ अरा॑व्णः ॥५

इन्द्र॑म् । वर्ध॑न्तः । अ॒प्ऽतुरः॑ । कृ॒ण्वन्तः॑ । विश्व॑म् । आर्य॑म् ।

अ॒प॒ऽघ्नन्तः॑ । अरा॑व्णः ॥५

इन्द्रम् । वर्धन्तः । अप्ऽतुरः । कृण्वन्तः । विश्वम् । आर्यम् ।

अपऽघ्नन्तः । अराव्णः ॥५

“इन्द्रं “वर्धन्तः वर्धयन्तः “अप्तुरः उदकस्य प्रेरकाः “विश्वं सोममस्मदीयकर्मार्थम् “आर्यं भद्रं “कृण्वन्तः कुर्वन्तः

"अरावण: अदातॄन "अपघ्नन्तः विनाशयन्तः ।
अभ्यर्षन्तीत्युत्तरया संबन्धः ॥ ॥ ३० ॥

सुता अनु स्वमा रजोऽभ्यंर्षन्ति बभ्रवः ।

इन्द्रं गच्छंत इन्दंवः ॥६

सुताः । अनुं । स्वम् । आ । रजः । अभि । अर्षन्ति ।
बभ्रवः ।

इन्द्रंम् । गच्छंन्तः । इन्दंवः ॥६

सुताः । अनु । स्वम् । आ । रजः । अभि । अर्षन्ति ।
बभ्रवः ।

इन्द्रम् । गच्छन्तः । इन्दवः ॥६

“बभ्रवः बभ्रुवर्णाः “सुताः अभिषुताः “इन्दवः सोमाः “इन्द्रम् "आ “गच्छन्तः आभिमुख्येन प्राप्नुवन्तः “स्वं स्वकीयं “रजः स्थानम् “अनु प्रति “अभ्यर्षन्ति अभिगच्छन्ति ॥

अ॒या पं॑वस्व॒ धार॑या॒ यया॒ सूर्य॒मरों॑चयः ।

हि॒न्वा॒नो मानुं॑षीर॒पः ॥७

अ॒या । प॒व॒स्व॒ । धार॑या । यया॑ । सूर्य॑म् । अरों॑चयः ।

हि॒न्वा॒नः । मानुं॑षीः । अ॒पः ॥७

अया । पवस्व । धारया । यया । सूर्यम् । अरोचयः ।

हिन्वानः । मानुषीः । अपः ॥७

हे सोम “मानुषीः मनुष्याणां हितानि “अपः उदकानि “हिन्वानः प्रेरयंस्त्वं “यया धारया “सूर्यमरोचयः प्राकाशयः तया "अया अनया “धारया “पवस्व क्षर ॥

अयु॑क्त॒ सूर॒ एत॑शं॒ पव॑मानो म॒नावधि॑ ।

अ॒ंतरि॑क्षेण॒ याता॑वे ॥८

अयु॑क्त । सूरः॑ । एत॑शम् । पव॑मानः । म॒नौ । अधि॑ ।

अ॒न्तरि॑क्षेण । याता॑वे ॥८

अयुक्त । सूरः । एतशम् । पवमानः । मनौ । अधि ।

अन्तरिक्षेण । यातवे ॥८

"पवमानः पूयमानः सोमः “मनावधि। मनुर्मनुष्यः । तस्मिन् मनुष्य इत्यर्थः । “अन्तरिक्षेण “यातवे गन्तुं “सूरः सूर्यस्य “एतशम् अश्वम् । ‘एतग्वः एतशः' इत्यश्वनामसु पाठात् । “अयुक्त युङ्क्ते ॥

उ॒त त्या ह॒रितो॒ दश॒ सूरों अयुक्त॒ यातंवे ।

इं॒दु॒रिं॒द्र॒ इतिं ब्रु॒वन् ॥९

उ॒त । त्याः । ह॒रितः॑ । दशं । सूरः॑ । अ॒यु॒क्त॒ । यातंवे ।

इन्दुः॑ । इन्द्रः॑ । इतिं । ब्रु॒वन् ॥९

उत । त्याः । हरितः । दश । सूरः । अयुक्त । यातवे ।

इन्दुः । इन्द्रः । इति । ब्रुवन् ॥९

“उत अपि च “इन्दुः सोमः “इन्द्र “इति “ब्रुवन् “त्याः ताः “दश दशसंख्याकाः "हरितः दिशः प्रति “यातवे गन्तुं "सूरः सूर्यस्यैतशम् “अयुक्त युनक्ति ॥

परी॒तो वा॒यवें सु॒तं गिर॒ इंद्रा॑य मत्स॒रं ।

अव्यो॒ वारें॑षु सिंचत ॥१०

परिं । इ॒तः । वा॒यवें । सु॒तम् । गिरः॑ । इन्द्रा॑य । म॒त्स॒रम् ।

अव्यः॑ । वारें॑षु । सि॒ञ्च॒त॒ ॥१०

परि । इतः । वायवे । सुतम् । गिरः । इन्द्राय । मत्सरम् ।

अव्यः । वारेषु । सिञ्चत ॥१०

हे “गिरः स्तोतारः यूयं “वायवे वाय्वर्थम् “इन्द्राय इन्द्रार्थं च “सुतम् अभिषुतं “मत्सरं मदकरं सोमम् “इतः अभिषवदेशादुद्धृत्य “अव्यः अवेः “वारेषु वालेषु “परि “षिञ्चत ॥ ॥ ३१ ॥

पव॑मान वि॒दा र॒यिम॒स्मभ्यं॑ सोम दु॒ष्टरं॑ ।

यो दू॒णाशो॑ वनुष्य॒ता ॥११

पव॑मान । वि॒दाः । र॒यिम् । अ॒स्मभ्यं॑म् । सो॒म॒ । दु॒स्तरं॑म् ।

यः । दु॒ःऽनश॑ः । व॒नु॒ष्य॒ता ॥११

पवमान । विदाः । रयिम् । अस्मभ्यम् । सोम । दुस्तरम् ।

यः । दुःऽनशः । वनुष्यता ॥११

हे "पवमान °सोम "यः रयिः “वनुष्यता हिंसकेनं शत्रुणा “दूणाशः नाशयितुमशक्यः तं शत्रुभिः "दुष्टरं “रयिं धनम् “अस्मभ्यं “विदाः देहि ॥

अ॒भ्य॑र्ष सह॒स्रिणं॑ र॒यिं गोमं॑तम॒श्विनं॑ ।

अ॒भि वाजं॑मु॒त श्रवः॑ ॥१२

अ॒भि । अ॒र्ष॒ । स॒ह॒स्रिणं॑म् । र॒यिम् । गोऽमं॑न्तम् । अ॒श्विनं॑म् ।

अ॒भि । वाजं॑म् । उ॒त । श्रवः॑ ॥१२

अभि । अर्ष । सहस्रिणम् । रयिम् । गोऽमन्तम् । अश्विनम् ।

अभि । वाजम् । उत । श्रवः ॥१२

हे सोम त्वं “सहस्रिणं बहुसंख्याकं “गोमन्तं गोभिर्युक्तम् “अश्विनम् अश्ववन्तं “रयिं धनम् “अभ्यर्ष अस्मानभिगमय । "उत अपि च “वाजं बलं “श्रवः अन्नं चास्मान् “अभि गमय ।

सोमों दे॒वो न सूर्योऽद्रिंभिः पवते सु॒तः ।

दधांनः क॒लशे॒ रसं ॥१३

सोमः॑ । दे॒वः । न । सूर्यः॑ । अद्रिंऽभिः । प॒व॒ते॒ । सु॒तः ।

दधांनः । क॒लशें । रसंम् ॥१३

सोमः । देवः । न । सूर्यः । अद्रिऽभिः । पवते । सुतः ।

दधानः । कलशे । रसम् ॥१३

“देवो “न देव इव "सूर्यः रोचमानः “सोमः "अद्रिभिः ग्रावभिः “सुतः अभिषुतः सन् “कलशे द्रोणकलशे “रसं “दधानः धारयन् “पवते धारया क्षरति ।।

ए॒ते धामा॒न्यार्या॑ शु॒क्रा ऋ॒तस्य॒ धारं॑या ।

वाज॒ं गोमं॑तमक्षरन् ॥१४

ए॒ते । धामा॑नि । आर्या॑ । शु॒क्राः । ऋ॒तस्यं॑ । धारं॑या ।

वाजं॑म् । गोऽमं॑न्तम् । अ॒क्ष॒र॒न् ॥१४

एते । धामानि । आर्या । शुक्राः । ऋतस्य । धारया ।

वाजम् । गोऽमन्तम् । अक्षरन् ॥१४

“एते अभिषुताः इमे “शुक्राः दीप्ताः सोमाः "आर्या आर्याणां श्रेष्ठानां यजमानानां “धामानि गृहान् प्रति “गोमन्तं गोभिर्युक्तं “वाजम् अन्नम् "ऋतस्य उदकस्य “धारया "अक्षरन् क्षरन्ति ।।

सु॒ता इंद्रा॑य व॒ज्रिणे॒ सोमा॑सो॒ दध्या॑शिरः ।

प॒वित्र॒मत्य॑क्षरन् ॥१५

सु॒ताः । इन्द्रा॑य । व॒ज्रिणे॑ । सोमा॑सः । दधि॑ऽआशिरः ।

प॒वित्र॑म् । अति॑ । अ॒क्ष॒र॒न् ॥१५

सुताः । इन्द्राय । वज्रिणे । सोमासः । दधिऽआशिरः ।

पवित्रम् । अति । अक्षरन् ॥१५

“वज्रिणे वज्रवते “इन्द्राय इन्द्रार्थं “सुताः अभिषुताः “दध्याशिरः । दधि आशीराश्रयणद्रव्यं येषां ते दध्याशिरः । दधिसंस्कृताः “सोमासः सोमाः “पवित्रमति अतिक्रम्य “अक्षरन् धारया क्षरन्ति ॥ ॥ ३२ ॥

प्र सो॑म॒ मधु॑मत्तमो रा॒ये अ॑र्ष प॒वित्र॒ आ ।

मदो॒ यो दे॑व॒वीत॑मः ॥१६

प्र । सो॒म॒ । मधु॑मत्ऽतमः । रा॒ये । अ॒र्ष॒ । प॒वित्रे॑ । आ ।

मदः॑ । यः । दे॒व॒ऽवीत॑मः ॥१६

प्र । सोम । मधुमत्ऽतमः । राये । अर्ष । पवित्रे । आ ।

मदः । यः । देवऽवीतमः ॥१६

हे “सोम ते तव “यः "मदः रसः “मधुमत्तमः अत्यन्तं मधुमान् “देववीतमः अतिशयेन देवकामश्च तं रसं “राये अस्माकं धनार्थं “पवित्रे “प्र “आ “अर्ष धारया क्षर ।।

तमीं मृजंत्यायवो हरिं नदीषुं वाजिनं ।

इंदुमिंद्राय मत्सरं ॥१७

तम् । ईमिति । मृजन्ति । आयवः । हरिम् । नदीषु । वाजिनम् ।

इन्दुम् । इन्द्राय । मत्सरम् ॥१७

तम् । ईमिति । मृजन्ति । आयवः । हरिम् । नदीषु । वाजिनम् ।

इन्दुम् । इन्द्राय । मत्सरम् ॥१७

“हरिं हरितवर्णं “वाजिनं बलिनं “मत्सरं मदकरं “तं पवमानम् “ईम् एनम् “इन्दुं सोमम् “आयवः मनुष्या ऋत्विजः "नदीषु वसतीवरीषु "मृजन्ति मार्जयन्ति ।

आ पंवस्व॒ हिरंण्यव॒दश्वांवत्सोम वी॒रवंत् ।

वाज॒ं गोमंत॒मा भंर ॥१८

आ । प॒व॒स्व॒ । हिरंण्यऽवत् । अश्वंऽवत् । सो॒म॒ । वी॒रऽवंत् ।

वाजंम् । गोऽमंन्तम् । आ । भ॒र॒ ॥१८

आ । पवस्व । हिरण्यऽवत् । अश्वऽवत् । सोम । वीरऽवत् ।

वाजम् । गोऽमन्तम् । आ । भर ॥१८

हे "सोम “त्वं “हिरण्यवत् सुवर्णोपेतम् “अश्ववत् अश्वयुक्तं च “वीरवत् पुत्राद्युपेतं च धनम् “आ “पवस्व अस्मान् प्रति क्षर । अपि च "गोमन्तं पशुभिरुपेतं "वाजम् अन्नम् “आ “भर अस्मभ्यमाहर ॥

परि॒ वाजे॒ न वा॑ज॒युमव्यो॒ वारे॑षु सिंचत ।

इंद्रा॑य॒ मधु॑मत्तमं ॥१९

परि॑ । वाजे॑ । न । वा॒ज॒ऽयुम् । अव्यः॑ । वारे॑षु । सि॒ञ्च॒त॒ ।

इन्द्रा॑य । मधु॑मत्ऽतमम् ॥१९

परि । वाजे । न । वाजऽयुम् । अव्यः । वारेषु । सिञ्चत ।

इन्द्राय । मधुमत्ऽतमम् ॥१९

“वाजयुं युद्धकामं "मधुमत्तमम् अतिशयेन मधुमन्तं सोमम् “इन्द्राय इन्द्रार्थं “अव्यः अवेः “वारेषु वालेषु दशापवित्रे "वाजे “न युद्ध इव हे ऋत्विजः “परि “षिञ्चत ॥

क॒विं मृंजंति॒ मर्ज्यं॑ धी॒भिर्विप्रां अव॒स्यवः॑ ।

वृषा॒ कनिंक्रदर्षति ॥२०

क॒विम् । मृ॒ज॒न्ति॒ । मर्ज्यं॑म् । धी॒भिः । विप्राः॑ । अ॒व॒स्यवः॑ ।

वृषां । कनिंक्रत् । अ॒र्ष॒ति॒ ॥२०

कविम् । मृजन्ति । मर्ज्यम् । धीभिः । विप्राः । अवस्यवः ।

वृषा । कनिक्रत् । अर्षति ॥२०

“अवस्यवः रक्षणकामाः “विप्राः मेधाविन ऋत्विजः “धीभिः अङ्गुलीभिः “मर्ज्यं मर्जनीयं “कविं क्रान्तकर्माणं यं सोमं “मृजन्ति मार्जयन्ति सोऽयं “वृषा सेचकः सोमः "कनिक्रत् शब्दं कुर्वन् “अर्षति धारया क्षरति ॥ ॥ ३३ ॥

वृष॑णं धी॒भिर॒प्तुरं॒ सोम॑मृ॒तस्य॒ धार॑या ।

म॒ती विप्राः॒ सम॑स्वरन् ॥२१

वृष॑णम् । धी॒भिः । अ॒प्ऽतुर॑म् । सोम॑म् । ऋ॒तस्य॑ । धार॑या ।

म॒ती । विप्राः॑ । सम् । अ॒स्व॒र॒न् ॥२१

वृषणम् । धीभिः । अप्ऽतुरम् । सोमम् । ऋतस्य । धारया ।

मती । विप्राः । सम् । अस्वरन् ॥२१

“विप्राः मेधाविन ऋत्विजः “वृषणं कामानां वर्षकम् “अप्तुरम् अपां प्रेरकं “सोमं “धीभिः अङ्गुलीभिः "मती मत्या स्तुत्या च “ऋतस्य उदकस्य “धारया “समस्वरन् प्रेरयन्ति ।।

पवस्व देवायुषगिंद्रं गच्छतु ते मदः ।

वायुमा रोह धर्मणा ॥२२

पवस्व । देव । आयुषक् । इन्द्रम् । गच्छतु । ते । मदः ।

वायुम् । आ । रोह । धर्मणा ॥२२

पवस्व । देव । आयुषक् । इन्द्रम् । गच्छतु । ते । मदः ।

वायुम् । आ । रोह । धर्मणा ॥२२

हे “देव द्योतमान सोम “पवस्व धारया क्षर । अपि च “ते तव “मदः मदकरो रसः “आयुषक् अनुषक्तम् “इन्द्रं प्रति “गच्छतु । अपि च त्वं “वायुं “धर्मणा धारकेण रसेन “आ “रोह प्राप्नुहि ॥

पवमान नि तोशसे रयिं सोम श्रवाय्यं ।

प्रियः समुद्रमा विंश ॥२३

पवमान । नि । तोशसे । रयिम् । सोम । श्रवाय्यम् ।

प्रियः । समुद्रम् । आ । विश ॥२३

पवमान । नि । तोशसे । रयिम् । सोम । श्रवाय्यम् ।

प्रियः । समुद्रम् । आ । विश ॥२३

हे पवमान “सोम यस्त्वं “श्रवाय्यं श्रवणीयं “रयिं शत्रूणां धनं “नि "तोशसे नितरां पीडयसि स त्वं “प्रियः सन् "समुद्रं द्रोणकलशम् "आ "विश प्रविश ।।

अ॒प॒घ्नन्पं॑वसे॒ मृधः॑ क्रतु॒वित्सो॑म मत्स॒रः ।

नु॒दस्वादे॑वयु॒ं जनं॑ ॥२४

अ॒प॒ऽघ्नन् । प॒व॒से॒ । मृधः॑ । क्र॒तु॒ऽवित् । सो॒म॒ । म॒त्स॒रः ।

नु॒दस्व॑ । अदे॑वऽयुम् । जनं॑म् ॥२४

अपऽघ्नन् । पवसे । मृधः । क्रतुऽवित् । सोम । मत्सरः ।

नुदस्व । अदेवऽयुम् । जनम् ॥२४

हे “सोम “मत्सरः मदकरो यस्त्वं “मृधः हिंसकान् शत्रून् “अपघ्नन् मारयन् “क्रतुवित् अस्मभ्यं प्रज्ञां प्रयच्छन् "पवसे क्षरसि स त्वम् “अदेवयुम् अदेवकामं "जनं राक्षसवर्गं “नुदस्व प्रेरय ॥

पवमाना असृक्षत सोमाः शुक्रास इंदवः ।

अभि विश्वानि काव्यां ॥२५

पवमानाः । असृक्षत । सोमाः । शुक्रासः । इन्दवः ।

अभि । विश्वानि । काव्यां ॥२५

पवमानाः । असृक्षत । सोमाः । शुक्रासः । इन्दवः ।

अभि । विश्वानि । काव्या ॥२५

“शुक्रासः उज्ज्वलाः “इन्दवः दीप्ताः “पवमानाः क्षरन्तः “सोमाः “विश्वानि “काव्या काव्यानि स्तोत्राणि “अभि असृक्षत सृज्यन्त ऋत्विग्भिः ॥ ॥ ३४ ॥

पव॑मानास आ॒शव॑ः शु॒भ्रा अ॑सृग्र॒मिं॑द॑वः ।

घ्नंतो॒ विश्वा॒ अप॒ द्विष॑ः ॥२६

पव॑मानासः । आ॒शव॑ः । शु॒भ्राः । अ॒सृ॒ग्र॒म् । इन्द॑वः ।

घ्नन्त॑ः । विश्वा॑ः । अप॑ । द्विष॑ः ॥२६

पवमानासः । आशवः । शुभ्राः । असृग्रम् । इन्दवः ।

घ्नन्तः । विश्वाः । अप । द्विषः ॥२६

“आशवः शीघ्राः “शुभ्राः शोभमानाः “पवमानासः क्षरन्तः “इन्दवः दीप्ताः सोमाः “विश्वाः सर्वान् “द्विषः द्वेष्टॄन् शत्रून् “अप “घ्नन्तः मारयन्तः “असृग्रं सृज्यन्ते ॥

पवं॑माना दि॒वस्पर्य॒॑न्तरि॑क्षादसृक्षत ।

पृ॒थि॒व्या अधि॒ सानं॑वि ॥२७

पवं॑मानाः । दि॒वः । परिं॑ । अ॒न्तरि॑क्षात् । अ॒सृ॒क्ष॒त॒ ।

पृ॒थि॒व्याः । अधिं॑ । सानं॑वि ॥२७

पवमानाः । दिवः । परि । अन्तरिक्षात् । असृक्षत ।

पृथिव्याः । अधि । सानवि ॥२७

“पवमानाः सोमाः "दिवः द्युलोकात् “अन्तरिक्षात् च “पृथिव्याः भूम्याः “अधि “सानवि समुच्छ्रिते देशे देवयजने “परि “असृक्षत सृज्यन्ते ॥

पुना॒नः सो॑म॒ धार॒येंदो॒ विश्वा॒ अप॒ स्रिधः॑ ।

ज॒हि रक्षां॑सि सुक्रतो ॥२८

पु॒ना॒नः । सो॒म॒ । धार॑या । इन्दो॒ इति॑ । विश्वा॑ । अप॑ । स्रिधः॑ ।

ज॒हि । रक्षां॑सि । सु॒क्र॒तो॒ इति॑ सुऽक्रतो ॥२८

पुनानः । सोम । धारया । इन्दो इति । विश्वा । अप । स्रिधः ।

जहि । रक्षांसि । सुक्रतो इति सुऽक्रतो ॥२८

हे “इन्दो दीप्त “सुक्रतो सुकर्मन् “सोम “धारया “पुनानः पूयमानस्त्वं “विश्वाः सर्वान् “स्रिधः द्वेष्टॄन् शत्रून् "रक्षांसि राक्षसांश्च "अप "जहि मारय ॥

अ॒प॒घ्नन्त्सो॑म र॒क्षसो॒ऽभ्य॑र्ष॒ कनि॑क्रदत् ।

द्यु॒मंतं॒ शुष्मं॑मुत्त॒मं ॥२९

अ॒प॒ऽघ्नन् । सो॒म॒ । र॒क्षसः॑ । अ॒भि । अ॒र्ष॒ । कनि॑क्रदत् ।

द्यु॒ऽमन्तं॑म् । शुष्मं॑म् । उ॒त्ऽत॒मम् ॥२९

अपऽघ्नन् । सोम । रक्षसः । अभि । अर्ष । कनिक्रदत् ।

द्युऽमन्तम् । शुष्मम् । उत्ऽतमम् ॥२९

हे “सोम त्वं “रक्षसः रक्षांसि “अपघ्नन् विनाशयन् "कनिक्रदत् शब्दं कुर्वन् “द्युमन्तं दीप्तिमन्तम् "उत्तमं श्रेष्ठं “शुष्मं बलम् “अभ्यर्ष अस्मान् प्रति पवस्व ॥

अ॒स्मे वसू॑नि धारय॒ सोम॑ दि॒व्यानि॒ पार्थि॑वा ।

इंदो॒ विश्वा॑नि॒ वार्या॑ ॥३०

अ॒स्मे इति॑ । वसू॑नि । धा॒र॒य॒ । सोम॑ । दि॒व्यानि॑ । पार्थि॑वा ।

इन्दो॒ इति॑ । विश्वा॑नि । वार्या॑ ॥३०

अस्मे इति । वसूनि । धारय । सोम । दिव्यानि । पार्थिवा ।

इन्दो इति । विश्वानि । वार्या ॥३०

हे “इन्दो दीप्त “सोम "दिव्यानि दिवि भवानि “पार्थिवा पार्थिवानि पृथिव्यां जातानि च “विश्वानि सर्वाणि “वार्या वार्याणि वरणीयानि “वसूनि “अस्मे अस्मासु “धारय प्रक्षिप ॥ ॥३५॥

टिप्पणी

९.६३.२२ पवस्व देवायुषक् इति

सुरूपाद्यम् (https://sa.wikisource.org/s/2hnk)

भासम् (https://sa.wikisource.org/s/2hnq)

काक्षीवतम् (https://sa.wikisource.org/s/2hnr)

वासिष्ठमासितम् (https://sa.wikisource.org/s/2hns)

स्वाशिरामर्कः (https://sa.wikisource.org/s/2hos)

मण्डल ९

सूक्तं ९.१	सूक्तं ९.३१	सूक्तं ९.६१	सूक्तं ९.९१
सूक्तं ९.२	सूक्तं ९.३२	सूक्तं ९.६२	सूक्तं ९.९२
सूक्तं ९.३	सूक्तं ९.३३	सूक्तं ९.६३	सूक्तं ९.९३
सूक्तं ९.४	सूक्तं ९.३४	सूक्तं ९.६४	सूक्तं ९.९४
सूक्तं ९.५	सूक्तं ९.३५	सूक्तं ९.६५	सूक्तं ९.९५
सूक्तं ९.६	सूक्तं ९.३६	सूक्तं ९.६६	सूक्तं ९.९६
सूक्तं ९.७	सूक्तं ९.३७	सूक्तं ९.६७	सूक्तं ९.९७
सूक्तं ९.८	सूक्तं ९.३८	सूक्तं ९.६८	सूक्तं ९.९८
सूक्तं ९.९	सूक्तं ९.३९	सूक्तं ९.६९	सूक्तं ९.९९
सूक्तं ९.१०	सूक्तं ९.४०	सूक्तं ९.७०	सूक्तं ९.१००

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.६४

ऋग्वेदः - मण्डल ९

← सूक्तं ९.६३

सूक्तं ९.६४

कश्यपो मारीचः।

सूक्तं ९.६५ →

दे. पवमानः सोमः। गायत्री।

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः ।

वृषा धर्माणि दधिषे ॥१॥

वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः ।

सत्यं वृषन्वृषेदसि ॥२॥

अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः ।

वि नो राये दुरो वृधि ॥३॥

असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।

शुक्रासो वीरयाशवः ॥४॥

शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः ।

पवन्ते वारे अव्यये ॥५॥

ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा ।

पवन्तामान्तरिक्ष्या ॥६॥

पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत ।

सूर्यस्येव न रश्मयः ॥७॥

केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि ।

समुद्रः सोम पिन्वसे ॥८॥

हिन्वानो वाचमिष्यसि पवमान विधर्मणि ।

अक्रान्देवो न सूर्यः ॥९॥

इन्दुः पविष्ट चेतनः प्रियः कवीनां मती ।

सृजदश्वं रथीरिव ॥१०॥

ऊर्मिर्यस्ते पवित्र आ देवावीः पर्यक्षरत् ।

सीदन्नृतस्य योनिमा ॥११॥

स नो अर्ष पवित्र आ मदो यो देववीतमः ।

इन्दविन्द्राय पीतये ॥१२॥

इषे पवस्व धारया मृज्यमानो मनीषिभिः ।

इन्दो रुचाभि गा इहि ॥१३॥

पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः ।

हरे सृजान आशिरम् ॥१४॥

पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।

द्युतानो वाजिभिर्यतः ॥१५॥

प्र हिन्वानास इन्दवोऽच्छा समुद्रमाशवः ।

धिया जूता असृक्षत ॥१६॥

मर्मृजानास आयवो वृथा समुद्रमिन्दवः ।

अग्मन्नृतस्य योनिमा ॥१७॥

परि णो याह्यस्मयुर्विश्वा वसून्योजसा ।

पाहि नः शर्म वीरवत् ॥१८॥

मिमाति वह्निरेतशः पदं युजान ऋक्वभिः ।

प्र यत्समुद्र आहितः ॥१९॥

आ यद्योनिं हिरण्ययमाशुरृतस्य सीदति ।

जहात्यप्रचेतसः ॥२०॥

अभि वेना अनूषतेयक्षन्ति प्रचेतसः ।

मज्जन्त्यविचेतसः ॥२१॥

इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।

ऋतस्य योनिमासदम् ॥२२॥

तं त्वा विप्रा वचोविदः परि ष्कृण्वन्ति वेधसः ।

सं त्वा मृजन्त्यायवः ॥२३॥

रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे ।

पवमानस्य मरुतः ॥२४॥

त्वं सोम विपश्चितं पुनानो वाचमिष्यसि ।

इन्दो सहस्रभर्णसम् ॥२५॥

उतो सहस्रभर्णसं वाचं सोम मखस्युवम् ।

पुनान इन्दवा भर ॥२६॥

पुनान इन्दवेषां पुरुहूत जनानाम् ।

प्रियः समुद्रमा विश ॥२७॥

दविद्युतत्या रुचा परिष्टोभन्त्या कृपा ।

सोमाः शुक्रा गवाशिरः ॥२८॥

हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत् ।

सीदन्तो वनुषो यथा ॥२९॥

ऋधक्सोम स्वस्तये संजग्मानो दिवः कविः ।

पवस्व सूर्यो दृशे ॥३०॥

सायणभाष्यम्

'वृषा सोम' इति त्रिंशदृचं चतुर्थं सूक्तं मारीचस्य कश्यपस्यार्षं गायत्रं पवमानसौम्यम् । तथा चानुक्रान्तं- वृषा सोम कश्यपः' इति । उक्तो विनियोगः ।।

वृषा॑ सोम द्यु॒माँ अ॑सि॒ वृषा॑ दे॒व वृष॑व्रतः ।

वृषा॒ धर्मा॑णि दधिषे ॥१

वृषा॑ । सो॒म॒ । द्यु॒ऽमान् । अ॒सि॒ । वृषा॑ । दे॒व॒ । वृष॑ऽव्रतः ।

वृषा॑ । धर्मा॑णि । द॒धि॒षे॒ ॥१

वृषा । सोम । द्युऽमान् । असि । वृषा । देव । वृषऽव्रतः ।

वृषा । धर्माणि । दधिषे ॥१

हे “सोम "वृषा वर्षकस्त्वं “द्युमान् दीप्तिमान् “असि । अपि च हे “देव द्योतमान सोम “वृषा त्वं “वृषव्रतः वर्षणशीलकर्मासि । किंच हे सोम “वृषा त्वं “धर्माणि देवानां मनुष्याणां च हितानि कर्माणि "दधिषे धारयसि ।।

वृष्णां॑स्ते॒ वृष्ण्यं॒ शवो॒ वृषा॒ वनं॒ वृषा॒ मदः॑ ।

स॒त्यं वृं॑ष॒न्वृषेदं॑सि ॥२

वृष्णः॑ । ते॒ । वृष्ण्यं॑म् । शवः॑ । वृषा॑ । वनं॑म् । वृषा॑ । मदः॑ ।

स॒त्यम् । वृ॒ष॒न् । वृषा॑ । इत् । अ॒सि॒ ॥२

वृष्णः । ते । वृष्ण्यम् । शवः । वृषा । वनम् । वृषा । मदः ।

सत्यम् । वृषन् । वृषा । इत् । असि ॥२

हे “वृषन् कामानां वर्षक सोम “वृष्णः वर्षितुः “ते तव “शवः बलं “वृष्ण्यं वर्षणशीलं भवति । “वनं तव भजनमपि “वृषा वर्षणशीलम् । “मदः तव रसोऽपि “वृषा

वर्षणशीलः । “सत्यं सत्यमेव त्वं “वृषेत् वर्षणशील एव “असि भवसि ॥

अश्वो॒ न चं॑क्रदो॒ वृषा॒ सं गा इं॑दो॒ समर्वं॑तः ।

वि नो॑ रा॒ये दुरो॑ वृधि ॥३

अश्वः॑ । न । च॒क्र॒दः॒ । वृषा॑ । सम् । गाः । इ॒न्दो॒ इति॑ । सम् । अर्वं॑तः ।

वि । न॒ः । रा॒ये । दुरः॑ । वृ॒धि॒ ॥३

अश्वः । न । चक्रदः । वृषा । सम् । गाः । इन्दो इति । सम् । अर्वतः ।

वि । नः । राये । दुरः । वृधि ॥३

हे “इन्दो सोम “वृषा त्वम् “अश्वो “न अश्व इव “सं “चक्रदः संक्रन्दसे । अपि च “गाः पशून् “अर्वतः अश्वांश्चास्मभ्यं “सं प्रयच्छसीति शेषः। किंच “नः अस्माकं “राये धनाय “दुरः द्वाराणि “वि “वृधि विवृतानि कुरु ॥

असृं॑क्षत॒ प्र वा॒जिनो॑ ग॒व्या सोमा॑सो अश्व॒या ।

शु॒क्रासो॑ वीर॒याशवः॑ ॥४

असृं॑क्षत । प्र । वा॒जिनः॑ । ग॒व्या । सोमा॑सः । अ॒श्व॒ऽया ।

शु॒क्रासः॑ । वी॒र॒ऽया । आ॒शवः॑ ॥४

असृक्षत । प्र । वाजिनः । गव्या । सोमासः । अश्वऽया ।

शुक्रासः । वीरऽया । आशवः ॥४

“वाजिनः बलवन्तः “शुक्रासः शुक्रा उज्ज्वलाः "आशवः वेगवन्तश्च “सोमासः सोमाः “गव्या गवेच्छया “अश्वया अश्वेच्छया च “वीरया पुत्रेच्छया च “प्र “असृक्षत ऋत्विग्भिः सृज्यन्ते ॥

शु॒म्भमा॑ना ऋ॒ता॒युभि॑र्मृ॒ज्यमा॑ना॒ गभ॑स्त्योः ।

पव॑ते॒ वारे॑ अ॒व्यये॑ ॥५

शु॒म्भमा॑नाः । ऋ॒त॒युऽभिः॑ । मृ॒ज्यमा॑नाः । गभ॑स्त्योः ।

पव॑न्ते । वारे॑ । अ॒व्यये॑ ॥५

शुम्भमानाः । ऋतयुऽभिः । मृज्यमानाः । गभस्त्योः ।

पवन्ते । वारे । अव्यये ॥५

“ऋतायुभिः यज्ञकामैः “शुम्भमानाः अलंक्रियमाणाः
“गभस्त्योः गभस्तिभ्यां बाहुभ्याम् । ‘ गभस्ती बाहू' इति
बाहुनामसु पाठात् । “मृज्यमानाः शोध्यमानाः सोमाः
“अव्यये अविमये “वारे वाले पवित्रे “पवन्ते क्षरन्ति ॥ ॥
३६ ।।

ते विश्वा॑ दा॒शुषे॒ वसु॒ सोमा॑ दि॒व्यानि॒ पार्थि॑वा ।

पव॑न्ता॒मान्तरि॑क्ष्या ॥६

ते । विश्वा॑ । दा॒शुषे॑ । वसु॑ । सोमाः॑ । दि॒व्यानि॑ । पार्थि॑वा ।

पव॑न्ताम् । आ । अ॒न्तरि॑क्ष्या ॥६

ते । विश्वा । दाशुषे । वसु । सोमाः । दिव्यानि । पार्थिवा ।

पवन्ताम् । आ । अन्तरिक्ष्या ॥६

"ते “सोमाः "दिव्यानि दिवि भवानि “पार्थिवा पार्थिवानि पृथिव्यां संभूतानि च "अन्तरिक्ष्या अन्तरिक्ष्याणि अन्तरिक्षे जातानि च “विश्वा विश्वानि “वसु वसूनि धनानि “दाशुषे हविषां प्रदात्रे यजमानाय “आ “पवन्तां क्षरन्तु ॥

पव॑मानस्य विश्ववि॒त्प्र ते॒ सर्गा॑ असृक्षत ।

सूर्य॑स्येव॒ न र॒श्मयः॑ ॥७

पव॑मानस्य । वि॒श्व॒ऽवि॒त् । प्र । ते॒ । सर्गाः॑ । अ॒सृ॒क्ष॒त॒ ।

सूर्य॑स्यऽइव । न । र॒श्मयः॑ ॥७

पवमानस्य । विश्वऽवित् । प्र । ते । सर्गाः । असृक्षत ।

सूर्यस्यऽइव । न । रश्मयः ॥७

हे “विश्ववित् विश्वस्य द्रष्टः सोम “पवमानस्य क्षरतः "ते तव “सर्गाः सृज्यमाना धाराः “सूर्यस्येव “रश्मयः सूर्यस्य किरणा इव प्रकाशमानाः । “न इति संप्रत्यर्थे । इदानीं “प्र “असृक्षत प्रसृज्यन्ते ॥

के॒तुं कृ॒ण्वन्दि॒वस्परि॒ विश्वा॑ रू॒पाभ्य॑र्षसि ।

स॒मु॒द्रः सो॑म पिन्वसे ॥८

के॒तुम् । कृ॒ण्वन् । दि॒वः । परि॑ । विश्वा॑ । रू॒पा । अ॒भि । अ॒र्ष॒सि॒ ।

स॒मु॒द्रः । सो॒म॒ । पि॒न्व॒से॒ ॥८

केतुम् । कृण्वन् । दिवः । परि । विश्वा । रूपा । अभि । अर्षसि ।

समुद्रः । सोम । पिन्वसे ॥८

हे "सोम "समुद्रः । समुद्द्रवन्ति यस्माद्रसाः स समुद्रः। स त्वं “केतुं प्रज्ञानं “कृण्वन् कुर्वन् अस्माकं “विश्वा विश्वानि “रूपा रूपाणि “दिवः अन्तरिक्षात् “अभ्यर्षसि अभिपवसे । “पिन्वसे नानाविधानि धनानि चास्मभ्यं प्रयच्छसि ॥

हि॒न्वा॒नो वाच॑मिष्यसि॒ पव॑मान॒ विध॑र्मणि ।

अक्रा॑न्दे॒वो न सूर्यः॑ ॥९

हि॒न्वा॒नः । वाच॑म् । इ॒ष्य॒सि॒ । पव॑मान । विऽध॑र्मणि ।

अक्रा॑न् । दे॒वः । न । सूर्यः॑ ॥९

हिन्वानः । वाचम् । इष्यसि । पवमान । विऽधर्मणि ।

अक्रान् । देवः । न । सूर्यः ॥९

हे “पवमान सोम “हिन्वानः प्रेर्यमाणस्त्वं “वाचं शब्दम् “इष्यसि प्रेरयसि । कदेत्यत्राह । यदा तव रसः “सूर्यः “देवो “न देव इव “विधर्मणि विधारके पवित्रे “अक्रान् अक्रमीत् तदेत्यर्थः ॥

इन्दुः॑ पवि॒ष्ट॒ चेत॑नः प्रि॒यः क॑वी॒नां म॒ती ।

सृ॒जदश्वं॑ र॒थीरि॑व ॥१०

इन्दुः॑ । प॒वि॒ष्ट॒ । चेत॑नः । प्रि॒यः । क॒वी॒नाम् । म॒ती ।

सृ॒जत् । अश्व॑म् । र॒थीःऽइ॑व ॥१०

इन्दुः । पविष्ट । चेतनः । प्रियः । कवीनाम् । मती ।

सृजत् । अश्वम् । रथीःऽइव ॥१०

“चेतनः प्रज्ञापकः “प्रियः देवानां प्रीतिकरः “इन्दुः सोमः “कवीनां क्रान्तकर्मणां स्तोतॄणां “मती मत्या स्तुत्या “पविष्ट पवते । “अश्वं हयं “रथीरिव रथीव ऊर्मिं “सृजत् सृजति च ॥ ॥ ३७॥

ऊ॒र्मिर्यस्तें प॒वित्र॒ आ दें॒वा॒वीः प॒र्यक्षंरत् ।

सीदं॒न्नृतस्य॒ योनि॒मा ॥११

ऊ॒र्मिः । यः । ते॒ । प॒वित्रें । आ । दे॒व॒ऽअ॒वीः ।
प॒रि॒ऽअक्षंरत् ।

सीदंन् । ऋ॒तस्यं । योनिंम् । आ ॥११

ऊर्मिः । यः । ते । पवित्रे । आ । देवऽअवीः ।
परिऽअक्षरत् ।

सीदन् । ऋतस्य । योनिम् । आ ॥११

हे सोम “ते तव “यः “देवावीः देवकामः “ऊर्मिः तरङ्गः “ऋतस्य यज्ञस्य “योनिं स्थानम् “आ “सीदन् "पवित्रे “पर्यक्षरत् परिक्षरति तमूर्मिं सृजतीति पूर्वत्र संबन्धः ।।

स नों अर्ष प॒वित्र॒ आ मदो॒ यो दें॒व॒वीतंमः ।

इन्द॒विंद्रांय पी॒तयें ॥१२

सः । न॒ः । अ॒र्ष॒ । प॒वित्रें । आ । मदः॑ । यः । दे॒व॒ऽवीतंमः ।

इन्दो॒ इतिं । इन्द्रांय । पी॒तयें ॥१२

सः । नः । अर्ष । पवित्रे । आ । मदः । यः । देवऽवीतमः ।

इन्दो इति । इन्द्राय । पीतये ॥१२

हे “इन्दो “यः त्वं “देववीतमः अतिशयेन देवकामः "मदः मदकरश्च भवसि “सः त्वं “नः अस्माकं “पवित्रे “इन्द्राय इन्द्रस्य पीतये पानाय “आ “अर्ष आपवस्व ।।

इ॒षे पंवस्व॒ धारंया मृ॒ज्यमांनो मनी॒षिभिः॑ ।

इन्दों रु॒चाभि गा इंहि ॥१३

इ॒षे । प॒व॒स्व॒ । धारंया । मृ॒ज्यमांनः । म॒नी॒षिऽभिः॑ ।

इन्दो॒ इतिं । रु॒चा । अ॒भि । गाः । इ॒हि॒ ॥१३

इषे । पवस्व । धारया । मृज्यमानः । मनीषिऽभिः ।

इन्दो इति । रुचा । अभि । गाः । इहि ॥१३

हे “इन्दो सोम “मनीषिभिः ऋत्विग्भिः “मृज्यमानः शोध्यमानस्त्वम् “इषे अस्माकमन्नाय “धारया “पवस्व क्षर । “रुचा रोचमानेनान्धसा “गाः पशून् “अभि “इहि अभिगच्छ॥

पुना॒नो वरि॑वस्कृ॒ध्यूर्ज॒ं जना॑य गिर्वणः ।

हरे॑ सृजा॒न आ॒शिर॑ं ॥१४

पु॒ना॒नः । वरि॑वः । कृ॒धि॒ । ऊर्ज॑म् । जना॑य । गि॒र्व॒ण॒ः ।

हरे॑ । सृ॒जा॒नः । आ॒ऽशिर॑म् ॥१४

पुनानः । वरिवः । कृधि । ऊर्जम् । जनाय । गिर्वणः ।

हरे । सृजानः । आऽशिरम् ॥१४

हे “गिर्वणः गीर्भिर्वननीय “हरे हरितवर्ण सोम “आशिरं क्षीरं प्रति “सृजानः विसृज्यमानः “पुनानः पूयमानस्त्वं “जनाय यजमानार्थं “वरिवः धनम् “ऊर्जम् अन्नं च "कृधि कुरु ॥

पु॒ना॒नो दे॒ववीं॑तय॒ इन्द्रं॑स्य याहि निष्कृ॒तं ।

द्यु॒ता॒नो वा॒जिभिं॑र्य॒तः ॥१५

पु॒ना॒नः । दे॒वऽवीं॑तये । इन्द्रं॑स्य । या॒हि॒ । निः॒ऽकृ॒तम् ।

द्यु॒ता॒नः । वा॒जिऽभिः॑ । य॒तः ॥१५

पुनानः । देवऽवीतये । इन्द्रस्य । याहि । निःऽकृतम् ।

द्युतानः । वाजिऽभिः । यतः ॥१५

हे सोम "द्युतानः दीप्यमानः "वाजिभिः बलिभिर्यजमानैः "यतः संगृहीतः "देववीतये यज्ञार्थं "पुनानः पूयमानस्त्वम् "इन्द्रस्य "निष्कृतं स्थानं "याहि गच्छ॥ ॥ ३८ ॥

प्र हिं॑न्वा॒नास॒ इन्द॒वोऽच्छा॑ समु॒द्रमा॒शवः॑ ।

धि॒या जू॒ता अं॑सृक्षत ॥१६

प्र । हि॒न्वा॒नासः॑ । इन्द॑वः । अच्छ॑ । स॒मु॒द्रम् । आ॒शवः॑ ।

धि॒या । जू॒ताः । अ॒सृ॒क्ष॒त॒ ॥१६

प्र । हिन्वानासः । इन्दवः । अच्छ । समुद्रम् । आशवः ।

धिया । जूताः । असृक्षत ॥१६

"आशवः वेगवन्तः “इन्दवः सोमाः “समुद्रम् अन्तरिक्षम् "अच्छ प्रति “हिन्वानासः हिन्वानाः प्रेर्यमाणाः “धिया अङ्गुल्या “जूताः कृष्टाश्च “प्र “असृक्षत सृज्यन्ते ।

म॒र्मृ॒जा॒नास॑ आ॒यवो॒ वृथा॑ समु॒द्रमिन्द॑वः ।

अग्म॑न्नृ॒तस्य॒ योनि॒मा ॥१७

म॒र्मृ॒जा॒नासः॑ । आ॒यवः॑ । वृथा॑ । स॒मु॒द्रम् । इन्द॑वः ।

अग्म॑न् । ऋ॒तस्य॑ । योनि॑म् । आ ॥१७

मर्मृजानासः । आयवः । वृथा । समुद्रम् । इन्दवः ।

अग्मन् । ऋतस्य । योनिम् । आ ॥१७

“मर्मृजानासः मर्मृज्यमानाः “आयवः गन्तारः “इन्दवः सोमाः “वृथा आयासं विनैव “समुद्रम् अन्तरिक्षं गच्छन्ति । एतदेव दर्शयति । “ऋतस्य उदकस्य “योनिं स्थानम् “अग्मन् गच्छन्तीति ॥

परिं णो याह्यस्म॒युर्विश्वा॒ वसू॒न्योजंसा ।

पा॒हि न॒: शर्मं वी॒रवंत् ॥१८

परिं । न॒: । या॒हि॒ । अ॒स्म॒ऽयुः । विश्वां । वसूंनि । ओजंसा ।

पा॒हि । न॒: । शर्मं । वी॒रऽवंत् ॥१८

परि । नः । याहि । अस्मऽयुः । विश्वा । वसूनि । ओजसा ।

पाहि । नः । शर्म । वीरऽवत् ॥१८

हे सोम "अस्मयुः अस्मत्कामस्त्वं "नः अस्माकं "विश्वा विश्वानि "वसूनि धनानि "ओजसा बलेन सह "परि "याहि रक्षार्थं परिगच्छ । अपि च "नः अस्माकं "वीरवत् पुत्रवत् "शर्म गृहं "पाहि रक्ष ॥

मिमा॑ति॒ वह्नि॒रेत॑शः प॒दं यु॑जा॒न ऋक्व॑भिः ।

प्र यत्स॑मु॒द्र आहि॑तः ॥१९

मिमा॑ति । वह्नि॑ः । एत॑शः । प॒दम् । यु॒जा॒नः । ऋक्व॑ऽभिः ।

प्र । यत् । स॒मु॒द्रे । आऽहि॑तः ॥१९

मिमाति । वह्निः । एतशः । पदम् । युजानः । ऋक्वऽभिः
।

प्र । यत् । समुद्रे । आऽहितः ॥१९

हे सोम “यत् यदा यः “वह्निः वहनशीलः “एतशः अश्वः “मिमाति शब्दं करोति “ऋक्वभिः ऋत्विग्भिः स्तोतृभिः “पदं यज्ञे "युजानः निदधत् स्तोत्रश्रवणार्थमागच्छति च तदा स यज्ञवाहकाश्वात्मा त्वं “समुद्रे उदके वसतीवरीषु “प्र “आहितः भवसि ।।

आ यद्योनिं हिरण्ययंमाशुर्ऋतस्य सीदंति ।

जहात्यप्रंचेतसः ॥२०

आ । यत् । योनिंम् । हिरण्ययंम् । आशुः । ऋतस्यं । सीदंति ।

जहा॑ति । अप्र॑ऽचेतसः ॥२०

आ । यत् । योनिम् । हिरण्ययम् । आशुः । ऋतस्य । सीदति ।

जहाति । अप्रऽचेतसः ॥२०

“यत् यदा “आशुः वेगवान् सोमः “ऋतस्य यज्ञस्य “हिरण्ययं हिरण्मयं “योनिं स्थानम् । ‘हिरण्यपाणिरभिषुणोति' इत्युक्तम्। “आ “सीदति तदानीम् “अप्रचेतसः “जहाति विसृजति । अस्तोतॄणां यज्ञं नाभिगच्छति किंतु स्तोतॄणामेव यज्ञमभिगच्छतीत्यर्थः ॥

॥ ३९ ॥

अ॒भि वे॒ना अ॑नूष॒तेय॑क्षन्ति॒ प्रचे॑तसः ।

मज्ज॒न्त्यवि॑चेतसः ॥२१

अ॒भि । वे॒नाः । अ॒नू॒ष॒त॒ । इयंक्षन्ति । प्रऽचेंतसः ।

मज्जंन्ति । अविंऽचेतसः ॥२१

अभि । वेनाः । अनूषत । इयक्षन्ति । प्रऽचेतसः ।

मज्जन्ति । अविऽचेतसः ॥२१

“वेनाः कान्ताः स्तोतारः “अभि "अनूषत सोममभिष्टुवन्ति । “प्रचेतसः सुमतयः “इयक्षन्ति यष्टुमिच्छन्ति च । “अविचेतसः । विशिष्टमतयो विचेतसः । अविचेतसो विपरीतमतय इत्यर्थः । “मज्जन्ति निमज्जन्ति । ये सोमं नाभिष्टुवन्ति न यजन्ति च ते नरके पतन्तीत्यर्थः ।।

इन्द्रांयेन्दो म॒रुत्वंते॒ पवंस्व॒ मधुंमत्तमः ।

ऋ॒तस्य॒ योनिंमा॒सदं ॥२२

इन्द्रा॑य । इ॒न्दो॒ इति॑ । म॒रुत्व॑ते । पव॑स्व । मधु॑मत्ऽतमः ।

ऋ॒तस्य॑ । योनि॑म् । आ॒ऽसद॑म् ॥२२

इन्द्राय । इन्दो इति । मरुत्वते । पवस्व । मधुमत्ऽतमः ।

ऋतस्य । योनिम् । आऽसदम् ॥२२

हे "इन्दो सोम “मधुमत्तमः अतिशयेन मधुमांस्त्वम्
"ऋतस्य यज्ञस्य “योनिं स्थानम् “आसदम् उपवेष्टुं
"मरुत्वते “इन्द्राय इन्द्रार्थं “पवस्व क्षर ॥

तं त्वा॒ विप्रा॑ वचो॒विदः॒ परि॑ ष्कृण्वन्ति वे॒धसः॑ ।

सं त्वा॑ मृजन्त्या॒यवः॑ ॥२३

तम् । त्वा॒ । विप्राः॑ । व॒च॒ःऽविदः॑ । परि॑ । कृ॒ण्व॒न्ति॒ ।
वे॒धसः॑ ।

सम् । त्वा॒ । मृ॒ज॒न्ति॒ । आ॒यवः॑ ॥२३

तम् । त्वा । विप्राः । वचःऽविदः । परि । कृण्वन्ति ।
वेधसः ।

सम् । त्वा । मृजन्ति । आयवः ॥२३

हे सोम “तं पवमानं “त्वा त्वां “विप्राः प्राज्ञाः “वेधसः कर्मणां कर्तारः “वचोविदः स्तोतारः “परिष्कृण्वन्ति अलंकुर्वन्ति । अपि च “त्वा त्वाम् “आयवः मनुष्याः “सं “मृजन्ति सम्यक् शोधयन्ति ।

रसं॑ ते मि॒त्रो अ॑र्य॒मा पिब॑न्ति॒ वरु॑णः कवे ।

पवमानस्य मरुतः ॥२४

रसंम् । ते । मित्रः । अर्यमा । पिबंन्ति । वरुंणः । कवे ।

पवंमानस्य । मरुतः ॥२४

रसम् । ते । मित्रः । अर्यमा । पिबन्ति । वरुणः । कवे ।

पवमानस्य । मरुतः ॥२४

हे “कवे क्रान्तकर्मन् सोम “पवमानस्य क्षरतः “ते तव “रसं “मित्रः “अर्यमा च "वरुणः च “मरुतः च एते सर्वे देवाः पिबन्ति ॥

त्वं सोंम विपश्चितं पुनानो वाचंमिष्यसि ।

इन्दों सहस्रंभर्णसं ॥२५

त्वम् । सो॒म॒ । वि॒प॒ऽचितं॑म् । पु॒ना॒नः । वाचं॑म् । इ॒ष्य॒सि॒ ।

इन्दो॒ इतिं । स॒हस्रं॑ऽभर्णसम् ॥२५

त्वम् । सोम । विपःऽचितम् । पुनानः । वाचम् । इष्यसि ।

इन्दो इति । सहस्रऽभर्णसम् ॥२५

हे “इन्दो दीप्त “सोम “पुनानः पूयमानः “त्वं “विपश्चितं प्रज्ञया पवित्रां “सहस्रभर्णसं बहुभरणां “वाचम् “इष्यसि प्रेरयसि ॥ ॥ ४० ॥

उ॒तो स॒हस्रं॑भर्णसं॒ वाचं॑ सोम मख॒स्युवं॑ ।

पु॒ना॒न इं॑दु॒वा भं॑र ॥२६

उ॒तो इति॑ । स॒हस्र॑ऽभर्णसम् । वाच॑म् । सो॒म॒ । म॒ख॒स्युव॑म्
।

पु॒ना॒नः । इ॒न्दो॒ इति॑ । आ । भ॒र॒ ॥२६

उतो इति । सहस्रऽभर्णसम् । वाचम् । सोम । मखस्युवम्
।

पुनानः । इन्दो इति । आ । भर ॥२६

"उतो अपि च हे "इन्दो दीप्त “सोम “पुनानः पूयमानस्त्वं “सहस्रभर्णसं सहस्रभरणां “मखस्युवं धनकामां “वाचम् अस्मभ्यम् “आ “भर आहर ॥

पु॒ना॒न इं॑दवेषा॒ पुरु॑हूत॒ जना॑नां ।

प्रि॒यः सं॑मु॒द्रमा विं॑श ॥२७

पु॒ना॒नः । इ॒न्दो॒ इति॑ । ए॒षा॒म् । पुरु॑ऽहूत । जना॑नाम् ।

प्रि॒यः । स॒मु॒द्रम् । आ । वि॒श॒ ॥२७

पुनानः । इन्दो इति । एषाम् । पुरुऽहूत । जनानाम् ।

प्रियः । समुद्रम् । आ । विश ॥२७

हे "पुरुहूत बहुभिराहूत “इन्दो सोम "पुनानः पूयमानस्त्वम् “एषाम् अस्मिन् यागे स्तोत्रं कुर्वतां “जनानां “प्रियः सन् "समुद्रं द्रोणकलशम् “आ “विश प्रविश ॥

दवि॑द्युतत्या रु॒चा प॑रि॒ष्टोभ॑न्त्या कृ॒पा ।

सोमाः॑ शु॒क्रा गवा॑शिरः ॥२८

दवि॑द्युतत्या । रु॒चा । प॒रि॒ऽस्तोभ॑न्त्या । कृ॒पा ।

सोमाः॑ । शु॒क्राः । गोऽआ॑शिरः ॥२८

दविद्युतत्या । रुचा । परिऽस्तोभन्त्या । कृपा ।

सोमाः । शुक्राः । गोऽआशिरः ॥२८

“शुक्राः उज्ज्वलाः "दविद्युतत्या द्योतमानया “रुचा दीप्त्या “परिष्टोभन्त्या परितः शब्दायमानया “कृपा धारया च युक्ताः “सोमाः “गवाशिरः भवन्ति । गव्येन पयसा मिश्रिता भवन्तीत्यर्थः॥

हि॒न्वा॒नो हे॒तृभि॑र्य॒त आ वाजं॑ वा॒ज्यं॑क्रमीत् ।

सीदं॑तो व॒नुषो॑ यथा ॥२९

हि॒न्वा॒नः । हे॒तृऽभिः॑ । य॒तः । आ । वाजं॑म् । वा॒जी ।
अ॒क्र॒मी॒त् ।

सीदं॑न्तः । व॒नुषः॑ । य॒था॒ ॥२९

हिन्वानः । हेतृऽभिः । यतः । आ । वाजम् । वाजी । अक्रमीत् ।

सीदन्तः । वनुषः । यथा ॥२९

“वाजी बलवान् सोमः "हेतृभिः प्रेरकैः स्तोतृभिः “हिन्वानः स्तोत्रैः प्रेर्यमाणः “यतः संयतः सन् “वाजं यागाख्यं युद्धम् “आ “अक्रमीत् आक्रामति । तत्र दृष्टान्तः । “यथा “वनुषः हन्तारो भटाः “सीदन्तः युद्धं प्रविशन्तः आक्रामन्ति तद्वदित्यर्थः ॥

ऋ॒धक्सो॑म स्व॒स्तये॑ संजग्मा॒नो दि॒वः क॒विः ।

पव॑स्व॒ सूर्यो॑ दृ॒शे ॥३०

ऋ॒धक् । सो॒म॒ । स्व॒स्तये॑ । स॒म्ऽज॒ग्मा॒नः । दि॒वः । क॒विः
।

पव॑स्व । सूर्य॑ः । दृ॒शे ॥३०

ऋधक् । सोम । स्वस्तये । सम्ऽजग्मानः । दिवः । कविः
।

पवस्व । सूर्यः । दृशे ॥३०

हे “सोम “कविः क्रान्तः “सूर्यः सुवीर्यस्त्वम् “ऋधक्
ऋध्नुवन् । तथा च यास्कः-‘ऋधगिति
पृथग्भावस्यानुप्रवचनं भवत्यथाप्यृध्नोत्यर्थे दृश्यते' (निरु.
४. २५) इति । “संजग्मानः संगच्छमानः “स्वस्तये "दृशे
दर्शनाय च “दिवः “पवस्व क्षर ॥ ॥ ४१ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके प्रथमोऽध्यायः ॥

टिप्पणी

९.६४.४ असृक्षत प्रवाजिनो इति

साम १०३४ (https://sa.wikisource.org/s/3kj)

९.६४.२२ इन्द्रायेन्दो मरुत्वते इति

इषोवृधीयम् (https://sa.wikisource.org/s/2aon) (ग्रामगेयः)

वाजदावर्यः (https://sa.wikisource.org/s/2hff) (ऊहगानम्)

रेवत्यः (https://sa.wikisource.org/s/21kj) (ऊह्यगानम्)

ऋत उपरि टिप्पणी (https://5cabeab707782.site123.me/%E0%A4%8B%E0%A4%A4-rita)

ऋत उपरि टिप्पणी(दर्पण) (http://puranastudy.atwebpages.com/pur_index4b/rita1.htm)

आश्वसूक्तम् (https://sa.wikisource.org/s/2t9r)

९.६४.२८ दविद्युतत्या रुचा इति

दविद्युतत्यारुचेति तृतीयस्याह्नः प्रतिपद्भवति। दविद्युतती वै गायत्री परिष्टोभन्ती त्रिष्टुब्गवाशीर्जगती त्रीणि रूपाणि समारभते त्रिरात्रस्याविस्रंसाय - पंचवि.ब्रा. १२.१ (https://sa.wikisource.org/s/tvr)

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

ऋग्वेदः सूक्तं ९.६५

← सूक्तं ९.६४

ऋग्वेदः - मण्डल ९

सूक्तं ९.६५

भृगुर्वारुणिर्जमदग्निर्भार्गवो वा।

सूक्तं ९.६६ →

दे. पवमानः सोमः। गायत्री।

हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् ।

महामिन्दुं महीयुवः ॥१॥

पवमान रुचारुचा देवो देवेभ्यस्परि ।

विश्वा वसून्या विश ॥२॥

आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।

इषे पवस्व संयतम् ॥३॥

वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।

पवमान स्वाध्यः ॥४॥

आ पवस्व सुवीर्यं मन्दमानः स्वायुध ।

इहो ष्विन्दवा गहि ॥५॥

यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः ।

द्रुणा सधस्थमश्नुषे ॥६॥

प्र सोमाय व्यश्ववत्पवमानाय गायत ।

महे सहस्रचक्षसे ॥७॥

यस्य वर्णं मधुश्चुतं हरिं हिन्वन्त्यद्रिभिः ।

इन्दुमिन्द्राय पीतये ॥८॥

तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः ।

सखित्वमा वृणीमहे ॥९॥

वृषा पवस्व धारया मरुत्वते च मत्सरः ।

विश्वा दधान ओजसा ॥१०॥

तं त्वा धर्तारमोण्योः पवमान स्वर्दृशम् ।

हिन्वे वाजेषु वाजिनम् ॥११॥

अया चित्तो विपानया हरिः पवस्व धारया ।

युजं वाजेषु चोदय ॥१२॥

आ न इन्दो महीमिषं पवस्व विश्वदर्शतः ।

अस्मभ्यं सोम गातुवित् ॥१३॥

आ कलशा अनूषतेन्दो धाराभिरोजसा ।

एन्द्रस्य पीतये विश ॥१४॥

यस्य ते मद्यं रसं तीव्रं दुहन्त्यद्रिभिः ।

स पवस्वाभिमातिहा ॥१५॥

राजा मेधाभिरीयते पवमानो मनावधि ।

अन्तरिक्षेण यातवे ॥१६॥

आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम् ।

वहा भगत्तिमूतये ॥१७॥

आ नः सोम सहो जुवो रूपं न वर्चसे भर ।

सुष्वाणो देववीतये ॥१८॥

अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ।

सीदञ्छ्येनो न योनिमा ॥१९॥

अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः ।

सोमो अर्षति विष्णवे ॥२०॥

इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः ।

आ पवस्व सहस्रिणम् ॥२१॥

ये सोमासः परावति ये अर्वावति सुन्विरे ।

ये वादः शर्यणावति ॥२२॥

य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् ।

ये वा जनेषु पञ्चसु ॥२३॥

ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम् ।

सुवाना देवास इन्दवः ॥२४॥

पवते हर्यतो हरिर्गृणानो जमदग्निना ।

हिन्वानो गोरधि त्वचि ॥२५॥

प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः ।

श्रीणाना अप्सु मृञ्जत ॥२६॥

तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये ।

स पवस्वानया रुचा ॥२७॥

आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे ।

पान्तमा पुरुस्पृहम् ॥२८॥

आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम् ।

पान्तमा पुरुस्पृहम् ॥२९॥

आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा ।

पान्तमा पुरुस्पृहम् ॥३०॥

सायणभाष्यम्

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

‘ हिन्वन्ति' इति त्रिंशदृचं पञ्चमं सूक्तं वरुणपुत्रस्य भृगोरार्षं भार्गवस्य जमदग्नेर्वा गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रम्यते-- हिन्वन्ति भृगुर्वारुणिर्जमदग्निर्वा ' इति । गतो विनियोगः ॥

हि॒न्वंति॒ सूर॒मुस्र॑यः॒ स्वसा॑रो जा॒मय॒स्पतिं॑ ।

म॒हामिंदुं॑ मही॒युवः॑ ॥१

हि॒न्वन्तिं॑ । सूरं॑म् । उस्र॑यः । स्वसा॑रः । जा॒मयः॑ । पतिं॑म् ।

म॒हाम् । इन्दुं॑म् । म॒ही॒युवः॑ ॥१

हिन्वन्ति । सूरम् । उस्रयः । स्वसारः । जामयः । पतिम् ।

महाम् । इन्दुम् । महीयुवः ॥१

अत्र सर्वत्र पवमानः सोमः स्तूयते । तत्रादावृषिः सोमं प्रत्याह । मदीया अङ्गुलयस्त्वामभिषोतुं प्रेरयन्तीति । तदुच्यते । “स्वसारः । अङ्गुलिनामैतत् । सुष्ठु कर्मसु प्रेर्यन्त ऋत्विग्भिरिति स्वसारः । “जामयः एकस्मात्पाणेरुत्पन्नत्वात् परस्परं बन्धुभूताः “उस्रयः कर्मार्थं निवसन्त्यः । सर्वत्र गन्त्र्य इत्यर्थः । तादृश्योऽङ्गुलयः “महीयुवः त्वदभिषवं कामयमानाः सत्यः “सूरं सुवीर्यं सोमे पीते वीर्यं भवतीति शोभनवीर्यकारणं वा सर्वेषां कर्मणि प्रेरकं वा तादृशं “पतिं सर्वस्य स्थावरजङ्गमजातस्य स्वामिनं यस्माद्देवार्थमिज्यते अत एव “महां देवेभ्यो दीयमानत्वेन महान्तं महनीयं वा “इन्दुं ग्रहेषु स्यन्दमानं सोमं “हिन्वन्ति प्रेरयन्ति । ‘हि वर्धनगत्योः' । स्वादिः ॥

पवंमान रुचारुंचा देवो देवेभ्युस्परिं ।

वि॒श्वा॒ वसू॒न्या विंश ॥२

पवंमान । रु॒चाऽरुंचा । दे॒वः । दे॒वेभ्यः॑ । परिं ।

विश्वां । वसूंनि । आ । वि॒श॒ ॥२

पवमान । रुचाऽरुचा । देवः । देवेभ्यः । परि ।

विश्वा । वसूनि । आ । विश ॥२

हे “पवमान दशापवित्रेण पूयमान यद्वा पुनान शुद्ध सोम “रुचारुचा। ‘रुच दीप्तौ । सर्वेण तेजसा "देवः दीप्यमानस्त्वं “देवेभ्यः “परि देवेभ्यः सकाशात् "विश्वा व्याप्तानि सर्वाणि बहूनि “वसूनि धनानि अस्माकम् “आ “विश प्रापय । यद्वा। देवेभ्यस्तदर्थं सर्वाणि वसूनि निवासस्थानानि ग्रहादीनि आ विश समन्तात् प्रविश ॥

आ पंवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।

इषे पंवस्व संयतं ॥३

आ । पवमान । सुऽस्तुतिम् । वृष्टिम् । देवेभ्यः । दुवः ।

इषे । पवस्व । सम्ऽयतंम् ॥३

आ । पवमान । सुऽस्तुतिम् । वृष्टिम् । देवेभ्यः । दुवः ।

इषे । पवस्व । सम्ऽयतम् ॥३

हे “पवमान पूयमान पुनान वा सोम “सुष्टुतिं शोभनस्तुतियुक्तां “वृष्टिं “देवेभ्यः देवानां “दुवः । 'सुपां सुलुक्° ' इति चतुर्थ्यां लुक् । दुवसे परिचरणाय “आ “पवस्व आगमय । त्वं यथा मदीयया स्तुत्या वृष्टिर्भविष्यति तथा कुर्वित्यर्थः । किं चास्माकम् “इषे

अन्नार्थं च “संयतं सम्यगस्मान् संगच्छन्तीं वृष्टिं कुरु । यद्वा । दुवः परिचर्यामभिलक्ष्य क्रियमाणां सुष्टुतिं शोभनस्तुतिरूपां वृष्टिम् । बहुस्तुतिमित्यर्थः । एतां देवेभ्यः प्रापय ॥

वृषा॒ ह्यसि॑ भा॒नुना॑ द्यु॒मंतं॑ त्वा हवामहे ।

पव॑मान स्वा॒ध्यः॑ ॥४

वृषा॑ । हि । असि॑ । भा॒नुना॑ । द्यु॒ऽमन्त॑म् । त्वा॒ । ह॒वा॒म॒हे॒ ।

पव॑मान । सु॒ऽआ॒ध्यः॑ ॥४

वृषा । हि । असि । भानुना । द्युऽमन्तम् । त्वा । हवामहे ।

पवमान । सुऽआध्यः ॥४

हे सोम त्वं “वृषा अभिमतफलानां वर्षिता “असि “हि भवसि खलु । तस्मात् हे “पवमान पूयमान पुनान वा सोम "स्वाध्यः शोभनकर्माणः सुष्ठु ध्यानवन्तो वा वयं “भानुना तेजसा “द्युमन्तं दीप्तिमन्तम् । अतिशयेन तेजस्विनमित्यर्थः । स्तुतिमन्तं वा “त्वा त्वां “हवामहे यज्ञेष्वाह्वयामहे ॥

आ पंवस्व सुवीर्यं मंदंमानः स्वायुध ।

इहो ष्विंदवा गंहि ॥५

आ । पवस्व । सुऽवीर्यंम् । मन्दंमानः । सुऽआयुध ।

इहो इतिं । सु । इन्दो इतिं । आ । गहि ॥५

आ । पवस्व । सुऽवीर्यम् । मन्दमानः । सुऽआयुध ।

इहो इति । सु । इन्दो इति । आ । गहि ॥५

हे "स्वायुध । यज्ञे स्फ्यकपालादीनि दशायुधानीत्यभिधीयन्ते । शोभनानि तानि यस्य स तथोक्तः। यद्वा । धनुरादीन्यायुधानि यस्य सः । तादृश हे सोम त्वं “मन्दमानः मोदमानः सन् । यद्वा। अन्तर्णीतण्यर्थः । देवान् स्वयं मादयन् । “सुवीर्यं शोभनवीर्योपेतं पुत्रादिकमस्माकम् “आ “पवस्व । पवतिर्गत्यर्थः । आप्रापय । किंच हे “इन्दो ग्रहेषु चमसेषु च क्षरणशील सोम “इहो । इह उ पदद्वयम् । उ इत्यवधारणे । इहैवास्मदीये यज्ञ एव सुष्ठु “आ “गहि आगच्छ ॥ ॥ १ ॥

यद॒द्भिः पंरिषि॒च्यसें मृ॒ज्यमांनो॒ गभंस्त्योः ।

द्रुणां स॒धस्थंमश्नुषे ॥६

यत् । अ॒त्ऽभिः । प॒रि॒ऽसि॒च्यसे॑ । मृ॒ज्यमा॑नः । गभ॑स्त्योः ।

द्रु॒णा॑ । स॒धऽस्थ॑म् । अ॒श्नु॒षे॒ ॥६

यत् । अत्ऽभिः । परिऽसिच्यसे । मृज्यमानः । गभस्त्योः ।

द्रुणा । सधऽस्थम् । अश्नुषे ॥६

हे सोम “गभस्त्योः । बाहुनामैतत् । बभसति दीपयन्ति निर्मथ्नन्यात्भ्यामग्निमिति गभस्ती बाहू । तयोः “मृज्यमानः ताभ्यां शोध्यमानः सन् “अद्भिः । सोमसेचनार्थं चतुर्विधा आपः । ताभिर्वसतीवरीभिरेकधनाभिश्च “यत् यदा “परिषिच्यसे परितः सिच्यमानो भवसि तदानीं “द्रुणा दुममयेन पात्रेण

गृह्यमाणः सन् “सधस्थम् । सह तिष्ठन्त्यत्रेति सधस्थं स्थानं ग्रहचमसादिकम् । “अश्नुषे प्राप्नोषि ॥

प्र सोमा॑य व्यश्व॒वत्पव॑मानाय गायत ।

म॒हे स॒हस्र॑चक्षसे ॥७

प्र । सोमा॑य । व्य॒श्व॒ऽवत् । पव॑मानाय । गा॒य॒त॒ ।

म॒हे । स॒हस्र॑ऽचक्षसे ॥७

प्र । सोमाय । व्यश्वऽवत् । पवमानाय । गायत ।

महे । सहस्रऽचक्षसे ॥७

हे स्तोतारः “पवमानाय दशापवित्रेण पूयमानाय पुनानाय वा “सोमाय “प्र “गायत प्रकर्षेण सामगानं कुरुत ।

अभिष्टुत वा । कथमिव । “व्यश्ववत् । यथा पूर्वं व्यश्वो नामर्षिः सोममगासीत् तद्वद्यूयमपि । कीदृशाय । “महे महते देवेभ्यः स्वीक्रियमाणत्वेन गुणादिभिर्वा महत्त्वयुक्ताय “सहस्रचक्षसे । प्रयोगबाहुल्यापेक्षमेतद्वचनम् । सहस्रसंख्याकस्तोत्रयुक्ताय । यद्वा । नानाविधैर्देवैरनेकधा द्रष्टव्याय सोमायेति ॥

यस्य॒ वर्णं॑ मधु॒श्चुत॒ं हरिं॑ हि॒न्वंत्यद्रिं॑भिः ।

इंदु॒मिंद्रा॑य पी॒तयें ॥८

यस्य॑ । वर्ण॑म् । म॒धु॒ऽश्चुत॑म् । हरि॑म् । हि॒न्वन्ति॑ । अद्रि॑ऽभिः ।

इन्दु॑म् । इन्द्रा॑य । पी॒तये॑ ॥८

यस्य । वर्णम् । मधुऽश्चुतम् । हरिम् । हिन्वन्ति ।
अद्रिऽभिः ।

इन्दुम् । इन्द्राय । पीतये ॥८

हे अध्वर्य्वादयः “वर्णं शत्रूणां वारकम् । येनासौ पीयते तेन मत्तेन शत्रवः संप्रहार्यन्त इति शत्रुनिवारणसमर्थम् । “मधुश्चुतं मधुररसस्य च्यावयितार “हरिं हरितवर्णम् “इन्दुम् । इन्धेरेतद्रूपमत्रेष्यते । सर्वतो दीप्यमानम्।' उन्दी क्लेदने ' इत्यस्माद्वा । अभिषवानन्तरं पात्रेषु क्षरणशीलम् । “यस्य सोमस्य तव कारणमंशुम् “अद्रिभिः “हिन्वन्ति प्रेरयन्ति । अभिषुण्वन्तीत्यर्थः। “इन्द्राय “पीतये इन्द्रस्य पानाय । तदर्थमित्यर्थः ॥

तस्यं ते वा॒जिनों व॒यं विश्वा॒ धनांनि जि॒ग्युषः॑ ।

स॒खि॒त्वमा वृं॑णीमहे ॥९

तस्यं । ते॒ । वा॒जिनः॑ । व॒यम् । विश्वा॑ । धना॑नि । जि॒ग्युषः॑ ।

स॒खि॒ऽत्वम् । आ । वृ॒णी॒म॒हे॒ ॥९

तस्य । ते । वाजिनः । वयम् । विश्वा । धनानि । जिग्युषः ।

सखिऽत्वम् । आ । वृणीमहे ॥९

हे सोम “वाजिनः संभृतहविष्काः “वयं “विश्वा विश्वानि सर्वाणि व्याप्तानि वा शत्रुधनानि “जिग्युषः जितवतः “तस्य पूर्वोक्तलक्षणस्य प्रसिद्धस्य वा "ते तव “सखित्वं स्तुत्यस्तोतृलक्षणं सख्यम् “आ “वृणीमहे संभजामहे । अस्मभ्यं धनं देहीति संभजनं कुर्म इत्यर्थः ॥ जिग्युषः । ‘ जि जये' । लिटि क्वसौ ‘वस्वेकाजात्' इति

नियमादिडभावः। 'सन्लिटोर्जेः' इत्यभ्यासादुत्तरस्य कवर्गादेशः । ङसि परतो वसोः संप्रसारणम् । क्वसुप्रत्ययस्वरः ॥

वृषा॑ पवस्व॒ धार॑या म॒रुत्व॑ते च मत्स॒रः ।

विश्वा॒ दधा॑न॒ ओज॑सा ॥१०

वृषा॑ । प॒व॒स्व॒ । धार॑या । म॒रुत्व॑ते । च॒ । म॒त्स॒रः ।

विश्वा॑ । दधा॑नः । ओज॑सा ॥१०

वृषा । पवस्व । धारया । मरुत्वते । च । मत्सरः ।

विश्वा । दधानः । ओजसा ॥१०

हे सोम त्वं “वृषा स्तोतॄणामभिमतफलस्य वर्षकः सन् “धारया त्वदीयया “पवस्व द्रोणकलशमागच्छ । पवतिर्गतिकर्मा । आगतस्त्वं यदास्माभिरिन्द्राय दीयसे तदा “मरुत्वते सहाया मरुतो यस्य सन्ति तस्मा इन्द्राय “मत्सरः मदकरः “च भव। कीदृशः । “विश्वा विश्वानि सर्वाणि व्याप्तानि वा धनानि “ओजसा आत्मीयेन बलेन युक्तः सन् स्तोतृभ्यस्तानि “दधानः प्रयच्छन् । त्वं मादयिता भवेति समन्वयः ॥ ॥ २ ॥

तं त्वां धर्तारंमोण्योः३ पवंमान स्वर्दृशं ।

हिन्वे वाजेंषु वाजिनं ॥११

तम् । त्वा । धर्तारंम् । ओण्योः । पवंमान । स्वःऽदृशंम् ।

हिन्वे । वाजेंषु । वाजिनंम् ॥११

तम् । त्वा । धर्तारम् । ओण्योः । पवमान । स्वःऽदृशम् ।

हिन्वे । वाजेषु । वाजिनम् ॥११

हे “पवमान पूयमान पुनान वा हे सोम “ओण्योः। द्यावापृथिवीनामैतत् । तयोः “धर्तारं धारकमत एव "स्वर्दृशं सर्वस्य सूर्यस्य वा द्रष्टारं सर्वैर्देवैर्द्रष्टव्यं वा “वाजिनं बलवन्तं तं पूर्वोक्तगुणप्रसिद्धं “त्वा त्वां “वाजेषु संग्रामेषु “हिन्वे प्रेरयामि । यद्वा । वाजेष्वन्नेषु विषयेषु हिनोमि । अन्नादिकं प्रयच्छेत्यर्थः ॥

अ॒या चि॒त्तो वि॒पानया॒ हरिः॑ पवस्व॒ धार॑या ।

युजं॒ वाजे॑षु चोदय ॥१२

अ॒या । चि॒त्तः । वि॒पा । अ॒नया॑ । हरिः॑ । प॒व॒स्व॒ । धार॑या ।

युजंम् । वाजेंषु । चो॒द॒य॒ ॥१२

अया । चित्तः । विपा । अनया । हरिः । पवस्व । धारया ।

युजम् । वाजेषु । चोदय ॥१२

हे पवमान “अया। अय पय गतौ । कर्मार्थमितस्ततो गच्छन्तीभिरनया “विपा । ‘विप प्रेरणे' । हवींष्यग्नौ प्रेरयन्तीति विपोऽङ्गुलयः । एकवचनं छान्दसम् । प्रत्येकविवक्षया वा । एताभिरमंदीयाभिरङ्गुलीभिः “चित्तः ज्ञातः निर्गतोऽभिषुतः “हरिः हरितवर्णस्त्वं धारया संततया “पवस्व द्रोणकलशं ग्रहांश्चागच्छ त्वम्। किंच “युजं सखायमिन्द्रं “वाजेषु संग्रामेषु “चोदय प्रेरय । यदा अस्माभिरिन्द्रार्थं सोमो दीयते तदा तत्पानेन हृष्टः सन् शत्रून् हन्तीत्यर्थः ॥

आ नं इंदो म॒हीमिषं॒ पवंस्व वि॒श्वदंर्शतः ।

अ॒स्मभ्यं सोम गातु॒वित् ॥१३

आ । न॒ः । इ॒न्दो॒ इतिं । म॒हीम् । इषंम् । पवंस्व ।
वि॒श्वऽदंर्शतः ।

अ॒स्मभ्यंम् । सो॒म॒ । गा॒तु॒ऽवित् ॥१३

आ । नः । इन्दो इति । महीम् । इषम् । पवस्व ।
विश्वऽदर्शतः ।

अस्मभ्यम् । सोम । गातुऽवित् ॥१३

हे “इन्दो क्षरणशील दीपनशील वा हे सोम “विश्वदर्शतः विश्वैः सर्वैर्दर्शनीयः । यद्वा । विश्वं सर्वं वस्तुजातं दर्श्यते ज्ञाप्यतेऽनेनेति । सः विश्वस्य प्रकाशक इत्यर्थः ।

तादृशस्त्वं “महीमिषं महत्प्रभूतमन्नं “नः अस्मभ्यम् “आ “पवस्व आगमय । प्रयच्छेत्यर्थः । किंच हे “सोम अभिषूयमाण पवमान “अस्मभ्यं “गातुवित् स्वर्गमार्गस्य लम्भयिता ज्ञापयिता भव ॥

आ क॒लशा॑ अनूष॒तेंदो॒ धारा॑भि॒रोजं॑सा ।

एंद्रं॑स्य पी॒तये॑ विश ॥१४

आ । क॒लशाः॑ । अ॒नू॒ष॒त॒ । इन्दो॒ इति॑ । धारा॑भिः ।
ओजं॑सा ।

आ । इन्द्रं॑स्य । पी॒तये॑ । वि॒श॒ ॥१४

आ । कलशाः । अनूषत । इन्दो इति । धाराभिः ।
ओजसा ।

आ । इन्द्रस्य । पीतये । विश ॥१४

हे "इन्दो क्षरणशील सोम “ओजसा बलेन युक्तस्य तव “धाराभिः निरन्तराभिः सहिताः “कलशाः । प्रयोगबाहुल्यापेक्षमेतद्बहुवचनम् । द्रोणकलशाः “आ “अनूषत स्तोतृभिः आभिमुख्येन स्तूयन्ते । सोमाभिषवकाले हि ऋत्विजः स्तुवन्ति खलु। ततस्त्वम् “इन्द्रस्य “पीतये पानाय “आ “विश ग्रहांश्चमसांश्च प्रविश ॥

यस्यं ते मद्यं रसं तीव्रं दुहंत्यद्रिंभिः ।

स पंवस्वाभिमातिहा ॥१५

यस्यं । ते । मद्यंम् । रसंम् । तीव्रम् । दुहन्तिं । अद्रिंऽभिः ।

सः । पवस्व । अभिमातिऽहा ॥१५

यस्य । ते । मद्यम् । रसम् । तीव्रम् । दुहन्ति । अद्रिऽभिः ।

सः । पवस्व । अभिमातिऽहा ॥१५

हे सोम “यस्य “ते तव “मद्यं मदकरं “तीव्रं क्षिप्रं मदकारिणं “रसम् “अद्रिभिः ग्रावभिरध्वर्वातेदयः “दुहन्ति अभिषुण्वन्ति “सः तादृशस्त्वं “अभिमातिहा । अभितो मातिरभिमानं येषां ते शत्रवः । पापरूपाणां शत्रूणां हन्ता सन् “पवस्व सर्वतो गच्छ। येऽभिषुण्वन्ति ते पापरहिताः सुकृतिनो भवन्तीत्यर्थः ॥ ॥ ३ ॥

राजा॑ मे॒धाभि॑रीयते॒ पव॑मानो म॒नावधि॑ ।

अं॒तरि॑क्षेण॒ यात॑वे ॥१६

राजा॑ । मे॒धाभिः॑ । ई॒य॒ते॒ । पव॑मानः । म॒नौ । अधि॑ ।

अ॒न्तरिं॑क्षेण । यातं॑वे ॥१६

राजा । मेधाभिः । ईयते । पवमानः । मनौ । अधि ।

अन्तरिक्षेण । यातवे ॥१६

“मनौ मनुष्ये यागं कुर्वाणे सति । यद्वा । मनावधि । मनुर्मन्तव्यो यज्ञः । तस्मिन् “पवमानः पूयमानः पुनानो वा “राजा । राजशब्देन सोमोऽभिधीयते । सोमं राजानमक्रीणन् ' (ऐ. ब्रा. १.२७) इत्यादिषु दृष्टत्वात् । स राजा “मेधाभिः स्तुतिभिः सह “ईयते गच्छति । किमर्थम् । “अन्तरिक्षेण आकाशमार्गेण द्रोणकलशं प्रति “यातवे यातुम् । द्रोणाभिगमनकाले हि स्तोतृभिः स्तूयते खलु ॥

आ नं॑ इंदो शत॒ग्विनं॒ गवां॒ पोषं॒ स्वश्व्यं॑ ।

वहा॒ भगं॑त्तिमू॒तयें॑ ॥१७

आ । न॒ः । इ॒न्दो॒ इति॑ । श॒त॒ऽग्विन॑म् । गवा॑म् । पोष॑म् । सु॒ऽअश्व्य॑म् ।

वह॑ । भग॑त्तिम् । ऊ॒तये॑ ॥१७

आ । नः । इन्दो इति । शतऽग्विनम् । गवाम् । पोषम् । सुऽअश्व्यम् ।

वह । भगत्तिम् । ऊतये ॥१७

हे “इन्दो पात्रेषु क्षरणशील दीपनशील वा हे सोम “शतग्विनं शतसहस्रसंख्याभिर्गोभिर्युक्तं “गवां “पोषं गवादीनां पुष्टिवर्धनं “स्वश्व्यं शोभनाश्वसङ्गसहितं “भगत्तिं भगदत्तिं भजनीयधनदानं च “ऊतये रक्षणाय “नः अस्माकम् “आ “वह प्रापय । गवादींश्च तेषां च वृद्धिं प्रयच्छेत्यर्थः ।।

आ नः॑ सोम॒ सहो॒ जुवो॑ रू॒पं न वर्च॑से भर ।

सु॒ष्वा॒णो दे॒ववी॑तये ॥१८

आ । न॒ः । सो॒म॒ । सहः॑ । जुवः॑ । रू॒पम् । न । वर्च॑से । भ॒र॒ ।

सु॒स्वा॒नः । दे॒वऽवी॑तये ॥१८

आ । नः । सोम । सहः । जुवः । रूपम् । न । वर्चसे । भर ।

सुस्वानः । देवऽवीतये ॥१८

हे “सोम "देववीतये देवपानाय देवानां कामाय वा “सुष्वाणः अभिषूयमाणोऽभिषुतो भव त्वम् । “सहः शत्र्वभिभवनसमर्थं बलं "जुवः । जु इति गत्यर्थः। शत्रून्

प्रति शीघ्रगमनं च । यद्वा । सर्वतो गमनशीलं बलं च । “न इति चार्थे । “वर्चसे । वर्च दीप्तौ । दीप्त्यै सर्वत्र प्रकाशनाय “रूपं च “नः अस्मभ्यम् “आ “भर आहर प्रयच्छ॥

अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ।

सीदञ्छ्येनो न योनिमा ॥१९

अर्ष । सोम । द्युमत्ऽतमः । अभि । द्रोणानि । रोरुवत् ।

सीदन् । श्येनः । न । योनिम् । आ ॥१९

अर्ष । सोम । द्युमत्ऽतमः । अभि । द्रोणानि । रोरुवत् ।

सीदन् । श्येनः । न । योनिम् । आ ॥१९

हे “सोम अभिषूयमाण पवमान “द्युमत्तमः अतिशयेन दीप्तिमांस्त्वं “द्रोणानि । प्रयोगबाहुल्यापेक्षमेतद्बहुवचनम् । द्रोणान् “अभि लक्षीकृत्य “रोरुवत् पुनःपुनर्भृशं वा शब्दं कुर्वन् “अर्ष तानागच्छ। दशापवित्रमध्यान्निर्गतः सोमोऽविच्छिन्नधारया द्रोणकलशे पतन् शब्दं करोति खलु। तत्र दृष्टान्तः । “श्येनो “न यथा “आ “सीदन् सर्वतो गच्छन् श्येनः शंसनीयगतिः पक्षी “योनिं स्वस्थानं कुलायं प्रति भृशं शब्दायमानः सन्नागच्छति तद्वत् ॥

अ॒प्सा इंद्रा॑य वा॒यवे॒ वरु॑णाय म॒रुद्भ्यः॑ ।

सोमो॑ अर्षति॒ विष्ण॑वे ॥२०

अ॒प्साः । इन्द्रा॑य । वा॒यवे॑ । वरु॑णाय । म॒रुत्ऽभ्यः॑ ।

सोमः॑ । अ॒र्ष॒ति॒ । विष्ण॑वे ॥२०

अप्सा॒ः । इन्द्रा॑य । वा॒यवे॑ । वरु॑णाय । म॒रुत्ऽभ्यः॑ ।

सोमः॑ । अ॒र्ष॒ति॒ । विष्ण॑वे ॥२०

“अप्साः वसतीवरीनामधेयानामपां संभक्ता । ‘षण संभक्तौ । “जनसन ' इति विट् । आत्वं ‘ विड्वनोः' इति । तादृशः “सोमः “अर्षति द्रोणकलशमागच्छति । किमर्थम्। “इन्द्राय । सर्वदेवानां प्रथम एवेन्द्रः सोमं पिबति तस्मात्पूर्वमेवाभिहितः । तस्मै “वायवे तत्सहायाय च । ऐन्द्रवायवे हीन्द्रस्यानन्तरं वायुः सोमं पिबति तस्मात्तदनु वायुरुक्तः । तस्मै च “वरुणाय “मरुद्भ्यः मितं शब्दं कुर्वद्भ्य एतन्नामकेभ्यो देवेभ्यः “विष्णवे सर्वजगद्व्यापिने विष्णवे च । एतेषां पातुं सोमः स्रवतीत्यर्थः ॥ ॥ ४ ॥

इषं॑ तो॒काय॑ नो॒ दध॑द॒स्मभ्यं॑ सोम वि॒श्वतः॑ ।

आ पंवस्व सह॒स्रिणं ॥२१

इषं॑म् । तो॒काय॑ । न॒ः । दध॑त् । अ॒स्मभ्य॑म् । सो॒म॒ । वि॒श्वत॑ः ।

आ । प॒व॒स्व॒ । स॒ह॒स्रिण॑म् ॥२१

इषम् । तोकाय । नः । दधत् । अस्मभ्यम् । सोम । विश्वतः ।

आ । पवस्व । सहस्रिणम् ॥२१

हे "सोम त्वं “नः अस्माकं “तोकाय पुत्राय “इषम् अन्नं “दधत् विदधत् प्रयच्छन् “सहस्रिणं सहस्रसंख्याकं धनं “विश्वतः सर्वतो दिक्षु “अस्मभ्यं च “आ “पवस्व आप्रापय । अस्मभ्यं पुत्राय च अन्नधनादिकं प्रयच्छेत्यर्थः ॥

ये सोमा॑सः परा॒वति॒ ये अ॑र्वा॒वति॑ सुन्वि॒रे ।

ये वा॒दः श॑र्य॒णाव॑ति ॥२२

ये । सोमा॑सः । प॒रा॒ऽवति॑ । ये । अ॒र्वा॒ऽवति॑ । सु॒न्वि॒रे ।

ये । वा॒ । अ॒दः । श॒र्य॒णाऽव॑ति ॥२२

ये । सोमासः । पराऽवति । ये । अर्वाऽवति । सुन्विरे ।

ये । वा । अदः । शर्यणाऽवति ॥२२

एतदादिभ्यामृग्भ्यामिन्द्रार्थं सर्वत्र सोमाभिषवोऽस्तीत्याह । "ये "सोमासः सोमाः “परावति विप्रकृष्टेऽतिदूरे देशे "ये वा “अर्वावति अन्तिके देश इन्द्रार्थं “सुन्विरे अभिषूयन्ते अभ्यषूयन्त "ये “वा “शर्यणावति । कुरुक्षेत्रस्य जघनार्धे शर्यणावत्संज्ञकं मधुररसयुक्तं सोमवत्सरोऽस्ति । “अदः

अस्मिन् सरसि सुरसा ये सोमाः इन्द्रायाभिषूयन्ते तेऽस्माकमभिमतफलं प्रयच्छन्त्विति वक्ष्यमाणेन संबन्धः ॥

य आ॑र्जी॒केषु॒ कृत्व॑सु॒ ये मध्ये॑ प॒स्त्या॑नां ।

ये वा॒ जने॑षु पं॒चसु॑ ॥२३

ये । आ॒र्जी॒केषु॑ । कृत्व॑ऽसु । ये । मध्ये॑ । प॒स्त्या॑नाम् ।

ये । वा॒ । जने॑षु । प॒ञ्चऽसु॑ ॥२३

ये । आर्जीकेषु । कृत्वऽसु । ये । मध्ये । पस्त्यानाम् ।

ये । वा । जनेषु । पञ्चऽसु ॥२३

“ये वा सोमाः “आर्जीकेषु । ऋजीकानामदूरभवा आर्जीका देशाः । तेषु तथा “कृत्वसु । कृत्वान इति देशाभिधानम् । तेषु कर्मवत्सु देशेषु च किंच “पस्त्यानां सरस्वत्यादीनां नदीनां “मध्ये समीपे च “ये सोमा अभिषूयन्ते । “ऋषयो वै सरस्वत्यां सत्रमासत' (ऐ. ब्रा. २.१९) इत्यादिषु नदीतीरे यज्ञकरणस्य श्रवणात् । किंच “जनेषु “पञ्चसु । निषादपञ्चमाश्चत्वारो वर्णाः पञ्च जनाः । तेषु च “ये “वा सोमा अभिषुताः ते सोमा अस्माकमभिमतं प्रयच्छन्त्वित्युत्तरेण संबन्धः ॥

ते नों वृ॒ष्टिं दि॒वस्परि॒ पवं॑ता॒मा सु॒वीर्यं॑ ।

सु॒वा॒ना दे॒वास॒ इंदं॑वः ॥२४

ते । नः॒ । वृ॒ष्टिम् । दि॒वः । परिं॑ । पवं॑न्ताम् । आ ।
सु॒ऽवीर्यं॑म् ।

सु॒वा॒नाः । दे॒वासः॑ । इन्द॑वः ॥२४

ते । नः । वृष्टिम् । दिवः । परि । पवन्ताम् । आ ।
सुऽवीर्यम् ।

सुवानाः । देवासः । इन्दवः ॥२४

“सुवानाः तत्र चात्र चाभिषूयमाणा देवा दीपनशीलाः स्तुत्या वा “इन्दवः ग्रहेषु चमसेषु च क्षरन्तः “ते सोमाः “नः अस्माकं “दिवस्परि। परिशब्दः पञ्चमीद्योतकः। अन्तरिक्षादादित्याद्वा “वृष्टिम् । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः' इति वृष्टिकारणत्वात् । किंच “सुवीर्यं शोभनवीर्योपेतं पुत्रं च धनादिकं वा “आ “पवन्तां प्रापयन्तु । यजमानः सोमेन अभिमतफलानि प्राप्नोति खलु ॥

पवं॑ते हर्य॒तो हरि॒र्गृणा॒नो ज॒मद॑ग्निना ।

हि॒न्वा॒नो गोरधि॑ त्व॒चि ॥२५

पवं॑ते । ह॒र्य॒तः । हरिः॑ । गृ॒णा॒नः । ज॒मत्ऽअ॑ग्निना ।

हि॒न्वा॒नः । गोः । अधि॑ । त्व॒चि ॥२५

पवते । हर्यतः । हरिः । गृणानः । जमत्ऽअग्निना ।

हिन्वानः । गोः । अधि । त्वचि ॥२५

“हर्यतः देवान् कामयमानः “हरिः हरितवर्णः किंच “गोः “त्वचि “अधि आनडुहे चर्मणि “हिन्वानः प्रेर्यमाणः स सोमः “जमदग्निना मन्त्रद्रष्ट्रर्षिणा “गृणानः स्तूयमानः सन् “पवते दशापवित्रेण पूतो भवति । यद्वा । पात्राण्यभिगच्छति ॥ ॥ ५॥

प्र शुक्रासों वयोजुवों हिन्वानासो न सप्तंयः ।

श्रीणाना अप्सु मृंजत ॥२६

प्र । शुक्रासः । वयःऽजुवः । हिन्वानासः । न । सप्तंयः ।

श्रीणानाः । अप्ऽसु । मृञ्जत ॥२६

प्र । शुक्रासः । वयःऽजुवः । हिन्वानासः । न । सप्तयः ।

श्रीणानाः । अप्ऽसु । मृञ्जत ॥२६

“शुक्रासः शुक्रा दीप्यमानाः “वयोजुवः अन्नं प्रेरयन्तः । यद्यदपेक्ष्य देवेभ्यः सोमं प्रयच्छन्ति तत्तदपेक्षितं सोमो ददाति । ते सोमाः “श्रीणानाः दधिक्षीरादिभिः श्रीयमाणाः सन्तः “अप्सु वसतीवरीष्वेकधनासु च “मृञ्जत ऋत्विग्भिः प्रमृज्यन्ते शोध्यन्ते । तत्र दृष्टान्तः ।

“हिन्वानासो “न सप्तयः । अश्वनामैतत् । यथाश्वा हिन्वानासो हिन्वानाः सादिभिः प्रेर्यमाणाः सन्तोऽप्सु तैरेव प्रशोधिता भवन्ति तद्वत् ॥

तं त्वा॑ सु॒तेष्वा॒भुवो॑ हि॒न्वि॒रे दे॒वता॑तये ।

स प॑वस्वा॒नया॑ रु॒चा ॥२७

तम् । त्वा॒ । सु॒तेषु॑ । आ॒ऽभुवः॑ । हि॒न्वि॒रे । दे॒वऽता॑तये ।

सः । प॒व॒स्व॒ । अ॒नया॑ । रु॒चा ॥२७

तम् । त्वा । सुतेषु । आऽभुवः । हिन्विरे । देवऽतातये ।

सः । पवस्व । अनया । रुचा ॥२७

अथ प्रत्यक्षकृतः । हे सोम “आभुवः । कर्मकरणार्थं समन्ताद्भवन्तीत्याभुव ऋत्विजः । ते “सुतेषु । सुतोऽभिषुतः सोमः । तद्वत्सु यज्ञेषु “देवतातये । ‘ सर्वदेवात्तातिल्' इति स्वार्थिकस्तातिल् । इन्द्रादिदेवेभ्यः “तं तादृशं प्रसिद्धं “त्वा त्वां “हिन्विरे ग्रावभिः प्रेरयन्ति । अभिषुण्वन्तीत्यर्थः । ततः “सः अभिषुतः स त्वम् “अनया “रुचा दीप्यमानया धारया द्रोणकलशं प्रति “पवस्व आगच्छ । पवतिर्गतिकर्मा । यद्वा । अनया मदीयया रुचा स्तुत्या सह कलशमागच्छ । कलशाभिगमनकाले हि सोमं स्तुवन्ति ।।

आ ते॒ दक्षं॑ मयो॒भुवं॒ वह्नि॑म॒द्या वृ॑णीमहे ।

पान्त॒मा पु॑रु॒स्पृहं॑ ॥२८

आ । ते॒ । दक्षं॑म् । म॒य॒ःऽभुवं॑म् । वह्निं॑म् । अ॒द्य । वृ॒णी॒म॒हे॒ ।

पान्तं॑म् । आ । पु॒रु॒ऽस्पृहं॑म् ॥२८

आ । ते । दक्षम् । मयःऽभुवम् । वह्निम् । अद्य । वृणीमहे ।

पान्तम् । आ । पुरुऽस्पृहम् ॥२८

हे सोम यष्टारो वयं “ते तव स्वभूतं “दक्षं बलम् “अद्य अस्मिन् यागदिने आभिमुख्येन “आ “वृणीमहे संभजामहे। कीदृशम्। “मयोभुवं सुखस्य भावकं “वह्निं धनादीनां प्रापकं “पान्तं शत्रुभ्यो रक्षकं “पुरुस्पृहं बहुभिः स्पृहणीयं काम्यमानं बलमिति ॥

आ म॒न्द्रमा वरें॑ण्य॒मा विप्र॒मा मं॑नी॒षिणं॑ ।

पां॒त॒मा पुं॒रु॒स्पृहं॑ ॥२९

आ । म॒न्द्रम् । आ । वरें॑ण्यम् । आ । विप्रं॑म् । आ । म॒नी॒षिणं॑म् ।

पान्तं॑म् । आ । पु॒रु॒ऽस्पृहं॑म् ॥२९

आ । मन्द्रम् । आ । वरेण्यम् । आ । विप्रम् । आ । मनीषिणम् ।

पान्तम् । आ । पुरुऽस्पृहम् ॥२९

हे सोम “मन्द्रं मदकरं स्तुत्यं वा त्वाम् “आ वृणीमहे । “वरेण्यं सर्वैर्वरणीयं संभजनीयं च । किंच “विप्रं मेधाविनं त्वाम् । तथा “मनीषिणम् । मनस ईषा मनीषा। तद्वन्तं स्तुतिमन्तं वा त्वाम् “आ वृणीमहे । प्रत्येकविशेषणापेक्षया आ इत्युपसर्गः कृतः । किंच

"पान्तं सर्वेषां रक्षकं “पुरुस्पृहं बहुभिः स्पृहणीयं च त्वां संभजामहे ॥

आ र॒यिमा सु॑चे॒तुन॒मा सु॑क्रतो त॒नूष्वा ।

पां॑त॒मा पु॑रु॒स्पृहं॑ ॥३०

आ । र॒यिम् । आ । सु॒ऽचे॒तुनं॑म् । आ । सु॒क्र॒तो॒ इति॑ सुऽक्रतो । त॒नूषुं॑ । आ ।

पान्तं॑म् । आ । पु॒रु॒ऽस्पृहं॑म् ॥३०

आ । रयिम् । आ । सुऽचेतुनम् । आ । सुक्रतो इति सुऽक्रतो । तनूषु । आ ।

पान्तम् । आ । पुरुऽस्पृहम् ॥३०

हे "सुक्रतो शोभनप्रज्ञ सोम त्वदीयं “रयिं धनं वयम् “आ वृणीमहे । किंच “सुचेतुनम् । ‘ चिती संज्ञाने'। भाव औणादिक उनन्प्रत्ययः । सुज्ञानं च। “तनूषु अस्मत्पुत्रेषु च धनं सुज्ञानं च त्वम् “आ विधेहि । यद्वा पुत्रार्थं वयमावृणीमहे । तथा “पान्तं सर्वस्य रक्षकं “पुरुस्पृहं बहुभिर्यष्टृभिः काम्यमानं त्वां संभजामहे ॥ ॥ ६ ॥

टिप्पणी

९.६५.१ हिन्वन्ति सूरमुस्रयः इति विशोविशीयम् (https://sa.wikisource.org/s/2hop)

९.६५.१० वृषा पवस्व धारया इति

हरिश्रीनिधनम् (https://sa.wikisource.org/s/2gnj)

सन्तनि (https://sa.wikisource.org/s/2hlj)

ऐडं सौपर्णम् (https://sa.wikisource.org/s/2hlk)

रोहितकूलीयम् (https://sa.wikisource.org/s/2hlm)

सोमसामनी इत्यादि (https://sa.wikisource.org/s/2lmc) (ग्रामगेयः)

९.६५.१९ अर्षा सोम द्युमत्तम इति

यण्वम् (https://sa.wikisource.org/s/2h2v)

शाकलम् (https://sa.wikisource.org/s/1zvo)

वार्शम् (https://sa.wikisource.org/s/1zvp)

९.६५.२२ ये सोमासः परावति इति

जराबोधीयम् (https://sa.wikisource.org/s/2hlt)

९.६५.२८ आ ते दक्षं मयोभुवं इति

साम ११३७ (https://sa.wikisource.org/s/3kk)

वार्शाणि त्रीणि (https://sa.wikisource.org/s/2h38).

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.६६

ऋग्वेदः - मण्डल ९
← सूक्तं ९.६५
सूक्तं ९.६६
सूक्तं ९.६७ →

शतं वैखानसाः।

दे. पवमानः सोमः, १९-२१ अग्निः पवमानः। गायत्री, १८ अनुष्टुप्।

पवस्व विश्वचर्षणेऽभि विश्वानि काव्या ।

सखा सखिभ्य ईड्यः ॥१॥

ताभ्यां विश्वस्य राजसि ये पवमान धामनी ।

प्रतीची सोम तस्थतुः ॥२॥

परि धामानि यानि ते त्वं सोमासि विश्वतः ।

पवमान ऋतुभिः कवे ॥३॥

पवस्व जनयन्निषोऽभि विश्वानि वार्या ।

सखा सखिभ्य ऊतये ॥४॥

तव शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते ।

पवित्रं सोम धामभिः ॥५॥

तवेमे सप्त सिन्धवः प्रशिषं सोम सिस्रते ।

तुभ्यं धावन्ति धेनवः ॥६॥

प्र सोम याहि धारया सुत इन्द्राय मत्सरः ।

दधानो अक्षिति श्रवः ॥७॥

समु त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः ।

विप्रमाजा विवस्वतः ॥८॥

मृजन्ति त्वा समग्रुवोऽव्ये जीरावधि ष्वणि ।

रेभो यदज्यसे वने ॥९॥

पवमानस्य ते कवे वाजिन् त्सर्गा असृक्षत ।

अर्वन्तो न श्रवस्यवः ॥१०॥

अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये ।

अवावशन्त धीतयः ॥११॥

अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः ।

अग्मन्नृतस्य योनिमा ॥१२॥

प्र ण इन्दो महे रण आपो अर्षन्ति सिन्धवः ।

यद्गोभिर्वासयिष्यसे ॥१३॥

अस्य ते सख्ये वयमियक्षन्तस्त्वोतयः ।

इन्दो सखित्वमुश्मसि ॥१४॥

आ पवस्व गविष्टये महे सोम नृचक्षसे ।

एन्द्रस्य जठरे विश ॥१५॥

महाँ असि सोम ज्येष्ठ उग्राणामिन्द ओजिष्ठः ।

युध्वा सञ्छश्वज्जिगेथ ॥१६॥

य उग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः ।

भूरिदाभ्यश्चिन्मंहीयान् ॥१७॥

त्वं सोम सूर एषस्तोकस्य साता तनूनाम् ।

वृणीमहे सख्याय वृणीमहे युज्याय ॥१८॥

अग्न आयूंषि पवस आ सुवोर्जमिषं च नः ।

आरे बाधस्व दुच्छुनाम् ॥१९॥

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।

तमीमहे महागयम् ॥२०॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।

दधद्रयिं मयि पोषम् ॥२१॥

पवमानो अति स्रिधोऽभ्यर्षति सुष्टुतिम् ।

सूरो न विश्वदर्शतः ॥२२॥

स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः ।

इन्दुरत्यो विचक्षणः ॥२३॥

पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत् ।

कृष्णा तमांसि जङ्घनत् ॥२४॥

पवमानस्य जङ्घ्नतो हरेश्चन्द्रा असृक्षत ।

जीरा अजिरशोचिषः ॥२५॥

पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।

हरिश्चन्द्रो मरुद्गणः ॥२६॥

पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः ।

दधत्स्तोत्रे सुवीर्यम् ॥२७॥

प्र सुवान इन्दुरक्षाः पवित्रमत्यव्ययम् ।

पुनान इन्दुरिन्द्रमा ॥२८॥

एष सोमो अधि त्वचि गवां क्रीळत्यद्रिभिः ।

इन्द्रं मदाय जोहुवत् ॥२९॥

यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः ।

तेन नो मृळ जीवसे ॥३०॥

सायणभाष्यम्

‘पवस्व' इति त्रिंशदृचं षष्ठं सूक्तम् । अत्रानुक्रम्यते- पवस्व शतं वैखानसा अष्टादश्यनुष्टुप्परास्तिस्र आग्नेय्यः' इति । शतसंख्याका वैखानसाख्याः संहता ऋषयः । ‘ त्वं सोम

सूरः ' इत्येषानुष्टुप् । शिष्टा गायत्र्यः । ‘ अग्न आयूंषि' इत्याद्यास्तिस्रः पवमानविशिष्टाग्निदेवताकाः । अन्यासां पवमानः सोमो देवता । गतः सूक्तविनियोगः ॥

पवं॑स्व विश्वचर्षणेऽभि विश्वा॑नि काव्या॑ ।

सखा॒ सखि॑भ्य॒ ईड्यः॑ ॥१

पवं॑स्व । वि॒श्व॒ऽच॒र्ष॒णे॒ । अ॒भि । विश्वा॑नि । काव्या॑ ।

सखा॑ । सखि॑ऽभ्यः । ईड्यः॑ ॥१

पवस्व । विश्वऽचर्षणे । अभि । विश्वानि । काव्या ।

सखा । सखिऽभ्यः । ईड्यः ॥१

हे "विश्वचर्षणे सर्वव्यापित्वेन सर्वस्य द्रष्टर्हे सोम “सखा स्तुत्यस्तोतृयष्टृयष्टव्यलक्षणेन संबन्धेन सखिभूतस्त्वम् “ईड्यः स्तोतव्यः सन् “सखिभ्यः हविष्प्रदानेनोपकारकत्वात् मित्रभूतेभ्योऽस्मभ्यं “विश्वानि सर्वाणि "काव्या । कवेः कर्माणि काव्यानि । ब्राह्मणादित्वात् ष्यञ्। सर्वाणि स्तोत्राणि “अभि लक्षीकृत्य “पवस्व आगच्छ॥

ताभ्या॒ं विश्वं॑स्य राजसि॒ ये पं॑वमान॒ धामं॑नी ।

प्र॒ती॒ची सों॑म त॒स्थतुः॑ ॥२

ताभ्यां॑म् । विश्वं॑स्य । रा॒ज॒सि॒ । ये इति॑ । प॒व॒मा॒न॒ । धामं॑नी॒ इति॑ ।

प्र॒ती॒ची इति॑ । सो॒म॒ । त॒स्थतुः॑ ॥२

ताभ्याम् । विश्वस्य । राजसि । ये इति । पवमान । धामनी इति ।

प्रतीची इति । सोम । तस्थतुः ॥२

हे “पवमान दशापवित्रेण पूयमान पुनान वा हे “सोम “ये “धामनी पूर्वपक्षापरपक्षयोर्लतारूपस्य सोमस्य तवैकैकपर्णवृद्धिह्रासाभ्यां तव स्वभूतौ पूर्वादिपक्षौ । यद्वा ये धामनी नामनी अंशुसोमात्मके अपि “प्रतीची त्वदभिमुखं गच्छन्तौ गच्छती वा पक्षौ नामनी वा “तस्थतुः उपजग्मतुः “ताभ्यां त्वं “विश्वस्य सर्वस्य लोकस्य “राजसि स्वामी भवसि । पूर्वादिपक्षाभ्यां सर्वलोकस्योपनायकत्वात्तस्य स्वामी भवसि । पृथिव्यामंशुनाम्ना मनुष्याणां सर्वेषामभीप्सितदानेन तस्य लोकस्य द्युलोके देवेभ्यः स्वसुधामयकलादानेन तेषां

प्रीणयिता भवसि । देवाः खलु सोमस्यैकैकवृद्धिहासाभ्यां कलाः पिबन्ति ॥

परि॒ धामा॑नि॒ यानि॑ ते॒ त्वं सो॑मासि वि॒श्वतः॑ ।

पव॑मान ऋ॒तुभिः॑ कवे ॥३

परि॑ । धामा॑नि । यानि॑ । ते॒ । त्वम् । सो॒म॒ । अ॒सि॒ । वि॒श्वतः॑ ।

पव॑मान । ऋ॒तुऽभिः॑ । क॒वे॒ ॥३

परि । धामानि । यानि । ते । त्वम् । सोम । असि । विश्वतः ।

पवमान । ऋतुऽभिः । कवे ॥३

हे “सोम यस्मात् “ते त्वदीयानि “धामानि त्वदधीना अहोरात्ररूपाः कालविशेषाः “परि भवन्ति सर्वत्र व्याप्तास्तिष्ठन्ति । यद्वा त्वदीयानि धामानि तेजांसि परि वर्तन्ते अत एव हे "पवमान पूयमान हे “कवे क्रान्तकर्मन हे सोम त्वम् “ऋतुभिः वसन्तादिकालविशेषैः सह “विश्वतः सर्वतः “असि भवसि । अहोरात्रौ यत्र यत्र व्याप्तौ तत्र तत्र वसन्तादिकालोपाधिकः सोमस्तिष्ठति । तयोस्तधीनत्वादित्यर्थः ॥

पवंस्व ज॒नय॒न्निषो॒ऽभि विश्वा॑नि॒ वार्या॑ ।

सखा॒ सखिं॑भ्य ऊ॒तयें ॥४

पवंस्व । ज॒नयं॑न् । इषः॑ । अ॒भि । विश्वा॑नि । वार्या॑ ।

सखा॑ । सखिं॑ऽभ्यः । ऊ॒तयें ॥४

पवस्व । जनयन् । इषः । अभि । विश्वानि । वार्या ।

सखा । सखिऽभ्यः । ऊतये ॥४

हे सोम “सखा सखिभूतस्त्वं “विश्वानि सर्वाणि “वार्या वरणीयान्यस्मत्कृतानि स्तोत्राणि “अभि लक्षीकृत्य “सखिभ्यः अस्मभ्यम् “ऊतये रक्षणाय जीवनाय “इषः अन्नानि “जनयन् प्रयच्छन् “पवस्व आगच्छ । पवतिर्गतिकर्मा ॥

तवं शु॒क्रासों अ॒र्चयों दि॒वस्पृ॒ष्ठे वि तंन्वते ।

प॒वित्रं सोम॒ धामंभिः ॥५

तवं । शु॒क्रासः॑ । अ॒र्चयः॑ । दि॒वः । पृ॒ष्ठे । वि । त॒न्व॒ते॒ ।

प॒वित्रंम् । सो॒म॒ । धामंऽभिः ॥५

तव । शुक्रासः । अर्चयः । दिवः । पृष्ठे । वि । तन्वते ।

पवित्रम् । सोम । धामऽभिः ॥५

हे “सोम “शुक्रासः सर्वत्र ज्वलनशीलाः “धामभिः तेजोभिः सहितस्य “तव स्वभूताः “अर्चयः अर्चनीया रश्मयः “दिवः द्योतमानस्यादित्यस्य द्युलोकस्य वा “पृष्ठे अधरभागे। पृथिव्यामित्यर्थः। “पवित्रं पवनसाधनमुदकं "वि “तन्वते विशेषेण तन्वन्ति विस्तारयन्ति । सर्वत्र कुर्वन्तीत्यर्थः ॥ ॥ ७ ॥

तवे॒मे स॒प्त सिंधंवः प्र॒शिषं सोम सिस्रते ।

तुभ्यं॑ धावंति धे॒नवः॑ ॥६

तवं । इ॒मे । स॒प्त । सिन्धंवः । प्र॒ऽशिषंम् । सो॒म॒ । सि॒स्र॒ते॒ ।

तुभ्यं॑म् । धा॒व॒न्ति॒ । धे॒नवः॑ ॥६

तव । इमे । सप्त । सिन्धवः । प्रऽशिषम् । सोम । सिस्रते ।

तुभ्यम् । धावन्ति । धेनवः ॥६

सृष्टिकर्तृत्वप्रसङ्गादाह । हे “सोम “इमे इमाः त्वया सृष्टाः “सप्त सप्तसंख्याकाः “सिन्धवः स्यन्दमाना गङ्गाद्या नद्यः । यद्वा सप्त सर्पणशीला नद्यः “तव “प्रशिषं प्रशासनमाज्ञामभि “सिस्रते अनुसरन्ति । त्वदाज्ञामनुसृत्य समुद्रं गच्छन्तीत्यर्थः । किंच “धेनवः नवप्रसूतिका देवानां हविष्प्रदानेन प्रीणयित्र्यो गावः “तुभ्यं त्वदर्थमेवाशिरं प्रयच्छाम इति “धावन्ति आगच्छन्ति ।

प्र सो॑म या॒हि॒ धार॑या सु॒त इं॒द्रा॑य मत्स॒रः ।

दधा॑नो॒ अक्षि॑ति॒ श्रवः॑ ॥७

प्र । सो॒म॒ । या॒हि॒ । धार॑या । सु॒तः । इन्द्रा॑य । म॒त्स॒रः ।

दधा॑नः । अक्षि॑ति । श्रवः॑ ॥७

प्र । सोम । याहि । धारया । सुतः । इन्द्राय । मत्सरः ।

दधानः । अक्षिति । श्रवः ॥७

हे “सोम अभिषूयमाण देव “मत्सरः इन्द्रस्य मदकरस्त्वं “सुतः अस्माभिरभिषुतः सन् “इन्द्राय इन्द्रार्थं दशापवित्रान्निर्गतया संततया त्वदीयया “धारया द्रोणकलशं “प्र “याहि प्रकर्षेण प्राप्नुहि । यद्वा । हे सोम सुतोऽभिषुतस्त्वमिन्द्राय मत्सरो मादयितृतमः सन् धारयाग्नौ स्वाहाकारेण पात्रात् पतन्त्या धारया सह त्वमिन्द्रमुपयाहि । कीदृशः । “अक्षिति अक्षीणं “श्रवः। श्रव इत्यन्ननाम । “दधानः अस्मभ्यं प्रयच्छन् प्र याहीति ।।

समुं त्वा धी॒भिरंस्वरन्हिन्व॒तीः स॒प्त जा॒मयः॑ ।

विप्रंमा॒जा वि॒वस्वंतः ॥८

सम् । ऊ॒ँ इतिं । त्वा॒ । धी॒भिः । अ॒स्व॒र॒न् । हि॒न्व॒तीः ।
स॒प्त । जा॒मयः॑ ।

विप्रंम् । आ॒जा । वि॒वस्वंतः ॥८

सम् । ऊँ इति । त्वा । धीभिः । अस्वरन् । हिन्वतीः ।
सप्त । जामयः ।

विप्रम् । आजा । विवस्वतः ॥८

हे “सोम “हिन्वतीः । लिङ्गव्यत्ययः । हिन्वन्तः स्तुतीः
प्रेरयन्तः “सप्त सप्तसंख्याकाः “जामयः एकस्मिन् यज्ञे
कर्मकरणेन परस्परं बन्धुभूता होतृप्रभृतयः सप्त होत्रकाः

“विवस्वतः देवानां हविष्प्रदानेन परिचरणवतो यजमानस्य “आजा आजौ । अजन्ति गच्छन्ति ऋत्विजोऽत्रेत्याजिर्यज्ञः । तस्मिन् “विप्रं मेधाविनं पवमानं “त्वा त्वामेव “धीभिः धीतिभिः स्तुतिभिः “सम् “अस्वरन् अशब्दयन् अस्तुवन् । यद्वा । हिन्वतीर्गच्छन्त्यः सप्त जामयो गङ्गाद्याः सप्त नद्यो धीभिः । वर्णलोपश्छान्दसः । धीतिभिः अङ्गुलीभिर्विप्रं त्वां समस्वरन् प्रेरयन्ति । वसतीवरीभिरेकधनाभिश्च परिशोधनार्थं प्रेरयन्तीति ।।

मृ॒जंति॑ त्वा॒ सम॒ग्रुवोऽव्ये॑ जी॒रावधि॒ ष्वणि॑ ।

रे॒भो यद॒ज्यसे॒ वने॑ ॥९

मृ॒जन्ति॑ । त्वा॒ । सम् । अ॒ग्रुव॑ः । अव्ये॑ । जी॒रौ । अधि॑ । स्वनि॑ ।

रे॒भः । यत् । अ॒ज्यसें । वनें ॥९

मृजन्ति । त्वा । सम् । अग्रुवः । अव्ये । जीरौ । अधि । स्वनि ।

रेभः । यत् । अज्यसे । वने ॥९

हे सोम “अग्रुवः । अङ्गुलिनामैतत् । अजन्ति प्रक्षिपन्ति हवींष्यग्नाविति । यद्वा अगेर्गत्यर्थस्य । कर्मकरणार्थमितस्ततो गच्छन्तीति । अग्रुवोऽङ्गुलयोऽस्मदीयाः “जीरौ पापानामभिभावुके क्षिप्रं कृते वा “स्वनि “अधि अधिकं शब्दायमाने “अव्ये अविवालेन कृते पवित्रे “त्वा त्वां तदा “सं “मृजन्ति सम्यक् शोधयन्ति । “यत् यदा “रेभः । ‘ रेभृ शब्दे । उदकमध्ये प्रक्षेपेण शब्दायमानस्त्वं “वने वननीये वसतीवर्याख्य उदके “अज्यसे अक्तः सिक्तो भवसि । तदा मृजन्तीत्यन्वयः ॥

पवं॑मानस्य ते कवे॒ वाजि॒न्त्सर्गा॑ असृक्षत ।

अर्वं॑तो॒ न श्र॑व॒स्यवः॑ ॥१०

पवं॑मानस्य । ते॒ । क॒वे॒ । वाजिं॑न् । सर्गाः॑ । अ॒सृ॒क्ष॒त॒ ।

अर्वं॑न्तः । न । श्र॒व॒स्यवः॑ ॥१०

पवमानस्य । ते । कवे । वाजिन् । सर्गाः । असृक्षत ।

अर्वन्तः । न । श्रवस्यवः ॥१०

मार्जनप्रसङ्गमाह । हे “कवे क्रान्तप्रज्ञ हे “वाजिन् अन्नवन् सोम “पवमानस्य दशापवित्रेण पूयमानस्य “ते तव "सर्गाः । सृज्यन्त इति सर्गा धाराः । कीदृशाः । “श्रवस्यवः । छन्दसि परेच्छायां क्यच् । यष्टॄणामन्नं कामयमानास्त्वदीया धाराः “असृक्षत सृजन्ति ।

निर्गच्छन्तीत्यर्थः । तत्र दृष्टान्तः । “अर्वन्तो “न । यथाश्वा मन्दुरातो निर्गच्छन्ति तद्वत् पवित्रान्निःसरन्तीत्यर्थः । प्रयोगापेक्षं चात्र धाराबाहुल्यम् ॥ ॥ ८ ॥

अच्छा॒ कोशं॑ मधु॒श्चुत॒मसृं॑ग्रं॒ वारे॑ अ॒व्यये॑ ।

अवां॑वशंत धी॒तयः॑ ॥११

अच्छं॑ । कोशं॑म् । म॒धु॒ऽश्चुतं॑म् । असृं॑ग्रम् । वारे॑ । अ॒व्यये॑ ।

अवां॑वशन्त । धी॒तयः॑ ॥११

अच्छ । कोशम् । मधुऽश्चुतम् । असृग्रम् । वारे । अव्यये ।

अवावशन्त । धीतयः ॥११

धारानिर्गमनप्रसङ्गादभिधीयते । “मधुश्चुतं मधुररसस्य च्यावयितारं क्षारयितारं “कोशं द्रोणकलशम् "अच्छ अभिलक्ष्य “अव्यये अविमये अविस्वभूते वा “वारे वाले दशापवित्रे “असृग्रं सोमा ऋत्विग्भिः सृज्यन्ते । सृजेः कर्मणि तिङां तिङो भवन्ति' इति झो रमादेशः। किंच “धीतयः । अङ्गुलिनामैतत् । धयन्ति पिबन्त्याभिरिति । अस्मदीया अङ्गुलयः “अवावशन्त तान् सोमान् पुनःपुनर्मार्जनार्थं कामयन्ते ॥

अच्छां समुद्रमिंदवोऽस्तं गावो न धेनवः ।

अग्मंन्नृतस्य योनिमा ॥१२

अच्छं । समुद्रम् । इन्दंवः । अस्तंम् । गावः । न । धेनवः ।

अग्मंन् । ऋतस्यं । योनिंम् । आ ॥१२

अच्छ । समुद्रम् । इन्दवः । अस्तम् । गावः । न । धेनवः ।

अग्मन् । ऋतस्य । योनिम् । आ ॥१२

“इन्दवः क्षरन्तः सोमाः "समुद्रं सोमानामेकत्रैव संगमनस्थानं द्रोणकलशम् "अच्छ अभि गच्छन्ति । तत्र दृष्टान्तः । “धेनवः पयःप्रदानेन जनानां प्रीणयित्र्यो नवप्रसूतिकाः “गावः “अस्तं गृहं यथाभिगच्छन्ति तद्वत् । किंच ते सोमाः “ऋतस्य सत्यभूतस्य यज्ञस्य “योनिं स्थानम् “आ “अग्मन् आभिमुख्येन गच्छन्ति । गमेर्लुङि सिचो लुक्युपधालोपः ।।

प्र णं इंदो म॒हे रण॒ आपों अर्षंति॒ सिंधंवः ।

यद्गोभिंर्वासयि॒ष्यसें ॥१३

प्र । न॒ः । इ॒न्दो॒ इति॑ । म॒हे । रणे॑ । आप॑ः । अ॒र्ष॒न्ति॒ । सिन्ध॑वः ।

यत् । गोभि॑ः । वा॒स॒यि॒ष्यसे॑ ॥१३

प्र । नः । इन्दो इति । महे । रणे । आपः । अर्षन्ति । सिन्धवः ।

यत् । गोभिः । वासयिष्यसे ॥१३

हे "इन्दो क्षरन् सोम “नः अस्माकं स्वभूताय “रणे रणाय । रणन्ति स्तुवन्ति देवानत्रेति रणो यज्ञः । अधिकरणे अप् । ङेर्यः' (पा. सू. ७.१.१३) इति न भवति सर्वविधीनां छन्दसि विकल्पितत्वात् । “महे महते रणाय यज्ञाय तदर्थं “सिन्धवः स्यन्दमानाः “आपः वसतीवर्याख्याः सोमसेकार्थं तदा “अर्षन्ति प्रगच्छन्ति । “यत् यदा त्वं “गोभिः

गव्यैर्दधिक्षीरादिभिः “वासयिष्यसे आच्छाद्यसे मिश्रितो भवसि तदापो गच्छन्तीति ॥

अस्यं ते स॒ख्ये व॒यमियंक्षंत॒स्त्वोतंयः ।

इंदों सखि॒त्वमुंश्मसि ॥१४

अस्यं । त॒े । स॒ख्ये । व॒यम् । इयंक्षन्तः । त्वाऽऊंतयः ।

इन्दो॒ इतिं । स॒खि॒ऽत्वम् । उ॒श्म॒सि॒ ॥१४

अस्य । ते । सख्ये । वयम् । इयक्षन्तः । त्वाऽऊतयः ।

इन्दो इति । सखिऽत्वम् । उश्मसि ॥१४

हे “इन्दो पवमान “इयक्षन्तः यष्टुमिच्छन्तः पूजयितुमिच्छन्तो वा “अस्य प्रसिद्धस्य “ते तव “सख्ये

सखिकर्मणि स्थिताः “वयं “त्वोतयः त्वदायत्तरक्षणाः सन्तः “सखित्वं सखिभावमेव “उश्मसि उश्मः कामयामहे ।।

आ प॑वस्व॒ गवि॑ष्टये म॒हे सो॑म नृ॒चक्ष॑से ।

ए॑द्र॑स्य ज॒ठरे॑ विश ॥१५

आ । प॒व॒स्व॒ । गोऽइ॑ष्टये । म॒हे । सो॒म॒ । नृ॒ऽचक्ष॑से ।

आ । इन्द्र॑स्य । ज॒ठरे॑ । वि॒श॒ ॥१५

आ । पवस्व । गोऽइष्टये । महे । सोम । नृऽचक्षसे ।

आ । इन्द्रस्य । जठरे । विश ॥१५

हे “सोम पवमान “गविष्टये अङ्गिरसां गवामन्वेष्ट्रे “महे महते "नृचक्षसे नृणां मनुष्याणां द्रष्ट्रेमा कर्मनेतृणां फलं पश्यते वा इन्द्राय “आ “पवस्व पात्रेषु दशापवित्रेण पूतो भव । ततः “इन्द्रस्य “जठरे उदर उदरभूते द्रोणकलशे वा “आ “विश प्रविश ॥ ॥ ९ ॥

म॒हाँ अ॑सि सोम॒ ज्येष्ठ॑ उ॒ग्राणा॑मिंद॒ ओजि॑ष्ठः ।

युध्वा॒ संछश्व॑ज्जिगेथ ॥१६

म॒हान् । अ॒सि॒ । सो॒म॒ । ज्येष्ठः॑ । उ॒ग्राणा॑म् । इ॒न्दो॒ इति॑ । ओजि॑ष्ठः ।

युध्वा॑ । सन् । शश्व॑त् । जि॒गे॒थ॒ ॥१६

महान् । असि । सोम । ज्येष्ठः । उग्राणाम् । इन्दो इति । ओजिष्ठः ।

युध्वा । सन् । शश्वत् । जिगेथ ॥१६

हे “सोम त्वं “महान् “असि यतस्त्वं देवानां प्रीणयितासि खलु। त्वं “ज्येष्ठः प्रशस्यतमो भवसि । किंच हे “इन्दो पवमान त्वम् “उग्राणाम् उद्गूर्णबलानामपि “ओजिष्ठः ओजस्वितमो भवसि । त्वं “युध्वा “सन् शत्रुभिः सह युद्धं कुर्वन्नेव “शश्वत् सर्वदा “जिगेथ तांस्तेषां धनानि च जितवानसि ।' जि जये'। थलि ‘ सन्लिटोर्जेः' इत्यभ्यासादुत्तरस्य कवर्गादेशः ॥

य उ॒ग्रेभ्यं॑श्चि॒दोजी॑यां॒छूरें॑भ्यश्चि॒च्छूरं॑तरः ।

भू॒रि॒दाभ्यं॑श्चि॒न्मंही॑यान् ॥१७

यः । उ॒ग्रेभ्यः॑ । चि॒त् । ओजी॑यान् । शूरे॑भ्यः । चि॒त् । शूरं॑ऽतरः ।

भू॒रि॒ऽदाभ्यः॑ । चि॒त् । मंही॑यान् ॥१७

यः । उग्रेभ्यः । चित् । ओजीयान् । शूरेभ्यः । चित् । शूरऽतरः ।

भूरिऽदाभ्यः । चित् । मंहीयान् ॥१७

“यः सोमः “उग्रेभ्यश्चित् उद्गूर्णेभ्यो बलवद्भ्योऽपि “ओजीयान् ओजस्वितमः । किंच यः “शूरेभ्यश्चित् वीरेभ्योऽपि “शूरतरः अत्यन्तसमर्थो भवति । तथा यः सोमः “भूरिदाभ्यः। ‘डुदाञ् दाने' ।' आतो मनिन्” इति विच् । बहुधनानां दातृभ्योऽपि “मंहीयान् दातृतमो भवति । तं त्वां वृणीमह इत्युत्तरेण संबन्धः ॥

त्वं सो॑म॒ सूर॒ एषं॑स्तो॒कस्यं सा॒ता त॒नूनां॑ ।

वृ॒णी॒महें॑ स॒ख्याय॑ं वृणी॒मह॒े युज्यां॑य ॥१८

त्वम् । सो॒म॒ । सूरः॑ । आ । इषः॑ । तो॒कस्य॑ । सा॒ता । त॒नूना॑म् ।

वृ॒णी॒महे॑ । स॒ख्याय॑ । वृ॒णी॒महे॑ । युज्या॑य ॥१८

त्वम् । सोम । सूरः । आ । इषः । तोकस्य । साता । तनूनाम् ।

वृणीमहे । सख्याय । वृणीमहे । युज्याय ॥१८

हे “सोम “सूरः सुवीर्यः । यद्वा । सर्वस्य यागादिकर्मणि प्रेरकः “त्वम् “इषः अन्नानि अस्माकम् “आ धेहि। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। किंच त्वं “तोकस्य पुत्रस्य “तनूनाम् । ‘ तन्वन्ति विस्तारयन्ति कुलमिति तन्वः पौत्राः। तेषां च "साता दाता भव। ‘षणु दाने'। जनसन' इति विट्। 'जनसन °' इत्यात्वम् । वयं तं त्वां “सख्याय सखिभावाय कर्मणे वा “वृणीमहे संभजामहे । तथा

“युज्याय । युज् सहायः । तस्य भावे कर्मणि वा ष्यञ् । संज्ञापूर्वकस्य विधेत्यरनित्वादवृद्धिः । शत्रुवधादिलक्षणसाहाय्याय च वयं “वृणीमहे ।।

अग्निहोत्रे पूर्वस्यामाहुतौ हुतायामुपस्थितेन यजमानेन प्रतिदिवसं प्रतिसंवत्सरं वानेन तृचेनाग्निरुपस्थेयः । सूत्रितं च--- आग्नेयीभिश्वाग्न आयूंषि पवस इति तिसृभिः संवत्सरे संवत्सरे (आश्व. श्रौ. २.३-४) इति । चौलादिकर्मसु चतस्र आज्याहुतयो होतव्यास्तत्रैव तिस्रः । सूत्रितं च -- तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयादग्न आयूंषि पवस इति तिसृभिः' (आश्व. गृ. १.४.३-४) इति । आधाने पवमानेष्टावग्नेः पवमानस्य ' अग्न आयूंषि' इत्येषानुवाक्या। ‘अग्ने पवस्व' इत्येषा याज्या । सूत्रितं च----’ प्रथमायामग्निरग्निः पवमानोऽग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः' (आश्व. श्रौ. २.१) इति । पुनराधेये

द्वितीयाज्यभागस्य ‘अग्न आयूंषि' इत्येषा वैकल्पिकानुवाक्या। सूत्रितं च’ नित्यं पूर्वमनुब्राह्मणिनोऽग्न आयूंषि पवस इत्युत्तरम्' (आश्व. श्रौ. २.८) इति ॥

अग्न॒ आयूं॑षि पवस॒ आ सु॒वोर्ज॒मिषं॑ च नः ।

आ॒रे बां॑धस्व दु॒च्छुनां॑ ॥१९

अग्ने॑ । आयूं॑षि । प॒व॒से॒ । आ । सु॒व॒ । ऊर्जं॑म् । इषं॑म् । च॒ । न॒ः ।

आ॒रे । बा॒ध॒स्व॒ । दु॒च्छुनां॑म् ॥१९

अग्ने । आयूंषि । पवसे । आ । सुव । ऊर्जम् । इषम् । च । नः ।

आरे । बाधस्व । दुच्छुनाम् ॥१९

हे “अग्ने पवमानरूप त्वमस्माकम् “आयूंषि जीवनानि “पवसे रक्षसि । “नः अस्माकम् 'ऊर्जम् अन्नरसम् “इषम् अन्नं च “आ “सुव आभिमुख्येन प्रेरय । किंच “दुच्छुनाम् । रक्षोनामैतत् । रक्षांसि “आरे अस्मत्तो दूर एव “बाधस्व संपीडय ॥

अ॒ग्निर्ऋषि॑ः पव॑मान॒ः पांच॑जन्यः पु॒रोहि॑तः ।

तमी॑महे महाग॒यं ॥२०

अ॒ग्निः । ऋषि॑ः । पव॑मानः । पाञ्च॑ऽजन्यः । पु॒रःऽहि॑तः ।

तम् । ई॒म॒हे॒ । म॒हा॒ऽग॒यम् ॥२०

अग्निः । ऋषिः । पवमानः । पाञ्चऽजन्यः । पुरःऽहितः ।

तम् । ईमहे । महाऽगयम् ॥२०

“पाञ्चजन्यः । निषादपञ्चमाश्चत्वारो वर्णाः पञ्चजनाः। यद्वा । गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येते पञ्चजनाः । अथवा देवमनुष्या गन्धर्वाप्सरसः सर्पाः पितर इति ब्राह्मणेऽभिहिताः पञ्चजनाः। ‘ गम्भीराञ्यः् ' इत्यत्र ‘ बहिर्देवपञ्चजनेभ्य इति वक्तव्यम्' (का. ४. ३. ५८. १) इति वचनात् भवार्थे ञ्यप्रत्ययः । तेषां तत्तदभीष्टप्रदानेन स्वभूतः “ऋषिः सर्वस्य द्रष्टा “पवमानः तद्रूपोऽग्निः “पुरोहितः कर्मार्थमृत्विग्भिः पुरो निहितः । “तं पूर्वोक्तलक्षणं "महागयं महद्भिर्देवादिभिरपि गीर्भिः गातव्यम् । महान्ति प्रभूतानि यज्ञगृहाणि वा यस्य स तथोक्तः । तं पवमानगुणविशिष्टमग्निम् “ईमहे धनादीनि याचामहे ॥ ॥ १० ॥

अग्ने॒ पवं॑स्व॒ स्वपां॑ अ॒स्मे वर्चः॑ सु॒वीर्यं॑ ।

दधं॑द्र॒यिं मयि॒ पोषं॑ ॥२१

अग्ने॑ । पव॑स्व । सु॒ऽअपाः॑ । अ॒स्मे इति॑ । वर्चः॑ । सु॒ऽवीर्य॑म् ।

दधं॑त् । र॒यिम् । मयि॑ । पोषं॑म् ॥२१

अग्ने । पवस्व । सुऽअपाः । अस्मे इति । वर्चः । सुऽवीर्यम् ।

दधत् । रयिम् । मयि । पोषम् ॥२१

हे "अग्ने "स्वपाः । 'सोर्मनसी' इत्युत्तरपदाद्युदात्तत्वम्। शोभनकर्मा त्वम् "अस्मे अस्मासु "सुवीर्यं शोभनवीर्योपेतं "वर्चः। ' वर्च दीप्तौ । तेजः "पवस्व आगमय । तथा भवान् "रयिं धनं पुत्रं वा "पोषम् । भावे कर्मणि वा घञ् । गवां पुष्टिं यद्वा गवादिकं मयि भवान् "दधत् दधातु ।

करोत्वित्यर्थः । दधातेर्लेट्यडागमः। ‘घोर्लोपो लेटि वा' (पा. सू. ७. ३. ७०) इत्याकारलोपः ॥

पव॑मानो॒ अति॒ स्रिधो॒ऽभ्य॑र्षति सुष्टु॒तिं ।

सूरो॒ न वि॒श्वद॑र्शतः ॥२२

पव॑मानः । अति॑ । स्रिधः॑ । अ॒भि । अ॒र्ष॒ति॒ । सु॒ऽस्तु॒तिम् ।

सूरः॑ । न । वि॒श्वऽद॑र्शतः ॥२२

पवमानः । अति । स्रिधः । अभि । अर्षति । सुऽस्तुतिम् ।

सूरः । न । विश्वऽदर्शतः ॥२२

“पवमानः सोमः “अस्रिधः हिंसकान् शत्रूनतिक्रम्य गच्छति । तथा “सुष्टुतिं स्तोतृणां शोभनां स्तुतिम्

“अभ्यर्षति आभिमुख्येन गच्छति । ‘ऋषी गतौ'। तौदादिकः । ‘बहुलं छन्दसि' इति शप् । गुणः । किंच “सूरो “न सूर्य इव “विश्वदर्शतः सर्वस्य द्रष्टा सर्वैर्वा दर्शनीयो भवति ॥

स मंर्मृजा॒न आ॒युभि॒: प्रयं॑स्वा॒न्प्रयं॑से हि॒तः ।

इंदु॒रत्यो॑ विचक्ष॒णः ॥२३

सः । म॒र्मृ॒जा॒नः । आ॒यु॒ऽभिः॑ । प्रयं॑स्वान् । प्रयं॑से । हि॒तः ।

इन्दुः॑ । अत्यः॑ । वि॒ऽच॒क्ष॒णः ॥२३

सः । मर्मृजानः । आयुऽभिः । प्रयस्वान् । प्रयसे । हितः ।

इन्दुः । अत्यः । विऽचक्षणः ॥२३

“आयुभिः कर्मनेतृभिर्मनुष्यैः “मर्मृजानः पुनःपुनर्मृज्यमानः शोध्यमानः “सः “इन्दुः स सोमः “अत्यः देवान् संततं गन्ता भवति । कीदृशः । “प्रयस्वान् प्रीणनशीलान्नवान् । यद्वा । स्तोतृभ्यो देयत्वेनान्नयुक्तः । अत एव “प्रयसे हवीरूपायान्नाय “हितः “विचक्षणः सर्वस्य प्रदर्शनकारी सर्वस्य विद्रष्टा वा सोमो देवानभिगन्ता भवति । ‘चक्षिङ् व्यक्तायां वाचि'। ' अनुदात्तेतश्च हलादेः' इति युच् ॥

पवंमान ऋ॒तं बृ॒हच्छु॒क्रं ज्योतिंरजीजनत् ।

कृ॒ष्णा तमांसि॒ जंघंनत् ॥२४

पवंमानः । ऋ॒तम् । बृ॒हत् । शु॒क्रम् । ज्योतिः॑ । अ॒जी॒ज॒न॒त् ।

कृ॒ष्णा । तमांसि । जङ्घंनत् ॥२४

पवमानः । ऋतम् । बृहत् । शुक्रम् । ज्योतिः । अजीजनत्
।

कृष्णा । तमांसि । जङ्घनत् ॥२४

“पवमानः “ऋतं सत्यं यथार्थभूतं "बृहत् प्रभूतं सर्वदेशेषु व्यापकं “शुक्रं दीप्यमानं श्वेतवर्णं “ज्योतिः तेजः "अजीजनत् द्युलोक उदपादयत् । किं कुर्वन् । “कृष्णा कृष्णवर्णानि “तमांसि “जङ्घनत् भृशं विनाशयन् । हन्तेर्यङ्लुकि शतरि रूपम् । ‘अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥

पवमानस्य जङ्घ्नतो हरेश्चन्द्रा असृक्षत ।

जीरा अजिरशोचिषः ॥२५

पवमानस्य । जङ्घ्नतः । हरेः । चन्द्राः । असृक्षत ।

जी॒राः । अ॒जि॒रऽशोंचिषः ॥२५

पवमानस्य । जङ्घ्नतः । हरेः । चन्द्राः । असृक्षत ।

जीराः । अजिरऽशोचिषः ॥२५

“जङ्घ्नतः पुनःपुनस्तमांसि विनाशयतः “हरेः
हरितवर्णस्य “अजिरशोचिषः सर्वत्र गमनशीलतेजसः
“पवमानस्य सोमस्य “चन्द्राः । ‘चदि आह्लादने ।
देवानामाह्लादयित्र्यः “जीराः क्षिप्रंक्षरणशीला धाराः
"असृक्षत सृजन्ति । पवित्रान्निर्गच्छन्तीत्यर्थः ॥ ॥ ११ ॥

पवंमानो र॒थीतंमः शु॒भ्रेभिः शु॒भ्रशंस्तमः ।

हरिंश्चन्द्रो म॒रुद्गंणः ॥२६

पवंमानः । र॒थिऽतंमः । शु॒भ्रेभिः । शु॒भ्रशःऽतमः ।

हरिंऽचन्द्रः । म॒रुत्ऽगंणः ॥२६

पवमानः । रथिऽतमः । शुभ्रेभिः । शुभ्रशःऽतमः ।

हरिऽचन्द्रः । मरुत्ऽगणः ॥२६

“पवमानः देवः “रथीतमः अतिशयेन रथवान्। 'ईद्रथिनः' (पा. सू. ८. २. १७, १) इति ईकारः । तथा “शुभ्रेभिः शोभायुक्तेभ्यस्तेजोभ्योऽपि “शुभ्रशस्तमः अत्यन्तदीप्यमानश्च । यद्वा । निर्मलेभ्योऽपि निर्मलतमयशोयुक्तः "हरिश्चन्द्रः । ‘ह्रस्वाच्चन्द्रोत्तरपदे ' इति सांहितिकः सुट् । हरितवर्णदीप्तिर्हरितधारावान् वा “मरुद्गणः । मरुतो यस्य गणः सहायभूताः स तथोक्तः । तादृशः सर्वांल्लोकान्' स्वरश्मिभिः स्वदीप्तिभिः व्यश्नवत् व्याप्नोत्वित्युत्तरेणान्वयः ॥

पव॑मानो॒ व्यं॑श्नवद्र॒श्मिभि॑र्वाज॒सात॑मः ।

दध॑त्स्तो॒त्रे सु॒वीर्य॑म् ॥२७

पव॑मानः । वि । अ॒श्न॒व॒त् । र॒श्मिऽभिः॑ । वा॒ज॒ऽसात॑मः ।

दध॑त् । स्तो॒त्रे । सु॒ऽवीर्य॑म् ॥२७

पवमानः । वि । अश्नवत् । रश्मिऽभिः । वाजऽसातमः ।

दधत् । स्तोत्रे । सुऽवीर्यम् ॥२७

“पवमानः सोमः “रश्मिभिः स्वदीप्तिभिः “व्यश्नवत् सर्वं जगद्व्याप्नोतु । कीदृशः । “वाजसातमः अतिशयेनान्नस्य दाता बलस्य संभक्ता वा । तथा “स्तोत्रे पवमानस्तोत्रं कुर्वते मनवे “सुवीर्यं सुवीर्योपेतं पुत्रं धनं वा “दधत् विदधत् प्रयच्छन् व्याप्नोतु । अश्नोतेर्लेट्यडागमः ॥

प्र सु॑वा॒न इन्दु॑रक्षाः प॒वित्र॒मत्य॒व्यय॑म् ।

पु॒ना॒न इन्दु॒रिन्द्र॒मा ॥२८

प्र । सु॒वा॒नः । इन्दुः᳚ । अ॒क्षा॒रिति॑ । प॒वित्र॑म् । अति॑ ।
अ॒व्यय॑म् ।

पु॒ना॒नः । इन्दुः᳚ । इन्द्र॑म् । आ ॥२८

प्र । सुवानः । इन्दुः । अक्षारिति । पवित्रम् । अति ।
अव्ययम् ।

पुनानः । इन्दुः । इन्द्रम् । आ ॥२८

“सुवानः अभिषूयमाणः “इन्दुः सोमः “अव्ययम् अविमयमूर्णास्तुकेन निर्मितं दशापवित्रमतीत्य “प्र “अक्षाः कलशं प्रति प्रकर्षेण क्षरति । क्षरतेर्लुङि तिपि सिचि

छान्दस इडागमाभावः । ‘ अतो र्लान्तस्य' (पा. सू. ७. २. २) इति वृद्धिः। रात्सस्य' इति सिचो लोपः। रेफान्तं स्पष्टयितुमितिकारः । ‘ बहुलं छन्दसि' (पा. सू. ७.३.९७) इति ईडभावः । हल्ङ्यादिना तिलोपः । ततः “पुनानः पवित्रेण शुद्धः “इन्दुः सोमः “इन्द्रमा विशति । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

ए॒ष सोमो॒ अधिं त्व॒चि गवां क्रीळ॒त्यद्रिंभिः ।

इन्द्र॒ं मदांय॒ जोहुंवत् ॥२९

ए॒षः । सोमः॑ । अधिं । त्व॒चि । गवांम् । क्री॒ळ॒ति॒ । अद्रिंऽभिः ।

इन्द्रंम् । मदांय । जोहुंवत् ॥२९

एषः । सोमः । अधि । त्वचि । गवाम् । क्रीळति । अद्रिऽभिः ।

इन्द्रम् । मदाय । जोहुवत् ॥२९

“एषः अंशुरूपः “सोमः “गवां “त्वचि आनडुहचर्मणि । अधिशब्द उपर्यर्थद्योतकः । चर्मण्युपरि “अद्रिभिः ग्रावभिः सह “क्रीडति अभिषवाय संक्रीडते । किं कुर्वन् । “मदाय सोमपानेन मादयितुम् “इन्द्रं "जोहुवत् भृशमाह्वयन् । एतेन तत्काल इन्द्रविषयां स्तुतिं कुर्वन्तीत्यवगम्यते ॥

यस्यं ते द्युम्नवत्पयः पवंमानाभृंतं दिवः ।

तेनं नो मृळ जीवसें ॥३०

यस्यं । ते । द्युम्नऽवंत् । पयः । पवंमान । आऽभृंतम् । दिवः ।

तेन॑ । नः॒ । मृ॒ळ॒ । जी॒वसे॑ ॥३०

यस्य । ते । द्युम्नऽवत् । पयः । पवमान । आऽभृतम् । दिवः ।

तेन । नः । मृळ । जीवसे ॥३०


हे “पवमान पूयमान हे सोम “दिवः द्युलोकात् “आभृतं श्येनरूपया गायत्र्याहृतं “द्युम्नवत् अन्नवत् यशोयुक्तं वा “पयः सोमलक्षणमन्नं “यस्य “ते तव स्वभूतं विद्यते तस्मात्त्वं “तेन अन्नेन “नः अस्मान् “जीवसे चिरजीवनाय "मृळ मृळय सुखय ॥ ॥ १२ ॥

टिप्पणी

[विखनन उपरि संदर्भाः (http://puranastudy.byethost14.com/pur_index27/vaikhanasa.htm)](http://puranastudy.byethost14.com/pur_index27/vaikhanasa.htm)

[मणिखननस्य संदर्भः (https://sa.wikisource.org/s/10mt)](https://sa.wikisource.org/s/10mt)

९.६६.६ तवेमे सप्त सिन्धवः इति



सप्तसिन्धवः Saptasindhu

९.६६.१० पवमानस्य ते कवे इति

साम ६५७ (https://sa.wikisource.org/s/3f1)

९.६६.१९ अग्न आयूंषि पवस इति

भ्राजाभ्राजे (https://sa.wikisource.org/s/2ibw)

अग्न आयूंषि पवस इति प्रतिपदं कुर्याद्येषां दीक्षितानां प्रमीयते। अपूता इव वा एते येषां दीक्षितानां प्रमीयते यद्येषाग्निपावमानी प्रतिपद्भवत्यग्निरेवैनान्निष्टपति पवमानः पुनाति। यदायूंषीत्याह य एव जीवन्ति तेष्वायुर्दधाति -

पञ्च.ब्रा ६.१०.१ (https://sa.wikisource.org/s/tvn)

यन्ति वा एते पथ इत्याहुर्ये मृताय कुर्वन्तीत्यैन्द्रवायवाग्रान् ग्रहान् गृह्णते पुनः पन्थानमपियन्ति। अग्न आयूंषि पवस इति प्रतिपत्कार्या य एव जीवन्ति तेष्वायुर्दधाति - पञ्च.ब्रा. ९.८.१२ (https://sa.wikisource.org/s/tvo)

आहवनीयोपस्थानम् - अग्न आयूंषि पवस इति षड्भिः संवत्सरेसंवत्सरे सदा वा आप.श्रौ.सू. ६.१६.८ (https://sa.wikisource.org/s/24qv)

त्रीनग्निष्टोमेऽतिग्राह्यान्गृह्णाति । आग्नेयमैन्द्रं सौर्यमिति । अग्न आयूंष्युत्तिष्ठंस्तरणिरिति

ग्रहणसादनाः आप.श्रौ.सू. १२.१५.१० (https://sa.wikisource.org/s/24r1)

अथाग्निपावमानीभ्यां गार्हपत्यमुपतिष्ठतेऽग्न आयूँषि पवसेऽग्ने पवस्वेति - बौ.श्रौ.सू. ३.२१ (https://sa.wikisource.org/s/14ad) , आप.श्रौ.सू. ४.१६.२ (https://sa.wikisource.org/s/24qt) . ६.१९.१ (https://sa.wikisource.org/s/24qv)

अग्न्याधेयम् - ततः सभ्यावसथ्यावादधाति लौकिकमग्निमाहृत्य मथित्वाहवनीयाद्वा यथर्ष्याधानेन । अग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः । अग्निरृषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयमिति तिस्र आश्वत्थ्यः समिध एकैकस्मिन्नादधाति । आहवनीये वा तिस्रः

आप.श्रौ.सू. ५.१७.३ (https://sa.wikisource.org/s/24qu)

महारात्रे बुद्ध्वाग्ने नयेत्याग्नीध्रमभिमृशति । इदं विष्णुर्विचक्रम इति हविर्धानम् । अग्न आयूंषि पवस इति स्रुचः ।...आप.श्रौ.सू. १२.१.२ (https://sa.wikisource.org/s/24r1)

स्तोत्रेस्तोत्रे ऽस्थिकुम्भमुपनिदधाति । मार्जालीये भक्षान्निनयन्ते । अग्न आयूंषि पवस इति प्रतिपदं कुर्वीरन् । रथंतरसामैषां सोमः स्यात् । आयुरेवात्मन्दधतेऽथो पाप्मानमेव विजहतो यन्तीति विज्ञायते आप.श्रौ.सू. १४.२२.१० (https://sa.wikisource.org/s/24r3)

ओदनसवः -- तस्य पुरोरुचः । अस्याजरासोऽग्न आयूंषि पवस इत्यैन्द्रवायवस्य । - आप.श्रौ.सू.

२२.२७.५ (https://sa.wikisource.org/s/24rb)

पुनराधानम् -

प्रेतकर्म - अथ गृहेष्वग्निं समाधाय वारणान्परिधीन्परिधाय वारणेन स्रुवेणाग्नय आयुष्मत आहुतिं जुहोत्यग्निर्वा आयुष्मानायुष ईष्टे तमेवैभ्य आयुर्याचत्यग्न आयूंषि पवस इति पुरोऽनुवाक्याभाजनम् - माश १३.८.४.८ (https://sa.wikisource.org/s/ep6)]

उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः । सार्वकालमेके विवाहम् । तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात् । अग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च व्याहृतिभिर्वा । समुच्चयमेके ।

नैके काञ्चन । त्वमर्यमा भवसि यत्कनीनामिति विवाहे चतुर्थीम् अश्व.गृ.सू. १.४.७ (https://sa.wikisource.org/s/2gtq)

९.६६.२० अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः। तमीमहे महागयम् इति

ततः सभ्यावसथ्यावादधाति लौकिकमग्निमाहृत्य मथित्वाहवनीयाद्वा यथर्ष्याधानेन । अग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः । अग्निरृषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयमिति तिस्र आश्वत्थ्यः समिध एकैकस्मिन्नादधाति । आहवनीये वा तिस्रः आप.श्रौ.सू. ५.१७.३ (https://sa.wikisource.org/s/24qu)

तदाहुर्यथा वाव स्तोत्रमेवं शस्त्रम्पावमानीषु सामगाः स्तुवत आग्नेयं होताज्यं शंसति कथमस्य पावमान्योऽनुशस्ता भवन्तीति यो वा अग्निः स पवमानस्तदप्येतदृषिणोक्तम् अग्निर्ऋषिः पवमान इत्येवमु हास्याग्नेयीभिरेव प्रतिपद्यमानस्य पावमान्योऽनुशस्ता भवन्ति - ऐ.ब्रा. २.३७ (https://sa.wikisource.org/s/vym)

ये अग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि तेषामसि त्वमुत्तमः प्र नो जीवातवे सुवेति ये केचाग्नयः पञ्चचितिका अस्यां पृथिव्यामधि तेषामसि त्वं सत्तमः प्रोअस्माञ्जीवनाय सुवेति - श.ब्रा. ९.५.१.५३ (https://sa.wikisource.org/s/ecy)

पाञ्चजन्य/पञ्चजनोपरि टिप्पणी (https://sa.wikisource.org/s/13mj)

९.६६.२५ पवमानस्य जङ्घ्नतो इति

अदारसृक् (https://sa.wikisource.org/s/2gne) १.९.१४

सुरूपोत्तरम् (https://sa.wikisource.org/s/2gnf) १.९.१५

हरिश्रीनिधनम् (https://sa.wikisource.org/s/2gnd) १.९.१६

सैन्धुक्षितम् (https://sa.wikisource.org/s/2gng) १.९.१७

गतनिधनबाभ्रवम् (https://sa.wikisource.org/s/2gnh) १.९.१८

इडानां संक्षार (https://sa.wikisource.org/s/218q) ः १.९.१९

ऋषभः पवमानः (https://sa.wikisource.org/s/1zel)

मण्डल ९

सूक्तं ९.१	सूक्तं ९.३१	सूक्तं ९.६१	सूक्तं ९.९१
सूक्तं ९.२	सूक्तं ९.३२	सूक्तं ९.६२	सूक्तं ९.९२
सूक्तं ९.३	सूक्तं ९.३३	सूक्तं ९.६३	सूक्तं ९.९३
सूक्तं ९.४	सूक्तं ९.३४	सूक्तं ९.६४	सूक्तं ९.९४
सूक्तं ९.५	सूक्तं ९.३५	सूक्तं ९.६५	सूक्तं ९.९५
सूक्तं ९.६	सूक्तं ९.३६	सूक्तं ९.६६	सूक्तं ९.९६
सूक्तं ९.७	सूक्तं ९.३७	सूक्तं ९.६७	सूक्तं ९.९७
सूक्तं ९.८	सूक्तं ९.३८	सूक्तं ९.६८	सूक्तं ९.९८
सूक्तं ९.९	सूक्तं ९.३९	सूक्तं ९.६९	सूक्तं ९.९९
सूक्तं ९.१०	सूक्तं ९.४०	सूक्तं ९.७०	सूक्तं ९.१००

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.६७

ऋषयः - सप्तर्षयः(१-३ भरद्वाजो बार्हस्पत्यः, ४-६ कश्यपो मारीचः, ७-९ गोतमो राहूगणः, १०-१२ अत्रिःभौमः, १३-१५ विश्वामित्रो गाथिनः, १६-१८ जमदग्निर्भार्गवः, १९-२१ मैत्रावरुणिर्वासिष्ठः, २२-३२ पवित्र आङ्गिरसो वा वसिष्ठो वा उभौ वा)।

दे. पवमानः सोमः, १०-१२ पवमानः पूषा वा, २३-२७ पवमानोऽग्निः, २५ पवमानः सविता वा, २६ पवमानाग्निसवितारः, २७ विश्वे देवा वा, ३१-३२ पावमान्यध्येता। गायत्री, १६-१८ नित्यद्विपदा गायत्री, ३० पुरउष्णिक्, २७, ३१, ३२ अनुष्टुप्।



सप्तर्षि saptarshi

त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे ।

पवस्व मंहयद्रयिः ॥१॥

त्वं सुतो नृमादनो दधन्वान्मत्सरिन्तमः ।

इन्द्राय सूरिरन्धसा ॥२॥

त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत् ।

द्युमन्तं शुष्ममुत्तमम् ॥३॥

इन्दुर्हिन्वानो अर्षति तिरो वाराण्यव्यया ।

हरिर्वाजमचिक्रदत् ॥४॥

इन्दो व्यव्यमर्षसि वि श्रवांसि वि सौभगा ।

वि वाजान्सोम गोमतः ॥५॥

आ न इन्दो शतग्विनं रयिं गोमन्तमश्विनम् ।

भरा सोम सहस्रिणम् ॥६॥

पवमानास इन्दवस्तिरः पवित्रमाशवः ।

इन्द्रं यामेभिराशत ॥७॥

ककुहः सोम्यो रस इन्दुरिन्द्राय पूर्व्यः ।

आयुः पवत आयवे ॥८॥

हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम् ।

अभि गिरा समस्वरन् ॥९॥

अविता नो अजाश्वः पूषा यामनियामनि ।

आ भक्षत्कन्यासु नः ॥१०॥

अयं सोमः कपर्दिने घृतं न पवते मधु ।

आ भक्षत्कन्यासु नः ॥११॥

अयं त आघृणे सुतो घृतं न पवते शुचि ।

आ भक्षत्कन्यासु नः ॥१२॥

वाचो जन्तुः कवीनां पवस्व सोम धारया ।

देवेषु रत्नधा असि ॥१३॥

आ कलशेषु धावति श्येनो वर्म वि गाहते ।

अभि द्रोणा कनिक्रदत् ॥१४॥

परि प्र सोम ते रसोऽसर्जि कलशे सुतः ।

श्येनो न तक्तो अर्षति ॥१५॥

पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ॥१६॥

असृग्रन्देववीतये वाजयन्तो रथा इव ॥१७॥

ते सुतासो मदिन्तमाः शुक्रा वायुमसृक्षत ॥१८॥

ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि ।

दधत्स्तोत्रे सुवीर्यम् ॥१९॥

एष तुन्नो अभिष्टुतः पवित्रमति गाहते ।

रक्षोहा वारमव्ययम् ॥२०॥

यदन्ति यच्च दूरके भयं विन्दति मामिह ।

पवमान वि तज्जहि ॥२१॥

पवमानः सो अद्य नः पवित्रेण विचर्षणिः ।

यः पोता स पुनातु नः ॥२२॥

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।

ब्रह्म तेन पुनीहि नः ॥२३॥

यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि नः ।

ब्रह्मसवैः पुनीहि नः ॥२४॥

उभाभ्यां देव सवितः पवित्रेण सवेन च ।

मां पुनीहि विश्वतः ॥२५॥

त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोम धामभिः ।

अग्ने दक्षैः पुनीहि नः ॥२६॥

पुनन्तु मां देवजनाः पुनन्तु वसवो धिया ।

विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ॥२७॥

प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः ।

देवेभ्य उत्तमं हविः ॥२८॥

उप प्रियं पनिप्नतं युवानमाहुतीवृधम् ।

अगन्म बिभ्रतो नमः ॥२९॥

अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम ।

आखुं चिदेव देव सोम ॥३०॥

यः पावमानीरध्येत्यृषिभिः सम्भृतं रसम् ।

सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥३१॥

पावमानीर्यो अध्येत्यृषिभिः सम्भृतं रसम् ।

तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥३२॥

सायणभाष्यम्

त्वं सोमासि' इति द्वात्रिंशदृचं सप्तमं सूक्तम् । आद्यतृचस्य बार्हस्पत्यो भरद्वाज ऋषिः । द्वितीयस्य मारीचः कश्यपः । तृतीयस्य राहूगणो गोतमः । चतुर्थस्य भौमोऽत्रिः । पञ्चमस्य गाथिनो विश्वामित्रः । षष्ठस्य भार्गवो जमदग्निः । सप्तमस्य मैत्रावरुणिर्वसिष्ठः । सूक्तशेषस्याङ्गिरसः पवित्रो वसिष्ठो वोभौ वा समुदितावृषी । ' पवस्व सोम मन्दयन् ' इत्याद्यास्तिस्रो द्विपदा गायत्र्यः । अलाय्यस्य' इत्येषा त्रिंशी पुरउष्णिक् आद्यद्वादशकद्व्यष्टकवती सप्तविंश्येकत्रिंशीद्वात्रिंश्यस्तिस्रोऽनुष्टुभः । शिष्टा गायत्र्यः । ' अविता नो अजाश्वः' इत्याद्यास्तिस्रः पवमानपूषदेवत्याः पवमानसोमदेवताका वा । ' यत्ते पवित्रमर्चिषि' इत्याद्याः पञ्चर्चः पवमानाग्निदेवत्याः । आसां पञ्चानां मध्ये उभाभ्यां देव सवितः' इति तृतीया पवमानसवितृदेवताका वा । चतुर्थी त्रिभिष्ट्वं देव सवितः इत्येषा विकल्पेन पवमानाग्निसवितृदेवताका । 'पुनन्तु माम्' इत्येषा विकल्पेन वैश्वदेवी । ' यः पवमानीरध्येति'

इत्यादिके द्वे पवमानमण्डलाध्येतृस्तुतिप्रतिपादिके। अतः सैव देवता । शिष्टाः सर्वाः पवमानसोमदेवताकाः । तथा चानुक्रम्यते-' त्वं सोमासि द्वात्रिंशद्भरद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इति ह तृचाः सप्त ऋषयः शेषे पवित्रो वसिष्ठो वोभौ वा पवस्व सोम तिस्रो नित्यद्विपदा गायत्र्योऽविता नस्तिस्रः पौष्ण्यो वा यत्ते पवित्रं पञ्चाग्नेय्यः सावित्र्यग्निसावित्री वैश्वदेवी वासामन्त्यास्त्रिंशी पुरउष्णिक् सप्तविंश्यनुष्टुबन्त्ये च ते पावमान्यध्येतृस्तुती' इति । गतः सूक्तविनियोगः ॥

त्वं सोमासि धार॒युर्म॒न्द्र ओजिंष्ठो अध्व॒रे ।

पवंस्व मंह॒यद्रंयिः ॥१

त्वम् । सो॒म॒ । अ॒सि॒ । धा॒र॒युः । म॒न्द्रः । ओजिंष्ठः । अ॒ध्व॒रे ।

प॒वंस्व । मं॒ह॒यत्ऽरंयिः ॥१

त्वम् । सोम । असि । धारयुः । मन्द्रः । ओजिष्ठः । अध्वरे ।

पवस्व । मंहयत्ऽरयिः ॥१

हे “सोम अभिषूयमाण पवमान “मन्द्रः मादयितृतमः “ओजिष्ठः ओजस्वितमः “त्वम् “अध्वरे हिंसारहितेऽस्मदीये यज्ञे “धारयुः अभिषवणधाराकामः “असि भवसि । ततस्त्वं “मंहयद्रयिः स्तोतृभ्यः प्रदीयमानधनः सन् "पवस्व द्रोणकलशे ग्रहादिषु दशापवित्रेण पूतो भव । यद्वा । धारयुः । ‘ तद्वदर्थे भाष्यते' इति मत्वर्थीयो युः । स हे सोम त्वं धारावानिव ततः पवस्वेति संबन्धः ॥

त्वं सु॒तो नृ॒माद॑नो दध॒न्वान्म॑त्स॒रिन्त॑मः ।

इन्द्रा॑य सू॒रिरन्ध॑सा ॥२

त्वम् । सु॒तः । नृ॒ऽमाद॑नः । द॒ध॒न्वान् । म॒त्स॒रिन्ऽत॑मः ।

इन्द्रा॑य । सू॒रिः । अन्ध॑सा ॥२

त्वम् । सुतः । नृऽमादनः । दधन्वान् । मत्सरिन्ऽतमः ।

इन्द्राय । सूरिः । अन्धसा ॥२

हे सोम “नृमादनः नृणां कर्मणो नेतॄणामृत्विजां मादयिता अत एव “दधन्वान् तेभ्यो धनानि धारयन् प्रयच्छन् यद्वा यज्ञस्य धारकः “सूरिः प्राज्ञः “सुतः अस्माभिरभिषुतः “त्वम् “अन्धसा हवीरूपेणान्नेन सह “इन्द्राय “मत्सरिन्तमः तस्यातिशयेन मदकारी भव । ‘नाद्धस्य ' इति नकारः ॥

त्वं सुं॑ष्वा॒णो अद्रिं॑भिर॒भ्यं॑र्ष॒ कनिं॑क्रदत् ।

द्यु॒मन्तं॒ शुष्मं॑मुत्त॒मम् ॥३

त्वम् । सु॒स्वा॒नः । अद्रिं॑ऽभिः । अ॒भि । अ॒र्ष॒ । कनिं॑क्रदत् ।

द्यु॒ऽमन्तं॑म् । शुष्मं॑म् । उ॒त्ऽत॒मम् ॥३

त्वम् । सुस्वानः । अद्रिऽभिः । अभि । अर्ष । कनिक्रदत् ।

द्युऽमन्तम् । शुष्मम् । उत्ऽतमम् ॥३

हे पवमान सोम “अद्रिभिः ग्रावभिः “सुष्वाणः सुन्वानोऽभिषूयमाणः “त्वं “कनिक्रदत् भृशं शब्दं कुर्वन् “अभ्यर्ष कलशं पात्राणि वा अभिगच्छ । तथा “द्युमन्तं दीप्तियुक्तम् “उत्तमं “शुष्मं शत्रूणां शोषकं बलं च प्राप्नुहि । यद्वा । एकवाक्यतया योजनीयः। सूयमानस्त्वं

बलमभिगच्छेति । ‘ कदि क्रदि' आह्वाने । क्रदेर्यङ्लुकि नलोपोऽभ्यासस्य निगागमश्च ‘दाधर्तिदर्धर्ति' इति सूत्रेण सर्वं निपात्यते । तस्माच्छतृप्रत्ययः । ‘ अभ्यस्तानामादिः' इति स्वरः ॥

इन्दु॑र्हिन्वा॒नो अ॑र्षति ति॒रो वारा॑ण्य॒व्यया॑ ।

हरि॒र्वाज॑मचिक्रदत् ॥४

इन्दुः॑ । हि॒न्वा॒नः । अ॒र्ष॒ति॒ । ति॒रः । वारा॑णि । अ॒व्यया॑ ।

हरिः॑ । वाज॑म् । अ॒चि॒क्र॒द॒त् ॥४

इन्दुः । हिन्वानः । अर्षति । तिरः । वाराणि । अव्यया ।

हरिः । वाजम् । अचिक्रदत् ॥४

“हिन्वानः ग्रावभि: प्रेर्यमाणोऽभिषूयमाणः “इन्दुः सोमः “अव्यया अविमयान्यवीनां स्वभूतानि “वाराणि वालानि । पवित्राणीत्यर्थः। तानि “तिरः तिरस्कृत्य व्यवधाय “अर्षति गच्छति । प्रभूतं निर्गच्छतीत्यर्थः। सोऽयं “हरिः हरितवर्णः सोमः “वाजम् अन्नम् “अचिक्रदत् शब्दयति । त्वया सह इन्द्रमहमाह्वयामीत्यर्थः॥

इन्दो॒ व्यव्यं॑मर्षसि॒ वि श्रवां॑सि॒ वि सौभं॑गा ।

वि वाजां॑न्सोम॒ गोमं॑तः ॥५

इन्दो॒ इति॑ । वि । अव्यं॑म् । अ॒र्ष॒सि॒ । वि । श्रवां॑सि । वि । सौभं॑गा ।

वि । वाजां॑न् । सो॒म॒ । गोऽमं॑तः ॥५

इन्दो इति । वि । अव्यम् । अर्षसि । वि । श्रवांसि । वि । सौभगा ।

वि । वाजान् । सोम । गोऽमतः ॥५

हे “इन्दो सोम “अव्यम् अविवाले भवं पवित्रं “वि “अर्षसि विविधं धाराभिर्गच्छसि । किंच “श्रवांसि हवीरूपाण्यन्नानि च “वि गच्छसि। तथा “सौभगा । सुभगस्य भावः सौभगम् । सुभगशब्द उद्गात्रादिषु पठ्यते । तस्योत्तरपदवृद्धिर्नेष्यते । सौभगानि धनानि विविधं प्राप्नोषि। तथा हे “सोम “गोमतः पशुमन्ति “वाजान् बलानि च विविधं प्राप्नुहि। तानि सर्वाण्यस्माकं प्रापयेत्यभिप्रायः ॥ ॥ १३ ॥

आ नं इन्दो शत॒ग्विनं र॒यिं गोमं॑न्तम॒श्विनं॑म् ।

भरां सोम सह॒स्रिणं॑म् ॥६

आ । न॒ः । इ॒न्दो॒ इति॑ । श॒त॒ऽग्विनं॑म् । र॒यिम् । गोऽमं॑न्तम् । अ॒श्विनं॑म् ।

भरं॑ । सो॒म॒ । स॒ह॒स्रिणं॑म् ॥६

आ । नः । इन्दो इति । शतऽग्विनम् । रयिम् । गोऽमन्तम् । अश्विनम् ।

भर । सोम । सहस्रिणम् ॥६

हे "इन्दो पात्रेषु क्षरन् हे "सोम "नः अस्मभ्यम् "आ "भर संपादय देहि । किमिति उच्यते । "शतग्विनम् । शतं गावो यस्य स शतगुः । तद्वन्तं "गोमन्तं प्रशस्तपशुमन्तम् "अश्विनम् अश्वयुक्तं "सहस्रिणं सहस्रसंख्याकं "रयिं धनं पुत्रं वा आ भर ।।

पव॑मानास॒ इन्द॑वस्ति॒रः प॒वित्र॑मा॒शवः॑ ।

इन्द्रं॒ यामे॑भिराशत ॥७

पव॑मानासः । इन्द॑वः । ति॒रः । प॒वित्र॑म् । आ॒शवः॑ ।

इन्द्र॑म् । यामे॑भिः । आ॒श॒त॒ ॥७

पवमानासः । इन्दवः । तिरः । पवित्रम् । आशवः ।

इन्द्रम् । यामेभिः । आशत ॥७

“पवित्रम् ऊर्णास्तुकेन निर्मितं दशापवित्रं “तिरः तिरस्कृत्य व्यवधायकं कृत्वा “पवमानासः कलशं प्रति बहुधाराः क्षरन्तः “आशवः क्षिप्रंमदकारिणश्चमसादीन् व्याप्नुवन्तो वा “इन्दवः सोमाः “यामेभिः स्वीयैर्गमनैः “इन्द्रम् “आशत व्याप्नुवन्ति ॥

क॒कु॒हः सो॒म्यो रस॒ इन्दु॒रिन्द्रा॑य पू॒र्व्यः ।

आ॒युः पं॑वत आ॒यवे॑ ॥८

क॒कु॒हः । सो॒म्यः । रसः॑ । इन्दुः॑ । इन्द्रा॑य । पू॒र्व्यः ।

आ॒युः । प॒व॒ते॒ । आ॒यवे॑ ॥८

ककुहः । सोम्यः । रसः । इन्दुः । इन्द्राय । पूर्व्यः ।

आयुः । पवते । आयवे ॥८

“ककुहः । सोमः सर्वकर्मकारयितृत्वेन सर्वेषां समुच्छ्रितोऽतिशयितो भवति । सोऽयं “पूर्व्यः पूर्वैः कृतोऽभिषुतः पूर्वं प्रातःकाले कृतो वा “आयुः इन्द्रमभिगन्ता “इन्दुः पात्रेषु क्षरन् “सोम्यः । ‘ मये च ' (पा. सू. ४. ४. १३८) इति यप्रत्ययः। सोममयः “रसः

“आयवे सर्वत्र गन्त्रे “इन्द्राय “पवते कलशेषु पवित्रेण पूतो भवति । यद्वा । इन्द्रार्थमभिमुखं गच्छति ।
पवतिर्गतिकर्मा ॥

हि॒न्वन्ति॒ सूर॒मुस्रं॑य॒ः पवं॑मानं मधु॒श्चुतं॑म् ।

अ॒भि गि॒रा समं॑स्वरन् ॥९

हि॒न्वन्तिं॑ । सूरं॑म् । उस्रं॑यः । पवं॑मानम् । म॒धु॒ऽश्चुतं॑म् ।

अ॒भि । गि॒रा । सम् । अ॒स्व॒र॒न् ॥९

हिन्वन्ति । सूरम् । उस्रयः । पवमानम् । मधुऽश्चुतम् ।

अभि । गिरा । सम् । अस्वरन् ॥९

“उस्रयः कर्मकरणार्थमितस्ततः संचरन्त्योऽङ्गुलयः “मधुश्चुतं मदकरस्य रसस्य च्यावयितारं “सूरं सुवीर्यं सर्वस्य यागादिकर्मणि प्रेरकं “पवमानं सोमं “हिन्वन्ति अभिषवार्थं संप्रेरयन्ति । ततः स्तोतारः “गिरा स्तुत्या तमेनम् “अभि “समस्वरन् सम्यगभिष्टुवन्ति ।।

अ॒वि॒ता नो॑ अ॒जाश्व॑ः पू॒षा याम॑नियामनि ।

आ भ॑क्षत्क॒न्या॑सु नः ॥१०

अ॒वि॒ता । न॒ः । अ॒जऽअ॑श्वः । पू॒षा । याम॑निऽयामनि ।

आ । भ॒क्ष॒त् । क॒न्या॑सु । न॒ः ॥१०

अविता । नः । अजऽअश्वः । पूषा । यामनिऽयामनि ।

आ । भक्षत् । कन्यासु । नः ॥१०

“अजाश्वः । ‘अजाः पूष्णः' इत्युक्तत्वादजा एवाश्वा वाहनानि यस्य स तथोक्तः । सः “पूषा एतन्नामको देवः “यामनियामनि सर्वस्मिन् गमने भौमदिव्यलक्षणे “नः अस्माकम् “अविता पालयिता भवतु । किंच “कन्यासु कमनीयास्वभिमतासु स्त्रीषु “नः अस्मान् “आ “भक्षत् आभजतु । अस्माकं कन्याः प्रयच्छत्वित्यर्थः । भजः सेवार्थाल्लेटि सिप्यडागमे रूपम् । यद्वा । अजाश्वोऽजवाहनः पूषा सर्वस्य पोषयिता सोमो यामनियामनि । यायते प्राप्यते देवैरत्रेति याम यज्ञः । तत्र यज्ञे नोऽस्माकमविता रक्षिता भवतु । तथा कन्यासु स्त्रीष्विष्टास्वस्माना भक्षत् प्रापयतु ॥ ॥ १४ ॥

अ॒यं सोमः॑ कप॒र्दिने॑ घृ॒तं न प॑वते॒ मधु॑ ।

आ भ॑क्षत्क॒न्या॑सु नः ॥११

अ॒यम् । सोमः॑ । क॒प॒र्दिने॑ । घृ॒तम् । न । प॒व॒ते॒ । मधु॑ ।

आ । भ॒क्ष॒त् । क॒न्यां॑सु । न॒ः ॥११

अयम् । सोमः । कपर्दिने । घृतम् । न । पवते । मधु ।

आ । भक्षत् । कन्यासु । नः ॥११

“कपर्दिने कल्याणमुकुटवते सोमाय पूष्णे वा तदर्थम् “अयं मादयिताभिषुतोऽस्मदीयः “सोमः “पवते च गच्छति । तं प्राप्नोति । तत्र दृष्टान्तः। “घृतं “न "मधु मादकं हवीरूपं घृतं यथा सोमं पूषणं वा गच्छति तद्वत् । ततः सः “कन्यासु अस्मानागमयत् ॥

अ॒यं त॑ आघृणे सु॒तो घृ॒तं न पं॑वते॒ शुचिं॑ ।

आ भ॑क्षत्क॒न्यां॑सु नः ॥१२

अ॒यम् । ते॒ । आ॒घृ॒णे॒ । सु॒तः । घृ॒तम् । न । प॒व॒ते॒ । शुचिं ।

आ । भ॒क्ष॒त् । क॒न्यांसु । न॒ः ॥१२

अयम् । ते । आघृणे । सुतः । घृतम् । न । पवते । शुचि ।

आ । भक्षत् । कन्यासु । नः ॥१२

हे “आघृणे । 'घृ क्षरणदीप्त्योः । सर्वतो दीप्यमान पवमान पूषन् वा “ते त्वदर्थं “सुतः अभिषुतः “अयं सोमः “पवते त्वदभिमुखमागच्छति । यद्वा । त्वदर्थं पात्रेषु पवित्रेण पूतो भवति क्षरति वा । तत्र दृष्टान्तः। “घृतं “न “शुचि । शुद्धं घृतं यथा त्वां प्राप्नोति तद्वत् । ततस्त्वमभिलषितान्यस्माकं देहीति ॥

वा॒चो ज॒न्तुः कंवी॒नां पवंस्व सोम॒ धारंया ।

दे॒वेषुं रत्न॒धा अंसि ॥१३

वा॒चः । ज॒न्तुः । क॒वी॒नाम् । पवंस्व । सो॒म॒ । धारंया ।

दे॒वेषुं । र॒त्न॒ऽधाः । अ॒सि॒ ॥१३

वाचः । जन्तुः । कवीनाम् । पवस्व । सोम । धारया ।

देवेषु । रत्नऽधाः । असि ॥१३

हे “सोम “कवीनां क्रान्तप्रज्ञानां स्तोतॄणां “वाचो “जन्तुः स्तुतेर्जनयिता । यद्वा । मेधाविनां मध्ये त्वमेव वाचं जनयसि । अत्यन्तं वाग्मी त्वं “धारया “पवस्व द्रोणकलशं ग्रहांश्च प्राप्नुहि । तत इन्द्रादिदेवेषु “रत्नधाः रमणशीलस्य सोमस्य निधाता “असि भवसि । अथवा । देवेषु स्तोत्रकारिषु कर्म कुर्वाणेषु वास्मासु रत्नस्य कनकादेर्दाता भवसि । ।

ग्रावस्तोत्रे गाणगारिमतेनाभिरूपकरणे कलशेषु सोम आसिच्यमाने वक्तव्यस्य तृचस्य ‘आ कलशेषु' इत्यादिके द्वितीयातृतीये । सूत्रितं च---’ आ कलशेषु धावति श्येन वर्म वि गाहत इति द्वे' (आश्व. श्रौ. ५. १२) इति ॥

आ क॒लशे॑षु धावति श्ये॒नो वर्म॒ वि गा॑हते ।

अ॒भि द्रोणा॒ कनि॑क्रदत् ॥१४

आ । क॒लशे॑षु । धा॒व॒ति॒ । श्ये॒नः । वर्म॑ । वि । गा॒ह॒ते॒ ।

अ॒भि । द्रोणा॑ । कनि॑क्रदत् ॥१४

आ । कलशेषु । धावति । श्येनः । वर्म । वि । गाहते ।

अभि । द्रोणा । कनिक्रदत् ॥१४

ऋत्विभिरभिषिच्यमानः कश्चित्सोमः “कलशेषु सोमाधारेषु द्रोणकलशेषु “आ “धावति सर्वतो गच्छति । “श्येनः । लुप्तोपममेतत् । यथा श्येनः “वर्म वरणीयं कुलायं “वि “गाहते प्रविशति तद्वत् । “कनिक्रदत् अत्यन्तं शब्दं कुर्वन् “द्रोणा द्रोणकलशानभिगच्छति च । यद्वा । द्रोणाधवनीयपूतभृत्संज्ञकाभिप्रायम् । एकः सिच्यमानः सोमो द्रोणं प्रति शब्दायमानः प्रथमं गच्छति । ततः पश्चात् पात्रद्वयमिति ॥

परि॒ प्र सो॑म ते॒ रसोऽसं॑र्जि क॒लशे॑ सु॒तः ।

श्ये॒नो न त॒क्तो अं॑र्षति ॥१५

परिं । प्र । सो॒म॒ । ते॒ । रसः॑ । असं॑र्जि । क॒लशे॑ । सु॒तः ।

श्ये॒नः । न । त॒क्तः । अ॒र्ष॒ति॒ ॥१५

परि । प्र । सोम । ते । रसः । असर्जि । कलशे । सुतः ।

श्येनः । न । तक्तः । अर्षति ॥१५

हे “सोम “कलशेषु द्रोणाभिधानेषु “सुतः अभिषुतः “ते तव “रसः परि “प्र “असर्जि परितो ग्रहेषु चमसेषु च प्रसृष्टो विभक्तो भवति । कथमिव । “श्येनो “न “तक्तः । तकिर्गतिकर्मा । गमनशीलः श्येनः पक्षी यथा सर्वत्र “अर्षति गच्छति तद्वत् । यद्वा । यथा श्येनः सर्वतो गन्ता तद्वत्तक्तः पात्रेषु गतः सोमोऽर्षति इन्द्रादिदेवानागच्छतु । अर्तेर्लेटि सिपि वा रूपम् । पूर्वम् ‘ऋषी गतौ ' इत्यस्माल्लटि शपि रूपम् ॥ ॥ १५ ॥

पवं॑स्व सोम म॒न्दय॒न्निन्द्रा॑य॒ मधुं॑मत्तमः ॥१६

पवं॑स्व । सो॒म॒ । म॒न्दयं॑न् । इन्द्रा॑य । मधुं॑मत्ऽतमः ॥१६

पवस्व । सोम । मन्दयन् । इन्द्राय । मधुमत्ऽतमः ॥१६

हे सोम मधुमत्तमः अतिशयेन मधुररसवांस्त्वं “मन्दयन् मादयिता भवन् । यद्वा । “इन्द्राय। ‘ क्रियाग्रहणं कर्तव्यम्' इति संप्रदानम् । इन्द्रं मोदमानः सन् "पवस्व इन्द्रार्थमागच्छ ॥

असृंग्रन्दे॒ववीं॑तये वाज॒यन्तो॒ रथा॑ इव ॥१७

असृंग्रन् । दे॒वऽवीं॑तये । वा॒ज॒ऽयन्तः॑ । रथा॑ःऽइव ॥१७

असृग्रन् । देवऽवीतये । वाजऽयन्तः । रथाःऽइव ॥१७

एतेऽभिषुताः सोमाः “वाजयन्तः सन्तः “देववीतये देवानां पानाय “असृग्रन् विसृज्यन्ते ऋत्विग्भिः प्रदीयन्ते । तत्र दृष्टान्तः । “रथाइव । वाजयन्तः शत्रुधनानि बलानि वा

स्वामिन इच्छन्तो रथा देववीतये देवानां गमनाय यथा विसृज्यन्ते तद्वत् ॥

ते सु॒तासो॑ म॒दिन्त॑मा॒ः शु॒क्रा वा॒युम॑सृक्षत ॥१८

ते । सु॒तासः॑ । म॒दिन्ऽत॑माः । शु॒क्राः । वा॒युम् । अ॒सृ॒क्ष॒त॒ ॥१८

ते । सुतासः । मदिन्ऽतमाः । शुक्राः । वायुम् । असृक्षत ॥१८

“मदिन्तमाः अतिशयेन मादयितारः “शुक्राः दीप्यमानाः सुता अभिषुताः "ते सोमाः “वायुं शब्दम् "असृक्षत असृजन् अकार्षुः । यद्वा वायुमेव सोमपानार्थमसृजन् । सोमेषु सुतेषु सत्सु वायुस्तत्पानार्थमागच्छति खलु ॥

ग्रावा॑णा॑ तु॒न्नो अ॒भिष्टु॑तः प॒वित्रं॑ सोम गच्छसि ।

दध॑त्स्तो॒त्रे सु॒वीर्य॑म् ॥१९

ग्राव्णा॑ । तु॒न्नः । अ॒भिऽस्तु॑तः । प॒वित्र॑म् । सो॒म॒ । ग॒च्छ॒सि॒ ।

दध॑त् । स्तो॒त्रे । सु॒ऽवीर्य॑म् ॥१९

ग्राव्णा । तुन्नः । अभिऽस्तुतः । पवित्रम् । सोम । गच्छसि ।

दधत् । स्तोत्रे । सुऽवीर्यम् ॥१९

हे “सोम “ग्राव्णा “तुन्नः अभिपीडितोऽभिषुतस्त्वं स्तोतृभिः “अभिष्टुतः सन् "पवित्रं “गच्छसि प्राप्नोषि । किं

कुर्वन् । “स्तोत्रे स्तोत्रकारिणे जनाय “सुवीर्यं शोभनवीर्योपेतं धनादिकं “दधत् विदधत् प्रयच्छन् ।।

ए॒ष तु॒न्नो अ॒भिष्टु॑तः प॒वित्र॒मति॑ गाहते ।

र॒क्षो॒हा वार॑म॒व्यय॑म् ॥२०

ए॒षः । तु॒न्नः । अ॒भिऽस्तु॑तः । प॒वित्र॑म् । अति॑ । गा॒ह॒ते॒ ।

र॒क्षः॒ऽहा । वार॑म् । अ॒व्यय॑म् ॥२०

एषः । तुन्नः । अभिऽस्तुतः । पवित्रम् । अति । गाहते ।

रक्षःऽहा । वारम् । अव्ययम् ॥२०

“तुन्नः । तुद व्यथने । ग्रावभिरभिव्यथितः सुतः अत एव सर्वैः “अभिष्टुतः “एषः अस्मदीयः सोमः “रक्षोहा

कर्मविघ्नकारिणां रक्षसां पापानां वा हन्ताभवत् ।
“अव्ययम् अविमयमव्ययवयवभूतं “वारं वालं तेन कृतं “पवित्रं दशापवित्रम् “अति अतिक्रम्य “गाहते द्रोणकलशं प्रविशति ॥ ॥१६॥

यदन्ति॒ यच्च॑ दूर॒के भ॒यं वि॒न्दति॒ मामि॒ह ।

पव॑मान॒ वि तज्ज॑हि ॥२१

यत् । अन्ति॑ । यत् । च॒ । दू॒र॒के । भ॒यम् । वि॒न्दति॑ । माम् । इ॒ह ।

पव॑मान । वि । तत् । ज॒हि॒ ॥२१

यत् । अन्ति । यत् । च । दूरके । भयम् । विन्दति । माम् । इह ।

पवमान । वि । तत् । जहि ॥२१

हे "पवमान पूयमान पुनान वा सोम “यत् “भयम् “अन्ति अन्तिके तथा “यञ्च भयं “दूरके अतिदूरे देशे अथवा “इह अस्मिन् प्रदेशेऽपि भयं “मां “विन्दति लभते प्राप्नोति “तत् भयं त्वं “वि “जहि विशेषेण नाशय । यद्वा । इहेति यज्ञोऽयं लोको वा । अस्मिन् क्रियमाणे यज्ञेऽस्मिँल्लोके वा यद्भयं व्याप्नोति तन्नाशयेत्यर्थः ॥

पवंमान॒ः सो अ॒द्य नः॑ प॒वित्रें॑ण॒ विचंर्षणिः ।

यः पो॒ता स पुंनातु नः ॥२२

पवंमानः । सः । अ॒द्य । न॒ः । प॒वित्रें॑ण । विऽचंर्षणिः ।

यः । पो॒ता । सः । पु॒ना॒तु॒ । न॒ः ॥२२

पवमानः । सः । अद्य । नः । पवित्रेण । विऽचर्षणिः ।

यः । पोता । सः । पुनातु । नः ॥२२

“सः तादृशः प्रसिद्धः “विचर्षणिः सर्वस्य द्रष्टा “पवमानः “अद्य इदानीमेव “पवित्रेण पापशोधकेन तेजसा “नः अस्मान् “पुनातु पापरहितान् करोतु ॥

पवित्रेष्ट्यां प्रथमाज्यभागस्य याज्या ‘ यत्ते पवित्रम् ' इत्येषा । सूत्रितं च -- यत्ते पवित्रमर्चिष्या कलशेषु धावतीति पवित्र इत्येते (आश्व. श्रौ. २. १२) इति ॥

यत्तें प॒वित्रं॑म॒र्चिष्यग्ने॒ वितं॑तम॒न्तरा ।

ब्रह्म॒ तेनं॑ पुनीहि नः ॥२३

यत् । ते॒ । प॒वित्रं॑म् । अ॒र्चिषिं॑ । अग्नें॑ । विऽतं॑तम् । अ॒न्तः । आ ।

ब्रह्मं॑ । तेनं॑ । पु॒नी॒हि॒ । न॒ः ॥२३

यत् । ते । पवित्रम् । अर्चिषि । अग्ने । विऽततम् । अन्तः । आ ।

ब्रह्म । तेन । पुनीहि । नः ॥२३

हे पवमानगुणविशिष्ट “अग्ने “ते त्वदीयं “पवित्रं शोधकं “यत् स्वतेजः “अर्चिषि सौरवैद्युतादितेजसि “अन्तः मध्ये “आ “विततम् आविस्तृतं विद्यते । यद्वा । हे अग्ने ते तव स्वभूतेऽर्चिषि तेजस्यन्तर्मध्ये यत्पवित्रं शुद्धयुत्पादकं सामर्थ्यमस्ति । “तेन तादृशेन तेजसा “ब्रह्म पुत्रादिवर्धनकारि “नः शरीरं “पुनीहि पापरहितं पूतं कुरु ।

यत्तें प॒वित्रं॑मर्चि॒र्विवदग्न॒े तेनं पुनीहि नः ।

ब्र॒ह्म॒स॒वैः पुंनीहि नः ॥२४

यत् । त॒े । प॒वित्रं॑म् । अ॒र्चि॒ऽवत् । अग्नें । तेनं । पु॒नी॒हि॒ । न॒ः ।

ब्र॒ह्म॒ऽस॒वैः । पु॒नी॒हि॒ । न॒ः ॥२४

यत् । ते । पवित्रम् । अर्चिऽवत् । अग्ने । तेन । पुनीहि । नः ।

ब्रह्मऽसवैः । पुनीहि । नः ॥२४

हे अग्ने “पवित्रं शोधकम् “अर्चिवत् अर्चिर्वत् । ‘छन्दसीरः' इति मतुपो वत्वम् । सौरादितेजोयुक्तं “ते त्वदीयं “यत् तेजो विद्यते “तेन स्वीयेनैव तेजसा “नः

अस्मान् “पुनीहि पूतान् कुरु । किंच “ब्रह्मसवैः ब्राह्मणकर्तृकसोमाभिषवैः । यद्वा । ब्रह्म सोमः । तस्याभिषवैः नोऽस्मान् पुनीहि ॥

उ॒भाभ्यां॑ देव सवितः प॒वित्रे॑ण स॒वेनं॑ च ।

मां पुं॑नीहि वि॒श्वतः॑ ॥२५

उ॒भाभ्यां॑म् । दे॒व॒ । स॒वि॒त॒रिति॑ । प॒वित्रे॑ण । स॒वेनं॑ । च॒ ।

माम् । पु॒नी॒हि॒ । वि॒श्वतः॑ ॥२५

उभाभ्याम् । देव । सवितः । पवित्रेण । सवेन । च ।

माम् । पुनीहि । विश्वतः ॥२५

हे “सवितः सर्वस्य प्रेरक हे “देव द्योतमान सोम त्वं “पवित्रेण पापशोधकेन त्वदीयेन तेजसा “सवेन सोसाभिषवेण “च एताभ्याम् “उभाभ्यां “विश्वतः सर्वतः “मां “पुनीहि पूतं कुरु ॥ ॥१७॥

त्रि॒भिष्ट्वं दे॑व सवित॒र्वर्षि॑ष्ठैः सोम॒ धाम॑भिः ।

अग्ने॒ दक्षैः॑ पुनीहि नः ॥२६

त्रि॒ऽभिः । त्वम् । दे॒व॒ । स॒वि॒त॒ः । वर्षि॑ष्ठैः । सो॒म॒ । धाम॑ऽभिः ।

अग्ने॑ । दक्षैः॑ । पु॒नी॒हि॒ । न॒ः ॥२६

त्रिऽभिः । त्वम् । देव । सवितः । वर्षिष्ठैः । सोम । धामऽभिः ।

अग्ने । दक्षैः । पुनीहि । नः ॥२६

हे “देव स्तुत्य दीप्यमान वा हे “सवितः सर्वस्य स्वस्वकर्मणि चोदयितर्हे “सोम पवमानगुणविशिष्ट हे “अग्ने “त्वं “वर्षिष्ठैः वृद्धतमैः अत एव “दक्षैः सामर्थ्यवद्भिः “त्रिभिः “धामभिः शरीरैः अग्निवायुसूर्यात्मकैस्त्रिभिः शरीरैः “नः अस्मान् “पुनीहि परिशुद्धान् कुरु ॥

पु॒नन्तु॒ मा॑ दे॑वज॒नाः पु॒नन्तु॒ वस॑वो धि॒या ।

विश्वे॑ देवाः पुन॒ीत म॒ा जात॑वेदः पुन॒ीहि मा॑ ॥२७

पु॒नन्तु॑ । माम् । दे॒व॒ऽज॒नाः । पु॒नन्तु॑ । वस॑वः । धि॒या ।

विश्वे॑ । दे॒वा॒ः । पु॒न॒ीत । म॒ा । जात॑ऽवेदः । पु॒न॒ीहि । म॒ा ॥
२७

पुनन्तु । माम् । देवऽजनाः । पुनन्तु । वसवः । धिया ।

विश्वे । देवाः । पुनीत । मा । जातऽवेदः । पुनीहि । मा ॥
२७

“देवजनाः । देवानां जनः प्रादुर्भावो येषां यज्ञेष्विति देवजना यजमानाः । यद्वा इन्द्रादिदेवगणाः । “मां “पुनन्तु परिपूतं कुर्वन्तु । तथा “वसवः वासका देवा: “धिया आत्मीयेन कर्मणा माँ “पुनन्तु । अथ प्रत्यक्षः । हे “विश्वे “देवाः सर्वे देवाः “मा मां “पुनीत पूतं कुरुत । हे “जातवेदः जातानि भूतजातानि वेत्तीति यद्वा जातप्रज्ञ हे अग्ने “मा मां “पुनीहि ॥

प्र प्यांयस्व प्र स्यंन्दस्व सोम विश्वेंभिरंशुभिः ।

देवेभ्यं उत्तमं हविः ॥२८

प्र । प्या॒य॒स्व॒ । प्र । स्य॒न्द॒स्व॒ । सोम॑ । विश्वे॑भिः । अ॒ंशुऽभिः॑ ।

दे॒वेभ्यः॑ । उ॒त्ऽत॒मम् । ह॒विः ॥२८

प्र । प्यायस्व । प्र । स्यन्दस्व । सोम । विश्वेभिः । अंशुऽभिः ।

देवेभ्यः । उत्ऽतमम् । हविः ॥२८

हे “सोम “प्र “प्यायस्व अस्मान् प्रकर्षेण वर्धयः । यद्वा देवान् सोमेन वर्धय । किंच “विश्वेभिरंशुभिः सर्वैस्त्वदीयैरंशुभिः “देवेभ्यः देवार्थम् “उत्तमं प्रशस्ततमं “हविः सोमरूपं “प्र “स्यन्दस्व कलशादीन् प्रति प्रस्रव । प्रयच्छेति यावत् ॥

अग्नीषोमप्रणयने ‘उप प्रियम्' इत्येषा । सूत्रितं च--- उप

प्रियं पनिप्नतमित्यर्धर्चं आरमेत् । (आश्व. श्रौ. ४. १०) इति ।।

उप॑ प्रि॒यं पनि॑प्नत॒ं युवा॑नमाहुती॒वृध॑म् ।

अग॑न्म॒ बिभ्र॑तो॒ नमः॑ ॥२९

उप॑ । प्रि॒यम् । पनि॑प्नतम् । युवा॑नम् । आ॒हु॒ति॒ऽवृध॑म् ।

अग॑न्म । बिभ्र॑तः । नमः॑ ॥२९

उप । प्रियम् । पनिप्नतम् । युवानम् । आहुतिऽवृधम् ।

अगन्म । बिभ्रतः । नमः ॥२९

“प्रियं सर्वस्य प्रीणयितारं “पनिप्नतम् अत्यन्तं शब्दायमानं “युवानं तरुणम् “आहुतिवृधम् आहुतिभिर्वर्धनीयं पवमानं वयं “नमः हविर्नमस्कारं वा “बिभ्रतः धारयन्तः सन्तः “उप

“अगन्म उपगच्छेम । गमेर्लुङि ‘ मन्त्रे घस' ' इति च्लेर्लुकि सति ‘म्वोश्च' इति नकारः। पनिप्नतम् । पनेः स्तुत्यर्थस्य यङ्लुकि रूपम्। दाधर्ति दर्धर्ति' इति सूत्रे इतिकरणस्य प्रदर्शनार्थत्वादत्राभ्यासस्य निगागम उपधालोपश्च निपात्यते ॥

अ॒लाय्यं॑स्य पर॒शुर्न॑नाश॒ तमा पं॑वस्व देव सोम ।

आ॒खुं चिं॑दे॒व दे॑व सोम ॥३०

अ॒लाय्यं॑स्य । प॒र॒शुः । न॒ना॒श॒ । तम् । आ । प॒व॒स्व॒ । दे॒व॒ । सो॒म॒ ।

आ॒खुम् । चि॒त् । ए॒व । दे॒व॒ । सो॒म॒ ॥३०

अलाय्यस्य । परशुः । ननाश । तम् । आ । पवस्व । देव । सोम ।

आखुम् । चित् । एव । देव । सोम ॥३०

“अलाय्यस्य । अर्तेरौणादिक आय्यप्रत्ययः । कपिलकादित्वाल्लत्वम्। अभिगमनशीलस्य शत्रोः “परशुः छेदकः पवमानः “तम् एव शत्रुं “ननाश नाशयतु नास्मानपापान् । ततो हे "देव दीप्यमान “सोम “आ “पवस्व अस्मदाभिमुख्येन गच्छ। किंच हे “देव द्योतमान स्तुत्य वा हे “सोम “आखुं “चित् ।' खनु अवदारणे' । सर्वस्याहन्तारमपि “तं शत्रुम् “एव बाधस्व नास्मानपापानिति ॥

यः पा॑वमा॒नीर॒ध्येत्यृषि॑भि॒ः सम्भृ॑त॒ं रस॑म् ।

सर्व॒ं स पू॒तम॑श्नाति स्वदि॒तं मा॑त॒रिश्व॑ना ॥३१

यः । पा॒व॒मा॒नीः । अ॒धि॒ऽएति॑ । ऋषि॑ऽभिः । सम्ऽभृ॑तम् । रस॑म् ।

सर्व॑म् । सः । पू॒तम् । अ॒श्ना॒ति॒ । स्व॒दि॒तम् । मा॒त॒रिश्व॑ना ॥ ३१

यः । पावमानीः । अधिऽएति । ऋषिऽभिः । सम्ऽभृतम् । रसम् ।

सर्वम् । सः । पूतम् । अश्नाति । स्वदितम् । मातरिश्वना ॥ ३१

“यः जनः “पावमानीः पवमानदेवताकाः सर्वा ऋचः तद्रूपम् “ऋषिभिः सूक्तद्रष्टृभिर्मधुच्छन्दःप्रभृतिभिः “संभृतं संपादितं “रसं वेदरसभूतं सारं सूक्तसंघम् “अध्येति अधीते “सः जनः “सर्वं भोज्यजातं “पूतं परिशुद्धमेव अश्नाति । परिपूतं पापरहितमन्नं भक्षयति । कथमस्य

पूतत्वं तत्राह । स्वस्याशनात्प्रागेव “मातरिश्वना । मातर्यन्तरिक्षे श्वसितीति मातरिश्वा वायुः । स च वायुः पवित्रमेव । पवित्रेण वायुना "स्वदितं स्वादूकृतं परिपूतमेवान्नं पश्चात् स नरोऽश्नाति ॥

पा॒व॒मा॒नीर्यो अ॒ध्येत्यृषिंभि॒ः सम्भृंत॒ं रसंम् ।

तस्मै॒ सरंस्वती दुहे क्षी॒रं स॒र्पिर्मधूंद॒कम् ॥३२

पा॒व॒मा॒नीः । यः । अ॒धि॒ऽएतिं । ऋषिंऽभिः । सम्ऽभृंतम् । रसंम् ।

तस्मैं । सरंस्वती । दु॒हे॒ । क्षी॒रम् । स॒र्पिः । मधुं । उ॒द॒कम् ॥ ३२

पावमानीः । यः । अधिऽएति । ऋषिऽभिः । सम्ऽभृतम् । रसम् ।

तस्मै । सरस्वती । दुहे । क्षीरम् । सर्पिः । मधु । उदकम् ॥ ३२

“यः ब्राह्मणः “पावमानीः पवमानदेवताका ऋचः तदात्मकम् “ऋषिभिः मधुच्छन्दआदिभिः । “संभृतं “रसं वेदसारं सूक्तसंघम् “अध्येति अधीते “तस्मै पवमानाध्ययनं कुर्वते जनाय "सरस्वती सर्वत्र सरणवती वाग्देवता “क्षीरं यज्ञसाधनभूतं पयः “सर्पिः तादृशं घृतं “मधु मदकरम् “उदकं सोमं “दुहे स्वयमेव दोग्धि। एनं नरं यागादिपरं वेदशास्त्रविदं करोतीत्यर्थः । दुह प्रपूरणे । कर्मकर्तरि ‘न दुहस्नुनमां यक्चिणौ ' इति यकः प्रतिषेधः । ‘लोपस्त आत्मनेपदेषु' इति तलोपः॥ ॥१८॥ ॥३॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं ९.२२सूक्तं ९.५२सूक्तं ९.८२सूक्तं ९.११२

सूक्तं ९.२३सूक्तं ९.५३सूक्तं ९.८३सूक्तं ९.११३

सूक्तं ९.२४सूक्तं ९.५४सूक्तं ९.८४सूक्तं ९.११४

सूक्तं ९.२५सूक्तं ९.५५सूक्तं ९.८५

सूक्तं ९.२६सूक्तं ९.५६सूक्तं ९.८६

सूक्तं ९.२७सूक्तं ९.५७सूक्तं ९.८७

सूक्तं ९.२८सूक्तं ९.५८सूक्तं ९.८८

सूक्तं ९.२९सूक्तं ९.५९सूक्तं ९.८९

सूक्तं ९.३०सूक्तं ९.६०सूक्तं ९.९०

टिप्पणी

९.६७.१ त्वं सोमासि धारयु इति

आश्वसूक्तम् (https://sa.wikisource.org/s/2hus)

शाम्मदम् (https://sa.wikisource.org/s/2hut)

दावसुनिधनम् (https://sa.wikisource.org/s/2huu)

प्रतीचीनेडं काशीतम् (https://sa.wikisource.org/s/2huv)

हाविष्कृतम् (https://sa.wikisource.org/s/2hux)

९.६७.११ अयं सोमः कपर्दिने इति

कपर्दी उपरि टिप्पणी (https://vedastudy.weebly.com/kapardi.html)

९.६७.१३-१५

विश्वामित्र (http://puranastudy.byethost14.com/pur_index26/vishwaa1.htm) उपरि टिप्पणी

९.६७.१६-१८

जमदग्नि (http://vipin48.tripod.com/pur_index11/jamadagni.htm) उपरि टिप्पणी

ऋग्वेदः सूक्तं ९.६८

दे. पवमानः सोमः। जगती, १० त्रिष्टुप्

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।

बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥१॥

स रोरुवदभि पूर्वा अचिक्रददुपारुहः श्रथयन्स्वादते हरिः ।

तिरः पवित्रं परियन्नुरु ज्रयो नि शर्याणि दधते देव आ वरम् ॥२॥

वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता ।

मही अपारे रजसी विवेविददभिव्रजन्नक्षितं पाज आ ददे ॥३॥

स मातरा विचरन्वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदम् ।

अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः ॥४॥

सं दक्षेण मनसा जायते कविरृतस्य गर्भो निहितो यमा परः ।

यूना ह सन्ता प्रथमं वि जज्ञतुर्गुहा हितं जनिम नेममुद्यतम् ॥५॥

मन्द्रस्य रूपं विविदुर्मनीषिणः श्येनो यदन्धो अभरत्परावतः ।

तं मर्जयन्त सुवृधं नदीष्वाँ उशन्तमंशुं परियन्तमृग्मियम् ॥६॥

त्वां मृजन्ति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितम् ।

अव्यो वारेभिरुत देवहूतिभिर्नृभिर्यतो वाजमा दर्षि सातये ॥७॥

परिप्रयन्तं वय्यं सुषंसदं सोमं मनीषा अभ्यनूषत स्तुभः ।

यो धारया मधुमाँ ऊर्मिणा दिव इयर्ति वाचं रयिषाळमर्त्यः ॥८॥

अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति ।

अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इन्दुर्वरिवो विदत्प्रियम् ॥९॥

एवा नः सोम परिषिच्यमानो वयो दधच्चित्रतमं पवस्व ।

अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥१०॥

सायणभाष्यम्

चतुर्थेऽनुवाकेऽष्टादश सूक्तानि । तत्र ‘प्र देवम्' इति दशर्चं प्रथमं सूक्तं भलन्दनपुत्रस्य वत्सप्रेरार्षं पवमानसोमदेवताकम् । दशमी त्रिष्टुप् शिष्टा जगत्यः । तथा चानुक्रम्यते- प्र देवं दश वत्सप्रिर्भालन्दनस्त्रिष्टुबन्तं ह' इति । गतो विनियोगः ॥

प्र दे॒वमच्छा॒ मधु॑मन्त॒ इन्द॒वोऽसि॑ष्यदन्त॒ गाव॒ आ न धे॒नव॑ः ।

ब॒र्हि॒षदो॑ वच॒नाव॑न्त॒ ऊध॑भिः परि॒स्रुत॑मु॒स्रिया॑ नि॒र्णिजं॑ धिरे ॥१

प्र । दे॒वम् । अच्छ॑ । मधु॑ऽमन्तः । इन्द॑वः । असि॑स्यदन्त । गावः॑ । आ । न । धे॒नवः॑ ।

ब॒र्हि॒ऽसदः॑ । व॒च॒नाऽव॑न्तः । ऊध॑ऽभिः । प॒रि॒ऽस्रुत॑म् । उ॒स्रियाः॑ । निः॒ऽनिज॑म् । धि॒रे॒ ॥१

प्र । देवम् । अच्छ । मधुऽमन्तः । इन्दवः । असिस्यदन्त । गावः । आ । न । धेनवः ।

बर्हिऽसदः । वचनाऽवन्तः । ऊधऽभिः । परिऽस्रुतम् । उस्रियाः । निःऽनिजम् । धिरे ॥१

"मधुमन्तः मादकरससंयुक्ताः इन्दवः सोमाः “देवं द्योतमानं सोमात्मकमिन्द्रम् "अच्छ प्रति “प्र “असिष्यदन्त प्रस्यन्दन्ते । ग्रहादिषु प्रक्षरन्ति । स्यन्दतेर्ण्यन्तस्य लुङि

चङि रूपम् । तत्र दृष्टान्तः । “गाव “आ “न “धेनवः । पयस्विन्यः प्रीणयित्र्यो गावो यथा वत्सं प्रति पयांसि प्रस्रवन्ति तद्वत्। किंच “बर्हिषदः बर्हिषि सीदन्तः "वचनावन्तः हम्भारवादिशब्दवन्तः “उस्रियाः । गोनामैतत् । तादृश्यो गावः “ऊधभिः पयोधारकैः स्वैः स्वैरूधभिः परिस्रुतं परितः स्रवणशीलं "निर्णिजं शुद्धं पयोभूतं सोमरसं "धिरे दधिरे । इन्द्रार्थं धारयन्ति ॥

स रोरुंवद॒भि पूर्वा॑ अचिक्रदद॒ुपा॒रुहः॑ श्र॒थयं॑न्त्स्वादते॒ हरिः॑ ।

ति॒रः प॒वित्रं॑ परि॒यन्नु॒रु ज्रयो॒ नि शर्या॑णि दधते दे॒व आ वरं॑ ॥२

सः । रोरुंवत् । अ॒भि । पूर्वाः॑ । अ॒चि॒क्र॒द॒त् । उ॒प॒ऽआ॒रुहः॑ । श्र॒थयं॑न् । स्वा॒द॒ते॒ । हरिः॑ ।

ति॒रः । प॒वित्र॑म् । प॒रि॒ऽयन् । उ॒रु । ज्रयः॑ । नि । शर्या॑णि । द॒ध॒ते॒ । दे॒वः । आ । वर॑म् ॥२

सः । रोरुवत् । अभि । पूर्वाः । अचिक्रदत् । उपऽआरुहः । श्रथयन् । स्वादते । हरिः ।

तिरः । पवित्रम् । परिऽयन् । उरु । ज्रयः । नि । शर्याणि । दधते । देवः । आ । वरम् ॥२

"रोरुवत् कलशादिकं प्रति अत्यन्तं शब्दं कुर्वन् "सः सोमः "पूर्वाः मुख्याः स्तोतॄणां स्तुतीः “अभि “अचिक्रदत् अभिमुखमध्वनयत् । स्तुतयः साधीयस्य इति प्रतिध्वनिमङ्गीकारमकार्षीदित्यर्थः । किंच "हरिः हरितवर्णः "उपारुहः । रोहतेस्ताच्छीलिकः क्विप् । उपारोहणशीला ऊर्ध्वं प्रादुर्भवनशीला ओषधीः "श्रथयन् अग्रे विश्लेषयन् "स्वादते स्वादूकरोति । ताः फलिनीः कुर्वन स्वादुयुक्ता विदधातीत्यर्थः । तथा "पवित्रम्

अविवालात्मकं दशापवित्रं "तिरः तिरस्कृत्य पात्राणि प्रत्यात्मनः क्षरणकाले पवित्रं व्यवधायकं कृत्वा “परियन् परितो गच्छन् सोमः “उरु महान्तं “ज्रयः वेगं करोति । ततः “शर्याणि । ' शॄ हिंसायाम् ' । हिंसितव्यानि यद्वा शरेण हन्तव्यानि रक्षांसि “नि “दधते निक्षिपति न्यक्करोति । हिनस्तीति यावत् । पश्चात् "देवः दीप्यमानः सोमः “वरं वरणीयं धनं सोमदातृभ्यो यजमानेभ्यः “आ दधते आधारयति । प्रयच्छतीत्यर्थः । दधातेः लेट्यडागमे ‘ घोर्लोपो लेटि वा ' इत्याकारलोपः ॥

वि यो म॒मे य॒म्यां संय॒ती मदः साक॒ंवृधा॒ पयंसा पिन्व॒दक्षिंता ।

म॒ही अंपा॒रे रजंसी वि॒वेविंददभि॒व्रज॒न्नक्षिंत॒ं पाज॒ आ दंदे ॥३

वि । यः । म॒मे । य॒म्यां । सं॒य॒ती इतिं स॒म्ऽय॒ती । मदः॑ ।
सा॒क॒म्ऽवृधां । पयंसा । पि॒न्व॒त् । अक्षिंता ।

म॒ही इतिं । अ॒पा॒रे इतिं । रजंसी॒ इतिं । वि॒ऽवेविंदत् ।
अ॒भि॒ऽव्रजंन् । अक्षिंतम् । पाजः॑ । आ । द॒दे॒ ॥३

वि । यः । ममे । यम्या । संयती इति सम्ऽयती । मदः ।
साकम्ऽवृधा । पयसा । पिन्वत् । अक्षिता ।

मही इति । अपारे इति । रजसी इति । विऽवेविदत् ।
अभिऽव्रजन् । अक्षितम् । पाजः । आ । ददे ॥३

"यः "मदः । माद्यत्यनेनेति मदः सोमरसः । "यम्या युगलभूते "संयती परस्परं संगच्छमाने द्यावापृथिव्यौ "वि "ममे विशेषेण निर्मितवान् ततः ते "साकंवृधा सहैव वर्धनशीले तथा "अक्षिता अक्षीणे सामर्थ्यवत्यौ यथा भविष्यतः तथा स सोमः "पयसा पयोरूपेण स्वीयरसेन

"पिन्वत् असिञ्चत् । अवर्धयदिति यावत् । किंच "मही महत्यौ अत एव "अपारे पर्यन्तरहिते "रजसी । द्यावापृथिवीनामैतत् । ते द्यावापृथिव्यौ “विवेविदत् । ‘ विद ज्ञाने ' । यङ्लुकि शतरि रूपम् । अभ्यासस्वरः । इयं पृथिवीयं द्यौरिति सर्वेषां विविच्य तेजसा प्रज्ञापयन् "अभिव्रजन् अभितः सर्वतो गच्छन् स सोमः “अक्षितम् अक्षीणमविनश्वरं "पाजः बलम् "आ ददे स्वीकृतवान् । अत्यन्तं बलवानभवदित्यर्थः ॥

स मा॒तरां॑ वि॒चरं॑न्वा॒जयं॑न्न॒पः प्र मेधि॑रः स्व॒धयां॑ पिन्वते प॒दं ।

अं॒शुर्यवे॑न पिपिशे य॒तो नृभि॒: सं जा॒मिभि॒र्नसं॑ते॒ रक्षं॑ते॒ शिरः॑ ॥४

सः । मा॒तरा॑ । वि॒ऽचर॑न् । वा॒जय॑न् । अ॒पः । प्र । मेधि॑रः ।
स्व॒धया॑ । पि॒न्व॒ते॒ । प॒दम् ।

अ॒ंशुः । यवे॑न । पि॒पि॒शे॒ । य॒तः । नृऽभिः॑ । सम् ।
जा॒मिऽभिः॑ । नसं॑ते । रक्षं॑ते । शिरः॑ ॥४

सः । मातरा । विऽचरन् । वाजयन् । अपः । प्र । मेधिरः ।
स्वधया । पिन्वते । पदम् ।

अंशुः । यवेन । पिपिशे । यतः । नृऽभिः । सम् ।
जामिऽभिः । नसते । रक्षते । शिरः ॥४

“मेधिरः । 'मेधारथाभ्यामिरनिरचौ' (पा. सू. ५.२.१०९.३) इतरन्प्रत्ययो मत्वर्थीयः । मेधावान् प्राज्ञः "सः सोमः "मातरा मातरौ जगतो निर्मात्र्यौ द्यावापृथिव्यौ "विचरन् अन्तरेणात्यन्तं चरन् तथा “अपः अन्तरिक्षस्थितान्युदकानि “वाजयन् प्रेरयन् ।

वजेर्ण्यन्तस्य शतरि रूपम् । तादृशः “स्वधया सक्तुलक्षणेनान्नेन सह "पदं स्वस्थानमुत्तरवेदिरूपं “प्र “पिन्वते प्रकर्षेणाप्याययति । ततः “नृभिः कर्मनेतृभिर्ऋत्विग्भिः "यतः संयतः “अंशुः सोमः “यवेन “पिपिशे । ‘ पिश अवयवे'। अवयवत्वेन कृतः । मिश्रित इत्यर्थः । सोमस्तु यवसक्तुभिः श्रीयते खलु। सोऽयं "जामिभिः एकस्मात्पाणेरुत्पन्नाभिरङ्गुलीभिः “सं नसते संगच्छते च । “शिरः शीर्णं भूतजातं "रक्षते च । स्वीयरसेन रक्षति पोषयति । नसतिर्गतिकर्मा । ‘चादिलोपे विभाषा' इति न निघातः ॥

सं दक्षे॑ण॒ मन॑सा जायते क॒विर्ऋ॒तस्य॒ गर्भो॒ निहि॑तो य॒मा प॒रः ।

यूनां ह॒ संतां प्रथ॒मं वि जंज्ञतु॒र्गुहां हि॒तं जनिंम॒ नेम॒मुद्यंतं ॥ ५

सम् । दक्षेंण । मनंसा । जा॒य॒ते॒ । क॒विः । ऋ॒तस्यं । गर्भः । निऽहिंतः । य॒मा । प॒रः ।

यूनां । ह॒ । सन्तां । प्र॒थ॒मम् । वि । ज॒ज्ञ॒तुः॒ । गुहां । हि॒तम् । जनिंम । नेमंम् । उत्ऽयंतम् ॥५

सम् । दक्षेण । मनसा । जायते । कविः । ऋतस्य । गर्भः । निऽहितः । यमा । परः ।

यूना । ह । सन्ता । प्रथमम् । वि । जज्ञतुः । गुहा । हितम् । जनिम । नेमम् । उत्ऽयतम् ॥५

प्रसङ्गात् सोमसूर्ययोराविर्भावमाह । “दक्षेण प्रवृद्धेन "मनसा सह "सं "जायते पृथिव्याः सम्यग्जायते । तथा “ऋतस्य उदकस्यैव “गर्भः गर्भस्थानीयः । यद्वा । सत्यस्य

यज्ञस्य मध्ये गर्भः शब्दनीयः स्तुत्यः । स एव सोमः "परः परस्तादन्तरिक्षे "यमा यमेन नियमेन देवैः “निहितः सः । सूर्याद्धि वृष्टिर्भवति । तस्मात्सोमः सूर्यात्मकतयावस्थित इत्यर्थः । एवं यूना। "ह इत्यवधारणे। युवानावेव सन्तौ तौ “प्रथमं जननकाले “वि “जज्ञतुः । अयं सोमोऽयं सूर्य इति विशेषेण ज्ञायते । तयोश्चार्धं “जनिम जन्म “गुहा गुहायां "हितं निहितं भवति । तयोः "नेमम् अर्धं च “उद्यतं प्रकाशितं भवति । दिवा सूर्यः प्रादुर्भवति रात्री चन्द्रमा इ ति ॥ ॥ १९ ॥

म॒न्द्रस्यं रू॒पं विविदुर्मनी॒षिणः॑ श्ये॒नो यदन्धो॒ अभ॑रत्परा॒वतः॑ ।

तं म॑र्जयन्त सु॒वृधं॑ न॒दीष्वाँ उ॒शन्तं॒मं॒शुं प॑रि॒यन्तं॑मृ॒ग्मियं॑म्॥ ६

म॒न्द्रस्यं । रू॒पम् । वि॒वि॒दुः॒ । म॒नी॒षिणः॑ । श्ये॒नः । यत् । अन्धः॑ । अभं॑रत् । प॒रा॒ऽवतः॑ ।

तम् । म॒र्ज॒य॒न्त॒ । सु॒ऽवृधं॑म् । न॒दीषुं । आ । उ॒शन्तं॑म् । अं॒शुम् । प॒रि॒ऽयन्तं॑म् । ऋ॒ग्मियं॑म् ॥६

मन्द्रस्य । रूपम् । विविदुः । मनीषिणः । श्येनः । यत् । अन्धः । अभरत् । पराऽवतः ।

तम् । मर्जयन्त । सुऽवृधम् । नदीषु । आ । उशन्तम् । अंशुम् । परिऽयन्तम् । ऋग्मियम् ॥६

"मनीषिणः प्राज्ञा यष्टारः "मन्द्रस्य मदकरस्य तस्य सोमस्य "रूपं "विविदुः जानन्ति । “यत् "अन्धः यत् सोमलक्षणमन्नं "श्येनः गायत्रीरूपः पक्षी "परावतः दूरात् द्युलोकात् "आभरत् आजहार। 'हृग्रहोर्भश्छन्दसि ' इति भकारः। “तं तादृशं " सुवृधं सुष्ठु वर्धमानं सुवर्धयितारं वा “अंशुं सोमं

"नदीषु नदमानासु वसतीवर्याख्यास्वप्सु “आ “मर्जयन्त ऋत्विज आशोधयन्ति । अलंकुर्वन्ति वा । कीदृशम् । “उशन्तं देवान् कामयमानं “परियन्तं परितो गच्छन्तम् “ऋग्मियम् ऋगर्हं स्तुत्यं सोममामर्जयन्तीति ॥

त्वां मृंजंति॒ दश॒ योषंणः सु॒तं सोम॒
ऋषिंभिर्म॒तिभिंर्धी॒तिभिंर्हि॒तं ।

अव्यो॒ वारेंभिरु॒त दे॒वहूंतिभि॒र्नृभिंर्य॒तो वाज॒मा दंर्षि सा॒तयें ॥७

त्वाम् । मृ॒ज॒न्ति॒ । दशं । योषंणः । सु॒तम् । सोमं ।
ऋषिंऽभिः । म॒तिऽभिः॑ । धी॒तिऽभिः॑ । हि॒तम् ।

अव्यः॑ । वारेंभिः । उ॒त । दे॒वहूंतिऽभिः । नृऽभिः॑ । य॒तः ।
वाजंम् । आ । द॒र्षि॒ । सा॒तयें ॥७

त्वाम् । मृजन्ति । दश । योषणः । सुतम् । सोम ।
ऋषिऽभिः । मतिऽभिः । धीतिऽभिः । हितम् ।

अव्यः । वारेभिः । उत । देवहूतिऽभिः । नृऽभिः । यतः ।
वाजम् । आ । दर्षि । सातये ॥७

हे “सोम “योषणः द्वाभ्यां पाणिभ्यां विभज्योत्पन्नाः "दश दशसंख्याका अङ्गुलयः “ऋषिभिः मधुच्छन्दःप्रभृतिभिः "सुतम् अभिषुतं “हितं पात्रेषु निहितं " त्वां “मतिभिः स्तुतिभिः “धीतिभिः कर्मभिश्च "अव्यः “वारेभिः अविवालैः पवित्रैः "मृजन्ति शोधयन्ति । “उत अपि च देवहूतिभिः देवाह्वानयुक्तैः "नृभिः कर्मनेतृभिर्ऋत्विग्भिः यतः ग्रहेषु संयमितः संगृहीतस्त्वं “सातये दानाय “वाजम् अन्नम्” “आ "दर्षि आविदारयसि । विवृतं करोषि । स्तोतृभ्योऽन्नादिकं प्रयच्छसीति यावत् ॥

प॒रि॒प्र॒यंतं॑ व॒य्यं॑ सुष॒ंसद॒ं सोमं॑ मनी॒षा अ॒भ्यं॑नूषत॒ स्तुभः॑ ।

यो धारं॑या॒ मधुं॑माँ ऊ॒र्मिणां॑ दि॒व इयं॑र्ति॒ वाचं॑ रयि॒षाळमं॑र्त्यः ॥८

प॒रि॒ऽप्र॒यन्तं॑म् । व॒य्यं॑म् । सु॒ऽस॒ंसदं॑म् । सोमं॑म् । म॒नी॒षाः । अ॒भि । अ॒नू॒ष॒त॒ । स्तुभः॑ ।

यः । धारं॑या । मधुं॑ऽमान् । ऊ॒र्मिणां॑ । दि॒वः । इयं॑र्ति । वाचं॑म् । र॒यि॒षाट् । अमं॑र्त्यः ॥८

परिऽप्रयन्तम् । वय्यम् । सुऽसंसदम् । सोमम् । मनीषाः । अभि । अनूषत । स्तुभः ।

यः । धारया । मधुऽमान् । ऊर्मिणा । दिवः । इयर्ति । वाचम् । रयिषाट् । अमर्त्यः ॥८

“परिप्रयन्तं पात्राणि परितः प्रगच्छन्तं वयं देवैः काम्यमानं सुसंसदं शोभनसंसदनं "सोमं “मनीषाः मनस ईशित्र्यः " स्तुभः स्तुतयः “अभ्यनूषत अभिष्टुवन्ति । वय्यम् । ‘ वी गत्यादिषु' इत्यस्माद्यति 'भय्यप्रवय्ये च छन्दसि' (पा. सू. ६. १. ८३) इति निपातितः । अत्रानुपसर्गस्यापि निपातनं भवति । मधुमान् मदकररसवान् यः सोमः “धारया स्वीयया “ऊर्मिणा वसतीवर्याख्येनोदकेन सह “दिवः आकाशात् द्रोणकलश आपतति: “रयिषाट् शत्रुधनानामभिभविता "अमर्त्यः मनुष्यधर्मरहितः स सोमः “वाचम् "इयर्ति प्रेरयति । तदा हि स्तोतारः स्तुवन्ति ॥

अ॒यं दि॒व इ॑यर्ति॒ विश्व॒मा रज॒: सोम॑: पुना॒नः क॒लशे॑षु सीदति ।

अ॒द्भिर्गोभि॑र्मृज्यते॒ अद्रि॑भिः सु॒तः पु॑ना॒न इं॑दु॒र्वरि॑वो विदत्प्रि॒यं ॥९

अ॒यम् । दि॒वः । इ॒य॒र्ति॒ । विश्व॑म् । आ । रजः॑ । सोमः॑ । पु॒ना॒नः । क॒लशे॑षु । सी॒द॒ति॒ ।

अ॒त्ऽभिः । गोभिः॑ । मृ॒ज्य॒ते॒ । अद्रि॑ऽभिः । सु॒तः । पु॒ना॒नः । इन्दुः॑ । वरि॑वः । वि॒द॒त् । प्रि॒यम् ॥९

अयम् । दिवः । इयर्ति । विश्वम् । आ । रजः । सोमः । पुनानः । कलशेषु । सीदति ।

अत्ऽभिः । गोभिः । मृज्यते । अद्रिऽभिः । सुतः । पुनानः । इन्दुः । वरिवः । विदत् । प्रियम् ॥९

“अयं सोमः “दिवः द्युलोकात् "विश्वं "रजः । उदकनामैतत् । सर्वमुदकम् "इयर्ति अभिप्रापयति । किंच "पुनानः दशापवित्रेण पूयमानः "सोमः "कलशेषु द्रोणनामसु

"सीदति । तथा “अद्रिभिः ग्रावभिः “अद्भिः वसतीवर्याख्याभिः “गोभिः गोविकारैः क्षीरदध्यादिभिश्च "मृज्यते शोध्यते अलंक्रियते । ततः "पुनानः पूतः “इन्दुः सोमः "प्रियं प्रियतरं प्रीणनकारि वा “वरिवः वरणीयं धनं "विदत् स्तोतृभ्यो लम्भयति । प्रयच्छतीति यावत् ॥

ए॒वा नः॑ सोम परिषि॒च्यमा॑नो॒ वयो॒ दध॑च्चि॒त्रत॑मं पवस्व ।

अ॒द्वे॒षे द्यावा॑पृथि॒वी हु॑वेम॒ देवा॑ ध॒त्त र॒यिम॒स्मे सु॒वीरं॑ ॥१०

ए॒व । न॒ः । सो॒म॒ । प॒रि॒ऽसि॒च्यमा॑नः । वयः॑ । दध॑त् । चि॒त्रऽत॑मम् । प॒व॒स्व॒ ।

अ॒द्वे॒षे इति॑ । द्यावा॑पृथि॒वी इति॑ । हु॒वे॒म॒ । देवाः॑ । ध॒त्त । र॒यिम् । अ॒स्मे इति॑ । सु॒ऽवीर॑म् ॥१०

एव । नः । सोम । परिऽसिच्यमानः । वयः । दधत् । चित्रऽतमम् । पवस्व ।

अद्वेषे इति । द्यावापृथिवी इति । हुवेम । देवाः । धत्त । रयिम् । अस्मे इति । सुऽवीरम् ॥१०

अयं प्रत्यक्षकृतः । हे "सोम “दधत् प्रयच्छंस्त्वं परिषिच्यमानः परितोऽद्भिर्गोभिर्वा सिच्यमानः “एव “चित्रतमं चित्रं नानाविधं चायनीयतमं वा “वयः अन्नं "नः अस्मभ्यं “पवस्व प्रापय । प्रयच्छेति यावत् । किंच “अद्वेषे द्वेषरहिते “द्यावापृथिवी द्यावापृथिव्यौ "हुवेम हविष्प्रदानार्थं वयमाह्वयेम । हे "देवाः यूयं च "सुवीरम् । वीरः कर्मणि समर्थः पुत्रः । तादृशपुत्रोपेतं "रयिं धनम् “अस्मे अस्मासु “धत्त निधत्त ॥ ॥ २० ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.६९

दे. पवमानः सोमः। जगती, ९-१० त्रिष्टुप्

इषुर्न धन्वन्प्रति धीयते मतिर्वत्सो न मातुरुप सर्ज्यूधनि ।

उरुधारेव दुहे अग्र आयत्यस्य व्रतेष्वपि सोम इष्यते ॥१॥

उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि ।

पवमानः संतनिः प्रघ्नतामिव मधुमान्द्रप्सः परि वारमर्षति ॥२॥

अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेरृतं यते ।

हरिरक्रान्यजतः संयतो मदो नृम्णा शिशानो महिषो न शोभते ॥३॥

उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।

अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ॥४॥

अमृक्तेन रुशता वाससा हरिरमर्त्यो निर्णिजानः परि व्यत ।

दिवस्पृष्ठं बर्हणा निर्णिजे कृतोपस्तरणं चम्वोर्नभस्मयम् ॥५॥

सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते ।

तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन ॥६॥

सिन्धोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत ।

शं नो निवेशे द्विपदे चतुष्पदेऽस्मे वाजाः सोम तिष्ठन्तु कृष्टयः ॥७॥

आ नः पवस्व वसुमद्धिरण्यवदश्वावद्गोमद्यवमत्सुवीर्यम् ।

यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः ॥८॥

एते सोमाः पवमानास इन्द्रं रथा इव प्र ययुः सातिमच्छ ।

सुताः पवित्रमति यन्त्यव्यं हित्वी वव्रिं हरितो वृष्टिमच्छ ॥९॥

इन्दविन्द्राय बृहते पवस्व सुमृळीको अनवद्यो रिशादाः ।

भरा चन्द्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः ॥१०॥

सायणभाष्यम्

'इषुर्न' इति दशर्चं द्वितीयं सूक्तमाङ्गिरसस्य हिरण्यस्तूपस्यार्षं पवमानसोमदेवताकम् । नवमीदशम्यौ त्रिष्टुभौ । शिष्टा जगत्यः । तथा चानुक्रान्तम् - ' इषुर्न हिरण्यस्तूपोऽन्त्ये त्रिष्टुभौ ' इति । गतो विनियोगः ।।

इषु॒र्न धन्व॒न्प्रतिं धीयते म॒तिर्व॒त्सो न मा॒तुरुपं स॒र्ज्यूधंनि ।

उ॒रुधांरेव दुहे॒ अग्रं आय॒त्यस्यं व्र॒तेष्वपि॒ सोमं इष्यते ॥१

इषुः । न । धन्वंन् । प्रतिं । धी॒य॒ते॒ । म॒तिः । व॒त्सः । न ।
मा॒तुः । उपं । स॒र्जि॒ । ऊधंनि ।

उ॒रुधांराऽइव । दु॒ह॒े । अग्रें । आ॒ऽय॒ती । अस्यं । व्र॒तेषुं ।
अपिं । सोमः । इ॒ष्य॒ते॒ ॥१

इषुः । न । धन्वन् । प्रति । धीयते । मतिः । वत्सः । न ।
मातुः । उप । सर्जि । ऊधनि ।

उरुधाराऽइव । दुहे । अग्रे । आऽयती । अस्य । व्रतेषु ।
अपि । सोमः । इष्यते ॥१

अस्मिन् पवमानरूप इन्द्रे "मतिः मननीयास्मदीया स्तुतिः "प्रति "धीयते अस्माभिर्निधीयते वा। दधाते रूपम्। तत्र दृष्टान्तः । "इषुर्न यथेषुः शरः "धन्वन् धनुषि प्रति धीयते तद्वत् । किंच "ऊधनि सर्वस्य पोषयितृत्वेनोधःस्थानीय इन्द्रे सोमो मदार्थमस्माभिः "उप "सर्जि उपसृज्यते ।

कथमिव । "मातुः गोः “ऊधनि पयोधारके “वत्सो “न वत्सो यथा पयःपानार्थं सृज्यते तद्वत् । “उरुधारेव बहुविधपयोधारा गौरिव “अग्रे वत्सस्य पुरतः “आयती गच्छन्ती सती पयः “दुहे दुग्धे तथा सोऽयमिन्द्रो वत्सभूतेभ्यः स्तोतृभ्यः पुरतो गच्छन् बहुविधान् कामान् दुग्धे। किंच “अस्य एतादृशस्य “व्रतेष्वपि "सोम इष्यते यष्टृभिः प्रेर्यते खलु ॥

उपो॑ म॒तिः पृ॒च्यते॑ सि॒च्यते॒ मधु॑ म॒न्द्राज॑नी चोदते अ॒न्तरा॒सनि॑ ।

पव॑मानः सं॒त॒निः प्र॑घ्न॒तामि॑व॒ मधु॑मान्द्र॒प्सः परि॒ वार॑मर्षति ॥२

उपो॒ इति॑ । म॒तिः । पृ॒च्यते॑ । सि॒च्यते॑ । मधु॑ । म॒न्द्र॒ऽअज॑नी । चो॒द॒ते॒ । अ॒न्तः । आ॒सनि॑ ।

पवंमानः । स॒म्ऽत॒निः । प्र॒घ्न॒ताम्ऽइंव । मधुंऽमान् । द्र॒प्सः । परिं । वारंम् । अ॒र्ष॒ति॒ ॥२

उपो इति । मतिः । पृच्यते । सिच्यते । मधु । मन्द्रऽअजनी । चोदते । अन्तः । आसनि ।

पवमानः । सम्ऽतनिः । प्रघ्नताम्ऽइव । मधुऽमान् । द्रप्सः । परि । वारम् । अर्षति ॥२

अस्मिन् पवमानरूप इन्द्रे "मतिः स्तुतिः “उपो “पृच्यते उपपृच्यते स्तोतृभिः संयोज्यते । ‘ पृची संपर्के'। तथा “मधु मदकरः सोमः इन्द्रार्थं “सिच्यते अद्भिः यवसक्तुभिश्च सिक्तो भवति । ततश्च "मन्द्राजनी। अज गतिक्षेपणयोः' इत्यस्य ल्युटि ङीपि रूपम्। मदकरस्य रसस्य प्रेरयित्री सोमधारा तस्येन्द्रस्य “आसनि आस्ये “अन्तः मध्ये “चोदते यष्टृभिः प्रेर्यते । आस्यशब्दस्य ‘ पद्दन्नोमास्°' इत्यादिना आसन्नित्यादेशः । किंच “संतनिः ग्रहादिषु सम्यग्विस्तृतः

"मधुमान् मदकररसवान् "पवमानः पूयमानः सोमः “द्रप्सः द्रुतगमनशीलो यद्वा क्षिप्रंहननशीलः सन् “वारम् अविवालमयं पवित्रं परितः "अर्षति आगच्छति । तत्र दृष्टान्तः । “प्रघ्नतामिव । प्रकर्षेण हन्तॄणां योद्धॄणां संतनिः सम्यग्विसृष्टः शरो यथा शीघ्रं प्राप्यमभितो गच्छति तद्वत् ॥

अव्यें वधूयुः पंवते परिं त्वचि श्रंथ्नीते नप्तीरदिंतेर्ऋतं यते ।

हरिंरक्रान्यजतः संयतो मदों नृम्णा शिशांनो महिषो न शोंभते ॥३

अव्यें । वधूऽयुः । पवते । परिं । त्वचि । श्रथ्नीते । नप्तीः । अदिंतेः । ऋतम् । यते ।

हरिः॑ । अ॒क्रा॒न् । य॒ज॒तः । स॒म्ऽय॒तः । मदः॑ । नृ॒म्णा । शिशा॑नः । म॒हि॒षः । न । शो॒भ॒ते॒ ॥३

अव्ये । वधूऽयुः । पवते । परि । त्वचि । श्रथ्नीते । नप्तीः । अदितेः । ऋतम् । यते ।

हरिः । अक्रान् । यजतः । सम्ऽयतः । मदः । नृम्णा । शिशानः । महिषः । न । शोभते ॥३

“वधूयुः । वधूभूता वसतीवर्य एकधनासहिता आपः । तद्वान् सोमः "अव्ये अवेः स्वभूते “त्वचि चर्मणि "परि “पवते परितो वर्तते पूतो भवति वा । किंच "नप्तीः नप्त्रीः । नप्तृशब्दश्चतुर्थापत्यवाची । सोमस्य नप्त्रीः । सोमो ह्योषधीनामग्रे रेतो निषिञ्चति । ‘प्रजापते रेतो देवा देवानां रेतो वर्षं वर्षस्य रेत ओषधयः' (ऐ. आ. २.१.३) इति श्रुतेः । यद्वा । नप्तृशब्दोऽपत्यवाची । तस्यापत्यानि । सोमः सुधामयैः स्वकिरणैरोषधीर्वर्धयति ।

तस्मादपत्यभूताः। “अदितेः। पृथिवीनामैतत् । अदीनायाः पृथिव्या उत्पन्ना ओषधीः “ऋतं सत्यरूपं यज्ञं "यते गच्छते यजमानाय “श्रथ्नीते अग्रभागे फलिनीः कर्तुं विश्लेषयति । किंच "हरिः हरितवर्णः "यजतः सर्वैर्यष्टव्यः अत एव "संयतः ग्रहादिषु संगृहीतः "मदः। माद्यत्यनेनेति मदः सोमः । तादृशः “अक्रान् क्रामति । पात्रेष्ववतिष्ठते । यद्वा । शत्रूनतिक्रामति । क्रमेर्लुङि तिपि 'बहुलं छन्दसि' इति इडागमाभावाद्वृद्धौ कृतायां सिज्लोपे सति हल्ङ्यादिना तिपो लोपे 'मो नो धातोः' इति नत्वे कृते रूपम् । अत एव सोमः "नृम्णा स्वबलानि “शिशानः तीक्ष्णीकुर्वन् । अथवा शत्रुबलानि तनूकुर्वन् । "महिषो "न । महन्नामैतत् । महानिव सर्वत्र व्याप्त इव "शोभते स्वतेजसा सर्वत्र दीप्यते । यद्वा । नः संप्रत्यर्थे । इदानीमेवंगुणयुक्तो महान् सोमः शोभत इति ॥

उ॒क्षा मिं॑माति॒ प्रति॑ यंति धे॒नवो॑ दे॒वस्यं॑ दे॒वीरुपं॑ यंति
निष्कृ॒तं ।

अत्यं॑क्रमी॒दर्जु॑न॒ं वारं॑म॒व्यय॒मत्कं॒ न नि॒क्तं परि॒ सोमो॑
अव्यत ॥४

उ॒क्षा । मि॒मा॒ति॒ । प्रति॑ । य॒न्ति॒ । धे॒नवः॑ । दे॒वस्यं॑ । दे॒वीः ।
उपं॑ । य॒न्ति॒ । निः॒ऽकृ॒तम् ।

अति॑ । अ॒क्र॒मी॒त् । अर्जु॑नम् । वारं॑म् । अ॒व्ययं॑म् । अत्कं॑म्
। न । नि॒क्तम् । परि॑ । सोमः॑ । अ॒व्य॒त॒ ॥४

उक्षा । मिमाति । प्रति । यन्ति । धेनवः । देवस्य । देवीः ।
उप । यन्ति । निःऽकृतम् ।

अति । अक्रमीत् । अर्जुनम् । वारम् । अव्ययम् । अत्कम्
। न । निक्तम् । परि । सोमः । अव्यत ॥४

“उक्षा रेतसः सेक्ता वृषभः पुरतः “मिमाति शब्दायते । 'माङ् माने शब्दे च ' । तं वृषभं “धेनवः गावः “प्रति "यन्ति अनुगच्छन्ति । तथा “देवस्य द्योतमानस्य “निष्कृतं संस्कृतं स्थानं “देवीः देव्यः “उप "यन्ति उपगच्छन्ति । अनेनार्धेन सोमस्तुतिश्चाभिधीयते । सोमः सन् द्रोणकलशाभिगमनकाले शब्दं करोति। तमनु धेनवः प्रीणयित्र्यः स्तुतयः पारियन्ति देवस्य स्थानं स्तुतयोऽभिगच्छन्ति । तथा सोऽयं सोमः "अर्जुनं श्वेतवर्णम् "अव्ययम् अविमयमविस्वभूतं "वारं वालं पवित्रम् "अत्यक्रमीत् अतिक्रामति । अतिक्रम्य पात्राणि गच्छतीत्यर्थः । किंच "सोमः "अत्कं "न आत्मीयं कवचमिव "निक्तम् उज्ज्वलं श्रयणद्रव्यं "परि "अव्यत परितः संवृणोति ॥

अमृ॑क्तेन॒ रुश॑ता॒ वास॑सा॒ हरि॒रम॑र्त्यो नि॒र्णिजा॒नः परि॑ व्यत

।

दि॒वस्पृ॒ष्ठं ब॒र्हणा॑ नि॒र्णिजे॑ कृतोप॒स्तर॑णं च॒म्वो॑र्नभ॒स्मयं॑ ॥५

अमृ॑क्तेन । रुश॑ता । वास॑सा । हरिः॑ । अम॑र्त्यः ।
निः॒ऽनि॒जा॒नः । परि॑ । व्य॒त॒ ।

दि॒वः । पृ॒ष्ठम् । ब॒र्हणा॑ । निः॒ऽनिजे॑ । कृ॒त॒ । उ॒प॒ऽस्तर॑णम्
। च॒म्वोः॑ । न॒भ॒स्मय॑म् ॥५

अमृक्तेन । रुशता । वाससा । हरिः । अमर्त्यः ।
निःऽनिजानः । परि । व्यत ।

दिवः । पृष्ठम् । बर्हणा । निःऽनिजे । कृत । उपऽस्तरणम्
। चम्वोः । नभस्मयम् ॥५

"अमर्त्यः मनुष्यधर्मरहितः "हरिः हरितवर्णः सोमः
“निर्णिजानः उदकेन शोध्यमानः सन् “अमृक्तेन । ‘मृजी

शौचालंकारयोः' । अनिर्णिक्तेनापि “रुशता स्वतः शुक्लवर्णेन पयोरूपेण “वाससा “परि “व्यत परित आच्छादयति । सोमे परिपूते गव्येन पयसा मिश्रीकुर्वन्ति खलु । तदुच्यते । ततः सोऽयं सोमः “दिवः द्युलोकस्य "पृष्ठं पृष्ठभागे तिष्ठन्तमादित्यं "बर्हणा बर्हणाय पापानामुद्यमनकारिणे पापनाशिने “निर्निजे निर्नेजनाय परिपवनाय “कृत द्युलोकेऽकार्षीत् । स हि स्वदीप्त्या सर्वं निर्णेक्ति । कृत । कृणोतेर्लुङि ‘ह्रस्वात्' इति सिचो लोपः । तदेवाह । "चम्वोः । द्यावापृथिवीनामैतत् । चमन्ति भक्षयन्त्यत्र देवा मनुष्या इति । तयोः "उपस्तरणम् आच्छादनशीलं "नभस्मयम् आदित्यमयमादित्यस्य स्वभूतं तेजश्च सर्वेषां निर्णेजनाय अकार्षीत् ॥ ॥ २१ ॥

सूर्य॑स्येव र॒श्मयो॑ द्रावयि॒त्नवो॑ मत्स॒रासः॑ प्र॒सुपः॑ सा॒कमी॑रते ।

तंतुं त॒तं परि॒ सर्गा॑स आ॒शवो॒ नेंद्रा॑दृ॒ते पं॑वते॒ धाम॒ किं च॒न ॥६

सूर्य॑स्यऽइव । र॒श्मयः॑ । द्र॒व॒यि॒त्नवः॑ । म॒त्स॒रासः॑ । प्र॒ऽसुपः॑ । सा॒कम् । ई॒र॒ते॒ ।

तन्तु॑म् । त॒तम् । परि॑ । सर्गा॑सः । आ॒शवः॑ । न । इन्द्रा॑त् । ऋ॒ते । प॒व॒ते॒ । धाम॑ । किम् । च॒न ॥६

सूर्यस्यऽइव । रश्मयः । द्रवयित्नवः । मत्सरासः । प्रऽसुपः । साकम् । ईरते ।

तन्तुम् । ततम् । परि । सर्गासः । आशवः । न । इन्द्रात् । ऋते । पवते । धाम । किम् । चन ॥६

“सूर्यस्य "रश्मयः सर्वस्य प्रेरकस्य सुवीर्यस्य वादित्यस्य रश्मयः सर्वतो व्यापकाः किरणाः “इव “द्रावयित्नवः सर्वत्रद्रवणशीलाः “मत्सरासः मदकराः "प्रसुपः शत्रूणां

प्रस्वापका हन्तारः “आशवः ग्रहेषु चमसेषु च व्याप्ताः "सर्गासः सृज्यमानाः सोमाः “ततं विस्तृतं "तन्तुं तन्तुभिः कृतं वस्त्रं “साकं सह युगपत् "परि “ईरते परितो गच्छन्ति । ते सोमाः "इन्द्रादृते इन्द्रं वर्जयित्वा अन्यत् "किं “चन “धाम देवशरीरं लक्षीकृत्य “न “पवते न गच्छति। एकवचनं छान्दसम् । न गच्छन्ति । किंत्विन्द्रस्यैव धाम प्रति गच्छन्ति । इन्द्रस्य धाम्नो यष्टव्यत्वं च ' अयाळिन्द्रस्य प्रिया धामानि ' (वा. सं. २१.४७) इति मन्त्रवर्णादवगम्यते ॥

सिंधोॅरिव प्रव॒णे नि॒म्न आ॒शवो॒ वृषंच्युता॒ मदांसो गा॒तुमांशत ।

शं नों निवे॒शे द्वि॒पदे॒ चतुंष्पदे॒ऽस्मे वाजाः॑ सोम तिष्ठंतु कृ॒ष्टयः॑ ॥७

सिन्धोः॑ऽइव । प्र॒व॒णे । नि॒म्ने । आ॒शवः॑ । वृष॑ऽच्युताः ।
मदा॑सः । गा॒तुम् । आ॒श॒त॒ ।

शम् । नः॒ । नि॒ऽवे॒शे । द्वि॒ऽपदे॑ । चतुः॑ऽपदे । अ॒स्मे इति॑ ।
वाजाः॑ । सो॒म॒ । ति॒ष्ठ॒न्तु॒ । कृ॒ष्टयः॑ ॥७

सिन्धोःऽइव । प्रवणे । निम्ने । आशवः । वृषऽच्युताः ।
मदासः । गातुम् । आशत ।

शम् । नः । निऽवेशे । द्विऽपदे । चतुःऽपदे । अस्मे इति ।
वाजाः । सोम । तिष्ठन्तु । कृष्टयः ॥७

“वृषच्युताः । वृष हिंसासंक्लेशनदानेष्वपि । वृषभिः सोमस्य दातृभिर्ऋत्विग्भिश्च्युनदताः परिस्रुताः “मदासः मदकारिणः सोमाः स्तुतिभिः प्राप्तव्य इन्द्रे “गातुं गमनम् "आशत प्राप्नुवन्ति । तत्र दृष्टान्तः । "सिन्धोरिव “प्रवणे । प्रगच्छन्त्युदकानि यत्रेति तत्प्रवणम् । तस्मिन् “निम्ने

स्थले सिन्धोर्नद्याः “आशवः व्याप्ता आपो यथा गच्छन्ति तद्वत् । अथ प्रत्यक्षः। हे “सोम “नः अस्माकं “निवेशे स्वगृहं प्रति प्रवेशने निर्गमने वा “द्विपदे पुत्रादिकाय "चतुष्पदे गवादिकाय पशवे “शं सुखं कुरु । किंच हे सोम “अस्मे अस्मासु “वाजाः अन्नानि “कृष्टयः पुत्रादिकाः प्रजाश्च “तिष्ठन्तु । अन्नादिकं देहीत्यर्थः ॥

आ नः॑ पवस्व॒ वसु॑म॒द्धिर॑ण्यव॒दश्वा॑व॒द्गोम॒द्यव॑मत्सु॒वीर्यं॑ ।

यू॒यं हि सो॑म पि॒तरो॒ मम॒ स्थन॑ दि॒वो मू॒र्धानः॒ प्रस्थि॑ता वय॒स्कृतः॑ ॥८

आ । नः॒ । प॒व॒स्व॒ । वसु॑ऽमत् । हिर॑ण्यऽवत् । अश्व॑ऽवत् । गोऽमं॑त् । यव॑ऽमत् । सु॒ऽवीर्य॑म् ।

यू॒यम् । हि । सो॒म॒ । पि॒तरः॑ । मम॑ । स्थन॑ । दि॒वः । मू॒र्धानः॑ । प्र॒ऽस्थि॑ताः । व॒य॒ःऽकृतः॑ ॥८

आ । नः । पवस्व । वसुऽमत् । हिरण्यऽवत् । अश्वऽवत् । गोऽमत् । यवऽमत् । सुऽवीर्यम् ।

यूयम् । हि । सोम । पितरः । मम । स्थन । दिवः । मूर्धानः । प्रऽस्थिताः । वयःऽकृतः ॥८

हे सोम त्वं "वसुमत् वसुयुक्तं “हिरण्यवत् कनकादिसहितम् "अश्ववत् “गोमत् गवाश्वसहितं “यवमत् । यवो नाम धान्यविशेषः। धान्यविशिष्टं "सुवीर्यं शोभनवीर्योपेतं धनं "नः अस्मभ्यम् “आ “पवस्व आप्रापय । प्रयच्छेति यावत् । किंच हे "सोम यतस्त्वं मम पितॄणामङ्गिरसामपि पितासि ततो "यूयम् एव “मम "पितरः "स्थन भवथ । पितृबहुत्वमत्र सोमस्याभिधीयते । कीदृशाः । “दिवः द्युलोकस्य "मूर्धानः मूर्धवदुच्छ्रिताः ।

कर्मभिः स्वर्गादिकमलभन्तेत्यर्थः । "प्रस्थिताः सर्वदा कर्मकरणार्थं स्थिताः “वयस्कृतः हवीरूपस्यान्नस्य कर्तारः । तादृशा मम पितरस्त्वं भवसि ।।

ए॒ते सोमा॒ः पव॑मानास॒ इंद्र॒ं रथा॑ इव॒ प्र य॑युः सा॒तिमच्छ॑ ।

सु॒ताः प॒वित्र॒मति॑ य॒ंत्यव्य॑ं हि॒त्वी व॒व्रिं ह॒रितो॑ वृ॒ष्टिमच्छ॑ ॥९

ए॒ते । सोमा॑ः । पव॑मानासः । इन्द्र॑म् । रथा॑ःऽइव । प्र ।
य॒यु॒ः । सा॒तिम् । अच्छ॑ ।

सु॒ताः । प॒वित्र॑म् । अति॑ । य॒न्ति॒ । अव्य॑म् । हि॒त्वी ।
व॒व्रिम् । ह॒रित॑ः । वृ॒ष्टिम् । अच्छ॑ ॥९

एते । सोमाः । पवमानासः । इन्द्रम् । रथाःऽइव । प्र ।
ययुः । सातिम् । अच्छ ।

सुताः । पवित्रम् । अति । यन्ति । अव्यम् । हित्वी । वव्रिम् । हरितः । वृष्टिम् । अच्छ ॥९

"पवमानासः पवित्रेण पूयमानाः "एते अस्मदीयाः "सोमाः "सातिम् । 'षण संभक्तौ । कर्मणि क्तिन् । सर्वैः संभजनीयम् "इन्द्रम् "अच्छ "प्र "ययुः प्रकर्षेण गच्छन्ति । तत्र दृष्टान्तः । "रथाइव । इन्द्रस्य रथा यथा "सातिम् । 'षो अन्तकर्मणि' । ऊतियूति' इत्यादिना निपातितः । सीयते म्रियतेऽस्मिन्निति सातिः संग्रामः । तमच्छ तं प्रति प्रगच्छन्ति तद्वत् । किंच "सुताः ग्रावभिरभिषुताः सोमाः "अव्यम् अविवालभवं "पवित्रम् "अति "यन्ति अतीत्य गच्छन्ति । तेऽमी "हरितः हरितवर्णा अश्वाः । यद्वा । हरितस्त आदित्यवाहनरूपा अश्वा भूत्वा । "वव्रिम् । वृणोति शरीरमिति वव्रिर्जरा । ' आदृगमहन *इति किप्रत्ययः । सर्वाङ्गव्यापिनीं जरां "हित्वी हित्वा तरुणाः सन्तः "वृष्टिमच्छ वृष्टिं गमयितुं गच्छन्ति । हित्वी।*

‘जहातेश्च क्त्वि’ (पा. सू. ७.४. ४३) इति ह्यादेशः । ‘स्नात्व्यादयश्च’ इति छन्दसि निपातितम् ॥

इंद॒विंद्रा॑य बृह॒ते पं॑वस्व सुमृळी॒को अं॑नव॒द्यो रि॒शादाः॑ ।

भरां च॒न्द्राणिं गृण॒ते वसूंनि दे॒वैर्द्यांवापृथिवी॒ प्राव॑तं नः ॥ १०

इन्दो॒ इतिं । इन्द्रा॑य । बृ॒ह॒ते । प॒व॒स्व॒ । सु॒ऽमृ॒ळी॒कः । अ॒न॒व॒द्यः । रि॒शादाः॑ ।

भरं । च॒न्द्राणिं । गृ॒ण॒ते । वसूं॑नि । दे॒वैः । द्या॒वा॒पृ॒थि॒वी॒ इतिं । प्र । अ॒व॒त॒म् । न॒ः ॥१०

इन्दो इति । इन्द्राय । बृहते । पवस्व । सुऽमृळीकः । अनवद्यः । रिशादाः ।

भर । चन्द्राणि । गृणते । वसूनि । देवैः । द्यावापृथिवी इति । प्र । अवतम् । नः ॥१०

हे “इन्दो सोम त्वं “बृहते महते “इन्द्राय तदर्थं "पवस्व पात्रेषु क्षर । इन्द्र प्रत्यागच्छ वा । कीदृशः । "सुमृळीकः इन्द्रस्य सुष्ठु सुखयिता अत एव "अनवद्यः गर्हारहितः "रिशादाः रिशतां बाधकानामसिता । एतादृशस्त्वमिन्द्राय पवस्व । किंच “गृणते स्तुवते मह्यं "चन्द्राणि आह्लादकानि “वसूनि धनानि "भर प्रयच्छ। किंच हे "द्यावापृथिवी युवां च पवमानेन परिप्लुते सत्यौ “देवैः सुभगैर्धनैः सह “नः अस्मान् "प्रावतं प्ररक्षतम् ॥ ॥ २२ ॥

टिप्पणी

९.६९.६ सूर्यस्येव रश्मयो इति

वाजजित् (https://sa.wikisource.org/s/2hvk)

मण्डल ९

सूक्तं ९.१	सूक्तं ९.३१	सूक्तं ९.६१	सूक्तं ९.९१
सूक्तं ९.२	सूक्तं ९.३२	सूक्तं ९.६२	सूक्तं ९.९२
सूक्तं ९.३	सूक्तं ९.३३	सूक्तं ९.६३	सूक्तं ९.९३
सूक्तं ९.४	सूक्तं ९.३४	सूक्तं ९.६४	सूक्तं ९.९४
सूक्तं ९.५	सूक्तं ९.३५	सूक्तं ९.६५	सूक्तं ९.९५
सूक्तं ९.६	सूक्तं ९.३६	सूक्तं ९.६६	सूक्तं ९.९६
सूक्तं ९.७	सूक्तं ९.३७	सूक्तं ९.६७	सूक्तं ९.९७
सूक्तं ९.८	सूक्तं ९.३८	सूक्तं ९.६८	सूक्तं ९.९८
सूक्तं ९.९	सूक्तं ९.३९	सूक्तं ९.६९	सूक्तं ९.९९
सूक्तं ९.१०	सूक्तं ९.४०	सूक्तं ९.७०	सूक्तं ९.१००

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.७०

← सूक्तं ९.६९

ऋग्वेदः - मण्डल ९

सूक्तं ९.७०

रेणुर्वैश्वामित्रः

सूक्तं ९.७१ →

दे. पवमानः सोमः। जगती, १० त्रिष्टुप्

त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि ।

चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥१॥

स भिक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे ।

तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः ॥२॥

ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु ।

येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत ॥३॥

स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा ।

व्रतानि पानो अमृतस्य चारुण उभे नृचक्षा अनु पश्यते विशौ ॥४॥

स मर्मृजान इन्द्रियाय धायस ओभे अन्ता रोदसी हर्षते हितः ।

वृषा शुष्मेण बाधते वि दुर्मतीरादेदिशानः शर्यहेव शुरुधः ॥५॥

स मातरा न ददृशान उस्रियो नानददेति मरुतामिव स्वनः ।

जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ॥६॥

रुवति भीमो वृषभस्तविष्यया शृङ्गे शिशानो हरिणी विचक्षणः ।

आ योनिं सोमः सुकृतं नि षीदति गव्ययी त्वग्भवति निर्णिगव्ययी ॥७॥

शुचिः पुनानस्तन्वमरेपसमव्ये हरिर्न्यधाविष्ट सानवि ।

जुष्टो मित्राय वरुणाय वायवे त्रिधातु मधु क्रियते सुकर्मभिः ॥८॥

पवस्व सोम देववीतये वृषेन्द्रस्य हार्दि सोमधानमा विश ।

पुरा नो बाधाद्दुरिताति पारय क्षेत्रविद्धि दिश आहा विपृच्छते ॥९॥

हितो न सप्तिरभि वाजमर्षेन्द्रस्येन्दो जठरमा पवस्व ।

नावा न सिन्धुमति पर्षि विद्वाञ्छूरो न युध्यन्नव नो निद स्पः ॥१०॥

सायणभाष्यम्

‘ त्रिरस्मै ' इति दशर्चं तृतीयं सूक्तं वैश्वामित्रस्य रेणोरार्षम् । दशमी त्रिष्टुप् शिष्टा जगत्यः ।। पवमानः सोमो देवता । ' त्रिरस्मै रेणुः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

त्रिरंस्मै स॒प्त धे॒नवों दुदुह्रे स॒त्यामा॒शिरं पू॒र्व्ये व्योंमनि ।

च॒त्वार्य॒न्या भुवंनानि नि॒र्णिजे॒ चारूंणि चक्रे॒ यदृ॒तैरवंर्धत ॥
१

त्रिः । अ॒स्मै॒ । स॒प्त । धे॒नवः॑ । दु॒दु॒ह्रे॒ । स॒त्याम् । आ॒ऽशिरंम् । पू॒र्व्ये । विऽओंमनि ।

च॒त्वारिं । अ॒न्या । भुवं॑नानि । नि॒ःऽनिजें । चारू॑णि । च॒क्रे॒ । यत् । ऋ॒तैः । अवं॑र्धत ॥१

त्रिः । अस्मै । सप्त । धेनवः । दुदुह्रे । सत्याम् । आऽशिरम् । पूर्व्ये । विऽओमनि ।

चत्वारि । अन्या । भुवनानि । निःऽनिजे । चारूणि । चक्रे । यत् । ऋतैः । अवर्धत ॥१

“अस्मै पवमानाय “पूर्व्ये पूर्वैः कृते "व्योमनि । विविधमोमावनं गमनं देवानामत्रेति व्योम यज्ञः । तस्मिन् स्थिताय । यद्वा । प्रत्ने व्योमन्यन्तरिक्षे वर्तमानाय । "त्रिः "सप्त एकविंशतिसंख्याकाः “धेनवः प्रीणयित्र्यो गावः “सत्यां यथार्थभूताम् “आशिरम् आश्रयणसाधनं क्षीरादि “दुदुह्रे दुहन्ति । यद्वा । त्रिः सप्त द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः' (तै. सं.५.४.१२.२) इत्येतैः सर्वैः सह गोषु पय उत्पाद्यते

तद्भावो दुहन्त इति । किंचायं सोमः "अन्या अन्यानि "चत्वारि "भुवनानि उदकानि वसतीवरीस्तिस्रश्चैकधना इति तानि चतुःसंख्याकानि "चारूणि कल्याणान्युदकानि "निर्णिजे निर्णेजनाय परिशोधनाय परिपोषणाय वा "चक्रे । कदा करोति । "यत् यदा अयम् "ऋतैः यज्ञैः "अवर्धत वर्धितवान् तदा करोति ॥

स भिक्ष॑माणो अ॒मृत॑स्य॒ चारु॑ण उ॒भे द्यावा॒ काव्ये॑ना॒ वि श॑श्रथे ।

तेजि॑ष्ठा अ॒पो म॒हना॒ परि॑ व्यत॒ यदी॑ दे॒वस्य॒ श्रव॑सा॒ सदो॑ वि॒दुः ॥२

सः । भिक्ष॑माणः । अ॒मृत॑स्य । चारु॑णः । उ॒भे इति॑ । द्यावा॑ । काव्ये॑न । वि । श॒श्र॒थे॒ ।

तेजिंष्ठाः । अ॒पः । म॒हना । परिं । व्य॒त॒ । यदिं । दे॒वस्यं । श्रवंसा । सदः॑ । वि॒दुः ॥२

सः । भिक्षमाणः । अमृतस्य । चारुणः । उभे इति । द्यावा । काव्येन । वि । शश्रथे ।

तेजिष्ठाः । अपः । मंहना । परि । व्यत । यदि । देवस्य । श्रवसा । सदः । विदुः ॥२

“सः पवमानः “चारुणः कल्याणस्य “अमृतस्य उदकस्य । ‘क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानसंज्ञा । चतुर्थ्यर्थे बहुलम्' (पा. सू. २.३.६२) इति षष्ठी । चारूदकं “भिक्षमाणः यष्टृभिर्याच्यमानः सन् "उभे । द्यावादेशस्य द्वंद्वे विहितत्वादत्रोत्तरपदाभावे द्वंद्वः प्रतीयते । उभे द्यावापृथिव्यौ “काव्येन कविकर्मणा “वि “शश्रथे विवृते करोति । यज्ञनिमित्तेन उदकेन संपूरयतीत्यर्थः । किंच "तेजिष्ठाः अतिशयेन दीप्तानि “अपः उदकानि "मंहना

महत्त्वेन “परि “व्यत वरणार्थं परित आच्छादयति । “यदि यदा ऋत्विजः “देवस्य द्योतमानस्य सोमस्य “सदः स्थानं “श्रवसा हविषा युक्ताः सन्तः “विदुः यागार्थं जानन्ति लभन्ते तदा परित आवृणोतीति । ‘ विद ज्ञाने'।' सिजभ्यस्त°' इति झेर्जुसादेशः ॥

ते अ॑स्य सन्तु के॒तवोऽमृ॑त्य॒वोऽदा॑भ्यासो ज॒नुषी॑ उ॒भे अनु॑ ।

येभि॑र्नृ॒म्णा च॑ दे॒व्या॑ च पुन॒त आदिद्राजा॑नं म॒नना॑ अगृभ्णत ॥३

ते । अ॒स्य॒ । स॒न्तु॒ । के॒तवः॑ । अमृ॑त्यवः । अदा॑भ्यासः । ज॒नुषी॒ इति॑ । उ॒भे इति॑ । अनु॑ ।

येभि॑ः । नृ॒म्णा । च॒ । दे॒व्यां॑ । च॒ । पु॒न॒ते । आत् । इत् ।
राजा॑नम् । म॒नना॑ः । अ॒गृ॒भ्ण॒त॒ ॥३

ते । अस्य । सन्तु । केतवः । अमृत्यवः । अदाभ्यासः ।
जनुषी इति । उभे इति । अनु ।

येभिः । नृम्णा । च । देव्या । च । पुनते । आत् । इत् ।
राजानम् । मननाः । अगृभ्णत ॥३

“अस्य एतादृशस्य सोमस्य "केतवः प्रज्ञापकाः सर्वैश्चायनीयाः “अमृत्यवः मरणधर्मरहिता अत एव “अदाभ्यासः । दभेश्चेति वक्तव्यम्' (पा. सू. ३. १. १२४. ३) इति ण्यत् । परैरहिंस्याः “ते तादृशाः अस्य रश्मयः “उभे “जनुषी जन्मनी स्थावरजङ्गमात्मके द्वे “अनु लक्षीकृत्य “सन्तु रक्षन्तु । ओषधीनामयं सोमो रेतो निषिञ्चति यज्ञे मनुष्याणां च धाराः स्रवन्ति खलु । सोऽयं “येभिः यैः केतुभिः "नृम्णा नृम्णानि बलानि “देव्या

देवार्हाणि "च अन्नानि "पुनते प्रेरयति "आदित् अभिषवानन्तरमेव "राजानं सोमं "मनना: मननीया: स्तुतय: "अगृभ्णत परिगृह्णन्ति । प्राप्नुवन्तीत्यर्थः । ' हृग्रहोः' इति भकारः ॥

स मृ॒ज्यमा॑नो द॒शभि॑ः सु॒कर्म॑भि॒ः प्र म॑ध्य॒मासु॑ मा॒तृषु॑ प्र॒मे सचा॑ ।

व्र॒तानि॑ पा॒नो अ॒मृत॑स्य॒ चारु॑ण उ॒भे नृ॒चक्षा॒ अनु॑ पश्यते॒ विशौ॑ ॥४

सः । मृ॒ज्यमा॑नः । द॒शऽभि॑ः । सु॒कर्म॑ऽभिः । प्र । म॒ध्य॒मासु॑ । मा॒तृषु॑ । प्र॒ऽमे । सचा॑ ।

व्र॒तानि॑ । पा॒नः । अ॒मृत॑स्य । चारु॑णः । उ॒भे इति॑ । नृ॒ऽचक्षाः॑ । अनु॑ । प॒श्य॒ते॒ । विशौ॑ ॥४

सः । मृज्यमानः । दशऽभिः । सुकर्मऽभिः । प्र । मध्यमासु । मातृषु । प्रऽमे । सचा ।

व्रतानि । पानः । अमृतस्य । चारुणः । उभे इति । नृऽचक्षाः । अनु । पश्यते । विशौ ॥४

"सः पवमानः “सुकर्मभिः शोभनकर्मयुक्ताभिः "दशभिः दशसंख्याकाभिरङ्गुलीभिः “मृज्यमानः सः “सचा ‘अग्नौ प्रास्ताहुतिः' इत्यादिक्रमेणापां सहायः “प्रमे लोकान् प्रमातुं “मध्यमासु अन्तरिक्षस्थितासु अवतिष्ठते ॥ प्रमे । प्रपूर्वान्मातेः क्विपि ङयि ‘आतः' इति योगविभागादाकारलोपः ॥ किंच “नृचक्षाः नृणां द्रष्टा पवमानः “चारुणः कल्याणस्य “अमृतस्य उदकस्य वृष्ट्यर्थं “व्रतानि यागादिकर्माणि “पानः रक्षन् “उभे “विशौ मनुष्यान् देवांश्चान्तरिक्षेण गच्छन् “अनु “पश्यते

अनुपश्यति । मनुष्यानभिमतदानेन देवान् हविष्प्रदानेनेति ।।

स मंर्मृजा॒न इं॒न्द्रि॒याय॒ धायंस॒ ओभे अ॒न्ता रोदंसी हर्षते हि॒तः ।

वृषा॒ शुष्मेंण बाधते॒ वि दुंर्म॒तीरा॒देदिंशानः शर्य॒हेवं शु॒रुधः॑ ॥५

सः । म॒र्मृ॒जा॒नः । इ॒न्द्रि॒याय॑ । धाय॑से । आ । उ॒भे इति॑ । अ॒न्तरिति॑ । रोदं॑सी॒ इति॑ । ह॒र्ष॒ते॒ । हि॒तः ।

वृषां । शुष्मेंण । बा॒ध॒ते॒ । वि । दुः॒ऽम॒तीः । आ॒देदिंशानः । श॒र्य॒हाऽइं॑व । शु॒रुधः॑ ॥५

सः । मर्मृजानः । इन्द्रियाय । धायसे । आ । उभे इति । अन्तरिति । रोदसी इति । हर्षते । हितः ।

वृषा । शुष्मेण । बाधते । वि । दुःऽमतीः । आदेदिशानः । शर्यहाऽइव । शुरुधः ॥५

“मर्मृजानः पवित्रेण मृज्यमानः “सः पवमानः “धायसे जगतो धारकाय “इन्द्रियाय इन्द्रस्य पर्याप्ताय बलाय तदर्थम् “उभे “रोदसी। ‘ कालाध्वनोः' इति द्वितीया । उभयोः द्यावापृथिव्योः “अन्तः “हितः मध्ये वर्तमानः सन् “आ “हर्षते सर्वतो गच्छति । इन्द्रस्य हि सोमेन बलं भवति । “वृषा कामानामुदकानां वा वर्षकः सोऽयं “शुष्मेण शोषकेण बलेन “दुर्मतीः दुष्टबुद्धीनसुरान् “वि “बाधते विशेषेण पीडयति । किं कुर्वन् । “शुरुधः । शुचा रुन्धन्ति परानिति । पृषोदरादिः । दुःखकारिणोऽसुरान् “आदेदिशानः पुनःपुनराह्वयन् हन्ति । तत्र दृष्टान्तः। “शर्यहेव । हननसाधनैः इषुभिर्हन्ता वीरः प्रतिभटान् यथा हिनस्ति तद्वत् ॥ ॥ २३ ॥

स मा॒तरा॒ न दर्दृशान उ॒स्रियो॒ नानं॑ददेति म॒रुता॑मिव स्व॒नः ।

जा॒नन्नृ॒तं प्र॑थ॒मं यत्स्व॑र्णर॒ं प्रश॑स्तये॒ कम॑वृणीत सु॒क्रतुः॑ ॥६

सः । मा॒तरा॑ । न । दर्दृशानः । उ॒स्रियः॑ । नानं॑दत् । ए॒ति॒ । म॒रुता॑म्ऽइव । स्व॒नः ।

जा॒नन् । ऋ॒तम् । प्र॒थ॒मम् । यत् । स्व॑ःऽनरम् । प्रऽश॑स्तये । कम् । अ॒वृ॒णी॒त॒ । सु॒ऽक्रतुः॑ ॥६

सः । मातरा । न । ददृशानः । उस्रियः । नानदत् । एति । मरुताम्ऽइव । स्वनः ।

जानन् । ऋतम् । प्रथमम् । यत् । स्वःऽनरम् । प्रऽशस्तये । कम् । अवृणीत । सुऽक्रतुः ॥६

“सः पवमानः “मातरा मातरौ द्यावापृथिव्यौ “ददृशानः पुनःपुनः पश्यन् ततः “नानदत् भृशं शब्दं कुर्वन् “एति सर्वत्र गच्छति । तत्र दृष्टान्तः । “उस्रियः “न । उस्रियेति गोनाम । तस्य स्वभूतो वत्सो यथा मातरं गां पश्यन् शब्दं करोति तद्वत् । किंच “मरुतामिव । यथा मरुतां गणः “स्वनः । पचाद्यजन्तः । स्वनं कुर्वन् सर्वतो गच्छति तद्वत् । “यत् उदकं “स्वर्णरम् । स्वरिति सर्वपर्यायः । सर्वमनुष्यहितं भवति । सर्वे हि मनुष्या उदके संगच्छन्ते तत्कार्यत्वात् । तादृशं “प्रथमं मुख्यम् “ऋतम् उदकं “जानन् विद्वान् “सुक्रतुः शोभनकर्मा सुप्रज्ञो वा स पवमानः “प्रशस्तये प्रशंसनायात्मस्तोत्रकरणाय "कं मनुष्यम् “अवृणीत समभजत । नान्यमस्मद्व्यतिरिक्तमित्यर्थः ॥

रु॒वति॑ भी॒मो वृ॑ष॒भस्त॑वि॒ष्यया॑ शृङ्गे॒ शिशा॑नो॒ हरि॑णी

विचक्ष॒णः ।

आ योनिं॒ सोम॒ः सुकृं॒तं नि षींदति ग॒व्ययी॒ त्वग्भंवति नि॒र्णिग॒व्ययीं ॥७

रु॒वतिं । भी॒मः । वृ॒ष॒भः । त॒वि॒ष्यया॑ । शृङ्गे॒ इतिं । शिशा॑नः । हरिं॑णी॒ इतिं । वि॒ऽच॒क्ष॒णः ।

आ । योनिं॑म् । सोमः॑ । सुऽकृं॑तम् । नि । सी॒द॒ति॒ । ग॒व्ययीं । त्वक् । भ॒व॒ति॒ । निः॒ऽनिक् । अ॒व्ययीं ॥७

रुवति । भीमः । वृषभः । तविष्यया । शृङ्गे इति । शिशानः । हरिणी इति । विऽचक्षणः ।

आ । योनिम् । सोमः । सुऽकृतम् । नि । सीदति । गव्ययी । त्वक् । भवति । निःऽनिक् । अव्ययी ॥७

“भीमः शत्रूणां भयंकरः “वृषभः कामानामुदकानां वा वर्षणः “विचक्षणः सर्वस्य विदर्शनशीलः स पवमानः “तविष्यया । तु इति वृद्ध्यर्थः । अस्मात् “ अच इः' (उ. सू. ४. १३८) इति इप्रत्ययः । तस्मादिच्छायामर्थे क्यच् । सर्वप्रातिपदिकेभ्यः (का. ७.१.५१.३) इति सुगागमः । आत्मनो बलेच्छया “हरिणी हरितवर्णे द्वे “शृङ्गे “शिशानः तीक्ष्णीकुर्वन् द्रोणकलशं प्रति द्वाभ्यां धाराभ्यां स्थाल्याग्रयणं गृह्णाति । तदुच्यते । ते धारारूपशृङ्गे तीक्ष्णीकुर्वन् “रुवति शब्दायते । ‘रु शब्दे'। ‘बहुलं छन्दसि' इति शः । ततः सः “सोमः “सुकृतं सुष्ठु कृतं “योनिं स्वस्थानं द्रोणकलशम् “आ “नि “षीदति समन्तात्तिष्ठति । तस्य सोमस्य “निर्णिक् निर्नेक्त्री परिशोधयित्री “गव्ययी गोमयी “त्वग्भवति । आनडुहे हि चर्मणि सोमाभिषवः । एवम् “अव्ययी अविमयी त्वक् च निर्नेक्त्री भवति । तद्धि दशापवित्रापेक्ष्यमभिहितम् ॥

शुचि॑ः पुना॒नस्त॒न्व॑मरे॒पस॒मव्ये॒ हरि॒र्न्य॑धाविष्ट॒ सान॑वि ।

जुष्टो॑ मि॒त्राय॒ वरु॑णाय वा॒यवे॑ त्रि॒धातु॒ मधु॑ क्रियते सु॒कर्म॑भिः ॥८

शुचि॑ः । पु॒ना॒नः । त॒न्व॑म् । अ॒रे॒पस॑म् । अव्ये॑ । हरि॑ः । नि । अ॒धा॒वि॒ष्ट॒ । सान॑वि ।

जुष्ट॑ः । मि॒त्राय॑ । वरु॑णाय । वा॒यवे॑ । त्रि॒ऽधातु॑ । मधु॑ । क्रि॒य॒ते॒ । सु॒कर्म॑ऽभिः ॥८

शुचिः । पुनानः । तन्वम् । अरेपसम् । अव्ये । हरिः । नि । अधाविष्ट । सानवि ।

जुष्टः । मित्राय । वरुणाय । वायवे । त्रिऽधातु । मधु । क्रियते । सुकर्मऽभिः ॥८

"अरेपसं पापरहितम् । यद्वा । ‘रिपि गतौ । गतिरहितम् । पात्रे स्थितमित्यर्थः । तादृशं “तन्वम् आत्मीयं शरीरं “पुनानः शोधयन् अत एव “शुचिः पूतो दीप्यमानो वा “हरिः हरितवर्णः सोमः “सानवि सानुनि समुच्छ्रिते “अव्ये अविवालकृते दशापवित्रे “न्यधाविष्ट ऋत्विग्भिर्निधीयते । ‘ धूञ् कम्पने । स्यसिच्सीयुट्तासिषु' (पा. सू. ६. ४. ६२) इति कर्मणि लुङि चिण्वदिट् । णित्त्वाद्वृद्धिः । ततः “मित्राय “वरुणाय “वायवे एतेभ्यः “जुष्टः पर्याप्तः “त्रिधातु त्रिसंधानो वसतीवरीभिर्दध्ना पयसा संस्पृष्टः सोमः “त्रिधातु तादृशं “मधु मदकरः सोमः “सुकर्मभिः शोभनकर्मयुक्तैर्ऋत्विग्भिः “क्रियते मित्रादिदेवार्थं प्रदीयते ॥

पवस्व सोम देववीतये वृषेन्द्रस्य हार्दि सोमधानमा विश ।

पु॒रा नो॑ बा॒धाद्दु॑रि॒ताति॑ पारय क्षेत्र॒विद्धि दिश॒ आहा॑ विपृच्छ॒ते ॥९

पव॑स्व । सो॒म॒ । दे॒वऽवी॑तये । वृषा॑ । इन्द्र॑स्य । हार्दि॑ । सो॒म॒ऽधान॑म् । आ । वि॒श॒ ।

पु॒रा । नः॒ । बा॒धात् । दुः॒ऽइ॒ता । अति॑ । पा॒र॒य॒ । क्षे॒त्र॒ऽवित् । हि । दिशः॑ । आह॑ । वि॒ऽपृ॒च्छ॒ते ॥९

पवस्व । सोम । देवऽवीतये । वृषा । इन्द्रस्य । हार्दि । सोमऽधानम् । आ । विश ।

पुरा । नः । बाधात् । दुःऽइता । अति । पारय । क्षेत्रऽवित् । हि । दिशः । आह । विऽपृच्छते ॥९

हे "सोम “वृषा कामानामुदकानां वा सेचकस्त्वं “देववीतये देवानां पानाय “पवस्व कलशादिषु क्षर। अथ हे सोम त्वम् “इन्द्रस्य “हार्दि हृदयंगमं प्रियं “सोमधानम्। सोमो

निधीयतेऽस्मिन्निति सोमधानं पात्रम् । तत् “आ “विश प्रविश । किंच “नः अस्माकं “बाधात् बाधनात् पीडनात् “पुरा पूर्वमेव दुरितानि दुर्गमनानि रक्षांसि “अति “पारय अतीत्य पारं गमय । अपि च “क्षेत्रवित् मार्गज्ञः पुरुषः “विपृच्छते विविधं पन्थानं पृच्छते जनाय “दिशः मार्गान् “आह “हि ब्रूते खलु । उक्त्वा तं यथा रक्षति तथा यज्ञमार्गवेत्ता त्वमस्मभ्यं यज्ञपथ उक्त्वास्मान् पालयेति ।

हि॒तो न सप्तिं॑र॒भि वाजं॑म॒र्षेन्द्रं॑स्येन्दो ज॒ठर॒मा पं॑वस्व ।

ना॒वा न सिन्धु॑मतिं॑ पर्षि वि॒द्वाञ्छूरो॒ न युध्य॒न्नवं॑ नो नि॒दः स्पः॑ ॥१०

हि॒तः । न । सप्तिः॑ । अ॒भि । वाजं॑म् । अ॒र्ष॒ । इन्द्रं॑स्य । इन्दो॒ इति॑ । ज॒ठरं॑म् । आ । प॒व॒स्व॒ ।

ना॒वा । न । सिन्धुं॑म् । अति॑ । प॒र्षि॒ । वि॒द्वान् । शूरः॑ । न ।
युध्यं॑न् । अवं॑ । न॒ः । नि॒दः । स्प॒रिति॑ स्पः ॥१०

हितः । न । सप्तिः । अभि । वाजम् । अर्ष । इन्द्रस्य ।
इन्दो इति । जठरम् । आ । पवस्व ।

नावा । न । सिन्धुम् । अति । पर्षि । विद्वान् । शूरः । न ।
युध्यन् । अव । नः । निदः । स्परिति स्पः ॥१०

हे सोम ऋत्विग्भिः प्रेर्यमाणः सन् “वाजं सोमनिधानं
द्रोणकलशम् “अभि “अर्ष अभिगच्छ । तत्र दृष्टान्तः ।
“हितो “न “सप्तिः । अश्वो हितः प्रेर्यमाणः सन् वाजं
संग्राममभिलक्ष्य यथा याति तद्वत् । ततो हे "इन्दो
“इन्द्रस्य “जठरं जठरभूतं द्रोणकलशं वा “आ “पवस्व
आभिमुख्येन प्रविश । किंच “विद्वान् सर्वं जानंस्त्वमस्मान्
“अति “पर्षि दुरितान्यतीत्य पारय । तत्र दृष्टान्तः । "नावा
“न । यथा नाविकाः “सिन्धुं नदीं नावा मनुष्यान् पारयन्ति

तद्वत् । किंच हे सोम त्वं “शूरो “न शूरो वीर इव “युध्यन् शत्रून् संप्रहरन् “निदः निन्दकाच्छत्रोः “नः अस्मान् “अव “स्पः अवपारय । बाधां विनाश्य पालय । यद्वा । नोऽस्माकं निदो निन्दकाञ्छत्रूनव स्पः अवाङ्मुखं जहि । 'स्पृ हिंसायाम्'। ‘ बहुलं छन्दसि ' इति श्नाप्रत्ययस्य लुक् । तिपि गुणे हल्यङ्यादिना तिपो लोपः ॥ ॥ २४ ॥

मण्डल ९

[सूक्तं १.११](#)[सूक्तं १.४१](#)[सूक्तं १.७१](#)[सूक्तं १.१०१](#)

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.७१

← सूक्तं ९.७०

ऋग्वेदः - मण्डल ९

सूक्तं ९.७१

ऋषभो वैश्वामित्रः

सूक्तं ९.७२ →

दे. पवमानः सोमः। जगती, ९ त्रिष्टुप्।

आ दक्षिणा सृज्यते शुष्म्यासदं वेति द्रुहो रक्षसः पाति जागृविः ।

हरिरोपशं कृणुते नभस्पय उपस्तिरे चम्वोर्ब्रह्म निर्णिजे ॥१॥

प्र कृष्टिहेव शूष एति रोरुवदसुर्यं वर्णं नि रिणीते अस्य तम् ।

जहाति वव्रिं पितुरेति निष्कृतमुपप्रुतं कृणुते निर्णिजं तना ॥२॥

अद्रिभिः सुतः पवते गभस्त्योर्वृषायते नभसा वेपते मती ।

स मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि ॥३॥

परि द्युक्षं सहसः पर्वतावृधं मध्वः सिञ्चन्ति हर्म्यस्य सक्षणिम् ।

आ यस्मिन्गावः सुहुताद ऊधनि मूर्धञ्छ्रीणन्त्यग्रियं वरीमभिः ॥४॥

समी रथं न भुरिजोरहेषत दश स्वसारो अदितेरुपस्थ आ ।

जिगादुप ज्रयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन् ॥५॥

श्येनो न योनिं सदनं धिया कृतं हिरण्ययमासदं देव एषति ।

ए रिणन्ति बर्हिषि प्रियं गिराश्वो न देवाँ अप्येति यज्ञियः ॥६॥

परा व्यक्तो अरुषो दिवः कविर्वृषा त्रिपृष्ठो अनविष्ट गा अभि ।

सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति ॥७॥

त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत्समृता सेधति स्रिधः ।

अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ॥८॥

उक्षेव यूथा परियन्नरावीदधि त्विषीरधित सूर्यस्य ।

दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ॥९॥

सायणभाष्यम्

‘आ दक्षिणा' इति नवर्चं चतुर्थं सूक्तं वैश्वामित्रस्यर्षभस्यार्षं पवमानसोमदेवताकम् । नवमी त्रिष्टुप् शिष्टा जगत्यः । तथा चानुक्रान्तम्-‘ आ दक्षिणा नव ऋषभस्तौ वैश्वामित्रौ' इति । ‘तौ' इत्यनेन प्रकृतो रेणुर्ऋषभश्चोभे परामृश्येते । श्रूयते हि-' अथ ह विश्वामित्रः पुत्रानामन्त्रयामास मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः' (ऐ. ब्रा. ७. १७) इति । गतः सूक्तविनियोगः ।।

आ दक्षिंणा सृज्यते शुष्म्या३॑सदं वेतिं द्रुहो रक्षसः पाति जागृंविः ।

हरिंरोपशं कृंणुते नभस्पयं उपस्तिरें चम्वो३॑र्ब्रह्मं निर्णिजें ॥१

आ । दक्षिंणा । सृ॒ज्य॒ते॒ । शु॒ष्मी । आ॒ऽसदं॑म् । वेतिं । द्रु॒हः । र॒क्षसः॑ । पा॒ति॒ । जागृं॑विः ।

हरिः॑ । ओ॒प॒शम् । कृ॒णु॒ते॒ । नभः॑ । पयः॑ । उ॒प॒ऽस्तिरें । च॒म्वोः॑ । ब्रह्मं॑ । नि॒ःऽनिजें ॥१

आ । दक्षिणा । सृज्यते । शुष्मी । आऽसदम् । वेति । द्रुहः । रक्षसः । पाति । जागृविः ।

हरिः । ओपशम् । कृणुते । नभः । पयः । उपऽस्तिरे । चम्वोः । ब्रह्म । निःऽनिजे ॥१

सोमस्य स्वभूते यज्ञे ऋत्विग्भ्यः “दक्षिणा “आ “सृज्यते अस्माभिः प्रदीयते । “शुष्मी बलवान् सोमः “आसदम् आस्थानं द्रोणाख्यं “वेति प्रविशति । किंच “जागृविः जागरणशीलः सोमः “द्रुहः द्रोहकारिणः “रक्षसः राक्षसात् "पाति स्तोतॄन् रक्षति । अपि च "हरिः हरितवर्णः सोमः

“ओपशम् । आ समन्तादुपशेत इत्योपशः । सर्वस्य धारकं “नभः नभस आदित्यस्य स्वभूतं “पयः उदकं "कृणुते सर्वत्र करोति । 'अग्नौ प्रास्ताहुतिः' इत्यादिक्रमेण करोतीत्यर्थः । यद्वा । नभोऽन्तरिक्षं पयः पयसो धारकं करोतीति । किंचायं सोमः "चम्वोः। द्यावापृथिवीनामैतत् । चमन्ति भक्षयन्ति मनुष्यदेवा अत्रेति । तयोः “उपस्तिरे उपस्तरणायाच्छादनाय “ब्रह्म बृहदुद्यतं तमांसि विनाशयन्तं यद्वा परिवृढं सूर्यं द्युलोके करोति । तथा तमेव सूर्यं “निर्निजे पदार्थानां निर्नेजनाय परिशोधनाय च करोति । आदित्यो हि द्यावापृथिव्यौ स्वतेजसोपस्तृणाति । स हि स्वभासा सर्वं निर्नेक्ति च ॥

प्र कृंष्ट्हेिवं शूष एंति रोरुंवदसुर्यं१ वर्णं नि रिंणीते अस्य तम् ।

जहा॑ति व॒व्रिं पि॒तुरे॑ति निष्कृ॒तमु॑प॒प्रुतं॑ कृणुते नि॒र्णिज॒ं तना॑ ॥२

प्र । कृ॒ष्टि॒हाऽइ॑व । शू॒षः । ए॒ति॒ । रोरु॑वत् । अ॒सु॒र्य॑म् । वर्ण॑म् । नि । रि॒णी॒ते॒ । अ॒स्य॒ । तम् ।

जहा॑ति । व॒व्रिम् । पि॒तुः । ए॒ति॒ । निः॒ऽकृ॒तम् । उ॒प॒ऽप्रुत॑म् । कृ॒णु॒ते॒ । निः॒ऽनिज॑म् । तना॑ ॥२

प्र । कृष्टिहाऽइव । शूषः । एति । रोरुवत् । असुर्यम् । वर्णम् । नि । रिणीते । अस्य । तम् ।

जहाति । वव्रिम् । पितुः । एति । निःऽकृतम् । उपऽप्रुतम् । कृणुते । निःऽनिजम् । तना ॥२

“शूषः शत्रूणां शोषको बलवान् सोमः “रोरुवत् अत्यन्तं शब्दं कुर्वन् “कृष्टिहेव मनुष्याणां हन्ता योद्धेव “प्र “एति प्रगच्छति । किंच "असुर्यम् असुराणां बाधकम् “अस्य

आत्मनो “वर्णं हरितमावारकं बलं वा “नि “रिणीते निर्गमयति । ततः स सोमः “वव्रिम् । वृणोति शरीरमिति वव्रिर्जरा। “जहाति त्यजति । कथमिति चेत् तदुच्यते । “पितुः अन्नं सोमः “निष्कृतं संस्कृतं द्रोणकलशं दिवं वा इदानीम् “एति गच्छति । किंच सोमः “तना अविवालेन तते विस्तृते देशापवित्रे “निर्निजम् । निर्णिगिति रूपनाम । आत्मीयं रूपम् “उपप्रुतम् उपगमनशीलं "कृणुते करोति । तस्माज्जरां त्यजतीत्यर्थः ॥

अद्रि॑भिः सु॒तः प॑वते॒ गभ॑स्त्योर्वृषा॒यते॒ नभ॑सा॒ वेप॑ते म॒ती ।

स मो॑दते॒ नस॑ते॒ साध॑ते गि॒रा ने॑नि॒क्ते अ॒प्सु यज॑ते॒ परी॑मणि ॥३

अद्रि॑ऽभिः । सु॒तः । प॒व॒ते । गभ॑स्त्योः । वृ॒ष॒ऽयते॑ । नभ॑सा । वेप॑ते । म॒ती ।

सः । मो॒द॒ते॒ । नसं॑ते । साधं॑ते । गि॒रा । ने॒नि॒क्ते । अ॒प्ऽसु । यजं॑ते । परीं॑मणि ॥३

अद्रिऽभिः । सुतः । पवते । गभस्त्योः । वृषऽयते । नभसा । वेपते । मती ।

सः । मोदते । नसते । साधते । गिरा । नेनिक्ते । अप्ऽसु । यजते । परीमणि ॥३

“अद्रिभिः ग्रावभिः “गभस्त्योः बाह्वोः बाहुभ्यां च "सुतः अभिषुतः स सोमः “पवते पात्राणि प्रति गच्छति । यः सोमः “वृषायते वृषवदाचरति । किंच यः “मती स्तुत्याभिष्टुतः सन् “नभसा अन्तरिक्षेण "वेपते सर्वत्र गच्छति “सः सोमः "मोदते हृष्टो भवति । तथा “नसते ग्रहादिषु संश्लिष्टो भवति । किंच “गिरा स्तुत्या स्तुतः सन् “साधते स्तोतृणां धनान्नादिकं साधयति । अपि च “अप्सु वसतीवर्याख्यासु “नेनिक्ते शुद्धो भवति । तथा “परीमणि

देवै रक्ष्यमाणे यज्ञे देवानां हविष्प्रदानेन पोषके वा यज्ञे "यजते पूजितो भवति ॥

परिं द्युक्षं सहंसः पर्वतावृधं मध्वः सिञ्चन्ति हर्म्यस्यं सक्षणिंम् ।

आ यस्मिन्गावः सुहुताद ऊधंनि मूर्धञ्छ्रीणन्त्यंग्रियं वरींमभिः ॥४

परिं । द्युक्षम् । सहंसः । पर्वतऽवृधंम् । मध्वः । सिञ्चन्ति । हर्म्यस्यं । सक्षणिंम् ।

आ । यस्मिंन् । गावः । सुहुतऽअदः । ऊधंनि । मूर्धन् । श्रीणन्तिं । अग्रियम् । वरींमऽभिः ॥४

परि । द्युक्षम् । सहसः । पर्वतऽवृधम् । मध्वः । सिञ्चन्ति । हर्म्यस्य । सक्षणिम् ।

आ । यस्मिन् । गावः । सुहुतऽअदः । ऊधनि । मूर्धन् । श्रीणन्ति । अग्रियम् । वरीमऽभिः ॥४

“सहसः सहस्विनः “मध्वः मदकराः सोमाः “द्युक्षं दीप्यमाने द्युलोके “क्षियन्तं निवसन्तं "पर्वतावृधं मेघानां पर्वतानां वा वर्धयितारं “हर्म्यस्य शत्रुपुरस्य "सक्षणिम् अभिभवितारमिन्द्रं "परि “षिञ्चन्ति । तथा "सुहुतादः सुहुतानां हविषां भक्षयितारः “गावः “मूर्धन् मूर्धनि समुच्छ्रिते “ऊधनि पयोधारके स्थाने स्थितम् “अग्रियं मुख्यं पयः “वरीमभिः उरुत्वैर्महत्त्वैः “यस्मिन् पवमानगुणविशिष्ट इन्द्रे “आ “श्रीणन्ति आमिश्रयन्ति । दध्ना पयसा च सोमं श्रीणन्ति खलु । तदुच्यते ॥

समी॒ रथं॒ न भु॒रिजो॑रहेषत॒ दश॒ स्वसा॑रो॒ अदि॑तेरु॒पस्थ॒ आ ।

जिगा॒दुपं ज्रयति॒ गोरंपी॒च्यं प॒दं यदंस्य म॒तुथा॒ अजींजनन् ॥५

सम् । ई॒मिर्तिं । रथंम् । न । भु॒रिजोः॑ । अ॒हे॒ष॒त॒ । दशं । स्वसांरः । अदिंतेः । उ॒पऽस्थें । आ ।

जिगांत् । उपं । ज्र॒य॒ति॒ । गोः । अ॒पी॒च्यंम् । प॒दम् । यत् । अ॒स्य॒ । म॒तुथाः॑ । अजींजनन् ॥५

सम् । ईमिति । रथम् । न । भुरिजोः । अहेषत । दश । स्वसारः । अदितेः । उपऽस्थे । आ ।

जिगात् । उप । ज्रयति । गोः । अपीच्यम् । पदम् । यत् । अस्य । मतुथाः । अजीजनन् ॥५

“भुरिजोः । बाहुनामैतत् । बिभ्रति पदार्थानाभ्यामिति । तयोर्बाह्वोः “दश दशसंख्याकाः “स्वसारः सर्वत्रसरणशीला अङ्गुलयः “अदितेः भूमेः “उपस्थे समीपे देवयजनदेशे “ईम्

एनं सोमम् "आ आभिमुख्येन “सम् “अहेषत संप्रेरयन्ति । ' हि वर्धनगत्योः । लुङि रूपम् । कथमिव । “रथं “न । रथं यथाङ्गुलयः प्रेरयन्ति तद्वत् । स सोमः “जिगात् पात्राणि गच्छति । किंच “गोः धेनोः “अपीच्यम् अन्तर्हितं पयः “उप “ज्रयति तदानीमुपगच्छति । “यत् यदा “मतुथाः मननीयगाथावन्तः स्तोतारः “अस्य सोमस्य “पदं स्थानम् “अजीजनन् जनयन्ति तदानीमित्यर्थः ॥ ॥२५॥

अभिष्टवे ‘ श्येनो न योनिम्' इत्येषा । सूत्रितं च--- संप्रेषितः श्येनो न योनिं सदनं धिया कृतम्' (आश्व. श्रौ. ४. ७) इति । अग्नीषोमप्रणयनेऽप्येषा । सूत्रितं च-‘अन्तश्च प्रागा अदितिर्भवासि श्येनो न योनिं सदनं धिया कृतम्' (आश्व. श्रौ. ४. १०) इति ॥

श्ये॒नो न योनिं॒ सद॑नं धि॒या कृ॒तं हि॑र॒ण्यय॑मा॒सद॑ꣳ दे॒व एष॑ति
।

ए रि॑णन्ति ब॒र्हिषि॑ प्रि॒यं गि॒राश्वो॒ न दे॒वाँ अप्ये॑ति य॒ज्ञिय॑ः ॥
६

श्ये॒नः । न । योनि॑म् । सद॑नम् । धि॒या । कृ॒तम् ।
हि॒र॒ण्यय॑म् । आ॒ऽसद॑म् । दे॒वः । आ । ई॒ष॒ति॒ ।

आ । ई॒मिति॑ । रि॒ण॒न्ति॒ । ब॒र्हिषि॑ । प्रि॒यम् । गि॒रा । अश्व॑ः
। न । दे॒वान् । अपि॑ । ए॒ति॒ । य॒ज्ञिय॑ः ॥६

श्येनः । न । योनिम् । सदनम् । धिया । कृतम् ।
हिरण्ययम् । आऽसदम् । देवः । आ । ईषति ।

आ । ईमिति । रिणन्ति । बर्हिषि । प्रियम् । गिरा । अश्वः
। न । देवान् । अपि । एति । यज्ञियः ॥६

“देवः द्योतमानः पवमानः “धिया स्वकर्मणा "कृतं संपादितं “हिरण्ययं हिरण्मयम् “आसदम् आसन्द्यभिधानम् “एषति अभिमुखं गच्छति । ईषतेर्गत्यर्थस्य व्यत्ययेन परस्मैपदम् । तत्र दृष्टान्तः । “श्येनो “न “योनिम् । कुलायं यथा श्येनः पक्षी प्रविशति तद्वत् । ततः “ईम् एनं “प्रियं प्रीणयितारं सोमं “गिरा स्तुत्या “बर्हिषि यज्ञे “आ “रिणन्ति स्तोतारोऽभिमुखं प्रेरयन्ति । स्तुवन्तीत्यर्थः । अनन्तरं “यज्ञियः यज्ञार्हः यष्टव्योऽयं सोमः “अश्वो “न अश्व इव त्वरया “देवान् “अप्येति अभिगच्छति ॥

परा॒ व्य॑क्तो अ॒रु॒षो दि॒वः क॒विर्वृषा॑ त्रिपृ॒ष्ठो अ॑नविष्ट॒ गा अ॒भि ।

स॒हस्रं॑णीति॒र्यतिः॑ परा॒यती॑ रे॒भो न पू॒र्वीरु॒षसो॒ वि रा॑जति ॥ ७

परा॑ । वि॒ऽअं॑क्तः । अ॒रु॒षः । दि॒वः । क॒विः । वृषा॑ । त्रि॒ऽपृ॒ष्ठः । अ॒न॒वि॒ष्ट । गाः । अ॒भि ।

स॒हस्रं॑ऽनीतिः । यतिः॑ । प॒रा॒ऽयतिः॑ । रे॒भः । न । पू॒र्वीः । उ॒षसः॑ । वि । रा॒ज॒ति॒ ॥७

परा । विऽअक्तः । अरुषः । दिवः । कविः । वृषा । त्रिऽपृष्ठः । अनविष्ट । गाः । अभि ।

सहस्रऽनीतिः । यतिः । पराऽयतिः । रेभः । न । पूर्वीः । उषसः । वि । राजति ॥७

“अरुषः आरोचमानः “कविः क्रान्तप्रज्ञः सोमः “व्यक्तः विस्पष्टधारायुक्तः । यद्वा। वसतीवरीभिर्विशेषेणोक्तः सिक्तः सन् “दिवः अन्तरिक्षात् “परा पराङ्मुखम्

आगच्छति । पवित्रात् द्रोणकलशं परागच्छतीत्यर्थः । “वृषा वृषभः “त्रिपृष्ठः । त्रीणि सवनानि पृष्ठान्यस्येति त्रिपृष्ठः सोमस्य सर्वेषु विद्यमानत्वात् । तस्मात् त्रिपृष्ठः सोमः “गाः स्तोतृभिः क्रियमाणाः स्तुतीरभिलक्ष्य “अनविष्ट शब्दायते । 'नु शब्दे ' । किंच सहस्रणीतिः सहस्रनयनः। प्रयोगबाहुल्यापेक्षं ग्रहेषु चमसेषु च सहस्रविधनयनत्वम् । अत एव “यतिः पात्रादीनि प्रत्यागन्ता “परायतिः कलशान् प्रति परागन्ता भवति । सोऽयं “पूर्वीः बह्वीः “उषसः । ‘ कालाध्वनो:०' इति द्वितीया । बहुषूष:कालेषु “रेभो “न । रेभृ शब्दे' । शब्दायमानः स्तोतेव “वि “राजति विशेषेण दीप्यते । तेषु सोमस्याभिषूयमाणत्वात् । स्तोता खलु देवानां स्तुतिकरणेन राजति ।।

त्वे॒षं रू॒पं कृ॑णुते॒ वर्णो॑ अस्य॒ स यत्राश॑य॒त्सम॑ृता॒ सेध॑ति

स्त्रि॒धः ।

अ॒प्सा या॑ति स्व॒धया॒ दैव्यं॒ जनं॒ सं सु॑ष्टु॒ती नस॑ते॒ सं गोअ॑ग्रया ॥८

त्वे॒षम् । रू॒पम् । कृ॒णु॒ते॒ । वर्णः॑ । अ॒स्य॒ । सः । यत्र॑ । अश॑यत् । सम्ऽऋ॑ता । सेध॑ति । स्त्रि॒धः ।

अ॒प्साः । या॒ति॒ । स्व॒धया॑ । दैव्य॑म् । जन॑म् । सम् । सु॒ऽस्तु॒ती । नस॑ते । सम् । गोऽअ॑ग्रया ॥८

त्वेषम् । रूपम् । कृणुते । वर्णः । अस्य । सः । यत्र । अशयत् । सम्ऽऋता । सेधति । स्त्रिधः ।

अप्साः । याति । स्वधया । दैव्यम् । जनम् । सम् । सुऽस्तुती । नसते । सम् । गोऽअग्रया ॥८

“अस्य । अन्वादेशे अशादेशः । अस्य सोमस्य स्वभूतः “वर्णः शत्रूणां निवारको रश्मिः “त्वेषं दीप्यमानं “रूपं “कृणुते करोति । “सः रश्मिः “यत्र “समृता । अर्तेः क्तिनि रूपम् । सम्यक् प्राप्यते योद्धृभिरत्रेति संग्रामः । अस्मिन् समृतौ युद्धे “अशयत् शेते तिष्ठति । शीङो लङि ‘ बहुलं छन्दसि । इति शपो लुगभावः । तत्र युद्धे स रश्मिः “स्रिधः शोषकाञ्छत्रून “सेधति निषेधति । हिनस्तीति यावत् । वाक्यभेदादनिघातः । किंच “अप्साः । सनोतेः विटि आत्वे कृते रूपम् । अपामुदकानां दाता । यद्वा वसतीवर्याख्यानामपां संभक्ता । सोऽयं “स्वधया हवीरूपेणान्नेन सह “दैव्यं देवानां संबन्धिनं “जनं प्रति “याति गच्छति । अपि च सोऽयं “सुष्टुती सुस्तुत्या “सं संगच्छते । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । किंच स सोमः “गोअग्रया गवादिमुख्यया यथा वाचा स्तोतारः पशून् याचन्ते तया वाचा “सं “नसते संगतो भवति । नसतिर्गत्यर्थः । भिन्नवाक्यत्वादनिघातः ॥

उ॒क्षेवं यू॒था पंरि॒यन्नंरावी॒दधि॒ त्विषीं॑रधित॒ सूर्यंस्य ।

दि॒व्यः सुंप॒र्णोऽवं चक्षत॒ क्षां सोम॒ः परि॒ क्रतुंना पश्यते॒ जाः ॥९

उ॒क्षाऽइंव । यू॒था । प॒रि॒ऽयन् । अ॒रा॒वी॒त् । अधिं । त्विषीः॑ । अ॒धि॒त॒ । सूर्यंस्य ।

दि॒व्यः । सु॒ऽप॒र्णः । अवं । च॒क्ष॒त॒ । क्षाम् । सोमः॑ । परिं । क्रतुंना । प॒श्य॒ते॒ । जाः ॥९

उक्षाऽइव । यूथा । परिऽयन् । अरावीत् । अधि । त्विषीः । अधित । सूर्यस्य ।

दिव्यः । सुऽपर्णः । अव । चक्षत । क्षाम् । सोमः । परि । क्रतुना । पश्यते । जाः ॥९

“उक्षेव वृषभ इव “यूथा गोयूथानि प्रत्यागच्छञ्छब्दं करोति तद्वदयं सोमः स्तुतीः “परियन् परिगच्छन् “अरावीत् शब्दायते । ततः “सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य “त्विषीः दीप्तीः “अधि “अधित अधिदधाति । सूर्यात्मना द्युलोकेऽवतिष्ठत इत्यर्थः । दधातेर्लुङि ‘ स्थाघ्वोरिच्च' इति इत्वकित्त्वे । किंच “दिव्यः दिवि भवः “सुपर्णः सुपतनः श्येनरूपया गायत्र्याहृतत्वाच्छोभनगमनः सोमः “क्षाम् । पृथिवीनामैतत् । क्षियन्ति निवसन्त्यत्रेति । क्षां पृथिवीम् “अव “चक्षत अवपश्यति । चष्टेर्लङि ’ बहुलं छन्दसि ' इति शपो लुगभावः । ततः “सोमः “जाः जाताः प्रजाः “क्रतुना प्रज्ञानेन “परि “पश्यते परितः पश्यति । व्यत्ययेनात्मनेपदम् ॥ ॥ २६ ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

३ आगस्ट् २०१९ (तमे) दिनाङ्के ०५:०८ समये अन्तिमपरिवर्तनं जातम् •

ऋग्वेदः सूक्तं ९.७२

दे. पवमानः सोमः। जगती।

हरिं मृजन्त्यरुषो न युज्यते सं धेनुभिः कलशे सोमो अज्यते ।

उद्वाचमीरयति हिन्वते मती पुरुष्टुतस्य कति चित्परिप्रियः ॥१॥

साकं वदन्ति बहवो मनीषिण इन्द्रस्य सोमं जठरे यदादुहुः ।

यदी मृजन्ति सुगभस्तयो नरः सनीळाभिर्दशभिः काम्यं मधु ॥२॥

अरममाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवम् ।

अन्वस्मै जोषमभरद्विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः ॥३॥

नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इन्दुरृत्वियः ।

पुरंधिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इन्द्र ते ॥४॥

नृबाहुभ्यां चोदितो धारया सुतोऽनुष्वधं पवते सोम इन्द्र ते ।

आप्राः क्रतून्समजैरध्वरे मतीर्वेर्न द्रुषच्चम्वोरासदद्धरिः ॥५॥

अंशुं दुहन्ति स्तनयन्तमक्षितं कविं कवयोऽपसो मनीषिणः ।

समी गावो मतयो यन्ति संयत ऋतस्य योना सदने पुनर्भुवः ॥६॥

नाभा पृथिव्या धरुणो महो दिवोऽपामूर्मौ सिन्धुष्वन्तरुक्षितः ।

इन्द्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः ॥७॥

स तू पवस्व परि पार्थिवं रज स्तोत्रे शिक्षन्नाधून्वते च सुक्रतो ।

मा नो निर्भाग्वसुनः सादनस्पृशो रयिं पिशङ्गं बहुलं वसीमहि ॥८॥

आ तू न इन्दो शतदात्वश्व्यं सहस्रदातु पशुमद्धिरण्यवत् ।

उप मास्व बृहती रेवतीरिषोऽधि स्तोत्रस्य पवमान नो गहि ॥९॥

सायणभाष्यम्

‘ हरिं मृजन्ति ' इति नवर्चं पञ्चमं सूक्तमाङ्गिरसस्य हरिमन्तस्यार्षं, पवमानसोमदेवताकम् । ‘ जागतमूर्ध्वं प्रागुशनसः' (अनु. ९.६७) इति परिभाषया जागतम् । तथा चानुक्रान्तं- हरिं मृजन्ति हरिमन्तः' इति । गतो विनियोगः ॥

हरिँ मृजंत्यरुषो न युंज्यते सं धेनुभिः कुलशे सोमों अज्यते ।

उद्वाचंमीरयंति हिन्वतें मती पुंरुष्टुतस्य कतिं चित्परिप्रियः ॥१

ह॒रिं॑म् । मृ॒ज॒न्ति॒ । अ॒रु॒षः । न । यु॒ज्य॒ते॒ । सम् । धे॒नुऽभिः॑ । क॒लशे॑ । सोमः॑ । अ॒ज्य॒ते॒ ।

उत् । वाचं॑म् । ई॒रयं॑ति । हि॒न्वते॑ । म॒ती । पु॒रु॒ऽस्तु॒तस्यं॑ । कतिं॑ । चि॒त् । प॒रि॒ऽप्रियः॑ ॥१

हरिम् । मृजन्ति । अरुषः । न । युज्यते । सम् । धेनुऽभिः । कलशे । सोमः । अज्यते ।

उत् । वाचम् । ईरयति । हिन्वते । मती । पुरुऽस्तुतस्य । कति । चित् । परिऽप्रियः ॥१

"हरिं हरितवर्णं सोममृत्विजो "मृजन्ति मार्जयन्ति । 'मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते' (पा. म. १.१.३.१०, का. १.१.५) इति तत्र वृद्धेरभावः । सोऽयम् "अरुषः । अर्तेरुषच्प्रत्ययः ।। गमनशीलोऽश्व इव "युज्यते इन्द्रादिभिः संयुज्यते । किंच "कलश द्रोणाभिधाने स्थितः

“सोमः “धेनुभिः गोविकारैः दध्यादिभिः “सम् “अज्यते समक्तः सिक्तो भवति । अपि च सोमो यदा “वाचं शब्दम् “उत् “ईरयति उद्गमयति । शब्दं करोतीत्यर्थः । तदा स्तोतारश्च "मती । ‘ सुपां सुलुक्' इति द्वितीयायाः पूर्वसवर्णदीर्घः । स्तुतिं “हिन्वते प्रेरयन्ति । ‘हि गतौ वृद्धौ च' इति स्वादिः आत्मनेपदी । ततः स्तोत्राभिष्टुतः सः “पुरुष्टुतस्य बहुस्तोत्रयुक्तस्य स्तोतुः “परिप्रियः । ‘ प्रीङ् तर्पणे'। क्विप् । शसि इयङादेशः । कृदुत्तरपदप्रकृतिस्वरत्वम् । परितः प्रीणयितॄणि कति चित् “क्रियन्ति धनानि प्रयच्छति ॥

सा॒कं वं॑दंति ब॒हवो॑ मनी॒षिण॒ इंद्रं॑स्य॒ सोमं॑ ज॒ठरे॒ यदां॑दु॒हुः ।

यदीं॑ मृ॒जंति॒ सुगं॑भस्तयो॒ नर॒ः सनीं॑ळाभिर्द॒शभि॒ः काम्यं॒ मधुं ॥२

सा॒कम् । व॒द॒न्ति॒ । ब॒हवः॑ । म॒नी॒षिणः॑ । इन्द्रं॑स्य । सोमं॑म् । ज॒ठरें॑ । यत् । आ॒ऽदु॒हुः ।

यदिं॑ । मृ॒जन्तिं॑ । सुऽगं॑भस्तयः । नरः॑ । सऽनीं॑ळाभिः । द॒शऽभिः॑ । काम्यं॑म् । मधुं॑ ॥२

साकम् । वदन्ति । बहवः । मनीषिणः । इन्द्रस्य । सोमम् । जठरे । यत् । आऽदुहुः ।

यदि । मृजन्ति । सुऽगभस्तयः । नरः । सऽनीळाभिः । दशऽभिः । काम्यम् । मधु ॥२

“मनीषिणः मनस ईशितारः प्राज्ञाः “बहवः स्तोतारः साकं सहैव युगपत् मन्त्रान् वदन्ति । तदा स्तुवन्ति । यदा “इन्द्रस्य “जठरे द्रोणकलशे सौमम् “आहः ऋत्विजो दुदुहुः तदा भिष्ट्रवन्तीति । दुहेर्लिटयुसि रूपम् । द्विवचनस्य छन्दसि विकल्पितत्वादत्र द्विवंचनाभावः । किंच यदि

थदा सुगभस्तयः शोभनबाहुकाः नरः कर्मचैतारो मनुष्याः कार्य काम्यमानं मधु मकर सीमें “सनीळाभिः "दशभिः दशसंख्याकाभिरङ्गुलीभिः "मृजन्ति सोममभिषुण्वन्ति तदा वदन्तीत्यन्वयः ॥

अरं॑ममाणो॒ अत्ये॑ति॒ गा अ॒भि सूर्य॑स्य प्रि॒यं दु॑हि॒तुस्ति॒रो रवं॑ ।

अन्वं॑स्मै॒ जोषं॑मभरद्विनंगृ॒सः सं द्व॒यीभि॒ः स्वसृं॑भिः क्षेति जा॒मिभिः॑ ॥३

अरं॑ममाणः । अतिं॑ । ए॒ति॒ । गाः । अ॒भि । सूर्य॑स्य । प्रि॒यम् । दु॒हि॒तुः । ति॒रः । रवं॑म् ।

अनुं॑ । अ॒स्मै॒ । जोषं॑म् । अ॒भ॒र॒त् । वि॒न॒म्ऽगृ॒सः । सम् । द्व॒यीभिः॑ । स्वसृं॑ऽभिः । क्षे॒ति॒ । जा॒मिऽभिः॑ ॥३

अरममाणः । अति । एति । गाः । अभि । सूर्यस्य । प्रियम् । दुहितुः । तिरः । रवम् ।

अनु । अस्मै । जोषम् । अभरत् । विनम्ऽगृसः । सम् । द्वयीभिः । स्वसृऽभिः । क्षेति । जामिऽभिः ॥३

“सः सोम “अरममाणः अनुपरतः सन् । पुनः पुनर्देवानां प्रीणनाय ग्रहादीनि प्रविशन्नित्यर्थः । “गाः गोविकारानाश्रयणानभिलक्ष्य “अत्येति अतिक्रम्य गच्छति । ततः शब्दायमानः सोमः “सूर्यस्य आदित्यस्य “दुहितुः उषस: “प्रियं “रवं शब्दं “तिरः तिरस्करोति । तस्मिन्काले सोमाभिषवध्वनिर्महान् भवतीत्यर्थः । “विनंगृसः । विनं कमनीयं स्तोत्रं गृह्णातीति विनंगृसः स्तोता । “जोषम् । जुषेर्घञि रूपम् । पर्याप्तं स्तोत्रं तस्मै सोमाय “अनु “अभरत् अनुभरति । करोतीति यावत् । सोऽयं सोमः “द्वयीभिः द्वाभ्यां पाणिभ्यामुत्पन्नाभिः “जामिभिः परस्परं

बन्धुभिः स्वसृभिः कर्मकरणार्थमितस्ततो गच्छन्तीभिरङ्गुलीभिः “सं “क्षेति संगच्छते । ‘क्षि निवासगत्योः । छान्दसी विकरणस्य लुक् ।

नृधू॑तो॒ अद्रि॑षुतो ब॒र्हिषि॑ प्रि॒यः पति॒र्गवां॑ प्र॒दिव॒ इंदु॑र्ऋ॒त्विय॑ः ।

पुरं॑धिवा॒न्मनु॑षो यज्ञ॒साध॑न॒ः शुचि॑र्धि॒या पं॑वते॒ सोमं॑ इंद्र ते ॥४

नृऽधू॑तः । अद्रि॑ऽसुतः । ब॒र्हिषि॑ । प्रि॒यः । पति॑ः । गवा॑म् । प्र॒ऽदिव॑ः । इन्दु॑ः । ऋ॒त्विय॑ः ।

पुर॑न्धिऽवान् । मनु॑षः । य॒ज्ञ॒ऽसाध॑नः । शुचि॑ः । धि॒या । प॒व॒ते॒ । सोम॑ः । इ॒न्द्र॒ । ते॒ ॥४

नृऽधूतः । अद्रिऽसुतः । बर्हिषि । प्रियः । पतिः । गवाम् । प्रऽदिवः । इन्दुः । ऋत्वियः ।

पुरन्धिऽवान् । मनुषः । यज्ञऽसाधनः । शुचिः । धिया । पवते । सोमः । इन्द्र । ते ॥४

हे "इन्द्र पवमानगुणविशिष्टेन्द्र "ते त्वदर्थं "बर्हिषि यज्ञेयं "सोमः "धिया स्वेन कर्मणा धारया वा "पवते पात्रेषु स्यन्दते । कीदृशः। "नृधूतः कर्मनेतृभिर्मनुष्यैः शोधितः "अद्रिषुतः ग्रावभिरभिषुतः "प्रियः देवानां प्रीणयिता "गवां "पतिः स्वामी । इन्द्रो गा अलभत तस्माद्गवां स्वामी ।। "प्रदिवः । पुराणनामैतत् । पुराणः "इन्दुः पात्रेषु क्षरन् "ऋत्वियः ऋतौ जातः । 'ऋतोरण्' छन्दसि घस्' (पा, सू, ५, १, १०५- १ ० ६) इति घस् । सित्त्वेन पदसंज्ञायां भसंज्ञानिमित्त ओर्गुणो न भवति । "पुरंधिवान् । ' पुरंधिर्बहुधीः ' (निरु, ६, १३) इति यास्कः । बहुकर्मवान्

“मनुषः मनुष्यस्य “यज्ञ साधनः “ शुचिः। दीप्यमानः । यद्वा । दशापवित्रेण शुद्धः । एवंगुणः सोमः इन्द्रार्थं पवत इति संबन्धः ।।

नृबा॒हुभ्यां॑ चोदि॒तो धार॑या सु॒तों॑ऽनुष्व॒धं प॑वत॒ सोम॑ इंद्र ते ।

आप्रा॒ः क्रतू॒न्त्सम॑जैरध्व॒रे म॒तीर्वेर्न द्रु॒षच्च॒म्वो॒३॒॑रास॑द॒द्धरिः॑ ॥५

नृबा॒हुऽभ्यां॑म् । चो॒दि॒तः । धार॑या । सु॒तः । अ॒नु॒ऽस्व॒धम् । प॒व॒ते॒ । सोमः॑ । इ॒न्द्र॒ । ते॒ ।

आ । अ॒प्रा॒ः । क्रतू॑न् । सम् । अ॒जै॒ः । अ॒ध्व॒रे । म॒तीः । वेः । न । द्रु॒ऽसत् । च॒म्वोः॑ । आ । अ॒स॒द॒त् । हरिः॑ ॥५

नृबाहुऽभ्याम् । चोदितः । धारया । सुतः । अनुऽस्वधम् । पवते । सोमः । इन्द्र । ते ।

आ । अप्राः । क्रतून् । सम् । अजैः । अध्वरे । मतीः । वेः । न । द्रुऽसत् । चम्वोः । आ । असदत् । हरिः ॥५

हे “इन्द्र पवमानगुणविशिष्ट “नृबाहुभ्यां कर्मनेतॄणामृत्विजां बाहुभ्यां “चोदितः प्रेरितः “धारया “सुतः अभिषुतः । यथा धारा भवति तथाभिषुत इत्यर्थः । तादृशः “सोमः "ते तव अनुष्वधं बलमनु बलार्थम् । यद्वा । स्वधेत्यन्ननाम । अन्नार्थं “पवते आगच्छति । ततः स त्वं सोमपानेन “क्रतून् कर्माणि “आप्राः आपूरयसि । किंच “अध्वरे यज्ञे “मतीः अभिमन्यमानान्' शत्रून् समजैः सम्यग्जितवानसि । ‘ जि जये' । लुङि सिपि सिचो ‘ बहुलं छन्दसि' इति इडभावः । ‘ सिचि वृद्धिः०' इति वृद्धिः । सोऽयं “हरिः हरितवर्णः सोमः “चम्वोः

अधिषवणफलकयोः “आसदत् आसीदति । तत्र दृष्टान्तः । “वेर्न । वी गत्यादिषु । अन्येभ्योऽपि दृश्यन्ते' इति विच् । सार्वधातुकार्धधातुकयोः ' इति गुणः । यथा विः पक्षी “द्रुषत् द्रुमे सीदतीति तद्वत् । द्रुषत्' । 'पूर्वपदात्' इति षत्वम् ॥ ॥ २७ ॥

अं॒शुं दु॑हंति स्त॒नयं॑त॒मक्षि॑तं क॒विं क॒वयो॒ऽपसो॑ मनी॒षिणः॑ ।

समी॒ गावो॑ म॒तयो॑ यंति सं॒यतं॑ ऋ॒तस्य॒ योना॒ सद॑ने पुन॒र्भुवः॑ ॥६

अं॒शुम् । दु॒ह॒न्ति॒ । स्त॒नयं॑न्तम् । अक्षि॑तम् । क॒विम् । क॒वयः॑ । अ॒पसः॑ । म॒नी॒षिणः॑ ।

सम् । ई॒मिति॑ । गावः॑ । म॒तयः॑ । य॒न्ति॒ । स॒म्ऽयतः॑ । ऋ॒तस्य॑ । योना॑ । सद॑ने । पु॒नः॒ऽभुवः॑ ॥६

अंशुम् । दुहन्ति । स्तनयन्तम् । अक्षितम् । कविम् ।
कवयः । अपसः । मनीषिणः ।

सम् । ईमिति । गावः । मतयः । यन्ति । सम्ऽयतः ।
ऋतस्य । योना । सदने । पुनःऽभुवः ॥६

“कवयः क्रान्तप्रज्ञाः "अपसः कर्मवन्तः “मनीषिणः । मनस ईशा मनीषा बुद्धिः । तद्वन्त ऋत्विजः “स्तनयन्तं शब्दायमानम् “अक्षितम् अक्षीणं “कविं क्रान्तदर्शिनम् “अंशुं सोमं दुहन्ति अभिषुण्वन्ति । ततः “पुनर्भुवः पुनर्भवनशीलाः “गावः पशवः “मतयः मननीयाः स्तुतयश्च “संयतः परस्परं संगताः सत्यः “ऋतस्य सत्यभूतस्य यज्ञस्य “योना योनौ योनिस्थानीय उत्पत्तिभूते “सदने उतरवेद्याख्ये “ईम एनं सोमं “सं "यन्ति संगच्छन्ति ॥

नाभा॑ पृथि॒व्या ध॒रुणो॑ म॒हो दि॒वो॒३॒ऽपामू॒र्मौ

सिंधुंष्वं॒तरुंक्षि॒तः ।

इंद्रंस्य॒ वज्रों वृष॒भो वि॒भूवंसु॒ः सोमों हृ॒दे पंवते॒ चारुं मत्स॒रः ॥७

नाभां । पृ॒थि॒व्याः । ध॒रुणः॑ । म॒हः । दि॒वः । अ॒पाम् । ऊ॒र्मौ । सिन्धुंषु । अ॒न्तः । उ॒क्षि॒तः ।

इन्द्रंस्य । वज्रः॑ । वृ॒ष॒भः । वि॒भुऽवंसुः । सोमः॑ । हृ॒दे । प॒व॒ते॒ । चारुं । म॒त्स॒रः ॥७

नाभा । पृथिव्याः । धरुणः । महः । दिवः । अपाम् । ऊर्मौ । सिन्धुषु । अन्तः । उक्षितः ।

इन्द्रस्य । वज्रः । वृषभः । विभुऽवसुः । सोमः । हृदे । पवते । चारु । मत्सरः ॥७

"महः महतः “दिवः द्युलोकस्य “धरुणः धारकोऽयं सोमः “पृथिव्याः विस्तीर्णाया भूमेः “नाभा नाभौ नाभिस्थानीये उच्छ्रिते पदे ' यदुत्तरवेदीनाभिः ' (ऐ. ब्रा. १. २८) इत्याम्नानात् उत्तरवेदिस्थान ऋत्विग्भिर्निहितः “सिन्धुषु स्यन्दमानासु नदीषु “अपाम् उदकानाम् “ऊर्मौ संघे “अन्तः मध्ये “उक्षितः सिक्तः । अन्तरिक्षस्थानमध्ये वर्तमान इत्यर्थः । तादृशः “इन्द्रस्य “वज्रः वज्रस्थानीयः “वृषभः कामानां वर्षिता अत एव “विभूवसुः व्याप्तधनः “सोमः “चारु कल्याणं यथा भवति तथा इन्द्रस्य “मत्सरः मादयिता सन् "हृदे मनसे सुखाय “पवते आगच्छति ॥

स तू पंवस्व॒ परि॒ पार्थिवं॒ रजः॑ स्तो॒त्रे शिक्षंन्नाधून्व॒ते चं सुक्रतो ।

मा नो॒ निर्भा॒ग्वसुं॑नः सादन॒स्पृशों॑ र॒यिं पि॒शंगं॑ बहु॒लं वंसीमहि ॥८

सः । तु । प॒व॒स्व॒ । परिं॑ । पार्थिं॑वम् । रजः॑ । स्तो॒त्रे । शिक्षंन् । आ॒ऽधू॒न्व॒ते । च॒ । सु॒क्र॒तो॒ इतिं॑ सुऽक्रतो ।

मा । न॒ः । निः । भा॒क् । वसुं॑नः । स॒द॒न॒ऽस्पृशः॑ । र॒यिम् । पि॒शङ्गं॑म् । ब॒हु॒लम् । व॒सी॒म॒हि॒ ॥८

सः । तु । पवस्व । परि । पार्थिवम् । रजः । स्तोत्रे । शिक्षन् । आऽधून्वते । च । सुक्रतो इति सुऽक्रतो ।

मा । नः । निः । भाक् । वसुनः । सदनऽस्पृशः । रयिम् । पिशङ्गम् । बहुलम् । वसीमहि ॥८

हे "सुक्रतो शोभनकर्मन् सुप्रज्ञ वा सोम तादृशस्त्वं “पार्थिवं “रजः लोकं लक्षीकृत्य “तु क्षिप्रं “परि “पवस्व परितः सर्वतः क्षर । किं कुर्वन् । “आधून्वते अदाभ्यग्रहे

त्रिभिरंशुभिराधावनं कुर्वते । तथा भगवता आपस्तम्बेन सूत्रितं-- तैरेनं चतुराधुनोति पञ्चकृत्वः सप्तकृत्वो वा ' इति । तस्मै धनादिकं “शिक्षन् प्रयच्छन् परि पवस्वेति समन्वयः । ततस्त्वं “नः अस्मान् “वसुनः धनात् "मा “निर्भाक् मा निर्भाङ्क्षीः मा वियोक्षीः । कीदृशात् । “सदनस्पृशः । येन भूतेन वसुना सदनानि गृहान् पुत्रादीन् स्पृशन्ति तादृशात् गृहादिकस्य प्रदातुः धनान्मा वियुजः । भाक्। 'भज सेवायाम् । लुङि सिपि सिचि ‘ बहुलं छन्दसि' इति ईडागमाभावः । ‘ एकाचः' इति इट्प्रतिषेधः । हलन्तलक्षणा वृद्धिः (पा. सू. ७. २. ३)। सिपो लोपः । यस्मादेवं तस्माद्वयं “पिशङ्गं नानारूपं कनकादिना अत एव “बहुलं प्रभूतं “रयिं (https://vedastudy.tripod.com/pur_index25/rayi.htm) धनं “वसीमहि आच्छादयेम । बहुधनवन्तो भवेमेत्यर्थः । ‘ वस आच्छादने '। आदादिकः । लिङि रूपम् ॥

आ तू नं इंदो श॒तदा॒त्वश्व्यं स॒हस्रंदातु पशु॒मद्धिरंण्यवत् ।

उपं मास्व बृह॒ती रे॒वती॒रिषोऽधिं स्तो॒त्रस्यं पवमान नो गहि ॥९

आ । तु । न॒ः । इ॒न्दो॒ इतिं । श॒तऽदांतु । अश्व्यंम् । स॒हस्रंऽदातु । प॒शु॒ऽमत् । हिरंण्यऽवत् ।

उपं । मा॒स्व॒ । बृ॒ह॒तीः । रे॒वतीः॑ । इषः॑ । अधिं । स्तो॒त्रस्यं । प॒व॒मा॒न॒ । न॒ः । ग॒हि॒ ॥९

आ । तु । नः । इन्दो इति । शतऽदातु । अश्व्यम् । सहस्रऽदातु । पशुऽमत् । हिरण्यऽवत् ।

उप । मास्व । बृहतीः । रेवतीः । इषः । अधि । स्तोत्रस्य । पवमान । नः । गहि ॥९

हे “इन्दो पवमान “नः अस्मभ्यं “तु क्षिप्रं धनम् “आ आयच्छ । कीदृशम् । “शतदातु । दातु दानम् । बहुदानम् “अश्व्यम् अश्वसहितं “सहस्रदातु सहस्रदानोपेतं “पशुमत् पश्वादियुक्तं “हिरण्यवत् हिरण्ययुक्तं च धनं देहि । तथा हे सोम “बृहतीः प्रभूतानि “रेवतीः धनवन्ति । यद्वा पयसोदातारः पशवः। तद्वन्ति “इषः अन्नानि चास्मभ्यम् “उप मास्व उपनिर्मिमीष्व । कुर्विति यावत् । किंच हे पवमान “नः अस्माकं स्वभूतस्य “स्तोत्रस्य श्रवणाय “अधि “गहि आगच्छ। ' क्रियार्थोपपदस्य°' (पा. सू.२.३.१४) इति चतुर्थी । “चतुर्थ्यर्थे बहुलं छन्दसि' इति षष्ठी ॥ ॥ २८ ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

१९ जुलै २०२१ (तमे) दिनाङ्के ११:०३ समये अन्तिमपरिवर्तनं जातम् •

ऋग्वेदः सूक्तं ९.७३

ऋग्वेदः - मण्डल ९
← सूक्तं ९.७२
सूक्तं ९.७३
पवित्र आङ्गिरसः
सूक्तं ९.७४ →

दे. पवमानः सोमः। जगती

प्रवर्ग्ये अभिष्टव एतत्सूक्तम्(आश्व.श्रौ.सू. ४.६)

स्रक्वे द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरन्त नाभयः ।

त्रीन्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन् ॥१॥

सम्यक्सम्यञ्चो महिषा अहेषत सिन्धोरूर्मावधि वेना अवीविपन् ।

मधोर्धाराभिर्जनयन्तो अर्कमित्प्रियामिन्द्रस्य तन्वमवीवृधन् ॥२॥

पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम् ।

महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम् ॥३॥

सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः ।

अस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवः ॥४॥*

पितुर्मातुरध्या ये समस्वरन्नृचा शोचन्तः संदहन्तो अव्रतान् ।

इन्द्रद्विष्टामप धमन्ति मायया त्वचमसिक्नीं भूमनो दिवस्परि ॥५॥

प्रत्नान्मानादध्या ये समस्वरञ्छलोकयन्त्रासो रभसस्य मन्तवः ।

अपानक्षासो बधिरा अहासत ऋतस्य पन्थां न तरन्ति दुष्कृतः ॥६॥

सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः ।

रुद्रास एषामिषिरासो अद्रुह स्पशः स्वञ्चः सुदृशो नृचक्षसः ॥७॥

ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्यन्तरा दधे ।

विद्वान्स विश्वा भुवनाभि पश्यत्यवाजुष्टान्विध्यति कर्ते अव्रतान् ॥८॥

ऋतस्य तन्तुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया ।

धीराश्चित्तत्समिनक्षन्त आशतात्रा कर्तमव पदात्यप्रभुः ॥९॥

सायणभाष्यम्

‘स्रक्वे' इति नवर्चं षष्ठं सूक्तमाङ्गिरसस्य पवित्रस्यार्षं जागतं पवमानसोमदेवताकम् । तथा चानुक्रम्यते- स्रक्वे पवित्रः' इति । प्रवर्ग्येऽभिष्टव एतत् सूक्तम् । सूत्रितं च-' स्रक्वे द्रप्सस्यायं वेनश्चोदयत्पृश्निगर्भाः ' (आश्व. श्रौ. ४.६) इति ।।

स्रक्वें द्र॒प्सस्य॒ धमंतः॒ समंस्वरन्नृ॒तस्य॒ योना॒ समंरंत॒ नाभंयः ।

त्रीन्त्स मू॒र्ध्नो असु॑रश्च॒क्र आ॒रभे॑ स॒त्यस्य॒ नाव॑ः सु॒कृत॑मपीपरन् ॥१

स्र॒क्वे॑ । द्र॒प्सस्य॑ । धम॑तः । सम् । अ॒स्व॒र॒न् । ऋ॒तस्य॑ । योना॑ । सम् । अ॒र॒न्त॒ । नाभ॑यः ।

त्रीन् । सः । मू॒र्ध्नः । असु॑रः । च॒क्रे॒ । आ॒ऽरभे॑ । स॒त्यस्य॑ । नाव॑ः । सु॒ऽकृत॑म् । अ॒पी॒प॒र॒न् ॥१

स्रक्वे । द्रप्सस्य । धमतः । सम् । अस्वरन् । ऋतस्य । योना । सम् । अरन्त । नाभयः ।

त्रीन् । सः । मूर्ध्नः । असुरः । चक्रे । आऽरभे । सत्यस्य । नावः । सुऽकृतम् । अपीपरन् ॥१

“स्रक्वे यज्ञस्य हनुस्थानीये। स्रक्व ओष्ठप्रान्तो हनुरुच्यते । ‘हनुरधिषवणफलकः' इत्याम्नानात् हनुस्थानीये अधिषवणफलके “धमतः अभिषूयमाणस्य “द्रप्सस्य

सोमस्यांशवः “समस्वरन् संगच्छन्ते । समशब्दयन् वा । “ऋतस्य सत्यभूतस्य यज्ञस्य “योना योनावुत्पत्तिस्थाने “नाभयः सोमरसाः “समरन्त संगच्छन्ते । अर्तेः ‘समो गमि°' इत्यादिनात्मनेपदम् ।' सर्तिशास्त्यर्तिभ्यश्च । इति च्लेरङ्। अथ “असुरः बलवान् सर्वेषां प्रीणनात् प्राणदाता वा “सः सोमः "मूर्ध्नः समुच्छ्रितान् “त्रीन् लोकान् “आरभे आरम्भणाय मनुष्यदेवादीनां संचरणाय करोति । किंच “सत्यस्य सत्यभूतस्य सोमस्य “नावः नौका इव स्थिताश्चतस्रः स्थाल्यः। आदित्याग्रयणोक्थ्यध्रुवस्थाल्य इति । ताः स्थाल्यः “सुकृतं सुष्ठु कर्माणि कुर्वन्तं यजमानम् “अपीपरन् अभिमतदानेन पूजयन्ति वा। पारयतेर्लुङि चङि सन्वद्भावाभ्यासेत्वदीर्घाः ॥

स॒म्यक्स॒म्यंचों महि॒षा अंहेषत॒ सिंधोंरू॒र्मावधिं वे॒ना अंवीविपन् ।

मधो॒र्धारा॑भिर्ज॒नयं॑तो अ॒र्कमित्प्रि॒यामिंद्र॑स्य त॒न्वं॑मवीवृधन्
॥२

स॒म्यक् । स॒म्यञ्च॑ः । म॒हि॒षाः । अ॒हे॒ष॒त॒ । सिन्धो॑ः । ऊ॒र्मौ । अधि॑ । वे॒नाः । अ॒वी॒वि॒प॒न् ।

मधो॑ः । धारा॑भिः । ज॒नयं॑न्तः । अ॒र्कम् । इत् । प्रि॒याम् । इन्द्र॑स्य । त॒न्व॑म् । अ॒वी॒वृ॒ध॒न् ॥२

सम्यक् । सम्यञ्चः । महिषाः । अहेषत । सिन्धोः । ऊर्मौ । अधि । वेनाः । अवीविपन् ।

मधोः । धाराभिः । जनयन्तः । अर्कम् । इत् । प्रियाम् । इन्द्रस्य । तन्वम् । अवीवृधन् ॥२

“महिषाः पूज्या महान्तो वर्त्विजः “सम्यञ्चः परस्परं संगताः सन्तः “सम्यक् “अहेषत सोमं सम्यक् प्रेरयन्ति अभिषुण्वन्तीति यावत् ।' हि गतौ वृद्धौ च ' । लुङि सिचि

रूपम् । ततः “वेनाः । ‘ वेनतेः कान्तिकर्मणः ' (निरु. १०, ३८) इति यास्कः । स्वर्गादिफलं कामयमाना ऋत्विजः “सिन्धोः स्यन्दमानस्योदकस्य “ऊर्मौ “अधि संघे वसतीवर्यादिषु जलेषु सोमम् “अवीविपन् कम्पयन्ति । तत्र प्रेरयन्तीत्यर्थः । वपतेर्ण्यन्तस्य लुङि चङि ' णौ चङ्युपधाया ह्रस्वः' इति ह्रस्वः । किंच “अर्कम् अर्चनीयं स्तोत्रं “जनयन्तः कुर्वन्तस्ते “प्रियां प्रियतमाम् “इन्द्रस्य “तन्वं धाम च “मधोः मदकरस्य सोमस्य “धाराभिः अवीवृधन् वर्धितवन्तः । वर्धतेर्लुङि चङि रूपम् ॥

प॒वित्रं॑वंतः॒ परि॒ वाचं॑मासते पि॒तैषां॑ प्र॒त्नो अ॒भि रं॑क्षति व्र॒तं ।

म॒हः सं॑मु॒द्रं वरुं॑णस्ति॒रो दं॑धे॒ धीरा॒ इच्छे॑कुर्ध॒रुणे॑ष्वा॒रभं॑ ॥३

प॒वित्रं॑ऽवन्तः । परिं । वाचं॑म् । आ॒स॒ते॒ । पि॒ता । ए॒षा॒म् ।
प्र॒त्नः । अ॒भि । र॒क्ष॒ति॒ । व्र॒तम् ।

म॒हः । स॒मु॒द्रम् । वरुं॑णः । ति॒रः । द॒धे॒ । धीरा॑ः । इत् ।
शे॒कु॒ः । ध॒रुणें॑षु । आ॒ऽरभं॑म् ॥३

पवित्रऽवन्तः । परि । वाचम् । आसते । पिता । एषाम् ।
प्रत्नः । अभि । रक्षति । व्रतम् ।

महः । समुद्रम् । वरुणः । तिरः । दधे । धीराः । इत् ।
शेकुः । धरुणेषु । आऽरभम् ॥३

“पवित्रवन्तः पवित्रेण शोधकेन सामर्थ्येन युक्ताः सोमस्य रश्मयः “वाचं सोमस्थितां माध्यमिकां वाचं “परि “आसते पर्युपविशन्ति । सोमोऽन्तरिक्षे तिष्ठति खलु ‘सोमो वै राजा गन्धर्वेष्वासीत्' (ऐ. ब्रा, १.२७) इत्याम्नानात् । ततः “प्रत्नः पुराणः “एषां रश्मीनां “पिता अयं सोमश्च “व्रतं

प्रकाशनात्मकं कर्म “अभि “रक्षति अवितं करोति । किंच “वरुणः सर्वस्य स्वतेजसाच्छादकः सोऽयं सोमः “महः महत् “समुद्रम् । अन्तरिक्षनामैतत् । महदन्तरिक्षं तै रश्मिभिः “तिरो “दधे अन्तर्हितमकरोत् । सर्वं व्याप्नोदिति यावत् । तमिमं सोमं “धीराः । “इत् अवधारणे । कर्मणि कुशलाः प्राज्ञा एवर्त्विजः “धरुणेषु सर्वस्य धारकेषु वसतीवर्याख्येषूदकेषु “आरभम् आरब्धुं “शेकुः शक्नुवन्ति च । रभेस्तुमर्थे ' शकि णमुल्कमुलौ' (पा. सू. ३. ४. १२) इति कमुल्। लित्स्वरेण मध्योदात्तः ॥

स॒हस्रं॑धा॒रेऽव॒ ते सम॑स्वरंदि॒वो नाके॒ मधुं॑जिह्वा अस॒श्चतः॑ ।

अस्य॒ स्पशो॒ न नि मिं॑षंति॒ भूर्ण॑यः प॒देपं॑दे पा॒शिनः॑ संति॒ सेतं॑वः ॥४

स॒हस्र॑ऽधारे । अव॑ । ते । सम् । अ॒स॒र॒न् । दि॒वः । नाके॑ । मधु॑ऽजिह्वाः । अ॒स॒श्चतः॑ ।

अस्य॑ । स्पशः॑ । न । नि । मि॒ष॒न्ति॒ । भूर्ण॑यः । प॒देऽप॑दे । पा॒शिनः॑ । स॒न्ति॒ । सेत॑वः ॥४

सहस्रऽधारे । अव । ते । सम् । असरन् । दिवः । नाके । मधुऽजिह्वाः । असश्चतः ।

अस्य । स्पशः । न । नि । मिषन्ति । भूर्णयः । पदेऽपदे । पाशिनः । सन्ति । सेतवः ॥४

“सहस्रधारे । बहूदकधारा यस्माद्द्रवन्ति तत्तथोक्तमन्तरिक्षम् । तस्मिन् वर्तमानाः “ते सोमरश्मयः “अव अवस्तात स्थिताः “समस्वरन् । पृथिवीं वृष्ट्या संयोजयन्तीत्यर्थः । किंच “दिवः द्युलोकस्य “नाके समुच्छ्रिते देशे वर्तमानाः “मधुजिह्वाः मध्वग्राः ।

सोमतेजसाग्रेभ्यो हि मधूत्पन्नं भवति । अतो मधुजिह्वाः ।
“असश्चतः संगतवर्जिताः पृथक्पृथग्दिव्यवस्थिताः “अस्य
सोमस्य स्वभूताः “स्पशः सारभूता रश्मयः “भूर्णयः
क्षिप्रगामिनः सन्तः “न “नि “मिषन्ति निमेषं न कुर्वन्ति ।
किंतु पापिनः सुकृतिनश्च ज्ञातुं सर्वदा जाग्रतीत्यर्थः।
अथवा । राजभृत्या यथा दुष्टान् विचारयितुं सर्वदा
जागरणं कुर्वन्ति तद्वदेते रश्मयः “पदेपदे स्थाने स्थाने
“सेतवः संबद्धाः सन्तः “पाशिनः पापकृतां बाधकाः
“सन्ति भवन्ति ।।

पि॒तुर्मा॒तुरध्या ये स॒मस्वंरन्नृ॒चा शोचंतः सं॒दहंतो अव्र॒तान् ।

इंद्रंद्विष्टा॒मपं धमंति मा॒यया॒ त्वच॒मसिंक्नीं॒ भूमंनो दि॒वस्परिं
॥५

पि॒तुः । मा॒तुः । अधिं । आ । ये । स॒म्ऽअस्वंरन् । ऋ॒चा ।
शोचंन्तः । स॒म्ऽदहंन्तः । अ॒व्र॒तान् ।

इन्द्रंऽद्विष्टाम् । अपं । ध॒म॒न्ति॒ । मा॒ययां । त्वचंम् ।
असिंक्नीम् । भूमंनः । दि॒वः । परिं ॥५

पितुः । मातुः । अधि । आ । ये । सम्ऽअस्वरन् । ऋचा ।
शोचन्तः । सम्ऽदहन्तः । अव्रतान् ।

इन्द्रऽद्विष्टाम् । अप । धमन्ति । मायया । त्वचम् ।
असिक्नीम् । भूमनः । दिवः । परि ॥५

“पितुर्मातुः द्यावापृथिव्योः । ‘ द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम्' (ऋ. सं. १.१६४.३३) इत्यादिषु द्यावापृथिव्योर्मातापितृत्वाम्नानात् । द्यावापृथिवीभ्यां “ये सोमरश्मयः “अध्या “समस्वरन् अधिकं प्रादुर्भूता अभवन् ते “ऋचा ऋत्विग्भिः

क्रियमाणया स्तुत्या “शोचन्तः दीप्यमानाः “अव्रतान् कर्मरहितान् यजमानान् “संदहन्तः सम्यग्विनाशयन्तस्ते रश्मयः “इन्द्रद्विष्टाम् इन्द्राय द्वेषकारिणीम् । ‘क्ते च ' (पा. सू. ६. २. ४५) इति पूर्वपदप्रकृतिस्वरः । इन्द्रेण द्विष्टां वा । “असिक्नीम् । रात्रिनामैतत् । रात्रिवत्कृष्णरूपां “त्वचम् । राक्षसमित्यर्थः । “मायया कर्मणा प्रज्ञया वा “भूमनः विस्तृताद्भूलोकात् “दिवस्परि द्युलोकाच्च “अप “धमन्ति अपगतं कुर्वन्ति । अपघ्न्तीत्यर्थः ॥ ॥ २९ ॥

प्र॒त्नान्माना॒दध्या ये स॒मस्वं॑र॒ंछलोकं॑यंत्रासो रभ॒सस्य॒ मंतं॑वः ।

अपां॑न॒क्षासों बधि॒रा अं॑हासत ऋ॒तस्य॒ पंथा॒ं न तं॑रंति दु॒ष्कृतः॑ ॥६

प्र॒त्नात् । मानां॑त् । अधिं॑ । आ । ये । स॒म्ऽअस्वं॑रन् ।
श्लोकं॑ऽयन्त्रासः । र॒भ॒सस्यं॑ । मन्तं॑वः ।

अपं॑ । अ॒न॒क्षासः॑ । ब॒धि॒राः । अ॒हा॒स॒त॒ । ऋ॒तस्यं॑ । पन्थां॑म्
। न । त॒र॒न्ति॒ । दु॒ःऽकृतः॑ ॥६

प्रत्नात् । मानात् । अधि । आ । ये । सम्ऽअस्वरन् ।
श्लोकऽयन्त्रासः । रभसस्य । मन्तवः ।

अप । अनक्षासः । बधिराः । अहासत । ऋतस्य । पन्थाम्
। न । तरन्ति । दुःऽकृतः ॥६

“श्लोकयन्त्रासः । श्लोकाः स्तुतयः। स्तुतिनियमनाः
“रभसस्य “मन्तवः वेगमभिमन्यमानाः एतादृशाः “ये
सोमरश्मयः “प्रत्नात् पुराणात् “मानात् अन्तरिक्षात्
“अध्या “समस्वरन् सह प्रादुर्भूता अभवन् तान्रश्मीन्
“अनक्षासः चक्षुर्वर्जिताः साधु पदार्थानामद्रष्टारो नराः

“बधिराः देवतास्तुतिश्रवणवर्जिताः पापकृतो नरश्च “अप “अहासत तान् परित्यजन्ति । दर्शिनः श्रवणवन्तो मेधाविनस्तु न परिजहति किंतु स्तुवन्ति । तदेवाह । “ऋतस्य सत्यस्य “पन्थां मार्गभूतमेषां गणं “दुष्कृतः पापकृतो नराः “न “तरन्ति नोत्तारयन्ति । सुकृतस्तु तरन्तीत्यभिप्रायः ।।

स॒हस्रं॑धारे॒ वित॑ते प॒वित्र॒ आ वाचं॑ पुनंति क॒वयो॑ मनी॒षिणः॑ ।

रु॒द्रास॑ एषामिषि॒रासो॑ अ॒द्रुह॑ः स्पश॑ः स्वंचः॑ सु॒दृशो॑ नृ॒चक्ष॑सः ॥७

स॒हस्रं॑ऽधारे । वि॒ऽत॑ते । प॒वित्रे॑ । आ । वाचं॑म् । पु॒न॒न्ति॒ । क॒वयः॑ । म॒नी॒षिणः॑ ।

रु॒द्रासः॑ । ए॒षा॒म् । इ॒षि॒रासः॑ । अ॒द्रुहः॑ । स्पशः॑ । सु॒ऽअञ्चः॑ । सु॒ऽदृशः॑ । नृ॒ऽचक्षंसः ॥७

सहस्रऽधारे । विऽतते । पवित्रे । आ । वाचम् । पुनन्ति । कवयः । मनीषिणः ।

रुद्रासः । एषाम् । इषिरासः । अद्रुहः । स्पशः । सुऽअञ्चः । सुऽदृशः । नृऽचक्षसः ॥७

कवयः क्रान्तकर्माणः अत एव "मनीषिणः प्राज्ञा ऋत्विजः "सहस्रधारे अनेकधारोपेते "वितते कर्मणि विस्तृते "पवित्रे शुद्ध्युत्पादके सोमे वर्तमानां "वाचं माध्यमिकाम् । सोमः खलु विश्वावसुप्रभृतिगन्धर्वेष्वन्तरिक्षेऽवतिष्ठते ' सोमो वै राजा गन्धर्वेष्वासीत् ' (ऐ. ब्रा.१.२७) इति श्रवणात् । तत्र वर्तमानं सोमं देवा गोरूपया वाचा क्रीतवन्तः । तदा सोमे वाक्तिष्ठतीति शक्यते वक्तुम् । तस्मात्सोमे स्थितां माध्यमिकां वाचम् "आ "पुनन्ति संस्कुर्वन्ति । स्तुवन्तीति

यावत् । य उक्तगुणा मरुतां मातरं माध्यमिकां वाचं स्तुवन्ति तेषां “रुद्रासः रुद्रपुत्रा मरुतः “स्पशः मध्यमया वाचा वशिनो भवन्ति । कीदृशाः । “इषिराः गमनशीलाः “अद्रुहः स्तोतॄणामद्रोग्धारः । यद्वा । द्रुहेः कर्मणि क्विबौणादिकः । परैरहिंस्याः । “स्वञ्चः शोभनाञ्चनाः अत एव “सुदृशः सुदर्शनाः "नृचक्षसः नृणां कर्मनेतॄणां द्रष्टारः ॥

ऋ॒तस्यं गो॒पा न दभा॑य सु॒क्रतु॒स्त्री ष प॒वित्रा॑ हृ॒द्यं१॒॑तरा दं॑धे ।

वि॒द्वान्त्स विश्वा॒ भुवं॑ना॒भि पं॑श्य॒त्यवाजुं॑ष्टान्विध्यति क॒र्ते अंव्र॒तान् ॥८

ऋ॒तस्यं । गो॒पाः । न । दभा॑य । सु॒ऽक्रतुः॑ । त्री । सः । प॒वित्रा॑ । हृ॒दि । अ॒न्तः । आ । द॒धे॒ ।

वि॒द्वान् । सः । विश्वां । भुवंना । अ॒भि । प॒श्य॒ति॒ । अवं ।
अजुंष्टान् । वि॒ध्य॒ति॒ । क॒र्ते । अ॒व्र॒तान् ॥८

ऋतस्य । गोपाः । न । दभाय । सुऽक्रतुः । त्री । सः ।
पवित्रा । हृदि । अन्तः । आ । दधे ।

विद्वान् । सः । विश्वा । भुवना । अभि । पश्यति । अव ।
अजुष्टान् । विध्यति । कर्ते । अव्रतान् ॥८

“ऋतस्य सत्यभूतस्य यज्ञस्य “गोपाः गोपायिता अत एव “सुक्रतुः शोभनकर्मा सोमः “न “दभाय दम्भाय स्तम्भनाय न भवति । परैर्दम्भयितुं न शक्यत इत्यर्थः । किंच “सः सोमः “त्री । ‘ शेश्छन्दसि बहुलम्' इति लुक् । त्रीणि “पवित्रा अग्निवायुसूर्यात्मकानि त्रीणि पवित्राणि “हृद्यन्तः हृदयस्यान्तः “आ “दधे आदधाति । स्वस्मिन् संगमयतीत्यर्थः । अपि च “विद्वान् सर्वं जानानः “सः सोमः “विश्वा “भुवना सर्वाणि भुवनानि “अभि “पश्यति ।

ततः “कर्ते । करोतेरौणादिकः तप्रत्ययः । कर्मणि “अजुष्टान् अप्रियान् अत एव “अव्रतान् अयजमानान् “अव “विध्यति अवाङ्मुखान् कृत्वा ताडयति । हिनस्तीति यावत् ॥

ऋ॒तस्य॑ तंतु॒र्वित॑तः प॒वित्र॒ आ जि॒ह्वाया॒ अग्र॒े वरु॑णस्य मा॒यया॑ ।

धीरा॑श्चि॒त्तत्स॒मिन॑क्षंत आश॒तात्रा॑ क॒र्तमव॑ पदा॒त्यप्र॑भुः ॥९

ऋ॒तस्य॑ । तन्तुः॑ । विऽत॑तः । प॒वित्रे॑ । आ । जि॒ह्वायाः॑ । अग्रे॑ । वरु॑णस्य । मा॒यया॑ ।

धीराः॑ । चि॒त् । तत् । स॒म्ऽइन॑क्षन्तः । आ॒श॒त॒ । अत्र॑ । क॒र्तम् । अव॑ । प॒दा॒ति॒ । अप्र॑ऽभुः ॥९

ऋतस्य । तन्तुः । विऽततः । पवित्रे । आ । जिह्वायाः । अग्रे । वरुणस्य । मायया ।

धीराः । चित् । तत् । सम्ऽइनक्षन्तः । आशत । अत्र । कर्तम् । अव । पदाति । अप्रऽभुः ॥९

“ऋतस्य सत्यभूतस्य यज्ञस्य “तन्तुः तनिता “पवित्रे अविवालमये दशापवित्रे “विततः विस्तृतः । यद्वा । पवित्रेऽन्तरिक्षे विस्तृतः सोमः “वरुणस्य “जिह्वाया “अग्रे “मायया कर्मणा “आ आस्थितः। वरुणजिह्वाग्र आपस्तिष्ठन्ति । तासु सोमो वसतीति वसतीवर्याद्युदकेषु स्थित इत्यर्थः । ततः “धीराश्चित् कर्मणि प्राज्ञा एव “तत् वरुणजिह्वाग्रस्थानं “समिनक्षन्तः । इनक्षतिर्गतिकर्मा । संव्याप्नुवन्तः सन्तः “आशत स्तुतिभिर्हविर्भिर्वा प्राप्नुवन् । यः पुनः “कर्तम् ।' कालाध्वनो:° ' इति द्वितीया । कर्मणि “अप्रभुः समर्थो न भवति सोऽयम् “अत्र अस्मिनेव लोके

“अव “पदाति अवस्तान्नरके पतति नोपरि गच्छति । ‘पद गतौ ' । लेट्याडागमः । तस्मात्सर्वैरग्निष्टोमादिकर्म कर्तव्यमित्येषोऽर्थोऽभिहितो भवति ॥ ॥ ३० ॥

मण्डल ९

सूक्तं १.११ सूक्तं १.४१ सूक्तं १.७१ सूक्तं १.१०१

सूक्तं १.१२ सूक्तं १.४२ सूक्तं १.७२ सूक्तं १.१०२

सूक्तं १.१३ सूक्तं १.४३ सूक्तं १.७३ सूक्तं १.१०३

सूक्तं १.१४ सूक्तं १.४४ सूक्तं १.७४ सूक्तं १.१०४

सूक्तं १.१५ सूक्तं १.४५ सूक्तं १.७५ सूक्तं १.१०५

सूक्तं १.१६ सूक्तं १.४६ सूक्तं १.७६ सूक्तं १.१०६

सूक्तं १.१७ सूक्तं १.४७ सूक्तं १.७७ सूक्तं १.१०७

सूक्तं १.१८ सूक्तं १.४८ सूक्तं १.७८ सूक्तं १.१०८

सूक्तं १.१९ सूक्तं १.४९ सूक्तं १.७९ सूक्तं १.१०९

सूक्तं १.२० सूक्तं १.५० सूक्तं १.८० सूक्तं १.११०

सूक्तं १.२१ सूक्तं १.५१ सूक्तं १.८१ सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.७४

ऋग्वेदः - मण्डल ९
← सूक्तं ९.७३
सूक्तं ९.७४
कक्षीवान् दैर्घतमसः।
सूक्तं ९.७५ →

दे. पवमानः सोमः। जगती, ८ त्रिष्टुप् ।

शिशुर्न जातोऽव चक्रदद्वने स्वर्यद्वाज्यरुषः सिषासति ।

दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्म सप्रथः ॥१॥

दिवो य स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः ।

सेमे मही रोदसी यक्षदावृता समीचीने दाधार समिषः कविः ॥२॥

महि प्सरः सुकृतं सोम्यं मधूर्वी गव्यूतिरदितेरृतं यते ।

ईशे यो वृष्टेरित उस्रियो वृषापां नेता य इतऊतिरृग्मियः ॥३॥

आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते ।

समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमव मेहन्ति पेरवः ॥४॥

अरावीदंशुः सचमान ऊर्मिणा देवाव्यं मनुषे पिन्वति त्वचम् ।

दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे ॥५॥

सहस्रधारेऽव ता असश्चतस्तृतीये सन्तु रजसि प्रजावतीः ।

चतस्रो नाभो निहिता अवो दिवो हविर्भरन्त्यमृतं घृतश्चुतः ॥६॥

श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वाँ असुरो वेद भूमनः ।

धिया शमी सचते सेमभि प्रवद्दिवस्कवन्धमव दर्षदुद्रिणम् ॥७॥

अध श्वेतं कलशं गोभिरक्तं कार्ष्मन्ना वाज्यक्रमीत्ससवान् ।

आ हिन्विरे मनसा देवयन्तः कक्षीवते शतहिमाय गोनाम् ॥८॥

अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं वि पवमान धावति ।

स मृज्यमानः कविभिर्मदिन्तम स्वदस्वेन्द्राय पवमान पीतये ॥९॥

सायणभाष्यम्

‘शिशुर्न' इति नवर्चं सप्तमं सूक्तं दैर्घतमसस्य कक्षीवत आर्षं पवमानसोमदेवताकम् । अष्टमी त्रिष्टुप् शिष्टा जगत्यः । तथा चानुक्रम्यते- शिशुर्न कक्षीवांस्त्रिष्टुबष्टमी' इति । गतः सूक्तविनियोगः ॥

शिशुर्न जातोऽवं चक्रदद्वने स्व१र्यद्वाज्यंरुषः सिषांसति ।

दिवो रेतंसा सचते पयोवृधा तमींमहे सुमती शर्म सप्रथः ॥ १

शिशुः । न । जातः । अवं । चक्रदत् । वनें । स्वः । यत् । वाजी । अरुषः । सिसांसति ।

दि॒वः । रेतं॑सा । स॒च॒ते॒ । प॒य॒ःऽवृधा॑ । तम् । ई॒म॒हे॒ ।
सु॒ऽम॒ती । शर्म॑ । स॒ऽप्रथः॑ ॥१

शिशुः । न । जातः । अव । चक्रदत् । वने । स्वः । यत् ।
वाजी । अरुषः । सिसासति ।

दिवः । रेतसा । सचते । पयःऽवृधा । तम् । ईमहे ।
सुऽमती । शर्म । सऽप्रथः ॥१

स पवमानः सोमः “वने वननीये वसतीवर्याख्य उदके “जातः उत्पन्नः "शिशुर्न शिशुरिव “अव “चक्रदत् अवाङ्मुखं क्रन्दति । तदोदकमध्ये पतञ्छब्दं करोति खलु। “यत् यदा “वाजी बलवानन्नवान् वा “अरुषः आरोचमानः । यद्वा । वाज्यश्व इव अरुषः । अर्तेरुषच् । गमनशीलः सोमः “स्वः स्वर्गलोकं “सिषासति संभक्तुमिच्छति । सनोतेः सनीडभाव आत्वम् । ‘ सनोतेः०' इति सांहितिकं षत्वम् । सोऽयं “पयोवृधा गवामोषधीनां च क्षीरस्य वर्धकेन’

“रेतसा उदकेन सह “दिवः द्युलोकात् "सचते पार्थिवं लोकं समवैति । “तं तादृशं प्रसिद्धं सोमं “सप्रथः सर्वतः पृथुतरं धनादिना युक्तं “शर्म गृहं तद्वयं “सुमती । ‘सुपां सुलुक्°' इति तृतीयायाः पूर्वसवर्णदीर्घः । सुमत्या शोभनया स्तुत्या “ईमहे याचामहे । ईमह इति याञ्चाकर्मा। ‘ ईङ् गतौ । देवादिकः । छान्दसः श्यनो लुक् ॥

दि॒वो यः स्क॒म्भो ध॒रुण॒ः स्वा॑तत॒ आपू॑र्णो अ॒शुः प॒र्येति॑ वि॒श्वतः॑ ।

सेमे म॒ही रोद॑सी यक्षदा॒वृता॑ समीची॒ने दा॑धार॒ समिषः॑ क॒विः ॥२

दि॒वः । यः । स्क॒म्भः । ध॒रुणः॑ । सुऽआ॑ततः । आऽपू॑र्णः । अ॒शुः । प॒रि॒ऽएति॑ । वि॒श्वतः॑ ।

सः । इ॒मे इति॑ । म॒ही इति॑ । रोद॑सी॒ इति॑ । य॒क्ष॒त् । आ॒ऽवृता॑ । स॒मी॒ची॒ने इति॑ स॒म्ऽई॒ची॒ने । दा॒धा॒र॒ । सम् । इषः॑ । क॒विः ॥२

दिवः । यः । स्कम्भः । धरुणः । सुऽआततः । आऽपूर्णः । अंशुः । परिऽएति । विश्वतः ।

सः । इमे इति । मही इति । रोदसी इति । यक्षत् । आऽवृता । समीचीने इति सम्ऽईचीने । दाधार । सम् । इषः । कविः ॥२

“दिवः द्युलोकस्य “स्कम्भः विष्कम्भयिता संरोद्धा “धरुणः सर्वस्य धारकः । यद्वा । पृथिव्या धारकः । विष्टम्भो दिवो धरुणः पृथिव्याः ' (ऋ. सं. ९.८९.६) इत्याम्नानात् । तादृशः “स्वाततः सुष्ठु सर्वत्र “विततः विस्तृतः अत एव “आपूर्णः पात्रेषु संपूर्णः “यः “अंशुः सोमात्मकः “विश्वतः सर्वतः “पर्येति परिगच्छति । ‘तिङि चोदात्तवति' इति

गतेर्निघातः । “सः सोमः “इमे “रोदसी द्यावापृथिव्यौ “आवृता संभजनीयेन कर्मणा “यक्षत् यजतु । स्वबलेन संयोजयत्वित्यर्थः । ततः सोऽयं “समीचीने परस्परं संगते द्यावापृथिव्यौ "दाधार धारयांचकार । ‘तुजादीनाम्' इत्यभ्यासस्य दीर्घः । अनन्तरं “कविः क्रान्तकर्मा “इषः अन्नानि स्तोतृभ्यः “सं प्रयच्छतु । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

महि॒ प्सर॒ः सुकृ॑तं सो॒म्यं मधू॒र्वी गव्यू॑ति॒रदि॑तेर्ऋ॒तं य॒ते ।

ईशे॒ यो वृ॒ष्टेरि॒त उ॒स्रियो॒ वृषा॒पां ने॒ता य इ॒तऊ॑तिर्ऋ॒ग्मियः॑ ॥३

महि॑ । प्सरः॑ । सुऽकृ॑तम् । सो॒म्यम् । मधु॑ । उ॒र्वी । गव्यू॑तिः । अदि॑तेः । ऋ॒तम् । य॒ते ।

ईशे॑ । यः । वृ॒ष्टेः । इ॒तः । उ॒स्रिय॑ः । वृषा॑ । अ॒पाम् । ने॒ता । यः । इ॒तःऽऊं॑तिः । ऋ॒ग्मिय॑ः ॥३

महि । प्सरः । सुऽकृतम् । सोम्यम् । मधु । उर्वी । गव्यूतिः । अदितेः । ऋतम् । यते ।

ईशे । यः । वृष्टेः । इतः । उस्रियः । वृषा । अपाम् । नेता । यः । इतःऽऊतिः । ऋग्मियः ॥३

“ऋतं सत्यभूतं यज्ञं “यते गच्छते तस्मा इन्द्राय “सुकृतं सुष्ठु संस्कृतं “सोम्यं सोममयं "महि । महत् प्रभूतं “मधु मधुररसं “प्सरः भक्षणं पानीयं भवति । 'प्सा भक्षणे'। किंच अस्मद्यज्ञं प्रत्यागच्छतामिन्द्रादीनाम् “अदितेः पृथिव्याः “गव्यूतिः मार्गश्च “उर्वी विस्तीर्णो भवति । इन्द्रस्य शतसहस्रसंख्याकैर्हरिभिः सह गन्तुं मार्गो विस्तीर्णोऽभवदित्यर्थः । “यः इन्द्रः “इतः इमं लोकं प्रत्यापतन्याः “वृष्टेः “ईशे ईश्वरो भवति । तथा “उस्रियः ।

उस्रेति गोनाम । गोभ्यो हितः “अपाम् उदकानां “वृषा वर्षकः यज्ञस्य “नेता नायकः “इतऊतिः इममस्मदीयं यज्ञं प्रत्यूतिर्गमनं यस्य स तथोक्तः । इतो गच्छन् “यः इन्द्रः “ऋग्मियः ऋगर्हः स्तोतव्यो भवति । तस्मा अयं सोमः पातव्यो भवतीति ।।

आ॒त्म॒न्वन्नभो॑ दुह्यते घृ॒तं पय॑ ऋ॒तस्य॒ नाभि॑र॒मृत॒ं वि जा॑यते ।

स॒मी॒ची॒नाः सु॒दान॑वः प्रीण॑न्ति॒ तं नरो॑ हि॒तमव॑ मेह॑न्ति॒ पेर॑वः ॥४

आ॒त्म॒न्ऽवत् । नभः॑ । दु॒ह्य॒ते॒ । घृ॒तम् । पयः॑ । ऋ॒तस्य॑ । नाभिः॑ । अ॒मृत॑म् । वि । जा॒य॒ते॒ ।

स॒म्ऽई॒ची॒नाः । सु॒ऽदान॑वः । प्री॒ण॒न्ति॒ । तम् । नरः॑ । हि॒तम् । अव॑ । मे॒ह॒न्ति॒ । पेर॑वः ॥४

आत्मन्ऽवत् । नभः । दुह्यते । घृतम् । पयः । ऋतस्य । नाभिः । अमृतम् । वि । जायते ।

सम्ऽईचीनाः । सुऽदानवः । प्रीणन्ति । तम् । नरः । हितम् । अव । मेहन्ति । पेरवः ॥४

“आत्मन्वत् । “अनो नुट्' इति नुडागमः । आत्मवत् सारवत् “घृतं “पयः च “नभः नभस आदित्यरूपात्सोमः “दुह्यते । किंच “ऋतस्य यज्ञस्य “नाभिः । ‘णह बन्धने' । ‘स्वमोर्नपुंसकात्' (पा. सू. ७. १. २३) इति सोर्लुग्न भवति सर्वविधीनां छन्दसि विकल्पितत्वात् । नाभि यज्ञस्य बन्धकम् “अमृतम् उदकं च “वि “जायते तस्मादेव प्रादुर्भवति । ततः “सुदानवः शोभनस्तुतिहविर्दानवन्तो यजमानाः “समीचीनाः परस्परं संगताः सन्तः “तम् इदं

सोमं प्रीणयन्ति स्तुतिभिस्तर्पयन्ति । अथ “नरः नेतारः “पेरवः । ‘ पा रक्षणे । मापोरित्वे रुन्' इति रुन्प्रत्ययः । सर्वस्य रक्षकाः सोमरश्मयः “हितं निहितम् “अव अवस्ताद्वर्तमानं पार्थिवमुदकं “मेहन्ति वर्षन्ति । ‘ मिह सेचने ' । भौवादिकः । यद्वा । हितमुदकं पृथिवीं प्रति मेहन्ति ।

अरा॑वीद॒ंशुः सच॑मान ऊ॒र्मिणा॑ देवा॒व्यं१॒ मनु॑षे पिन्वति॒ त्वच॑ं ।

दधा॑ति॒ गर्भ॒मदि॑तेरु॒पस्थ॒ आ येन॑ तो॒कं च॒ तन॑यं च॒ धाम॑हे ॥५

अरा॑वीत् । अ॒ंशुः । सच॑मानः । ऊ॒र्मिणा॑ । दे॒व॒ऽअ॒व्य॑म् । मनु॑षे । पि॒न्व॒ति॒ । त्वच॑म् ।

दधा॑ति । गर्भ॑म् । अदि॑तेः । उ॒पऽस्थे॑ । आ । येन॑ । तो॒कम् । च॒ । तन॑यम् । च॒ । धाम॑हे ॥५

अरावीत् । अंशुः । सचमानः । ऊर्मिणा । देवऽअव्यम् । मनुषे । पिन्वति । त्वचम् ।

दधाति । गर्भम् । अदितेः । उपऽस्थे । आ । येन । तोकम् । च । तनयम् । च । धामहे ॥५

“ऊर्मिणा वसतीवर्यादीनामुदकानां संघेन “सचमानः “अंशुः सोमः “अरावीत् शब्दं करोति । किंच स सोमः “देवाव्यम् । अव रक्षणे' ।' अवितॄस्तृतन्त्रिभ्य ईः' इति ईप्रत्ययः । देवानां पालयित्रीं “त्वचम् आत्मनः शरीरं “मनुषे मनुष्याय यजमानाय पिन्वति सिञ्चति । पात्रेषु क्षरतीति यावत् ।। अपि च “अदितेः अदीनायाः पृथिव्याः “उपस्थे समीप ओषधीषु तं “गर्भम् “आ “दधाति सुधामयैः किरणैर्विदधाति । “येन गर्भेण वयं “तोकं

दुःखनाशकं पुत्रं “च “तनयम् । तनोति कुलमिति तनयः पौत्रः । तं “च “धामहे दध्महे धारयामः । दधातेर्लटि ‘बहुलं छन्दसि' इति शपो लुक् ॥ ॥ ३१ ॥

स॒हस्रं॑धा॒रेऽव॒ ता अं॑स॒श्चतं॑स्तृ॒तीये॑ संतु॒ रजं॑सि प्र॒जावं॑तीः ।

चतं॑स्रो॒ नाभो॒ निहिं॑ता अ॒वो दि॒वो ह॒विर्भ॑रं॑त्य॒मृतं॑ घृत॒श्चुतः॑ ॥६

स॒हस्रं॑ऽधारे । अवं॑ । ताः । अ॒स॒श्चतः॑ । तृ॒तीये॑ । स॒न्तु॒ । रजं॑सि । प्र॒जाऽवं॑तीः ।

चतं॑स्रः । नाभः॑ । निऽहिं॑ताः । अ॒वः । दि॒वः । ह॒विः । भ॒र॒न्ति॒ । अ॒मृतं॑म् । घृ॒त॒ऽश्चुतः॑ ॥६

सहस्रऽधारे । अव । ताः । असश्चतः । तृतीये । सन्तु । रजसि । प्रजाऽवतीः ।

चतस्रः । नाभः । निऽहिताः । अवः । दिवः । हविः । भरन्ति । अमृतम् । घृतऽश्चुतः ॥६

“सहस्रधारे बहूदकधारे “तृतीये “रजसि लोके स्वर्गे वर्तमानाः “असश्चतः परस्परमसक्ताः “प्रजावतीः उत्पादितप्रजावत्यः सोमस्य स्वभूताः “ताः “अव “सन्तु अवस्तात्पृथिव्यां पतन्तु । कास्ता इत्याह । “चतस्रो “नाभः तपसो बाधिकाः सोमस्य संबन्धिन्यश्चतस्रो दीप्तयः कलाः “दिवः द्युलोकात् “अवः अवस्तात् “निहिताः सोमेन स्थापिताः ताः “घृतश्चुतः घृतस्योदकस्य च्यावयित्र्यः सत्यः “हविः सोमादिलक्षणं “भरन्ति देवानां प्रयच्छन्ति । तथा “अमृतं गोष्वोषधीषु च पयोरूपं सुधारूपं च भरन्ति प्रक्षिपन्ति ॥

श्वे॒तं रू॒पं कृं॑णुते॒ यत्सिषा॑सति॒ सोमो॑ मी॒ढ्वाँ असुं॑रो वेद॒

भूमं॑नः ।

धि॒या शमीं॑ सचते॒ सेम॒भि प्र॒वद्दि॒वस्कवं॑ध॒मवं॑ दर्षदु॒द्रिणं॑ ॥ ७

श्वे॒तम् । रू॒पम् । कृ॒णु॒ते॒ । यत् । सिसां॑सति । सोमः॑ । मी॒ढ्वान् । असुं॑रः । वे॒द॒ । भूमं॑नः ।

धि॒या । शमीं॑ । स॒च॒ते॒ । सः । ई॒म् । अ॒भि । प्र॒ऽवत् । दि॒वः । कवं॑न्धम् । अवं॑ । द॒र्ष॒त् । उ॒द्रिणं॑म् ॥७

श्वेतम् । रूपम् । कृणुते । यत् । सिसासति । सोमः । मीढ्वान् । असुरः । वेद । भूमनः ।

धिया । शमी । सचते । सः । ईम् । अभि । प्रऽवत् । दिवः । कवन्धम् । अव । दर्षत् । उद्रिणम् ॥७

“श्वेतं दीप्यमानं शुक्लं “रूपं “कृणुते तदा करोति “यत् यदा “सिषासति स्वर्गं संभक्तुमिच्छति । सोमे पात्राण्यागते सति तत्तेजसानुरञ्जितानां तेषां श्वेतं रूपं भवति । ततः “मीढ्वान् । 'मिह सेचने । अस्मात् क्वसौ ‘ दाश्वान्साह्वान्मीढ्वांश्च' इति निपातनादभिमतरूपसिद्धिः । कामानां सेक्ता “असुरः प्राज्ञो बलवान् वा “सोमः “भूमनः बहुधनानि “वेद स्तोतृभ्यो दातुं जानाति । प्रयच्छतीति यावत् । “स “ईम् । “ सोऽचि लोपे चेत' इति सुलोपः । सोऽयं “धिया प्रज्ञानेन “प्रवत् प्रकृष्टानि “शमी । द्वितीयायाः पूर्वसवर्णदीर्घः । कर्माणि “अभि “सचते अभितः समवैति । किंच “दिवः अन्तरिक्षात् “उद्रिणम् उदकवन्तं “कवन्धं मेघम् । कवन्धशब्देन मेघोऽभिधीयते । तात्स्थ्यात्ताच्छब्द्यमिति । मेघम् “अव दर्षत् अवदारयति । विवृतद्वारं करोति । मेघं विदार्यान्तरिक्षात् वृष्टिं करोतीत्यर्थः ॥

अध॑ श्वे॒तं क॒लश॒ं गोभि॑र॒क्तं कार्ष्म॒न्ना वा॒ज्य॑क्रमीत्सस॒वान्
।

आ हि॑न्विरे॒ मन॑सा देव॒यन्तः॑ क॒क्षीव॑ते श॒तहि॑माय॒ गोना॑ ॥८

अध॑ । श्वे॒तम् । क॒लश॑म् । गोभिः॑ । अ॒क्तम् । कार्ष्म॑न् ।
आ । वा॒जी । अ॒क्र॒मी॒त् । स॒स॒ऽवान् ।

आ । हि॒न्वि॒रे॒ । मन॑सा । दे॒व॒ऽयन्तः॑ । क॒क्षीव॑ते ।
श॒तऽहि॑माय । गोना॑म् ॥८

अध । श्वेतम् । कलशम् । गोभिः । अक्तम् । कार्ष्मन् ।
आ । वाजी । अक्रमीत् । ससऽवान् ।

आ । हिन्विरे । मनसा । देवऽयन्तः । कक्षीवते ।
शतऽहिमाय । गोनाम् ॥८

“अध अथानन्तरं “श्वेतं संप्रति सोमसंसर्गात् श्वेतवर्णं “गोभिः उदकैः "अक्तं संपृक्तं द्रोणकलशं “ससवान् संभजन सोमः “आ “अक्रमीत् आक्रमते । “कार्ष्मन्। कार्ष्मशब्दः काष्ठावचनः । आजिं धावन्तो योद्धारो यां गन्तुमिच्छन्ति तस्यां काष्ठायां “वाजी कश्चिदश्वो युद्धं भजमान आक्रमीत् आक्रमते । सोमः काष्ठायां द्रोणकलशे पततीत्यर्थः । ततस्तस्मै सोमाय “देवयन्तः देवानिच्छन्त ऋत्विजः “मनसा “आ “हिन्विरे स्तुतीराभिमुख्येन प्रेरयन्ति । तत्र “शतहिमाय बहुगमनाय “कक्षीवते स्तोत्रकारिण एतन्नामकायर्षये सोमः “गोनां गाः पशून् प्रेरयति । ' गोः पादान्ते ' (पा. . ७. १. ५७) इति नुडागमः । ‘ क्रियाग्रहणं कर्तव्यम्' इति संप्रदानसंज्ञा । चतुर्थ्यर्थे षष्ठी ॥

अ॒द्भिः सोम॑ पपृचा॒नस्यं ते॒ रसोऽव्यो॒ वार॒ं वि पंवमान

धावति ।

स मृ॒ज्यमा॑नः क॒विभि॑र्म॒दिंतम॒ स्वद॒स्वेंद्रा॑य पवमान पी॒तयें ॥९

अ॒त्ऽभिः । सो॒म॒ । प॒पृ॒चा॒नस्यं । ते॒ । रस॑ः । अव्य॑ः । वार॑म् । वि । प॒व॒मा॒न॒ । धा॒व॒ति॒ ।

सः । मृ॒ज्यमा॑नः । क॒विऽभि॑ः । म॒दि॒न्ऽत॒म॒ । स्वद॑स्व । इन्द्रा॑य । प॒व॒मा॒न॒ । पी॒तयें ॥९

अत्ऽभिः । सोम । पपृचानस्य । ते । रसः । अव्यः । वारम् । वि । पवमान । धावति ।

सः । मृज्यमानः । कविऽभिः । मदिन्ऽतम । स्वदस्व । इन्द्राय । पवमान । पीतये ॥९

हे “पवमान पवित्रेण पूयमान हे “सोम "अद्भिः वसतीवर्यादिभिरुदकैः “पपृचानस्य संपृच्यमानस्य “ते तव “रसः “अव्यः अवेः “वारं वालं दशापवित्रं “वि “धावति विविधं प्राप्नोति । ततो हे “मदिन्तम मादयितृतम हे “पवमान सोम त्वं “कविभिः क्रान्तकर्मभिर्ऋत्विग्भिः “मृज्यमानः पूयमानः सन् “इन्द्राय “पीतये इन्द्रस्य पानार्थं “स्वदस्व प्रियरसो भव ॥ ॥ ३२ ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.७५

← सूक्तं ९.७४

ऋग्वेदः - मण्डल ९

सूक्तं ९.७५

कविर्भार्गवः।

सूक्तं ९.७६ →

दे. पवमानः सोमः। जगती।

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।

आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥१॥

ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।

दधाति पुत्रः पित्रोरपीच्यं नाम तृतीयमधि रोचने दिवः ॥२॥

अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमानः कोश आ हिरण्यये ।

अभीमृतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजति ॥३॥

अद्रिभिः सुतो मतिभिश्चनोहितः प्ररोचयन्रोदसी मातरा शुचिः ।

रोमाण्यव्या समया वि धावति मधोर्धारा पिन्वमाना दिवेदिवे ॥४॥

परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम् ।

ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम् ॥५॥

सायणभाष्यम्

‘अभि प्रियाणि ' इति पञ्चर्चमष्टमं सूक्तं भार्गवस्य कवेरार्षं जागतं पवमानसोमदेवताकम् । तथानुक्रम्यते-’ अभि प्रियाणि पञ्च कविः' इति । गतो विनियोगः ॥

अ॒भि प्रि॒याणि॑ पवते॒ चनो॑हितो॒ नामा॑नि य॒ह्वो अधि॒ येषु॒ वर्ध॑ते ।

आ सूर्य॑स्य बृह॒तो बृ॒हन्नधि॒ रथं॒ विष्वं॑चमरुहद्वि॒चक्ष॒णः ॥१

अ॒भि । प्रि॒याणि॑ । प॒व॒ते॒ । चनः॑ऽहितः । नामा॑नि । य॒ह्वः । अधि॑ । येषु॑ । वर्ध॑ते ।

आ । सूर्य॑स्य । बृ॒ह॒तः । बृ॒हन् । अधि॑ । रथ॑म् । विष्व॑ञ्चम् । अ॒रु॒ह॒त् । वि॒ऽच॒क्ष॒णः ॥१

अभि । प्रियाणि । पवते । चनःऽहितः । नामानि । यह्वः । अधि । येषु । वर्धते ।

आ । सूर्यस्य । बृहतः । बृहन् । अधि । रथम् । विष्वञ्चम् । अरुहत् । विऽचक्षणः ॥१

“चनोहितः । चन इत्यन्ननाम । चायतेरसुनि चन इत्यौणादिकसूत्रेण निपातितः । चनसेऽन्नाय हितः यद्वा हितान्नः सोमः प्रियाणि जगतः प्रीणयितॄणि "नामानि नमनशीलानि तान्युदकानि “अभि “पवते अभितः करोति । “येषु अन्तरिक्षस्थितेषूदकेषु “यह्वः महानयं सोमः “अधि “वर्धते अधिकं प्रवृद्धो भवति । अपां मध्ये सोमो वसति । ततः “बृहन् महान् सोमः "बृहतः महतः परिवृढस्य “सूर्यस्य विष्वञ्चं विष्वग्गमनम् “अधि उपरि “रथं “विचक्षणः सर्वस्य विद्रष्टा सन् “आ “अरुहत् आरोहति । ‘अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ' इति ॥

ऋ॒तस्यं जि॒ह्वा पंवते॒ मधुं प्रि॒यं व॒क्ता पतिं॑र्धि॒यो अ॒स्या अदा॑भ्यः ।

दधा॑ति पु॒त्रः पि॒त्रोर॑पी॒च्यं१॒॑ नाम॑ तृ॒तीय॒मधि॑ रोच॒ने दि॒वः ॥
२

ऋ॒तस्य॑ । जि॒ह्वा । प॒व॒ते॒ । मधु॑ । प्रि॒यम् । व॒क्ता । पतिः॑ ।
धि॒यः । अ॒स्याः । अदा॑भ्यः ।

दधा॑ति । पु॒त्रः । पि॒त्रोः । अ॒पी॒च्य॑म् । नाम॑ । तृ॒तीय॑म् ।
अधि॑ । रो॒च॒ने । दि॒वः ॥२

ऋतस्य । जिह्वा । पवते । मधु । प्रियम् । वक्ता । पतिः ।
धियः । अस्याः । अदाभ्यः ।

दधाति । पुत्रः । पित्रोः । अपीच्यम् । नाम । तृतीयम् ।
अधि । रोचने । दिवः ॥२

“ऋतस्य सत्यभूतस्य यज्ञस्य “जिह्वा मुख्यत्वेन
जिह्वास्थानीयः सोमः “प्रियं प्रियकरं “मधु मदकरं रसं
“पवते क्षरति। कीदृशः। “वक्ता शब्दकृत् । यद्वा ।

स्तोतृभिः क्रियमाणाः स्तुतयः साधीयस्य इति प्रतिश्रवणस्य कर्ता । “अस्याः “धियः एतस्य कर्मणः “पतिः पालयिता “अदाभ्यः रक्षोभिर्हिंसितुमशक्यः “पुत्रः यजमानः “पित्रोः मातापित्रोः “अपीच्यम् अन्तर्हितं यत् “नाम । तौ न जानीतो नामकरणवेलायाम् । तस्मात्तयोरपरिज्ञायमानं तत् “तृतीयं नाम "दिवः द्युलोकस्य “रोचने दीप्यमाने सोमेऽभिषूयमाणे सति “अधि “दधाति अत्यन्तं धारयति । नक्षत्रव्यावहारिकनाम्नी प्रभाष्य सोमयाजीति तृतीयमस्य नाम इति भगवता बौधायनेनोक्तम् (बौ. गृह्यशेष. १.११.४-७) ॥

अवं द्युता॒नः क॒लशाँ॑ अचिक्रद॒न्नृभि॒र्येमा॒नः कोश॒ आ हिं॑र॒ण्यये॑ ।

अ॒भीमृ॒तस्य॑ दो॒हना॑ अनूष॒ताधि॑ त्रिपृ॒ष्ठ उ॒षसो॒ वि रा॑जति ॥३

अव॑ । द्युता॒नः । क॒लशा॑न् । अ॒चि॒क्र॒द॒त् । नृऽभिः॑ । ये॒मा॒नः । कोशे॑ । आ । हि॒र॒ण्यये॑ ।

अ॒भि । ई॒म् । ऋ॒तस्य॑ । दो॒हनाः॑ । अ॒नू॒ष॒त॒ । अधि॑ । त्रि॒ऽपृ॒ष्ठः । उ॒षसः॑ । वि । रा॒ज॒ति॒ ॥३

अव । द्युतानः । कलशान् । अचिक्रदत् । नृऽभिः । येमानः । कोशे । आ । हिरण्यये ।

अभि । ईम् । ऋतस्य । दोहनाः । अनूषत । अधि । त्रिऽपृष्ठः । उषसः । वि । राजति ॥३

“द्युतानः। ‘द्युत दीप्तौ' । दीप्यमानः “नृभिः कर्मनेतृभिर्ऋत्विग्भिः “हिरण्यये हिरण्मये “कोशे अधिषवणचर्मणि । तस्य हिरण्मयत्वं '

हिरण्यपाणिरभिषुणोति ' इति हिरण्यसंबन्धात् । तादृशे कोशे “येमानः । छान्दसे कर्मणि लिटि कानचि रूपम् । नियम्यमानः सोमः । ततः “ऋतस्य सत्यभूतस्य यज्ञस्य “दोहनाः दोग्धार ऋत्विजः “ईम् एनं सोमम् “अभि “अनूषत अभिष्टुवन्ति । ‘ ग्रावाणो वत्सा ऋत्विजो दुहन्ति' (तै. सं. ६.२.११.४) इति तैत्तिरीयब्राह्मण एषां दोग्धृत्वमभिहितम् । सोमः “कलशान् द्रोणाभिधानान् प्रति “अव “अचिक्रदत् अवक्रन्दति शब्दायते । ततः “त्रिपृष्ठः । त्रीणि सवनान्येव पृष्ठानि यस्य स तथोक्तः त्रिषु सवनेषु सोमस्य विद्यमानत्वात् । त्रिचक्रादित्वादुत्तरपदान्तोदात्तत्वम्। तादृशः सोमः “उषसः “अधि यागाहनि “वि “राजति । 'अधिशीङ्स्थासां०) (पा. सू. १. ४, ४६) इति द्वितीया । तेष्वहःसु विशेषेण दीप्यते । यद्वा । राजतिरन्तर्णीतण्यर्थः । अहानि प्रकाशयति ॥

अद्रिं॑भिः सु॒तो म॒तिभि॒श्चनो॑हितः प्ररो॒चय॒न्रोदं॑सी मा॒तरा॒ शुचिः॑ ।

रोमा॒ण्यव्यां॑ स॒मया॒ वि धा॑वति॒ मधो॒र्धारा॒ पिन्वं॑माना दि॒वेदिं॑वे ॥४

अद्रिं॑ऽभिः । सु॒तः । म॒तिऽभिः॑ । चनः॑ऽहितः । प्र॒ऽरो॒चयं॑न् । रोदं॑सी॒ इतिं॑ । मा॒तरा॑ । शुचिः॑ ।

रोमा॑णि । अव्यां॑ । स॒मयां॑ । वि । धा॒व॒ति॒ । मधोः॑ । धारा॑ । पिन्वं॑माना । दि॒वेऽदिं॑वे ॥४

अद्रिऽभिः । सुतः । मतिऽभिः । चनःऽहितः । प्रऽरोचयन् । रोदसी इति । मातरा । शुचिः ।

रोमाणि । अव्या । समया । वि । धावति । मधोः । धारा । पिन्वमाना । दिवेऽदिवे ॥४

“मतिभिः । ‘ मन ज्ञाने । मन्त्रे विषेषपचमन इति क्तिन्नुदात्तः । स्तुतिभिः “अद्रिभिः ग्रावभिश्च “सुतः अभिषुतः “चनोहितः चनसे अन्नाय हितः हितान्नो वा “मातरा मातरौ जगतो निर्मात्र्यौ “रोदसी द्यावापृथिव्यौ “प्ररोचयन स्वतेजसा प्रकाशयन् अत एव “शुचिः दीप्यमानः एवंविधः सोमः अव्यानि अविभवानि “रोमाणि तैः कृतानि पवित्राणि “समया अभितः समीपे “वि “धावाति विशेषेण क्षरति । किंच “पिन्वमाना अद्भिः सिच्यमाना “मधोः मदकरस्य सोमस्य “धारा “दिवेदिवे अन्वहं दीर्घसत्रेषु पवित्राण्युभयतः पवते ॥

परि॑ सोम॒ प्र ध॑न्वा स्व॒स्तये॑ नृभि॑ः पुना॒नो अ॒भि वा॑सया॒शिर॑ ।

ये ते मदा॑ आह॒नसो॒ विहा॑यस॒स्तेभि॒रिंद्रं॑ चोदय॒ दात॑वे म॒घं ॥५

परिं । सो॒म॒ । प्र । ध॒न्व॒ । स्व॒स्तयें । नृऽभिः॑ । पु॒ना॒नः ।
अ॒भि । वा॒स॒य॒ । आ॒ऽशिर॑म् ।

ये । ते॒ । मदाः॑ । आ॒ह॒नसः॑ । विऽहा॑यसः । तेभिः॑ । इन्द्र॑म्
। चो॒द॒य॒ । दात॑वे । म॒घम् ॥५

परि । सोम । प्र । धन्व । स्वस्तये । नृऽभिः । पुनानः ।
अभि । वासय । आऽशिरम् ।

ये । ते । मदाः । आहनसः । विऽहायसः । तेभिः । इन्द्रम्
। चोदय । दातवे । मघम् ॥५

हे “सोम “स्वस्तये अविनाशाय “परि “प्र “धन्व पात्राणि परितः प्रगच्छ । धविर्गत्यर्थः । किंच “नृभिः कर्मनेतृभिर्ऋत्विग्भिः “पुनानः पूयमानस्त्वम् “आशिरम्

आश्रयणं क्षीरादिकम् “अभि “वासय आच्छादय । संयोजयेति यावत् । “आहनसः । ‘ आहननवन्तो वचनवन्तः । (निरु. ४,१५ (https://sa.wikisource.org/s/6zj)) इति यास्कः । शत्रूणामाभिमुख्येन हन्तारोऽभिहन्यमाना अभिषूयमाणाः स्तुतिमन्तः शब्दवन्तो वा “विहायसः । महन्नामैतत् । महान्तः “ते त्वदीयाः “ये “मदाः मदहेतवो रसाः सन्ति “तेभिः तैः सोमैरस्माभिर्दीयमानैः “मघं मंहनीयं धनमस्मभ्यं “दातवे दातुम् “इन्द्रं “चोदय प्रेरय ॥ ॥ ३३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ।।

इति

श्रीमहाजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क भूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये

वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके द्वितीयोऽध्यायः संपूर्णः ॥

टिप्पणी

९.७५.१ अभि प्रियाणि पवते इति

काव‌म् (https://sa.wikisource.org/s/1z6d). (ऊहगानम्)

काव‌म् (https://sa.wikisource.org/s/2jsq). (ग्रामगेयः)

ऐडं काव‌म् (https://sa.wikisource.org/s/2n6l).

मण्डल ९

सूक्तं ९.११सूक्तं ९.४१सूक्तं ९.७१सूक्तं ९.१०१

सूक्तं ९.१२सूक्तं ९.४२सूक्तं ९.७२सूक्तं ९.१०२

सूक्तं ९.१३सूक्तं ९.४३सूक्तं ९.७३सूक्तं ९.१०३

सूक्तं ९.१४सूक्तं ९.४४सूक्तं ९.७४सूक्तं ९.१०४

सूक्तं ९.१५सूक्तं ९.४५सूक्तं ९.७५सूक्तं ९.१०५

सूक्तं ९.१६सूक्तं ९.४६सूक्तं ९.७६सूक्तं ९.१०६

सूक्तं ९.१७सूक्तं ९.४७सूक्तं ९.७७सूक्तं ९.१०७

सूक्तं ९.१८सूक्तं ९.४८सूक्तं ९.७८सूक्तं ९.१०८

सूक्तं ९.१९सूक्तं ९.४९सूक्तं ९.७९सूक्तं ९.१०९

सूक्तं ९.२०सूक्तं ९.५०सूक्तं ९.८०सूक्तं ९.११०

सूक्तं ९.२१सूक्तं ९.५१सूक्तं ९.८१सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.७६

← सूक्तं ९.७५

ऋग्वेदः - मण्डल ९

सूक्तं ९.७६

कविर्भार्गवः।

सूक्तं ९.७७ →

दे. पवमानः सोमः। जगती।

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।

हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुते नदीष्वा ॥१॥

शूरो न धत्त आयुधा गभस्त्योः स्वः सिषासन्रथिरो गविष्टिषु ।

इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः ॥२॥

इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश ।

प्र णः पिन्व विद्युदभ्रेव रोदसी धिया न वाजाँ उप मासि शश्वतः ॥३॥

विश्वस्य राजा पवते स्वर्दृश ऋतस्य धीतिमृषिषाळवीवशत् ।

यः सूर्यस्यासिरेण मृज्यते पिता मतीनामसमष्टकाव्यः ॥४॥

वृषेव यूथा परि कोशमर्षस्यपामुपस्थे वृषभः कनिक्रदत् ।

स इन्द्राय पवसे मत्सरिन्तमो यथा जेषाम समिथे त्वोतयः ॥५॥

सायणभाष्यम्

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

व्याख्यायाव्याहतप्रज्ञः सप्तमस्य द्वितीयकम् ।

अध्यायं सायणामात्यस्तृतीयं व्याकरोत्यथ ॥

तत्र ‘ धर्ता ' इति पञ्चर्चं नवमं सूक्तं भार्गवस्य कवेरार्षं जागतं पवमानसोमदेवताकम् । ‘धर्ता' इत्यनुक्रान्तम् । गतो विनियोगः ॥

ध॒र्ता दि॒वः प॑वते॒ कृत्व्यो॒ रसो॒ दक्षो॑ दे॒वाना॑मनु॒माद्यो॒ नृभिः॑ ।

हरि॑ः सृजा॒नो अत्यो॒ न सत्व॑भि॒र्वृथा॒ पाजां॑सि कृणुते न॒दीष्वा ॥१

ध॒र्ता । दि॒वः । प॒व॒ते॒ । कृत्व्यः॑ । रसः॑ । दक्षः॑ । दे॒वाना॑म् । अ॒नु॒ऽमाद्यः॑ । नृऽभिः॑ ।

हरि॑ः । सृ॒जा॒नः । अत्य॑ः । न । सत्व॑ऽभिः । वृथा॑ ।
पाजा॑ंसि । कृ॒ण्णु॒ते॒ । न॒दीषु॑ । आ ॥१

धर्ता । दिवः । पवते । कृत्व्यः । रसः । दक्षः । देवानाम् ।
अनुऽमाद्यः । नृऽभिः ।

हरिः । सृजानः । अत्यः । न । सत्वऽभिः । वृथा ।
पाजांसि । कृणुते । नदीषु । आ ॥१

“धर्ता सर्वस्य धारकः सोमः “दिवः अन्तरिक्षात् अन्तरिक्षस्थिताद्दशापवित्रात् “पवते पूयते । कीदृशः सोमः । “कृत्व्यः कर्तव्यः । शोध्य इत्यर्थः । “रसः रसात्मको “देवानां “दक्षः बलप्रदः । यद्वा । दक्षः प्रवर्धनीयो देवानामर्थाय । तथा “नृभिः नेतृभिर्ऋत्विग्भिः “अनुमाद्यः अनुमदनीयः स्तुत्यो वा “हरिः हरितवर्णः “सत्वभिः प्राणिभिः सादिभिः “सृजानः सृज्यमानः “अत्यो “न अश्व इव स यथा शिक्षितो “वृथा अनायासेन गच्छति

तद्वत् वृथा अप्रयत्नेन “पाजांसि बलानि स्वीयान् वेगान् कृणुते कुरुते । “नदीषु वस्तीवरीषु । ताभिरित्यर्थः । “आ सिक्त इति शेषः । अयम् अभिषवसमयाभिप्रायः ॥

शूरो॒ न धं॑त्त॒ आयुं॑धा॒ गभं॑स्त्योः॒ स्वः१॒॑ सिषां॑सन्रथि॒रो गविं॑ष्टिषु ।

इंद्रं॑स्य॒ शुष्मं॑मी॒रयं॑न्नप॒स्युभि॒रिंदुं॑र्हिन्वा॒नो अं॑ज्यते मनी॒षिभिः॑ ॥२

शूरः॑ । न । ध॒त्ते॒ । आयुं॑धा । गभं॑स्त्योः । स्व१॒॑रिति॑ स्वः॑ । सिसां॑सन् । र॒थि॒रः । गोऽइं॑ष्टिषु ।

इन्द्रं॑स्य । शुष्मं॑म् । ई॒रयं॑न् । अ॒प॒स्युऽभिः॑ । इन्दुः॑ । हि॒न्वा॒नः । अ॒ज्य॒ते॒ । म॒नी॒षिऽभिः॑ ॥२

शूरः । न । धत्ते । आयुधा । गभस्त्योः । स्वरिति स्वः ।
सिसासन् । रथिरः । गोऽइष्टिषु ।

इन्द्रस्य । शुष्मम् । ईरयन् । अपस्युऽभिः । इन्दुः ।
हिन्वानः । अज्यते । मनीषिऽभिः ॥२

अयं सोमः “गभस्त्योः हस्तयोः “आयुधा आयुधानि “शूरो “न शूर इव “धत्ते धारयति । “स्वः स्वर्गसुखसाधनं यज्ञं वा “सिषासन् संभक्तुमिच्छन् “रथिरः रथवान्। रथादिरच्प्रत्ययः । “गविष्टिषु यजमानस्य गवामेषणेषु सत्सु । यजमानार्थं गोसंभजनाय रथवानित्यर्थः । “इन्द्रस्य “शुष्मं बलम् “ईरयन् प्रेरयन् “इन्दुः सोमो देवः “अपस्युभिः कर्मेच्छुभिः “मनीषिभिः मेधाविभिर्ऋत्विभिः “हिन्वानः प्रेर्यमाणः “अज्यते गोभिः ॥

इंद्रस्य सोम॒ पवंमान ऊ॒र्मिणां तवि॒ष्यमांणो ज॒ठरे॒ष्वा विंश

।

प्र णः॑ पिन्व वि॒द्युद॒भ्रेव॒ रोद॑सी धि॒या न वाजाँ॒ उप॑ मासि॒ शश्व॑तः ॥३

इन्द्र॑स्य । सो॒म॒ । पव॑मानः । ऊ॒र्मिणा॑ । त॒वि॒ष्यमा॑णः । ज॒ठरे॑षु । आ । वि॒श॒ ।

प्र । न॒ः । पि॒न्व॒ । वि॒ऽद्युत् । अ॒भ्राऽइ॑व । रोद॑सी॒ इति॑ । धि॒या । न । वाजा॑न् । उप॑ । मा॒सि॒ । शश्व॑तः ॥३

इन्द्रस्य । सोम । पवमानः । ऊर्मिणा । तविष्यमाणः । जठरेषु । आ । विश ।

प्र । नः । पिन्व । विऽद्युत् । अभ्राऽइव । रोदसी इति । धिया । न । वाजान् । उप । मासि । शश्वतः ॥३

हे “सोम “पवमानः पूयमानस्त्वं “तविष्यमाणः वर्धयिष्यमाणः सन् “इन्द्रस्य “जठरेषु “ऊर्मिणा प्रभूतया धारया “आ “विश । जठरप्रदेशस्य बाहुल्याद्बहुवचनम्। “नः अस्मदर्थं विद्युदभ्रेव अभ्राणीव सा यथा दोग्ध्यभ्राणि तद्वत् “प्र “पिन्व धुक्ष्व “रोदसी द्यावापृथिव्यौ। किंच “धिया कर्मणा “न इदानीम् । नेति संप्रत्यर्थे । “शश्वतः । बहुनामैतत् । बहून् “वाजान् अन्नानि “उप समीपे “मासि निर्मासि ।।

विश्वं॑स्य॒ राजा॑ पवते स्व॒र्दृशं॑ ऋ॒तस्य॑ धी॒तिमृ॑षि॒षाळ॑वीवशत् ।

यः सूर्य॒स्यासि॑रेण मृ॒ज्यते॑ पि॒ता म॑ती॒नामसं॑मष्टकाव्यः ॥४

विश्वं॑स्य । राजा॑ । प॒व॒ते॒ । स्व॒ःऽदृशः॑ । ऋ॒तस्य॑ । धी॒तिम् । ऋ॒षि॒षाट् । अ॒वी॒व॒श॒त् ।

यः । सूर्य॑स्य । असि॑रेण । मृ॒ज्यते॑ । पि॒ता । म॒ती॒नाम् । अस॑मष्टऽकाव्यः ॥४

विश्वस्य । राजा । पवते । स्वःऽदृशः । ऋतस्य । धीतिम् । ऋषिषाट् । अवीवशत् ।

यः । सूर्यस्य । असिरेण । मृज्यते । पिता । मतीनाम् । असमष्टऽकाव्यः ॥४

“विश्वस्य जगतः “राजा स्वामी सोमः “स्वर्दृशः स्वर्गद्रष्टुः सर्वद्रष्टुर्वा “ऋतस्य सत्यभूतस्येन्द्रस्य । मनुष्यवाच्यनृतशब्दप्रतियोगिकस्य ऋतशब्दस्य देवार्थः। तत्रापि औचित्येनेन्द्रः परिगृह्यते । तस्य “धीतिं मतिं कर्म वा “ऋषिषाट् ऋषीणामतीन्द्रियद्रष्टृणामभिभविता । महत्त्वेन स्वयमपि ऋषिश्रेष्ठत्वादिति भावः । तथा च मन्त्रान्तरं -- ब्रह्मा देवानां पदवीः कवीनामृषिः " (ऋ. सं.९.९६.६) इति । ईदृशः सोमः अवीवशत् अकामयत

इन्द्रस्य कर्म । “यः सोमः “सूर्यस्य देवस्य “असिरेण क्षेपकेण रश्मिना “मृज्यते । “असमष्टकाव्यः अन्यैः कविभिरव्याप्तकर्मा सोमः “मतीनाम् अस्मदीयानां स्तुतीनां “पिता पालकः स्वामी भवतीति शेषः । यद्वा । यो मतीनां पिता असमष्टकाव्यश्च सन् मृज्यते सः “पवते इति संबन्धः ॥

वृषेव यूथा परि कोशमर्षस्यपामुपस्थे वृषभः कनिक्रदत् ।

स इंद्राय पवसे मत्सरिंतमो यथा जेषाम समिथे त्वोतयः ॥ ५

वृषाऽइव । यूथा । परि । कोशम् । अर्षसि । अपाम् । उपऽस्थे । वृषभः । कनिक्रदत् ।

सः । इन्द्रांय । प॒व॒से॒ । म॒त्स॒रिन्ऽतंमः । यथां । जेषांम । स॒म्ऽइ॒थे । त्वाऽऊंतयः ॥५

वृषाऽइव । यूथा । परि । कोशम् । अर्षसि । अपाम् । उपऽस्थे । वृषभः । कनिक्रदत् ।

सः । इन्द्राय । पवसे । मत्सरिन्ऽतमः । यथा । जेषाम । सम्ऽइथे । त्वाऽऊतयः ॥५

हे सोम त्वं “वृषेव “यूथा यूथानि वृषभ इव स यथा तानि प्रविशति तद्वत् “कोशं कोशवत् रसधारकं कलशं “परि “अर्षसि परिगच्छसि । कुत्रस्थः सन् । “अपामुपस्थे अन्तरिक्षे । कीदृशः सन् । “वृषभः वर्षिता “कनिक्रदत् शब्दं कुर्वन् । “सः त्वं हे सोम “इन्द्राय इन्द्रार्थं “पवसे पूयसे । “मत्सरिन्तमः मादयितृतमस्त्वम् । “यथा वयं “जेषाम जयेम “समिथे संग्रामे “त्वोतयः त्वया रक्षिताः सन्तः ॥ ॥ १ ॥

टिप्पणी

९.७६.१ धर्ता दिवः इति

साम १२२८ उद्वद्द्वार्गवम् अस्ति। ९.८६.१६ (प्रो अयासीद् इति) प्रवद्धार्गवम् भवति।

द्र. उदयनोपरि टिप्पणी (http://puranastudy.freeoda.com/pur_index3/udayana1.htm)

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

ऋग्वेदः सूक्तं ९.७७

← सूक्तं ९.७६	ऋग्वेदः - मण्डल ९ सूक्तं ९.७७ कविर्भार्गवः	सूक्तं ९.७८ →

दे. पवमानः सोमः। जगती।

एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टरः ।

अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः ॥१॥

स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः ।

स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा ॥२॥

ते नः पूर्वास उपरास इन्दवो महे वाजाय धन्वन्तु गोमते ।

ईक्षेण्यासो अह्यो न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः ॥३॥

अयं नो विद्वान्वनवद्वनुष्यत इन्दुः सत्राचा मनसा पुरुष्टुतः ।

इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजम् ॥४॥

चक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते ।

असावि मित्रो वृजनेषु यज्ञियोऽत्यो न यूथे वृषयुः कनिक्रदत् ॥५॥

सायणभाष्यम्

‘एष प्र कोशे' इति पञ्चर्चं दशमं सूक्तम् । ऋष्यांद्याः पूर्ववत् । ‘एषः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

ए॒ष प्र कोशे॒ मधु॑माँ अचिक्रद॒दिंद्र॑स्य॒ वज्रो॒ वपु॑षो॒ वपु॑ष्टरः ।

अ॒भीमृ॒तस्य॑ सु॒दुघा॑ घृत॒श्चुतो॑ वा॒श्रा अ॑र्षंति॒ पय॑सेव धे॒नवः॑ ॥१

ए॒षः । प्र । कोशे॑ । मधु॑ऽमान् । अ॒चि॒क्र॒द॒त् । इन्द्र॑स्य । वज्रः॑ । वपु॑षः । वपुः॑ऽतरः ।

अ॒भि । ई॒म् । ऋ॒तस्य॑ । सु॒ऽदुघाः॑ । घृ॒त॒ऽश्चुतः॑ । वा॒श्राः । अ॒र्ष॒न्ति॒ । पय॑साऽइव । धे॒नवः॑ ॥१

एषः । प्र । कोशे । मधुऽमान् । अचिक्रदत् । इन्द्रस्य । वज्रः । वपुषः । वपुःऽतरः ।

अभि । ईम् । ऋतस्य । सुऽदुघाः । घृतऽश्चुतः । वाश्राः । अर्षन्ति । पयसाऽइव । धेनवः ॥१

“एषः अयं सोमः मधुमान् मधुररसः कोशे द्रोणकलशे “
“अचिक्रदत् प्रकर्षेण शब्दायते । कीदृश एषः । इन्द्रस्य
“वज्रः वज्रस्थानीयः । बलकरत्वेन वज्रवत्

प्रहरणसधनत्वात् वज्रत्वोपचारः । एष एव हि सोमो वज्र इन्द्रस्य साधने । तथा “वपुषः बीजानां वप्तुः अन्यस्मात् वपुष्टरः अतिशयेन वप्ता । बीजवापस्य सोमकर्तृकत्वात् ' सोमो वै रेतोधाः' (तै. सं. २. १. १. ६) इति श्रुतेः । “ईम् अस्य “ऋतस्य सत्यफलस्य सोमस्य । धारा इति शेषः । ताः “अभि “अर्षन्ति अभिगच्छन्ति । कीदृश्यस्ताः । सुदुघाः सुष्टुं दोग्ध्यः फलाना “घृतश्चुतः उदकस्य रसस्य वा क्षारथियः “वाश्राः शब्दयन्त्यः । किमिव । पयसा युक्ता वाश्रः “धेनवः “इव इति ॥

स पू॒र्व्यः पं॑वते॒ यं दि॒वस्परिं श्ये॒नो मं॑था॒यदिं॑षि॒तस्ति॒रो रजः॑ ।

स मध्व॒ आ युं॑वते॒ वेविं॑जान॒ इत्कृ॒शानो॒रस्तु॒र्मन॒साहं॑ बि॒भ्युषां॑ ॥२

सः । पूर्व्यः । पवते । यम् । दिवः । परिं । श्येनः ।
मथायत् । इषितः । तिरः । रजः॑ ।

सः । मध्वः॑ । आ । युवते । वेविंजानः । इत् । कृशानोः॑ ।
अस्तुः॑ । मनंसा । अहं । बिभ्युषां ॥२

सः । पूर्व्यः । पवते । यम् । दिवः । परि । श्येनः ।
मथायत् । इषितः । तिरः । रजः ।

सः । मध्वः । आ । युवते । वेविजानः । इत् । कृशानोः ।
अस्तुः । मनसा । अह । बिभ्युषा ॥२

“सः सोमः “पूर्व्यः प्रत्नः “पवते पूयते । अभिषूयत इत्यर्थः । “यं सोमं “दिवः द्युलोकात्, “श्येनः “इषितः स्वमात्रा प्रेषितः सन् “परि “मथायत् पर्यमथ्नात् “तिरः तीर्णं तिरस्कुर्वन् । किम् । “रजः तृतीयं लोकम् । “सः एव सोमः “मध्वः मधुररसं सोमम् “आ "युवते यौति

पृथक्करोति द्युलोकात् । स्वयं “वेविजान “इत् चलन् अधो गच्छन् “कृशानोः सोमपालस्य “अस्तुः शरक्षेप्तुः सकाशात् “बिभ्युषा भीतेन “मनसाह । मध्व आ युवत इति संबन्धः । कृशानोः सोमपालत्वं ब्राह्मणे स्पष्टमुक्तं- कृशानुः सोमपालः सव्यस्य पदः' (ऐ. ब्रा. ३. २६) ॥

ते नः॒ पूर्वा॑स॒ उप॑रास॒ इंद॑वो म॒हे वाजा॑य धन्वंतु॒ गोमं॑ते ।

ई॒क्षे॒ण्या॑सो अ॒ह्यो॒३॒ न चार॑वो॒ ब्रह्म॑ब्रह्म॒ ये जुं॑जु॒षुर्ह॒विर्ह॑विः ॥३

ते । नः॒ । पूर्वा॑सः । उप॑रासः । इन्द॑वः । म॒हे । वाजा॑य । ध॒न्व॒न्तु॒ । गोऽमं॑ते ।

ई॒क्षे॒ण्या॑सः । अ॒ह्यः॑ । न । चार॑वः । ब्रह्म॑ऽब्रह्म । ये । जु॒जु॒षुः । ह॒विः॑ऽहं॑विः ॥३

ते । नः । पूर्वासः । उपरासः । इन्दवः । महे । वाजाय । धन्वन्तु । गोऽमते ।

ईक्षेण्यासः । अह्यः । न । चारवः । ब्रह्मऽब्रह्म । ये । जुजुषुः । हविःऽहविः ॥३

“ते वक्ष्यमाणाः पूर्वासः पूर्वे “उपरासः । उपरता अत्रेत्युपराः । तादृशाः “इन्दवः सोमाः “महे महते “गोमते “नः मह्यं “वाजाय अन्नाय अन्नलाभार्थं “धन्वन्तु गच्छन्तु प्राप्नुवन्तु । कीदृशा इन्दवः । “ईक्षेण्यासः ईक्षणीयाः संदर्शनीयाः “अह्यो “न । अह्यः स्त्रिय आहननात् । ता इव सुवेषाः स्त्रिय इव “चारवः रमणीयाः । त इत्युक्तं क इत्याह । “ये इन्दवः “ब्रह्मब्रह्म सर्वमपि स्तावकमन्त्रजातं "हविर्हविः सर्वमपि हविर्जातं च “जुजुषुः सेवन्ते ॥

अ॒यं नों वि॒द्वान्वंनवद्वनुष्य॒त इंदुः॑ स॒त्राचा॒ मनंसा पुरुष्टु॒तः ।

इ॒नस्य॒ यः सद॑ने॒ गर्भ॑माद॒धे गवा॑मुरु॒ब्जम॒भ्यर्ष॑ति व्र॒जं ॥४

अ॒यम् । न॒ः । वि॒द्वान् । व॒न॒व॒त् । व॒नु॒ष्य॒तः । इन्दु॑ः ।
स॒त्राचा॑ । मन॑सा । पु॒रु॒ऽस्तु॒तः ।

इ॒नस्य॑ । यः । सद॑ने । गर्भ॑म् । आ॒ऽद॒धे । गवा॑म् ।
उ॒रु॒ब्जम् । अ॒भि । अर्ष॑ति । व्र॒जम् ॥४

अयम् । नः । विद्वान् । वनवत् । वनुष्यतः । इन्दुः ।
सत्राचा । मनसा । पुरुऽस्तुतः ।

इनस्य । यः । सदने । गर्भम् । आऽदधे । गवाम् ।
उरुब्जम् । अभि । अर्षति । व्रजम् ॥४

“अयम् “इन्दुः सोमः “नः अस्मान् “वनुष्यतः हन्तुमिच्छतः शत्रून् “विद्वान् जानन् हन्तुं “वनवत् हन्तु तान् । केन साधनेन । “सत्राचा सहाञ्चता “मनसा । कीदृशः । “पुरुष्टुतः बहुभिः स्तुतः । “यः सोमः “इनस्य ईश्वरस्याग्नेः

“सदने स्थाने भूमौ वेद्यां वा वर्तमानः “गर्भमादधे धारयत्योषधीषु । "यश्च “गवाम् अस्मदीयानां शत्रुभिरपहृतानाम् “उरुब्जं प्रभूतानामपां पयसां जनकं “व्रजम् “अभ्यर्षति गच्छति । स वनवदिति ॥

चक्रिर्दि॒वः पंवते॒ कृत्व्यो॒ रसों म॒हाँ अदंब्धो॒ वरुंणो हु॒रुग्य॒ते ।

असांवि मि॒त्रो वृ॒जनेंषु य॒ज्ञियोऽत्यो॒ न यू॒थे वृं॒ष॒युः कनिंक्रदत् ॥५

चक्रिः॑ । दि॒वः । प॒व॒ते॒ । कृत्व्यः॑ । रसः॑ । म॒हान् । अदंब्धः । वरुंणः । हु॒रुक् । य॒ते ।

असांवि । मि॒त्रः । वृ॒जनेंषु । य॒ज्ञियः॑ । अत्यः॑ । न । यू॒थे । वृ॒ष॒ऽयुः । कनिंक्रदत् ॥५

चक्रिः । दिवः । पवते । कृत्व्यः । रसः । महान् । अदब्धः । वरुणः । हुरुक् । यते ।

असावि । मित्रः । वृजनेषु । यज्ञियः । अत्यः । न । यूथे । वृषऽयुः । कनिक्रदत् ॥५

“चक्रिः सर्वस्य कर्ता “कृत्व्यः कर्मण्यः “रसः रसात्मकः "महान् गुणैरधिकः “अदब्धः अहिंस्यः "हुरुक् कुटिलं “यते गच्छते । इतस्ततः परिचरत इत्यर्थः । तदर्थं "दिवः सकाशात् "पवते पूयते । अन्तरिक्षस्थाद्दशापवित्रादित्यर्थः । किंचासौ सोमः "असावि सूयते । कदा । “वृजनेषु अरिष्टेषु सत्सु तत्परिहारार्थम् । कीदृशः सः । “मित्रः सर्वेषां मित्रभूतः “यज्ञियः यष्टव्यः “अत्यो “न अश्व इव “यूथे वडवायूथे स यथा “वृषयुः सन् शब्दं करोति तद्वदसौ वृषभो रसस्य वर्षिता “कनिक्रदत् शब्दं कुर्वन् असावीति ॥ ॥ २ ॥

टिप्पणी

९.७७.१ एष प्र कोषे मधुमाँ इति

वैधृत वासिष्ठम् (https://sa.wikisource.org/s/2jvo)

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.७८

ऋग्वेदः - मण्डल ९
← सूक्तं ९.७७
सूक्तं ९.७८
कविर्भार्गवः।
सूक्तं ९.७९ →

दे. पवमानः सोमः। जगती।

प्र राजा वाचं जनयन्नसिष्यददपो वसानो अभि गा इयक्षति ।

गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतम् ॥१॥

इन्द्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने ।

पूर्वीर्हि ते स्रुतयः सन्ति यातवे सहस्रमश्वा हरयश्चमूषदः ॥२॥

समुद्रिया अप्सरसो मनीषिणमासीना अन्तरभि सोममक्षरन् ।

ता ईं हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम् ॥३॥

गोजिन्नः सोमो रथजिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित् ।

यं देवासश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवम् ॥४॥

एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन्द्रविणान्यर्षसि ।

जहि शत्रुमन्तिके दूरके च य उर्वीं गव्यूतिमभयं च नस्कृधि ॥५॥

सायणभाष्यम्

‘ प्र राजा वाचम्' इति पञ्चर्चमेकादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘प्र राजा' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र राजा॒ वाचं॑ ज॒नयं॑न्नसिष्यदद॒पो वसा॑नो अ॒भि गा

इं॑यक्षति ।

गृ॒भ्णाति॑ रि॒प्रमवि॑रस्य॒ तान्वा॑ शु॒द्धो दे॒वाना॒मुप॑ याति निष्कृ॒तं ॥१

प्र । राजा॑ । वाच॑म् । ज॒नय॑न् । अ॒सि॒स्य॒द॒त् । अ॒पः । वसा॑नः । अ॒भि । गाः । इ॒य॒क्ष॒ति॒ ।

गृ॒भ्णाति॑ । रि॒प्रम् । अवि॑ः । अ॒स्य॒ । तान्वा॑ । शु॒द्धः । दे॒वाना॑म् । उप॑ । या॒ति॒ । नि॒ःऽकृ॒तम् ॥१

प्र । राजा । वाचम् । जनयन् । असिस्यदत् । अपः । वसानः । अभि । गाः । इयक्षति ।

गृभ्णाति । रिप्रम् । अविः । अस्य । तान्वा । शुद्धः । देवानाम् । उप । याति । निःऽकृतम् ॥१

“राजा राजमानोऽयं सोमोऽभिषूयमाणः सन् "वाचं शब्दं "जनयन् उत्पादयन् “असिष्यदत् प्रस्यन्दते । तथा “अपः वसतीवरीः "वसानः आच्छादयन् “गाः स्तुतीः' “अभि “इयक्षति अभिगच्छति । इयक्षतिर्गतिकर्मसु पठितः । “अस्य सोमस्य “रिप्रम् अनुपादेयत्वेन पापरूपम् अभिषुतवल्लीशकलादिरूपम् “अविः अविरोमनिर्मितं दशापवित्रं “तान्वा स्वीयेन वस्त्रेण “गृभ्णाति गृह्णाति शोधनसमये । पश्चात् "शुद्धः "देवानां निष्कृतं संस्कृतं स्थानम् “उप “याति उपगच्छति ॥

इंद्रा॑य सोम॒ परि॑ षिच्यसे॒ नृभि॑र्नृ॒चक्षा॑ ऊ॒र्मिः क॒विरं॑ज्यसे॒ वने॑ ।

पू॒र्वीर्हि ते॑ स्रु॒तय॑ः संति॒ यात॑वे स॒हस्र॒मश्वा॒ हर॑यश्चमू॒षद॑ः ॥२

इन्द्राय । सोम । परि । सिच्यसे । नृऽभिः । नृऽचक्षाः ।
ऊर्मिः । कविः । अज्यसे । वने ।

पूर्वीः । हि । ते । स्रुतयः । सन्ति । यातवे । सहस्रम् ।
अश्वाः । हरयः । चमूऽसदः ॥२

इन्द्राय । सोम । परि । सिच्यसे । नृऽभिः । नृऽचक्षाः ।
ऊर्मिः । कविः । अज्यसे । वने ।

पूर्वीः । हि । ते । स्रुतयः । सन्ति । यातवे । सहस्रम् ।
अश्वाः । हरयः । चमूऽसदः ॥२

हे “सोम त्वम् “इन्द्राय इन्द्रार्थं "नृभिः नेतृभिर्ऋत्विग्भिः “परि “षिच्यसे अभिषूयसे । तथा हे सोम “नृचक्षाः नृणां यष्टॄणामनुग्रहेण द्रष्टा “ऊर्मिः प्रेर्यमाणः प्रवृद्धो वा “कविः मेधावी च त्वं “वने उदके “अज्यसे प्रेर्यसे । “पूर्वीः बह्व्यः “हि “ते "स्रुतयः मार्गाश्छिद्राणि “सन्ति “यातवे यातुम् ।

अल्पस्य सोमस्य अपरिमितस्तुतिगमनासंभवात्तस्य बाहुल्यमाह । “चमूषदः अभिषवणफलकयोः सीदतः “सहस्रम् अपरिमिताः “अश्वाः व्याप्ताः "हरयः हरितवर्णा अंशवः सन्ति । अथवा । इन्द्राय परिषिच्यस इत्युक्तत्वादिन्द्रप्राप्तौ मार्गसाधनयोः सद्भाव उत्तरार्धेन प्रतिपादितः । ते पुरातन्यः सरण्यः सन्तीन्द्रं प्रति यातुम् । तथा सहस्रसंख्याका हरितवर्णा अश्वाश्च सन्ति। चमूषदस्तवेति ॥

स॒मु॒द्रिया॑ अ॒प्स॒रसो॑ मनी॒षिण॒मासी॑ना अं॒तर॒भि
सोम॑मक्षरन् ।

ता ईं॑ हिन्व॑ति ह॒र्म्यस्य॑ स॒क्षणिं॒ याच॑ते सु॒म्नं पव॑मान॒मक्षि॑तं
॥३

स॒मु॒द्रिया॑ः । अ॒प्स॒रस॑ः । म॒नी॒षिण॑म् । आसी॑नाः । अ॒न्तः । अ॒भि । सोम॑म् । अ॒क्ष॒र॒न् ।

ताः । ई॒म् । हि॒न्व॒न्ति॒ । ह॒र्म्यस्य॑ । स॒क्षणि॑म् । याच॑न्ते । सु॒म्नम् । पव॑मानम् । अक्षि॑तम् ॥३

समुद्रियाः । अप्सरसः । मनीषिणम् । आसीनाः । अन्तः । अभि । सोमम् । अक्षरन् ।

ताः । ईम् । हिन्वन्ति । हर्म्यस्य । सक्षणिम् । याचन्ते । सुम्नम् । पवमानम् । अक्षितम् ॥३

“समुद्रियाः । समुद्रसाधनत्वात् समुद्रमन्तरिक्षम् । तत्संबन्धिन्यः "अप्सरसः काश्चन “अन्तः यज्ञमध्ये “आसीनाः पात्रेषु वर्तमाना वसतीवर्यः “मनीषिणं मेधाविनं “सोमम् “अभि “अक्षरन् अभिषूयमाणं सोममभिक्षरन्ति । “ताः एता आपः “ईम् एनं “हर्म्यस्य

हर्म्यवत्सुखकरस्य यागगृहस्य “सक्षणिं सेचनशीलं “हिन्वन्ति वर्धयन्ति पोषयन्ति । ता एव स्तोतारो वा “पवमानं सोमम् “अक्षितम् अक्षीणं “सुम्नं सुखं “याचन्ते प्रार्थयन्ते । तत्रायं भावः । काश्चनाप्सरसः सोमं राजानं मनीषिणं कामयमाना देवानपि परित्यज्य स्वर्गादागत्य राज्ञः समीपे स्थित्वा तस्य रसानाददते । स्वरसेन वर्धयन्ति तं सुखं च याचन्त इति ॥

गो॒जिन्न॒ः सोमो॑ रथ॒जिद्धि॑रण्य॒जित्स्व॒र्जिद॒ब्जित्प॑वते सहस्र॒जित् ।

यं दे॒वास॑श्चक्रि॒रे पी॒तये॒ मद॒ं स्वादि॑ष्ठं द्र॒प्समं॑रु॒णं मं॑यो॒भुवं॑ ॥ ४

गो॒ऽजित् । न॒ः । सोम॑ः । र॒थ॒ऽजित् । हि॒र॒ण्य॒ऽजित् । स्व॒ःऽजित् । अ॒प्ऽजित् । प॒व॒ते॒ । स॒ह॒स्र॒ऽजित् ।

यम् । दे॒वासः॑ । च॒क्रि॒रे । पी॒तये॑ । मद॑म् । स्वादि॑ष्ठम् । द्र॒प्सम् । अ॒रु॒णम् । म॒य॒ःऽभुव॑म् ॥४

गोऽजित् । नः । सोमः । रथऽजित् । हिरण्यऽजित् । स्वःऽजित् । अप्ऽजित् । पवते । सहस्रऽजित् ।

यम् । देवासः । चक्रिरे । पीतये । मदम् । स्वादिष्ठम् । द्रप्सम् । अरुणम् । मयःऽभुवम् ॥४

“नः अस्माकं “गोजित् गवां जेता तथा “रथजित् रथस्य जेता “हिरण्यजित् हिरण्यस्य जेता तथा “स्वर्जित् स्वर्गस्य सुखस्य जेता “अब्जित् अपां जेता “सहस्रजित् सहस्रसंख्याकस्य धनस्य जेता “सोमः “पवते पूयते । “यं “देवासः देवाः “चक्रिरे कृतवन्तः । किमर्थम्। “पीतये पानाय । कीदृशं सोमम् । मदं मदकरं “स्वादिष्ठं स्वादुतमं “द्रप्सं रसात्मकम् "अरुणम् अरुणवर्णं “मयोभुवं सुखस्य

भावयितारम् ॥ एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन् द्रविणान्यर्षसि ।।

ए॒तानिं सोम॒ पवंमानो अस्म॒युः स॒त्यानिं कृ॒ण्वंद्रविंणान्यर्षसि ।

ज॒हि शत्रुंमंति॒के दूंर॒के च॒ य उ॒र्वीं गव्यूंति॒मभंयं च नस्कृधि ॥५

ए॒तानिं । सो॒म॒ । पवंमानः । अ॒स्म॒ऽयुः । स॒त्यानिं । कृ॒ण्वन् । द्रविंणानि । अ॒र्ष॒सि॒ ।

ज॒हि । शत्रुंम् । अ॒न्ति॒के । दू॒र॒के । च॒ । यः । उ॒र्वीम् । गव्यूंतिम् । अभंयम् । च॒ । न॒ः । कृ॒धि॒ ॥५

एतानि । सोम । पवमानः । अस्मऽयुः । सत्यानि । कृण्वन् । द्रविणानि । अर्षसि ।

जहि । शत्रुम् । अन्तिके । दूरके । च । यः । उर्वीम् । गव्यूतिम् । अभयम् । च । नः । कृधि ॥५

हे सोम “एतानि पूर्वमन्त्रोक्तानि गवादीनि “द्रविणानि धनानि "सत्यानि “कृण्वन् कुर्वन् “पवमानः पूयमानः “अर्षसि पवसे । “जहि च “शत्रुं “यः अस्मच्छत्रुः “अन्तिके समीपे “दूरके अत्यन्तं दूरे देशे “च वर्तते तं जहि । तथा “उर्वीं “गव्यूतिं विस्तीर्णं मार्गम् “अभयं “च “नः अस्माकं “कृधि कुरु ॥ ॥ ३ ॥

{{|

}}

मण्डल ९

सूक्तं १.११ सूक्तं १.४१ सूक्तं १.७१ सूक्तं १.१०१

सूक्तं १.१२ सूक्तं १.४२ सूक्तं १.७२ सूक्तं १.१०२

सूक्तं १.१३ सूक्तं १.४३ सूक्तं १.७३ सूक्तं १.१०३

सूक्तं १.१४ सूक्तं १.४४ सूक्तं १.७४ सूक्तं १.१०४

सूक्तं १.१५ सूक्तं १.४५ सूक्तं १.७५ सूक्तं १.१०५

सूक्तं १.१६ सूक्तं १.४६ सूक्तं १.७६ सूक्तं १.१०६

सूक्तं १.१७ सूक्तं १.४७ सूक्तं १.७७ सूक्तं १.१०७

सूक्तं १.१८ सूक्तं १.४८ सूक्तं १.७८ सूक्तं १.१०८

सूक्तं १.१९ सूक्तं १.४९ सूक्तं १.७९ सूक्तं १.१०९

सूक्तं १.२० सूक्तं १.५० सूक्तं १.८० सूक्तं १.११०

सूक्तं १.२१ सूक्तं १.५१ सूक्तं १.८१ सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.७९

← सूक्तं ९.७८

ऋग्वेदः - मण्डल ९

सूक्तं ९.७९

कविर्भार्गवः।

सूक्तं ९.८० →

दे. पवमानः सोमः। जगती।

अचोदसो नो धन्वन्त्विन्दवः प्र सुवानासो बृहद्दिवेषु हरयः ।

वि च नशन्न इषो अरातयोऽर्यो नशन्त सनिषन्त नो धियः ॥१॥

प्र णो धन्वन्त्विन्दवो मदच्युतो धना वा येभिरर्वतो जुनीमसि ।

तिरो मर्तस्य कस्य चित्परिह्वृतिं वयं धनानि विश्वधा भरेमहि ॥२॥

उत स्वस्या अरात्या अरिर्हि ष उतान्यस्या अरात्या वृको हि षः ।

धन्वन्न तृष्णा समरीत ताँ अभि सोम जहि पवमान दुराध्यः ॥३॥

दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः ।

अद्रयस्त्वा बप्सति गोरधि त्वच्यप्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ॥४॥

एवा त इन्दो सुभ्वं सुपेशसं रसं तुञ्जन्ति प्रथमा अभिश्रियः ।

निदंनिदं पवमान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ॥५॥

सायणभाष्यम्

‘ अचोदसः' इति पञ्चर्चं द्वादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘ अचोदसः' इत्यनुक्रान्तम् । गतो विनियोगः ।

अ॒चो॒दसों नो धन्व॒ंत्विंदंव॒ः प्र सुंवा॒नासों बृ॒हद्दिंवेषु॒ हरंयः ।

वि च॒ नशं॑न्न इ॒षो अरा॑तयो॒ऽर्यो नं॑शं॒त सनिं॑षंत नो॒ धियः॑ ॥
१

अ॒चो॒दसः॑ । न॒ः । ध॒न्व॒न्तु॒ । इन्दं॑वः । प्र । सु॒वा॒नासः॑ ।
बृ॒हत्ऽदिं॑वेषु । हरं॑यः ।

वि । च॒ । नशं॑न् । न॒ः । इ॒षः । अरा॑तयः । अ॒र्यः । न॒श॒न्त॒ ।
सनिं॑षन्त । न॒ः । धियः॑ ॥१

अचोदसः । नः । धन्वन्तु । इन्दवः । प्र । सुवानासः ।
बृहत्ऽदिवेषु । हरयः ।

वि । च । नशन् । नः । इषः । अरातयः । अर्यः । नशन्त ।
सनिषन्त । नः । धियः ॥१

“अचोदसः अचोदना अनन्यप्रेरिताः “इन्दवः सोमाः “नः
अस्माकं “प्र “धन्वन्तु प्रगच्छन्तु । धन्वतिर्गतिकर्मा। कुत्र।
“बृहद्दिवेषु प्रभूतदीप्तिषु यागेषु निमित्तेषु । अथवा

बृहद्दिवकुलजेषु मध्ये । न इति संबन्धः । कीदृशा इन्दवः । “सुवानासः सूयमानाः "हरयः हरितवर्णाः । किंच “नः अस्मभ्यं ये च “इषः अन्नस्य “अरातयः अदातारः सन्ति ते “च “वि “नशन् विनश्यन्तु । तथा “अर्यः अरयोऽपि “नशन्त विनश्यन्तु। “सनिषन्त संभजन्तु च “नो “धियः अस्मदीयानि कर्माणि देवा अस्मत्प्रियभूता वा ॥

प्र णों धन्वं॒त्विंदं॑वो मद॒च्युतो॒ धनां॑ वा॒ येभि॒रर्व॑तो जुनी॒मसिं ।

ति॒रो मर्तं॑स्य॒ कस्यं॑ चि॒त्परिं॑ह्वृतिं व॒यं धनां॑नि वि॒श्वधां॑ भरेमहि ॥२

प्र । न॒ः । ध॒न्व॒न्तु॒ । इन्दं॑वः । म॒द॒ऽच्यु॑तः । धनां॑ । वा॒ । येभिः॑ । अर्व॑तः । जु॒नी॒मसिं॑ ।

ति॒रः । मर्त॑स्य । कस्य॑ । चि॒त् । परि॑ऽह्वृतिम् । व॒यम् । धना॑नि । वि॒श्वधा॑ । भ॒रे॒म॒हि॒ ॥२

प्र । नः । धन्वन्तु । इन्दवः । मदऽच्युतः । धना । वा । येभिः । अर्वतः । जुनीमसि ।

तिरः । मर्तस्य । कस्य । चित् । परिऽह्वृतिम् । वयम् । धनानि । विश्वधा । भरेमहि ॥२

“प्र “धन्वन्तु प्रगच्छन्तु “नः अस्माकम् “इन्दवः सोमाः “मदच्युतः मदस्राविणः । “वा अथवा। किंचेत्यर्थः। “धना धनान्यपि प्र धन्वन्तु । “येभिः यैः सोमैः “अर्वतः बलवतः शत्रोः समीपं “जुनीमसि जुनीमः प्राप्नुमः । “कस्य “चित् कस्यापि “मर्तस्य मनुष्यस्य प्रबलस्य "परिह्वृतिं परितो बाधां “तिरः तिरस्कुर्वन्तो “वयं “धनानि गवादिरूपाणि “विश्वधा सर्वदा “भरेमहि बिभृयाम ॥

उ॒त स्वस्या॒ अरा॑त्या अ॒रिर्हि ष उ॒तान्यस्या॒ अरा॑त्या॒ वृको॒ हि षः ।

धन्व॒न्न तृष्णा॒ समं॑रीत॒ ताँ अ॒भि सोमं॑ ज॒हि पं॑वमान दुरा॒ध्यः॑ ॥३

उ॒त । स्वस्याः॑ । अरा॑त्याः । अ॒रिः । हि । सः । उ॒त । अ॒न्यस्याः॑ । अरा॑त्याः । वृकः॑ । हि । सः ।

धन्वं॑न् । न । तृष्णां॑ । सम् । अ॒री॒त॒ । तान् । अ॒भि । सोमं॑ । ज॒हि । प॒व॒मा॒न॒ । दुः॒ऽआ॒ध्यः॑ ॥३

उत । स्वस्याः । अरात्याः । अरिः । हि । सः । उत । अन्यस्याः । अरात्याः । वृकः । हि । सः ।

धन्वन् । न । तृष्णा । सम् । अरीत । तान् । अभि । सोम । जहि । पवमान । दुःऽआध्यः ॥३

“उत अपि च "सः सोमः “स्वस्याः "अरात्याः स्वीयस्य शत्रोः “अरिः अभिगन्ता हननाय । “उत अपि च “सः सोमः “अन्यस्याः अस्मदीयायाः “अरात्याः अस्मच्छत्रोः “वृको “हि हिंसकः खलु । अरातिशब्दः स्त्रीलिङ्गोऽप्यस्ति । अथ प्रत्यक्षकृतः । “धन्वन्न “तृष्णा । धन्व निरुदको देशः । तस्मिन् स्थितस्य तृष्णेव सा यथा तं “समरीत प्राप्नोति तद्वत् “तान् उभयविधान् शत्रून् “जहि ॥

दि॒वि ते॒ नाभा॑ पर॒मो य आ॑द॒दे पृ॑थि॒व्यास्ते॑ रुरुहुः॒ सान॑वि॒ क्षिपः॑ ।

अद्र॑यस्त्वा बप्सति॒ गोरधि॑ त्व॒च्य१॒॑प्सु त्वा॒ हस्तै॑र्दुदुहुर्मनी॒षिणः॑ ॥४

दि॒वि । ते॒ । नाभा॑ । प॒र॒मः । यः । आ॒ऽद॒दे । पृ॒थि॒व्याः । ते॒ । रु॒रु॒हुः॒ । सान॑वि । क्षिपः॑ ।

अद्रंयः । त्वा॒ । ब॒प्स॒ति॒ । गोः । अधिं । त्व॒चि । अ॒प्ऽसु ।
त्वा॒ । हस्तैः॑ । दु॒दु॒हुः॒ । म॒नी॒षिणः॑ ॥४

दिवि । ते । नाभा । परमः । यः । आऽददे । पृथिव्याः । ते । रुरुहुः । सानवि । क्षिपः ।

अद्रयः । त्वा । बप्सति । गोः । अधि । त्वचि । अप्ऽसु ।
त्वा । हस्तैः । दुदुहुः । मनीषिणः ॥४

हे सोम “ते तव सः “परमः उत्तमोंऽशो “दिवि दिवः “नाभा नाभौ द्युलोकस्य नाभिस्थानीये देशे । अथवा नाभौ वृष्ट्यादेर्बन्धके दिवि द्युलोके। वर्तते “य “आददे आदत्ते हविर्देवतारूपः सन् । “ते तव द्युलोकस्थांशस्यावयवाः “पृथिव्याः “सानवि समुच्छ्रिते देशे पर्वतादिप्रदेशे “क्षिपः क्षिप्ताः । सन्तः “रुरुहुः रोहन्ति । “त्वा त्वां द्युलोकस्थसोमांशभूतम् “अद्रयः ग्रावाणः “बप्सति भक्षयन्ति । बप्सतिरत्तिकर्मा । कुत्र । “गोरधि “त्वचि ।

अधीति सप्तम्यर्थानुवादी ।
आनडुहेऽधिषवणचर्मणीत्यर्थः। यद्यपि इदानींतनाः कृष्णाजिनेऽभिषुण्वन्ति न गोचर्मणि तथापि तस्मिन् सोमो मीयते क्रयार्थम् । तथा च सति यस्मिन् मिमीते तस्याधिप्रवणचर्म इति सूत्रात् मानसाधनस्यैव गोचर्मणः अधिषवणचर्मत्वाभिधानादविरोधः । “त्वा त्वां तथा “अप्सु वसतीवरीषु “दुदुहुः दुहन्ति । अद्भिराप्लाव्य दुहन्तीत्यर्थः । यद्वा । अप्सूदकेषु रसेषु निमित्तेषु दुदुहुः दुहन्ति । कैः साधनैः। "हस्तैः । 'हस्तो हन्तेः ' (निरु. १. ७) इति निरुक्तम् । के। “मनीषिणः मेधाविनोऽध्वर्य्वादयः ॥

ए॒वा तं इंदो सु॒भ्वं सु॒पेशं॑स॒ं रसं॑ तुंजंति प्रथ॒मा अं॑भि॒श्रियः॑ ।

निदंनिदं पवमान॒ नि तांरिष आ॒विस्ते॒ शुष्मों भवतु प्रि॒यो मदः॑ ॥५

ए॒व । ते॒ । इ॒न्दो॒ इतिं । सु॒ऽभ्वंम् । सु॒ऽपेशंसम् । रसंम् । तु॒ञ्ज॒न्ति॒ । प्र॒थ॒माः । अ॒भि॒ऽश्रियः॑ ।

निदंम्ऽनिदम् । प॒व॒मा॒न॒ । नि । ता॒रि॒ष॒ः । आ॒विः । ते॒ । शुष्मः॑ । भ॒व॒तु॒ । प्रि॒यः । मदः॑ ॥५

एव । ते । इन्दो इति । सुऽभ्वम् । सुऽपेशसम् । रसम् । तुञ्जन्ति । प्रथमाः । अभिऽश्रियः ।

निदम्ऽनिदम् । पवमान । नि । तारिषः । आविः । ते । शुष्मः । भवतु । प्रियः । मदः ॥५

पूर्वत्र ‘ अद्रयस्त्वां बप्सति' इत्युक्तं तदेवोच्यते । हे “इन्दो सोम “एव एवा.... क्रियमाणप्रकारेण “ते तव “सुभ्वं शोभनभवनं "सुपेशसम् । पेश इति रूपनाम । सुरूपं

“रसं “प्रथमाः प्रथममेव । यद्वा । प्रथम इति मुख्यनाम। “प्रथमाः मुख्याः। ग्रावाणोऽध्वर्यवो वा “अभिश्रियः अभिश्रयन्तः सन्तः “तुञ्जन्ति प्रेरयन्ति । हे “पवमान “निदंनिदम् अस्मन्निन्दकं सर्वमपि शत्रुं “नि “तारिषः विनाशय । “ते तव “शुष्मः बलकरः “प्रियः प्रियभूतः “मदः मदकरो रसः “आविः “भवतु ।। ॥ ४ ॥

टिप्पणी

९.७९.१ अचोदसो नो धन्वन्तु इति

ग्रामगेयः ५५५ । सोमयागे उदयनीयेष्ट्यां औद्गात्रम्।

द्र. उदयनोपरि टिप्पणी (http://puranastudy.freeoda.com/pur_index3/udayana1.htm)

मण्डल ९

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.८०

← सूक्तं ९.७९

ऋग्वेदः - मण्डल ९

सूक्तं ९.८०

वसुर्भारद्वाजः

सूक्तं ९.८१ →

दे. पवमानः सोमः। जगती।

सोमस्य धारा पवते नृचक्षस ऋतेन देवान्हवते दिवस्परि ।

बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः ॥१॥

यं त्वा वाजिन्नघ्न्या अभ्यनूषतायोहतं योनिमा रोहसि द्युमान् ।

मघोनामायुः प्रतिरन्महि श्रव इन्द्राय सोम पवसे वृषा मदः ॥२॥

एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमङ्गलः ।

प्रत्यङ्स विश्वा भुवनाभि पप्रथे क्रीळन्हरिरत्यः स्यन्दते वृषा ॥३॥

तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः ।

नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित् ॥४॥

तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः ।

इन्द्रं सोम मादयन्दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ॥५॥

सायणभाष्यम्

‘सोमस्य धारा' इति पञ्चर्चं त्रयोदशं सूक्तं भारद्वाजस्य वसुनाम्न आर्षं जागतं पवमानसोमदेवताकम् । तथा चानुक्रान्तं- सोमस्य वसुर्भारद्वाजः' इति । गतो विनियोगः ॥

सोमं॑स्य॒ धारां॑ पवते नृ॒चक्षं॑स ऋ॒तेनं॑ दे॒वान्हं॑वते दि॒वस्परिं॑ ।

बृह॒स्पतें॑ र॒वथें॑ना॒ वि दिं॑द्युते समु॒द्रासो॒ न सवं॑नानि विव्यचुः ॥१

सोमं॑स्य । धारां॑ । प॒व॒ते॒ । नृ॒ऽचक्षं॑सः । ऋ॒तेनं॑ । दे॒वान् । ह॒व॒ते॒ । दि॒वः । परिं॑ ।

बृह॒स्पतेः॑ । र॒वथें॑न । वि । दि॒द्यु॒ते॒ । स॒मु॒द्रासः॑ । न । सवं॑नानि । वि॒व्य॒चुः॒ ॥१

सोमस्य । धारा । पवते । नृऽचक्षसः । ऋतेन । देवान् । हवते । दिवः । परि ।

बृहस्पतेः । रवथेन । वि । दिद्युते । समुद्रासः । न । सवनानि । विव्यचुः ॥१

सोमस्य अभिषूयमाणस्य “धारा “पवते श्चोतते ।
कीदृशस्य सोमस्य । “नृचक्षसः नृणां यजमानानां द्रष्टुः ।
स च “ऋतेन यज्ञेन "देवान् सोमभाज इन्द्रादीन “हवते।
कुत्र । “दिवस्परि द्युलोकस्योपरि वर्तमानान् । “बृहस्पतेः
मन्त्रपालकस्य स्तोतुः “रवथेन शब्देन स्तोत्रेण “वि “दिद्युते
विद्योतते । “समुद्रासो “न समुद्रा इव पृथिवीं “सवनानि
यज्ञसंबन्धीनि “विव्यचुः व्याप्नुवन्ति ॥

यं त्वां वाजिन्नघ्न्या अ॒भ्यनूं॑ष॒तायो॑हत॒ं योनि॒मा रो॑हसि
द्यु॒मान् ।

म॒घोना॒मायु॑ः प्रति॒रन्महि॒ श्रव॒ इंद्रा॑य सोम पवसे॒ वृषा॒ मद॑ः
॥२

यम् । त्वा॒ । वा॒जि॒न् । अ॒घ्न्याः । अ॒भि । अनू॑षत ।
अयः॑ऽहतम् । योनि॑म् । आ । रो॒ह॒सि॒ । द्यु॒ऽमान् ।

म॒घोना॑म् । आयुः॑ । प्र॒ऽति॒रन् । महि॑ । श्रवः॑ । इन्द्रा॑य । सो॒म॒ । प॒व॒से॒ । वृषा॑ । मदः॑ ॥२

यम् । त्वा । वाजिन् । अघ्न्याः । अभि । अनूषत । अयःऽहतम् । योनिम् । आ । रोहसि । द्युऽमान् ।

मघोनाम् । आयुः । प्रऽतिरन् । महि । श्रवः । इन्द्राय । सोम । पवसे । वृषा । मदः ॥२

हे "वाजिन् अन्नवन् सोम "यं "त्वा त्वाम् अघ्न्याः अहननीया गावः "अभ्यनूषत अभिष्टुवन्ति । आशिरार्थं स्थिताः शब्दायन्त इत्यर्थः । स त्वम् "अयोहतम् । अय इति हिरण्यनाम । तेन तद्वान् पाणिर्लक्ष्यते । हिरण्मयेन पाणिना हतं संस्कृतं योनिं स्थानम् "आ "रोहसि "द्युमान् दीप्तः सन् । ' अभि योनिमयोहतम्' (ऋ. सं. ९. १. २) इति ह्युक्तम् । किंच हे सोम "मघोनां हविष्मतां यजमानानाम् "आयुः आयुष्यं "महि महत् "श्रवः अन्नं

यशो वा “प्रतिरन् वर्धयन् “इन्द्राय इन्द्रार्थं “पवसे पूयसे ।
“वृषा वर्षको “मदः मदकरश्च त्वम् ॥

एंद्रंस्य कुक्षा पंवते मदिंतम ऊर्जं वसांनः श्रवंसे सुमंगलः ।

प्रत्यङ्स विश्वा भुवंनाभि पंप्रथे क्रीळन्हरिरत्यः स्यंदते
वृषां ॥३

आ । इन्द्रंस्य । कुक्षा । पवते । मदिन्ऽतंमः । ऊर्जंम् ।
वसांनः । श्रवंसे । सुऽमङ्गलः ।

प्रत्यङ् । सः । विश्वां । भुवंना । अभि । पप्रथे । क्रीळंन् ।
हरिः । अत्यः । स्यन्दते । वृषां ॥३

आ । इन्द्रस्य । कुक्षा । पवते । मदिन्ऽतमः । ऊर्जम् ।
वसानः । श्रवसे । सुऽमङ्गलः ।

प्रत्यङ् । सः । विश्वा । भुवना । अभि । पप्रथे । क्रीळन् । हरिः । अत्यः । स्यन्दते । वृषा ॥३

अयं सोमः “इन्द्रस्य “कुक्षा कुक्षौ “आ “पवते आसिच्यते । किमर्थम् । “श्रवसे तस्यान्नाय यष्टुर्वा अन्नसिद्ध्यर्थम् । सोमो विशेष्यते। “मदिन्तमः मादयितृतमः “ऊर्जं “वसानः बलकरं रसमाच्छादयन् । ' अपो वसानः' (ऋ. सं. ९. ७८, १) इति ह्युक्तम् । “सुमङ्गलः शोभनमङ्गलप्रदः । “सः सोमः “प्रत्यङ् “विश्वा “भुवना सर्वाणि भूतजातानि “अभि “पप्रथे अभिप्रथयति । दिवि उदितः सन् “क्रीळन् वेद्यां संक्रीडमानः “हरिः हरितवर्णः “अत्यः अतनकुशलः “वृषा वर्षकः “स्यन्दते रसरूपेण ॥

तं त्वां देवेभ्यो मधुंमत्तमं नरः सहस्रंधारं दुहते दश क्षिपः ।

नृभिः सोम॒ प्रच्यु॑तो॒ ग्राव॑भिः सु॒तो विश्वाँ॑दे॒वाँ आ प॑वस्वा सहस्रजित् ॥४

तम् । त्वा॒ । दे॒वेभ्यः॑ । मधु॑मत्ऽतमम् । नरः॑ । स॒हस्र॑ऽधारम् । दु॒ह॒ते॒ । दश॑ । क्षिपः॑ ।

नृऽभिः॑ । सो॒म॒ । प्रऽच्यु॑तः । ग्राव॑ऽभिः । सु॒तः । विश्वा॑न् । दे॒वान् । आ । प॒व॒स्व॒ । स॒ह॒स्र॒ऽजि॒त् ॥४

तम् । त्वा । देवेभ्यः । मधुमत्ऽतमम् । नरः । सहस्रऽधारम् । दुहते । दश । क्षिपः ।

नृऽभिः । सोम । प्रऽच्युतः । ग्रावऽभिः । सुतः । विश्वान् । देवान् । आ । पवस्व । सहस्रऽजित् ॥४

हे सोम “तं तादृशं “त्वा त्वां “देवेभ्यः इन्द्राद्यर्थं "मधुमत्तमम् अतिशयेन मधुमन्तं “सहस्रधारं बहुधारायुक्तं “दुहते दुहन्ति । के। “नरः नेतार ऋत्विजः “दश “क्षिपः

तेषां दशसंख्याका अङ्गुलयश्च । हे “सोम “नृभिः मनुष्यैः “प्रच्युतः “ग्रावभिः “सुतः अभिषुतस्त्वं “सहस्रजित् सहस्रसंख्याकधनस्य जेता सन् “विश्वान् “देवान् “आ “पवस्व ॥

तं त्वा॑ ह॒स्तिनो॒ मधु॑मंत॒मद्रि॑भिर्दु॒हंत्य॒प्सु वृ॑ष॒भं दश॒ क्षिपः॑ ।

इंद्रं॑ सोम मा॒दय॒न्दैव्यं॒ जनं॒ सिंधो॑रिवो॒र्मिः पव॑मानो अर्षसि ॥५

तम् । त्वा॒ । ह॒स्तिनः॑ । मधु॑ऽमन्तम् । अद्रि॑ऽभिः । दु॒हन्ति॑ । अ॒प्ऽसु । वृ॒ष॒भम् । दश॑ । क्षिपः॑ ।

इन्द्र॑म् । सो॒म॒ । मा॒दय॑न् । दैव्य॑म् । जन॑म् । सिन्धोः॑ऽइव । ऊ॒र्मिः । पव॑मानः । अ॒र्ष॒सि॒ ॥५

तम् । त्वा । हस्तिनः । मधुऽमन्तम् । अद्रिऽभिः । दुहन्ति । अप्ऽसु । वृषभम् । दश । क्षिपः ।

इन्द्रम् । सोम । मादयन् । दैव्यम् । जनम् । सिन्धोःऽइव । ऊर्मिः । पवमानः । अर्षसि ॥५

"तं तादृशं "मधुमन्तं मधुररसं "वृषभं कामानां वर्षकं "त्वा त्वां "हस्तिनः सुहस्तस्य "दश "क्षिपः अङ्गुलयः "अद्रिभिः ग्रावभिः "अप्सु "दुहन्ति । तादृश हे "सोम "इन्द्रम् अन्यं "दैव्यं "जनं देवसंबन्धिनं संघं "मादयन् "सिन्धोरूर्मिरिव "पवमानः पूयमानः सन् "अर्षसि गच्छसि॥ ॥५॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

३ आगस्ट् २०१९ (तमे) दिनाङ्के ०५:१९ समये अन्तिमपरिवर्तनं जातम् •

ऋग्वेदः सूक्तं ९.८१

← सूक्तं ९.८०

ऋग्वेदः - मण्डल ९

सूक्तं ९.८१

वसुर्भारद्वाजः

सूक्तं ९.८२ →

दे. पवमानः सोमः। जगती, ५ त्रिष्टुप्।

प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः ।

दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः ॥१॥

अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळ्हा रघुवर्तनिर्वृषा ।

अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ॥२॥

आ नः सोम पवमानः किरा वस्विन्दो भव मघवा राधसो महः ।

शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ॥३॥

आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः ।

बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥४॥

उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।

भगो नृशंस उर्वन्तरिक्षं विश्वे देवाः पवमानं जुषन्त ॥५॥

सायणभाष्यम्

‘प्र सोमस्य' इति पञ्चर्चं चतुर्दशं सूक्तम् । ऋषिदेवते पूर्ववत् । अन्त्या त्रिष्टुप् शिष्टा जगत्यः । ‘प्र सोमस्य' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र सोमं॑स्य॒ पवं॑मानस्यो॒र्मय॒ इंद्रं॑स्य यंति ज॒ठरं॑ सु॒पेशं॑सः ।

द॒ध्ना यदी॒मुन्नींता य॒शसा॒ गवां दा॒नाय॒ शूरंमु॒दमंदिषुः सु॒ताः ॥१

प्र । सोमंस्य । पवंमानस्य । ऊ॒र्मयः॑ । इन्द्रंस्य । य॒न्ति॒ । ज॒ठरंम् । सु॒ऽपेशंसः ।

द॒ध्ना । यत् । ई॒म् । उत्ऽनींताः । य॒शसां । गवांम् । दा॒नायं । शूरंम् । उ॒त्ऽअमंन्दिषुः । सु॒ताः ॥१

प्र । सोमस्य । पवमानस्य । ऊर्मयः । इन्द्रस्य । यन्ति । जठरम् । सुऽपेशसः ।

दध्ना । यत् । ईम् । उत्ऽनीताः । यशसा । गवाम् । दानाय । शूरम् । उत्ऽअमन्दिषुः । सुताः ॥१

“पवमानस्य पूयमानस्य “ऊर्मयः रसप्रवाहाः "इन्द्रस्य “जठरं “प्र “यन्ति प्रगच्छन्ति । “सुपेशसः सुरूपा ऊर्मय इति संबन्धः । “यत् यदा “ईम् एते “सुताः अभिषुताः

सोमाः “गवां “यशसा बलभूतेन “दध्ना सह “उन्नीताः सन्तः “दानाय यजमानविषयाभिमतदानाय “शूरं विक्रान्तमिन्द्रम् “उदमन्दिषुः उन्मादयन्ति तदा जठरं यन्ति ॥

अच्छा॒ हि सोम॑ः क॒लशाँ॒ असिं॑ष्यद॒दत्यो॒ न वोळ्हा॑ र॒घुवं॑र्तनि॒र्वृषा॑ ।

अथा॑ दे॒वाना॑मु॒भयं॑स्य॒ जन्मं॑नो वि॒द्वाँ अं॑श्नोत्य॒मुतं॑ इ॒तश्च॒ यत् ॥२

अच्छं । हि । सोम॑ः । क॒लशा॑न् । असिं॑स्यदत् । अत्य॑ः । न । वोळ्हा॑ । र॒घुऽवं॑र्तनिः । वृषा॑ ।

अथं । दे॒वाना॑म् । उ॒भयं॑स्य । जन्मं॑नः । वि॒द्वान् । अ॒श्नो॒ति॒ । अ॒मुत॑ः । इ॒तः । च॒ । यत् ॥२

अच्छ । हि । सोमः । कलशान् । असिस्यदत् । अत्यः । न । वोळ्हा । रघुऽवर्तनिः । वृषा ।

अथ । देवानाम् । उभयस्य । जन्मनः । विद्वान् । अश्नोति । अमुतः । इतः । च । यत् ॥२

असौ “सोमः “कलशान् “अच्छ अभिमुखम् “असिष्यदत् स्यन्दते । क इव । “अत्यो “न “वोळ्हा रथस्य वाहकोऽश्व इव । स यथा स्वगन्तव्यमभिगच्छति तद्वत् । यद्वा । अयमुत्तरत्र दृष्टान्तः । “वोळ्हा अश्व इव "रघुवर्तनिः लघुगमनः “वृषा वर्षकश्च । “अथ अपि च “देवानां सोमसजुषाम् “उभयस्य उभयविधं "जन्मनः जातं “विद्वान् जानन् असिष्यदत् कलशान् । किं तदुभयं जन्मेति उच्यते । यद्देवजातम् “अमुतः द्युलोकात् “इतश्च अस्माद्भूलोकाच्च “अश्नोति व्याप्नोति यज्ञम् । तस्योभयस्य जातं विद्वानिति संबन्धः ॥

आ नः॑ सोम॒ पव॑मानः किरा॒ वस्वि॑न्दो॒ भव॑ म॒घवा॒ राध॑सो म॒हः ।

शिक्षा॑ वयोधो॒ वस॑वे॒ सु चे॒तुना॒ मा नो॒ गय॑मा॒रे अ॒स्मत्परा॑ सिचः ॥३

आ । न॒ः । सो॒म॒ । पव॑मानः । कि॒र॒ । वसु॑ । इन्दो॒ इति॑ । भव॑ । म॒घऽवा॑ । राध॑सः । म॒हः ।

शिक्ष॑ । व॒य॒ःऽध॒ः । वस॑वे । सु । चे॒तुना॑ । मा । न॒ः । गय॑म् । आ॒रे । अ॒स्मत् । परा॑ । सि॒च॒ः ॥३

आ । नः । सोम । पवमानः । किर । वसु । इन्दो इति । भव । मघऽवा । राधसः । महः ।

शिक्ष । वयःऽधः । वसवे । सु । चेतुना । मा । नः । गयम् । आरे । अस्मत् । परा । सिचः ॥३

“आ “किर सर्वतो “विक्षिप “नः अस्मभ्यं हे “सोम “पवमानः पूयमानस्त्वम् । किम् । “वसु वासकं धनं गवादिरूपम् । किंच “इन्दो दीप्त हे सोम “मघवा धनवांस्त्वं “महः महतः “राधसः धनस्य “भव दातेति शेषः । तथा हे “वयोधः अन्नस्य धातः सोम “वसवे वासकाय परिचरते मह्यं “चेतुना प्रकृष्टेन प्रज्ञानेन “सु सुखं कल्याणं “शिक्ष देहि । “नः अस्मभ्यं प्रदेयं “गयं धनम् “अस्मत् "आरे अस्मत्तो दूरं “मा “परा “सिचः मा प्रेरय ॥

आ नः॑ पू॒षा पव॑मानः सुरा॒तयो॑ मि॒त्रो गं॑च्छंत॒ु वरु॑णः स॒जोषं॑सः ।

बृह॒स्पति॑र्म॒रुतो॑ वा॒युर॒श्विना॒ त्वष्टा॑ सवि॒ता सु॒यमा॒ सर॑स्वती ॥४

आ । नः॒ । पू॒षा । पव॑मानः । सु॒ऽरा॒तयः॑ । मि॒त्रः । ग॒च्छ॒न्तु॒ । वरु॑णः । स॒ऽजोष॑सः ।

बृह॒स्पतिः॑ । म॒रुतः॑ । वा॒युः । अ॒श्विना॑ । त्वष्टा॑ । स॒वि॒ता । सु॒ऽयमा॑ । सर॑स्वती ॥४

आ । नः । पूषा । पवमानः । सुऽरातयः । मित्रः । गच्छन्तु । वरुणः । सऽजोषसः ।

बृहस्पतिः । मरुतः । वायुः । अश्विना । त्वष्टा । सविता । सुऽयमा । सरस्वती ॥४

“सुरातयः सुदानाः ”सजोषसः संगताः पूषादयो देवाः “आ “गच्छन्तु “नः अस्मान् अस्माकं यज्ञं वा । तथा “सुयमा । यम्यते नियम्यत इति यमो विग्रहः । सुविग्रहा “सरस्वती चागच्छतु ॥

उ॒भे द्यावा॑पृथि॒वी वि॑श्वमि॒न्वे अ॑र्य॒मा दे॒वो अदि॑तिर्वि॑धा॒ता ।

भगो॒ नृशंस॑ उ॒र्वं१॒॑तरि॑क्ष॒ विश्वे॑ दे॒वाः पव॑मानं जुषंत ॥५

उ॒भे इति॑ । द्यावा॑पृथि॒वी इति॑ । वि॒श्व॒मि॒न्वे इति॑ वि॒श्व॒म्ऽइ॒न्वे । अ॒र्य॒मा । दे॒वः । अदि॑तिः । वि॒ऽधा॒ता ।

भगः॑ । नृऽशंसः॑ । उ॒रु । अ॒न्तरि॑क्षम् । विश्वे॑ । दे॒वाः । पव॑मानम् । जु॒ष॒न्त॒ ॥५

उभे इति । द्यावापृथिवी इति । विश्वमिन्वे इति विश्वम्ऽइन्वे । अर्यमा । देवः । अदितिः । विऽधाता ।

भगः । नृऽशंसः । उरु । अन्तरिक्षम् । विश्वे । देवाः । पवमानम् । जुषन्त ॥५

“विश्वमिन्वे । इन्वतिर्व्याप्तिकर्मा । सर्वव्यापिन्यौ “उभे “द्यावापृथिवी द्यावापृथिव्यौ अर्यमादयस्त्रयश्च भगश्च “नृशंसः नृभिः शंसनीयः “उर्वन्तरिक्षं च “विश्वे “देवाः च "पवमानं पूयमानं सोमं “जुषन्त सेवन्ते ॥ ॥ ६ ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.८२

दे. पवमानः सोमः। जगती, ५ त्रिष्टुप्।

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।

पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम् ॥१॥

कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि ।

अपसेधन्दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम् ॥२॥

पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।

स्वसार आपो अभि गा उतासरन्सं ग्रावभिर्नसते वीते अध्वरे ॥३॥

जायेव पत्यावधि शेव मंहसे पज्राया गर्भ शृणुहि ब्रवीमि ते ।

अन्तर्वाणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि ॥४॥

यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिन्दो ।

एवा पवस्व सुविताय नव्यसे तव व्रतमन्वापः सचन्ते ॥५॥

सायणभाष्यम्

'असावि' इति पञ्चर्चं पञ्चदशं सूक्तम् । ऋष्याद्याः पूर्ववत् । अत्रानुक्रमणिका– असावीति त्रिष्टुबन्ते' इति । अनेन द्विवचनेन प्रकृतयोः 'प्र सोमस्य' इत्यादिकयोर्द्वयोरपि त्रिष्टुबन्तता प्रतिपादिता । गतो विनियोगः ॥

असा॑वि॒ सोमो॑ अरु॒षो वृषा॒ हरी॒ राजे॑व द॒स्मो अ॒भि गा अ॑चिक्रदत् ।

पु॒ना॒नो वार॒ं पर्ये॑त्य॒व्ययं॑ श्ये॒नो न योनिं॑ घृ॒तवं॑तमा॒सदं॑ ॥१

असा॑वि । सोम॑ः । अ॒रु॒षः । वृषा॑ । हरि॑ः । राजा॑ऽइव ।
द॒स्मः । अ॒भि । गाः । अ॒चि॒क्र॒द॒त् ।

पु॒ना॒नः । वार॑म् । परि॑ । ए॒ति॒ । अ॒व्यय॑म् । श्ये॒नः । न ।
योनि॑म् । घृ॒तऽव॑न्तम् । आ॒ऽसद॑म् ॥१

असावि । सोमः । अरुषः । वृषा । हरिः । राजाऽइव ।
दस्मः । अभि । गाः । अचिक्रदत् ।

पुनानः । वारम् । परि । एति । अव्ययम् । श्येनः । न ।
योनिम् । घृतऽवन्तम् । आऽसदम् ॥१

“सोमः “असावि अभिषुतोऽभूत्। कीदृशः सोमः । “अरुषः आरोचमानः “वृषा वर्षकः “हरिः हरितवर्णः । स च “राजेव “दस्मः दर्शनीयः सन् “गाः उदकानि अभिलक्ष्य “अचिक्रदत् शब्दं करोति स्वरसनिर्मोकसमये । पश्चात् “पुनानः पूयमानः “अव्ययम् अविमयं “वारं वालं दशापवित्रं “पर्येति । ततः “श्येनो “न श्येन इव “योनिं स्वकीयं स्थानं “घृतवन्तम् उदकवन्तम् “आसदम् आसदनाय पवत इति शेषः ॥

क॒विर्वे॑ध॒स्या पर्ये॑षि॒ माहि॑न॒मत्यो॒ न मृ॒ष्टो अ॒भि वाज॑मर्षसि ।

अ॒प॒सेध॑दुरि॒ता सो॑म मृळय घृ॒तं वसा॑नः॒ परि॑ यासि नि॒र्णिज॑ ॥२

क॒विः । वे॒ध॒स्या । परि॑ । ए॒षि॒ । माहि॑नम् । अत्यः॑ । न ।
मृ॒ष्टः । अ॒भि । वाज॑म् । अ॒र्ष॒सि॒ ।

अ॒प॒ऽसेध॑न् । दु॒ःऽइ॒ता । सो॒म॒ । मृ॒ळ॒य॒ । घृ॒तम् । वसा॑नः ।
परि॑ । या॒सि॒ । नि॒ःऽनिज॑म् ॥२

कविः । वेधस्या । परि । एषि । माहिनम् । अत्यः । न ।
मृष्टः । अभि । वाजम् । अर्षसि ।

अपऽसेधन् । दुःऽइता । सोम । मृळय । घृतम् । वसानः ।
परि । यासि । निःऽनिजम् ॥२

हे सोम "कविः क्रान्तदर्शी सन् "वेधस्या यागविधानेच्छया "माहिनं मंहनीयं पवित्रं "पर्येषि परिगच्छसि । पश्चात् "मृष्टः प्रक्षालितः "अत्यो “न अश्व इव “वाजं संग्रामम् "अभि “अर्षसि । हे “सोम “दुरिता अस्माकं दुरितानि “अपसेधन परिहरन् "मृळय सुखय । “घृतम् उदकं

"वसानः आच्छादयन् "परि "यासि अभिगच्छसि । किम् । "निर्णिजं निर्णेजकं पवित्रम् ॥

प॒र्जन्यः॑ पि॒ता म॑हि॒षस्य॑ प॒र्णिनो॒ नाभा॑ पृथि॒व्या गि॒रिषु॒ क्षयं॑ दधे ।

स्वसा॑र॒ आपो॑ अ॒भि गा उ॒तास॑र॒न्त्सं ग्राव॑भिर्नसते वी॒ते अ॑ध्व॒रे ॥३

प॒र्जन्यः॑ । पि॒ता । म॒हि॒षस्य॑ । प॒र्णिनः॑ । नाभा॑ । पृ॒थि॒व्याः । गि॒रिषु॑ । क्षय॑म् । द॒धे॒ ।

स्वसा॑रः । आपः॑ । अ॒भि । गाः । उ॒त । अ॒स॒र॒न् । सम् । ग्राव॑ऽभिः । न॒स॒ते॒ । वी॒ते । अ॒ध्व॒रे ॥३

पर्जन्यः । पिता । महिषस्य । पर्णिनः । नाभा । पृथिव्याः । गिरिषु । क्षयम् । दधे ।

स्वसारः । आपः । अभि । गाः । उत । असरन् । सम् ।
ग्रावऽभिः । नसते । वीते । अध्वरे ॥३

यस्य "महिषस्य महतः "पर्णिनः पर्णवतः पतनवतो वा सोमस्य "पर्जन्यः "पिता जनकः स सोमः "पृथिव्याः "नाभा नाभौ नाभिस्थानीये हविर्धाने “गिरिषु गिरिसंबन्धिग्रावसु "क्षयं निवासं "दधे धारयत्यभिषवसमये । "उत अपि च "स्वसारः अङ्गुलयः "आपः वसतीवर्यः "गाः आशिरार्थाः स्तुतयो वा “अभि "असरन् अभिसरन्ति । “सं "नसते संगच्छते च "ग्रावभिः साकम् । कुत्र । “वीते कान्ते "अध्वरे यज्ञे ॥

जा॒येव॒ पत्या॒वधि॒ शेवं मंहसे॒ पज्रांया गर्भ शृणु॒हि ब्रवींमि ते ।

अ॒न्तर्वाणी॑षु॒ प्र च॑रा॒ सु जी॒वसे॑ऽनि॒न्द्यो वृ॒जने॑ सोम जागृहि ॥४

जा॒याऽइ॑व । पत्यौ॑ । अधि॑ । शेव॑ । म॒ह॒से॒ । पज्रा॑याः । ग॒र्भ॒ । शृ॒णु॒हि । ब्रवी॑मि । ते॒ ।

अ॒न्तः । वाणी॑षु । प्र । च॒र॒ । सु । जी॒वसे॑ । अ॒नि॒न्द्यः । वृ॒जने॑ । सो॒म॒ । जा॒गृ॒हि॒ ॥४

जायाऽइव । पत्यौ । अधि । शेव । मंहसे । पज्रायाः । गर्भ । शृणुहि । ब्रवीमि । ते ।

अन्तः । वाणीषु । प्र । चर । सु । जीवसे । अनिन्द्यः । वृजने । सोम । जागृहि ॥४

“जायेव "पत्यौ जाया यथा स्वभार्यां भर्तरि सुखं प्रयच्छति तद्वत् “शेव शेवम्। द्वितीयाया अम्भावाभावश्छान्दसः । सुखं “मंहसे प्रयच्छसि यजमाने । हे “पज्राया “गर्भं सोम

“शृणुहि शृणु स्तुतीर्याः “ते तुभ्यं "ब्रवीमि । पजिर्गतिकर्मा । पज्रा पृथिवीत्याहुः । अपि वा माध्यमिका वाक् पज्रा । भूमावोषधिरूपेण जातवात्तद्गर्भत्वम् । माध्यमिकाया वाचोऽपि वृष्टिसाधनत्वात् तत्पुत्रत्वम् । स त्वं “वाणीषु वाक्षु स्तुतिषु "अन्तः मध्ये "सु सुष्ठु “प्र “चर "जीवसे अस्माकं जीवनाय ।

यथा॒ पूर्वे॑भ्यः शत॒सा अमृ॑ध्रः सहस्र॒साः प॒र्यया॒ वाज॑मिंदो ।

ए॒वा प॑वस्व सुवि॒ताय॒ नव्य॑से॒ तव॑ व्र॒तमन्वापः॑ सचंते ॥५

यथा॑ । पूर्वे॑भ्यः । श॒त॒ऽसाः । अमृ॑ध्रः । स॒ह॒स्र॒ऽसाः । प॒रि॒ऽअयाः॑ । वाज॑म् । इ॒न्दो॒ इति॑ ।

ए॒व । प॒व॒स्व॒ । सु॒वि॒ताय॑ । नव्य॑से । तव॑ । व्र॒तम् । अनु॑ । आपः॑ । स॒च॒न्ते॒ ॥५

यथा । पूर्वेभ्यः । शतऽसाः । अमृध्रः । सहस्रऽसाः । परिऽअयाः । वाजम् । इन्दो इति ।

एव । पवस्व । सुविताय । नव्यसे । तव । व्रतम् । अनु । आपः । सचन्ते ॥५

हे “इन्दो सोम त्वं "यथा “पूर्वेभ्यः महर्षिभ्यः स्तोतृभ्यः "शतसाः शतसंख्याकस्य धनस्य दाता तथा "सहस्रसाः च सन् “पर्ययाः परिगच्छेः “एव एवमिदानीमपि “नव्यसे नवतराय “सुविताय अभ्युदयाय "पवस्व क्षर। “तव “व्रतं कर्म "अन्वापः वसतीवर्यः "सचन्ते। अतः पवस्व ॥ ॥ ७ ॥

टिप्पणी

९.८२.१ असावि सोमो इति

दीर्घतमसो अर्कः (https://sa.wikisource.org/s/2gt9)

महासामराजम् (https://sa.wikisource.org/s/2huc)

मण्डल ९

सूक्तं ९.११सूक्तं ९.४१सूक्तं ९.७१सूक्तं ९.१०१

सूक्तं ९.१२सूक्तं ९.४२सूक्तं ९.७२सूक्तं ९.१०२

सूक्तं ९.१३सूक्तं ९.४३सूक्तं ९.७३सूक्तं ९.१०३

सूक्तं ९.१४सूक्तं ९.४४सूक्तं ९.७४सूक्तं ९.१०४

सूक्तं ९.१५सूक्तं ९.४५सूक्तं ९.७५सूक्तं ९.१०५

सूक्तं ९.१६सूक्तं ९.४६सूक्तं ९.७६सूक्तं ९.१०६

सूक्तं ९.१७सूक्तं ९.४७सूक्तं ९.७७सूक्तं ९.१०७

सूक्तं ९.१८सूक्तं ९.४८सूक्तं ९.७८सूक्तं ९.१०८

सूक्तं ९.१९सूक्तं ९.४९सूक्तं ९.७९सूक्तं ९.१०९

सूक्तं ९.२०सूक्तं ९.५०सूक्तं ९.८०सूक्तं ९.११०

सूक्तं ९.२१सूक्तं ९.५१सूक्तं ९.८१सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.८३

← सूक्तं ९.८२

ऋग्वेदः - मण्डल ९

सूक्तं ९.८३

पवित्र आङ्गिरसः

सूक्तं ९.८४ →

दे. पवमानः सोमः। जगती।



सोमाभिषवणम्



तर्पणम्

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।

अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत्समाशत ॥१॥

तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन् ।

अवन्त्यस्य पवीतारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसा ॥२॥

अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः ।

मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥३॥

गन्धर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः ।

गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ॥४॥

हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरम् ।

राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ॥५॥

सायणभाष्यम्

'पवित्रं ते ' इति पञ्चर्चं षोडशं सूक्तमाङ्गिरसस्य पवित्रस्यार्षं जागतं पवमानसोमदेवताकम् । तथा चानुक्रान्तं-’ पवित्रं ते पवित्रः' इति । अभिष्टव आद्ये ऋचौ वक्तव्ये । सूत्रितं च---’ पवित्रं ते विततं ब्रह्मणस्पत इति द्वे वि यत्पवित्रं धिषणा अतन्वत ' (आश्व. श्रौ. ४, ६) इति ॥

प॒वित्रं॑ ते॒ वित॑तं ब्रह्मणस्पते प्र॒भुर्गात्रा॑णि॒ पर्ये॑षि वि॒श्वतः॑ ।

अत॑प्ततनू॒र्न तदा॒मो अ॑श्नुते शृ॒तास॒ इद्वह॑न्त॒स्तत्समा॑शत ॥१

प॒वित्र॑म् । ते॒ । विऽत॑तम् । ब्र॒ह्म॒ण॒ः । प॒ते॒ । प्र॒ऽभुः । गात्रा॑णि । परि॑ । ए॒षि॒ । वि॒श्वतः॑ ।

अतं॑प्तऽतनूः । न । तत् । आ॒मः । अ॒श्नु॒ते॒ । शृ॒तासः॑ । इत् । वहं॑न्तः । तत् । सम् । आ॒श॒त॒ ॥१

पवित्रम् । ते । विऽततम् । ब्रह्मणः । पते । प्रऽभुः । गात्राणि । परि । एषि । विश्वतः ।

अतप्तऽतनूः । न । तत् । आमः । अश्नुते । शृतासः । इत् । वहन्तः । तत् । सम् । आशत ॥१

हे “ब्रह्मणस्पते मन्त्रस्य स्वामिन् सोम “ते "पवित्रं शोधकमङ्गं "विततं सर्वत्र विस्तृतम् । स “प्रभुः प्रभविता त्वं "गात्राणि पातुरङ्गानि “पर्येषि परिगच्छसि “विश्वतः सर्वतः। तव “तत् पवित्रम् "अतप्ततनूः पयोव्रतादिना असंतप्तगात्रः "आमः अपरिपक्वो "न “अश्नुते न व्याप्नोति । “शृतास "इत् शृता एवं परिपक्वा एव "वहन्तः यागं निर्वहन्तः “तत् पवित्रं "समाशत व्याप्नुवन्ति ।

तपोंष्प॒वित्रं॒ वितंतं दि॒वस्प॒दे शोचंतो अस्य॒ तंतंवो॒ व्यंस्थिरन् ।

अवंत्यस्य पवी॒तारंमा॒शवों दि॒वस्पृ॒ष्ठमधिं तिष्ठंति॒ चेतंसा ॥ २

तपोः॑ । प॒वित्रंम् । विऽतंतम् । दि॒वः । प॒दे । शोचंन्तः ।
अ॒स्य॒ । तन्तंवः । वि । अ॒स्थि॒र॒न् ।

अवंन्ति । अ॒स्य॒ । प॒वि॒तारंम् । आ॒शवः॑ । दि॒वः । पृ॒ष्ठम् ।
अधिं । ति॒ष्ठ॒न्ति॒ । चेतंसा ॥२

तपोः । पवित्रम् । विऽततम् । दिवः । पदे । शोचन्तः ।
अस्य । तन्तवः । वि । अस्थिरन् ।

अवन्ति । अस्य । पवितारम् । आशवः । दिवः । पृष्ठम् ।
अधि । तिष्ठन्ति । चेतसा ॥२

“तपोः शत्रूणां तापकस्य सोमस्य "पवित्रं शोधकमङ्गं तेजो वा “दिवस्पदे द्युलोकस्य उच्छ्रिते स्थाने “विततं विस्तृतम् । तृतीयस्यामितो दिवि सोम आसीत्' (तै. ब्रा. ३. २. १. १) इति ब्राह्मणम् । "अस्य “तन्तवः अंशवः “शोचन्तः दीप्यमानाः “व्यस्थिरन् विविधं तिष्ठन्ति । पृथिव्यां हविर्धाने वा । "अस्य सोमस्य “आशवः शीघ्रगामिनो रसाः “अवन्ति रक्षन्ति । कम् । “पवितारं पावयितारम् । यजमानमवन्ति रक्षन्ति होमद्वारा पश्चाद्धुताः "दिवः द्युलोकस्य “पृष्ठं पृष्ठभागमुन्नतदेशं “चेतसा बुद्ध्या देवगमनेच्छावत्या "अधि “तिष्ठन्ति आश्रयन्ते ॥

अभिष्टवे ' अरूरुचत् ' इत्येषावपनीया । सूत्रितं च-’ ईळे द्यावापृथिवी इति प्रागुत्तमाया अरूरुचदुषसः पृश्निरग्रिय इत्यावपेत' (आश्व. श्रौ. ४. ६) इति ॥

अरूंरुचदुषसः पृश्निरग्रिय उक्षा बिंभर्ति भुवंनानि वाजयुः
।

मायाविनों ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा
दंधुः ॥३

अरूंरुचत् । उषसः । पृश्निः । अग्रियः । उक्षा । बिभर्ति ।
भुवंनानि । वाजऽयुः ।

मायाऽविनः । ममिरे । अस्य । मायया । नृऽचक्षसः ।
पितरः । गर्भम् । आ । दधुः ॥३

अरूरुचत् । उषसः । पृश्निः । अग्रियः । उक्षा । बिभर्ति ।
भुवनानि । वाजऽयुः ।

मायाऽविनः । ममिरे । अस्य । मायया । नृऽचक्षसः ।
पितरः । गर्भम् । आ । दधुः ॥३

“उषसः संबन्धी “पृश्निः आदित्यः । ‘पृश्निरादित्यो भवति प्राश्नुत एनं वर्णः' (निरु. २.१४) इति निरुक्तम्। "अग्रियः मुख्यः सोऽयं सोमः "अरूरुचत् रोचयति । सः "उक्षा जलस्य सेक्ता “बिभर्ति पुष्णात्युदकेन “भुवनानि भूतजातानि “वाजयुः तेषामन्नमिच्छन् । "मायाविनः। माया प्रज्ञा । प्रज्ञावन्तो देवाः "अस्य सोमस्य “मायया प्रज्ञया "ममिरे निर्मान्ति । सोमस्यैकैकांशपानेन जातबला अग्न्यादयः स्वस्वव्यापारेण जगत्सृजन्तीत्यर्थः । तथास्य मायया "नृचक्षसः नृणां द्रष्टारः "पितरः पालका देवा अङ्गिरसः पितरो वा गर्भमा “दधुः धारयन्ति । ओषधीषु वात्र सूर्यात्मा सोमः स्तूयते सूर्यरश्म्यनुगमाधीनवर्धनाच्चन्द्रस्य । अयमुषसः पृश्निः सवितारूरुचत् रोचयति सर्वं रोचते वा । शिष्टं समानम्। तत्संबन्धिनो नृचक्षसो नृणां द्रष्टारः पितरो जगद्रक्षका रश्मयो गर्भमादधुर्वृष्ट्यर्थम् ॥

अभिष्टवे खरमवेक्षमाणः ‘ गन्धर्व इत्था' इत्येतां पठेत् ।
सूत्रितं च-’ गन्धर्व इत्था पदमस्य रक्षतीति खरमवेक्ष्य ' (आश्व. श्रौ. ४. ७) इति ॥

गं॒ध॒र्व इ॒त्था प॒दमं॑स्य रक्षति॒ पाति॑ दे॒वाना॒ं जनि॑मा॒न्यद्भु॑तः ।

गृ॒भ्णाति॑ रि॒पुं नि॒धया॑ नि॒धाप॑तिः सु॒कृत्त॑मा॒ मधु॑नो भ॒क्षमा॑शत ॥४

ग॒न्ध॒र्वः । इ॒त्था । प॒दम् । अ॒स्य॒ । र॒क्ष॒ति॒ । पाति॑ । दे॒वाना॑म् । जनि॑मानि । अद्भु॑तः ।

गृ॒भ्णाति॑ । रि॒पुम् । नि॒ऽधया॑ । नि॒धाऽप॑तिः । सु॒कृत्ऽत॑माः । मधु॑नः । भ॒क्षम् । आ॒श॒त॒ ॥४

गन्धर्वः । इत्था । पदम् । अस्य । रक्षति । पाति । देवानाम् । जनिमानि । अद्भुतः ।

गृभ्णाति । रिपुम् । निऽधया । निधाऽपतिः । सुकृत्ऽतमाः । मधुनः । भक्षम् । आशत ॥४

“गन्धर्वः उदकानां स्तुतीनां वा धारक आदित्यः "अस्य सोमस्य “पदं स्थानं द्युसंबन्धि “इत्था सत्यं "रक्षति । सोऽयं सोमः “देवानां "जनिमानि जन्मानि । देवानित्यर्थः । "पाति रक्षति “अद्भुतः महान् । किंचायं "रिपुम् अस्मद्वैरिणं “निधया। निधा पाश्या । पाशसमूहेन “गृभ्णाति गृह्णाति । "निधापतिः पाशसमूहस्वामी । तस्यास्य "मधुनः मधुररसस्य “भक्षं "सुकृत्तमाः अतिशयेन सुकृतकर्तार एव "आशत प्राप्नुवन्ति ॥

अन्तिमे प्रवर्ग्ये परिधानीयायाः पूर्वं ‘हविर्हविष्मः' इत्येषावपनीया। सूत्रितं च- उत्तमे प्रागुत्तमाया

हविर्हविष्मो महि सद्म दैव्यमित्यावपेत' (आश्व. श्रौ. ४. ७) इति ।

ह॒विर्ह॑विष्मो॒ महि॒ सद्म॒ दैव्यं॒ नभो॒ वसा॑नः॒ परिं यास्यध्व॒रं ।

राजा॑ प॒वित्रं॑रथो॒ वाज॒मारु॑हः स॒हस्रं॑भृष्टिर्जयसि॒ श्रवो॑ बृ॒हत् ॥५

ह॒विः । ह॒वि॒ष्मः॒ । महिं । सद्मं । दैव्यंम् । नभः॑ । वसा॑नः । परिं । या॒सि॒ । अ॒ध्व॒रम् ।

राजा॑ । प॒वित्रं॑ऽरथः । वाजं॑म् । आ । अ॒रु॒हः॒ । स॒हस्रं॑ऽभृष्टिः । ज॒य॒सि॒ । श्रवः॑ । बृ॒हत् ॥५

हविः । हविष्मः । महि । सद्म । दैव्यम् । नभः । वसानः । परि । यासि । अध्वरम् ।

राजा । पवित्रऽरथः । वाजम् । आ । अरुहः ।
सहस्रऽभृष्टिः । जयसि । श्रवः । बृहत् ॥५

हे "हविष्मः । हविरित्युदकनाम । उदकवन् सोम हविभूतं “नभः । उदकनामैतत् । उदकरसमित्यर्थः। “वसानः आच्छादयन् "महि महत् "दैव्यं “सद्म यागगृहं “परि “यासि परिगच्छसि “अध्वरं निर्वोढुम् । किंच हे सोम “राजा “पवित्ररथः च "वाजं संग्रामम् "आरुहः आरोहसि । यद्वा । तत्र तत्र संग्रामवाचकेन शब्देन यज्ञव्यवहारदर्शनादत्र वाजो यज्ञाख्यसंग्रामः । तमारुहः । यथा कश्चिद्राजा रथमारुह्य स्वस्थानं प्रविशति तद्वदिति भावः । किंच सहस्रभृष्टिः बहुभ्रंशः । अपरिमितगमन इत्यर्थः । अथवा भृष्टिरायुधम् । असंख्यातायुधः सन् । "बृहत् "श्रवः महदन्नं “जयसि अस्माकम् ॥ ॥ ८ ॥

टिप्पणी

९.८३.१ पवित्रं ते विततं इति

अर्कपुष्पे द्वे (https://sa.wikisource.org/s/2b0m)

षडिडपदस्तोभः (https://sa.wikisource.org/s/2b2d)

अरिष्टम् (https://sa.wikisource.org/s/1zb7)

द्रोणकलशे पटलेपन मन्त्रः - पवित्रं ते इति - तांब्रा. १.२.८ (https://sa.wikisource.org/s/qan)

पवित्रं ते विततं ब्रह्मणस् पत इति पवित्रवतीर् भवन्ति। पवित्रम् इव वा इदं विततं यद् अन्तरिक्षम्।

अन्तरिक्षभाजनम् एतद् अहः। प्रभुर् गात्राणि पर्य् एषि विश्वत इति विश्ववतीर् भवन्ति। वैश्वदेवं ह्य् एतद् अहः। अतप्ततनूर् न तद् आमो अश्नुते शृतास इद् वहन्तस् सं तद् आशतेति समष्टयै। - जैब्रा ३.५४ (https://sa.wikisource.org/s/eig)

पवित्रं तेति मंत्रेण पंचगव्याभिषेचनम्. पुरुषोत्तमसंहिता १८.५१ (https://sa.wikisource.org/s/1twy)

प्राञ्चमुद्गातारो द्रोणकलशं ग्रावस्वध्यूहन्ति। अधोक्षमुपकर्षन्ति ।। ८ ।। पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गाप्राणि पर्येषि विश्वतः । अतप्तत्तनूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत्समाशतेति तस्मिन्नुदीचीनदशं पवित्रमुद्गातारो वितत्य धारयन्ति ।

एतयैवाध्वर्युरभिमन्त्रयते । तस्य यजमानो नाभिं करोति । होतृचमसेन चाऽस्मिन्संततां धाराᳫ स्रावयति । हिरण्यकेशिश्रौतसूत्रम् ८.३.९ (https://sa.wikisource.org/s/28nw)

पवित्रं ते विततं ब्रह्मणस्पते तपोष्पवित्रं विततं दिवस्पदे वियत्पवित्रं धिषणा अतन्वतेति[१] पूतवन्तः प्राणास्त इमेऽवाञ्चो रेतस्यो मूत्र्यः पुरीष्या[२] इत्येतानेवास्मिंस्तद्दधाति ॥ऐब्रा १.२० (https://sa.wikisource.org/s/w20) ॥

पवित्रोपरि संदर्भाः (https://www.angelfire.com/indie/vedastudy/pur_index17/pavitra2.htm)

पवित्रोपरि संदर्भाः (http://puranastudy.000space.com/pur_index17/pva10.htm)

पुरीषोपरि संदर्भाः (http://puranastudy.freeoda.com/pur_index18/pureesha.htm)

मण्डल ९

सूक्तं ९.१	सूक्तं ९.३१	सूक्तं ९.६१	सूक्तं ९.९१
सूक्तं ९.२	सूक्तं ९.३२	सूक्तं ९.६२	सूक्तं ९.९२
सूक्तं ९.३	सूक्तं ९.३३	सूक्तं ९.६३	सूक्तं ९.९३
सूक्तं ९.४	सूक्तं ९.३४	सूक्तं ९.६४	सूक्तं ९.९४
सूक्तं ९.५	सूक्तं ९.३५	सूक्तं ९.६५	सूक्तं ९.९५
सूक्तं ९.६	सूक्तं ९.३६	सूक्तं ९.६६	सूक्तं ९.९६
सूक्तं ९.७	सूक्तं ९.३७	सूक्तं ९.६७	सूक्तं ९.९७
सूक्तं ९.८	सूक्तं ९.३८	सूक्तं ९.६८	सूक्तं ९.९८
सूक्तं ९.९	सूक्तं ९.३९	सूक्तं ९.६९	सूक्तं ९.९९
सूक्तं ९.१०	सूक्तं ९.४०	सूक्तं ९.७०	सूक्तं ९.१००

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं ९.२२सूक्तं ९.५२सूक्तं ९.८२सूक्तं ९.११२

सूक्तं ९.२३सूक्तं ९.५३सूक्तं ९.८३सूक्तं ९.११३

सूक्तं ९.२४सूक्तं ९.५४सूक्तं ९.८४सूक्तं ९.११४

सूक्तं ९.२५सूक्तं ९.५५सूक्तं ९.८५

सूक्तं ९.२६सूक्तं ९.५६सूक्तं ९.८६

सूक्तं ९.२७सूक्तं ९.५७सूक्तं ९.८७

सूक्तं ९.२८सूक्तं ९.५८सूक्तं ९.८८

सूक्तं ९.२९सूक्तं ९.५९सूक्तं ९.८९

सूक्तं ९.३०सूक्तं ९.६०सूक्तं ९.९०

1. *वि यत् पवित्रं धिषणा अतन्वत घर्मं शोचन्त प्रणवेषु बिभ्रतः । समुद्रे अन्तरायवो विचक्षणं*

त्रिरह्नो नाम सूर्यस्य मन्वत । - आश्व.श्रौ.सू. ४.६ (https://sa.wikisource.org/s/1auy)

2. *पुरीष (http://puranastudy.freeoda.com/pur_index18/pureesha.htm)*

ऋग्वेदः सूक्तं ९.८४

दे. पवमानः सोमः। जगती।

पवस्व देवमादनो विचर्षणिरप्सा इन्द्राय वरुणाय वायवे ।

कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि दैव्यं जनम् ॥१॥

आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति ।

कृण्वन्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः ॥२॥

आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः ।

आ विद्युता पवते धारया सुत इन्द्रं सोमो मादयन्दैव्यं जनम् ॥३॥

एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधम् ।

इन्दुः समुद्रमुदियर्ति वायुभिरेन्द्रस्य हार्दि कलशेषु सीदति ॥४॥

अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणन्ति मतिभिः स्वर्विदम् ।

धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ॥५॥

सायणभाष्यम्

‘ पवस्व देवमादनः' इति पञ्चर्चं सप्तदशं सूक्तं वाचः पुत्रस्य प्रजापतेरार्षं जागतं पवमानसोमदेवताकम् । तथा चानुक्रान्तं- पवस्व वाच्यः प्रजापतिः' इति । गतो विनियोगः ॥

पवं॑स्व देव॒मादं॑नो॒ विचं॑र्षणिर॒प्सा इंद्रां॑य॒ वरुं॑णाय वा॒यवें॑ ।

कृ॒धी नों॑ अ॒द्य वरिं॑वः स्वस्ति॒मदुं॑रुक्षि॒तौ गृं॑णीहि॒ दैव्यं॒ जनं॑ ॥१

पवं॑स्व । दे॒व॒ऽमादं॑नः । विऽचं॑र्षणिः । अ॒प्साः । इन्द्रां॑य । वरुं॑णाय । वा॒यवें॑ ।

कृ॒धि । न॒ः । अ॒द्य । वरिं॑वः । स्व॒स्ति॒ऽमत् । उ॒रु॒ऽक्षि॒तौ । गृ॒णी॒हि॒ । दैव्यं॑म् । जनं॑म् ॥१

पवस्व । देवऽमादनः । विऽचर्षणिः । अप्साः । इन्द्राय । वरुणाय । वायवे ।

कृधि । नः । अद्य । वरिवः । स्वस्तिऽमत् । उरुऽक्षितौ । गृणीहि । दैव्यम् । जनम् ॥१

हे सोम “देवमादनः देवानां मादयिता “विचर्षणिः विद्रष्टा “अप्साः अपां दाता त्वं "पवस्व क्षर । कस्मै । "इन्द्राय "वरुणाय “वायवे च । "नः अस्माकं "वरिवः धनं "स्वस्तिमत् । स्वस्तीत्यविनाशनाम । तद्वद्धनं "कृधि कुरु । "उरुक्षितौ विस्तीर्णायां भूमौ यज्ञसंबन्धियां “दैव्यं "जनं देवसंबन्धिनं संघम् । जनशब्दः संघवाची । तं "गृणीहि । गृणातिः शब्दकर्मा । शब्दय । यथा त्वदीयाभिषवशब्दं श्रुत्वा देवा आगच्छन्ति तथा गृणीहीत्यर्थः । अथवा दैव्यं जनमित्यृषिः स्वात्मानमाह । देवसंबन्धिनं जनं मां गृणीहि साधुसंभक्ता इति शब्दय ॥

आ यस्त॒स्थौ भुव॑ना॒न्यम॑र्त्यो॒ विश्वा॑नि॒ सोम॒ः परि॒ तान्य॑र्षति
।

कृ॒ण्वन्त्सं॒चृतं॑ वि॒चृतं॑म॒भिष्टं॑य॒ इंदुः॑ सिषक्त्यु॒षसं॒ न सूर्यः॑ ॥ २

आ । यः । त॒स्थौ । भुवं॑नानि । अमं॑र्त्यः । विश्वां॑नि । सोमः॑ । परिं॑ । तानिं॑ । अ॒र्ष॒ति॒ ।

कृ॒ण्वन् । स॒म्ऽचृतं॑म् । वि॒ऽचृतं॑म् । अ॒भिष्टं॑ये । इन्दुः॑ । सि॒स॒क्ति॒ । उ॒षसं॑म् । न । सूर्यः॑ ॥२

आ । यः । तस्थौ । भुवनानि । अमर्त्यः । विश्वानि । सोमः । परि । तानि । अर्षति ।

कृण्वन् । सम्ऽचृतम् । विऽचृतम् । अभिष्टये । इन्दुः । सिसक्ति । उषसम् । न । सूर्यः ॥२

"यः "अमर्त्यः देवः "सोमः "भुवनानि लोकान् “आ “तस्थौ आस्थितवान् "तानि "विश्वानि सर्वाणि भुवनानि “परि “अर्षति परितो गच्छति । परितो रक्षतीत्यर्थः । सोऽयम्

"इन्दुः यज्ञं यजमानं वा "संचृतं देवैः फलैर्वा संबद्धं "कृण्वन् कुर्वन् "विचृतम् असुरादिभिर्दुःखैर्वा विमुक्तं “कृण्वन् अभितो यागाय “सिषक्ति सेवते यज्ञम् । “उषसं "न "सूर्यः। सूर्य उषसमिव यथा “अभिष्टये अभितो गमनाय प्राणिनां संचृतं प्रकाशैः संयुक्तं विचृतं तमोभिर्विमुक्तं च लोकं कुर्वन्नुषसं सेवते तद्वत् ॥

आ यो गोभिः॑ सृ॒ज्यत॒ ओषं॑धी॒ष्वा दे॒वानां॑ सु॒म्न इ॒षय॒न्नुपां॑वसुः ।

आ वि॒द्युतां॑ पवत॒े धारं॑या सु॒त इं॒द्रं॒ सोमो॑ मा॒दय॒ंदैव्य॒ं जनं॑ ॥ ३

आ । यः । गोभिः॑ । सृ॒ज्यते॑ । ओषं॑धीषु । आ । दे॒वानां॑म् । सु॒म्ने । इ॒षयं॑न् । उपं॑ऽवसुः ।

आ । वि॒ऽद्युता॑ । प॒व॒ते॒ । धार॑या । सु॒तः । इन्द्र॑म् । सोमः॑ ।
मा॒दय॑न् । दैव्य॑म् । जन॑म् ॥३

आ । यः । गोभिः । सृज्यते । ओषधीषु । आ । देवानाम् ।
सुम्ने । इषयन् । उपऽवसुः ।

आ । विऽद्युता । पवते । धारया । सुतः । इन्द्रम् । सोमः ।
मादयन् । दैव्यम् । जनम् ॥३

"यः सोमः "गोभिः रश्मिभिः “आ “सृज्यते "ओषधीषु । यं सोमं स्थापयन्तीत्यर्थः । किमर्थम् । "देवानां "सुम्ने सुखे निमित्ते सति । कीदृशोऽयम्। "इषयन् देवान् प्राप्तुमिच्छन् । इष गतौ'। धनमिच्छन् वा । तथा “उपावसुः शत्रुभ्यः सकाशात् प्राप्तधनः । सः "सोमः "विद्युता विद्योतमानया “धारया “आ “पवते "सुतः सन् । किं कुर्वन् । "दैव्यं देवस्वामिनम् "इन्द्रं "मादयन् ॥

ए॒ष स्य सोम॑ः पवते सहस्र॒जिद्धि॑न्वा॒नो वाच॑मिषि॒राम॑ुष॒र्बुध॑ं
।

इन्द॑ुः समु॒द्रमुदि॑यर्ति वा॒युभि॒रेन्द्र॑स्य॒ हार्दि॑ क॒लशे॑षु सीदति
॥४

ए॒षः । स्यः । सोम॑ः । प॒व॒ते॒ । स॒ह॒स्र॒ऽजित् । हि॒न्वा॒नः ।
वाच॑म् । इ॒षि॒राम् । उ॒ष॒ःऽबुध॑म् ।

इन्द॑ुः । स॒मु॒द्रम् । उत् । इ॒य॒र्ति॒ । वा॒युऽभि॑ः । आ । इन्द्र॑स्य
। हार्दि॑ । क॒लशे॑षु । सी॒द॒ति॒ ॥४

एषः । स्यः । सोमः । पवते । सहस्रऽजित् । हिन्वानः ।
वाचम् । इषिराम् । उषःऽबुधम् ।

इन्दुः । समुद्रम् । उत् । इयर्ति । वायुऽभिः । आ । इन्द्रस्य
। हार्दि । कलशेषु । सीदति ॥४

“एष "स्यः सः "सोमः "पवते पूयते । कीदृश एषः । "सहस्रजित् सहस्रस्य जेता । किं कुर्वन् । “वाचम् ऋत्विजां स्तुतिरूपां वाचं “हिन्वानः प्रेरयन् । कीदृशीं वाचम् । "इषिरां गमनशीलां स्तुत्यं प्रति गन्त्रीम् "उषर्बुधम् उषसि प्रबुद्धाम् । सोऽयम् "इन्दुः सोमः "समुद्रं समुद्रियं रसम् "उदियर्ति उद्गमयति “वायुभिः गन्तृभिरध्वर्य्वादिभिः वायुभिरेव वा प्रेर्यमाणः सन् । तथा “इन्द्रस्य "हार्दि । हार्दं प्रियम् । तद्धार्दि इन्द्रस्य प्रियवद्यथा भवति तथा "कलशेषु द्रोणकलशप्रभृतिषु “आ “सीदति ॥

अ॒भि त्यं गाव॑ः पय॑सा पयो॒वृध॒ं सोम॑ं श्रीणंति म॒तिभि॑ः स्व॒र्विद॑ं ।

ध॒नं॒ज॒यः पं॑वते॒ कृत्व्यो॒ रसो॒ विप्र॑ः क॒विः काव्ये॑ना॒ स्व॑र्चनाः ॥५

अ॒भि । त्यम् । गावः॑ । पय॑सा । प॒य॒ःऽवृध॑म् । सोम॑म् ।
श्री॒ण॒न्ति॒ । म॒तिऽभिः॑ । स्व॒ःऽवि॒द॑म् ।

ध॒न॒म्ऽज॒यः । प॒व॒ते॒ । कृत्व्यः॑ । रसः॑ । विप्रः॑ । क॒विः ।
काव्ये॑न । स्वः॑ऽचनाः ॥५

अभि । त्यम् । गावः । पयसा । पयःऽवृधम् । सोमम् ।
श्रीणन्ति । मतिऽभिः । स्वःऽविदम् ।

धनम्ऽजयः । पवते । कृत्व्यः । रसः । विप्रः । कविः ।
काव्येन । स्वःऽचनाः ॥५

“त्यं तं “पयोवृधं पयसो वर्धकं "सोमं "गावः "पयसा स्वकीयेन क्षीरेण "श्रीणन्ति श्रयणं कुर्वन्ति । यः “मतिभिः स्तुतिभिः सर्वं प्रयच्छति तं "स्वर्विदं सोमं श्रीणन्ति । सः “धनंजयः शत्रुधनानां जेता सोमः "काव्येन कर्मणा "पवते पूयते । कीदृशः सः । "कृत्व्यः कर्मण्यः "रसः रसरूपः

“विप्रः मेधावी “कविः क्रान्तप्रज्ञः "स्वर्चनाः सर्वान्नः । चन इत्यन्ननाम ॥ ॥ ९ ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.८५

ऋग्वेदः - मण्डल ९

← सूक्तं ९.८४

सूक्तं ९.८५

वेनो भार्गवः।

सूक्तं ९.८६ →

दे. पवमानः सोमः। जगती, ११-१२ त्रिष्टुप् ।

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।

मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥१॥

अस्मान्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।

जहि शत्रूँरभ्या भन्दनायतः पिबेन्द्र सोममव नो मृधो जहि ॥२॥

अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः ।

अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥३॥

सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु ।

जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥४॥

कनिक्रदत्कलशे गोभिरज्यसे व्यव्ययं समया वारमर्षसि ।

मर्मृज्यमानो अत्यो न सानसिरिन्द्रस्य सोम जठरे समक्षरः ॥५॥

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने ।

स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥६॥

अत्यं मृजन्ति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते ।

पवमाना अभ्यर्षन्ति सुष्टुतिमेन्द्रं विशन्ति मदिरास इन्दवः ॥७॥

पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः ।

माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम् ॥८॥

अधि द्यामस्थाद्वृषभो विचक्षणोऽरूरुचद्वि दिवो रोचना कविः ।

राजा पवित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ॥९॥

दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम् ।

अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धोरूर्मा मधुमन्तं पवित्र आ ॥१०॥

नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः ।

शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम् ॥११॥

ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य ।

भानुः शुक्रेण शोचिषा व्यद्यौत्प्रारूरुचद्रोदसी मातरा शुचिः ॥१२॥

सायणभाष्यम्

‘ इन्द्राय' इति द्वादशर्चमष्टादशं सूक्तं भृगुगोत्रस्य वेनस्यार्षं पवमानसोमदेवताकम् । एकादशीद्वादश्यौ त्रिष्टुभौ शिष्टा जगत्यः । तथा चानुक्रान्तम्-' इन्द्राय द्वादश वेनो भार्गवो द्वित्रिष्टुबन्तम्' इति । गतो विनियोगः ॥

इंद्रा॑य सोम॒ सुषु॑तः॒ परि॑ स्र॒वापामी॑वा भवतु॒ रक्ष॑सा स॒ह ।

मा ते॒ रसं॑स्य मत्सत द्वया॒विनो॒ द्रवि॑णस्वं॑त इ॒ह सं॒त्विं॑दं॑वः ॥१

इन्द्रा॑य । सो॒म॒ । सु॒ऽसु॑तः । परि॑ । स्र॒व॒ । अप॑ । अमी॑वा । भ॒व॒तु॒ । रक्षं॑सा । स॒ह ।

मा । ते॒ । रसं॑स्य । म॒त्स॒त॒ । द्व॒या॒विनः॑ । द्रवि॑णस्वन्तः । इ॒ह । स॒न्तु॒ । इन्दं॑वः ॥१

इन्द्राय । सोम । सुऽसुतः । परि । स्रव । अप । अमीवा । भवतु । रक्षसा । सह ।

मा । ते । रसस्य । मत्सत । द्वयाविनः । द्रविणस्वन्तः । इह । सन्तु । इन्दवः ॥१

हे "सोम त्वं "सुषुतः सुष्ठु अभिषुतः सन् इन्द्रार्थं "परि “स्रव परितः स्रव । गच्छ । रसं मुञ्च । "अमीवा रोगः "रक्षसा “सह “अप "भवतु अपगतो वियुक्तो भवतु । "ते तव

"रसस्य स्वांशं रसं पीत्वा "मा "मत्सत मा माद्यन्तु । के।
“द्वयाविनः । द्वयं सत्यानृतम् । तेन युक्ताः । पापिन
इत्यर्थः । किंच “इन्दवः ते रसाः "इह अस्मिन् यज्ञे
"द्रविणस्वन्तः धनवन्तः सन्तु भवन्तु ॥

अ॒स्मान्सं॑म॒र्ये पं॑वमान चोदय॒ दक्षों दे॒वाना॒मसि॒ हि प्रि॒यो मदः॑ ।

ज॒हि शत्रूँ॒र॒भ्या भं॑दनाय॒तः पिबें॑द्र॒ सोम॒मवं नो॒ मृधों जहि ॥ २

अ॒स्मान् । स॒ऽम॒र्ये । प॒व॒मा॒न॒ । चो॒द॒य॒ । दक्षः॑ । दे॒वानां॑म् । असिं । हि । प्रि॒यः । मदः॑ ।

ज॒हि । शत्रू॑न् । अ॒भि । आ । भ॒न्द॒ना॒ऽय॒तः । पिबं । इ॒न्द्र॒ । सोमं॑म् । अवं । न॒ः । मृधः॑ । ज॒हि॒ ॥२

अस्मान् । सऽमर्ये । पवमान । चोदय । दक्षः । देवानाम् । असि । हि । प्रियः । मदः ।

जहि । शत्रून् । अभि । आ । भन्दनाऽयतः । पिब । इन्द्र । सोमम् । अव । नः । मृधः । जहि ॥२

हे "पवमान सोम “अस्मान् समर्ये संग्रामे “चोदय प्रेरय। "दक्षः “हि “असि समर्थः खलु भवसि “देवानां मध्ये । यद्वा । देवानां प्रीणनाय दक्षोऽसि । यद्वा । दक्षस्त्वं देवानां "प्रियः प्रियकरो "मदः मादयितासि हि । "जहि च “शत्रून् अस्माकम् । “अभ्या गच्छ चास्मान् प्रति “भन्दनायतः । भन्दनाः स्तुतयः । भन्दतेः स्तुतिकर्मणः । ता इच्छतः । "पिब च “इन्द्र "सोमम् “अव "जहि च "नः अस्माकं "मृधः संग्रामात् ॥

अदंब्ध इंदो पवसे मुदिंतंम आुत्मेंद्रंस्य भवसि धाुसिरुंत्तुमः

।

अ॒भि स्व॑रंति ब॒हवो॑ मनी॒षिणो॒ राजा॑नम॒स्य भुव॑नस्य निंसते ॥३

अद॑ब्धः । इ॒न्दो॒ इति॑ । प॒व॒से॒ । म॒दिन्ऽत॑मः । आ॒त्मा । इन्द्र॑स्य । भ॒व॒सि॒ । धा॒सिः । उ॒त्ऽत॒मः ।

अ॒भि । स्व॒र॒न्ति॒ । ब॒हवः॑ । म॒नी॒षिणः॑ । राजा॑नम् । अ॒स्य । भुव॑नस्य । निं॒स॒ते॒ ॥३

अदब्धः । इन्दो इति । पवसे । मदिन्ऽतमः । आत्मा । इन्द्रस्य । भवसि । धासिः । उत्ऽतमः ।

अभि । स्वरन्ति । बहवः । मनीषिणः । राजानम् । अस्य । भुवनस्य । निंसते ॥३

हे “इन्दो क्लिद्यमान सोम “अदब्धः अहिंसितः “मदिन्तमः मादयितृतमस्त्वं “पवसे पूयसे । “आत्मा स्वयमेव “उत्तमः त्वम् "इन्द्रस्य “धासिः अन्नं "भवसि । "अस्य “भुवनस्य "राजानं सोमं "बहवो "मनीषिणः स्तोतारः "अभि स्वरन्ति अभिष्टुवन्ति । “निंसते गच्छन्ति च ॥

स॒हस्रं॑णीथः श॒तधा॑रो॒ अद्भु॑त॒ इंद्रा॒येंदुः॑ पवते॒ काम्यं॒ मधुं॑ ।

जय॒न्क्षेत्रं॑म॒भ्यं॑र्षा॒ जयं॑न्न॒प उ॒रुं नों गा॒तुं कृं॑णु सोम मीढ्वः ॥४

स॒हस्रं॑ऽनीथः । श॒तऽधा॑रः । अद्भु॑तः । इन्द्रा॑य । इन्दुः॑ । प॒व॒ते॒ । काम्यं॑म् । मधुं॑ ।

जयं॑न् । क्षेत्रं॑म् । अ॒भि । अ॒र्ष॒ । जयं॑न् । अ॒पः । उ॒रुम् । न॒ः । गा॒तुम् । कृ॒णु॒ । सो॒म॒ । मी॒ढ्व॒ः ॥४

सहस्रऽनीथः । शतऽधारः । अद्भुतः । इन्द्राय । इन्दुः । पवते । काम्यम् । मधु ।

जयन् । क्षेत्रम् । अभि । अर्ष । जयन् । अपः । उरुम् । नः । गातुम् । कृणु । सोम । मीढ्वः ॥४

“सहस्रनीथः बहुप्रकारनयनः "शतधारः अपरिमितधारोपेतः “अद्भुतः आश्चर्यकरो महान् “इन्दुः "इन्द्राय "काम्यं "मधु “पवते । किंच "क्षेत्रम् अस्मभ्यम् "अपः च "जयन् “अभ्यर्ष अभिगच्छ पवित्रम् । हे "सोम “मीढ्वः सेक्तः “गातुं मार्गं “नः अस्माकम् "उरुं विस्तीर्णं "कृणु कुरु ॥

कनिंक्रदत्क॒लश॒ गोभिंरज्यसे॒ व्य१॒व्ययं स॒मया॒ वारंमर्षसि ।

म॒र्मृ॒ज्यमा॑नो॒ अत्यो॒ न सा॑न॒सिरिंद्र॑स्य सोम ज॒ठरे॒ सम॑क्षरः ॥५

कनि॑क्रदत् । क॒लशे॑ । गोभिः॑ । अ॒ज्य॒से॒ । वि । अ॒व्यय॑म् । स॒मया॑ । वार॑म् । अ॒र्ष॒सि॒ ।

म॒र्मृ॒ज्यमा॑नः । अत्यः॑ । न । सा॒न॒सिः । इन्द्र॑स्य । सो॒म॒ । ज॒ठरे॑ । सम् । अ॒क्ष॒र॒ः ॥५

कनिक्रदत् । कलशे । गोभिः । अज्यसे । वि । अव्ययम् । समया । वारम् । अर्षसि ।

मर्मृज्यमानः । अत्यः । न । सानसिः । इन्द्रस्य । सोम । जठरे । सम् । अक्षरः ॥५

हे सोम “कनिक्रदत् शब्दं कुर्वन् "कलशे वर्तमानः "गोभिः पयोभिः "अज्यसे सिक्तो भवसि । “अव्ययम् अविमयं "वारं वालं दशापवित्रं "समया तत्समीपे “वि “अर्षसि

विविधं गच्छसि । "मर्मृज्यमानः शोध्यमानः "अत्यो “न अश्व इव “सानसिः संभजनशीलस्त्वं हे "सोम “इन्द्रस्य "जठरे “समक्षरः सम्यक् क्षरसि ॥

स्वा॒दुः पं॑वस्व दि॒व्याय॒ जन्मं॑ने स्वा॒दुरिं॑द्रा॑य सु॒हवीं॑तुनाम्ने ।

स्वा॒दुर्मि॒त्राय॒ वरुं॑णाय वा॒यवे॒ बृह॒स्पतं॑ये॒ मधुं॑मा॒ँ अदा॑भ्यः ॥ ६

स्वा॒दुः । प॒व॒स्व॒ । दि॒व्याय॑ । जन्मं॑ने । स्वा॒दुः । इन्द्रा॑य । सु॒हवीं॑तुऽनाम्ने ।

स्वा॒दुः । मि॒त्राय॑ । वरुं॑णाय । वा॒यवें॑ । बृह॒स्पतं॑ये । मधुं॑ऽमान् । अदा॑भ्यः ॥६

स्वादुः । पवस्व । दिव्याय । जन्मने । स्वादुः । इन्द्राय । सुहवीतुऽनाम्ने ।

स्वादुः । मित्राय । वरुणाय । वायवे । बृहस्पतये । मधुऽमान् । अदाभ्यः ॥६

हे सोम "स्वादुः त्वं "दिव्याय "जन्मने देवगणाय "पवस्व । तथा "सुहवीतुनाम्ने शोभनाह्वाननामधेयाय “इन्द्राय “स्वादुः त्वं पवस्व । "मित्राय “वरुणाय “वायवे “बृहस्पतये च पवस्व “मधुमान् मधुररसः "अदाभ्यः अन्यैरहिंस्यस्त्वम् ॥ ॥ १० ॥

अत्यं मृजंति क॒लशे॒ दश॒ क्षिपः॒ प्र विप्रांणां म॒तयो॒ वाचं ईरते ।

पवंमाना अ॒भ्यंर्षंति सुष्टु॒तिमेंद्रं॑ विशंति मदि॒रास॒ इंदंवः ॥७

अत्यंम् । मृ॒ज॒न्ति॒ । क॒लशें । दशं । क्षिपः॑ । प्र । विप्रांणाम् । म॒तयः॑ । वाचः॑ । ई॒र॒ते॒ ।

पव॑मानाः । अ॒भि । अ॒र्ष॒न्ति॒ । सु॒ऽस्तु॒तिम् । आ । इन्द्र॑म् । वि॒श॒न्ति॒ । म॒दि॒रासः॑ । इन्द॑वः ॥७

अत्यम् । मृजन्ति । कलशे । दश । क्षिपः । प्र । विप्राणाम् । मतयः । वाचः । ईरते ।

पवमानाः । अभि । अर्षन्ति । सुऽस्तुतिम् । आ । इन्द्रम् । विशन्ति । मदिरासः । इन्दवः ॥७

“अत्यम् अतनवन्तमश्वस्थानीयं वा सोमं "कलशे "दश “क्षिपः दशाङ्गुलयोऽध्वर्युसंबन्धिन्यः "मृजन्ति शोधयन्ति । तथा “विप्राणां मध्ये "मतयः स्तोतारः “वाचः स्तुतीः “ईरते प्रेरयन्ति । “पवमानाः सोमाः “अभ्यर्षन्ति अभिगच्छन्ति "सुष्टुतिं शोभनस्तुतिम् । "इन्द्रं "मदिरासः मदकराः "इन्दवः सोमाः “आ “विशन्ति प्रविशन्ति ॥

पव॑मानो अ॒भ्य॑र्षा सु॒वीर्य॑मु॒र्वीं गव्यू॑ति॒ं महि॒ शर्म॑ स॒प्रथः᳚ ।

माकि॑र्नो अ॒स्य परि॑षूतिरीश॒तेन्दो॒ जये॑म॒ त्वया॒ धनं॑धनं ॥८

पव॑मानः । अ॒भि । अ॒र्ष॒ । सु॒ऽवीर्य॑म् । उ॒र्वीम् । गव्यू॑तिम् ।
महि॑ । शर्म॑ । स॒ऽप्रथः᳚ ।

माकिः᳚ । न॒ः । अ॒स्य । परि॑ऽसूतिः । ई॒श॒त॒ । इन्दो॒ इति॑ ।
जये॑म । त्वया॑ । धन॑म्ऽधनम् ॥८

पवमानः । अभि । अर्ष । सुऽवीर्यम् । उर्वीम् । गव्यूतिम् ।
महि । शर्म । सऽप्रथः ।

माकिः । नः । अस्य । परिऽसूतिः । ईशत । इन्दो इति ।
जयेम । त्वया । धनम्ऽधनम् ॥८

हे सोम "पवमानः पूयमानस्त्वं “सुवीर्यमुर्वीं महतीं "गव्यूतिं गोमार्गं च "महि महत् “सप्रथः सर्वतः पृथु “शर्म गृहं सुखं वा “अभ्यर्ष अभिगमय । "नः अस्माकम् "अस्य कर्मणः “परिषूतिः हिंसायाः परिप्रेरको द्वेषी "माकिः "ईशत मेश्वरो भवतु । हे “इन्दो सोम “त्वया साधनेन “धनंधनं सर्वमपि धनं "जयेम ॥

अधि॒ द्याम॑स्थाद्वृ॒ष॒भो वि॑चक्ष॒णोऽरू॑रुच॒द्वि दि॒वो रो॑च॒ना क॒विः ।

राजा॑ प॒वित्र॒मत्ये॑ति॒ रोरु॑वद्दि॒वः पी॒यूषं॑ दुहते नृ॒चक्ष॑सः ॥९

अधि॑ । द्याम् । अ॒स्था॒त् । वृ॒ष॒भः । वि॒ऽच॒क्ष॒णः । अरू॑रुचत् । वि । दि॒वः । रो॒च॒ना । क॒विः ।

राजा॑ । प॒वित्र॑म् । अति॑ । ए॒ति॒ । रोरु॑वत् । दि॒वः । पी॒यूष॑म् । दु॒ह॒ते॒ । नृ॒ऽचक्ष॑सः ॥९

अधि । द्याम् । अस्थात् । वृषभः । विऽचक्षणः । अरूरुचत् । वि । दिवः । रोचना । कविः ।

राजा । पवित्रम् । अति । एति । रोरुवत् । दिवः । पीयूषम् । दुहते । नृऽचक्षसः ॥९

“अधि “अस्थात् "द्यां द्युलोकं “वृषभः वर्षिता “विचक्षणः विद्रष्टा अयं सोमः । तथा कृत्वा “दिवः द्युलोकसंबन्धीनि “रोचना रोचमानानि नक्षत्रादीनि “वि “अरूरुचत् विविधं रोचयति । “कविः क्रान्तप्रज्ञः सन् "राजा सोमः “पवित्रं दशापवित्रम् "अत्येति अतिक्रम्य गच्छति । "रोरुवत् शब्दं कुर्वन् । "दिवः द्युलोकस्य "पीयूषं सारं रसं "नृचक्षसः नृणां द्रष्टारः सोमाः "दुहते स्रवन्ति । स्वकीयं रसमान्तरिक्ष्यमुदकं वा दुहन्तीत्यर्थः ॥

दि॒वो नाके॒ मधु॑जिह्वा अस॒श्चतो॑ वे॒ना दु॑हंत्यु॒क्षणं॑ गिरि॒ष्ठां ।

अ॒प्सु द्र॒प्सं वा॑वृधा॒नं स॑मु॒द्र आ सिं॑धो॑रू॒र्मा मधु॑मंतं प॒वित्र॒ आ ॥१०

दि॒वः । नाके॑ । मधु॑ऽजिह्वाः । अ॒स॒श्चतः॑ । वे॒नाः । दु॒ह॒न्ति॒ । उ॒क्षणं॑म् । गि॒रि॒ऽस्थाम् ।

अ॒प्ऽसु । द्र॒प्सम् । व॒वृधा॒नम् । स॒मु॒द्रे । आ । सिन्धोः॑ । ऊ॒र्मा । मधु॑ऽमन्तम् । प॒वित्रे॑ । आ ॥१०

दिवः । नाके । मधुऽजिह्वाः । असश्चतः । वेनाः । दुहन्ति । उक्षणम् । गिरिऽस्थाम् ।

अप्ऽसु । द्रप्सम् । ववृधानम् । समुद्रे । आ । सिन्धोः । ऊर्मा । मधुऽमन्तम् । पवित्रे । आ ॥१०

"दिवः द्योतमानस्य यज्ञस्य संबन्धिनि "नाके दुःखरहिते हविर्धानाख्ये स्थाने "मधुजिह्वाः मधुरवाचः “असश्चतः असंसक्ता । पृथक्पृथगित्यर्थः । यद्वा चिरमकृत्वा शीघ्रमभिषुण्वन्तः "वेनाः एतन्नामका महर्षयः “दुहन्ति अभिषुण्वन्ति । यद्वा द्युलोक एव वेनाः कान्ता देवा दुहन्ति । तं सोमम् “उक्षणं सेक्तारं “गिरिष्ठां गिरावुन्नते देशे वर्तमानम् "अप्सु उदकेषु वसतीवरीष्वन्तः “ववृधानं वर्धमानं “द्रप्सं रसरूपं "समुद्रे समुद्रवत् प्रवृद्धे द्रोणकलशे “सिन्धोः उदकस्य “ऊर्मा ऊर्मौ पूरे “आ सिञ्चन्तीति शेषः । तदर्थं "मधुमन्तं माधुर्योपेतं रसं "पवित्रे दशापवित्रे “आ सिञ्चन्तीति शेषः ॥

नाके॑ सुप॒र्णमु॑पपप्ति॒वांसं॒ गिरो॑ वे॒नाना॑मकृपंत पू॒र्वीः ।

शिशुं रिहंति मतयः पनिंप्रतं हिरण्ययं शकुनं क्षामंणि स्थां ॥११

नाकें । सुऽपर्णम् । उपपप्तिऽवांसंम् । गिरः । वेनानांम् । अकृपन्त । पूर्वीः ।

शिशुंम् । रिहन्ति । मतयः । पनिंप्रतम् । हिरण्ययंम् । शकुनम् । क्षामंणि । स्थाम् ॥११

नाके । सुऽपर्णम् । उपपप्तिऽवांसम् । गिरः । वेनानाम् । अकृपन्त । पूर्वीः ।

शिशुम् । रिहन्ति । मतयः । पनिप्रतम् । हिरण्ययम् । शकुनम् । क्षामणि । स्थाम् ॥११

“नाके द्युलोके वर्तमानं पश्चादुत्पतन्तं सोमं "[वेनानाम् (http://puranastudy.byethost14.com/pur_index27/vena1.htm)](http://puranastudy.byethost14.com/pur_index27/vena1.htm) अस्माकं संबन्धिन्यः "पूर्वीः बह्व्यः

“गिरः स्तुतयः "उप "अकृपन्त उपकल्पन्ते । अभिष्टुवन्तीत्यर्थः । तं "शिशुं शिशुवत् संस्कर्तव्यं सोमं “मतयः स्तुतयः “रिहन्ति लिहन्ति संस्पृशन्ति । प्राप्नुवन्तीत्यर्थः। कीदृशं शिशुम् । “पनिप्नतं शब्दायन्तम् । पनतेर्यङ्लुगन्तात् शतरि अभ्यासस्य निगागम उपधालोपश्च । “हिरण्ययं हिरण्मयं “शकुनं पक्षिणं “क्षामणि क्षमायां “स्थां हविर्धाने स्थां वर्तमानम् ॥

ऊ॒र्ध्वो गं॑ध॒र्वो अधि॒ नाके॑ अस्था॒द्विश्वा॑ रू॒पा प्र॑ति॒चक्षा॑णो अ॒स्य ।

भा॒नुः शु॒क्रेण॑ शो॒चिषा॒ व्य॑द्यौ॒त्प्रारू॑रुच॒द्रोद॑सी मा॒तरा॒ शुचि॑ः ॥१२

ऊ॒र्ध्वः । ग॒न्ध॒र्वः । अधि॑ । नाके॑ । अ॒स्था॒त् । विश्वा॑ । रू॒पा । प्र॒ति॒ऽचक्षा॑णः । अ॒स्य॒ ।

भा॒नुः । शु॒क्रेण॑ । शो॒चिषा॑ । वि । अ॒द्यौ॒त् । प्र । अ॒रू॒रु॒च॒त् । रोद॑सी॒ इति॑ । मा॒तरा॑ । शुचि॑ः ॥१२

ऊर्ध्वः । गन्धर्वः । अधि । नाके । अस्थात् । विश्वा । रूपा । प्रतिऽचक्षाणः । अस्य ।

भानुः । शुक्रेण । शोचिषा । वि । अद्यौत् । प्र । अरूरुचत् । रोदसी इति । मातरा । शुचिः ॥१२

“ऊर्ध्वः उन्नतः "गन्धर्वः रश्मीनां धारकः सोमः “नाके आदित्ये "अधि "अस्थात् अधितिष्ठति ।। किं कुर्वन् । "अस्य आदित्यस्य "विश्वा विश्वानि रूपाणि “प्रतिचक्षाणः प्रतिपश्यन् । "भानु: आदित्यः सोमाधिष्ठितः सन् “शुक्रेण दीप्तेन “शोचिषा तेजसा “व्यद्यौत् विद्योतते । न केवलं स्वयमेव अपि तु “मातरा निर्मात्र्यौ "रोदसी द्यावापृथिव्यौ “प्रारूरुचत् प्ररोचयति। “शुचिः दीप्तः सूर्यः ॥११॥ ॥४॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.८६

ऋग्वेदः - मण्डल ९
← सूक्तं ९.८५
सूक्तं ९.८६
[[लेखकः :|]]
सूक्तं ९.८७ →

ऋ. १-१० अकृष्टा माषाः, ११-२० सिकता निवावरी, २१-३० पृश्नियोऽजाः, ३१-४० अकृष्टमाषादयस्त्रयः, ४१-४५ भौमोऽत्रिः, ४६-४८ गृत्समदः शौनकः।

दे. पवमानः सोमः। जगती।

प्र त आशवः पवमान धीजवो मदा अर्षन्ति रघुजा इव त्मना ।

दिव्याः सुपर्णा मधुमन्त इन्दवो मदिन्तमासः परि कोशमासते ॥१॥

प्र ते मदासो मदिरास आशवोऽसृक्षत रथ्यासो यथा पृथक् ।

धेनुर्न वत्सं पयसाभि वज्रिणमिन्द्रमिन्दवो मधुमन्त ऊर्मयः ॥२॥

अत्यो न हियानो अभि वाजमर्ष स्वर्वित्कोशं दिवो अद्रिमातरम् ।

वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इन्द्रियाय धायसे ॥३॥

प्र त आश्विनीः पवमान धीजुवो दिव्या असृग्रन्पयसा धरीमणि ।

प्रान्तरृषय स्थाविरीरसृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥४॥

विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यन्ति केतवः ।

व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥५॥

उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।

यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ॥६॥

यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतम् ।

सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥७॥

राजा समुद्रं नद्यो वि गाहतेऽपामूर्मिं सचते सिन्धुषु श्रितः ।

अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः ॥८॥

दिवो न सानु स्तनयन्नचिक्रदद्द्यौश्च यस्य पृथिवी च धर्मभिः ।

इन्द्रस्य सख्यं पवते विवेविदत्सोमः पुनानः कलशेषु सीदति ॥९॥

ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।

दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥१०॥

अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।

हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥११॥

अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छति ।

अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ॥१२॥

अयं मतवाञ्छकुनो यथा हितोऽव्ये ससार पवमान ऊर्मिणा ।

तव क्रत्वा रोदसी अन्तरा कवे शुचिर्धिया पवते सोम इन्द्र ते ॥१३॥

द्रापिं वसानो यजतो दिविस्पृशमन्तरिक्षप्रा भुवनेष्वर्पितः ।

स्वर्जज्ञानो नभसाभ्यक्रमीत्प्रत्नमस्य पितरमा विवासति ॥१४॥

सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे ।

पदं यदस्य परमे व्योमन्यतो विश्वा अभि सं याति संयतः ॥१५॥

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।

मर्य इव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ॥१६॥

प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवसनेष्वक्रमुः ।

सोमं मनीषा अभ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः ॥१७॥

आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमानो अस्रिधम् ।

या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥१८॥

वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः ।

क्राणा सिन्धूनां कलशाँ अवीवशदिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥१९॥

मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत् ।

त्रितस्य नाम जनयन्मधु क्षरदिन्द्रस्य वायोः सख्याय कर्तवे ॥२०॥

अयं पुनान उषसो वि रोचयदयं सिन्धुभ्यो अभवदु लोककृत् ।

अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥२१॥

पवस्व सोम दिव्येषु धामसु सृजान इन्दो कलशे पवित्र आ ।

सीदन्निन्द्रस्य जठरे कनिक्रदन्नृभिर्यतः सूर्यमारोहयो दिवि ॥२२॥

अद्रिभिः सुतः पवसे पवित्र आँ इन्दविन्द्रस्य जठरेष्वाविशन् ।

त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमङ्गिरोभ्योऽवृणोरप ॥२३॥

त्वां सोम पवमानं स्वाध्योऽनु विप्रासो अमदन्नवस्यवः ।

त्वां सुपर्ण आभरद्दिवस्परीन्दो विश्वाभिर्मतिभिः परिष्कृतम् ॥२४॥

अव्ये पुनानं परि वार ऊर्मिणा हरिं नवन्ते अभि सप्त धेनवः ।

अपामुपस्थे अध्यायवः कविमृतस्य योना महिषा अहेषत ॥२५॥

इन्दुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्सुपथानि यज्यवे ।

गाः कृण्वानो निर्णिजं हर्यतः कविरत्यो न क्रीळन्परि वारमर्षति ॥२६॥

असश्चतः शतधारा अभिश्रियो हरिं नवन्तेऽव ता उदन्युवः ।

क्षिपो मृजन्ति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ॥२७॥

तवेमाः प्रजा दिव्यस्य रेतसस्त्वं विश्वस्य भुवनस्य राजसि ।

अथेदं विश्वं पवमान ते वशे त्वमिन्दो प्रथमो धामधा असि ॥२८॥

त्वं समुद्रो असि विश्ववित्कवे तवेमाः पञ्च प्रदिशो विधर्मणि ।

त्वं द्यां च पृथिवीं चाति जभ्रिषे तव ज्योतींषि पवमान सूर्यः ॥२९॥

त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे ।

त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ॥३०॥

प्र रेभ एत्यति वारमव्ययं वृषा वनेष्वव चक्रदद्धरिः ।

सं धीतयो वावशाना अनूषत शिशुं रिहन्ति मतयः पनिप्नतम् ॥३१॥

स सूर्यस्य रश्मिभिः परि व्यत तन्तुं तन्वानस्त्रिवृतं यथा विदे ।

नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतम् ॥३२॥

राजा सिन्धूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत् ।

सहस्रधारः परि षिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः ॥३३॥

पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया ।

गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि ॥३४॥

इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि ।

इन्द्राय मद्वा मद्यो मदः सुतो दिवो विष्टम्भ उपमो विचक्षणः ॥३५॥

सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितम् ।

अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥३६॥

ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।

तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥३७॥

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।

स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥३८॥

गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः ।

त्वं सुवीरो असि सोम विश्ववित्तं त्वा विप्रा उप गिरेम आसते ॥३९॥

उन्मध्व ऊर्मिर्वनना अतिष्ठिपदपो वसानो महिषो वि गाहते ।

राजा पवित्ररथो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहत् ॥४०॥

स भन्दना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि ।

ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याचतात् ॥४१॥

सो अग्रे अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः ।

द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि ॥४२॥

7:50

प्रवर्ग्यगानम्१-५

अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते ।

सिन्धोरुच्छवासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ॥४३॥

विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।

अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीळन्नसरद्वृषा हरिः ॥४४॥

अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।

हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥४५॥

असर्जि स्कम्भो दिव उद्यतो मदः परि त्रिधातुर्भुवनान्यर्षति ।

अंशुं रिहन्ति मतयः पनिप्नतं गिरा यदि निर्णिजमृग्मिणो ययुः ॥४६॥

प्र ते धारा अत्यण्वानि मेष्यः पुनानस्य संयतो यन्ति रंहयः ।

यद्गोभिरिन्दो चम्वोः समज्यस आ सुवानः सोम कलशेषु सीदसि ॥४७॥

पवस्व सोम क्रतुविन्न उक्थ्योऽव्यो वारे परि धाव मधु प्रियम् ।

जहि विश्वान्रक्षस इन्दो अत्रिणो बृहद्वदेम विदथे सुवीराः ॥४८॥

सायणभाष्यम्

अथ पञ्चमेऽनुवाक एकादश सूक्तानि । तत्र प्र ते ' इत्यष्टाचत्वारिंशदृचं प्रथमं सूक्तम् ।। प्रथमदशर्चस्य आकृष्टा' इति माषा इति च द्विनामान ऋषिगणा द्रष्टारः । द्वितीयस्य दशर्चस्य सिकता इति नीवावरी इति द्विनामान ऋषिगणाः । तृतीयस्य दशर्चस्य पृश्नय इत्यजा इति च नामद्वयोपेता ऋषिगणाः । अदृष्टार्थमेषां

द्विनामत्वमवगन्तव्यम् । चतुर्थस्य दशर्चस्य आकृष्टा माषा इत्यादिद्विनामानस्त्रयो गणा द्रष्टारः । एवं चत्वारिंशद्गताः । अथ पञ्चानां भौमोऽत्रिर्ऋषिः । ततस्तिसृणां गृत्समदः । जगती छन्दः । पवमानः सोमो देवता । तथा चानुक्रान्तं----' प्र तेऽष्टाचत्वारिंशदृषिगणा दशर्चा आकृष्टा माषाः प्रथमे सिकता निवावरी द्वितीये पृश्नयोऽजास्तृतीये त्रयश्चतुर्थेऽत्रिः पञ्चान्त्यास्तिस्रो गृत्समदः' इति । गतो विनियोगः ॥

प्र त॑ आ॒शवः॑ पवमान धी॒जवो॒ मदा॑ अर्ष॑न्ति रघु॒जा इ॑व॒ त्मना॑ ।

दि॒व्याः सु॑प॒र्णा मधु॑मन्त॒ इन्द॑वो म॒दिन्त॑मासः॒ परि॒ कोश॑मासते ॥१

प्र । ते॒ । आ॒शवः॑ । प॒व॒मा॒न॒ । धी॒ऽजवः॑ । मदाः॑ । अ॒र्ष॒न्ति॒ । र॒घु॒जाःऽइं॑व । त्मना॑ ।

दि॒व्याः । सु॒ऽप॒र्णाः । मधुं॑ऽमन्तः । इन्दं॑वः । म॒दिन्ऽतं॑मासः । परिं॑ । कोशं॑म् । आ॒स॒ते॒ ॥१

प्र । ते । आशवः । पवमान । धीऽजवः । मदाः । अर्षन्ति । रघुजाःऽइव । त्मना ।

दिव्याः । सुऽपर्णाः । मधुऽमन्तः । इन्दवः । मदिन्ऽतमासः । परि । कोशम् । आसते ॥१

हे "पवमान पूयमान सोम "ते तव “आशवः व्याप्ताः “धीजवः मनोवेगाः “मदाः मदकरा रसाः अर्षन्ति गच्छन्ति । “त्मना आत्मनैव । अनायासेनेत्यर्थः । क इव । "रघुजाइव । रघुः। शीघ्रगा वडवाः । तत्र जाता रघुजाः । त इव निर्गतास्ते "दिव्याः दिवि भवाः । अन्तरिक्षे

दशापवित्रे धार्यमाणा इत्यर्थः । “सुपर्णाः सुपतनाः "मधुमन्तः माधुर्योपेताः “मदिन्तमासः अतिशयेन मादयितृतमाः "इन्दवः दीप्ता रसाः "कोशं द्रोणकलशं "परि "आसते पर्युपविशन्ति ॥

प्र ते॒ मदा॑सो मदि॒रास॑ आ॒शवोऽसृ॑क्षत॒ रथ्या॑सो॒ यथा॒ पृथ॑क् ।

धे॒नुर्न व॒त्सं पय॑सा॒भि व॒ज्रिण॒मिंद्र॒मिंद॑वो॒ मधु॑मंत ऊ॒र्मय॑ः ॥ २

प्र । ते॒ । मदा॑सः । म॒दि॒रास॑ः । आ॒शव॑ः । असृ॑क्षत । रथ्या॑सः । यथा॑ । पृथ॑क् ।

धे॒नुः । न । व॒त्सम् । पय॑सा । अ॒भि । व॒ज्रिण॑म् । इन्द्र॑म् । इन्द॑वः । मधु॑ऽमन्तः । ऊ॒र्मय॑ः ॥२

प्र । ते । मदासः । मदिरासः । आशवः । असृक्षत । रथ्यासः । यथा । पृथक् ।

धेनुः । न । वत्सम् । पयसा । अभि । वज्रिणम् । इन्द्रम् । इन्दवः । मधुऽमन्तः । ऊर्मयः ॥२

“प्र “असृक्षत प्रसृज्यन्ते “ते तव “मदिरासः मदकराः “आशवः व्याप्ताः “मदासः मदा रसाः । क इव । “रथ्यासः रथ्या अश्वाः ते “यथा तथा “पृथक् प्रसृज्यन्ते । ते “मधुमन्तः माधुर्योपेताः “ऊर्मयः प्रवृद्धरसाः “इन्दवः सोमाः “धेनुः “पयसा “वत्सम् इव स्वरसेन “वज्रिणमिन्द्रम् “अभि गच्छन्ति ॥

अत्यो॒ न हिंया॒नो अ॒भि वाजं॑मर्ष स्व॒र्वित्कोशं॑ दि॒वो अद्रिं॑मातरं ।

वृषा॑ प॒वित्रे॒ अधि॒ सानो॑ अ॒व्यये॒ सोमः॑ पुना॒न इं॑द्रि॒याय॒ धाय॑से ॥३

अत्यः॑ । न । हि॒या॒नः । अ॒भि । वाज॑म् । अ॒र्ष॒ । स्व॒ःऽवित् । कोश॑म् । दि॒वः । अद्रि॑ऽमातरम् ।

वृषा॑ । प॒वित्रे॑ । अधि॑ । सानौ॑ । अ॒व्यये॑ । सोमः॑ । पु॒ना॒नः । इ॒न्द्रि॒याय॑ । धाय॑से ॥३

अत्यः । न । हियानः । अभि । वाजम् । अर्ष । स्वःऽवित् । कोशम् । दिवः । अद्रिऽमातरम् ।

वृषा । पवित्रे । अधि । सानौ । अव्यये । सोमः । पुनानः । इन्द्रियाय । धायसे ॥३

“अत्यो “न अश्व इव “हियानः प्रेर्यमाणः “वाजं संग्रामम् “अभि “अर्ष अभिगच्छ । तथा “स्वर्वित् सर्ववित् “कोशं द्रोणकलशं “दिवः द्युलोकात् अद्रिमातरम् । अद्रिर्मेघः।

तेन तज्जन्यमुदकं लक्ष्यते । तस्य निर्मातारमभ्यर्ष । अथ प्रत्यक्षकृतः । “वृषा वर्षकः “सोमः “अव्यये अविमये “अधि “सानौ । अधीति सप्तम्यर्थानुवादी । समुच्छ्रिते तस्मिन् “पुनानः पूयमानो भवति । किमर्थम् । “धायसे धारकाय “इन्द्रियाय तदर्थम् ॥

प्र त॒ आश्वि॑नीः पवमान धी॒जुवो॑ दि॒व्या अ॑सृग्र॒न्पय॑सा॒ धरी॑मणि ।

प्रा॑न्तर्ऋष॑यः॒ स्थावि॑रीरसृक्षत॒ ये त्वा॑ मृ॒जन्त्यृ॑षिषाण वे॒धसः॑ ॥४

प्र । ते॒ । आश्वि॑नीः । प॒व॒मा॒न॒ । धी॒ऽजुवः॑ । दि॒व्याः । अ॒सृ॒ग्र॒न् । पय॑सा । धरी॑मणि ।

प्र । अ॒न्तः । ऋषं॑यः । स्थावि॑रीः । अ॒सृ॒क्ष॒त॒ । ये । त्वा॒ । मृ॒जन्ति॑ । ऋ॒षि॒ऽसा॒ण॒ । वे॒धसः॑ ॥४

प्र । ते । आश्विनीः । पवमान । धीऽजुवः । दिव्याः । असृग्रन् । पयसा । धरीमणि ।

प्र । अन्तः । ऋषयः । स्थाविरीः । असृक्षत । ये । त्वा । मृजन्ति । ऋषिऽसाण । वेधसः ॥४

हे “पवमान सोम “ते तव “आश्विनीः व्याप्ताः ॥ ‘ अशू व्याप्तौ ' इत्यस्मादौणादिको विनिः । ततोऽण् । व्यत्ययेनाद्युदात्तः ॥ “धीजुवः मनोवेगाः "दिव्याः दिवि भवा दिवः पतन्त्यो धाराः “पयसा युक्ताः “धरीमणि धारके द्रोणकलशे “प्र “असृग्रन् गच्छन्ति । “ये “वेधसः विधातारः “ऋषयः हे सोम “ऋषिषाण ऋषिभिः संभक्त “त्वा त्वां “मृजन्ति अभिषुण्वन्ति ते ऋषयः “स्थाविरीः स्थविरा धाराः “अन्तः मध्ये पात्रस्यान्तः “प्र “असृक्षत प्रसृजन्ति ।।

विश्वा॒ धामा॑नि विश्वचक्ष॒ ऋभ्व॑सः प्र॒भोस्ते॑ स॒तः परि॑ यंति के॒तव॑ः ।

व्या॒न॒शिः प॑वसे सोम॒ धर्म॑भिः॒ पति॒र्विश्व॑स्य॒ भुव॑नस्य राजसि ॥५

विश्वा॑ । धामा॑नि । वि॒श्व॒ऽच॒क्ष॒ः । ऋभ्व॑सः । प्र॒ऽभोः । ते॒ । स॒तः । परि॑ । य॒न्ति॒ । के॒तव॑ः ।

वि॒ऽआ॒न॒शिः । प॒व॒से॒ । सो॒म॒ । धर्म॑ऽभिः । पति॑ः । विश्व॑स्य । भुव॑नस्य । रा॒ज॒सि॒ ॥५

विश्वा । धामानि । विश्वऽचक्षः । ऋभ्वसः । प्रऽभोः । ते । सतः । परि । यन्ति । केतवः ।

विऽआनशिः । पवसे । सोम । धर्मऽभिः । पतिः । विश्वस्य । भुवनस्य । राजसि ॥५

हे “विश्वचक्षः सर्वस्य द्रष्टः सोम “प्रभोः परिवृढस्य “सतः “ते तव “ऋभ्वसः । ऋभ्वा इति महन्नाम । महान्तः “केतवः रश्मयः “विश्वा सर्वाणि “धामानि तेजःस्थानानि देवशरीराणि “परि “यन्ति परिगच्छन्ति । प्रकाशयन्तीत्यर्थः । हे “सोम “व्यानशिः व्यापनशीलश्च त्वं “धर्मभिः धारकैः रसनिस्यन्दैः “पवसे पूयसे । “विश्वस्य “भुवनस्य च "पतिः स्वामी त्वं “राजसि ईश्वरो भवसि ॥ ॥ १२॥

उ॒भ॒यत॒ः पवं॑मानस्य र॒श्मयो॑ ध्रु॒वस्यं॑ स॒तः परिं॑ यंति के॒तवः॑ ।

यदीं॑ प॒वित्रे॒ अधिं॑ मृ॒ज्यते॒ हरि॒ः सत्ता॒ नि योना॑ क॒लशे॑षु सीदति ॥६

उ॒भ॒यतः॑ । पवं॑मानस्य । र॒श्मयः॑ । ध्रु॒वस्यं॑ । स॒तः । परिं ।
य॒न्ति॒ । के॒तवः॑ ।

यदिं । प॒वित्रें । अधिं । मृ॒ज्यतें । हरिः॑ । सत्तां । नि । योनां
। क॒लशेंषु । सी॒द॒ति॒ ॥६

उभयतः । पवमानस्य । रश्मयः । ध्रुवस्य । सतः । परि ।
यन्ति । केतवः ।

यदि । पवित्रे । अधि । मृज्यते । हरिः । सत्ता । नि । योना
। कलशेषु । सीदति ॥६

“पवमानस्य पूयमानस्य “ध्रुवस्य स्वयमविचलितस्य “सतः विद्यमानस्य सोमस्य “केतवः प्रज्ञापकाः “रश्मयः “उभयतः इतश्चामुतश्च “परि “यन्ति परिगच्छन्ति । अभिषवसमय एवं भवति । “यदि यदा “पवित्रे देशापवित्रे “हरिः हरितवर्णोऽयम् “अधि “मृज्यते तदानीं “सत्ता

सदनशीलोऽयं योनौ स्वीये स्थाने “कलशेषु द्रोणकलशादिषु “नि “षीदति ॥

य॒ज्ञस्यं के॒तुः पंवते स्वध्व॒रः सोमों दे॒वाना॒मुपं याति निष्कृ॒तं ।

स॒हस्रंधार॒ः परि॒ कोशंमर्षति॒ वृषां प॒वित्र॒मत्येंति॒ रोरुंवत् ॥ ७

य॒ज्ञस्यं । के॒तुः । प॒व॒ते॒ । सु॒ऽअ॒ध्व॒रः । सोमः॑ । दे॒वानां॑म् । उपं । या॒ति॒ । नि॒ःऽकृ॒तम् ।

स॒हस्रंऽधारः । परिं । कोशंम् । अ॒र्ष॒ति॒ । वृषां । प॒वित्रंम् । अतिं । ए॒ति॒ । रोरुंवत् ॥७

यज्ञस्य । केतुः । पवते । सुऽअध्वरः । सोमः । देवानाम् । उप । याति । निःऽकृतम् ।

सहस्रऽधारः । परि । कोशम् । अर्षति । वृषा । पवित्रम् । अति । एति । रोरुवत् ॥७

“यज्ञस्य “केतुः प्रज्ञापकः “स्वध्वरः शोभनयागः “सोमः “पवते पूयते अभिषूयते । तादृशः सोमः “देवानां “निष्कृतं संस्कृतं स्थानम् “उप “याति उपगच्छति । तदर्थं “सहस्रधारः “कोशं द्रोणकलशं “परि “अर्षति । ततस्तदर्थं “वृषा सेक्तायं “रोरुवत् शब्दयन् “पवित्रम् अतिक्रम्य गच्छत्यधोदेशम् ॥

राजा॑ समु॒द्रं न॒द्यो॒३॒॑ वि गा॑हते॒ऽपामू॒र्मिं स॑चते॒ सिंधु॑षु श्रि॒तः ।

अध्य॑स्था॒त्सानु॒ पव॑मानो अ॒व्यय॒ं नाभा॑ पृथि॒व्या ध॒रुणो॑ म॒हो दि॒वः ॥८

राजा॑ । स॒मु॒द्रम् । न॒द्यः᳚ । वि । गा॒ह॒ते॒ । अ॒पाम् । ऊ॒र्मिम् । स॒च॒ते॒ । सिन्धु॑षु । श्रि॒तः ।

अधि॑ । अ॒स्था॒त् । सानु॑ । पव॑मानः । अ॒व्यय॑म् । नाभा॑ । पृ॒थि॒व्याः । ध॒रुणः᳚ । म॒हः । दि॒वः ॥८

राजा । समुद्रम् । नद्यः । वि । गाहते । अपाम् । ऊर्मिम् । सचते । सिन्धुषु । श्रितः ।

अधि । अस्थात् । सानु । पवमानः । अव्ययम् । नाभा । पृथिव्याः । धरुणः । महः । दिवः ॥८

अयं सोमः “राजा “समुद्रम् अन्तरिक्षं “नद्यः तत्रत्या अपश्च “वि “गाहते । विगाह्य च “अपामूर्मिं “सचते उदकपूरं स्रवति । “सिन्धुषु उदकेषु ग्रहेषु वा “श्रितः सन् । हूयमानः सन् रश्मिद्वारा सूर्यं प्राप्य अन्तरिक्षे मेघेषु वर्तत इत्यर्थः । अस्यैव वृष्टिसाधनत्वात् । यद्वा । लुप्तोपममेतत् । समुद्रं

नद्य इव सिन्धुषु वसतीवरीषु श्रित आश्रितः सन् समुद्रम् अभिषुतसोमरसाधारपात्रं वि गाहते अभिषवात्पूर्वम् । पश्चात् “पवमानः पूयमानः “अव्ययं "सानु समुच्छ्रितं दशापवित्रम् “अध्यस्थात् अधितिष्ठति । कुत्र देशे। “नाभा “पृथिव्याः नाभिस्थानीये यज्ञे। तत्संबन्धिनि हविर्धान इत्यर्थः । ‘ यज्ञमाहुर्भुवनस्य नाभिम् ' (तै. सं. ७.४.१८.२) इति श्रुतेः । कीदृशः । “महो “दिवः द्युलोकस्य “धरुणः धर्ता ॥

दि॒वो न सानुं स्त॒नयंन्नचिक्रद॒द्द्यौश्च॒ यस्यं पृथि॒वी च॒ धर्मंभिः ।

इंद्रंस्य स॒ख्यं पंवते वि॒वेविंद॒त्सोमः॑ पुना॒नः क॒लशें॑षु सीदति ॥९

दि॒वः । न । सानु॑ । स्त॒नयं॑न् । अ॒चि॒क्र॒द॒त् । द्यौः । च॒ । यस्यं॑ । पृ॒थि॒वी । च॒ । धर्म॑ऽभिः ।

इन्द्रं॑स्य । स॒ख्यम् । प॒व॒ते॒ । वि॒ऽवेविं॑दत् । सोमः॑ । पु॒ना॒नः । क॒लशे॑षु । सी॒द॒ति॒ ॥९

दिवः । न । सानु । स्तनयन् । अचिक्रदत् । द्यौः । च । यस्य । पृथिवी । च । धर्मऽभिः ।

इन्द्रस्य । सख्यम् । पवते । विऽवेविदत् । सोमः । पुनानः । कलशेषु । सीदति ॥९

"दिवो “न "सानु “स्तनयन् द्युलोकस्य समुच्छ्रितं स्थानं शब्दयन्निव “अचिक्रदत् क्रन्दते “यस्य सोमस्य “धर्मभिः धारणैः “द्यौश्च “पृथिवी “च धृते स्याताम् । वृष्टिप्रदानद्वारौषध्याद्युत्पादनेन देवानां हविर्भावेन चोभयधारकत्वं प्रसिद्धम् । तादृशः “सोमः महानुभावः

सोमः “पुनानः पूयमानः “इन्द्रस्य “सख्यं “विवेविदत् “पवते पूयते पवित्रे । सः पुनानः सोमः “कलशेषु “सीदति निवसति

ज्योति॑र्य॒ज्ञस्य॑ पवते॒ मधु॑ प्रि॒यं पि॒ता दे॒वानां॑ जनि॒ता वि॒भूव॑सुः ।

दधा॑ति॒ रत्नं॑ स्व॒धयो॑रपी॒च्यं॑ म॒दिं॑त॑मो मत्स॒र इं॑द्रि॒यो रसः॑ ॥ १०

ज्योतिः॑ । य॒ज्ञस्य॑ । प॒व॒ते॒ । मधु॑ । प्रि॒यम् । पि॒ता । दे॒वाना॑म् । ज॒नि॒ता । वि॒भुऽव॑सुः ।

दधा॑ति । रत्न॑म् । स्व॒धयोः॑ । अ॒पी॒च्य॑म् । म॒दिन्ऽत॑मः । म॒त्स॒रः । इ॒न्द्रि॒यः । रसः॑ ॥१०

ज्योतिः । यज्ञस्य । पवते । मधु । प्रियम् । पिता । देवानाम् । जनिता । विभुऽवसुः ।

दधाति । रत्नम् । स्वधयोः । अपीच्यम् । मदिन्ऽतमः । मत्सरः । इन्द्रियः । रसः ॥१०

“यज्ञस्य “ज्योतिः प्रकाशकः सोमः “प्रियं “देवानां “मधु मधुरं रसं “पवते क्षरति । यद्वा । ज्योतिर्यज्ञस्येत्येतदपि मधुविशेषणम् । तथा सति उक्तलक्षणं मधु पवते पूयत इत्यर्थः । सोमरसो विशेष्यते । “पिता रक्षिता “देवानां “जनिता उत्पादयिता सर्वस्य “विभूवसुः प्रभूतधनः । ईदृशः सः “स्वधयोः द्यावापृथिव्योः। ‘ स्वधे पुरंधी ' इति द्यावाथिवीनामसु पठितः । तयोः “अपीच्यम् अन्तर्हितं "रत्नं रमणीयं धनं “दधाति स्थापयति स्तोतृषु । पुनः स एव विशेष्यते । “मदिन्तमः मादयितृतमः “मत्सरः सोमः

“इन्द्रियः इन्द्रेण जुष्ट इन्द्रस्य वर्धको वा “रसः रसरूपः ॥
॥ १३ ॥

अ॒भि॒क्रंदं॑न्क॒लशं॑ वा॒ज्यं॑र्षति॒ पति॑र्दि॒वः श॒तधा॑रो विचक्ष॒णः
।

हरि॑र्मि॒त्रस्य॒ सदं॑नेषु सीदति मर्मृजा॒नोऽवि॑भिः॒ सिंधुं॑भि॒र्वृषा॑
॥११

अ॒भि॒ऽक्रन्दं॑न् । क॒लशं॑म् । वा॒जी । अ॒र्ष॒ति॒ । पतिः॑ । दि॒वः
। श॒तऽधा॑रः । वि॒ऽच॒क्ष॒णः ।

हरिः॑ । मि॒त्रस्यं॑ । सदं॑नेषु । सी॒द॒ति॒ । म॒र्मृ॒जा॒नः ।
अवि॑ऽभिः । सिन्धुं॑ऽभिः । वृषा॑ ॥११

अभिऽक्रन्दन् । कलशम् । वाजी । अर्षति । पतिः । दिवः
। शतऽधारः । विऽचक्षणः ।

हरिः । मित्रस्य । सदनेषु । सीदति । मर्मृजानः ।
अविऽभिः । सिन्धुऽभिः । वृषा ॥११

“वाजी वेजनवान् गमनवान् अश्वसदृशो वा सोमः “अभिक्रन्दन् शब्दं कुर्वन् “कलशम् अभि “अर्षति गच्छति । कीदृशो वाजी । “दिवः “पतिः द्युलोकस्य स्वामी “शतधारः शतसंख्याकधारः “विचक्षणः विद्रष्टा । “हरिः हरितवर्णो रसात्मकः सोमः “मित्रस्य देवानां मित्रभूतस्य यज्ञस्य वा “सदनेषु स्थानेषु “सीदति पात्रेषु धृतः सन् । कीदृशो हरिः । “सिन्धुभिः स्यन्दनसाधनैः “अविभिः दशापवित्रच्छिद्रैः “मर्मृजानः शोध्यमानः “वृषा वर्षकः ॥

अग्रे॒ सिंधूं॑नां॒ पवं॑मानो अर्ष॒त्यग्रे॑ वा॒चो अ॑ग्रि॒यो गोषुं॑ गच्छति ।

अग्रे॒ वाजं॑स्य भजते महाध॒नं स्वा॑यु॒धः सो॒तृभिः॑ पूयत॒ वृषा॑ ॥१२

अग्रे॑ । सिन्धू॑नाम् । पवं॑मानः । अ॒र्ष॒ति॒ । अग्रे॑ । वा॒चः । अ॒ग्रि॒यः । गोषु॑ । ग॒च्छ॒ति॒ ।

अग्रे॑ । वाजं॑स्य । भ॒ज॒ते॒ । म॒हा॒ऽध॒नम् । सु॒ऽआ॒यु॒धः । सो॒तृऽभिः॑ । पू॒य॒ते॒ । वृषा॑ ॥१२

अग्रे । सिन्धूनाम् । पवमानः । अर्षति । अग्रे । वाचः । अग्रियः । गोषु । गच्छति ।

अग्रे । वाजस्य । भजते । महाऽधनम् । सुऽआयुधः । सोतृऽभिः । पूयते । वृषा ॥१२

“यः सोमः “पवमानः “सिन्धूनां स्यन्दमानानामुदकानाम् “अग्रे “अर्षति गच्छति । तथा “अग्रियः अग्रार्हः श्रेष्ठः “अग्रे “वाचः माध्यमिकाया अग्रे अर्षति। तथा “गोषु रश्मिषु

“गच्छति । तथा “वाजस्य अन्नस्य बलस्य वा लाभाय “महाधनं संग्रामं “भजते । सः “स्वायुधः “वृषा वर्षकः सोमः “सोतृभिः अभिषवकर्तृभिः “पूयते ॥

अ॒यं म॒तवाँ॑छकु॒नो यथा॑ हि॒तोऽव्ये॑ ससा॒र् पव॑मान ऊ॒र्मिणा॑ ।

तव॒ क्रत्वा॒ रोद॑सी अंत॒रा क॑वे॒ शुचि॑र्धि॒या पं॑वत॒े सोम॑ इंद्र ते ॥१३

अ॒यम् । म॒तऽवा॑न् । श॒कु॒नः । यथा॑ । हि॒तः । अव्ये॑ । स॒सा॒र॒ । पव॑मानः । ऊ॒र्मिणा॑ ।

तव॑ । क्रत्वा॑ । रोद॑सी॒ इति॑ । अ॒न्त॒रा । क॒वे॒ । शुचिः॑ । धि॒या । प॒व॒ते॒ । सोमः॑ । इ॒न्द्र॒ । ते॒ ॥१३

अयम् । मतऽवान् । शकुनः । यथा । हितः । अव्ये ।
ससार । पवमानः । ऊर्मिणा ।

तव । क्रत्वा । रोदसी इति । अन्तरा । कवे । शुचिः ।
धिया । पवते । सोमः । इन्द्र । ते ॥१३

“अयं सोमः “मतवान् । मतं संमतं प्रियं स्तोत्रम् । तद्वान् “पवमानः पूयमानः शोध्यमानश्च सन् “हितः प्रेरितः “शकुनः पक्षी “यथा शीघ्रं गच्छति तथा “अव्ये पवित्रे “ऊर्मिणा रसेन “ससार गच्छति । हे “कवे क्रान्तप्रज्ञ अनूचान वा । ये वा अनूचानास्ते कवयः' (ऐ. ब्रा. २. ३८) इति श्रुतेः । तादृश यजमान यद्वा उक्तलक्षण “इन्द्र “ते तव “क्रत्वा कर्मणा “धिया प्रज्ञया च । यद्वा । विशेषणविशेष्यभावः । धिया धारकेण क्रत्वा कर्मणा “रोदसी “अन्तरा रोदस्योर्द्यावापृथिव्योरन्तरा “शुचिः “सोमः “पवते पूयते ॥

द्रा॒पिं वसा॑नो यज॒तो दि॑वि॒स्पृशं॑मंतरिक्ष॒प्रा भुव॑ने॒ष्वर्पि॑तः ।

स्व॑र्जज्ञा॒नो नभं॑सा॒भ्यं॑क्रमीत्प्र॒त्नमं॑स्य पि॒तर॒मा विं॑वासति ॥ १४

द्रा॒पिम् । वसा॑नः । य॒ज॒तः । दि॒वि॒ऽस्पृशं॑म् ।
अ॒न्त॒रि॒क्ष॒ऽप्राः । भुव॑नेषु । अर्पि॑तः ।

स्व१॒॑रिति॑ स्वः॑ । ज॒ज्ञा॒नः । नभं॑सा । अ॒भि । अ॒क्र॒मी॒त् । प्र॒त्नम् ।
अ॒स्य॒ । पि॒तरं॑म् । आ । वि॒वा॒स॒ति॒ ॥१४

द्रापिम् । वसानः । यजतः । दिविऽस्पृशम् ।
अन्तरिक्षऽप्राः । भुवनेषु । अर्पितः ।

स्वः । जज्ञानः । नभसा । अभि । अक्रमीत् । प्रत्नम् ।
अस्य । पितरम् । आ । विवासति ॥१४

“दिविस्पृशं दिविस्प्रष्टारं “द्रापिं कवचं तेजोरूपं “वसानः आच्छादयन् “यजतः यष्टव्यः “अन्तरिक्षप्राः अन्तरिक्षस्य पूरक उदकेन तादृशः सोमः “भुवनेषु उदकेषु “अर्पितः “स्वः सर्वं स्वेन पाययितव्यं देवसंघं स्वर्गं वा “जज्ञानः जनयन् । अथवा । स्वरुदकम् । तज्जनयन् । “नभसा उदकेन “अभ्यक्रमीत् अभिक्रामति । “अस्य उदकस्य “पितरं पालकं “प्रत्नं पुराणमिन्द्रम् “आ “विवासति परिचरति ॥

सो अ॑स्य वि॒शे महि॒ शर्म॑ यच्छति॒ यो अ॑स्य॒ धाम॑ प्रथ॒मं व्या॑न॒शे ।

प॒दं यद॑स्य पर॒मे व्यो॑म॒न्यतो॒ विश्वा॑ अ॒भि सं या॑ति सं॒यतः॑ ॥ १५

सः । अ॒स्य॒ । वि॒शे । महि॑ । शर्म॑ । य॒च्छ॒ति॒ । यः । अ॒स्य॒ । धाम॑ । प्र॒थ॒मम् । वि॒ऽआ॒न॒शे ।

प॒दम् । यत् । अ॒स्य॒ । प॒र॒मे । विऽओ॑मनि । अतः॑ । विश्वाः॑ । अ॒भि । सम् । या॒ति॒ । स॒म्ऽयतः॑ ॥१५

सः । अस्य । विशे । महि । शर्म । यच्छति । यः । अस्य । धाम । प्रथमम् । विऽआनशे ।

पदम् । यत् । अस्य । परमे । विऽओमनि । अतः । विश्वाः । अभि । सम् । याति । सम्ऽयतः ॥१५

“सः सोमः “अस्य इन्द्रस्य “विशे प्रवेशनाय "महि महत् “शर्म सुखं “यच्छति । “यः सोमः “अस्य इन्द्रस्य “धाम तेजोयुक्तं शरीरं “प्रथमम् इतरदेवप्राप्तेः पूर्वं “व्यानशे प्राप्तवान् । “यत् यस्य “अस्य सोमस्य “परमे उत्कृष्टे “व्योमन् विशेषेण रक्षके द्युलोके वेद्यां वा “पदं भवति ।

“यतः यस्मात् सोमात् तृप्त इन्द्रः सोमः स्वयं वा “विश्वाः “संयतः सर्वान् संग्रामान “अभि “याति' सम्यगभिगच्छति । स सोमो महि शर्म यच्छतीति संबन्धः ॥ ॥ १४ ॥

प्रो अंयासी॒दिंदु॒रिंद्रंस्य निष्कृ॒तं सखा॒ सख्यु॒र्न प्र मिंनाति सं॒गिरं ।

मर्यं इव युव॒तिभि॒ः समंर्षति॒ सोमः॑ क॒लशें श॒तयांम्ना प॒था ॥१६

प्रो इतिं । अ॒या॒सी॒त् । इन्दुः॑ । इन्द्रंस्य । नि॒ःऽकृ॒तम् । सखां । सख्युः॑ । न । प्र । मि॒ना॒ति॒ । स॒म्ऽगिरंम् ।

मर्यः॑ऽइव । यु॒व॒तिऽभिः॑ । सम् । अ॒र्ष॒ति॒ । सोमः॑ । क॒लशें । श॒तऽयांम्ना । प॒था ॥१६

प्रो इति । अयासीत् । इन्दुः । इन्द्रस्य । निःऽकृतम् । सखा । सख्युः । न । प्र । मिनाति । सम्ऽगिरम् ।

मर्यःऽइव । युवतिऽभिः । सम् । अर्षति । सोमः । कलशे । शतऽयाम्ना । पथा ॥१६

"इन्दुः सोमः “इन्द्रस्य “निष्कृतं स्थानमुदरं “प्रो “अयासीत् प्रैव गच्छति । गत्वा च “सखा सखिभूतः सोमः “सख्युः इन्द्रस्य “संगिरं सम्यग्गिरणाधारभूतमुदरं “न “प्र “मिनाति न हिनस्ति । किंच “मर्यइव “युवतिभिः मर्त्यो यथा युवतिभिः सह संगतो भवति तद्वदयमपि सोमः युवतिभिर्मिश्रणशीलाभिर्वसतीवरीभिरद्भिः सह “समर्षति संगच्छतेऽभिषवकाले । पश्चात् “सोमः “शतयाम्ना अनेकयानसाधनच्छिद्रोपेतेन “पथा मार्गेण दशापवित्रसंबन्धिनि “कलशे द्रोणकलशे गच्छतीति शेषः

। यद्वा एकमेव वाक्यम् । यथा मर्यो युवतिभिः सह संगच्छते एवं कलशे शतयाम्ना पथा संगच्छतेऽद्भिः॥

प्र वो॒ धियों मंद्र॒युवों विप॒न्युवः॑ पन॒स्युवः॑ स॒ंवसंनेष्वक्रमुः ।

सोमं मनी॒षा अ॒भ्यंनूषत॒ स्तुभो॒ऽभि धे॒नवः॒ पयंसेमशिश्रयुः ॥१७

प्र । वः॒ । धियः॑ । म॒न्द्र॒ऽयुवः॑ । वि॒प॒न्युवः॑ । प॒न॒स्युवः॑ । स॒म्ऽवसंनेषु । अ॒क्र॒मुः॒ ।

सोमंम् । म॒नी॒षाः । अ॒भि । अ॒नू॒ष॒त॒ । स्तुभः॑ । अ॒भि । धे॒नवः॑ । पयंसा । ई॒म् । अ॒शि॒श्र॒युः॒ ॥१७

प्र । वः । धियः । मन्द्रऽयुवः । विपन्युवः । पनस्युवः । सम्ऽवसनेषु । अक्रमुः ।

सोमम् । मनीषाः । अभि । अनूषत । स्तुभः । अभि । धेनवः । पयसा । ईम् । अशिश्रयुः ॥१७

हे सोम “वः युष्माकं “धियः ध्यातारः “मन्द्रयुवः मदकरं शब्दं कामयमानाः “पनस्युवः स्तुतिं कामयमानाः “विपन्युवः । स्तोतृनामैतत् । स्तोतारः “संवसनेषु संवासयोग्येषु यागगृहेषु “प्र “अक्रमुः प्रक्रमन्ते । तदेवाह । “सोमं “मनीषाः मनस ईश्वराः “स्तुभः स्तोतारः “अभ्यनूषत अभिष्टुवन्ति । “धेनवः अपि “पयसा स्वीयेन “ईम् एनं सोमम् “अभि “अशिश्रयुः अभिश्रीणन्ति ।

आ नः॑ सोम सं॒यतं॑ पि॒प्युषी॒मिष॒मिंदो॒ पवं॑स्व॒ पवं॑मानो अ॒स्रिधं॑ ।

या नो॒ दोहं॑ते॒ त्रिरह॒न्नसं॑श्चुषी क्षु॒मद्वाजं॑व॒न्मधुं॑मत्सु॒वीर्यं॑ ॥ १८

आ । नः॒ । सो॒म॒ । स॒म्ऽयत॑म् । पि॒प्युषी॑म् । इष॑म् । इन्दो॒ इति॑ । पव॑स्व । पव॑मानः । अ॒स्रिध॑म् ।

या । नः॒ । दोह॑ते । त्रिः । अह॑न् । अस॑श्चुषी । क्षु॒ऽमत् । वाज॑ऽवत् । मधु॑ऽमत् । सु॒ऽवीर्य॑म् ॥१८

आ । नः । सोम । सम्ऽयतम् । पिप्युषीम् । इषम् । इन्दो इति । पवस्व । पवमानः । अस्रिधम् ।

या । नः । दोहते । त्रिः । अहन् । असश्चुषी । क्षुऽमत् । वाजऽवत् । मधुऽमत् । सुऽवीर्यम् ॥१८

हे “इन्दो दीप्त “सोम “पवमानः त्वं “नः अस्माकं “संयतं संगृहीतं “पिप्युषीं प्रवृद्धम् “इषम् अन्नम् “अस्रिधम् अक्षीणं “पवस्व । प्रयच्छेत्यर्थः । “या यादृशी “नः अस्माकम् “अहन् अहनि अह्नः “त्रिः त्रिषु सवनेषु “असश्चुषी अप्रतिबन्धा “दोहते क्षरति । किम् । “क्षुमत्

शब्दोपेतं सर्वत्र श्रूयमाणं “वाजवत्' “मधुमत् माधुर्योपेतं "सुवीर्यं शोभनसामर्थ्यं पुत्रं दोहते। तामिषं पवस्वेति समन्वयः ॥

वृषा॑ मती॒नां प॑वते विचक्ष॒णः सोमो॒ अह्नः॑ प्रतरी॒तोषसों दि॒वः ।

क्रा॒णा सिन्धूं॑नां क॒लशाँ॑ अवीवश॒दिंद्रं॑स्य॒ हार्द्या॑वि॒शन्मं॑नी॒षिभिः॑ ॥१९

वृषा॑ । म॒ती॒नाम् । प॒व॒ते॒ । वि॒ऽच॒क्ष॒णः । सोमः॑ । अह्नः॑ । प्र॒ऽत॒री॒ता । उ॒षसः॑ । दि॒वः ।

क्रा॒णा । सिन्धूं॑नाम् । क॒लशा॑न् । अ॒वी॒व॒श॒त् । इन्द्रं॑स्य । हार्दि॑ । आ॒ऽवि॒शन् । म॒नी॒षिऽभिः॑ ॥१९

वृषा । मतीनाम् । पवते । विऽचक्षणः । सोमः । अह्नः । प्रऽतरीता । उषसः । दिवः ।

क्राणा । सिन्धूनाम् । कलशान् । अवीवशत् । इन्द्रस्य । हार्दि । आऽविशन् । मनीषिऽभिः ॥१९

अयं “सोमः “पवते अभिषूयते । कीदृशः सोमः । “मतीनाम् । मतयः स्तोतारः । तेषां “वृषा वर्षकः कामानां “विचक्षणः विद्रष्टा "अह्नः “उषसो “दिवः द्युलोकस्यादित्यस्य वा “प्रतरीता प्रवर्धयिता। किंच “सिन्धूनां स्यन्दमानानामुदकानां “क्राणा कर्ता ॥ करोतेः शानचि • बहुलं छन्दसि ' इति विकरणस्य लुक् । सुः। ‘सुपां सुलुक्' इत्याकारः ॥ “कलशानवीवशत् कामयते प्रवेष्टुम् । किं कुर्वन् । “इन्द्रस्य "हार्दि हृदयम् "आविशन् प्रविशन् “मनीषिभिः स्तुत इति शेषः । यद्वा । व्यवहितमपि मनीषिभिरित्येतत् पवत इत्यनेन संबध्यते ॥

म॒नी॒षिभिः॑ पवते पू॒र्व्यः क॒विर्नृभि॑र्य॒तः परि॒ कोशाँ॑ अचिक्रदत् ।

त्रि॒तस्य॒ नाम॑ ज॒नय॒न्मधु॑ क्षर॒दिंद्र॑स्य वा॒योः स॒ख्याय॒ कर्त॑वे ॥२०

म॒नी॒षिऽभिः॑ । प॒व॒ते॒ । पू॒र्व्यः । क॒विः । नृऽभिः॑ । य॒तः । परि॑ । कोशा॑न् । अ॒चि॒क्र॒द॒त् ।

त्रि॒तस्य॑ । नाम॑ । ज॒नय॑न् । मधु॑ । क्ष॒र॒त् । इन्द्र॑स्य । वा॒योः । स॒ख्याय॑ । कर्त॑वे ॥२०

मनीषिऽभिः । पवते । पूर्व्यः । कविः । नृऽभिः । यतः । परि । कोशान् । अचिक्रदत् ।

त्रितस्य । नाम । जनयन् । मधु । क्षरत् । इन्द्रस्य । वायोः । सख्याय । कर्तवे ॥२०

अयं सोमः “मनीषिभिः मेधाविभिरध्वर्य्वादिभिः “पवते पूयते । यद्वा । अयं मनीषिभिर्मनीषिणीभिर्धाराभिः पवते क्षरति । कीदृशोऽयम् । “पूर्व्यः पुराणः “कविः मेधावी “नृभिः नेतृभिरध्वर्य्वादिभिः “यतः नियमितः सन् "कोशान् कलशान प्राप्तुं “परि “अचिक्रदत् परिक्रन्दते शब्दं करोति । “त्रितस्य त्रिषु स्थानेषु विस्तृतस्येन्द्रस्य संबन्धि “नाम नामकमुदकं “जनयन् उत्पादयन् “मधु मधुरं रसं “क्षरत् क्षरति । किमर्थम् । “इन्द्रस्य “वायोः च “सख्याय "कर्तवे सख्यं कर्तुम् ॥ ॥१५॥

अ॒यं पु॑ना॒न उ॒षसो॒ वि रो॑चयद॒यं सिन्धु॑भ्यो अभवदु लोक॒कृत् ।

अ॒यं त्रिः स॒प्त दु॑दुहा॒न आ॒शिरं॒ सोमो॑ हृ॒दे प॑वते॒ चारु॑ मत्स॒रः ॥२१

अ॒यम् । पु॒ना॒नः । उ॒षसः॑ । वि । रो॒च॒य॒त् । अ॒यम् । सिन्धु॑ऽभ्यः । अ॒भ॒व॒त् । ऊ॒ँ इति॑ । लो॒क॒ऽकृत् ।

अ॒यम् । त्रिः । स॒प्त । दु॒दु॒हा॒नः । आ॒ऽशिर॑म् । सोमः॑ । हृ॒दे । प॒व॒ते॒ । चारु॑ । म॒त्स॒रः ॥२१

अयम् । पुनानः । उषसः । वि । रोचयत् । अयम् । सिन्धुऽभ्यः । अभवत् । ऊं इति । लोकऽकृत् ।

अयम् । त्रिः । सप्त । दुदुहानः । आऽशिरम् । सोमः । हृदे । पवते । चारु । मत्सरः ॥२१

“अयं सोमः “पुनानः पूयमानः “उषसो “वि “रोचयत् विविधं रोचयति । “अयं “सिन्धुभ्यः स्यन्दमानाभ्योऽद्भ्यो वसतीवरीभ्यः “अभवत् समृद्धो भवति । “उ इति पूरणः । कीदृशोऽयम् । “लोककृत् लोकानां कर्ता । वर्षकत्वात् रेतोधारकत्वाच्चास्य लोककृत्त्वम् । “अयं “सोमः “त्रिः

“सप्त एकविंशतिं गा ऋत्विङ्मुखेन “आशिरं “दुदुहानः दुहानः । दोहस्य प्रयोजकत्वात् कर्त्रुपचारः। “मत्सरः मदकरः “चारु रमणीयं “पवते क्षरति । किमर्थम् । “हृदे हृदयाय हृदयगमनाय ।।

पवंस्व सोम दि॒व्येषु॒ धामंसु सृजा॒न इंदो क॒लशें प॒वित्र॒ आ ।

सीद॒न्निन्द्रंस्य ज॒ठरे॒ कनिंक्रद॒न्नृभिं॒र्य॒तः सूर्य॒मारोंहयो दि॒वि ॥२२

पवंस्व । सो॒म॒ । दि॒व्येषुं । धामंऽसु । सृ॒जा॒नः । इ॒न्दो॒ इतिं । क॒लशें । प॒वित्रें । आ ।

सीदंन् । इन्द्रंस्य । ज॒ठरें । कनिंक्रदत् । नृऽभिः॑ । य॒तः । सूर्यंम् । आ । अ॒रो॒ह॒य॒ः । दि॒वि ॥२२

पवस्व । सोम । दिव्येषु । धामऽसु । सृजानः । इन्दो इति । कलशे । पवित्रे । आ ।

सीदन् । इन्द्रस्य । जठरे । कनिक्रदत् । नृऽभिः । यतः । सूर्यम् । आ । अरोहयः । दिवि ॥२२

हे “सोम “दिव्येषु “धामसु स्थानेषु । देवानां संबन्धिषूदरेष्वित्यर्थः । तेषु "पवस्व क्षर । कीदृशः सन् । हे “इन्दो दीप्त सोम “कलशे “पवित्र “आ दशापवित्रे च । आ इति चार्थे । 'सृजानः सृज्यमानः । अत्र ‘ अग्निहोत्रं जुहोति यवागूं पचति' इतिवदार्थिकः क्रमोऽवगन्तव्यः । किंच “इन्द्रस्य “जठरे “सीदन् जठरं गच्छन् “कनिक्रदत् शब्दं कुर्वन् “नृभिः नेतृभिर्ऋत्विग्भिः “यतः परिगृहीतः । हुत इत्यर्थः । तथाभूतः सन् “दिवि “सूर्यम् “आरोहयः प्रादुर्भूतमकरोः ॥

अद्रिंभिः सुतः पंवसे पवित्र आँ इन्दविंद्रंस्य
जठरेंष्वाविशन् ।

त्वं नृचक्षां अभवो विचक्षण सोमं गोत्रमंगिंरोभ्योऽवृणोरपं
॥२३

अद्रिंऽभिः । सुतः । पवसे । पवित्रें । आ । इन्दो इतिं ।
इन्द्रंस्य । जठरेंषु । आऽविशन् ।

त्वम् । नृऽचक्षाः । अभवः । विऽचक्षण । सोमं । गोत्रम् ।
अङ्गिंरःऽभ्यः । अवृणोः । अपं ॥२३

अद्रिंऽभिः । सुतः । पवसे । पवित्रे । आ । इन्दो इति ।
इन्द्रस्य । जठरेषु । आऽविशन् ।

त्वम् । नृऽचक्षाः । अभवः । विऽचक्षण । सोम । गोत्रम् ।
अङ्गिरःऽभ्यः । अवृणोः । अप ॥२३

हे “इन्दो सोम "अद्रिभिः ग्रावभिः “सुतः अभिषुतस्त्वं “पवसे क्षरसि पूयसे वा। “पवित्र “आ दशापवित्रे । आ इति पूरणः । यद्वा । अभिषुतो भवसि पवसे चेति चार्थं आकारः । किं कुर्वन् । “इन्द्रस्य “जठरेषु जठरप्रदेशेषु “आविशन् । जठरप्रवेशायेत्यर्थः । किंच हे “विचक्षण विद्रष्टः सोम “त्वं “नृचक्षा “अभवः नृणां मनुष्याणामनुग्रहेण द्रष्टा भवसि । किंच हे “सोम त्वम् “अङ्गिरोभ्यः “गोत्रं मेघमुदकं क्षारयितुं पणिभिरपहृतानां गवामावरकं पर्वतं वा “अप “अवृणोः ॥

त्वां सोॅम॒ पवॅमानं स्वा॒ध्योऽनु॒ विप्राॅसो अमदन्नव॒स्यवः॑ ।

त्वां सुॅप॒र्णं आभॅरद्दि॒वस्परीन्दो॒ विश्वाॅभिर्म॒तिभि॒: परिॅष्कृतं ॥२४

त्वाम् । सो॒म॒ । पव॑मानम् । सु॒ऽआ॒ध्य॑ः । अनु॑ । विप्रा॑सः । अ॒म॒द॒न् । अ॒व॒स्यव॑ः ।

त्वाम् । सु॒ऽप॒र्णः । आ । अ॒भ॒र॒त् । दि॒वः । परि॑ । इन्दो॒ इति॑ । विश्वा॑भिः । म॒तिऽभि॑ः । परि॑ऽकृतम् ॥२४

त्वाम् । सोम । पवमानम् । सुऽआध्यः । अनु । विप्रासः । अमदन् । अवस्यवः ।

त्वाम् । सुऽपर्णः । आ । अभरत् । दिवः । परि । इन्दो इति । विश्वाभिः । मतिऽभिः । परिऽकृतम् ॥२४

हे "सोम “पवमानं “त्वां “स्वाध्यः सुमतयः सुकर्माणो वा “विप्रासः विप्रा मेधाविनः स्तोतारः “अवस्यवः रक्षाकामाः “अनु “अमदन अनुष्टुवन्ति । हे “इन्दो “त्वां “सुपर्णः श्येनः “आभरत् आहरत् । “दिवस्परि द्युलोकस्योपरि ।

द्युलोकादित्यर्थः । कीदृशं त्वाम् । “विश्वाभिर्मतिभिः सर्वाभिः स्तुतिभिः “परिष्कृतम् अलंकृतम् ।।

अव्यें पुना॒नं परि॒ वारं॑ ऊ॒र्मिणा॒ हरिं॑ नवंते अ॒भि स॒प्त धे॒नवः॑ ।

अ॒पामु॒पस्थे॒ अध्या॒यवः॑ क॒विमृ॒तस्य॒ योनां॑ महि॒षा अं॑हेषत ॥२५

अव्यें । पु॒ना॒नम् । परिं । वारें । ऊ॒र्मिणां॑ । हरिंम् । न॒व॒न्ते॒ । अ॒भि । स॒प्त । धे॒नवः॑ ।

अ॒पाम् । उ॒पऽस्थें । अधिं । आ॒यवः॑ । क॒विम् । ऋ॒तस्यं॑ । योनां॑ । म॒हि॒षाः । अ॒हे॒ष॒त ॥२५

अव्ये । पुनानम् । परि । वारे । ऊर्मिणा । हरिम् । नवन्ते । अभि । सप्त । धेनवः ।

अपाम् । उपऽस्थे । अधि । आयवः । कविम् । ऋतस्य । योना । महिषाः । अहेषत ॥२५

“अव्ये अविमये “वारे वाले दशापवित्रे “ऊर्मिणा रसेन “परि परितः “पुनानं पवमानं “हरिं हरितवर्णं सोमम् “अभि “नवन्ते अभिगच्छन्ति “सप्त “धेनवः प्रीणयित्र्यः सप्त गायत्र्याद्याः सप्त गङ्गाद्या नद्यो वा । ' नवते क्षोदते ' इति गतिकर्मस्वयं पठितः । किंच “कविं त्वाम् “अपामुपस्थे अन्तरिक्षस्योत्सङ्गे “ऋतस्य योनौ । उदकनामैतत् “ ऋतं योनिर्ऋतस्य योनिः' इति तन्नामसु पाठात् । उदके “महिषाः महान्तः “आयवः मनुष्याः “अधि “अहेषत अधिकं प्रेरयन्ति ॥ ॥ १६ ॥

इन्दुः पुना॒नो अतिं गाहते॒ मृधो॒ विश्वा॑नि कृ॒ण्वन्त्सु॒पथा॑नि॒ यज्यं॑वे ।

गाः कृंण्वा॒नो नि॒र्णिजं हर्य॒तः क॒विरत्यो॒ न क्रीळ॒न्परि॒ वारंमर्षति ॥२६

इन्दुः॑ । पु॒ना॒नः । अतिं । गा॒ह॒ते॒ । मृधः॑ । विश्वांनि । कृ॒ण्वन् । सु॒ऽपथांनि । यज्यंवे ।

गाः । कृ॒ण्वा॒नः । नि॒ःऽनिजंम् । ह॒र्य॒तः । क॒विः । अत्यः॑ । न । क्रीळंन् । परिं । वारंम् । अ॒र्ष॒ति॒ ॥२६

इन्दुः । पुनानः । अति । गाहते । मृधः । विश्वानि । कृण्वन् । सुऽपथानि । यज्यवे ।

गाः । कृण्वानः । निःऽनिजम् । हर्यतः । कविः । अत्यः । न । क्रीळन् । परि । वारम् । अर्षति ॥२६

अयम् “इन्दुः दीप्तः सोमः “पुनानः पूयमानः “अति “गाहते अतिक्रम्य गच्छति “मृधः शत्रून् । किं कुर्वन् । “विश्वानि गन्तव्यानि सुवर्मा नि वैदिकानि लौकिकानि च "सुपथानि

"कृण्वन् कुर्वन् । कस्मै । "यज्यवे यागकर्त्रे । यजमानाय शत्रून् परिहरन् मार्गान् सुपथान् कुर्वन् कलशं प्रविशतीत्यर्थः । किंच “निर्णिजम् आत्मीयं रूपं “गाः “कृण्वानः । रसमयान् कुर्वाण इत्यर्थः । “हर्यतः कान्तः । ‘ हर्य गतिकान्त्योः' । औणादिकोऽतच् । “कविः क्रान्तप्रज्ञः एवंभूतः सोमः “अत्यो “न अश्व इव “क्रीळन् “वारं दशापवित्रं “परि “अर्षति परिगच्छति ॥

असश्चतः शतधारा अभिश्रियो हरिं नवन्तेऽव ता उदन्युवः ।

क्षिपो मृजंति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ॥२७

असश्चतः । शतऽधाराः । अभिऽश्रियः । हरिम् । नवन्ते । अव । ताः । उदन्युवः ।

क्षिपः॑ । मृ॒ज॒न्ति॒ । परि॑ । गोभिः॑ । आऽवृ॑तम् । तृ॒तीये॑ । पृ॒ष्ठे । अधि॑ । रो॒च॒ने । दि॒वः ॥२७

असश्चतः । शतऽधाराः । अभिऽश्रियः । हरिम् । नवन्ते । अव । ताः । उदन्युवः ।

क्षिपः । मृजन्ति । परि । गोभिः । आऽवृतम् । तृतीये । पृष्ठे । अधि । रोचने । दिवः ॥२७

“असश्चतः परस्परमसंगताः “शतधाराः “अभिश्रियः अभितः सोमं श्रयन्त्यः “ताः प्रसिद्धाः सूर्यस्य दीप्तयः "हरिम् “अव “नवन्ते गच्छन्ति । “उदन्युवः उदकेच्छावत्यः सत्यः । यद्वा । धाराशब्देनात्र सोमधारा अभिप्रेताः । असश्चतोऽसंबद्धा अभिश्रियोऽभितो गाः श्रयन्त्यो गोभिः श्रितास्ताः प्रसिद्धा उदन्युव इन्द्रसंबन्धिवृष्टिकामा हरिमिन्द्रमव नवन्ते संगच्छन्ते । “क्षिपः अङ्गुलयोऽपि “गोभिः दीप्तिपक्षे गोभी रश्मिभिः “आवृतं सोमधारापक्षे

गोभिः “परि आवृतं व्याप्तं सोमं “मृजन्ति अवशोधयन्ति । “दिवः आदित्यात् “रोचने रोचमाने यमादित्यो रोचयति तस्मिन् “तृतीये क्षित्यपेक्षायां तृतीयभूते द्युलोके “अधि वसन्तं सोमं मृजन्ति ॥

तवे॒माः प्र॒जा दि॒व्यस्य॒ रेतं॑स॒स्त्वं विश्वं॑स्य॒ भुवं॑नस्य राजसि ।

अथे॒दं विश्वं॑ पवमान ते॒ वशे॒ त्वमिं॑दो प्रथ॒मो धां॑म॒धा अं॑सि ॥२८

तवं॑ । इ॒माः । प्र॒ऽजाः । दि॒व्यस्यं॑ । रेतं॑सः । त्वम् । विश्वं॑स्य । भुवं॑नस्य । रा॒ज॒सि॒ ।

अथं॑ । इ॒दम् । विश्वं॑म् । प॒व॒मा॒न॒ । ते॒ । वशें॑ । त्वम् । इ॒न्दो॒ इतिं॑ । प्र॒थ॒मः । धा॒म॒ऽधाः । अ॒सि॒ ॥२८

तव । इमाः । प्रऽजाः । दिव्यस्य । रेतसः । त्वम् । विश्वस्य । भुवनस्य । राजसि ।

अथ । इदम् । विश्वम् । पवमान । ते । वशे । त्वम् । इन्दो इति । प्रथमः । धामऽधाः । असि ॥२८

“तव “दिव्यस्य “रेतसः सकाशात् “इमाः “प्रजाः उत्पद्यमानाः प्राणिन उत्पन्नाः । सोमो वै रेतोधाः' (तै. सं. २.१.१.६) इति श्रुतेः । “त्वं “विश्वस्य “भुवनस्य “राजसि ईश्वरो भवसि । “अथ अपि च “इदं “विश्वं हे पवमान “ते “वशे त्वदधीनं वर्तते । हे “इन्दो “प्रथमः मुख्यः “त्वं “धामधाः धाम्नो धर्ता “असि भवसि ।।

त्वं स॑मु॒द्रो अ॑सि विश्व॒वित्क॑वे॒ तवे॒माः पञ्च॑ प्र॒दिशो॒ विध॑र्मणि ।

त्वं द्यां चं पृथि॒वीं चाति॑ जभ्रिषे॒ तव॒ ज्योती॑ंषि पवमा॒न॒ सूर्य॑ः ॥२९

त्वम् । स॒मु॒द्रः । अ॒सि॒ । वि॒श्व॒ऽवित् । क॒वे॒ । तव॑ । इ॒माः । पञ्च॑ । प्र॒ऽदिश॑ः । विऽध॑र्मणि ।

त्वम् । द्याम् । च॒ । पृ॒थि॒वीम् । च॒ । अति॑ । ज॒भ्रि॒षे॒ । तव॑ । ज्योती॑ंषि । प॒व॒मा॒न॒ । सूर्य॑ः ॥२९

त्वम् । समुद्रः । असि । विश्वऽवित् । कवे । तव । इमाः । पञ्च । प्रऽदिशः । विऽधर्मणि ।

त्वम् । द्याम् । च । पृथिवीम् । च । अति । जभ्रिषे । तव । ज्योतींषि । पवमान । सूर्यः ॥२९

हे “कवे क्रान्तप्रज्ञ “त्वं यस्मात् “समुद्रः वर्षसाधनोऽपाम् अतः “विश्ववित् “असि । यद्वा । समुद्रो द्रवात्मकोऽसि विश्वविच्चासि । किंच “तव “विधर्मणि विधारणे “पञ्च

“प्रदिशः प्रकृष्टा दिशो भवन्तीति शेषः । “त्वं “द्यां “च दिवं च “पृथिवीं “च "अति “जभ्रिषे बिभर्षि । हे “पवमान “सूर्यः देवः “तव “ज्योतींषि आप्याययति ॥

त्वं प॒वित्रे॒ रजं॑सो॒ विधं॑र्मणि दे॒वेभ्यः॑ सोम पवमान पूयसे ।

त्वामु॒शिजः॑ प्रथ॒मा अं॑गृभ्णत॒ तुभ्ये॒मा विश्वा॒ भुवं॑नानि येमिरे ॥३०

त्वम् । प॒वित्रें । रजं॑सः । विऽधं॑र्मणि । दे॒वेभ्यः॑ । सो॒म॒ । प॒व॒मा॒न॒ । पू॒य॒से॒ ।

त्वाम् । उ॒शिजः॑ । प्र॒थ॒माः । अ॒गृ॒भ्ण॒त॒ । तुभ्यं॑ । इ॒मा । विश्वां॑ । भुवं॑नानि । ये॒मि॒रे॒ ॥३०

त्वम् । पवित्रे । रजसः । विऽधर्मणि । देवेभ्यः । सोम । पवमान । पूयसे ।

त्वाम् । उशिजः । प्रथमाः । अगृभ्णत । तुभ्य । इमा । विश्वा । भुवनानि । येमिरे ॥३०

हे “सोम “पवमान “त्वं “रजसः लोकस्य रसस्य वा “विधर्मणि विधारके दशापवित्रे "देवेभ्यः देवार्थं “पूयसे । “त्वामुशिजः कामयमाना ऋत्विजः “प्रथमाः प्रतमा मुख्याः “अगृभ्णत गृह्णन्ति । “तुभ्य तुभ्यम् “इमा इमानि “विश्वा सर्वाणि “भुवनानि भूतजातानि “येमिरे यच्छन्त्यात्मानम्॥॥१७॥

प्र रे॒भ ए॒त्यति॒ वारं॑म॒व्यय॒ं वृषा॒ वने॒ष्ववं चक्रद॒द्धरिः॑ ।

सं धी॒तयों वावशा॒ना अंनूषत॒ शिशुं रिहन्ति म॒तय॒ः पनिंप्नतं ॥३१

प्र । रे॒भः । ए॒ति॒ । अतिं । वारं॑म् । अ॒व्ययं॑म् । वृषां । वनें॑षु । अवं । च॒क्र॒द॒त् । हरिः॑ ।

सम् । धी॒तयः॑ । वा॒व॒शा॒नाः । अ॒नू॒ष॒त॒ । शिशुं॑म् । रि॒ह॒न्ति॒ । म॒तयः॑ । पनिं॑प्नतम् ॥३१

प्र । रेभः । एति । अति । वारम् । अव्ययम् । वृषा । वनेषु । अव । चक्रदत् । हरिः ।

सम् । धीतयः । वावशानाः । अनूषत । शिशुम् । रिहन्ति । मतयः । पनिप्नतम् ॥३१

“रेभः शब्दयिता । रेभृ शब्दे'। सोमः “वारमव्ययम् अविमयं वालं “प्र “अति “ऐति' प्रकर्षेणातिगच्छति । “वृषा सेक्ता सोमः “वनेषु उदकेषु “अव “चक्रदत् अवक्रन्दन् "हरिः हरितवर्णः सोमः । “सम् “अनूषत संस्तुवन्ति । के। “धीतयः ध्यातारः “वावशानाः यार्ग सोमं

वा कामयमानाः। “शिशुं शिशुवत् संस्कर्तव्यं सोमं “मतयः स्तुतयः “रिहन्ति लिहन्ति स्पृशन्ति । स्वविषयीकुर्वन्तीत्यर्थः । कीदृशम् । "पनिप्नतं शब्दयन्तम् ॥

स सूर्यस्य र॒श्मिभि॒ः परि॑ व्यत॒ तन्तुं॑ तन्वा॒नस्त्रि॒वृत॒ं यथा॑ वि॒दे ।

नयं॑न्नृ॒तस्यं॑ प्र॒शिषो॒ नवी॑यसी॒ः पति॒र्जनी॑ना॒मुपं॑ याति निष्कृ॒तं ॥३२

सः । सूर्यस्य । र॒श्मिऽभिः॑ । परि॑ । व्य॒त॒ । तन्तुं॑म् । त॒न्वा॒नः । त्रि॒ऽवृतं॑म् । यथा॑ । वि॒दे ।

नयं॑न् । ऋ॒तस्यं॑ । प्र॒ऽशिषः॑ । नवी॑यसीः । पतिः॑ । जनी॑नाम् । उपं॑ । या॒ति॒ । नि॒ःऽकृ॒तम् ॥३२

सः । सूर्यस्य । रश्मिऽभिः । परि । व्यत । तन्तुम् । तन्वानः । त्रिऽवृतम् । यथा । विदे ।

नयन् । ऋतस्य । प्रऽशिषः । नवीयसीः । पतिः । जनीनाम् । उप । याति । निःऽकृतम् ॥३२

“सः सोमः “सूर्यस्य “रश्मिभिः “परि “व्यत परिवेष्टयत्यात्मानम् । किं कुर्वन् । “त्रिवृतं सवनैर्देवैर्वा त्रिर्वृतं “तन्तुं यज्ञं “तन्वानः विस्तारयन् “यथा “विदे जानाति । येन प्रकारेण संपूर्णमवगच्छति तथा तन्वानः । “ऋतस्य सत्यभूतस्य यजमानस्य “नवीयसीः नवतराः “प्रशिषः प्रशंसना अभिमतानि “नयन् प्रापयन् । तस्मा एव “जनीनां “पतिः पालकः स्वामी “निष्कृतं संस्कृतं पात्रम् “उप “याति गच्छति ॥

राजा॒ सिन्धू॑नां पवते॒ पति॑र्दि॒व ऋ॒तस्य॑ याति प॒थिभिः॑

कनिंक्रदत् ।

स॒हस्रंधार॒ः परिं षिच्यते॒ हरिः॑ पुना॒नो वाचं ज॒नय॒न्नुपांवसुः ॥३३

राजां । सिन्धूंनाम् । प॒व॒ते॒ । पतिः॑ । दि॒वः । ऋ॒तस्यं । या॒ति॒ । प॒थिऽभिः॑ । कनिंक्रदत् ।

स॒हस्रंऽधारः । परिं । सि॒च्य॒ते॒ । हरिः॑ । पु॒ना॒नः । वाचंम् । ज॒नयंन् । उपंऽवसुः ॥३३

राजा । सिन्धूनाम् । पवते । पतिः । दिवः । ऋतस्य । याति । पथिऽभिः । कनिक्रदत् ।

सहस्रऽधारः । परि । सिच्यते । हरिः । पुनानः । वाचम् । जनयन् । उपऽवसुः ॥३३

“सिन्धूनां नदीनामुदकानां “राजा ईश्वरः “दिवः “पतिः द्युलोकस्य स्वामी “ऋतस्य यज्ञस्य “पथिभिः मार्गैः “कनिक्रदत् शब्दं कुर्वन् “याति । “सहस्रधारः बहुधारायुक्तः सोमो नृभिर्नेतृभिर्ऋत्विग्भिः “परि “षिच्यते पात्रेषु । “पुनानः पूयमानः “वाचं शब्दं “जनयन् उत्पादयन् “उपावसुः उपागच्छद्धनः परि षिच्यते इति समन्वयः ॥

पव॑मान॒ मह्यर्णो॒ वि धा॑वसि॒ सूरो॒ न चि॒त्रो अव्य॑यानि॒ पव्य॑या ।

गभ॑स्तिपूतो॒ नृभि॒रद्रि॑भिः सु॒तो म॒हे वाजा॑य॒ धन्या॑य धन्वसि ॥३४

पव॑मान । महि॑ । अर्णः॑ । वि । धा॒व॒सि॒ । सूरः॑ । न । चि॒त्रः । अव्य॑यानि । पव्य॑या ।

गभ॑स्तिऽपूतः । नृऽभि॑ः । अद्रि॑ऽभिः । सु॒तः । म॒हे । वाजा॑य । धन्या॑य । ध॒न्व॒सि॒ ॥३४

पवमान । महि । अर्णः । वि । धावसि । सूरः । न । चित्रः । अव्ययानि । पव्यया ।

गभस्तिऽपूतः । नृऽभिः । अद्रिऽभिः । सुतः । महे । वाजाय । धन्याय । धन्वसि ॥३४

हे “पवमान सोम “मह्यर्णः बहूदकम् । अर्ण इत्युदकनाम । रसं वा “वि “धावसि गमयसि । ‘ धावु गतिशुद्ध्योः'। किंच “सूरो "न “चित्रः सूर्य इव चित्रः चायनीयः पूज्यः सन् "अव्ययानि अविमयानि “पव्यया पात्राणि गच्छसि । किंच “गभस्तिपूतः बाहुभिरभिशोधितः “नृभिः ऋत्विग्भिः ग्रeवभिश्च “सुतः अभिषुतः “महे महते “वाजाय संग्रामाय “धन्याय धनेभ्यो हिताय “धन्वसि गच्छसि । धन्वतिर्गतिकर्मा ॥

इष॒मूर्जं॑ पवमाना॒भ्यं॑र्षसि श्ये॒नो न वंसु॑ क॒लशें॑षु सीदसि ।

इन्द्रां॑य॒ मद्वा॑ मद्यो॒ मदः॑ सु॒तो दि॒वो विं॑ष्ट॒ंभ उं॑प॒मो विं॑चक्ष॒णः ॥३५

इषं॑म् । ऊर्जं॑म् । प॒व॒मा॒न॒ । अ॒भि । अ॒र्ष॒सि॒ । श्ये॒नः । न । वंसु॑ । क॒लशें॑षु । सी॒द॒सि॒ ।

इन्द्रा॑य । मद्वा॑ । मद्यः॑ । मदः॑ । सु॒तः । दि॒वः । वि॒ष्ट॒म्भः । उ॒प॒ऽमः । वि॒ऽच॒क्ष॒णः ॥३५

इषम् । ऊर्जम् । पवमान । अभि । अर्षसि । श्येनः । न । वंसु । कलशेषु । सीदसि ।

इन्द्राय । मद्वा । मद्यः । मदः । सुतः । दिवः । विष्टम्भः । उपऽमः । विऽचक्षणः ॥३५

हे “पवमान पूयमान सोम “इषम् अन्नम् “ऊर्जं बलं च “अभ्यर्षसि । “श्येनो "न श्येन इव “वंसु वननीयेषु कुलायेषु “कलशेषु सीदसि निषण्णो भवसि । अथ परोक्षकृतः । “इन्द्राय “मद्वा मदकरः “मद्यः मदहेतुः “मदः रसः “सुतः अभिषुतः । कीदृशः । “दिवः द्युलोकस्य “उपमः उपमीयमानः “विष्टम्भः विशेषेण स्तम्भयिता । स्थूणा यथा गृहं तथा । “विचक्षणः विद्रष्टा । ‘ स्थूणेव जनाँ उपमित्' (ऋ. सं. १.५९.१) इत्युक्तम् ॥ ॥ १८ ॥

स॒प्त स्वसांरो अ॒भि मा॒तरः॒ शिशुं॒ नवं जज्ञा॒नं जेन्यं विप॒श्चितं ।

अ॒पां गंध॒र्वं दि॒व्यं नृ॒चक्षंसं॒ सोमं॒ विश्वंस्य॒ भुवंनस्य रा॒जसें ॥३६

स॒प्त । स्वसा॑रः । अ॒भि । मा॒तरः॑ । शिशु॑म् । नव॑म् । ज॒ज्ञा॒नम् । जेन्य॑म् । वि॒प॒ःऽचित॑म् ।

अ॒पाम् । ग॒न्ध॒र्वम् । दि॒व्यम् । नृ॒ऽचक्ष॑सम् । सोम॑म् । विश्व॑स्य । भुव॑नस्य । रा॒जसे॑ ॥३६

सप्त । स्वसारः । अभि । मातरः । शिशुम् । नवम् । जज्ञानम् । जेन्यम् । विपःऽचितम् ।

अपाम् । गन्धर्वम् । दिव्यम् । नृऽचक्षसम् । सोमम् । विश्वस्य । भुवनस्य । राजसे ॥३६

“सप्त सर्पणस्वभावाः सप्तसंख्याका वा "मातरः मातृस्थानीया गङ्गायमुनायाः “शिशुं शिशुस्थानीयम् “अभि गच्छन्तीति शेषः । स्वकीयैः पयोभिराच्छादयन्तीति शेषः । कीदृशं शिशुम् । “नवं “जज्ञानं जायमानं “जेन्यं जयशीलं “विपश्चितं विद्वांसम् “अपां जनकं तेषां मध्ये

वर्तमानं वा “गन्धर्वम् उदकस्य धातारं “दिव्यं दिवि भवं “नृचक्षसं नृणां द्रष्टारं “सोमम् अभिगच्छन्ति । किमर्थम् । “विश्वस्य “भुवनस्य विराजसे विराजनार्थम् ॥

ई॒शा॒न इ॒मा भुव॑ना॒नि॒ वीय॑से युजा॒न इं॑दो ह॒रित॑ः सुप॒र्ण्य॑ः ।

तास्ते॑ क्षरं॑तु॒ मधु॑मद्घृ॒तं पय॒स्तव॑ व्र॒ते सो॑म तिष्ठं॑तु कृ॒ष्टय॑ः ॥३७

ई॒शा॒नः । इ॒मा । भुव॑नानि । वि । ई॒य॒से॒ । यु॒जा॒नः । इ॒न्दो॒ इति॑ । ह॒रित॑ः । सु॒ऽप॒र्ण्य॑ः ।

ताः । ते॒ । क्ष॒र॒न्तु॒ । मधु॑ऽमत् । घृ॒तम् । पय॑ः । तव॑ । व्र॒ते । सो॒म॒ । ति॒ष्ठ॒न्तु॒ । कृ॒ष्टय॑ः ॥३७

ईशानः । इमा । भुवनानि । वि । ईयसे । युजानः । इन्दो इति । हरितः । सुऽपर्ण्यः ।

ताः । ते । क्षरन्तु । मधुऽमत् । घृतम् । पयः । तव । व्रते । सोम । तिष्ठन्तु । कृष्टयः ॥३७

हे “इन्दो सोम “ईशानः सर्वस्य स्वामी त्वम् "इमा इमानि "भुवनानि भूतजातानि "वीयसे गच्छसि । वी गत्यादिषु । किं कुर्वन् । “हरितः हरितवर्णाः सुपर्ण्यः सुपतनाश्चाश्वाः रथे “युजानः योजयन् । “ताः सुपर्ण्यः “ते तव संबन्धिन्यः “मधुमत् माधुर्योपेतं “घृतं दीप्तं “पयः उदकं “क्षरन्तु । हे “सोम “तव “व्रते कर्मणि “तिष्ठन्तु “कृष्टयः मनुष्याः सर्वे ॥

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।

स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥
३८

त्वम् । नृ॒ऽचक्षाः॑ । अ॒सि॒ । सो॒म॒ । वि॒श्वतः॑ । पव॑मान ।
वृ॒ष॒भ॒ । ता । वि । धा॒व॒सि॒ ।

सः । नः॒ । प॒व॒स्व॒ । वसु॑ऽमत् । हिर॑ण्यऽवत् । व॒यम् ।
स्या॒म॒ । भुव॑नेषु । जी॒वसे॑ ॥३८

त्वम् । नृऽचक्षाः । असि । सोम । विश्वतः । पवमान ।
वृषभ । ता । वि । धावसि ।

सः । नः । पवस्व । वसुऽमत् । हिरण्यऽवत् । वयम् ।
स्याम । भुवनेषु । जीवसे ॥३८

हे “सोम “त्वं “विश्वतः सर्वतः सर्वेषु भुवनेषु “नृचक्षाः नृणां द्रष्टा “असि भवसि । हे “पवमान “वृषभ अपां वर्षक “ताः अपः “वि “धावसि विविधं गच्छसि। “सः त्वं “नः अस्माकं “पवस्व क्षर। किम् । “वसुमत् बहुभिर्वसुभिर्वासकैर्गवादिद्रव्यैर्युक्तं तथा “हिरण्यवत्

बहुभिर्हिरण्यैर्युक्तं धनम् । “वयं च वसुभिर्हिरण्यैर्युक्ताः
“भुवनेषु लोकेषु “जीवसे जीवितुं प्रभवः “स्याम भवेम ॥

गो॒वित्प॑वस्व वसु॒विद्धि॑रण्य॒विद्रे॑तो॒धा इं॑दो॒ भुव॑ने॒ष्वर्पि॑तः ।

त्वं सु॒वीरो॑ असि सोम विश्व॒वित्तं त्वा॒ विप्रा॒ उप॑ गि॒रेम
आ॑सते ॥३९

गो॒ऽवित् । प॒व॒स्व॒ । व॒सु॒ऽवित् । हि॒र॒ण्य॒ऽवित् । रे॒तः॒ऽधाः ।
इ॒न्दो॒ इति॑ । भुव॑नेषु । अर्पि॑तः ।

त्वम् । सु॒ऽवीरः॑ । अ॒सि॒ । सो॒म॒ । वि॒श्व॒ऽवित् । तम् । त्वा॒ ।
विप्राः॑ । उप॑ । गि॒रा । इ॒मे । आ॒स॒ते॒ ॥३९

गोऽवित् । पवस्व । वसुऽवित् । हिरण्यऽवित् । रेतःऽधाः ।
इन्दो इति । भुवनेषु । अर्पितः ।

त्वम् । सुऽवीरः । असि । सोम । विश्वऽवित् । तम् । त्वा । विप्राः । उप । गिरा । इमे । आसते ॥३९

हे सोम त्वं “पवस्व क्षर। कीदृशः । “गोवित् गवां लम्भकः “वसुवित् धनस्य लम्भकः “हिरण्यवित् हिरण्यस्य लम्भकः “रेतोधाः । रेत उदकम् । तस्य धातौषधीनाम् । यद्वा । रेतः प्रजननसामर्थ्यम् । तस्य धारयिता। “भुवनेषु उदकेषु “अर्पितः । हे “इन्दो “सोम “त्वं “सुवीरः सुवीर्यः “असि भवसि । “विश्ववित् सर्वस्य वेत्ता। “तं “त्वा त्वाम् “इमे “विप्राः “गिरा स्तुत्या “उप “आसते ॥

उन्मध्वं ऊ॒र्मिर्व॒नना॑ अतिष्ठिपद॒पो वसा॑नो महि॒षो वि गा॑हते ।

राजा॑ प॒वित्र॑रथो॒ वाज॒मारु॑हत्स॒हस्र॑भृष्टिर्जयति॒ श्रवो॑ बृ॒हत् ॥४०

उत् । मध्वः᳚ । ऊ॒र्मिः । व॒नना᳚ः । अ॒ति॒स्थि॒प॒त् । अ॒पः ।
वसा॑नः । म॒हि॒षः । वि । गा॒ह॒ते॒ ।

राजा॑ । प॒वित्र॑ऽरथः । वाज॑म् । आ । अ॒रु॒ह॒त् ।
स॒हस्र॑ऽभृष्टिः । ज॒य॒ति॒ । श्रवः᳚ । बृ॒हत् ॥४०

उत् । मध्वः । ऊर्मिः । वननाः । अतिस्थिपत् । अपः ।
वसानः । महिषः । वि । गाहते ।

राजा । पवित्रऽरथः । वाजम् । आ । अरुहत् ।
सहस्रऽभृष्टिः । जयति । श्रवः । बृहत् ॥४०

“मध्वः मधुरस्य “ऊर्मिः रसः “वननाः वननीया वाचः “उत् “अतिष्ठिपत् उत्थापयति । सोमाभिषवकाले स्तुतिवाचः प्रवृत्तेः । “अपः “वसानः आच्छादयन् “महिषः महान् “वि “गाहते प्रविशति कलशम् । “राजा सोमः “पवित्ररथः। दशापवित्रमेव रथो यस्य स तथोक्तः । तादृशः सोमः

“वाजं संग्रामम् “आरुहत् आरोहति । “सहस्रभृष्टिः बहुभ्रंशोऽपरिमितगमनः “बृहत् “श्रवः महदन्नं “जयति अस्मदर्थम् ॥ ॥ १९ ॥

स भं॒दना॒ उदिं॑यर्ति प्र॒जावं॑तीर्वि॒श्वायु॒र्विश्वा᳚ः सु॒भरा॒ अहं॑र्दिवि ।

ब्रह्मं॑ प्र॒जावं॑द्र॒यिमश्वं॑पस्त्यं पी॒त इं᳚द॒विंद्रं॑म॒स्मभ्यं᳚ याचतात् ॥४१

सः । भ॒न्दना᳚ः । उत् । इ॒य॒र्ति॒ । प्र॒जाऽवं॑तीः । वि॒श्वऽआं॑युः । विश्वा᳚ः । सु॒ऽभरा᳚ः । अह॑ःऽदिवि ।

ब्रह्मं॑ । प्र॒जाऽवं॑त् । र॒यिम् । अश्वं॑ऽपस्त्यम् । पी॒तः । इ॒न्दो॒ इतिं॑ । इन्द्रं॑म् । अ॒स्मभ्यं॑म् । या॒च॒ता॒त् ॥४१

सः । भन्दनाः । उत् । इयर्ति । प्रजाऽवतीः । विश्वऽआयुः । विश्वाः । सुऽभराः । अहःऽदिवि ।

ब्रह्म । प्रजाऽवत् । रयिम् । अश्वऽपस्त्यम् । पीतः । इन्दो इति । इन्द्रम् । अस्मभ्यम् । याचतात् ॥४१

“सः सोमः "विश्वायुः सर्वस्य गन्ता सोमः “प्रजावतीः प्रजारूपफलदात्रीः “सुभराः सुष्ठु ह्रियमाणाः “विश्वाः सर्वाः “भन्दनाः स्तुतीः "उदियर्ति उत्कृष्टं प्रेरयति । कस्मिन् काले उच्यते । “अहर्दिवि अहोरात्रयोश्च । अथ प्रत्यक्षकृतः । “ब्रह्म परिवृढं कर्म “प्रजावत् प्रजाभिर्युक्तम् । प्रजाफलकमित्यर्थः । यद्वा । अन्नं तच्च प्रजावत् प्रजाद्युपेतम् । तथा “रयिं धनम् । कीदृशम् । “अश्वपस्त्यं व्याप्तगृहम् । तदुभयं हे “इन्दो दीप्त सोम "पीतः इन्द्रेण पीतस्त्वं तमेव “इन्द्रमस्मभ्यं “याचतात् याचस्व ॥

सो अग्ने अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः ।

द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि ॥४२

सः । अग्ने । अह्नाम् । हरिः । हर्यतः । मदः । प्र । चेतसा । चेतयते । अनु । द्युऽभिः ।

द्वा । जना । यातयन् । अन्तः । ईयते । नराशंसम् । च । दैव्यम् । च । धर्तरि ॥४२

सः । अग्ने । अह्नाम् । हरिः । हर्यतः । मदः । प्र । चेतसा । चेतयते । अनु । द्युऽभिः ।

द्वा । जना । यातयन् । अन्तः । ईयते । नराशंसम् । च । दैव्यम् । च । धर्तरि ॥४२

“सः सोमः "अग्रे सर्वेषां संमुखं “चेतसा प्राणिनां चेतनेन सह “अह्नां “द्युभिः दीप्तिभिः “अनु “प्र “चेतयते अनुप्रज्ञायते । यद्वा । अह्नामग्रे अग्रभागे। प्रातरित्यर्थः । स्तोतॄणां चेतसा प्रज्ञानेन द्युभिर्दीप्ताभिः स्तुतिभिश्चानु प्र चेतयते । कीदृशः सः । “हरिः हरितवर्णः "हर्यतः कान्तः “मदः मदकरः। किंच “द्वा “जना द्वौ जनौ स्तोतारं यष्टारं च “यातयन् प्रापयन् स्वविहितेन कर्मणा । लौकिकवैदिकौ द्वौ जनौ द्रष्टव्यौ । एवं कुर्वन् “अन्तः द्यावापृथिव्योर्मध्ये “ईयते गच्छति । ‘ ईङ् गतौ ' । किं कुर्वन् । “नराशंसं नरैः शंसनीयम् । मानुषमित्यर्थः । “दैव्यं “च दिवि भवम् उभयविधं धनं “धर्तरि धारके यजमाने प्रेरयन्निति शेषः ॥

अ॒ंजते॒ व्यंजते॒ समंजते॒ क्रतुं॑ रिहन्ति॒ मधुं॑ना॒भ्यंजते ।

सिन्धोंरुच्छ्वा॒से प॒तयंतमु॒क्षणं हिरण्यपा॒वाः प॒शुमांसु गृभ्णते ॥४३

अ॒ञ्जतें । वि । अ॒ञ्ज॒ते॒ । सम् । अ॒ञ्ज॒ते॒ । क्रतुंम् । रि॒ह॒न्ति॒ । मधुंना । अ॒भि । अ॒ञ्ज॒ते॒ ।

सिन्धोः॑ । उ॒त्ऽश्वा॒से । प॒तयंन्तम् । उ॒क्षणंम् । हि॒र॒ण्य॒ऽपा॒वाः । प॒शुम् । आ॒सु॒ । गृ॒भ्ण॒ते॒ ॥४३

अञ्जते । वि । अञ्जते । सम् । अञ्जते । क्रतुम् । रिहन्ति । मधुना । अभि । अञ्जते ।

सिन्धोः । उत्ऽश्वासे । पतयन्तम् । उक्षणम् । हिरण्यऽपावाः । पशुम् । आसु । गृभ्णते ॥४३

सोममृत्विजः “अञ्जते गोभिः । तथा “व्यञ्जते विविधमञ्जन्ति । “समञ्जते सम्यगञ्जन्ति । स्तुत्यर्थत्वादपुनरुक्तिः । तथा “क्रतुं बलकर्तारं “रिहन्ति

लिहन्ति । आस्वादयन्ति देवाः । तथा पुनः “मधुना गव्येन “अभ्यञ्जते । तमेव सोमं “सिन्धोः उदकस्य रसस्याधारभूते “उच्छवासे उच्छ्रिते देशे “पतयन्तं गच्छन्तम् ॥ ‘पत्लृ गतौ ' इत्यस्मात्स्वार्थे णिचि वृद्ध्यभावश्छान्दसः ॥ “उक्षणं सेक्तारं “हिरण्यपावाः हिरण्येन पुनन्तः “पशुं द्रष्टारम् । ‘पशुः पश्यतेः ' (निरु. ३.१६) इति निरुक्तम् । “आसु वसतीवरीषु “गृभ्णते गृह्णन्ति ॥

वि॒प॒श्चिते॒ पव॑मानाय गायत म॒ही न धारात्यन्धो॑ अर्षति ।

अहि॒र्न जू॒र्णामति॑ सर्पति॒ त्वच॒मत्यो॒ न क्रीळ॑न्नसर॒द्वृषा॒ हरि॑ः ॥४४

वि॒प॒ःऽचिते॑ । पव॑मानाय । गा॒य॒त॒ । म॒ही । न । धारा॑ । अति॑ । अन्ध॑ः । अ॒र्ष॒ति॒ ।

अहि॑ः । न । जू॒र्णाम् । अति॑ । स॒र्प॒ति॒ । त्वच॑म् । अत्य॑ः ।
न । क्रीळ॑न् । अ॒स॒र॒त् । वृषा॑ । हरि॑ः ॥४४

विपःऽचिते । पवमानाय । गायत । मही । न । धारा ।
अति । अन्धः । अर्षति ।

अहिः । न । जूर्णाम् । अति । सर्पति । त्वचम् । अत्यः ।
न । क्रीळन् । असरत् । वृषा । हरिः ॥४४

हे ऋत्विजः “विपश्चिते मेधाविने "पवमानाय पूयमानाय “गायत स्तुतिं कुरुत । स च विपश्चित्सोमः “मही “न “धारा महती वर्षधारेव “अन्धः अन्नं रसात्मकम् “अति “अर्षति । “अहिर्न अहिरिव "जूर्णां जीर्णां “त्वचम् “अति “सर्पति अतिमुञ्चति । अभिषवादिकर्मणा त्वचं मुञ्चतीत्यर्थः । तद्वदतिसर्पति धारा दशापवित्रात् । “अत्यो “न अश्व इव “क्रीळन् "असरत् सरति गच्छति द्रोणकलशम् । “वृषा वर्षकः कामानां "हरिः हरितवर्णः रसः ॥

अ॒ग्रे॒गो राजाप्यंस्तविष्यते वि॒माना॒ अह्ना॑ भुवं॑ने॒ष्वर्पि॑तः ।

हरिं॑र्घृ॒तस्नुः॑ सु॒दृशीं॑को अर्ण॒वो ज्यो॒तीरं॑थः पवते रा॒य

ओ॒क्यः॑ ॥४५

अ॒ग्रे॒ऽगः । राजा॑ । अप्यः॑ । त॒वि॒ष्य॒ते॒ । वि॒ऽमानः॑ । अह्ना॑म्

। भुवं॑नेषु । अर्पि॑तः ।

हरिः॑ । घृ॒तऽस्नुः॑ । सु॒ऽदृशीं॑कः । अ॒र्ण॒वः । ज्यो॒तिःऽरं॑थः ।

प॒व॒ते॒ । रा॒ये । ओ॒क्यः॑ ॥४५

अग्रेऽगः । राजा । अप्यः । तविष्यते । विऽमानः । अह्नाम्

। भुवनेषु । अर्पितः ।

हरिः । घृतऽस्नुः । सुऽदृशीकः । अर्णवः । ज्योतिःऽरथः ।

पवते । राये । ओक्यः ॥४५

“अग्रेगः अग्रे गन्ता “राजा राजमानः “अप्यः अप्सु संस्कृतः सोमः "तविष्यते स्तूयते । यः “अह्नां दिनानां “विमानः निर्माता चन्द्रकलाह्रासवृद्ध्यधीनत्वादहर्व्यवहारस्य । “भुवनेषु उदकेषु वसतीवरीसंबन्धिषु “अर्पितः स्थापितः स राजा तविष्यते। किंच “हरिः हरितवर्णः “घृतस्नुः प्रसृतोदकः “सुदृशीकः शोभनदर्शनः “अर्णवः उदकवान् । अर्ण इत्युदकनाम। "ज्योतीरथः ज्योतिर्मयरथः “राये धनस्य प्रापयिता । "ओक्यः । ओक इति निवासनाम । तस्य हितः ॥ ॥ २० ॥

असं॑र्जि स्क॒म्भो दि॒व उद्यं॑तो॒ मद॒ः परिं॑ त्रि॒धातु॒र्भुवं॑नान्यर्षति ।

अं॒शुं रिंहंति म॒तय॒ः पनिंप्नतं गि॒रा यदिं नि॒र्णिजंमृ॒ग्मिणों य॒युः ॥४६

असंर्जि । स्क॒म्भः । दि॒वः । उत्ऽयंतः । मदः॑ । परिं । त्रि॒ऽधातुः॑ । भुवंनानि । अ॒र्ष॒ति॒ ।

अं॒शुम् । रि॒ह॒न्ति॒ । म॒तयः॑ । पनिंप्नतम् । गि॒रा । यदिं । नि॒ःऽनिजंम् । ऋ॒ग्मिणः॑ । य॒युः ॥४६

असर्जि । स्कम्भः । दिवः । उत्ऽयतः । मदः । परि । त्रिऽधातुः । भुवनानि । अर्षति ।

अंशुम् । रिहन्ति । मतयः । पनिप्नतम् । गिरा । यदि । निःऽनिजम् । ऋग्मिणः । ययुः ॥४६

“दिवः द्युलोकस्य "स्कम्भः स्कम्भयिता धारकः “उद्यतः सोमः "असर्जि सृज्यते । अभिषूयते इत्यर्थः । किंच “त्रिधातुः । द्रोणकलशाधवनीयपूतभृदाख्यास्त्रयो धातवो

यस्य स तथोक्तः । तादृशो “भुवनानि उदकानि “अर्षति गच्छति । “अंशुं सोमं “पनिप्नतं शब्दायमानं “मतयः पूजकाः “रिहन्ति लिहन्ति आस्वादयन्ति । कदा। “यदि “निर्णिजं निर्णिक्तम् । यद्वा । निर्णिगिति रूपनाम। रूपवन्तमित्यर्थः । तम् “ऋग्मिणः स्तोतारः “गिरा स्तुत्या “ययुः गच्छन्ति तदा ॥

प्र ते॒ धारा॒ अत्यण्वा॑नि मे॒ष्यः॑ पुना॒नस्य॑ सं॒यतो॑ यन्ति॒ रंह॑यः ।

यद्गोभि॑रिन्दो च॒म्वोः॑ सम॒ज्यस॒ आ सु॑वा॒नः सो॑म क॒लशे॑षु सीदसि ॥४७

प्र । ते॒ । धाराः॑ । अति॑ । अण्वा॑नि । मे॒ष्यः॑ । पु॒ना॒नस्य॑ । स॒म्ऽयतः॑ । य॒न्ति॒ । रंह॑यः ।

यत् । गोभिः॑ । इ॒न्दो॒ इति॑ । च॒म्वोः॑ । स॒म्ऽअ॒ज्यसे॑ । आ ।
सु॒वा॒नः । सो॒म॒ । क॒लशे॑षु । सी॒द॒सि॒ ॥४७

प्र । ते । धाराः । अति । अण्वानि । मेष्यः । पुनानस्य ।
सम्ऽयतः । यन्ति । रंहयः ।

यत् । गोभिः । इन्दो इति । चम्वोः । सम्ऽअज्यसे । आ ।
सुवानः । सोम । कलशेषु । सीदसि ॥४७

“पुनानस्य पूयमानस्य “संयतः संगृह्यमाणाः “रंहयः रंहणस्वभावाः “धाराः मेष्यः “अण्वानि अणूनि लोमानि “अति “यन्ति अतिक्रम्य गच्छन्ति । हे “इन्दो सोम “यत् यदा “गोभिः उदकैः “चम्वोः अधिषवणफलकयोरुपरि “समज्यसे तदानीं हे “सोम “सुवानः सूयमानस्त्वं “कलशेषु “आ “सीदसि ॥

पव॑स्व सोम क्रतु॒विन्न॑ उ॒क्थ्योऽव्यो॒ वारे॒ परि॑ धाव॒ मधु॑ प्रि॒यं ।

ज॒हि विश्वा॑न्र॒क्षस॑ इंदो अ॒त्रिणो॑ बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ ४८

पव॑स्व । सो॒म॒ । क्र॒तु॒ऽवित् । न॒ः । उ॒क्थ्यः॑ । अव्यः॑ । वारे॑ । परि॑ । धा॒व॒ । मधु॑ । प्रि॒यम् ।

ज॒हि । विश्वा॑न् । र॒क्षसः॑ । इ॒न्दो॒ इति॑ । अ॒त्रिणः॑ । बृ॒हत् । व॒दे॒म॒ । वि॒दथे॑ । सु॒ऽवीराः॑ ॥४८

पवस्व । सोम । क्रतुऽवित् । नः । उक्थ्यः । अव्यः । वारे । परि । धाव । मधु । प्रियम् ।

जहि । विश्वान् । रक्षसः । इन्दो इति । अत्रिणः । बृहत् । वदेम । विदथे । सुऽवीराः ॥४८

हे “सोम “नः अस्माकं “ऋतुवित् कर्मज्ञः । स्तुतिज्ञ इत्यर्थः । “उक्थ्यः स्तुत्यः । यतः स्तुत्योऽतः क्रतुविदित्यभिप्रायः । ईदृशस्त्वं नोऽस्माकं यागाय “पवस्व स्रव रसम् । “अव्यो “वारे दशापवित्रे “प्रियं “मधु “परि “धाव परिक्षर । हे “इन्दो दीप्त सोम “अत्रिणः भक्षकान् “विश्वान “रक्षसः "जहि । “सुवीराः सुपुत्रा वयं “विदथे यज्ञे “बृहत् महद्धनं “वदेम उच्चारयेम । याचेमेत्यर्थः । यद्वा प्रभूतं स्तोत्रं वदेम ॥ ॥ २१ ॥

टिप्पणी

९.८६.४ प्र त आश्विनी इति

शैखण्डिनम् (https://sa.wikisource.org/s/2go2)

९.८६.१६ प्रो अयासीद् इति

प्रवद्भार्गवम् (https://sa.wikisource.org/s/1z9z)

यज्ञसारथि (https://sa.wikisource.org/s/2knv)

प्रो अयासीद् इन्दुर् इन्द्रस्य निष्कृतम् इति प्रवद् ऋचा च साम्ना चैतद् अहः प्रणयन्ति। उभौ वर्णौ समृद्ध्यै। प्रेति भृगवः प्रेत्य् अङ्गिरसः प्रेत्य् आदित्या स्वर्गं लोकम् आरोहन्। प्रेत्य् एवैतेन स्वर्गं लोकम् आरोहन्ति॥जै.ब्रा. ३.१८८॥

सप्तम अह -- "प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतम्"इति प्रवत्यो भवन्ति प्रणिनीषेण्यमिव ह्येतदहः– तां.ब्रा.१४.३.४

धर्ता दिविः इति (९.७६.१) उद्वद्भार्गवम् अस्ति

९.८६.१९ वृषा मतीनां इति

यामानि त्रीणि (https://sa.wikisource.org/s/2gtz) (ग्रामगेयः)

यामम् (https://sa.wikisource.org/s/1z9s) (ऊहगानम्)

९.८६.३९ गोवित् पवस्य इति

द्र. गोविन्दोपरि टिप्पणी (http://puranastudy.000space.com/pur_index10/govinda2.htm)

९.८६.४३ अञ्जते व्यञ्जते

ग्रामगेयः ५६४

प्रवर्ग्योपरि टिप्पणी (https://puranastudy.webnode.com/prabhaakara-praagvamsha/pravarg1/)

प्रवर्ग्यशब्दस्य विश्लेषणं एवं संदर्भाः (https://puranastudy.webnode.com/prabhaakara-prasanna/pravargya3/)

मण्डल ९

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.८७

← सूक्तं ९.८६

ऋग्वेदः - मण्डल ९

सूक्तं ९.८७

उशना काव्यः

सूक्तं ९.८८ →

दे. पवमानः सोमः। त्रिष्टुप्।

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।

अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥१॥

स्वायुधः पवते देव इन्दुरशस्तिहा वृजनं रक्षमाणः ।

पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥२॥

ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।

स चिद्विवेद निहितं यदासामपीच्यं गुह्यं नाम गोनाम् ॥३॥

एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।

सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥४॥

एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।

पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः ॥५॥

परि हि ष्मा पुरुहूतो जनानां विश्वासरद्भोजना पूयमानः ।

अथा भर श्येनभृत प्रयांसि रयिं तुञ्जानो अभि वाजमर्ष ॥६॥

एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा ।

तिग्मे शिशानो महिषो न शृङ्गे गा गव्यन्नभि शूरो न सत्वा ॥७॥

एषा ययौ परमादन्तरद्रेः कूचित्सतीरूर्वे गा विवेद ।

दिवो न विद्युत्स्तनयन्त्यभ्रैः सोमस्य ते पवत इन्द्र धारा ॥८॥

उत स्म राशिं परि यासि गोनामिन्द्रेण सोम सरथं पुनानः ।

पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता उपष्टुत् ॥९॥

सायणभाष्यम्

‘प्र तु द्रव' इति नवर्चं द्वितीयं सूक्तं काव्यस्योशनस आर्षमनादेशपरिभाषया त्रैष्टुभं पवमानसोमदेवताकम् । तथा चानुक्रान्तं -- प्र तु नवोशना ' इति । 'जागतमूर्ध्वं प्रागुशनसः' (अनु. ९. ६७) इति वचनाज्जगत्यधिकारो निवृत्तः । गतो विनियोगः ॥

प्र तु द्र॑व॒ परि॒ कोश॒ं नि षी॑द॒ नृभि॑ः पुना॒नो अ॒भि वाज॑मर्ष ।

अश्व॒ं न त्वा॑ वा॒जिन॑ं म॒र्जय॒न्तोऽच्छा॑ ब॒र्ही र॑श॒नाभि॑र्नयंति ॥ १

प्र । तु । द्र॒व॒ । परि॑ । कोश॑म् । नि । सी॒द॒ । नृऽभि॑ः ।
पु॒ना॒नः । अ॒भि । वाज॑म् । अ॒र्ष॒ ।

अश्वं॑म् । न । त्वा॒ । वा॒जिनं॑म् । म॒र्जयं॑न्तः । अच्छं॑ । ब॒र्हिः
। र॒श॒नाभिः॑ । न॒य॒न्ति॒ ॥१

प्र । तु । द्रव । परि । कोशम् । नि । सीद । नृऽभिः ।
पुनानः । अभि । वाजम् । अर्ष ।

अश्वम् । न । त्वा । वाजिनम् । मर्जयन्तः । अच्छ । बर्हिः
। रशनाभिः । नयन्ति ॥१

हे सोम “तु क्षिप्रं “प्र “द्रव प्रगच्छ । गत्वा च "कोशं द्रोणकलशं “परि “नि “षीद निषण्णो भव । “नृभिः नेतृभिः “पुनानः पूयमानः “वाजम् अन्नं यजमानार्थमुद्दिश्य “अभि “अर्ष अभिगच्छ । “वाजिनं बलवन्तम् “अश्वं “न अश्वमिव तं यथा मार्जयन्ति तद्वत् वाजिनं त्वां “मार्जयन्तः शोधयन्तः “बर्हिः यज्ञम् “अच्छ प्रति “रशनाभिः रशनावदायताभिरङ्गुलीभिः “नयन्ति अध्वर्युप्रमुखाः ॥

स्वा॒यु॒धः पं॑वते दे॒व इन्दु॑रशस्ति॒हा वृ॒जनं॒ रक्षं॑माणः ।

पि॒ता दे॒वानां॑ जनि॒ता सु॒दक्षो॑ विष्ट॒म्भो दि॒वो ध॒रुणः॑ पृथि॒व्याः ॥२

सु॒ऽआ॒यु॒धः । प॒व॒ते॒ । दे॒वः । इन्दुः॑ । अ॒श॒स्ति॒ऽहा । वृ॒जनं॑म् । रक्षं॑माणः ।

पि॒ता । दे॒वानां॑म् । ज॒नि॒ता । सु॒ऽदक्षः॑ । वि॒ष्ट॒म्भः । दि॒वः । ध॒रुणः॑ । पृ॒थि॒व्याः ॥२

सुऽआयुधः । पवते । देवः । इन्दुः । अशस्तिऽहा । वृजनम् । रक्षमाणः ।

पिता । देवानाम् । जनिता । सुऽदक्षः । विष्टम्भः । दिवः । धरुणः । पृथिव्याः ॥२

“स्वायुधः शोभनायुधः “इन्दुः सोमः “देवः “पवते । स च देवः “अशस्तिहा रक्षोहा “वृजनम् उपद्रवं “रक्षमाणः “पिता पालकः “देवानां तथा “जनिता उत्पादकः “सुदक्षः सुबलः “दिवः “विष्टम्भः विशेषेण स्तम्भयिता “पृथिव्याः च “धरुण धारकः । एवंमहानुभावः पवते ॥

ऋषि॒र्विप्रः॑ पुरए॒ता जना॑नामृ॒भुर्धीर॑ उ॒शना॒ काव्ये॑न ।

स चि॑द्विवेद॒ निहि॑तं॒ यदा॑सामपी॒च्यं१॒ गुह्यं॒ नाम॒ गोना॑ं ॥३

ऋषिः॑ । विप्रः॑ । पु॒रः॒ऽए॒ता । जना॑नाम् । ऋ॒भुः । धीरः॑ । उ॒शना॑ । काव्ये॑न ।

सः । चि॒त् । वि॒वे॒द॒ । निऽहि॑तम् । यत् । आ॒सा॒म् । अ॒पी॒च्य॑म् । गुह्य॑म् । नाम॑ । गोना॑म् ॥३

ऋषिः । विप्रः । पुरःऽएता । जनानाम् । ऋभुः । धीरः । उशना । काव्येन ।

सः । चित् । विवेद । निऽहितम् । यत् । आसाम् । अपीच्यम् । गुह्यम् । नाम । गोनाम् ॥३

“ऋषिः अतीन्द्रियद्रष्टा “विप्रः मेधावी “पुरएता पुरतो गन्ता “जनानां मनुष्याणाम् “ऋभुः उरु भासमानः “धीरः धीमान् "उशना एतन्नामर्षिः यः “स “चित् स एव “काव्येन कवित्वेन स्तोत्रेण “विवेद लभते । किम् । “यदासां “गोनां गवाम् “अपीच्यम् । अन्तर्हितनामैतत् । अन्तर्हितं “गुह्यं गोपनीयं “नाम नामकमुदकं पयोलक्षणम् ॥

ए॒ष स्य ते॒ मधु॑माँ इन्द्र॒ सोमो॒ वृषा॒ वृष्णे॒ परि॑ प॒वित्रे॑ अक्षाः ।

स॒ह॒स्र॒साः श॑त॒सा भू॑रि॒दावा॑ शश्वत्त॒मं ब॒र्हिरा वा॒ज्य॑स्थात् ॥ ४

ए॒षः । स्यः । ते॒ । मधु॑ऽमान् । इ॒न्द्र॒ । सोमः॑ । वृषा॑ । वृष्णे॑ । परि॑ । प॒वित्रे॑ । अ॒क्षा॒रिति॑ ।

स॒ह॒स्र॒ऽसाः । श॒त॒ऽसाः । भू॒रि॒ऽदावा॑ । श॒श्व॒त्ऽत॒मम् । ब॒र्हिः । आ । वा॒जी । अ॒स्था॒त् ॥४

एषः । स्यः । ते । मधुऽमान् । इन्द्र । सोमः । वृषा । वृष्णे । परि । पवित्रे । अक्षारिति ।

सहस्रऽसाः । शतऽसाः । भूरिऽदावा । शश्वत्ऽतमम् । बर्हिः । आ । वाजी । अस्थात् ॥४

हे “इन्द्र “वृष्णे वर्षकाय “ते तुभ्यम् “एष “स्यः सः “सोमः “मधुमान् माधुर्योपेतः “वृषा वर्षकः “पवित्रे “परि “अक्षाः परिक्षरति । क्षरतेर्लुङि रूपम् । स एव “सहस्रसाः

सहस्रसंख्याकधनस्य दाता “शतसाः शतसंख्याकस्य दाता “भूरिदावा ततोऽपि भूरेर्दाता “वाजी बलवान् “शश्वत्तमं नित्यं “बर्हिः यज्ञम् “आ “अस्थात् अतिष्ठति ॥

ए॒ते सोमा॑ अ॒भि ग॒व्या स॒हस्रा॑ म॒हे वाजा॑या॒मृता॑य॒ श्रवां॑सि ।

प॒वित्रे॑भि॒ः पव॑माना असृग्रंछ्र॒व॒स्यवो॒ न पृं॑त॒नाजो॒ अत्याः॑ ॥ ५

ए॒ते । सोमाः॑ । अ॒भि । ग॒व्या । स॒हस्रा॑ । म॒हे । वाजा॑य । अ॒मृता॑य । श्रवां॑सि ।

प॒वित्रे॑भिः । पव॑मानाः । अ॒सृ॒ग्र॒न् । श्र॒व॒स्यवः॑ । न । पृ॒त॒नाजः॑ । अत्याः॑ ॥५

एते । सोमाः । अभि । गव्या । सहस्रा । महे । वाजाय । अमृताय । श्रवांसि ।

पवित्रेभिः । पवमानाः । असृग्रन् । श्रवस्यवः । न । पृतनाजः । अत्याः ॥५

“एते “सोमाः “गव्या गव्यानि “सहस्रा सहस्राणि “श्रवांसि अन्नानि आशिरलक्षणानि लक्षीकृत्य "पवित्रेभिः पवित्रच्छिद्रैः “पवमानाः पूयमानाः “महे महते “वाजाय अन्नाय “अमृताय अमृतत्वाय “अभि “असृग्रन् सृज्यन्ते । किमिव । “श्रवस्यवः अन्नेच्छवः “पृतनाजः सेनाजेतारः “अत्याः “न अश्वा इव ॥ ॥ २२ ॥

परि॒ हि ष्मां पुरुहू॒तो जनां॑ना॒ं विश्वास॑र॒द्भोज॑ना पू॒यमा॑नः ।

अथा भ॑र श्येनभृत॒ प्रयां॑सि र॒यिं तुंजा॑नो अ॒भि वाजं॑मर्ष ॥ ६

परिं । हि । स्म॒ । पु॒रु॒ऽहू॒तः । जना॑नाम् । विश्वा॑ । अस॑रत् । भोजं॑ना । पू॒यमा॑नः ।

अथं । आ । भ॒र॒ । श्ये॒न॒ऽभृ॒त॒ । प्रयां॑सि । र॒यिम् । तुञ्जा॑नः । अ॒भि । वाज॑म् । अ॒र्ष॒ ॥६

परि । हि । स्म । पुरुऽहूतः । जनानाम् । विश्वा । असरत् । भोजना । पूयमानः ।

अथ । आ । भर । श्येनऽभृत । प्रयांसि । रयिम् । तुञ्जानः । अभि । वाजम् । अर्ष ॥६

अयं “परि “असरत् परिसरति “जनानाम् अर्थाय “विश्वा सर्वाणि “भोजना भोजनान्यन्नानि धनानि वा । कीदृशः। “पुरुहूतः बहुभिराहूतः “पूयमानः शोध्यमानः । अथ

प्रत्यक्षकृतः । “अथ इदानीं हे “श्येनभृत श्येनेनाहृत सोम त्वं “प्रयांसि अन्नानि “आ “भर आहर । “रयिं धनं “तुञ्जानः ददानः “वाजम् अन्नं रसम् “अभि "अर्ष अभिगच्छ ॥

एषु सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा ।

तिग्मे शिशानो महिषो न शृङ्गे गा गव्यन्नभि शूरो न सत्वा ॥७

एषः । सुवानः । परि । सोमः । पवित्रे । सर्गः । न । सृष्टः । अदधावत् । अर्वा ।

तिग्मे इति । शिशानः । महिषः । न । शृङ्गे इति । गाः । गव्यन् । अभि । शूरः । न । सत्वा ॥७

एषः । सुवानः । परि । सोमः । पवित्रे । सर्गः । न । सृष्टः । अदधावत् । अर्वा ।

तिग्मे इति । शिशानः । महिषः । न । शृङ्गे इति । गाः । गव्यन् । अभि । शूरः । न । सत्वा ॥७

"एष "सुवानः सूयमानः "अर्वा अरणकुशलः “सोमः “सर्गो “न "सृष्टः विसृष्टोऽश्व इव "पवित्रे “परि “अदधावत् परिधावति । किंच “तिग्मे तीक्ष्णे “शृङ्गे “शिशानः तीक्ष्णीकुर्वन् “महिषो “न महान् महिषाख्यो मृग इव । तथान्यदृष्टान्तः। “गा “गव्यन् प्रभूता गा इच्छन् "शूरो “न शूर इव । एतौ महिषशूरौ यथा प्रतिबुद्धौ शीघ्रं धावतः तद्वत् “सत्वा सदनशीलोऽयं गच्छतीति शेषः ॥

ए॒षा य॑यौ पर॒माद॒न्तरद्रेः॒ कूचि॑त्स॒तीरू॒र्वे॑ गा वि॑वेद ।

दि॒वो न वि॒द्युत्स्त॒नयं॑त्य॒भ्रैः सोमं॑स्य ते पवत इन्द्र॒ धारा॑ ॥८

ए॒षा । आ । य॒यौ॒ । प॒र॒मात् । अ॒न्तः । अद्रेः॑ । कूऽचि॑त् ।
स॒तीः । ऊ॒र्वे । गाः । वि॒वे॒द॒ ।

दि॒वः । न । वि॒ऽद्युत् । स्त॒नयं॑न्ती । अ॒भ्रैः । सोमं॑स्य । ते॒ ।
प॒व॒ते॒ । इ॒न्द्र॒ । धारा॑ ॥८

एषा । आ । ययौ । परमात् । अन्तः । अद्रेः । कूऽचित् ।
सतीः । ऊर्वे । गाः । विवेद ।

दिवः । न । विऽद्युत् । स्तनयन्ती । अभ्रैः । सोमस्य । ते ।
पवते । इन्द्र । धारा ॥८

“एषा सोमधारा “परमात् उच्छ्रितात् स्थानात् “ययौ जगाम
पात्रं स्वयंप्राप्तव्यं देशं वा । किंच "अद्रेः पणीनां
निवासस्थानस्य पर्वतस्य “अन्तः “कूचित् क्वचित्
कुत्रचिद्गूढे “ऊर्वे देशे “सतीः वर्तमानाः पणिभिरपहृताः

"गाः “विवेद लब्धवती । यत्र पणयो गा अपहृत्य स्थापितवन्तः स देश ऊर्वः। 'ऊर्वं गव्यं महि गृणानः' (ऋ. सं. ६,१७,१) इति हि मन्त्रान्तरम् । “दिवो “न “विद्युत् दिवः सकाशाद्विद्युदिव “स्तनयन्ती शब्दयन्ती । विद्युत् विशेष्यते । “अभ्रैः प्रेरितेति शेषः । सा यथा शब्दं करोति तद्वच्छब्दं कुर्वती । “सोमस्य संबन्धिनी सेयं “धारा हे “इन्द्र “ते त्वदर्थं त्वत्पानाय "पवते पूयते । क्षरति वा ॥

उ॒त स्मं रा॒शिं परिं यासि॒ गोना॒मिन्द्रें॑ण सोम स॒रथं॑ पुना॒नः ।

पू॒र्वीरिषों बृह॒तीर्जीरंदानो॒ शिक्षां शचीव॒स्तव॒ ता उं॑प॒ष्टुत् ॥ ९

उ॒त । स्म॒ । रा॒शिम् । परिं । या॒सि॒ । गोनां॑म् । इन्द्रें॑ण । सो॒म॒ । स॒ऽरथं॑म् । पु॒ना॒नः ।

पू॒र्वीः । इषः॑ । बृ॒ह॒तीः । जी॒र॒दा॒नो॒ इति॑ जीर॑ऽदानो । शिक्ष॑
। श॒ची॒ऽवः॒ । तव॑ । ताः । उ॒प॒ऽस्तुत् ॥९

उत । स्म । राशिम् । परि । यासि । गोनाम् । इन्द्रेण ।
सोम । सऽरथम् । पुनानः ।

पूर्वीः । इषः । बृहतीः । जीरदानो इति जीरऽदानो । शिक्ष
। शचीऽवः । तव । ताः । उपऽस्तुत् ॥९

"उत "स्म अपि च खलु हे "सोम "पुनानः पूयमानः "गोनां गवां "राशिं समूहं पणिभिरपहृतं "परि "यासि परिगच्छसि । कथंभूतः सन् उच्यते । "इन्द्रेण सह "सरथम् एकमेव रथमास्थाय । हे "जीरदानो क्षिप्रदान सोम "उपस्तुत् उपस्तूयमानस्त्वं "पूर्वीः बह्वीः "बृहतीः महतीः "इषः उक्तलक्षणान्यन्नानि "शिक्ष देहि । हे "शचीवः अन्नवन् "ताः इषः "तव स्वभूता इति शेषः ॥ ॥२३॥

टिप्पणी

उशना उपरि आरम्भिक टिप्पणी (https://sites.google.com/view/puranic-subject-index/uluuka-ushaa/ushanaa)

९.८७.१ प्र तु द्रव इति

औशनम् (https://sa.wikisource.org/s/1z6o)

मण्डल ९

सूक्तं १.११
सूक्तं १.१२
सूक्तं १.१३
सूक्तं १.१४
सूक्तं १.१५
सूक्तं १.१६
सूक्तं १.१७
सूक्तं १.१८
सूक्तं १.१९
सूक्तं १.२०
सूक्तं १.२१
सूक्तं १.४१
सूक्तं १.४२
सूक्तं १.४३
सूक्तं १.४४
सूक्तं १.४५
सूक्तं १.४६
सूक्तं १.४७
सूक्तं १.४८
सूक्तं १.४९
सूक्तं १.५०
सूक्तं १.५१
सूक्तं १.७१
सूक्तं १.७२
सूक्तं १.७३
सूक्तं १.७४
सूक्तं १.७५
सूक्तं १.७६
सूक्तं १.७७
सूक्तं १.७८
सूक्तं १.७९
सूक्तं १.८०
सूक्तं १.८१
सूक्तं १.१०१
सूक्तं १.१०२
सूक्तं १.१०३
सूक्तं १.१०४
सूक्तं १.१०५
सूक्तं १.१०६
सूक्तं १.१०७
सूक्तं १.१०८
सूक्तं १.१०९
सूक्तं १.११०
सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.८८

ऋग्वेदः - मण्डल ९
← सूक्तं ९.८७
सूक्तं ९.८९ →

सूक्तं ९.८८
उशना काण्वः।

दे. पवमानः सोमः। त्रिष्टुप्।

अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।

त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥१॥

स ईं रथो न भुरिषाळयोजि महः पुरूणि सातये वसूनि ।

आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥२॥

वायुर्न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शम्भविष्ठः ।

विश्ववारो द्रविणोदा इव त्मन्पूषेव धीजवनोऽसि सोम ॥३॥

इन्द्रो न यो महा कर्माणि चक्रिर्हन्ता वृत्राणामसि सोम पूर्भित् ।

पैद्वो न हि त्वमहिनाम्नां हन्ता विश्वस्यासि सोम दस्योः ॥४॥

अग्निर्न यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु ।

जनो न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिम् ॥५॥

एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः ।

वृथा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ॥६॥

शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।

आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ॥७॥

राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।

शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥८॥

सायणभाष्यम्

'अयं सोमः' इत्यष्टर्चं तृतीयं सूक्तम् । ऋष्याद्याः पूर्ववत् । अयं सोमोऽष्टौ ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

अ॒यं सोम॑ इन्द्र॒ तुभ्यं॑ सुन्वे॒ तुभ्यं॑ पवते॒ त्वम॑स्य पाहि ।

त्वं ह॒ यं च॑कृ॒षे त्वं व॑वृ॒ष इन्दुं॒ मदा॑य॒ युज्या॑य॒ सोमं॑ ॥१

अ॒यम् । सोमः॑ । इ॒न्द्र॒ । तुभ्य॑म् । सु॒न्वे॒ । तुभ्य॑म् । प॒व॒ते॒ । त्वम् । अ॒स्य॒ । पा॒हि॒ ।

त्वम् । ह॒ । यम् । च॒कृ॒षे । त्वम् । व॒वृ॒षे । इन्दु॑म् । मदा॑य । युज्या॑य । सोम॑म् ॥१

अयम् । सोमः । इन्द्र । तुभ्यम् । सुन्वे । तुभ्यम् । पवते । त्वम् । अस्य । पाहि ।

त्वम् । ह । यम् । चकृषे । त्वम् । ववृषे । इन्दुम् । मदाय । युज्याय । सोमम् ॥१

हे “इन्द्र "अयं “सोमः “तुभ्यं त्वदर्थं "सुन्वे सूयते ॥ सुनोतेः कर्मार्थे लटि ‘ लोपस्त आत्मनेपदेषु' इति तलोपः ॥ “तुभ्यं त्वदर्थमेव “पवते पूयते । “त्वं च "अस्य अमुं "पाहि पिब । “त्वं “ह “यम् “इन्दुं “सोमं “चकृषे करोषि । “त्वं च यं “ववृषे वृतवानसि । किमर्थम् । "मदाय “युज्याय सहायाय । सोम इन्द्राय बलकरत्वात् सहाय इति प्रसिद्धम् । यमेवं करोषि त्वं तं पाहीति समन्वयः।।

स ईं॒ रथो॒ न भु॑रि॒षाळ॑योजि म॒हः पु॒रूणि॑ सा॒तये॒ वसू॑नि ।

आदीं॒ विश्वा॒ नहु॒ष्या॑णि जा॒ता स्व॑र्षाता॒ वन॑ ऊ॒र्ध्वा न॑वन्त ॥ २

सः । ई॒मिति॑ । रथः॑ । न । भु॒रि॒षाट् । अ॒यो॒जि॒ । म॒हः । पु॒रूणि॑ । सा॒तये॑ । वसू॑नि ।

आत् । ई॒मिति॑ । विश्वा॑ । न॒हु॒ष्या॑णि । जा॒ता । स्वः॑ऽसाता । वने॑ । ऊ॒र्ध्वा । न॒व॒न्त॒ ॥२

सः । ईमिति । रथः । न । भुरिषाट् । अयोजि । महः । पुरूणि । सातये । वसूनि ।

आत् । ईमिति । विश्वा । नहुष्याणि । जाता । स्वःऽसाता । वने । ऊर्ध्वा । नवन्त ॥२

“स “ईं सोऽयं सोमः “भुरिषाट् भूरिभारस्य सोढा “रथो “न रथ इव भुरिषाट् प्रभूतस्य भारस्य सोढा “अयोजि युज्यते । कीदृशः सः । “महः महान् । किमर्थमयोजि । “पुरूणि बहूनि “वसूनि धनानि “सातये अस्मभ्यं दातुम् । “आदीं योगानन्तरं “विश्वा विश्वानि सर्वाणि नहुष्याणि । नहुषो

मनुष्याः । तेषां संबन्धीनि “जाता जातान्यस्मद्विरोधीनि “ऊर्ध्वा उन्मुखानि “वने वननीये “स्वर्षाता स्वर्षातौ । संग्रामनामैतत् । स्वर्गलाभयुक्ते संग्रामे “नवन्त गच्छन्तु । नवतिर्गतिकर्मा । यद्वा। सोमं संग्रामे युद्धार्थिनः संगच्छन्ति ॥

वा॒युर्न यो नि॒युत्वाँ॑ इ॒ष्टया॑मा॒ नास॑त्येव॒ हव॒ आ शम्भं॑वि॒ष्ठः ।

वि॒श्ववा॑रो द्रवि॒णो॒दा इं॑व॒ त्मन्पू॒षेवं॑ धी॒जवं॑नोऽसि सोम ॥३

वा॒युः । न । यः । नि॒युत्वा॑न् । इ॒ष्टऽया॑मा । नास॑त्याऽइव । हवें । आ । शम्ऽभं॑वि॒ष्ठः ।

वि॒श्वऽवा॑रः । द्र॒वि॒णो॒दाःऽइं॑व । त्मन् । पू॒षाऽइं॑व । धी॒ऽजवं॑नः । अ॒सि॒ । सो॒म॒ ॥३

वायुः । न । यः । नियुत्वान् । इष्टऽयामा । नासत्याऽइव । हवे । आ । शम्ऽभविष्ठः ।

विश्वऽवारः । द्रविणोदाःऽइव । त्मन् । पूषाऽइव । धीऽजवनः । असि । सोम ॥३

“यः सोमः “नियुत्वान् । नियुतो वायोरश्वाः । तद्वान् “वायुर्न वायुरिव “इष्टयामा इष्टगमनः । “नासत्येव अश्विनाविव “हवम् आह्वानमाकर्ण्य “आ सर्वतः “शंभविष्ठः सुखस्य भावयितृतमः । “द्रविणोदाइव धनदातेव' “त्मन् आत्मनि “विश्ववारः विश्वैर्वरणीयो भवति तद्वद्विश्ववारोऽसि । “पूषेव पोषकः सवितेव “धीजवनः मनोवेगः “असि । यद्वा कर्मणां प्रवर्तयितासि हे “सोम ॥

इन्द्रो॒ न यो म॒हा कर्मा॑णि॒ चक्रि॑र्ह॒न्ता वृ॒त्राणा॑मसि सोम पू॒र्भित् ।

पै॒द्वो न हि त्वमहिंनाम्नां ह॒न्ता विश्वं॑स्यासि सोम॒ दस्योः॑ ॥
४

इन्द्रः॑ । न । यः । म॒हा । कर्मा॑णि । चक्रिः॑ । ह॒न्ता ।
वृ॒त्राणां॑म् । अ॒सि॒ । सो॒म॒ । पूः॒ऽभित् ।

पै॒द्वः । न । हि । त्वम् । अहिं॑ऽनाम्नाम् । ह॒न्ता । विश्वं॑स्य ।
अ॒सि॒ । सो॒म॒ । दस्योः॑ ॥४

इन्द्रः । न । यः । महा । कर्माणि । चक्रिः । हन्ता ।
वृत्राणाम् । असि । सोम । पूःऽभित् ।

पैद्वः । न । हि । त्वम् । अहिऽनाम्नाम् । हन्ता । विश्वस्य ।
असि । सोम । दस्योः ॥४

“इन्द्रो “न इन्द्र इव “यः त्वं “महा महान्ति “कर्माणि “चक्रिः ताच्छील्येन करोषि स त्वं हे “सोम “वृत्राणां शत्रूणां “हन्ता “असि भवसि । तथा “पूर्भित् पुरां भेत्तासि । किंच “पैद्वो

“न अश्व इव खलु “अहिनाम्नां “हन्ता भवसि । आगत्य हन्तीत्यहिः । तन्नामकानामित्यर्थः । न केवलं तेषामेव अपि तु “विश्वस्य अपि सर्वस्यापि "दस्योः उपक्षपयितुः शत्रोर्हन्ता असि ॥

अ॒ग्निर्न यो वन॒ आ सृ॒ज्यमा॑नो॒ वृथा॒ पाजां॑सि कृणुते न॒दीषु॑ ।

जनो॒ न युध्वा॑ मह॒त उ॑प॒ब्दिरिय॑र्ति॒ सोम॒ः पव॑मान ऊ॒र्मिं ॥५

अ॒ग्निः । न । यः । वने॑ । आ । सृ॒ज्यमा॑नः । वृथा॑ । पाजां॑सि । कृ॒णु॒ते॒ । न॒दीषु॑ ।

जन॑ः । न । युध्वा॑ । म॒ह॒तः । उ॒प॒ब्दिः । इय॑र्ति । सोम॑ः । पव॑मानः । ऊ॒र्मिम् ॥५

अग्निः । न । यः । वने । आ । सृज्यमानः । वृथा । पाजांसि । कृणुते । नदीषु ।

जनः । न । युध्वा । महतः । उपब्दिः । इयर्ति । सोमः । पवमानः । ऊर्मिम् ॥५

“अग्निर्न अग्निरिव “यः सोमः “वने अरण्ये “आ “सृज्यमानः वनसंबन्ध्यग्निर्यथा बलानि कुरुते' एवं यः सोमः “वृथा अनायासेन “नदीषु आन्तरिक्षाणि “पाजांसि “कृणुते कुरुते । किंच “युध्वा युद्धस्य कत “जनो “न शूरो मनुष्य इव “महतः शत्रोः "उपब्दिः । वाङ्नामैतत् । शब्दयिता सन् "पवमानः पूयमानः “सोमः “ऊर्मिं प्रवृद्धं रसम् “इयर्ति प्रेरयति ।।

ए॒ते सोमा॒ अति॒ वारा॒ण्यव्यां दि॒व्या न कोशांसो अ॒भ्रवंर्षाः ।

वृथा॑ समु॒द्रं सिन्ध॑वो॒ न नीची॑ः सु॒तासो॑ अ॒भि क॒लशाँ॑ असृग्रन् ॥६

ए॒ते । सोमा॑ः । अति॑ । वारा॑णि । अव्या॑ । दि॒व्या । न । कोशा॑सः । अ॒भ्रऽव॑र्षाः ।

वृथा॑ । स॒मु॒द्रम् । सिन्ध॑वः । न । नीची॑ः । सु॒तास॑ः । अ॒भि । क॒लशा॑न् । अ॒सृ॒ग्र॒न् ॥६

एते । सोमाः । अति । वाराणि । अव्या । दिव्या । न । कोशासः । अभ्रऽवर्षाः ।

वृथा । समुद्रम् । सिन्धवः । न । नीचीः । सुतासः । अभि । कलशान् । असृग्रन् ॥६

“एते पूयमानाः “सोमाः “अव्या अविमयानि “वाराणि वालानि “अति गच्छन्तीति शेषः । तत्र दृष्टान्तः । “दिव्या “न “कोशासः दिवि भवाः कोशा आप इव । ता विशेष्यन्ते

। “अभ्रवर्षाः अभ्रैर्वृष्यमाणाः । किंच “वृथा अनायासेन “समुद्रं “सिन्धवो “न नद्य इव “नीचीः नीचीनाग्राः “सुतासः अभिषुताः सोमाः “कलशान् “अभि “असृग्रन् अभिगच्छन्ति ॥

शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।

आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ॥७

शुष्मी । शर्धः । न । मारुतम् । पवस्व । अनभिऽशस्ता । दिव्या । यथा । विट् ।

आपः । न । मक्षु । सुऽमतिः । भव । नः । सहस्रऽअप्साः । पृतनाषाट् । न । यज्ञः ॥७

शुष्मी । शर्धः । न । मारुतम् । पवस्व । अनभिऽशस्ता । दिव्या । यथा । विट् ।

आपः । न । मक्षु । सुऽमतिः । भव । नः । सहस्रऽअप्साः । पृतनाषाट् । न । यज्ञः ॥७

हे सोम “शुष्मी । शुष्मं बलं शोषणात् । बलवांस्त्वं “मारुतं “शर्धो “न मरुतां बलमिव “पवस्व । तत्र दृष्टान्तमेव स्पष्टयति । “यथा "दिव्या "विट् प्रजा "अनभिशस्ता । अभिशासो निन्दा । अनिन्दिता पवते । ‘ मरुतो वै देवानां विशः '(तै. सं. २. २. ५, ७) इति हि ब्राह्मणम् । किंच “आपो “न उदकानीव “मक्षु क्षिप्रं पवमानस्त्वं "सुमतिः “भव “नः अस्माकम् । किंच “सहस्राप्साः। अप्स इति रूपनाम । बहुरूपस्त्वं “पृतनाषाट् पृतनानामभिभवितेन्द्र इव "यज्ञः यष्टव्यो भवसीति ॥

राज्ञो॒ नु ते॒ वरु॑णस्य व्र॒तानि॑ बृ॒हद्ग॑भी॒रं तव॑ सोम॒ धाम॑ ।

शुचि॒ष्ट्वम॑सि प्रि॒यो न मि॒त्रो द॒क्षाय्यो॑ अर्य॒मेवा॑सि सोम ॥८

राज्ञः॑ । नु । ते॒ । वरु॑णस्य । व्र॒तानि॑ । बृ॒हत् । ग॒भी॒रम् । तव॑ । सो॒म॒ । धाम॑ ।

शुचिः॑ । त्वम् । अ॒सि॒ । प्रि॒यः । न । मि॒त्रः । द॒क्षाय्यः॑ । अ॒र्य॒माऽइ॑व । अ॒सि॒ । सो॒म॒ ॥८

राज्ञः । नु । ते । वरुणस्य । व्रतानि । बृहत् । गभीरम् । तव । सोम । धाम ।

शुचिः । त्वम् । असि । प्रियः । न । मित्रः । दक्षाय्यः । अर्यमाऽइव । असि । सोम ॥८

हे “सोम “वरुणस्य वारकस्य “ते तव “व्रतानि कर्माणि "नु क्षिप्रं करोमीति शेषः । हे “सोम “तव “धाम तेजःस्थानं “बृहत् महत् “गभीरं च । “प्रियः “मित्रः इव “त्वं “शुचिः दीप्तः शुद्धो वा “असि । “अर्यमेव अर्यमा देव इव त्वं “दक्षाय्यः “असि ॥ ॥ २४ ॥

मण्डल ९

सूक्तं ९.१	सूक्तं ९.३१	सूक्तं ९.६१	सूक्तं ९.९१
सूक्तं ९.२	सूक्तं ९.३२	सूक्तं ९.६२	सूक्तं ९.९२
सूक्तं ९.३	सूक्तं ९.३३	सूक्तं ९.६३	सूक्तं ९.९३
सूक्तं ९.४	सूक्तं ९.३४	सूक्तं ९.६४	सूक्तं ९.९४
सूक्तं ९.५	सूक्तं ९.३५	सूक्तं ९.६५	सूक्तं ९.९५
सूक्तं ९.६	सूक्तं ९.३६	सूक्तं ९.६६	सूक्तं ९.९६
सूक्तं ९.७	सूक्तं ९.३७	सूक्तं ९.६७	सूक्तं ९.९७
सूक्तं ९.८	सूक्तं ९.३८	सूक्तं ९.६८	सूक्तं ९.९८
सूक्तं ९.९	सूक्तं ९.३९	सूक्तं ९.६९	सूक्तं ९.९९
सूक्तं ९.१०	सूक्तं ९.४०	सूक्तं ९.७०	सूक्तं ९.१००

सूक्तं १.३१सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.३२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.३३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.३४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.३५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.३६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.३७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.३८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.३९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं ९.२२सूक्तं ९.५२सूक्तं ९.८२सूक्तं ९.११२

सूक्तं ९.२३सूक्तं ९.५३सूक्तं ९.८३सूक्तं ९.११३

सूक्तं ९.२४सूक्तं ९.५४सूक्तं ९.८४सूक्तं ९.११४

सूक्तं ९.२५सूक्तं ९.५५सूक्तं ९.८५

सूक्तं ९.२६सूक्तं ९.५६सूक्तं ९.८६

सूक्तं ९.२७सूक्तं ९.५७सूक्तं ९.८७

सूक्तं ९.२८सूक्तं ९.५८सूक्तं ९.८८

सूक्तं ९.२९सूक्तं ९.५९सूक्तं ९.८९

सूक्तं ९.३०सूक्तं ९.६०सूक्तं ९.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.८९

← सूक्तं ९.८८

ऋग्वेदः - मण्डल ९

सूक्तं ९.८९

उशना काव्यः

सूक्तं ९.९० →

दे. पवमानः सोमः। त्रिष्टुप्

प्रो स्य वह्निः पथ्याभिरस्यान्दिवो न वृष्टिः पवमानो अक्षाः ।

सहस्रधारो असदन्न्यस्मे मातुरुपस्थे वन आ च सोमः ॥१॥

राजा सिन्धूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठाम् ।

अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जाम् ॥२॥

सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम् ।

शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ॥३॥*

मधुपृष्ठं घोरमयासमश्वं रथे युञ्जन्त्युरुचक्र ऋष्वम् ।

स्वसार ईं जामयो मर्जयन्ति सनाभयो वाजिनमूर्जयन्ति ॥४॥

चतस्र ईं घृतदुहः सचन्ते समाने अन्तर्धरुणे निषत्ताः ।

ता ईमर्षन्ति नमसा पुनानास्ता ईं विश्वतः परि षन्ति पूर्वीः ॥५॥

विष्टम्भो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य ।

असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इन्द्रियाय ॥६॥

वन्वन्नवातो अभि देववीतिमिन्द्राय सोम वृत्रहा पवस्व ।

शग्धि महः पुरुश्चन्द्रस्य रायः सुवीर्यस्य पतयः स्याम ॥७॥

सायणभाष्यम्

‘प्रो स्य वह्निः' इति सप्तर्चं चतुर्थं सूक्तम् । ऋष्याद्याः पूर्ववत् । ‘प्रो स्य सप्त' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्रो स्य वह्निः॑ प॒थ्या॑भिरस्या॑न्दि॒वो न वृ॒ष्टिः पव॑मानो अक्षाः ।

स॒हस्र॑धारो असद॒न्न्य१॒॑स्मे मा॒तुरु॒पस्थे॒ वन॒ आ च॒ सोमः॑ ॥ १

प्रो इति॑ । स्यः । वह्निः॑ । प॒थ्या॑भिः । अ॒स्या॒न् । दि॒वः । न । वृ॒ष्टिः । पव॑मानः । अ॒क्षा॒रिति॑ ।

स॒हस्र॑ऽधारः । अ॒स॒द॒त् । नि । अ॒स्मे इति॑ । मा॒तुः । उ॒पऽस्थे॑ । वने॑ । आ । च॒ । सोमः॑ ॥१

प्रो इति । स्यः । वह्निः । पथ्याभिः । अस्यान् । दिवः । न । वृष्टिः । पवमानः । अक्षारिति ।

सहस्रऽधारः । असदत् । नि । अस्मे इति । मातुः ।
उपऽस्थे । वने । आ । च । सोमः ॥१

प्र ऊ इति निपातद्वयसमुदाय एको निपातितः । “प्रो “अस्यान् प्रस्यन्दते “स्यः सः “वह्निः वोढा “पथ्याभिः यज्ञमार्गैः । “दिवो “न “वृष्टिः दिवः सकाशात् वृष्टिरिव “पवमानः पूयमानः सन् "अक्षाः व्याप्नोषि । सोऽयं “सोमः “सहस्रधारः बहुधारः सन् “अस्मे अस्मासु “नि “असदत् निषीदति ॥

राजा॒ सिंधूं॑नामवसिष्ट॒ वास॑ ऋ॒तस्य॒ नाव॒मारु॑ह॒द्रजिं॑ष्ठां ।

अ॒प्सु द्र॒प्सो वां॑वृधे श्ये॒नजूं॑तो दु॒ह ईं॑ पि॒ता दु॒ह ईं॑ पि॒तुर्जां ॥
२

रा॒जा॑ । सिन्धू॑नाम् । अ॒व॒सि॒ष्ट॒ । वासः॑ । ऋ॒तस्य॑ । नाव॑म् । आ । अ॒रु॒ह॒त् । रजि॑ष्ठाम् ।

अ॒प्ऽसु । द्र॒प्सः । व॒वृ॒धे॒ । श्ये॒नऽजू॑तः । दु॒हे । ई॒म् । पि॒ता । दु॒हे । ई॒म् । पि॒तुः । जाम् ॥२

राजा । सिन्धूनाम् । अवसिष्ट । वासः । ऋतस्य । नावम् । आ । अरुहत् । रजिष्ठाम् ।

अप्ऽसु । द्रप्सः । ववृधे । श्येनऽजूतः । दुहे । ईम् । पिता । दुहे । ईम् । पितुः । जाम् ॥२

अयं “राजा सोमः “सिन्धूनाम् उदकानां क्षीरादिस्यन्दिनीनां गवां वा “वासः वसनस्थानीयं क्षीराख्यं श्रयणद्रव्यम् “अवसिष्ट आच्छादयति । तथा कृत्वा “रजिष्ठाम् ऋजुतराम् “ऋतस्य यज्ञस्य “नावमारुहत् आरोहति । सः “द्रप्सः सोमरसः “श्येनजूतः श्येनेनापहृतो

रसः “अप्सु वसतीवरीषु “ववृधे वर्धते। “ईं तमिमं “पितुः पालकात् पितृस्थानीयात् द्युलोकात् "जां जातमपत्यं सोमम् “ईम् अयं “पिता पालको लोकः “दुहे दोग्धि रसम् । तथाध्वर्युरपि दुहे दोग्धि । अथवा । उक्तलक्षणमेतं सोमं पिता पालकः स्वामी यजमानो दोग्धि फलं तथा दुहेऽध्वर्युरपि रसं दुहे। यद्वा । दुह ईमिति पुनरुक्तिरादरार्था ॥

सि॒हं न॑सं॒त मध्वो॑ अ॒यास॒ं हरि॑मरु॒षं दि॒वो अ॒स्य पति॑ं ।

शूरो॑ यु॒त्सु प्र॑थ॒मः पृ॑च्छते॒ गा अस्य॒ चक्ष॑सा॒ परि॑ पात्यु॒क्षा ॥ ३

सि॒हम् । न॒स॒न्त॒ । मध्वः॑ । अ॒यास॑म् । हरि॑म् । अ॒रु॒षम् । दि॒वः । अ॒स्य । पति॑म् ।

शूरः । युत्ऽसु । प्रथमः । पृच्छते । गाः । अस्यं । चक्षंसा । परिं । पाति । उक्षा ॥३

सिंहम् । नसन्त । मध्वः । अयासम् । हरिम् । अरुषम् । दिवः । अस्य । पतिम् ।

शूरः । युत्ऽसु । प्रथमः । पृच्छते । गाः । अस्य । चक्षसा । परि । पाति । उक्षा ॥३

“सिंहं शत्रूणां हिंसकं सिंहसदृशं “मध्वः उदकस्य “अयासं प्रेरकं “हरिं हरितवर्णम् “अस्य “दिवः द्युलोकस्य "पतिं पालकं सोमं “नसन्त व्याप्नुवन्ति यजमानाः। “युत्सु संग्रामेषु “शूरः “प्रथमः देवानां मध्ये मुख्यः सोमः “गाः पणिभिरपहृताः “पृच्छते मार्गज्ञान् । पणीन् हत्वा गा लब्धुं गोमार्गं पृच्छतीत्यर्थः । किंच “अस्य “चक्षसा सामर्थ्येन “उक्षा सेक्ता देवेन्द्रः “परि “पाति विश्वम् ॥

मधुंपृष्ठं घो॒रम॒यास॒मश्वं॒ रथें युंजंत्युरुच॒क्र ऋ॒ष्वं ।

स्वसांर ईं जा॒मयों मर्जयंति॒ सनांभयो वा॒जिनंमूर्जयंति ॥४

मधुंऽपृष्ठम् । घो॒रम् । अ॒यासंम् । अश्वंम् । रथें । यु॒ञ्ज॒न्ति॒ । उ॒रु॒ऽच॒क्रे । ऋ॒ष्वम् ।

स्वसांरः । ई॒म् । जा॒मयः॑ । म॒र्ज॒य॒न्ति॒ । सऽनांभयः । वा॒जिनंम् । ऊ॒र्ज॒य॒न्ति॒ ॥४

मधुऽपृष्ठम् । घोरम् । अयासम् । अश्वम् । रथे । युञ्जन्ति । उरुऽचक्रे । ऋष्वम् ।

स्वसारः । ईम् । जामयः । मर्जयन्ति । सऽनाभयः । वाजिनम् । ऊर्जयन्ति ॥४

“मधुपृष्ठं मधुरपृष्ठभागं “घोरं भयानकम् “अयासं गन्तारम् “ऋष्वं दर्शनीयमुक्तलक्षणाश्वस्थानीयं व्याप्तं सोमम् “उरुचक्रे प्रभूतचक्रे “रथे यथाश्वं रथे "युञ्जन्ति रथिकास्तद्वत् प्रभूतचरणे रथे रंहस्य साधने यज्ञाख्ये रथे युञ्जन्ति । योजयन्त्यध्वर्य्वादयः । किंच “ईम् एनं सोमं “स्वसारः स्वयंसारिण्यः परस्परं स्वसृभूता वा “जामयः बन्धुभूता अङ्गुलयः । एकहस्तनिष्पन्नत्वात् स्वसृत्वं जामित्वं च । एवंभूताः "मार्जयन्ति शोधयन्ति । तदेवाह । “सनाभयः समानबन्धनाः “वाजिनं बलवन्तं सोमम् “ऊर्जयन्ति बलिनं कुर्वन्ति ॥

चतं॑स्र ईं घृत॒दुहः॑ सचंते समा॒ने अं॒तर्ध॒रुणे॒ निषं॑त्ताः ।

ता ईं॑मर्षं॑ति॒ नमं॑सा पुना॒नास्ता ईं॑ वि॒श्वतः॒ परिं॑ षंति पू॒र्वीः ॥
५

चत॑स्रः । ई॒म् । घृ॒त॒ऽदुहः॑ । स॒च॒न्ते॒ । स॒मा॒ने । अ॒न्तः । ध॒रुणे॑ । निऽस॑त्ताः ।

ताः । ई॒म् । अ॒र्ष॒न्ति॒ । नम॑सा । पु॒ना॒नाः । ताः । ई॒म् । वि॒श्वतः॑ । परि॑ । स॒न्ति॒ । पू॒र्वीः ॥५

चतस्रः । ईम् । घृतऽदुहः । सचन्ते । समाने । अन्तः । धरुणे । निऽसत्ताः ।

ताः । ईम् । अर्षन्ति । नमसा । पुनानाः । ताः । ईम् । विश्वतः । परि । सन्ति । पूर्वीः ॥५

“चतस्रः “घृतदुहः घृतदोग्ध्र्यो गावः “ईम एनं सोमं “सचन्ते सेवन्ते । कीदृश्यस्ताः । “समाने एकस्मिन् “धरुणे सर्वेषां धारकेऽन्तरिक्षे “निषत्ताः निषण्णाः । “ताः घृतदुहः “ईम एनम् “अर्षन्ति प्राप्नुवन्ति “नमसा अन्नेन “पुनानाः पूयमानाः सत्यः। “ताः “पूर्वीः बह्व्यः प्रभूता गावः

“विश्वतः सर्वतः “परि “षन्ति परिभवन्ति ॥ विष्टम्भो दिवो धुरुणः पृथिव्या विश्व उत क्षितयो हस्ते अस्य ।

वि॒ष्टं॒भो दि॒वो ध॒रुणः॑ पृथि॒व्या विश्वा॑ उ॒त क्षि॒तयो॒ हस्ते॑ अस्य ।

असं॑त्त॒ उत्सो॑ गृण॒ते नि॒युत्वा॒न्मध्वो॑ अं॒शुः पंवत इंद्रि॒यायं ॥ ६

वि॒ष्ट॒म्भः । दि॒वः । ध॒रुणः॑ । पृ॒थि॒व्याः । विश्वाः॑ । उ॒त । क्षि॒तयः॑ । हस्ते॑ । अ॒स्य॒ ।

असं॑त् । ते॒ । उत्सः॑ । गृ॒ण॒ते । नि॒युत्वां॑न् । मध्वः॑ । अं॒शुः । प॒व॒ते॒ । इ॒न्द्रि॒यायं ॥६

विष्टम्भः । दिवः । धरुणः । पृथिव्याः । विश्वाः । उत । क्षितयः । हस्ते । अस्य ।

असत् । ते । उत्सः । गृणते । नियुत्वान् । मध्वः । अंशुः । पवते । इन्द्रियाय ॥६

अयं सोमः “दिवः द्युलोकस्य विष्टम्भभूतः । यथा गृहस्थ स्तम्भस्तद्वत्। तथा “पृथिव्याः “धरुणः धारकः । “उत अपि च “विश्वाः सर्वाः “क्षितयः प्रजाः “अस्य सोमस्य हस्ते भवन्ति । “उत्सः । उत्सरन्त्यस्मात् कामा इत्युत्सः सोमः। सः “गृणते स्तुवते “ते तुभ्यं “नियुत्वान् अश्ववान् “असत् भवतु । स सोमः “मध्वः मधु । कर्मणि षष्ठी । मधुररसः “अंशुः सोमः । ‘ अंशुः शमष्टमात्रो भवति' (निरु. २. ५) इति यास्कः । “इन्द्रियाय “पवते पूयते अभिषूयते ॥

व॒न्वन्नवा॑तो अ॒भि दे॒ववी॑ति॒मिंद्रा॑य सोम वृत्र॒हा पं॑वस्व ।

श॒ग्धि म॒हः पु॑रुश्च॒न्द्रस्य॑ रा॒यः सु॒वीर्य॑स्य॒ पत॑यः स्याम ॥७

व॒न्वन् । अवा॑तः । अ॒भि । दे॒वऽवी॑तिम् । इन्द्रा॑य । सो॒म॒ । वृ॒त्र॒ऽहा । प॒व॒स्व॒ ।

श॒ग्धि । म॒हः । पु॒रु॒ऽच॒न्द्रस्य॑ । रा॒यः । सु॒ऽवीर्य॑स्य । पत॑यः । स्या॒म॒ ॥७

वन्वन् । अवातः । अभि । देवऽवीतिम् । इन्द्राय । सोम । वृत्रऽहा । पवस्व ।

शग्धि । महः । पुरुऽचन्द्रस्य । रायः । सुऽवीर्यस्य । पतयः । स्याम ॥७

हे सोम वन्वन्नवातः शत्रुभिरनभिभूतः देववीतिं यज्ञमभिगच्छ। शत्रुहंता रसन् इंद्राय पवस्व । बहुभिः स्पृहणीयं धनं देहि । वयं च सुवीर्यस्य पतयः स्याम।

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.९०

← सूक्तं ९.८९

ऋग्वेदः - मण्डल ९

सूक्तं ९.९०

वसिष्ठो मैत्रावरुणिः

सूक्तं ९.९१ →

दे. पवमानः सोमः। त्रिष्टुप्

प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिष्यन्नयासीत् ।

इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥१॥

अभि त्रिपृष्ठं वृषणं वयोधामाङ्गूषाणामवावशन्त वाणीः ।

वना वसानो वरुणो न सिन्धून्वि रत्नधा दयते वार्याणि ॥२॥

शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि ।

तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळ्हः साह्वान्पृतनासु शत्रून् ॥३॥

उरुगव्यूतिरभयानि कृण्वन्समीचीने आ पवस्वा पुरंधी ।

अपः सिषासन्नुषसः स्वर्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥४॥

मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम् ।

मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिन्द्रमिन्दो मदाय ॥५॥

एवा राजेव क्रतुमाँ अमेन विश्वा घनिघ्नद्दुरिता पवस्व ।

इन्दो सूक्ताय वचसे वयो धा यूयं पात स्वस्तिभिः सदा नः ॥६॥

सायणभाष्यम्

‘प्र हिन्वानः' इति षड्टचं पञ्चमं सूक्तं मैत्रावरुणेर्वसिष्ठस्यार्षं त्रैष्टुभं पवमानसोमदेवताकम् ।

तथा चानुक्रान्तं- प्र हिन्वानः षड्वसिष्ठः' इति । गतो विनियोगः ।।

प्र हिंन्वा॒नो जंनि॒ता रोदंस्यो॒ रथो॒ न वाजं सनि॒ष्यन्नंयासीत् ।

इंद्रं॒ गच्छ॒न्नायुंधा सं॒शिशांनो॒ विश्वा॒ वसु॒ हस्तंयोरा॒दधांनः ॥ १

प्र । हि॒न्वा॒नः । ज॒नि॒ता । रोदंस्योः । रथः॑ । न । वाजंम् । स॒नि॒ष्यन् । अ॒या॒सी॒त् ।

इन्द्रंम् । गच्छंन् । आयुंधा । स॒म्ऽशिशांनः । विश्वां । वसुं । हस्तंयोः । आ॒ऽदधांनः ॥१

प्र । हिन्वानः । जनिता । रोदस्योः । रथः । न । वाजम् । सनिष्यन् । अयासीत् ।

इन्द्रम् । गच्छन् । आयुधा । सम्ऽशिशानः । विश्वा । वसु । हस्तयोः । आऽदधानः ॥१

“हिन्वानः प्रेर्यमाणोऽध्वर्य्वादिभिः “जनिता उत्पादयिता रोदस्योः द्यावापृथिव्याः । तयोः जनयितृत्वं वृष्टिप्रदानहविष्प्रापणाभ्याम् । तादृक्सोमः “वाजम् अन्नं “सनिष्यन् दास्यन् “प्र “अयासीत् प्रगच्छति । “इन्द्रं “गच्छन् प्राप्नुवन् “आयुधा आयुधानि “संशिशानः सम्यक् तीक्ष्णीकुर्वन्निन्द्रसाहाय्यगमनार्थं तीक्ष्णायुधः सन् “विश्वा सर्वाणि "वसु वसूनि “हस्तयोरादधानः अस्मभ्यं दानाय । एवं कुर्वन् प्रायासीत् ॥

अ॒भि त्रि॑पृ॒ष्ठं वृष॑णं वयो॒धामा॑ङ्गू॒षाणा॑मवावशंत॒ वाणीः॑ ।

वना॒ वसा॑नो॒ वरु॑णो॒ न सिंधू॒न्वि र॑त्न॒धा द॑यते॒ वार्या॑णि ॥२

अ॒भि । त्रि॒ऽपृ॒ष्ठम् । वृष॑णम् । व॒यः॒ऽधाम् । आ॒ङ्गू॒षाणा॑म् । अ॒वा॒व॒श॒न्त॒ । वाणीः॑ ।

वना॑ । वसा॑नः । वरु॑णः । न । सिन्धू॑न् । वि । र॒त्न॒ऽधाः । द॒य॒ते॒ । वार्या॑णि ॥२

अभि । त्रिऽपृष्ठम् । वृषणम् । वयःऽधाम् । आङ्गूषाणाम् । अवावशन्त । वाणीः ।

वना । वसानः । वरुणः । न । सिन्धून् । वि । रत्नऽधाः । दयते । वार्याणि ॥२

“त्रिपृष्ठम् । त्रीणि पृष्ठानि स्तोत्राणि द्रोणकलशादिस्थानानि वा सवनानि वा यस्य स तथोक्तः । तं “वृषणं वर्षकं “वयोधाम् अन्नस्य दातारं सोमम् “आङ्गूषाणाम् आघोषवतां स्तोतॄणां “वाणीः वाचः “अभि “अवावशन्त शब्दयन्ते । “वना वनान्युदकानि “वसानः

आच्छादयन् “वरुणो “न वरुण इव “सिन्धून् आच्छादयति तद्वत् । “रत्नधाः रत्नानां दाता सोमः “वार्याणि धनानि “दयते प्रयच्छति स्तोतृभ्यः ॥

शूर॑ग्रामः॒ सर्व॑वीरः॒ सहा॑वा॒ञ्जेता॑ पवस्व॒ सनि॑ता॒ धना॑नि ।

ति॒ग्मायु॑धः क्षि॒प्रध॑न्वा स॒मत्स्वषा॑ळ्हः सा॒ह्वान्पृत॑नासु॒ शत्रू॑न् ॥३

शूर॑ऽग्रामः । सर्व॑ऽवीरः । सहा॑वान् । जेता॑ । प॒व॒स्व॒ । सनि॑ता । धना॑नि ।

ति॒ग्मऽआ॑युधः । क्षि॒प्रऽध॑न्वा । स॒मत्ऽसु॑ । अषा॑ळ्हः । स॒ह्वान् । पृत॑नासु । शत्रू॑न् ॥३

शूरऽग्रामः । सर्वऽवीरः । सहावान् । जेता । पवस्व । सनिता । धनानि ।

तिग्मऽआयुधः । क्षिप्रऽधन्वा । समत्ऽसु । अषाळ्हः ।
सह्वान् । पृतनासु । शत्रून् ॥३

हे सोम “पवस्व त्वम् । कीदृशस्त्वम् । “शूरग्रामः शूराणां ग्रामः संघो यस्य सः । “सर्ववीरः । सर्वे वीरा यस्य स तथोक्तः । “सहावान् सहनवान् “जेता जयशीलः “सनिता संभक्ता “धनानि “तिग्मायुधः तीक्ष्णप्रहरणसाधनः “क्षिप्रधन्वा क्षिप्रसहनशीलधन्वा “समत्सु संग्रामेषु “अषाळ्हः असोढः “साह्वान् अभिभवन् । कुत्र। “पृतनासु शत्रुसेनासु । कान्। “शत्रून् ॥

उ॒रुग॑व्यूति॒रभ॑यानि कृ॒ण्वन्त्स॑मीची॒ने आ प॑वस्वा॒ पुरं॑धी ।

अ॒पः सिषा॑सन्नु॒षस॒ः स्व१॒॑र्गाः सं चि॑क्रदो म॒हो अ॒स्मभ्य॑ं वाजा॑न् ॥४

उ॒रु॒ऽगव्यू॑तिः । अभ॑यानि । कृ॒ण्वन् । स॒मी॒ची॒ने इति॑ स॒म्ऽई॒ची॒ने । आ । प॒व॒स्व॒ । पुरं॑धी॒ इति॑ पुरं॑म्ऽधी ।

अ॒पः । सिसा॑सन् । उ॒षसः॑ । स्वः॑ । गाः । सम् । चि॒क्र॒द॒ः ।
म॒हः । अ॒स्मभ्य॑म् । वाजा॑न् ॥४

उरुऽगव्यूतिः । अभयानि । कृण्वन् । समीचीने इति सम्ऽईचीने । आ । पवस्व । पुरन्धी इति पुरम्ऽधी ।

अपः । सिसासन् । उषसः । स्वः । गाः । सम् । चिक्रदः ।
महः । अस्मभ्यम् । वाजान् ॥४

हे सोम "उरुगव्यूतिः विस्तीर्णमार्गस्त्वम् "अभयानि स्तोतृभ्यः "कृण्वन् कुर्वन् "पुरंधी। इदं द्यावापृथिव्योर्नाम । ते "समीचीने संगते कुर्वन् "आ "पवस्व आक्षर। "अपः "उषसः "स्वः आदित्यं "गाः रश्मींश्च "सिषासन् पुष्ट्यर्थं

संभक्तुमिच्छन् “सं “चिक्रदः संक्रन्दसे । “महः महतो महान्ति “वाजान् अन्नानि “अस्मभ्यं दातुमिति शेषः ॥

मत्सिं सोम॒ वरुंण॒ं मत्सिं मि॒त्रं मत्सींद्रंमिंदो पवमान॒ विष्णुं ।

मत्सि॒ शर्धो॒ मारुंत॒ं मत्सिं दे॒वान्मत्सिं म॒हामिंद्रंमिंदो॒ मदांय ॥५

मत्सिं । सो॒म॒ । वरुंणम् । मत्सिं । मि॒त्रम् । मत्सिं । इन्द्रंम् । इ॒न्दो॒ इतिं । प॒व॒मा॒न॒ । विष्णुंम् ।

मत्सिं । शर्धः॑ । मारुंतम् । मत्सिं । दे॒वान् । मत्सिं । म॒हाम् । इन्द्रंम् । इ॒न्दो॒ इतिं । मदांय ॥५

मत्सि । सोम । वरुणम् । मत्सि । मित्रम् । मत्सि । इन्द्रम् । इन्दो इति । पवमान । विष्णुम् ।

मत्सि । शर्धः । मारुतम् । मत्सि । देवान् । मत्सि । महाम् । इन्द्रम् । इन्दो इति । मदाय ॥५

हे “पवमान पूयमान “इन्दो “सोम त्वं वरुणादीन् “मत्सि तर्पय तेषां "मदाय । इन्द्रस्य प्राधान्यात् द्विरभिधानम् ॥

एवा राजेंव क्रतुंमाँ अमेंन विश्वा घनिंघ्नद्दुरिता पंवस्व ।

इंदों सूक्ताय वचंसे वयों धा यूयं पांत स्वस्तिभिः सदां नः ॥६

एव । राजांऽइव । क्रतुंऽमान् । अमेंन । विश्वां । घनिंघ्नत् । दुःऽइता । पवस्व ।

इन्दो इतिं । सुऽउक्तायं । वचंसे । वयः । धाः । यूयम् । पात । स्वस्तिऽभिः । सदां । नः ॥६

एव । राजाऽइव । क्रतुऽमान् । अमेन । विश्वा । घनिघ्नत् । दुःऽइता । पवस्व ।

इन्दो इति । सुऽउक्ताय । वचसे । वयः । धाः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥६

अनया स्तुतिमुपसंहरन् फलमाशास्ते । हे सोम “एव एवं स्तुत इति शेषः। “क्रतुमान् त्वं “राजेव “अमेन बलेन “विश्वा सर्वाणि “दुरिता दुरितानि “घनिघ्नत् विनाशयन् "पवस्व । हे “इन्दो दीप्त सोम "सूक्ताय शोभनमुदिताय “वचसे अस्माकं स्तोत्राय तद्वचो विमृष्यार्थवदवगत्य “वयो “धाः अन्नं धेहि। अन्नलाभस्य स्तुतिनिमित्तकत्वात्तस्य स्तुतिवचसः प्राधान्येनोक्तिः । शिष्टं सिद्धम् ॥ ॥२६॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति
श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क
भूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके
तृतीयोऽध्यायः समाप्तः ॥

मण्डल ९

सूक्तं ९.३१सूक्तं ९.४१सूक्तं ९.७१सूक्तं ९.१०१

सूक्तं ९.३२सूक्तं ९.४२सूक्तं ९.७२सूक्तं ९.१०२

सूक्तं ९.३३सूक्तं ९.४३सूक्तं ९.७३सूक्तं ९.१०३

सूक्तं ९.३४सूक्तं ९.४४सूक्तं ९.७४सूक्तं ९.१०४

सूक्तं ९.३५सूक्तं ९.४५सूक्तं ९.७५सूक्तं ९.१०५

सूक्तं ९.३६सूक्तं ९.४६सूक्तं ९.७६सूक्तं ९.१०६

सूक्तं ९.३७सूक्तं ९.४७सूक्तं ९.७७सूक्तं ९.१०७

सूक्तं ९.३८सूक्तं ९.४८सूक्तं ९.७८सूक्तं ९.१०८

सूक्तं ९.३९सूक्तं ९.४९सूक्तं ९.७९सूक्तं ९.१०९

सूक्तं ९.२०सूक्तं ९.५०सूक्तं ९.८०सूक्तं ९.११०

सूक्तं ९.२१सूक्तं ९.५१सूक्तं ९.८१सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.९१

← सूक्तं ९.९०

ऋग्वेदः - मण्डल ९

सूक्तं ९.९१

कश्यपो मारीचः

सूक्तं ९.९२ →

दे. पवमानः सोमः। त्रिष्टुप्

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी ।

दश स्वसारो अधि सानो अव्येऽजन्ति वह्निं सदनान्यच्छ ॥१॥

वीती जनस्य दिव्यस्य कव्यैरधि सुवानो नहुष्येभिरिन्दुः ।

प्र यो नृभिरमृतो मर्त्येभिर्मर्मृजानोऽविभिर्गोभिरद्भिः ॥२॥

वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो गोः ।

सहस्रमृक्वा पथिभिर्वचोविदध्वस्मभिः सूरो अण्वं वि याति ॥३॥

रुजा दृळ्हा चिद्रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान् ।

वृश्चोपरिष्टात्तुजता वधेन ये अन्ति दूरादुपनायमेषाम् ॥४॥

स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः ।

ये दुःषहासो वनुषा बृहन्तस्ताँस्ते अश्याम पुरुकृत्पुरुक्षो ॥५॥

एवा पुनानो अपः स्वर्गा अस्मभ्यं तोका तनयानि भूरि ।

शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि ॥६॥

सायणभाष्यम्

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

तृतीयं श्रुतितत्वज्ञः सप्तमस्याष्टकस्य सः ।

व्याख्याय सायणामात्यश्चतुर्थं व्याचिकीर्षति ॥

तत्र ‘असर्जि' इति षडृचं षष्ठं सूक्तं मारीचस्य कश्यपस्यार्षं त्रैष्टुभं पवमानसोमदेवताकम् । ‘ असर्जि कश्यपः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

अस॑र्जि॒ वक्वा॒ रथ्ये॒ यथा॒जौ धि॒या म॒नोता॑ प्रथ॒मो म॑नी॒षी ।

दश॒ स्वसा॑रो॒ अधि॒ सानो॒ अव्येऽज॑न्ति॒ वह्नि॒ं सद॑ना॒न्यच्छ॑ ॥
१

अस॑र्जि । वक्वा॑ । रथ्ये॑ । यथा॑ । आ॒जौ । धि॒या । म॒नोता॑ । प्र॒थ॒मः । म॒नी॒षी ।

दशं । स्वसांरः । अधिं । सानौं । अव्यें । अजंन्ति । वह्निंम्
। सदंनानि । अच्छं ॥१

असर्जि । वक्वा । रथ्ये । यथा । आजौ । धिया । मनोता
। प्रथमः । मनीषी ।

दश । स्वसारः । अधि । सानौ । अव्ये । अजन्ति । वह्निम्
। सदनानि । अच्छ ॥१

“वक्का शब्दयमानः । ‘वच परिभाषणे'। वनिप् ।
एतादृशः पवमानः सोमः “आजौ । अजन्ति
कर्मार्थमृत्विज इत्याजिर्यज्ञः । तस्मिन् “धिया कर्मणा
स्तोत्रेण वा साकम् "असर्जि सृज्यते पात्रेष्विति । तत्र
दृष्टान्तः। “रथ्ये “यथा रथार्ह आजौ । संग्रामनामैतत्
अजन्ति प्रक्षिपन्ति आयुधान्यत्रेति । तस्मिन्नश्वो यथा
धियाङ्गुल्या सृज्यते तद्वत् । कीदृशः । “मनोता यस्मिन्
देवानां मनांस्योतानि प्रोतानि सः । तथा च ब्राह्मणं -

तस्मिन् हि तेषां मनांस्योतानि ' (ऐ. ब्रा. २.१०) इति ।
“प्रथमः सर्वेषां देवानां मुख्यः “मनीषी । मनस ईषा मनीषा स्तुतिः । तद्वान् । “दश “स्वासरः दशसंख्याका अङ्गुलयः “सदनानि यज्ञगृहाणि “अच्छ अभिमुखीकृत्य “वह्निं वोढारं सोमं “सानौ समुच्छ्रिते । अधिः सप्तम्यर्थानुवादकः । “अव्ये अविभवे अविवालेन कृते पवित्रे “अजन्ति प्रेरयन्ति । ‘ अज गतिक्षेपणयोः ।।

वी॒ती जनं॑स्य दि॒व्यस्यं॑ क॒व्यैरधिं॑ सुवा॒नो नं॑हु॒ष्ये॑भि॒रिन्दुः॑ ।

प्र यो नृभिं॑र॒मृतो॒ मर्त्ये॑भिर्मर्मृजा॒नोऽविं॑भि॒र्गोभिं॑र॒द्भिः ॥ २

वी॒ती । जनं॑स्य । दि॒व्यस्यं॑ । क॒व्यैः । अधिं॑ । सु॒वा॒नः । न॒हु॒ष्ये॑भिः । इन्दुः॑ ।

प्र । यः । नृऽभिः॑ । अ॒मृतः॑ । मर्त्येभिः । म॒र्मृ॒जा॒नः ।
अविं॑ऽभिः । गोभिः॑ । अ॒त्ऽभिः ॥२

वीती । जनस्य । दिव्यस्य । कव्यैः । अधि । सुवानः ।
नहुष्येभिः । इन्दुः ।

प्र । यः । नृऽभिः । अमृतः । मर्त्येभिः । मर्मृजानः ।
अविऽभिः । गोभिः । अत्ऽभिः ॥२

“कव्यैः साधुभिः स्तोतृभिः “नहुष्येभिः मनुष्यैः "सुवानः अभिषूयमाणः “इन्दुः सोमः “दिव्यस्य दिवि भवस्य “जनस्य देवगणस्य “वीती। ‘सुपां सुलुक्' इति चतुर्थ्याः पूर्वसवर्णदीर्घः । सोमभक्षणार्थं यज्ञम् “अधि गच्छति । किंच “अमृतः मरणधर्मरहितः “यः सोमः “नृभिः कर्मनेतृभिः “मर्त्येभिः मर्त्यैः "अविभिः अविमयैः पवित्रैस्तथा “गोभिः अनडुहैरधिषवणचर्मभिः यद्वा गोविकारैः क्षीरादिभिः "अद्भिः वसतीवर्यादिभिरुदकैश्च

“मर्मृजानः भृशं शोध्यमानः सन् यज्ञं प्रति गच्छति । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

वृषा॒ वृष्णे॒ रोरु॑वदं॒शुर॑स्मै॒ पव॑माना॒ रुश॑दीर्ते॒ पयो॒ गोः ।

स॒हस्र॒मृक्वा॑ प॒थिभि॑र्वचो॒विद॑ध्व॒स्मभि॒ः सूरो॒ अण्वं॒ वि या॑ति ॥ ॥३

वृषा॑ । वृष्णे॑ । रोरु॑वत् । अ॒ंशुः । अ॒स्मै॒ । पव॑मानः । रुश॑त् । ई॒र्ते॒ । पय॑ः । गोः ।

स॒हस्र॑म् । ऋक्वा॑ । प॒थिऽभि॑ः । व॒च॒ःऽवित् । अ॒ध्व॒स्मऽभि॑ः । सूर॑ः । अण्व॑म् । वि । या॒ति॒ ॥३

वृषा । वृष्णे । रोरुवत् । अंशुः । अस्मै । पवमानः । रुशत् । ईर्ते । पयः । गोः ।

सहस्रम् । ऋक्वा । पथिऽभिः । वचःऽवित् ।
अध्वस्मऽभिः । सूरः । अण्वम् । वि । याति ॥३

“वृषा कामानां वर्षको वृषेवाचरन् वा “रोरुवत् भृशं शब्दायमानः “अंशुः सोमः “पवमानः पूयमानः सन् “अस्मै “वृष्णे वर्षकायेन्द्राय तदर्थं “रुशत् । रोचतेरिदं रूपम् । आरोचमानं श्वेतं “गोः “पयः आश्रयणद्रव्यम् “ईर्ते गच्छति । ‘ ईर गतौ । आदादिकः । किंच “ऋक्वा । 'छन्दसीवनिपौ' इति मत्वर्थीयो वनिप् । स्तोत्रवानत एव “वचोवित् स्तुतीनां ज्ञाता “सूरः सुवीर्यः सर्वेषामग्निष्टोमादिकर्मणि प्रेरकः सोमः “अध्वस्मभिः ध्वंसनवर्जितैर्हिंसारहितैः “सहस्रं पथिभिः बहुभिर्मार्गैः “अण्वं सूक्ष्मच्छिद्रं पवित्रं “वि “याति । अतीत्य द्रोणकलशं गच्छति ।।

रु॒जा दृ॒ळ्हा चि॑द्र॒क्षस॒ः सदाँ॑सि पुना॒न इ॑न्द ऊर्णुहि॒ वि वाजा॑न् ।

वृ॒श्चोपरि॑ष्टात्तुज॒ता व॒धेन॒ ये अन्ति॑ दू॒रादुप॑ना॒यमे॑षाम् ॥ ४

रु॒ज । दृ॒ळ्हा । चि॒त् । र॒क्षसः॑ । सदाँ॑सि । पु॒ना॒नः । इ॒न्दो॒ इति॑ । ऊ॒र्णु॒हि॒ । वि । वाजा॑न् ।

वृ॒श्च । उ॒परि॑ष्टात् । तु॒ज॒ता । व॒धेन॑ । ये । अन्ति॑ । दू॒रात् । उ॒प॒ऽना॒यम् । ए॒षा॒म् ॥४

रुज । दृळ्हा । चित् । रक्षसः । सदांसि । पुनानः । इन्दो इति । ऊर्णुहि । वि । वाजान् ।

वृश्च । उपरिष्टात् । तुजता । वधेन । ये । अन्ति । दूरात् । उपऽनायम् । एषाम् ॥४

हे सोम “दृळ्हा “चित् दृढान्यपि परैरगन्तव्यत्वेन “रक्षसः राक्षसस्य “सदांसि स्थानानि पुराणि "रुज विनाशय । रुजो भङ्गे' तौदादिकः । किंच हे “इन्दो पवमान “पुनानः पवित्रादिभिः पूयमानस्त्वं “वाजान् तस्यान्नानि तस्य बलानि वा “ऊर्णुहि आच्छादय । आहरेत्यर्थः । तथा “ये राक्षसाः “उपरिष्टात् ऊर्ध्वदेशादागच्छन्ति ये वा “अन्ति अन्तिके समीप आगच्छन्ति ये च “दूरात् दूरदेशाद्वागच्छन्ति तेषां राक्षसानाम् “उपनायम् उपनेतारं स्वामिनं “तुजता । तुजतिर्हिंसाकर्मा । हिंसकेन “वधेन हननसाधनेनायुधेन त्वं “वृश्च छिन्धि । ' ओव्रश्चू छेदने' तौदादिकः ॥

स प्रं॑त्न॒वन्नव्यं॑से विश्ववार सू॒क्ताय॑ प॒थः कृ॑णुहि॒ प्राचः॑ ।

ये दु॒:षहां॑सो व॒नुषां॑ बृ॒हन्त॒स्ताँस्ते॑ अश्याम पुरुकृत्पुरुक्षो ॥ ५

सः । प्र॒त्न॒ऽवत् । नव्यं॑से । वि॒श्व॒ऽवा॒र॒ । सु॒ऽउ॒क्ताय॑ । प॒थः । कृ॒णु॒हि॒ । प्राचः॑ ।

ये । दुः॒ऽसहां॑सः । व॒नुषां॑ । बृ॒हन्तः॑ । तान् । ते॒ । अ॒श्या॒म॒ । पु॒रु॒ऽकृ॒त् । पु॒रु॒क्षो॒ इति॑ पुरुऽक्षो ॥५

सः । प्रत्नऽवत् । नव्यसे । विश्वऽवार । सुऽउक्ताय । पथः । कृणुहि । प्राचः ।

ये । दुःऽसहासः । वनुषा । बृहन्तः । तान् । ते । अश्याम । पुरुऽकृत् । पुरुक्षो इति पुरुऽक्षो ॥५

हे “विश्ववार विश्वैः सर्वैर्वरणीय हे सोम “सः तादृशस्त्वं “प्रत्नवत् पुराण इव स्थितस्त्वं “नव्यसे नवीयसे नवतराय । नवशब्दादीयसुनीकारलोपश्छान्दसः । तस्मै "सूक्ताय

शोभनस्तुतिकाय मह्यं “पथः मार्गान् “प्राचः प्राचीनान् कृणुहि कुरु। सर्वत्र गमनं प्रयच्छेत्यर्थः । ‘ कृवि हिंसाकरणयोः'। ' धिन्विकृण्व्योरच्च' इत्युप्रत्ययः । हे “पुरुकृत् बहुकर्मन् हे पुरुक्षो । ' टुक्षु शब्दे'। मितद्र्वादित्वाड्डुप्रत्ययः (पा. सू. ३. ३.१८०.१)। बहुविधं शब्दायमान हे सोम “दुःसहासः रक्षोभिः सोढुमशक्याः अत एव “वनुषा । वनतिर्हिंसार्थः। हिंसया युक्ताः "बृहन्तः महान्तः “ये त्वदीया अंशाः सन्ति “तांस्ते तव स्वभूतानंशान् वयं यज्ञे "अश्याम प्राप्नुयाम

ए॒वा पुं॑ना॒नो अ॒पः स्व१॒॑र्गा अ॒स्मभ्यं॑ तो॒का तनं॑यानि॒ भूरिं॑ ।

शं न॒ः क्षेत्रं॑मु॒रु ज्योती॑ंषि सोम॒ ज्योङ्न॒ः सूर्यं॑ दृ॒शयें॑ रिरीहि ॥ ६

ए॒व । पु॒ना॒नः । अ॒पः । स्वः॑ । गाः । अ॒स्मभ्यं॑म् । तो॒का । तनं॑यानि । भूरिं ।

शम् । न॒ः । क्षेत्रं॑म् । उ॒रु । ज्योतीं॑षि । सो॒म॒ । ज्योक् । न॒ः । सूर्यं॑म् । दृ॒शये॑ । रि॒री॒हि॒ ॥६

एव । पुनानः । अपः । स्वः । गाः । अस्मभ्यम् । तोका । तनयानि । भूरि ।

शम् । नः । क्षेत्रम् । उरु । ज्योतींषि । सोम । ज्योक् । नः । सूर्यम् । दृशये । रिरीहि ॥६

हे सोम "एव एवं "पुनानः पूयमानः पवित्रादिभिः "अस्मभ्यं "रिरीहि प्रापय प्रयच्छ । किं तत्। "अपः । अप इत्यन्तरिक्षनाम । आप्नोति सर्वमपि । अन्तरिक्षं "स्वः स्वर्गं द्युलोकं "गाः । सर्वैर्गम्यतेऽत्रेति गावः पृथिव्यः । ताः पृथिवीश्च "भूरि । ' सुपां सुलुक्' इति द्वितीयाया लुक् ।

बहून् “तोका पुत्रान् “तनयानि । तन्वन्ति कुलमिति तनयाः पौत्राः । तांश्च तथा “नः अस्मभ्यं “क्षेत्रं “शं सुखकरं कुरु । हे “सोम “ज्योतींषि नक्षत्राणि “उरु उरूणि अन्तरिक्षे विस्तीर्णानि कुरु । तथा “नः अस्मभ्यं "सूर्यम् आदित्यं “ज्योक् । चिरनामैतत् । चिरकालं “दृशये द्रष्टुं कुरु ॥ ॥ १ ॥

टिप्पणी

मारीच उपरि टिप्पणी (http://www.angelfire.com/in4/vedastudy/pur_index23/maaricha.htm)

मरीचि उपरि पौराणिकसंदर्भाः (https://puranastudy.wordpress.com/%e0%a4%ae%e

0%a4%af%e0%a5%82%e0%a4%96-%e0%a4%ae%e0%a4%b0%e0%a5%81/)

९.९१.१ असर्जि वक्वा इति

द्र. वासवं (https://sa.wikisource.org/s/2917)

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.९२

ऋग्वेदः - मण्डल ९
← सूक्तं ९.९१
सूक्तं ९.९२
कश्यपो मारीचः
सूक्तं ९.९३ →

दे. पवमानः सोमः। त्रिष्टुप्

परि सुवानो हरिरंशुः पवित्रे रथो न सर्जि सनये हियानः ।

आपच्छ्लोकमिन्द्रियं पूयमानः प्रति देवाँ अजुषत प्रयोभिः ॥१॥

अच्छा नृचक्षा असरत्पवित्रे नाम दधानः कविरस्य योनौ ।

सीदन्होतेव सदने चमूषूपेमग्मन्नृषयः सप्त विप्राः ॥२॥

प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सद एति नित्यम् ।

भुवद्विश्वेषु काव्येषु रन्तानु जनान्यतते पञ्च धीरः ॥३॥

तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः ।

दश स्वधाभिरधि सानो अव्ये मृजन्ति त्वा नद्यः सप्त यह्वीः ॥४॥

तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसन्त ।

ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकम् ॥५॥

परि सद्मेव पशुमान्ति होता राजा न सत्यः समितीरियानः ।

सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो वनेषु ॥६॥

सायणभाष्यम्

‘परि सुवानः' इति षड्टचं सप्तमं सूक्तं मारीचस्य कश्यपस्यार्षं त्रैष्टुभं पवमानसोमदेवताकम् । ‘ परि सुवानः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

परि॑ सुवा॒नो हरि॑रं॒शुः प॒वित्रे॒ रथो॒ न स॑र्जि स॒नये॑ हिया॒नः ।

आप॒च्छ्लोक॑मिन्द्रि॒यं पू॒यमा॑नः॒ प्रति॑ दे॒वाँ अ॑जुषत॒ प्रयो॑भिः ॥१

परि॑ । सु॒वा॒नः । हरिः॑ । अ॒ंशुः । प॒वित्रे॑ । रथः॑ । न । स॒र्जि॒ । स॒नये॑ । हि॒या॒नः ।

आप॑त् । श्लोक॑म् । इ॒न्द्रि॒यम् । पू॒यमा॑नः । प्रति॑ । दे॒वान् । अ॒जु॒ष॒त॒ । प्रयः॑ऽभिः ॥१

परि । सुवानः । हरिः । अंशुः । पवित्रे । रथः । न । सर्जि । सनये । हियानः ।

आपत् । श्लोकम् । इन्द्रियम् । पूयमानः । प्रति । देवान् । अजुषत । प्रयःऽभिः ॥१

“सुवानः' अभिषूयमाणः “हियानः ऋत्विग्भिः प्रेर्यमाणः “हरिः हरितवर्णः “अंशुः सोमः “पवित्रे अविवालेन कृते दशापवित्रे “परि “सर्जि परिसृज्यते । किमर्थम् । “सनये धनलाभाय देवानां संभजनाय वा । तत्र दृष्टान्तः । “रथो “न । रथो यथा युद्धे शत्रुवधार्थं शत्रुधनहरणार्थं वा सृज्यते तद्वत् । किंच “पूयमानः पवित्रेण सोऽयं सोमः “इन्द्रियम् इन्द्रलिङ्गमिन्द्रस्य पर्याप्तं वा “श्लोकं स्तोत्रम् “आपत् आप्नोति । आप्लृ व्याप्तौ ' । लेट्यडागमः । तथा स सोमः “प्रयोभिः प्रीणयितृभिः हवीरूपैरन्नैः "देवान् “प्रति “अजुषत प्रतिसेवते । ‘जुषी प्रीतिसेवनयोः' ।।

अच्छा॑ नृ॒चक्षा॑ असरत्प॒वित्रे॒ नाम॒ दधा॑नः क॒विर॑स्य॒ योनौ॑ ।

सीद॒न्होते॑व॒ सद॑ने च॒मूषूपे॑मग्म॒न्नृष॑यः स॒प्त विप्रा॑ः ॥२

अच्छं । नृऽचक्षाः॑ । अ॒स॒र॒त् । प॒वित्रे॑ । नाम॑ । दधा॑नः । क॒विः । अ॒स्य॒ । योनौ॑ ।

सीद॑न् । होता॑ऽइव । सद॑ने । च॒मूषु॑ । उप॑ । ई॒म् । अ॒ग्म॒न् । ऋष॑यः । स॒प्त । विप्राः॑ ॥२

अच्छ । नृऽचक्षाः । असरत् । पवित्रे । नाम । दधानः । कविः । अस्य । योनौ ।

सीदन् । होताऽइव । सदने । चमूषु । उप । ईम् । अग्मन् । ऋषयः । सप्त । विप्राः ॥२

“नृचक्षाः नृणां द्रष्टा “कविः क्रान्तप्रज्ञः सोमः “नाम वसतीवर्याख्यमुदकं “दधानः धारयन् “अस्य एतादृशस्यात्मनः “योनौ स्थाने “पवित्रे “अच्छ “असरत् अभितः सरति । ततः “सदने । सीदन्त्यत्रेति सदनो यज्ञः । तस्मिन् “होतेव होता यथा देवान् स्तोतुमुपविशति

तद्वद्देवानागन्तुमुपविशन् सोमः “चमूषु । चमन्ति चम्वो ग्रहादयः । तेष्वभिसरति । अनन्तरं सप्तसंख्याकाः “विप्राः मेधाविनो भरद्वाजः कश्यप गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इत्येते “ऋषयः “ईम् एनं सोमम् “उप “अग्मन् स्तोत्रैरुपगच्छन्ति ॥

प्र सुमे॒धा गा॑तु॒विद्वि॒श्वदे॑व॒ः सोम॑ः पुना॒नः सद॑ एति॒ नित्य॑ ।

भुव॒द्विश्वे॑षु॒ काव्ये॑षु॒ रंता॒नु जना॑न्यतते॒ पंच॒ धीर॑ः ॥३

प्र । सु॒ऽमे॒धाः । गा॒तु॒ऽवित् । वि॒श्वऽदे॑वः । सोम॑ः । पु॒ना॒नः । सद॑ः । ए॒ति॒ । नित्य॑म् ।

भुव॑त् । विश्वे॑षु । काव्ये॑षु । रन्ता॑ । अनु॑ । जना॑न् । य॒त॒ते॒ । पञ्च॑ । धीर॑ः ॥३

प्र । सुऽमेधाः । गातुऽवित् । विश्वऽदेवः । सोमः । पुनानः । सदः । एति । नित्यम् ।

भुवत् । विश्वेषु । काव्येषु । रन्ता । अनु । जनान् । यतते । पञ्च । धीरः ॥३

“सुमेधाः । ‘ नित्यमसिच् प्रजामेधयोः' (पा. सू. ५. ४. १२२) इत्यसिच्समासान्तः । शोभनप्रज्ञः “गातुवित् मार्गस्य वेत्ता । यद्वा । गातवः स्तोतारः । तेषां धनस्य लम्भयिता । “विश्वदेवः सर्वदेवोपगतः । यद्वा । देवो देवनं दीप्तिः । व्यापकदीप्तियुक्तः । एतादृशः “सोमः “पुनानः पूयमानः सन् “नित्यम् अविनश्वरं “सदः स्थानं द्रोणकलशं “प्र “एति प्रगच्छति । ततः “विश्वेषु सर्वेषु “काव्येषु कविकर्मसु स्तोत्रेषु “रन्ता “भुवत् रमणशीलो भवति । रमेस्ताच्छीलिकस्तृन् । तथा “धीरः प्राज्ञः सोऽयं “पञ्च

“जनान् निषादपञ्चमांश्चतुरो वर्णान् “अनु “यतते अनुगन्तुं प्रयत्नं करोति । अनुगच्छतीति यावत् ॥

तव॒ त्ये सोम॑ पवमान नि॒ण्ये विश्वे॑ दे॒वास्त्रय॑ एकाद॒शासः॑ ।

दश॑ स्व॒धाभि॒रधि॒ सानो॒ अव्ये॑ मृ॒जंति॑ त्वा न॒द्यः॑ स॒प्त य॒ह्वीः ॥४

तव॑ । त्ये । सो॒म॒ । प॒व॒मा॒न॒ । नि॒ण्ये । विश्वे॑ । दे॒वाः । त्रयः॑ । ए॒का॒द॒शासः॑ ।

दश॑ । स्व॒धाभिः॑ । अधि॑ । सानौ॑ । अव्ये॑ । मृ॒जन्ति॑ । त्वा॒ । न॒द्यः॑ । स॒प्त । य॒ह्वीः ॥४

तव । त्ये । सोम । पवमान । निण्ये । विश्वे । देवाः । त्रयः । एकादशासः ।

दश । स्वधाभिः । अधि । सानौ । अव्ये । मृजन्ति । त्वा । नद्यः । सप्त । यह्वीः ॥४

हे “पवमान पूयमान हे “सोम “तव स्वभूताः “त्ये ते प्रसिद्धाः “त्रय “एकादशासः । पूरणार्थे डट् प्रत्ययः । त्रयस्त्रिंशत्संख्याकाः “विश्वे सर्वे “देवाः “निण्ये । अन्तर्हितनामैतत् । अन्तर्हिते स्थाने द्युलोके वर्तन्ते । तादृशं त्वां दशसंख्याका अङ्गुलयः “अधि “सानौ अधिकं समुच्छ्रिते “अव्ये अविमये पवित्रे “स्वधाभिः उदकैः “मृजन्ति शोधयन्ति । किंच "यह्वीः ।' वा छन्दसि । इति पूर्वसवर्णदीर्घः । यह्वयो महत्यः “सप्त सप्तसंख्याका गङ्गाद्याः “नद्यः “त्वा त्वां “मृजन्ति । वसतीवर्यात्मकैरेकधनात्मकैश्च स्वीयैरुदकैस्त्वां मार्जयन्तीत्यर्थः ॥

तन्नु स॒त्यं पव॑मानस्यास्तु यत्र॒ विश्वे॑ का॒रवः॑ सं॒नसं॑त ।

ज्योति॒र्यदह्ने॒ अकृ॑णोदु लो॒कं प्राव॒न्मनुं॒ दस्यं॑वे कर॒भीकं॑ ॥ ५

तत् । नु । स॒त्यम् । पव॑मानस्य । अ॒स्तु॒ । यत्र॑ । विश्वे॑ । का॒रवः॑ । स॒म्ऽनसं॑न्त ।

ज्योतिः॑ । यत् । अह्ने॑ । अकृ॑णोत् । ऊं॒ इति॑ । लो॒कम् । प्र । आ॒व॒त् । मनु॑म् । दस्यं॑वे । कः॒ । अ॒भीकं॑म् ॥५

तत् । नु । सत्यम् । पवमानस्य । अस्तु । यत्र । विश्वे । कारवः । सम्ऽनसन्त ।

ज्योतिः । यत् । अह्ने । अकृणोत् । ऊं इति । लोकम् । प्र । आवत् । मनुम् । दस्यवे । कः । अभीकम् ॥५

"सत्यं सत्यभूतं “तत् प्रसिद्धं “पवमानस्य सोमस्य स्थानं “नु क्षिप्रमस्माकम् अस्तु । “यत्र यस्मिन् स्थाने “विश्वे सर्वे “कारवः स्तोतारः “संनसन्त स्तोतुं संगच्छन्ते तत्स्थानमस्तु । अस्य सोमस्य “यत् “ज्योतिः “अह्ने दिवसाय “लोकम् आलोकं प्रकाशम् “अकृणोत् करोति । “उ इत्यवधारणे । तज्ज्योतिः “मनुम् एतन्नामानं राजर्षिं “प्रावत् प्रकर्षेणारक्षत् । तथा सोमः स्वयं तेजः “दस्यवे सर्वस्योपक्षपयित्रेऽसुराय "अभीकम् अभिगमनशीलं “कः अकार्षीत् । करोतेर्लुङि “ मन्त्रे घस° ' इति च्लेर्लुक् ॥

परि॒ सद्मे॑व पशु॒मांति॒ होता॒ राजा॒ न स॒त्यः समि॑तीरिया॒नः ।

सोमः॑ पुना॒नः क॒लशाँ॑ अयासी॒त्सीद॑न्मृ॒गो न म॑हि॒षो वने॑षु ॥६

परिं । सद्मंऽइव । प॒शु॒ऽमन्तिं । होतां । राजां । न । स॒त्यः । सम्ऽइंतीः । इ॒या॒नः ।

सोमः॑ । पु॒ना॒नः । क॒लशांन् । अ॒या॒सी॒त् । सीदंन् । मृ॒गः । न । म॒हि॒षः । वनेंषु ॥६

परि । सद्मऽइव । पशुऽमन्ति । होता । राजा । न । सत्यः । सम्ऽइतीः । इयानः ।

सोमः । पुनानः । कलशान् । अयासीत् । सीदन् । मृगः । न । महिषः । वनेषु ॥६

“होता देवानामाह्वातर्त्विक् “पशुमन्ति पशुमतः “सद्मेव यज्ञगृहान् यथोपगच्छति । किंच “राजा “न यथा राजा “सत्यः सत्यकर्मा सन् “समितीः । संग्रामनामैतत् सम्यक् प्राप्यते योद्धृभिरत्रेति । तान् संग्रामान् “इयानः गच्छन् भवति तथा “पुनानः “सोमः “वनेषु वननीयेषु

वसतीवर्याख्येषूदकेषु “सीदन् “मृगो “न “महिषः (http://puranastudy.atwebpages.com/pur_index23/mahisha.htm) महिषाख्यो मृग इवोदकेषु तिष्ठन् “कलशान् द्रोणाभिधानान् “अयासीत् परियाति । यद्वा । महिषो महान् पूज्यो वा सोमः कलशान् परिगच्छतीति ॥ ॥२॥

मण्डल ९

सूक्तं ९.११सूक्तं ९.४१सूक्तं ९.७१सूक्तं ९.१०१

सूक्तं ९.१२सूक्तं ९.४२सूक्तं ९.७२सूक्तं ९.१०२

सूक्तं ९.१३सूक्तं ९.४३सूक्तं ९.७३सूक्तं ९.१०३

सूक्तं ९.१४सूक्तं ९.४४सूक्तं ९.७४सूक्तं ९.१०४

सूक्तं ९.१५सूक्तं ९.४५सूक्तं ९.७५सूक्तं ९.१०५

सूक्तं ९.१६सूक्तं ९.४६सूक्तं ९.७६सूक्तं ९.१०६

सूक्तं ९.१७सूक्तं ९.४७सूक्तं ९.७७सूक्तं ९.१०७

सूक्तं ९.१८सूक्तं ९.४८सूक्तं ९.७८सूक्तं ९.१०८

सूक्तं ९.१९सूक्तं ९.४९सूक्तं ९.७९सूक्तं ९.१०९

सूक्तं ९.२०सूक्तं ९.५०सूक्तं ९.८०सूक्तं ९.११०

सूक्तं ९.२१सूक्तं ९.५१सूक्तं ९.८१सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.९३

ऋग्वेदः - मण्डल ९

← सूक्तं ९.९२

सूक्तं ९.९४ →

सूक्तं ९.९३

नोधा गौतमः

दे. पवमानः सोमः। त्रिष्टुप्

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।

हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥१॥

सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।

मर्यो न योषामभि निष्कृतं यन्सं गच्छते कलश उस्रियाभिः ॥२॥

उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।

मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥३॥

स नो देवेभिः पवमान रदेन्दो रयिमश्विनं वावशानः ।

रथिरायतामुशती पुरंधिरस्मद्र्यगा दावने वसूनाम् ॥४॥

नू नो रयिमुप मास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम् ।

प्र वन्दितुरिन्दो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात् ॥५॥

सायणभाष्यम्

“ साकमुक्षः' इति पञ्चर्चमष्टमं सूक्तं गौतमस्य नोधस आर्षम् । पूर्ववच्छन्दोदेवते । तथा चानुक्रम्यते- साकमुक्षः पञ्च नोधाः' इति । गतो विनियोगः ॥

सा॒क॒मुक्षो॑ मर्जयंत॒ स्वसा॑रो॒ दश॒ धीर॑स्य धी॒तयो॒ धनु॑त्रीः ।

हरिः॒ पर्य॑द्रव॒ज्जाः सूर्य॑स्य॒ द्रोणं॑ ननक्षे॒ अत्यो॒ न वा॒जी ॥१

सा॒क॒म्ऽउक्षः॑ । म॒र्ज॒य॒न्त॒ । स्वसा॑रः । दश॑ । धीर॑स्य ।
धी॒तयः॑ । धनु॑त्रीः ।

हरिः॑ । परि॑ । अ॒द्र॒व॒त् । जाः । सूर्य॑स्य । द्रोण॑म् । न॒न॒क्षे॒ ।
अत्यः॑ । न । वा॒जी ॥१

साकम्ऽउक्षः । मर्जयन्त । स्वसारः । दश । धीरस्य ।
धीतयः । धनुत्रीः ।

हरिः । परि । अद्रवत् । जाः । सूर्यस्य । द्रोणम् । ननक्षे ।
अत्यः । न । वाजी ॥१

“साकमुक्षः सह युगपत् सिञ्चन्त्यः । उक्ष सेचने'। क्विपि रूपम् । तादृश्यः “स्वसारः कर्मकरणार्थमितस्ततः सुष्ठु गच्छन्त्योऽङ्गुल्यः “मर्जयन्त सोमं शोधयन्ति। ‘ मृजू शौचालंकारयोः' । तथा “दश दशसंख्याकाः “धीतयः । अङ्गुलिनामैतत् । अङ्गुलयः “धीरस्य समर्थस्य प्राज्ञस्य वा देवैर्ध्यातव्यस्य काम्यमानस्य वा सोमस्य “धनुत्रीः प्रेरयित्र्यो भवन्ति । ततः “हरिः हरितवर्णः सोमः “सूर्यस्य “जाः प्रादुर्भूता जाया दिशस्ताः “पर्यद्रवत् परितो गच्छति । सूर्यतेजसा ह्याविर्भवतीति दिशां तस्य जात्वम् । “अत्यः अतनशीलः “वाजी “न अश्व इव स्थितः सोमः “द्रोणं कलशं “ननक्षे व्याप्नोति । नक्षतिर्व्याप्तिकर्मा ॥

सं मा॒तृभि॒र्न शिशु॒र्वाव॑शा॒नो वृषा॑ दधन्वे पुरु॒वारो॑ अ॒द्भिः ।

मर्यो॒ न योषा॑मु॒भि निं॑ष्कृ॒तं यन्त्सं ग॑च्छते क॒लश॑ उ॒स्रिया॑भिः ॥२

सम् । मा॒तृऽभिः॑ । न । शिशुः॑ । वा॒व॒शा॒नः । वृषा॑ । द॒ध॒न्वे॒ । पु॒रु॒ऽवारः॑ । अ॒त्ऽभिः ।

मर्यः॑ । न । योषा॑म् । अ॒भि । निः॒ऽकृ॒तम् । यन् । सम् । ग॒च्छ॒ते॒ । क॒लशे॑ । उ॒स्रिया॑भिः ॥२

सम् । मातृऽभिः । न । शिशुः । वावशानः । वृषा । दधन्वे । पुरुऽवारः । अत्ऽभिः ।

मर्यः । न । योषाम् । अभि । निःऽकृतम् । यन् । सम् । गच्छते । कलशे । उस्रियाभिः ॥२

“वावशानः देवान् कामयमानः “वृषा कामानां वर्षकोऽत एव “पुरुवारः बहुभिर्वरणीयः सोमः “अद्भिः मातृभूताभिर्वसतीवरीभिः “सं “दधन्वे संधार्यते । तत्र

दृष्टान्तः । “मातृभिर्न “शिशुः । कामयमानः पुत्री यथा मातृभिः पयःप्रदानेन संधार्यते । धविर्गत्यर्थः । कर्मणि लिटि रूपम् । “मर्यो “न मनुष्यो यथा “योषां युवतिमभिगच्छति तद्वत् “निष्कृतं संस्कृतं स्वस्थानम् “अभि “यन् अभिगच्छन् “कलशे द्रोणाभिधाने “उस्रियाभिः अद्भिर्गोविकारैः क्षीरादिभिर्वा “सं “गच्छते । गमेरकर्मकात् ' समो गम्यृच्छि' इत्यात्मनेपदम् ॥

उ॒त प्र पि॑प्य॒ ऊध॒रघ्न्या॑या॒ इंदु॒र्धारा॑भिः सचते सुमे॒धाः ।

मू॒र्धानं॒ गावः॒ पय॑सा च॒मूष्व॒भि श्री॑णंति॒ वसु॑भि॒र्न नि॒क्तैः ॥३

उ॒त । प्र । पि॒प्ये॒ । ऊधः॑ । अघ्न्या॑याः । इन्दुः॑ । धारा॑भिः । स॒च॒ते॒ । सु॒ऽमे॒धाः ।

मू॒र्धानं॑म् । गाव॑ः । पय॑सा । च॒मूषु॑ । अ॒भि । श्री॒ण॒न्ति॒ ।
वसु॑ऽभिः । न । नि॒क्तैः ॥३

उत । प्र । पिप्ये । ऊधः । अघ्न्यायाः । इन्दुः । धाराभिः ।
सचते । सुऽमेधाः ।

मूर्धानम् । गावः । पयसा । चमूषु । अभि । श्रीणन्ति ।
वसुऽभिः । न । निक्तैः ॥३

“उत अपि च “अघ्न्यायाः । अघ्न्येति गोनाम ।
अहन्तव्याया गोः “ऊधः पयःस्थानं सोमः “प्र “पिप्ये ।
ओषध्यादिषु सोमः प्रविश्य प्रकर्षेणाप्याययति ।
प्यायतेर्लिटि लिड्यङोश्च ' इति पीभावः । “सुमेधाः
शोभनप्रज्ञः सोऽयम् “इन्दुः सोमः “धाराभिः सचते
समवैति संगच्छते । ततः “गावः “चमूषु । चमन्ति
भक्षयन्त्यत्र सोममिति चम्वो ग्रहादयः । तेषु स्थितं “मूर्धानं
समुच्छ्रितमिमं सोमं “पयसा श्वेतेन “अभि “श्रीणन्ति

अभित आच्छादयन्ति । तत्र दृष्टान्तः । “निक्तैः प्रक्षालितैः "वसुभिर्न वस्त्रैर्यथाच्छादयन्ति तद्वत् ॥

स नों दे॒वेभिः॑ पवमान र॒देंदों र॒यिम॒श्विनं॑ वावश॒ानः ।

र॒थि॒रा॒यतां॑मुश॒ती पुरं॑धिरस्म॒द्र्य१॒॑गा दा॒वने॒ वसू॑नां ॥४

सः । न॒ः । दे॒वेभिः॑ । प॒व॒मा॒न॒ । र॒द॒ । इन्दो॒ इतिं॑ । र॒यिम् । अ॒श्विनं॑म् । वा॒व॒शा॒नः ।

र॒थि॒रा॒यतां॑म् । उ॒श॒ती । पुरं॑म्ऽधिः । अ॒स्म॒द्र्यं॑क् । आ । दा॒वनें॑ । वसूं॑नाम् ॥४

सः । नः । देवेभिः । पवमान । रद । इन्दो इति । रयिम् । अश्विनम् । वावशानः ।

रथिरायताम् । उशती । पुरम्ऽधिः । अस्मद्र्यक् । आ । दावने । वसूनाम् ॥४

हे “पवमान पूयमान सोम “सः तादृशस्त्वं “नः अस्मभ्यं “देवेभिः देवैः सह “रद प्रयच्छ । किं तत् उच्यते । हे “इन्दो पात्रेषु क्षरन् सोम “वावशानः कामयमानः सन् “अश्विनम् अश्ववन्तं “रयिं धनं प्रयच्छति । किंच “रथिरायताम् । रथो येषामस्तीति रथिराः । ‘ मेधारथाभ्याम्' इतीरच्प्रत्ययः । तद्वदाचरतस्तानिच्छतो वा पुरुषान् “उशती कामयमाना “पुरंधिः त्वदीया बहुविधा धीः “वसूनां धनानां “दावने दानाय अस्मद्र्यक् अस्मदभिमुखी “आ आगच्छतु । यद्वा । रथिरायितामिति धनानां विशेषणम् । बलवतां धनानामिति । अस्मद्र्यक् । 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये । (पा. सू. ६. ३. ९२) इत्यद्र्यादेशः । अद्रिसध्र्योरन्तोदात्तत्वनिपातनात् ' उदात्तस्वरितयोर्यणः । इति स्वरितः ॥

नू नो॑ र॒यिमुप॑ मास्व नृ॒वंतं॑ पुना॒नो वा॒ताप्यं॑ वि॒श्वश्चं॑द्रं ।

प्र वं॑दि॒तुरिं॑दो ता॒र्यायुः᳚ प्रा॒तर्म॒क्षू धि॒यावं॑सुर्जगम्यात् ॥५

नु । न॒ः । र॒यिम् । उप॑ । मा॒स्व॒ । नृ॒ऽवन्त॑म् । पु॒ना॒नः ।
वा॒ताप्य॑म् । वि॒श्वऽच॑न्द्रम् ।

प्र । व॒न्दि॒तुः । इ॒न्दो॒ इति॑ । ता॒रि॒ । आयुः᳚ । प्रा॒तः । म॒क्षु ।
धि॒याऽव॑सुः । ज॒ग॒म्या॒त् ॥५

नु । नः । रयिम् । उप । मास्व । नृऽवन्तम् । पुनानः ।
वाताप्यम् । विश्वऽचन्द्रम् ।

प्र । वन्दितुः । इन्दो इति । तारि । आयुः । प्रातः । मक्षु ।
धियाऽवसुः । जगम्यात् ॥५

हे सोम “पुनानः पूयमानस्त्वं “नः अस्मभ्यं “नु क्षिप्रं “नृवन्तं मनुष्यैर्युक्तम् । छान्दसं मतुपो वत्वम् । तादृशं “रयिं धनम् “उप "मास्व उपनिर्मिमीष्व । उपकुर्वित्यर्थः । किं च “विश्वचन्द्रं सर्वेषामाह्लादकं “वाताप्यम्। उदकनामैतत् । उदकं च कुरु । तथा हे “इन्दो सोम “वन्दितुः तव स्तोतुः "आयुः जीवनं “प्र “तारि त्वया वर्धितमस्तु । सोऽयं सोमः “धियावसुः बुद्ध्या कर्मणा वा प्राप्तधनः “प्रातः काले वा सवने वा “मक्षु शीघ्रमस्मदीयं यज्ञं प्रति जगम्यात् आगच्छेत् । गमेर्लिङि ‘ बहुलं छन्दसि ' इति शपः श्लुः ॥ ॥ ३ ॥

टिप्पणी

९.९३.१ साकमुक्षो मर्जयन्त इति

औशनम् (https://sa.wikisource.org/s/2mox)

मण्डल ९

सूक्तं १.११ सूक्तं १.४१ सूक्तं १.७१ सूक्तं १.१०१

सूक्तं १.१२ सूक्तं १.४२ सूक्तं १.७२ सूक्तं १.१०२

सूक्तं १.१३ सूक्तं १.४३ सूक्तं १.७३ सूक्तं १.१०३

सूक्तं १.१४ सूक्तं १.४४ सूक्तं १.७४ सूक्तं १.१०४

सूक्तं १.१५ सूक्तं १.४५ सूक्तं १.७५ सूक्तं १.१०५

सूक्तं १.१६ सूक्तं १.४६ सूक्तं १.७६ सूक्तं १.१०६

सूक्तं १.१७ सूक्तं १.४७ सूक्तं १.७७ सूक्तं १.१०७

सूक्तं १.१८ सूक्तं १.४८ सूक्तं १.७८ सूक्तं १.१०८

सूक्तं १.१९ सूक्तं १.४९ सूक्तं १.७९ सूक्तं १.१०९

सूक्तं १.२० सूक्तं १.५० सूक्तं १.८० सूक्तं १.११०

सूक्तं १.२१ सूक्तं १.५१ सूक्तं १.८१ सूक्तं १.१११

सूक्तं ९.२२सूक्तं ९.५२सूक्तं ९.८२सूक्तं ९.११२

सूक्तं ९.२३सूक्तं ९.५३सूक्तं ९.८३सूक्तं ९.११३

सूक्तं ९.२४सूक्तं ९.५४सूक्तं ९.८४सूक्तं ९.११४

सूक्तं ९.२५सूक्तं ९.५५सूक्तं ९.८५

सूक्तं ९.२६सूक्तं ९.५६सूक्तं ९.८६

सूक्तं ९.२७सूक्तं ९.५७सूक्तं ९.८७

सूक्तं ९.२८सूक्तं ९.५८सूक्तं ९.८८

सूक्तं ९.२९सूक्तं ९.५९सूक्तं ९.८९

सूक्तं ९.३०सूक्तं ९.६०सूक्तं ९.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.९४

दे. पवमानः सोमः। त्रिष्टुप्

अधि यदस्मिन्वाजिनीव शुभ स्पर्धन्ते धियः सूर्ये न विशः ।

अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ॥१॥

द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्रथन्त ।

धियः पिन्वानाः स्वसरे न गाव ऋतायन्तीरभि वावश्र इन्दुम् ॥२॥

परि यत्कविः काव्या भरते शूरो न रथो भुवनानि विश्वा ।

देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः ॥३॥

श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति ।

श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ ॥४॥

इषमूर्जमभ्यर्षाश्वं गामुरु ज्योतिः कृणुहि मत्सि देवान् ।

विश्वानि हि सुषहा तानि तुभ्यं पवमान बाधसे सोम शत्रून् ॥५॥

सायणभाष्यम्

‘ अधि यत्' इति पञ्चर्चं नवमं सूक्तमाङ्गिरसस्य कण्वस्यार्षम् । तथानुक्रम्यते---- अधि यत्कण्वः' इति । पूर्ववच्छन्दोदेवते । गतो विनियोगः ॥

अधि॒ यद॑स्मिन्वा॒जिनी॑व॒ शुभ॒ः स्पर्ध॑न्ते॒ धिय॒ः सूर्ये॒ न विश॑ः
।

अ॒पो वृ॑णा॒नः प॑वते कवी॒यन्व्र॒जं न प॑शु॒वर्ध॑नाय॒ मन्म॑ ॥१

अधि॑ । यत् । अ॒स्मि॒न् । वा॒जिनि॑ऽइव । शुभ॑ः । स्पर्ध॑न्ते । धिय॑ः । सूर्ये॑ । न । विश॑ः ।

अ॒पः । वृ॒णा॒नः । प॒व॒ते॒ । क॒वि॒ऽयन् । व्र॒जम् । न । प॒शु॒ऽवर्ध॑नाय । मन्म॑ ॥१

अधि । यत् । अस्मिन् । वाजिनिऽइव । शुभः । स्पर्धन्ते । धियः । सूर्ये । न । विशः ।

अपः । वृणानः । पवते । कविऽयन् । व्रजम् । न । पशुऽवर्धनाय । मन्म ॥१

“यत् यदा “अस्मिन् सोमे “वाजिनीव “शुभः अश्वे यथा वस्त्रप्रभृत्यलंकारा भवन्ति । यदा वास्मिन् सोमे “सूर्ये “न यथा सूर्ये “विशः रश्मय उदिता भवन्ति । तदा “धियः अङ्गुलयः “अधि “स्पर्धन्ते । अहं पुरस्ताच्छोधयाम्यहं पुरः शोधयामीत्यहमहमिकयोपतिष्ठन्ति । ततोऽयं सोमः “अपः वसतीवरीः “वृणानः आच्छादयन् “पवते पात्रेषु क्षरति । कलशानधिगच्छति। कीदृशः । “कवीयन् कविरिवाचरन् । यद्वा । कवयः स्तोतारः । तानिच्छन् । तत्र दृष्टान्तः। “व्रजं “न “मन्म मननीयं गवां गोष्ठं “पशुवर्धनाय पशूनां वर्धनाय गोपालः परिगच्छति । तथा देवानां प्रीणनाय पात्राणि प्रति पवत इति ॥

द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्रथन्त ।

धियः॑ पिन्वा॒नाः स्वस॑रे॒ न गाव॑ ऋता॒यन्ती॑र॒भि वा॑वश्र॒ इन्दु॑म् ॥२

द्वि॒ता । वि॒ऽऊ॒र्ण्वन् । अ॒मृत॑स्य । धाम॑ । स्व॒ःऽविदे॑ । भुव॑नानि । प्र॒थ॒न्त॒ ।

धियः॑ । पि॒न्वा॒नाः । स्वस॑रे । न । गावः॑ । ऋ॒त॒ऽयन्तीः॑ । अ॒भि । वा॒व॒श्रे॒ । इन्दु॑म् ॥२

द्विता । विऽऊर्ण्वन् । अमृतस्य । धाम । स्वःऽविदे । भुवनानि । प्रथन्त ।

धियः । पिन्वानाः । स्वसरे । न । गावः । ऋतऽयन्तीः । अभि । वावश्रे । इन्दुम् ॥२

“अमृतस्य उदकस्य “धाम धारकं स्थानमन्तरिक्षं सोमः “द्विता द्विधा “व्यूर्ण्वन् उभयतः स्वतेजसाच्छादयन् मध्येन गच्छति । ततः “स्वर्विदे सर्वज्ञाय तस्मै सोमाय “भुवनानि

“प्रथन्त विस्तीर्णानि भवन्ति । तस्य रश्मीनां संचरणार्थं प्रथन्त इत्यर्थः । अथ “पिन्वानाः प्रीणयित्र्यः “धियः स्तुतिलक्षणा वाचः “ऋतायन्तीः यज्ञमिच्छन्त्यः सत्यस्तमिमम् “इन्दुं सोममभिलक्ष्य स्वसरे यागाहनि “वावश्रे शब्दायन्ते । यद्वा । सोमं कामयन्ते । तत्र दृष्टान्तः। “गावो “न यथा पिन्वमानाः पयः क्षरन्त्यो गावः “स्वसरे । सुष्ठु अस्यन्ते प्रेर्यन्ते गावोऽत्रेति स्वसरो गोष्ठम् । तस्मिन्नच्छाभिलक्ष्य शब्दं कुर्वन्ति तद्वत् ॥

परि॒ यत्क॒विः काव्या॒ भरं॑ते॒ शूरो॒ न रथो॒ भुवं॑नानि॒ विश्वा॑ ।

दे॒वेषु॒ यशो॒ मर्ता॑य॒ भूष॒न्दक्षा॑य रा॒यः पु॑रु॒भूषु॒ नव्यः॑ ॥३

परिं । यत् । क॒विः । काव्यां । भरं॑ते । शूरः॑ । न । रथः॑ । भुवं॑नानि । विश्वा॑ ।

दे॒वेषु॑ । यशः॑ । मर्ता॑य । भूष॑न् । दक्षा॑य । रा॒यः । पु॒रु॒ऽभूषु॑ । नव्यः॑ ॥३

परि । यत् । कविः । काव्या । भरते । शूरः । न । रथः । भुवनानि । विश्वा ।

देवेषु । यशः । मर्ताय । भूषन् । दक्षाय । रायः । पुरुऽभूषु । नव्यः ॥३

“कविः क्रान्तप्रज्ञः सोमः “काव्या काव्यानि कवेः कर्माणि स्तोत्राणि “यत् यदा “परि “भरते परितो बिभर्ति । परिगच्छतीति यावत् । कथमिव । “शूरो “न यथा शूरः शत्रूणां बाधकः “रथः तदीयः “विश्वा “भुवनानि सांग्रामिकाणि भूतानि परियाति तद्वत् । तदानीं “देवेषु स्थितं “यशः व्यापकं धनं “मर्ताय मनुष्याय स्तोत्रे “भूषन् । भवतेरन्तर्भावितण्यर्थात् सनि रूपम् । भावयितुमिच्छन् सोमः “रायः आत्मना दत्तस्य धनस्य “दक्षाय वृद्ध्यर्थं

“पुरुभूषु बहुषु यज्ञभवनेषु “नव्यः स्तोतव्यो भवति । ‘णु स्तुतौ' । अचो यत् ॥

श्रि॒ये जा॒तः श्रि॒य आ निरि॑याय॒ श्रियं॒ वयो॑ जरि॒तृभ्यो॑ दधाति ।

श्रियं॒ वसा॑ना अमृत॒त्वमा॑य॒न्भव॑न्ति स॒त्या स॑मि॒था मि॒तद्रौ॑ ॥४

श्रि॒ये । जा॒तः । श्रि॒ये । आ । निः । इ॒या॒य॒ । श्रिय॑म् । वय॑ः । ज॒रि॒तृऽभ्य॑ः । द॒धा॒ति॒ ।

श्रिय॑म् । वसा॑नाः । अ॒मृ॒त॒ऽत्वम् । आ॒य॒न् । भव॑न्ति । स॒त्या । स॒म्ऽइ॒था । मि॒तऽद्रौ॑ ॥४

श्रिये । जातः । श्रिये । आ । निः । इयाय । श्रियम् । वयः । जरितृऽभ्यः । दधाति ।

श्रियम् । वसानाः । अमृतऽत्वम् । आयन् । भवन्ति ।
सत्या । सम्ऽइथा । मितऽद्रौ ॥४

स सोमः “श्रिये “जातः संपदर्थं प्रादुर्भूतो भवति । तदेवाह । “श्रिये श्र्यर्थमेव “आ “निरियाय । अंशुभ्य आभिमुख्येन निर्गच्छति । निर्गतश्च स सोमः “जरितृभ्यः स्तोतृभ्यः “श्रियं “वयः अन्नं जीवनं वा “दधाति विदधाति प्रयच्छति । तेन दत्तां “श्रियं “वसानाः आच्छादयन्तः स्तोतारः “अमृतत्वं देवत्वममरणं वा “आयन प्राप्नुवन् । तस्मिन् “मितद्रौ मितगमने सोमे “समिथा । युद्धनामैतत् सम्यक् प्राप्यतेऽत्रेति । ‘ समीणः ' (उ. सू. २. ११) इत्येतेः संपूर्वस्य थक्प्रत्ययः । तानि युद्धानि “सत्या सत्यानि यथार्थानि “भवन्ति न तु वितथानि । तेन सोमेन पराजितानि भवन्तीत्यर्थः ।।

इ॒षमूर्जं॑म॒भ्य१॒॑र्षाश्वं॒॑ गामु॒रु ज्योतिः॑ कृणुहि॒ मत्सि॑ दे॒वान् ।

विश्वा॑नि॒ हि सु॒षहा॒ तानि॒ तुभ्यं॒ पवं॑मान॒ बाध॑से सोम॒ शत्रू॑न् ॥५

इषं॑म् । ऊर्जं॑म् । अ॒भि । अ॒र्ष॒ । अश्वं॑म् । गाम् । उ॒रु । ज्योतिः॑ । कृ॒णु॒हि॒ । मत्सि॑ । दे॒वान् ।

विश्वा॑नि । हि । सु॒ऽसहा॑ । तानि॑ । तुभ्यं॑म् । पवं॑मान । बाध॑से । सो॒म॒ । शत्रू॑न् ॥५

इषम् । ऊर्जम् । अभि । अर्ष । अश्वम् । गाम् । उरु । ज्योतिः । कृणुहि । मत्सि । देवान् ।

विश्वानि । हि । सुऽसहा । तानि । तुभ्यम् । पवमान । बाधसे । सोम । शत्रून् ॥५

हे सोम “इषम् अन्नम् “ऊर्जम् अन्नरसं च अस्मभ्यम् “अभ्यर्ष अभिगमय । किंच “अश्वं वाहनं “गां पयःप्रदानेन यज्ञस्य साधनभूतां गां च । तथा “उरु महत् “ज्योतिः सूर्याख्यं “कृणुहि जगदालोकनार्थं कुरु । किंच "देवान् इन्द्रादीन् “मत्सि सोमेन तर्पय । मदेर्लटि ‘बहुलं छन्दसि' इति विकरणस्य लुक् । वाक्यभेदादनिघातः । अपि च हे सोम “तुभ्यं “विश्वानि सर्वाणि रक्षांसि “सुषहा सुसहान्यनायासेनैवाभिभवितुं शक्यानि भवन्ति । हिरवधारणे । अत एव हे “पवमान पूयमान हे “सोम सर्वान् “शत्रून् “बाधसे जहि ॥ ॥ ४ ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.९५

← सूक्तं ९.९४

ऋग्वेदः - मण्डल ९

सूक्तं ९.९५

प्रस्कण्वः काण्वः

सूक्तं ९.९६ →

दे. पवमानः सोमः। त्रिष्टुप्

कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।

नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः ॥१॥

हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावम् ।

देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे ॥२॥

अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।

नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ॥३॥

तं मर्मृजानं महिषं न सानावंशुं दुहन्त्युक्षणं गिरिष्ठाम् ।

तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ॥४॥

इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् ।

इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥५॥

सायणभाष्यम्

‘कनिक्रन्ति' इति पञ्चर्चं दशमं सूक्तं कण्वपुत्रस्य प्रस्कवस्यार्षम् । तथानुक्रम्यते--- कनिक्रन्ति प्रस्कण्वः' इति । पूर्ववच्छन्दोदेवते । गतो विनियोगः ॥

कनिंक्रंति॒ हरि॒रा सृ॒ज्यमां॑नः॒ सीद॒न्वनं॑स्य ज॒ठरें॑ पुना॒नः ।

नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः ॥१

कनिक्रन्ति । हरिः । आ । सृज्यमानः । सीदन् । वनस्य । जठरे । पुनानः ।

नृऽभिः । यतः । कृणुते । निःऽनिजम् । गाः । अतः । मतीः । जनयत । स्वधाभिः ॥१

कनिक्रन्ति । हरिः । आ । सृज्यमानः । सीदन् । वनस्य । जठरे । पुनानः ।

नृऽभिः । यतः । कृणुते । निःऽनिजम् । गाः । अतः । मतीः । जनयत । स्वधाभिः ॥१

“सृज्यमानः “आ समन्ताद्विसृज्यमानोऽभियूयमाणः “हरिः हरितवर्णः सोमः “कनिक्रन्ति पुनःपुनः शब्दायते । क्रन्दतेर्यङ्लुकि तिपीडभावे ‘ दाधर्ति दर्धर्ति इत्यादिना

निपातनादभ्यासस्य निगागमः । अभ्यस्तस्वरः । तथा “पुनानः पूयमानः “वनस्य वननीयस्य द्रोणकलशस्य “जठरे “सीदन् उपविशन् शब्दायते । किंच “नृभिः कर्मनेतृभिर्ऋत्विग्भिः “यतः संयतः सोमः “गाः गोविकारान् क्षीरादीन्याच्छादयन् “निर्णिजम् आत्मनो रूपं “कृणुते ग्रहादिषु करोति । “अतः अस्मै सोमाय “मतीः मननीयाः स्तुतीः “स्वधाभिः हविर्भिः सह “जनयत स्तोतारः अजनयन्। झस्यान्तादेशाभावः छान्दसः। यद्वा । हे स्तोतारः अस्मै सोमाय स्तुतीर्जनयत उत्पादयत । कुरुतेति यावत्॥

हरिः॑ सृजा॒नः प॒थ्या॑मृ॒तस्ये॑यर्ति॒ वाच॑मरि॒तेव॒ नाव॑म् ।

दे॒वो दे॒वानां॒ गुह्या॑नि॒ नामा॒विष्कृ॑णोति ब॒र्हिषि॑ प्र॒वाचे॑ ॥२

हरिः॑ । सृ॒जा॒नः । प॒थ्या॑म् । ऋ॒तस्य॑ । इय॑र्ति । वाच॑म् ।
अ॒रि॒ताऽइ॑व । नाव॑म् ।

दे॒वः । दे॒वाना॑म् । गुह्या॑नि । नाम॑ । आ॒विः । कृ॒णो॒ति॒ ।
ब॒र्हिषि॑ । प्र॒ऽवाचे॑ ॥२

हरिः । सृजानः । पथ्याम् । ऋतस्य । इयर्ति । वाचम् ।
अरिताऽइव । नावम् ।

देवः । देवानाम् । गुह्यानि । नाम । आविः । कृणोति ।
बर्हिषि । प्रऽवाचे ॥२

“सृजानः सृज्यमानः “हरिः हरितवर्णः सोमः “ऋतस्य सत्यभूतस्य “पथ्यां पथि भवां “वाचं दैवीम् “इयर्ति प्रेरयति । तत्र दृष्टान्तः । “अरितेव जनांस्तीरं प्रापयन्नाविकः “नावं यथा प्रेरयति तद्वत् । ‘ऋ गतौ । जौहोत्यादिकः । ‘ अर्तिपिपर्त्योः ० इत्यभ्यासस्येत्वम् ।

ततः “देवः दीप्यमानः सोमः "देवानाम् इन्द्रादीनां “गुह्यानि अन्तर्हितानि “नाम नामानि शरीराणि “प्रवाचे प्रकर्षेण वाचयित्रे स्तोत्रे “बर्हिषि यज्ञे “आविष्कृणोति स्तोतुमाविष्करोति ॥

अ॒पामि॒वेदू॒र्मय॒स्तर्तु॑राणा॒ः प्र म॑नी॒षा ई॑रते॒ सोम॒मच्छ॑ ।

न॒म॒स्यंती॒रुप॑ च॒ यंति॒ सं चा च॑ विशंत्युश॒तीरु॒शंत॑ं ॥३

अ॒पाम्ऽइ॑व । इत् । ऊ॒र्मय॑ः । तर्तु॑राणाः । प्र । म॒नी॒षाः । ई॒र॒ते॒ । सोम॑म् । अच्छ॑ ।

न॒म॒स्यन्ती॑ः । उप॑ । च॒ । यन्ति॑ । सम् । च॒ । आ । च॒ । वि॒श॒न्ति॒ । उ॒श॒तीः । उ॒शन्त॑म् ॥३

अपाम्ऽइव । इत् । ऊर्मयः । तर्तुराणाः । प्र । मनीषाः । ईरते । सोमम् । अच्छ ।

नमस्यन्तीः । उप । च । यन्ति । सम् । च । आ । च ।
विशन्ति । उशतीः । उशन्तम् ॥३

“अपामिव यथोदकानाम् “ऊर्मयः त्वरन्ते । “इत् इति पूरणः । तद्वत् “तर्तुराणाः कर्मणि देवान् स्तोतुं त्वरमाणाः । ‘तुर त्वरणे' । जौहोत्यादिकः । यङ्लुगन्तस्य शानचि रूपम् । अभ्यासस्यावर्णश्च रेफादेशश्छान्दसः । अभ्यस्तस्वरः। तादृशा ऋत्विजः “मनीषाः मनस ईशित्रीः स्तुतीः “सोममच्छ सोमं प्रति “प्र “ईरते प्रेरयन्ति। “नमस्यन्तीः नमस्यन्त्यः सोमं पूजयन्त्यः सत्यः तम् “उप “यन्ति “च उपगच्छन्ति तमेव “सं यन्ति “च । ‘ चवायोगे प्रथमा' इति न निघातः । ततः “उशतीः कामयमानाः स्तुतयः “उशन्तं कामयमानं सोमम् “आ “विशन्ति “च ॥

तं मंर्मृजा॒नं मंहि॒षं न सानां॒वं॒शुं दुंहंत्यु॒क्षणं गिरि॒ष्ठां ।

तं वांवशा॒नं म॒तयः॑ सचंते त्रि॒तो बिंभर्ति॒ वरुं॑णं समु॒द्रे ॥४

तम् । म॒र्मृ॒जा॒नम् । म॒हि॒षम् । न । सानौ॑ । अ॒ंशुम् । दु॒ह॒न्ति॒ । उ॒क्षणं॑म् । गि॒रि॒ऽस्थाम् ।

तम् । वा॒व॒शा॒नम् । म॒तयः॑ । स॒च॒न्ते॒ । त्रि॒तः । बि॒भ॒र्ति॒ । वरुं॑णम् । स॒मु॒द्रे ॥४

तम् । मर्मृजानम् । महिषम् । न । सानौ । अंशुम् । दुहन्ति । उक्षणम् । गिरिऽस्थाम् ।

तम् । वावशानम् । मतयः । सचन्ते । त्रितः । बिभर्ति । वरुणम् । समुद्रे ॥४

“मर्मजानं यष्टृभिः परिचर्यमाणं "महिषं “न महिषाख्यं मृगमिव "सानौ समुच्छ्रिते देशे वर्तमानम् “उक्षणं कामानां सेक्तारं “गिरिष्ठाम् अभिषवार्थं ग्रावसु निष्ठितं “तं तादृशं प्रसिद्धम् “अंशुं सोमं “दुहन्ति ऋत्विजो दुहते । ‘ ग्रावाणो

वत्सा ऋत्विजो दुहन्ति' (तै. सं. ६.२.११.४) इति तैत्तिरीयब्राह्मणम् । “तं तादृशं “वावशानं कामयमानं सोमं “मतयः मन्तव्याः स्तुतयः “सचन्ते समवयन्ति । सेवन्त इति यावत् । ततः “त्रितः त्रिषु स्थानेषु वर्तमान इन्द्रः “वरुणं शत्रूणां निवारकमेनं सोमं “समुद्रे अन्तरिक्षे “बिभर्ति शत्रुवधार्थं धारयति । यद्वा । त्रितस्त्रिषु स्थानेषु द्रोणाधवनीयपूतभृदाख्येषु कलशेषु ततो विततः सोमः शत्रूणां निवारकमिन्द्रं द्युलोके बिभर्ति पोषयति ॥

इष्यन्वाचंमुपवक्तेव होतुः पुनान इंदो वि ष्यां मनीषां ।

इंद्रंश्च यत्क्षयंथः सौभंगाय सुवीर्यंस्य पतंयः स्याम ॥५

इष्यंन् । वाचंम् । उपवक्ताऽइंव । होतुः । पुनानः । इन्दो इतिं । वि । स्य । मनीषाम् ।

इन्द्रः᳚ । च॒ । यत् । क्षयं॑थः । सौभं॑गाय । सु॒ऽवीर्यं॑स्य । पतं॑यः । स्या॒म॒ ॥५

इष्यन् । वाचम् । उपवक्ताऽइव । होतुः । पुनानः । इन्दो इति । वि । स्य । मनीषाम् ।

इन्द्रः । च । यत् । क्षयथः । सौभगाय । सुऽवीर्यस्य । पतयः । स्याम ॥५

हे "इन्दो सोम “वाचं स्तुतिम् “इष्यन् प्रेरयन् “होतुः “उपवक्तेव यथाध्वर्युः प्रतिगरं कुर्वन् प्रोत्साहयति तद्वत् स्तोतॄणां शंसनाय प्रोत्साहं कुर्वन् “पुनानः पूयमानस्त्वं “मनीषां बुद्धिं “वि “ष्य विमुञ्च । किंतु बुद्धिं धनप्रदानाभिमुखीं कुरु । किंच “यत् यदा “इन्द्रश्च त्वं च सह यज्ञे “क्षथथः निवसथः तदा स्तोतारो वयं “सौभगाय सौभाग्याय स्याम । किंच “सुवीर्यस्य शोभनवीर्योपेतस्य धनस्य “पतयः स्वामिनः “स्याम भवेम ॥ ॥ ५ ॥

टिप्पणी

९.९५.२ हरिः ।सृजानः पथ्याम् ऋतस्य इति

बर्हि में सोम एक ऐसी 'ऋतस्य पथ्या' की सृष्टि करने वाला तथा अभिव्यक्ति (वाक्) को प्रेरित करने वाला कहा गया जिसमें वह देवों के गुह्य नामों को प्रकट करता है। - बर्हिशब्दस्य विवेचनम् (http://puranastudy.freevar.com/Antariksha_Paryaya/pva18.htm)

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.९६

ऋग्वेदः - मण्डल ९
← सूक्तं ९.९५
सूक्तं ९.९६
दैवोदासिः प्रतर्दनः
सूक्तं ९.९७ →

दे. पवमानः सोमः। त्रिष्टुप्

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।

भद्रान्कृण्वन्निन्द्रहवान्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥१॥

समस्य हरिं हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः ।

आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥२॥

स नो देव देवताते पवस्व महे सोम प्सरस इन्द्रपानः ।

कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः ॥३॥

अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते ।

तदुशन्ति विश्व इमे सखायस्तदहं वश्मि पवमान सोम ॥४॥

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।

जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥५॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।

श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥६॥

प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः ।

अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥७॥

स मत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष ।

इन्द्रायेन्दो पवमानो मनीष्यंशोरूर्मिमीरय गा इषण्यन् ॥८॥

परि प्रियः कलशे देववात इन्द्राय सोमो रण्यो मदाय ।

सहस्रधारः शतवाज इन्दुर्वाजी न सप्तिः समना जिगाति ॥९॥

स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ ।

अभिशस्तिपा भुवनस्य राजा विदद्गातुं ब्रह्मणे पूयमानः ॥१०॥

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।

वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥११॥

यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् ।

एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि ॥१२॥

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।

अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः ॥१३॥

वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ ।

सं सिन्धुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ॥१४॥

एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः ।

पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळ्हा ॥१५॥

स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम ।

अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम ॥१६॥

शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति वह्निं मरुतो गणेन ।

कविर्गीर्भिः काव्येना कविः सन्सोमः पवित्रमत्येति रेभन् ॥१७॥

ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।

तृतीयं धाम महिषः सिषासन्सोमो विराजमनु राजति ष्टुप् ॥१८॥

चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।

अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥१९॥

मर्यो न शुभ्रस्तन्वं मृजानोऽत्यो न सृत्वा सनये धनानाम् ।

वृषेव यूथा परि कोशमर्षन्कनिक्रदच्चम्वोरा विवेश ॥२०॥

पवस्वेन्दो पवमानो महोभिः कनिक्रदत्परि वाराण्यर्ष ।

क्रीळञ्चम्वोरा विश पूयमान इन्द्रं ते रसो मदिरो ममत्तु ॥२१॥

प्रास्य धारा बृहतीरसृग्रन्नक्तो गोभिः कलशाँ आ विवेश ।

साम कृण्वन्सामन्यो विपश्चित्क्रन्दन्नेत्यभि सख्युर्न जामिम् ॥२२॥

अपघ्नन्नेषि पवमान शत्रून्प्रियां न जारो अभिगीत इन्दुः ।

सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ॥२३॥

आ ते रुचः पवमानस्य सोम योषेव यन्ति सुदुघाः सुधाराः ।

हरिरानीतः पुरुवारो अप्स्वचिक्रदत्कलशे देवयूनाम् ॥२४॥

सायणभाष्यम्

‘प्र सेनानीः' इति चतुर्विंशत्यृचमेकादशं सूक्तं दिवोदासपुत्रस्य प्रतर्दनाख्यस्य राजर्षेरिदं त्रैष्टुभं पवमानसोमदेवताकम् । तथा चानुक्रम्यते-’ प्र सेनानीश्चतुर्विंशतिर्दैवोदासिः प्रतर्दनः' इति । गतः सूक्तविनियोगः ॥

प्र सेंना॒नीः शूरो॒ अग्रे॒ रथा॑नां ग॒व्यन्ने॑ति॒ हर्ष॑ते अस्य॒ सेना॑ ।

भ॒द्रान्कृ॒ण्वन्नि॑न्द्रह॒वान्त्सखि॑भ्य॒ आ सोमो॒ वस्त्रा॑ रभ॒सानि॑ दत्ते ॥१

प्र । से॒ना॒ऽनीः । शूरः॑ । अग्रे॑ । रथा॑नाम् । ग॒व्यन् । ए॒ति॒ । हर्ष॑ते । अ॒स्य॒ । सेना॑ ।

भ॒द्रान् । कृ॒ण्वन् । इ॒न्द्र॒ऽह॒वान् । सखि॑ऽभ्यः । आ । सोमः॑ । वस्त्रा॑ । र॒भ॒सानि॑ । द॒त्ते॒ ॥१

प्र । सेनाऽनीः । शूरः । अग्रे । रथानाम् । गव्यन् । एति । हर्षते । अस्य । सेना ।

भद्रान् । कृण्वन् । इन्द्रऽहवान् । सखिऽभ्यः । आ । सोमः । वस्त्रा । रभसानि । दत्ते ॥१

“सेनानीः सेनानामग्र उपनेता “शूरः शत्रूणां बाधकः “सोमः “गव्यन् शत्रूणां गा इच्छन् । यद्वा । यजमानानां पश्वादिकमिच्छन् । “रथानाम् “अग्रे रथानां पुरतः “प्र “ऐति प्रकर्षेण संग्रामं गच्छति । “अस्य सोमस्य “सेना च “हर्षते हृष्यति । वाक्यभेदादनिघातः । किंच “सखिभ्यः समानख्यानेभ्यो यजमानेभ्यः “इन्द्रहवान् तैः कृतानीन्द्रस्याह्वानानि “भद्रान् कल्याणानि यथार्थानि “कृण्वन् कुर्वन् । आहूतो हीन्द्रः सोमं पीत्वा कामान् प्रयच्छतीति । “रभसानि इन्द्रस्य वेगेनागमने निमित्तानि

वस्त्राण्याच्छादकानि पयःप्रभृतीन्याश्रयणानि “आ “दत्ते आगृह्णाति ॥

समंस्य॒ हरि॑ं हरंयो मृजंत्यश्वह॒यैरनिंशित॒ं नमोंभिः ।

आ तिंष्ठति॒ रथ॒मिंद्रंस्य॒ सखां वि॒द्वाँ एंना सुम॒तिं या॒त्यच्छं ॥ २

सम् । अ॒स्य॒ । हरिंम् । हरंयः । मृ॒ज॒न्ति॒ । अ॒श्व॒ऽह॒यैः । अनिंऽशितम् । नमःऽभिः ।

आ । ति॒ष्ठ॒ति॒ । रथंम् । इन्द्रंस्य । सखां । वि॒द्वान् । ए॒न॒ । सु॒ऽम॒तिम् । या॒ति॒ । अच्छं ॥२

सम् । अस्य । हरिम् । हरयः । मृजन्ति । अश्वऽहयैः । अनिऽशितम् । नमःऽभिः ।

आ । तिष्ठति । रथम् । इन्द्रस्य । सखा । विद्वान् । एन । सुऽमतिम् । याति । अच्छ ॥२

“हरयः हरन्त्यभिषुण्वन्ति सोममित्यृत्विजोऽङ्गुलयो वा “हरिं हरितवर्णम् “अस्य सोमस्य कारणमंशुं “सं “मृजन्ति सम्यगभिषुण्वन्ति । ततः सोमः “नमोभिः नामयितृभिः “अश्वहयैः । व्याप्तैरपि “अनिशितम् असंस्कृतमयुक्तमननुगतं “रथं रमणसाधनमात्मीयं दशापवित्रम् “आ “तिष्ठति आसीदति । अनन्तरम् “इन्द्रस्य “सखा सखिभूतः “विद्वान् प्राज्ञः सोमः “एना एतेन रथेन पवित्रेण “सुमतिं शोभनस्तुतिकं स्तोतारम् “अच्छ “याति अभिगच्छति । तस्मिन् काले तेन क्रियमाणां स्तुतिमभिगच्छतीत्यर्थः ॥

स नों देव देवतांते पवस्व महे सोंम प्सरंस इंद्रपानः ।

कृ॒ण्वन्न॒पो व॒र्षयं॒द्यामु॒तेमामु॒रोरा नों वरिवस्या पुना॒नः ॥३

सः । न॒ः । दे॒व॒ । दे॒वऽतांते । प॒व॒स्व॒ । म॒हे । सो॒म॒ । प्सरंसे । इ॒न्द्र॒ऽपानः॑ ।

कृ॒ण्वन् । अ॒पः । व॒र्षयंन् । द्याम् । उ॒त । इ॒माम् । उ॒रोः । आ । न॒ः । व॒रि॒व॒स्य॒ । पु॒ना॒नः ॥३

सः । नः । देव । देवऽताते । पवस्व । महे । सोम । प्सरसे । इन्द्रऽपानः ।

कृण्वन् । अपः । वर्षयन् । द्याम् । उत । इमाम् । उरोः । आ । नः । वरिवस्य । पुनानः ॥३

हे देव द्योतमान हे “सोम “सः तादृशः “इन्द्रपानः इन्द्रेण पातव्यस्त्वं “नः अस्माकं स्वभूते “देवताते देवैस्तते वितते यज्ञे “महे महते “प्सरसे भक्षणायेन्द्रस्य पानाय "पवस्व ग्रहादिषु क्षर। किंच “अपः उदकानि “कृण्वन् कुर्वन् “उत

अपि च “द्याम् “इमां द्यावापृथिव्यौ “वर्षयन् । भूमिं पर्जन्यरूपेण तर्पयति द्युलोकमग्निरूपेणेति । ‘ भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ' (ऋ. सं. १.१६४.५१) इति श्रवणात् । "उरोः विस्तीर्णादन्तरिक्षात् “आ आगच्छंस्त्वं “पुनानः पूयमानः सन् “नः अस्मान् “वरिवस्य धनादिप्रदानेन परिचरेति ॥

अजीं॑तयेऽहं॑तये पवस्व स्व॒स्तयें॑ स॒र्वतां॑तये बृह॒ते ।

तदुं॑शंति॒ विश्वं॑ इ॒मे सखा॑य॒स्तद॒हं वं॑श्मि पवमान सोम ॥४

अजीं॑तये । अहं॑तये । प॒व॒स्व॒ । स्व॒स्तयें॑ । स॒र्वऽतां॑तये । बृ॒ह॒ते ।

तत् । उ॒श॒न्ति॒ । विश्वें॑ । इ॒मे । सखा॑यः । तत् । अ॒हम् । व॒श्मि॒ । प॒व॒मा॒न॒ । सो॒म॒ ॥४

अजीतये । अहतये । पवस्व । स्वस्तये । सर्वऽतातये । बृहते ।

तत् । उशन्ति । विश्वे । इमे । सखायः । तत् । अहम् । वश्मि । पवमान । सोम ॥४

हे सोम “अजीतये यथा वय शत्रुभिरजिता भवेम तथा तेषामजयाय “अहतये यथा तैरहताः स्याम तस्यै च अत एव “स्वस्तये अविनाशाय किंच “बृहते “सर्वतातये सर्वैरिन्द्रादिभिर्देवैः तायमानाय यज्ञाय एतदर्थं “पवस्व अस्मदभिमुखमागच्छ । पविर्गतिकर्मा । “विश्वे सर्वे “इमे मदीयाः “सखायः स्तोतारः “तत् त्वदीयं रक्षणम् "उशन्ति कामयन्ते । हे “पवमान “सोम “तत् रक्षणम् “अहम् अपि “वश्मि कामये ॥

सोमः॑ पवते जनि॒ता मं॑ती॒नां जं॑नि॒ता दि॒वो जं॑नि॒ता

पृं॒थि॒व्याः ।

ज॒नि॒ताग्नेर्जं॑नि॒ता सूर्यं॑स्य जनि॒तेंद्रं॑स्य जनि॒तोत विष्णोः॑ ॥ ५

सोमः॑ । प॒व॒ते॒ । ज॒नि॒ता । म॒ती॒नाम् । ज॒नि॒ता । दि॒वः । ज॒नि॒ता । पृ॒थि॒व्याः ।

ज॒नि॒ता । अ॒ग्नेः । ज॒नि॒ता । सूर्यं॑स्य । ज॒नि॒ता । इन्द्रं॑स्य । ज॒नि॒ता । उ॒त । विष्णोः॑ ॥५

सोमः । पवते । जनिता । मतीनाम् । जनिता । दिवः । जनिता । पृथिव्याः ।

जनिता । अग्नेः । जनिता । सूर्यस्य । जनिता । इन्द्रस्य । जनिता । उत । विष्णोः ॥५

“सोमः अभिषूयमाणः “पवते पात्रेषु क्षरति । कीदृशः । “मतीनां बुद्धीनां यद्वा मननीयानां स्तुतीनां “जनिता जनयिता । ‘ जनिता मन्त्रे ' (पा. सू. ६.४.५३) इति निपातनाण्णिलोपः । किंच “दिवः द्युलोकस्य “जनिता प्रादुर्भावयिता तथा “पृथिव्याः जनयिता “अग्नेः जनयिता प्रकाशयिता “सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य “जनिता “इन्द्रस्य “जनिता पानेन मदस्य जनयिता “उत अपि च “विष्णोः ब्यापकस्य “जनिता जनयिता । एतत् सर्वं सोमेऽभिषूयमाणे भवतीति । सोमो हि देवानाप्याययतीति ॥ ॥ ६ ॥

देवसुवां हविःषु सोमस्य वनस्पतेः • ब्रह्मा देवानाम्' इति याज्या । सूत्र्यते च-’ त्वं च सोम नो वशो ब्रह्मा देवानां पदवीः कवीनाम् ' (आश्व. श्रौ. ४. ११) इति ॥

ब्र॒ह्मा दे॒वानां॑ पद॒वीः क॑वी॒नामृषि॒र्विप्रा॑णां महि॒षो मृ॒गाणा॑म् ।

श्ये॒नो गृध्रा॑णा॒ं स्वधि॑ति॒र्वना॑ना॒ं सोमः॑ प॒वित्र॒मत्ये॑ति॒ रेभ॑न् ॥
६

ब्र॒ह्मा । दे॒वाना॑म् । प॒द॒ऽवीः । क॒वी॒नाम् । ऋषिः॑ ।
विप्रा॑णाम् । म॒हि॒षः । मृ॒गाणा॑म् ।

श्ये॒नः । गृध्रा॑णाम् । स्वऽधि॑तिः । वना॑नाम् । सोमः॑ ।
प॒वित्र॑म् । अति॑ । ए॒ति॒ । रेभ॑न् ॥६

ब्रह्मा । देवानाम् । पदऽवीः । कवीनाम् । ऋषिः ।
विप्राणाम् । महिषः । मृगाणाम् ।

श्येनः । गृध्राणाम् । स्वऽधितिः । वनानाम् । सोमः ।
पवित्रम् । अति । एति । रेभन् ॥६

सोम एवंरूपो भवति । “देवानां स्तोत्रकारिणामृत्विजां “ब्रह्मा ब्रह्माख्यर्त्विक्स्थानीयो भवति । यद्वा । देवानां द्योतमानानामिन्द्रादीनां ब्रह्मा राजा भवति । तथा “कवीनां क्रान्तप्रज्ञानां “पदवीः । स्खलन्ति पदानि साधुत्वेन यो योजयति स पदवीः । वी गत्यादिष्वित्येतस्मात् क्विपि रूपम् । तथा “विप्राणां मेधाविनां मध्ये “ऋषिः भवति । यः परोक्षं पश्यति स ऋषिः ‘ ऋषिर्दर्शनात्' (निरु. २. ११) इति । “मृगाणां “महिषः भवति । महिषाख्यो बलवान् राजा भवति । तथा “गृध्राणां पक्षिविशेषाणां “श्येनः शंसनीयः पक्षिराजो भवति । “वनानाम् । वनतिर्हिंसाकर्मा। हिंसकानां छेदकानां मध्ये “स्वधितिः एतन्नामकछेदकोऽसि । एवं प्रभावः “सोमः “रेभन् शब्दायमानः सन् “पवित्रम् ऊर्णास्तुकेन कृतम् “अत्येति अतिगच्छति ॥

प्रावी॑विपद्वा॒च ऊ॒र्मिं न सिं॑धु॒र्गिर॒ः सोम॒ः पव॑मानो मनी॒षाः ।

अ॒न्तः पश्य॑न्वृ॒जने॒माव॑रा॒ण्या ति॑ष्ठति वृष॒भो गोषु॑ जा॒नन् ॥ ७

प्र । अ॒वी॒वि॒प॒त् । वा॒चः । ऊ॒र्मिम् । न । सिन्धु॑ः । गिर॑ः । सोम॑ः । पव॑मानः । म॒नी॒षाः ।

अ॒न्तरिति॑ । पश्य॑न् । वृ॒जना॑ । इ॒मा । अव॑राणि । आ । ति॒ष्ठ॒ति॒ । वृ॒ष॒भः । गोषु॑ । जा॒नन् ॥७

प्र । अवीविपत् । वाचः । ऊर्मिम् । न । सिन्धुः । गिरः । सोमः । पवमानः । मनीषाः ।

अन्तरिति । पश्यन् । वृजना । इमा । अवराणि । आ । तिष्ठति । वृषभः । गोषु । जानन् ॥७

“पवमानः “सोमः “मनीषाः मनस ईशिता हृदयंगमाः “गिरः स्तुतीः “प्रावीविपत् प्रकर्षेण वेपयति प्रेरयति । कथमिव । “सिन्धुः स्यन्दमाना नदीव “वाचः शब्दस्य “ऊर्मिं “न संघं यथा प्रेरयति तद्वत् । किंच “वृषभः कामानामुदकानां वा वर्षकः सोमः “अन्तः अन्तर्हितं वस्तुजातं “पश्यन् “अवराणि दुर्बलैर्वारयितुमशक्यानि “इमा “वृजना इमानि बलानि “आ “तिष्ठति आसीदति । किं कुर्वन् । “गोषु “जानन् गवां जानानः सन् परबलानि प्रविशति ।

स मंत्स॒रः पृ॒त्सु व॒न्वन्नवांतः स॒हस्रंरेता अ॒भि वाजंमर्ष ।

इंद्रांयेंदो॒ पवंमानो मनी॒ष्यं१॒॑ शोरू॒र्मिमीरय॒ गा इंष॒ण्यन् ॥८

सः । म॒त्स॒रः । पृत्ऽसु । व॒न्वन् । अवांतः । स॒हस्रंऽरेताः । अ॒भि । वाजंम् । अ॒र्ष॒ ।

इन्द्राय । इन्दो इति । पवमानः । मनीषी । अंशोः । ऊर्मिम् । ईरय । गाः । इषण्यन् ॥८

सः । मत्सरः । पृत्ऽसु । वन्वन् । अवातः । सहस्रऽरेताः । अभि । वाजम् । अर्ष ।

इन्द्राय । इन्दो इति । पवमानः । मनीषी । अंशोः । ऊर्मिम् । ईरय । गाः । इषण्यन् ॥८

“मत्सरः मदकरः “पृत्सु संग्रामेषु “वन्वन् शत्रून् हिंसन् अत एव “अवातः अन्यैर्गन्तुमशक्यः “सहस्ररेताः सहस्रोदकधारोपेतः “सः सोमः “वाजं शत्रूणां बलम् “अभि “अर्ष अभिगच्छ। हे “इन्दो सोम “पवमानः पूयमानः “मनीषी प्राज्ञस्त्वं “गा: “इषण्यन् शब्दान् प्रेरयन् । यद्वा । यजमानानां यज्ञसाधनभूता गाः प्रेरयन् । “इन्द्राय इन्द्रार्थम् “अंशोः अभिषूयमाणस्य सोमस्य “ऊर्मिं संघम् “ईरय प्रेरय ॥

परिं प्रि॒यः क॒लशें दे॒ववा॑त॒ इंद्रा॑य॒ सोमो॒ रण्यो॒ मदा॑य ।

स॒हस्रंधारः श॒तवा॑ज॒ इंदु॑र्वा॒जी न सप्ति॒ः समं॑ना जिगाति ॥ ९

परिं । प्रि॒यः । क॒लशें । दे॒वऽवा॑तः । इन्द्रा॑य । सोम॑ः ।
रण्य॑ः । मदा॑य ।

स॒हस्रंऽधारः । श॒तऽवा॑जः । इन्दु॑ः । वा॒जी । न । सप्ति॑ः ।
सम॑ना । जि॒गा॒ति॒ ॥९

परि । प्रियः । कलशे । देवऽवातः । इन्द्राय । सोमः ।
रण्यः । मदाय ।

सहस्रऽधारः । शतऽवाजः । इन्दुः । वाजी । न । सप्तिः ।
समना । जिगाति ॥९

“प्रियः प्रीणयिता अत एव “देववातः देवैरभिगतः “रण्यः रमणीयः “सोमः “इन्द्राय इन्द्रस्य “मदाय मदार्थं “कलशे द्रोणाभिधाने “परि “जिगाति परिगच्छति । कीदृशः । “सहस्रधारः बहुविधधारोपेतः “शतवाजः बहुबलः “इन्दुः पात्रेषु क्षरन् । तत्र दृष्टान्तः । “वाजी “न यथा वाजी बलवान् “सप्तिः अश्वः “समना । संग्रामनामैतत् । ‘सम ष्टम अवैक्लव्ये '। समन्ति धृष्टा भवन्ति योद्धारोऽत्रेति । तस्मिन् संग्रामे यथाश्वः जिगाति गच्छति तद्वत् ॥

स पू॒र्व्यो व॑सु॒विज्जाय॑मानो मृजा॒नो अ॒प्सु दु॑दुहा॒नो अद्रौ॑ ।

अ॒भि॒श॒स्ति॒पा भुव॑नस्य॒ राजा॑ वि॒दद्गा॒तुं ब्रह्म॑णे पू॒यमा॑नः ॥ १०

सः । पू॒र्व्यः । व॒सु॒ऽवित् । जाय॑मानः । मृ॒जा॒नः । अ॒प्ऽसु । दु॒दु॒हा॒नः । अद्रौ॑ ।

अ॒भि॒श॒स्ति॒ऽपाः । भुव॑नस्य । राजा॑ । वि॒दत् । गा॒तुम् ।
ब्रह्म॑णे । पू॒यमा॑नः ॥१०

सः । पूर्व्यः । वसुऽवित् । जायमानः । मृजानः । अप्ऽसु ।
दुदुहानः । अद्रौ ।

अभिशस्तिऽपाः । भुवनस्य । राजा । विदत् । गातुम् ।
ब्रह्मणे । पूयमानः ॥१०

“पूर्व्यः पुराणो यद्वा पूर्वैः कृतोऽभिषुतः "वसुवित् धनानां लम्भकः “जायमानः “अप्सु वसतीवर्याख्येषुदकेषु “मृजानः मृज्यमानः “अद्रौ अभिषवग्रावणि “दुदुहानः दुह्यमानः “अभिशस्तिपाः । अभितः शस्तिर्हिंसा येषां तेऽभिशस्तयः शत्रवः । तेभ्यः परिरक्षकः “भुवनस्य भूतजातस्य “राजा स्वामी एवंविधः “सः तादृशः सोमः “ब्रह्मणे कर्मार्थं “पूयमानः सन् “गातुं मार्गं समीचीनं “विदत् यजमानेभ्यः प्रयच्छति ॥ ॥ ७ ॥

महापितृयज्ञे पितरः सोमवन्तः इत्यस्य द्वितीयानुवाक्या
त्वया हि नः पितरः' इत्येषा। सूत्रितं च --
पितरोऽग्निष्वात्ता यम उदीरतामवर उत्परासस्त्वया हि नः
पितरः सोम पूर्वे' (आश्व. श्रौ. २. १९) इति ॥

त्वया॒ हि नः॑ पि॒तरः॑ सोम॒ पूर्वे॒ कर्मा॑णि च॒क्रुः प॑वमान॒ धीराः॑
।

व॒न्वन्नवा॑तः परि॒धीँरपो॑र्णु वी॒रेभि॒रश्वै॑र्म॒घवा॑ भवा नः ॥११

त्वया॑ । हि । न॒ः । पि॒तरः॑ । सो॒म॒ । पूर्वे॑ । कर्मा॑णि । च॒क्रुः
। प॒व॒मा॒न॒ । धीराः॑ ।

व॒न्वन् । अवा॑तः । प॒रि॒ऽधीन् । अप॑ । ऊ॒र्णु॒ । वी॒रेभिः॑ ।
अश्वैः॑ । म॒घऽवा॑ । भ॒व॒ । न॒ः ॥११

त्वया । हि । नः । पितरः । सोम । पूर्वे । कर्माणि । चक्रुः । पवमान । धीराः ।

वन्वन् । अवातः । परिऽधीन् । अप । ऊर्णु । वीरेभिः । अश्वैः । मघऽवा । भव । नः ॥११

हे "पवमान पूयमान “सोम “धीराः कर्मणि कुशलाः प्राज्ञाः “नः अस्माकं “पितरः “पूर्वे पुरातना अङ्गिरसः “त्वया । हिरवधारणे । त्वया सहायेनैव "कर्माणि अग्निष्टोमादीनि “चक्रुः कृतवन्तः । किंच “वन्वन् स्तोतॄन संभजन् । यद्वा । वनतिर्हिंसार्थः। शत्रून् हिंसन' । “अवातः तैरभिगतस्त्वं “परिधीन् । परिधीयत एभिः सर्वमिति परिधयो राक्षसाः। तान् “अपोर्णु अपोर्णुहि अपच्छादय । जहीति यावत् । ऊर्णोतेर्लोटि छान्दसो हेर्लुक् । एतादृशस्त्वं “नः अस्माकं पुत्रादियुक्तं धनं प्रयच्छेत्यर्थः ॥

यथापंवथा मनंवे वयोधा अंमित्रहा वंरिवोविद्धविष्मांन् ।

एवा पंवस्व द्रविंणं दधांन इंद्रे सं तिंष्ठ जनयायुंधानि ॥१२

यथां । अपंवथाः । मनंवे । वयःऽधाः । अमित्रऽहा ।
वरिवःऽवित् । हविष्मांन् ।

एव । पवस्व । द्रविंणम् । दधांनः । इन्द्रें । सम् । तिष्ठ ।
जनयं । आयुंधानि ॥१२

यथा । अपवथाः । मनवे । वयःऽधाः । अमित्रऽहा ।
वरिवःऽवित् । हविष्मान् ।

एव । पवस्व । द्रविणम् । दधानः । इन्द्रे । सम् । तिष्ठ ।
जनय । आयुधानि ॥१२

हे सोम “यथा पुरा त्वं “मनवे राज्ञे “वयोधाः अन्नस्य धाता तथा “अमित्रहा शत्रूणां हन्ता “वरिवोवित् धनस्य लम्भयिता “हविष्मान् पुरोडाशादियुक्तः सन् “अपवथाः तस्मै धनादिकं प्रदातुं यथागच्छः एवमस्मभ्यमपि “द्रविणं धनं “दधानः प्रयच्छन् “पवस्व अस्मदभिमुखमागच्छ । किंच अस्माभिर्दीयमानस्त्वम् “इन्द्रे “सं “तिष्ठ सम्यक् तिष्ठ । अपि च “आयुधानि त्वदीयानि “जनय तस्मै प्रकाशय । वाक्यभेदादनिघातः ॥

पवं॑स्व सोम॒ मधुं॑माँ ऋ॒तावा॒पो वसां॑नो॒ अधि॒ सानो॒ अव्ये॑ ।

अव॒ द्रोणा॑नि घृ॒तवां॑ति सीद म॒दिंत॑मो मत्स॒र इं॑द्र॒पानः॑ ॥
१३

पवं॑स्व । सो॒म॒ । मधुं॑ऽमान् । ऋ॒तऽवा॑ । अ॒पः । वसा॑नः । अधिं॑ । सानौ॑ । अव्ये॑ ।

अव॑ । द्रोणा॑नि । घृ॒तऽव॑न्ति । सी॒द॒ । म॒दिन्ऽत॑मः ।
म॒त्स॒रः । इ॒न्द्र॒ऽपानः᳚ ॥१३

पवस्व । सोम । मधुऽमान् । ऋतऽवा । अपः । वसानः ।
अधि । सानौ । अव्ये ।

अव । द्रोणानि । घृतऽवन्ति । सीद । मदिन्ऽतमः ।
मत्सरः । इन्द्रऽपानः ॥१३

हे सोम “मधुमान् मदकररसोपेतः “ऋतावा यज्ञवान् । 'छन्दसीवनिपौ' इति वनिब्मत्वर्थीयः । तादृशस्त्वम् “अपः वसतीवरीरेकधनाश्च “वसानः आच्छादयन् “अधि अधिकं “सानौ समुच्छ्रिते अव्ये अविभवे पवित्रे “पवस्व क्षर । ततः “मदिन्तमः अतिशयेन मदकरः “इन्द्रपानः इन्द्रेण पातव्यः “मत्सरः मादयिता सोमः “घृतवन्ति उदकवतः “द्रोणानि द्रोणकलशान् “अव “सीद अवतिष्ठस्व ॥

वृ॒ष्टिं॑ दि॒वः श॒तधा॑रः पवस्व सहस्र॒सा वा॑ज॒युर्दे॒ववी॑तौ ।

सं सिंधु॑भिः क॒लशे॑ वावश॒ानः समु॒स्रिया॑भिः प्रति॒रन्न॒ आयुः॑
॥१४

वृ॒ष्टिम् । दि॒वः । श॒तऽधा॑रः । प॒व॒स्व॒ । स॒ह॒स्र॒ऽसाः ।
वा॒ज॒ऽयुः । दे॒वऽवी॑तौ ।

सम् । सिन्धु॑ऽभिः । क॒लशे॑ । वा॒व॒श॒ानः । सम् ।
उ॒स्रिया॑भिः । प्र॒ऽति॒रन् । नः॒ । आयुः॑ ॥१४

वृष्टिम् । दिवः । शतऽधारः । पवस्व । सहस्रऽसाः ।
वाजऽयुः । देवऽवीतौ ।

सम् । सिन्धुऽभिः । कलशे । वावशानः । सम् ।
उस्रियाभिः । प्रऽतिरन् । नः । आयुः ॥१४

हे सोम “शतधारः बहुधारोपेतः त्वं “दिवः अन्तरिक्षादादित्याद्वा “वृष्टिं “पवस्व कुरु । यद्वा । शतधारो बहुधात्मीयधारोपेतस्त्वं “दिवो द्योतमानात् पवित्रात् वृष्टिमविच्छिन्नधारां पवस्व पात्रेषु कुरु । कीदृशः । “देववीतौ । देवानां वीतिर्हविर्भक्षणं यस्मिन् स देववीतिर्यज्ञः। तस्मिन् “सहस्रसाः यजमानानां सहस्रस्य धनस्य दाता “वाजयुः तेषामन्नं कामयमानस्त्वं “सिन्धुभिः स्यन्दमानाभिः वसतीवरीभिः “कलशे द्रोणाभिधाने “सं गच्छस्व । तथा त्वं “नः अस्माकम् "आयुः जीवनं प्रतिरन् वर्धयन् “उस्रियाभिः गोविकारैः क्षीरादिभिश्च कलशे “सं गच्छस्व ।।

ए॒ष स्य सोमों म॒तिभिः॑ पुना॒नोऽत्यो॒ न वा॒जी तर॒तीदरांतीः ।

पयो॒ न दु॒ग्धमदिं॑तेरिषि॒रमु॒र्वि॑व गा॒तुः सु॒यमो॒ न वोळ्हा॑ ॥
१५

ए॒षः । स्यः । सोमः॑ । म॒तिऽभिः॑ । पु॒ना॒नः । अत्यः॑ । न ।
वा॒जी । तरं॑ति । इत् । अरा॑तीः ।

पयः॑ । न । दु॒ग्धम् । अदिं॑तेः । इ॒षि॒रम् । उ॒रुऽइं॑व । गा॒तुः ।
सु॒ऽयमः॑ । न । वोळ्हा॑ ॥१५

एषः । स्यः । सोमः । मतिऽभिः । पुनानः । अत्यः । न ।
वाजी । तरति । इत् । अरातीः ।

पयः । न । दुग्धम् । अदितेः । इषिरम् । उरुऽइव । गातुः ।
सुऽयमः । न । वोळ्हा ॥१५

“एष एतादृशः “स्यः सः “सोमः “मतिभिः मननसाधनैः स्तोत्रैः “पुनानः पूयमानो भवति । यः सोमः “अत्यो “न अतनशीलः “वाजी अश्व इव संग्रामे “अरातीः अरातीन्

शत्रून् “तरति । “इत् अवधारणे । तरत्येव हिनस्त्येव । यद्वृत्तयोगादनिघातः। किंच “अदितेः । गोनामैतत् । अदीनाया गोः “इषिरम् अन्वेषणीयं “दुग्धं “पयो ”न क्षीरं यथा पूतं भवति एवं सोमः परिशुद्धः । अपि च “उर्विव। ‘सुपां सुलुक् इति सोर्लुक् । उरुर्विस्तीर्णः “गातुः मार्ग इव सर्वैः समाश्रयणीयस्तथा “वोळ्हा वोढाश्वः “सुयमः सुष्ठु नियन्तुं शक्यो यथा भवति तद्वदयं सोमः स्तोतृभिः नियन्तव्यो भवति ॥ ॥ ८ ॥

स्वा॒यु॒धः सो॒तृभिः॑ पू॒यमा॑नो॒ऽभ्य॑र्ष॒ गुह्यं॒ चारु॒ नाम॑ ।

अ॒भि वाजं॒ सप्ति॑रिव श्रव॒स्याभि वा॒युम॒भि गा दे॑व सोम ॥ १६

सु॒ऽआ॒यु॒धः । सो॒तृऽभिः॑ । पू॒यमा॑नः । अ॒भि । अ॒र्ष॒ । गुह्य॑म् । चारु॑ । नाम॑ ।

अ॒भि । वाज॑म् । सप्ति॑ःऽइव । श्र॒व॒स्या । अ॒भि । वा॒युम् । अ॒भि । गाः । दे॒व॒ । सो॒म॒ ॥१६

सुऽआयुधः । सोतृऽभिः । पूयमानः । अभि । अर्ष । गुह्यम् । चारु । नाम ।

अभि । वाजम् । सप्तिःऽइव । श्रवस्या । अभि । वायुम् । अभि । गाः । देव । सोम ॥१६

“स्वायुधः शोभनायुधोपेतः । यद्वा । यज्ञे स्फ्यकपालादीनि दशायुधानि सन्ति । तद्वान् । “सोतृभिः अभिषुण्वद्भिः “पूयमानः त्वं “गुह्यं गुहायां निहितं “चारु कमनीयं “नाम त्वदीयं रसात्मकं शरीरं स्तुतिभिः सह “अभ्यर्ष कलशादीन्यभिगमय । किंच “सप्तिरिव अश्व इव वर्तमानस्त्वं “श्रवस्या । ‘सुपां सुलुक्' इति सप्तम्या आजादेशः । अस्मदीयायामन्नेच्छायां “वाजम् अन्नमस्मभ्यम् “अभि गमय । अपि च हे “देव स्तोतव्य हे

“सोम “वायुं प्राणं जीवनम् “अभि गमय । “गाः पशूंश्चास्मभ्यम् “अभि गमय ।

शिशुं जज्ञानं हर्यतं मृजंति शुंभंति वह्निं मरुतो गणेनं ।

कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभंन् ॥१७

शिशुम् । जज्ञानम् । हर्यतम् । मृजन्ति । शुम्भन्ति । वह्निम् । मरुतः । गणेनं ।

कविः । गीःऽभिः । काव्येन । कविः । सन् । सोमः । पवित्रम् । अति । एति । रेभन् ॥१७

शिशुम् । जज्ञानम् । हर्यतम् । मृजन्ति । शुम्भन्ति । वह्निम् । मरुतः । गणेन ।

कविः । गीःऽभिः । काव्येन । कविः । सन् । सोमः । पवित्रम् । अति । एति । रेभन् ॥१७

“शिशुम् इदानीमुत्पन्नत्वाच्छिशुवत्तिष्ठन्तम् । यद्वा । पापानि तनूकुर्वन्तं विनाशयन्तम् । “जज्ञानं प्रादुर्भूतमत एव “हर्यतम् । हर्य गतिकान्त्योः । ‘ भृमृद्दशि' इत्यादिनातच् । सर्वैः काम्यमानं सोमं “मृजन्ति “मरुतः शोधयन्ति । किंच “वह्निं वोढारं सोमं “गणेन आत्मीयेन सप्तसंख्याकेन गणेन “शुम्भन्ति अलंकुर्वन्ति । ततः “कविः क्रान्तप्रज्ञः “सोमः “काव्येन कविकर्मणैव “कविः शब्दोपेतः “सन् “रेभन् शब्दायमानः “गीर्भिः स्तुतिभिः सह “पवित्रमत्येति अतीत्य गच्छति ॥

ऋषिंमना य ऋंषिकृत्स्वर्षाः सहस्रंणीथः पदवीः कंवीनां ।

तृ॒तीयं॒ धामं महि॒षः सिषांस॒न्त्सोमों वि॒राज॒मनुं राजति॒ ष्टुप्
॥१८

ऋषिंऽमनाः । यः । ऋ॒षि॒ऽकृत् । स्व॒ःऽसाः । स॒हस्रंऽनीथः
। प॒द॒ऽवीः । क॒वी॒नाम् ।

तृ॒तीयंम् । धामं । म॒हि॒षः । सिसांसन् । सोमः॑ । वि॒ऽराजंम्
। अनुं । रा॒ज॒ति॒ । स्तुप् ॥१८

ऋषिऽमनाः । यः । ऋषिऽकृत् । स्वःऽसाः । सहस्रऽनीथः
। पदऽवीः । कवीनाम् ।

तृतीयम् । धाम । महिषः । सिसासन् । सोमः । विऽराजम्
। अनु । राजति । स्तुप् ॥१८

“ऋषिमना: सर्वदर्शनशीलमनस्कः अत एव “ऋषिकृत्
सर्वस्य दर्शनकर्ता प्रकाशनस्य कर्ता “स्वर्षाः सर्वस्य
सूर्यस्य वा संभक्ता “सहस्रणीथः । नीथा स्तुतिः ।

बहुविधस्तुतिकः “कवीनां क्रान्तप्रज्ञानां मध्ये “पदवीः स्खलतां पदानां साधुत्वेन संयोजयिता “यः सोमो विद्यते सः “महिषः महान् पूज्यो वा "सोमः “तृतीयं “धाम द्युलोकं “सिषासन् संभक्तुमिच्छन् “स्तुप् स्तूयमानः सन् “विराजं विशेषेण राजन्तं दीप्यमानमिन्द्रम् “अनु “राजति प्रकाशयति ॥

चमूषच्छ्येनः शंकुनो विभृत्वां गोविन्दुर्द्रप्स आयुंधानि बिभ्रंत् ।

अपामूर्मिं सचंमानः समुद्रं तुरीयं धामं महिषो विंवक्ति ॥ १९

चमूऽसत् । श्येनः । शकुनः । विऽभृत्वां । गोऽविन्दुः । द्रप्सः । आयुंधानि । बिभ्रंत् ।

अ॒पाम् । ऊ॒र्मिम् । सचं॑मानः । स॒मु॒द्रम् । तु॒रीयं॑म् । धामं॑ । म॒हि॒षः । वि॒व॒क्ति॒ ॥१९

चमूऽसत् । श्येनः । शकुनः । विऽभृत्वा । गोऽविन्दुः । द्रप्सः । आयुधानि । बिभ्रत् ।

अपाम् । ऊर्मिम् । सचमानः । समुद्रम् । तुरीयम् । धाम । महिषः । विवक्ति ॥१९

"चमूषत् । चमन्ति भक्षयन्त्यत्रेति चम्वश्चमसाः । तेषु सीदन् । यद्वा । चम्वावधिषवणफलके । तयोर्वर्तमानः । "श्येनः शंसनीयः "शकुनः शक्तः सामर्थ्यकारी "विभृत्वा । हरतेः ' आतो मनिन्" इत्यादिना क्वनिप् । पात्रेषु विहरणशीलः "गोविन्दुः यजमानानां गवां लम्भकः । ' विन्दुरिच्छुः । (पा. सू. ३, २. १६९) इत्युप्रत्ययान्तत्वेन निपातितः । "द्रप्सः द्रवणशीलः "आयुधानि स्फ्यकपालादीनि "बिभ्रत् धारयन् "अपाम् उदकानाम्

“ऊर्मिं प्रेरकं “समुद्रम् । अन्तरिक्षनामैतत् । अन्तरिक्षलोकं “सचमानः सेवमानः “महिषः महान् य एवंविधः सोमः स सोमः “तुरीयं चतुर्थं “धाम चान्द्रमसं स्थानं “विवक्ति सेवते । सूर्यलोकस्योपरि चन्द्रमसो लोको विद्यत इति यमः पृथिव्या अधिपतिः स मावतु इत्यादिभिः चन्द्रमा नक्षत्राणामधिपतिः स मावतु इत्यन्तैर्मन्त्रैर्ज्ञायते (तै. सं. ३. ४. ५. १)॥

मर्यो॒ न शु॒भ्रस्त॒न्वं॑ मृजा॒नोऽत्यो॒ न सृत्वा॑ स॒नये॒ धना॑नां ।

वृषे॑व यू॒था परि॒ कोश॒मर्ष॒न्कनि॑क्रदच्च॒म्वो॒३॒॑रा वि॑वेश ॥२०

मर्यः॑ । न । शु॒भ्रः । त॒न्व॑म् । मृ॒जा॒नः । अत्यः॑ । न । सृत्वा॑ । स॒नये॑ । धना॑नाम् ।

वृषांऽइव । यू॒था । परिं । कोशंम् । अर्षंन् । कनिंक्रदत् । च॒म्वोः॑ । आ । वि॒वे॒श॒ ॥२०

मर्यः । न । शुभ्रः । तन्वम् । मृजानः । अत्यः । न । सृत्वा । सनये । धनानाम् ।

वृषाऽइव । यूथा । परि । कोशम् । अर्षन् । कनिक्रदत् । चम्वोः । आ । विवेश ॥२०

“शुभ्रः दीप्यमानोऽलंकृतः “मर्यो “न मनुष्य इव “तन्वम् आत्मीयं शरीरं “मृजानः वसतीवरीभिः शोधयन् किंच “धनानां “सनये संभजनाय लाभाय “अत्यो “न अतनशीलोऽश्व इव "सृत्वा सरणशीलः अपि च “वृषेव वृषा यथा यूथानि प्रतिगच्छन् शब्दं करोति तद्वत् “कोशम् अधिषवणचर्मणा कृतं पात्रं “परि अर्षन् प्रतिगच्छन् सोमः "कनिक्रदत् पुनःपुनः शब्दं कुर्वन् “चम्वोः अधिषवणफलकयोः “आ “विवेश आविशति ॥

कनिक्रदत् । क्रदेर्यङ्लुकि ' दाधर्ति दर्धर्ति' इत्यादिना निपातनादभ्यासस्य निगागमः । तस्य शतरि ‘ अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥ ॥ ९ ॥

पवं॑स्वें॑दो॒ पवं॑मानो॒ महो॑॑भिः॒ कनिं॑क्रद॒त्परि॒ वारां॑ण्यर्ष ।

क्रीळं॑च॒म्वो॒३॒॑रा विंश पू॒यमां॑न॒ इंद्रं॑ ते॒ रसों॑ मदि॒रो मं॑मत्तु ॥ २१

पवं॑स्व । इ॒न्दो॒ इतिं॑ । पवं॑मानः । महः॑ऽभिः । कनिं॑क्रदत् । परिं॑ । वारां॑णि । अ॒र्ष॒ ।

क्रीळं॑न् । च॒म्वोः॑ । आ । वि॒श॒ । पू॒यमां॑नः । इन्द्रं॑म् । ते॒ । रसः॑ । म॒दि॒रः । म॒म॒त्तु ॥२१

पवस्व । इन्दो इति । पवमानः । महःऽभिः । कनिक्रदत् । परि । वाराणि । अर्ष ।

क्रीळन् । चम्वोः । आ । विश । पूयमानः । इन्द्रम् । ते । रसः । मदिरः । ममत्तु ॥२१

हे “इन्दो सोम “महोभिः पूजकैर्ऋत्विग्भिः “पवमानः पूयमानस्त्वं “पवस्व क्षर । ततः “कनिक्रदत् भृशं शब्दं कुर्वन् “वाराणि अवेर्वालानि पवित्राणि “परि “अर्ष परिगच्छ । किंच “पूयमानः त्वं “चम्वोः अधिषवणफलकयोः “क्रीळन संक्रीडमानः सन् “आ “विश पात्राणि प्रविश । अनन्तरं “मदिरः मदकरः “ते त्वदीयः “रसः “इन्द्रं “ममत्तु मोदयतु । माद्यतेः ‘ बहुलं छन्दसि' इति श्लुः॥

प्रास्य॒ धारा॑ बृह॒तीर॑सृग्रन्न॒क्तो गोभि॑ः क॒लशाँ॒ आ वि॑वेश ।

साम॑ कृ॒ण्वन्त्सा॑म॒न्यो॑ विप॒श्चित्क्रंद॑न्नेत्य॒भि सख्यु॒र्न जा॒मिं ॥२२

प्र । अ॒स्य॒ । धारा॑ः । बृ॒ह॒तीः । अ॒सृ॒ग्र॒न् । अ॒क्तः । गोभि॑ः ।
क॒लशा॑न् । आ । वि॒वे॒श॒ ।

साम॑ । कृ॒ण्वन् । सा॒म॒न्यः॑ । वि॒प॒ःऽचित् । क्रन्द॑न् । ए॒ति॒ ।
अ॒भि । सख्यु॑ः । न । जा॒मिम् ॥२२

प्र । अस्य । धाराः । बृहतीः । असृग्रन् । अक्तः । गोभिः ।
कलशान् । आ । विवेश ।

साम । कृण्वन् । सामन्यः । विपःऽचित् । क्रन्दन् । एति ।
अभि । सख्युः । न । जामिम् ॥२२

“अस्य सोमस्य “बृहतीः बृहत्यो महत्यः “धाराः “प्र “असृग्रन् प्रसृज्यन्ते । सृजेः कर्मार्थे लङि व्यत्ययेन झेरनादेशः । ‘ बहुलं छन्दसि' इति रुडागमः । ततः सोऽयं सोमः “गोभिः गोविकारैः क्षीरादिभिः "अक्तः सन् “कलशान् द्रोणाभिधानान् “आ “विवेश आविशति ।

“साम सामानि “कृण्वन् कुर्वन् “सामन्यः सामगानकुशलः । सुष्ठु शब्दायमान इत्यर्थः । “विपश्चित् सर्वं जानानः सोमः “क्रन्दन देवानाह्वयन “अभि “एति । ग्रहादीनि त्वरयाभिगच्छति । तत्र दृष्टान्तः । “सख्युर्न सख्युः “जामिं जायां यथेतरो लम्पटो वेगेनाभिगच्छति तद्वत् ॥

अ॒प॒घ्नन्ने॑षि पवमान॒ शत्रू॑न्प्रि॒यां न जा॒रो अ॒भिगी॑त॒ इंदु᳚ः ।

सीद॒न्वने॑षु शकु॒नो न पत्वा॒ सोम᳚ः पुना॒नः क॒लशे॑षु॒ सत्ता॑ ॥ २३

अ॒प॒ऽघ्नन् । ए॒षि॒ । प॒व॒मा॒न॒ । शत्रू॑न् । प्रि॒याम् । न । जा॒रः । अ॒भिऽगी॑तः । इन्दु᳚ः ।

सीद॑न् । वने॑षु । श॒कु॒नः । न । पत्वा॑ । सोम᳚ः । पु॒ना॒नः । क॒लशे॑षु । सत्ता॑ ॥२३

अपऽघ्नन् । एषि । पवमान । शत्रून् । प्रियाम् । न । जारः । अभिऽगीतः । इन्दुः ।

सीदन् । वनेषु । शकुनः । न । पत्वा । सोमः । पुनानः । कलशेषु । सत्ता ॥२३

हे “पवमान पूयमान सोम “अभिगीतः स्तोतृभिरभिष्टुतः “इन्दुः पात्रेषु क्षरंस्त्वं “शत्रून् “अपघ्नन् अपहिंसन् “एषि आगच्छसि । कथमिव । “जारः “प्रियां “न प्रियतमामसतीं स्त्रीमन्यान् बाधमानः सन् यथाभिगच्छति तद्वत् । “पत्वा पतनशीलः “शकुनो “न यथा शकुनः “वनेषु वृक्षेषु “सीदन् भवति तद्वत् पतनशीलः । “पुनानः पूयमानः “सोमः “कलशेषु “सत्ता सदनशीलो निषण्णो भवति । सदेस्ताच्छीलिकस्तृन्। ‘ एकाचः' इतीट्प्रतिषेधः ॥

आ ते रुचः पवमानस्य सोम योषेव यंति सुदुघाः सुधाराः ।

हरि॒रानी॑तः पुरु॒वारो॑ अ॒प्स्वचि॑क्रदत्क॒लशे॑ देवयू॒नां ॥२४

आ । ते॒ । रुच॑ः । पव॑मानस्य । सो॒म॒ । योषा॑ऽइव । य॒न्ति॒ । सु॒ऽदुघा॑ः । सु॒ऽधा॒राः ।

हरि॑ः । आऽनी॑तः । पु॒रु॒ऽवार॑ः । अ॒प्ऽसु । अचि॑क्रदत् । क॒लशे॑ । दे॒व॒ऽयू॒नाम् ॥२४

आ । ते । रुचः । पवमानस्य । सोम । योषाऽइव । यन्ति । सुऽदुघाः । सुऽधाराः ।

हरिः । आऽनीतः । पुरुऽवारः । अप्ऽसु । अचिक्रदत् । कलशे । देवऽयूनाम् ॥२४

हे “सोम पवमानस्य पूयमानस्य “ते तव स्वभूता “योषेव स्त्री यथा पुत्राणां पयो दोग्धि तद्वद्यजमानानां धनादिकस्य सुष्ठु दोग्ध्र्यः “सुधाराः शोभनधारोपेताः “रुचः दीप्तयः “आ “यन्ति पात्रादीन्यागच्छन्ति । किंच “हरिः हरितवर्णः

“आनीतः ऋत्विग्भिः “पुरुवारः बहुधा वरणीयः सोमः “अप्सु वसतीवरीषु “देवयूनां देवानिच्छतां यजमानानां स्वभूते “कलशे द्रोणाख्ये च “अचिक्रदत् पुनःपुनः क्रन्दते शब्दायते ॥ ॥ १० ॥ ॥ ५ ॥

टिप्पणी

९.९६.१ प्र सेनानीः शूरो इति

कुत्सस्याधिरथीयानि (https://sa.wikisource.org/s/2gr3)

९.९६.५ सोमः पवते जनिता इति

वात्सप्रम् (https://sa.wikisource.org/s/1zvi)

९.९६.१७ शिशुं जज्ञानं हर्यतं इति

साम ११७५ (https://sa.wikisource.org/s/3kl)

मण्डल ९

सूक्तं १.३१सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.३२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.३३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.३४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.३५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.३६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.३७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.३८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.३९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.९७

ऋषि- १-३ मैत्रावरुणिर्वसिष्ठः, ४-६ वासिष्ठ इन्द्रप्रमतिः, ७-९ वासिष्ठो वृषगणः, १०-१२ वासिष्ठो मन्युः*, १३-१५ वासिष्ठ उपमन्युः**, १६-१८वासिष्ठो व्याघ्रपाद्, १९-२१ वासिष्ठः शक्तिः, २२-२४ वासिष्ठः कर्णश्रुद्, २५-२७ वासिष्ठो मृळीकः, २८-३० वासिष्ठो वसुक्रः, ३१-४४ पराशरः शाक्त्यः, ४५-५८ कुत्स आङ्गिरसः।

दे. पवमानः सोमः। त्रिष्टुप्

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।

सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमान्ति होता ॥१॥

भद्रा वस्त्रा समन्या वसानो महान्कविर्निवचनानि शंसन् ।

आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥२॥

समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।

अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥३॥

प्र गायताभ्यर्चाम देवान्सोमं हिनोत महते धनाय ।

स्वादुः पवाते अति वारमव्यमा सीदाति कलशं देवयुर्नः ॥४॥

इन्दुर्देवानामुप सख्यमायन्सहस्रधारः पवते मदाय ।

नृभि स्तवानो अनु धाम पूर्वमगन्निन्द्रं महते सौभगाय ॥५॥

स्तोत्रे राये हरिरर्षा पुनान इन्द्रं मदो गच्छतु ते भराय ।

देवैर्याहि सरथं राधो अच्छा यूयं पात स्वस्तिभिः सदा नः ॥६॥

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।

महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥७॥

प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः ।

आङ्गूष्यं पवमानं सखायो दुर्मर्षं साकं प्र वदन्ति वाणम् ॥८॥

स रंहत उरुगायस्य जूतिं वृथा क्रीळन्तं मिमते न गावः ।

परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः ॥९॥

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।

हन्ति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन्वृजनस्य राजा ॥१०॥

अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।

इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥११॥

अभि प्रियाणि पवते पुनानो देवो देवान्स्वेन रसेन पृञ्चन् ।

इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥१२॥

वृषा शोणो अभिकनिक्रदद्गा नदयन्नेति पृथिवीमुत द्याम् ।

इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचेतयन्नर्षति वाचमेमाम् ॥१३॥

रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।

पवमानः संतनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥१४॥

एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नैः ।

परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥१५॥

जुष्ट्वी न इन्दो सुपथा सुगान्युरौ पवस्व वरिवांसि कृण्वन् ।

घनेव विष्वग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ॥१६॥

वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुम् ।

स्तुकेव वीता धन्वा विचिन्वन्बन्धूँरिमाँ अवराँ इन्दो वायून् ॥१७॥

ग्रन्थिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम ।

अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान् ॥१८॥

जुष्टो मदाय देवतात इन्दो परि ष्णुना धन्व सानो अव्ये ।

सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये ॥१९॥

अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ ।

एते शुक्रासो धन्वन्ति सोमा देवासस्ताँ उप याता पिबध्यै ॥२०॥

एवा न इन्दो अभि देववीतिं परि स्रव नभो अर्णश्चमूषु ।

सोमो अस्मभ्यं काम्यं बृहन्तं रयिं ददातु वीरवन्तमुग्रम् ॥२१॥

तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य वा धर्मणि क्षोरनीके ।

आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥२२॥

प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सुमेधाः ।

धर्मा भुवद्वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम ॥२३॥

पवित्रेभिः पवमानो नृचक्षा राजा देवानामुत मर्त्यानाम् ।

द्विता भुवद्रयिपती रयीणामृतं भरत्सुभृतं चार्विन्दुः ॥२४॥

अर्वाँ इव श्रवसे सातिमच्छेन्द्रस्य वायोरभि वीतिमर्ष ।

स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवित्पुनानः ॥२५॥

देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वन्तु सोमाः ।

आयज्यवः सुमतिं विश्ववारा होतारो न दिवियजो मन्द्रतमाः ॥२६॥

एवा देव देवताते पवस्व महे सोम प्सरसे देवपानः ।

महश्चिद्धि ष्मसि हिताः समर्ये कृधि सुष्ठाने रोदसी पुनानः ॥२७॥

अश्वो नो क्रदो वृषभिर्युजानः सिंहो न भीमो मनसो जवीयान् ।

अर्वाचीनैः पथिभिर्ये रजिष्ठा आ पवस्व सौमनसं न इन्दो ॥२८॥

शतं धारा देवजाता असृग्रन्सहस्रमेनाः कवयो मृजन्ति ।

इन्दो सनित्रं दिव आ पवस्व पुरएतासि महतो धनस्य ॥२९॥

दिवो न सर्गा अससृग्रमह्नां राजा न मित्रं प्र मिनाति धीरः ।

पितुर्न पुत्रः क्रतुभिर्यतान आ पवस्व विशे अस्या अजीतिम् ॥३०॥

प्र ते धारा मधुमतीरसृग्रन्वारान्यत्पूतो अत्येष्यव्यान् ।

पवमान पवसे धाम गोनां जज्ञानः सूर्यमपिन्वो अर्कैः ॥३१॥

कनिक्रददनु पन्थामृतस्य शुक्रो वि भास्यमृतस्य धाम ।

स इन्द्राय पवसे मत्सरवान्हिन्वानो वाचं मतिभिः कवीनाम् ॥३२॥

दिव्यः सुपर्णोऽव चक्षि सोम पिन्वन्धाराः कर्मणा देववीतौ ।

एन्दो विश कलशं सोमधानं क्रन्दन्निहि सूर्यस्योप रश्मिम् ॥३३॥

तिस्रो वाच ईरयति प्र वह्निरृतस्य धीतिं ब्रह्मणो मनीषाम् ।

गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः॥३४॥

सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।

सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ॥३५॥

एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।

इन्द्रमा विश बृहता रवेण वर्धया वाचं जनया पुरंधिम् ॥३६॥

आ जागृविर्विप्र ऋता मतीनां सोमः पुनानो असदच्चमूषु ।

सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥३७॥

स पुनान उप सूरे न धातोभे अप्रा रोदसी वि ष आवः ।

प्रिया चिद्यस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसत् ॥३८॥

स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत् ।

येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ॥३९॥

अक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा ।

वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः ॥४०॥

महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।

अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥४१॥

मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः ।

मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम ॥४२॥

ऋजुः पवस्व वृजिनस्य हन्तापामीवां बाधमानो मृधश्च ।

अभिश्रीणन्पयः पयसाभि गोनामिन्द्रस्य त्वं तव वयं सखायः॥४३॥

मध्वः सूदं पवस्व वस्व उत्सं वीरं च न आ पवस्वा भगं च ।

स्वदस्वेन्द्राय पवमान इन्दो रयिं च न आ पवस्वा समुद्रात् ॥४४॥

सोमः सुतो धारयात्यो न हित्वा सिन्धुर्न निम्नमभि वाज्यक्षाः ।

आ योनिं वन्यमसदत्पुनानः समिन्दुर्गोभिरसरत्समद्भिः ॥४५॥

एष स्य ते पवत इन्द्र सोमश्चमूषु धीर उशते तवस्वान् ।

स्वर्चक्षा रथिरः सत्यशुष्मः कामो न यो देवयतामसर्जि ॥४६॥

एष प्रत्नेन वयसा पुनानस्तिरो वर्पांसि दुहितुर्दधानः ।

वसानः शर्म त्रिवरूथमप्सु होतेव याति समनेषु रेभन् ॥४७॥

नू नस्त्वं रथिरो देव सोम परि स्रव चम्वोः पूयमानः।

अप्सु स्वादिष्ठो मधुमाँ ऋतावा देवो न यः सविता सत्यमन्मा॥४८॥

अभि वायुं वीत्यर्षा गृणानोऽभि मित्रावरुणा पूयमानः ।

अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥४९॥

अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।

अभि चन्द्रा भर्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥५०॥

अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।

अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ॥५१॥

अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व ।

ब्रध्नश्चिदत्र वातो न जूतः पुरुमेधश्चित्तकवे नरं दात् ॥५२॥

उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।

षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥५३॥

महीमे अस्य वृषनाम शूषे माँश्चत्वे वा पृशने वा वधत्रे ।

अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ॥५४॥

सं त्री पवित्रा विततान्येष्यन्वेकं धावसि पूयमानः ।

असि भगो असि दात्रस्य दातासि मघवा मघवद्भ्य इन्दो ॥५५॥

एष विश्ववित्पवते मनीषी सोमो विश्वस्य भुवनस्य राजा ।

द्रप्साँ ईरयन्विदथेष्विन्दुर्वि वारमव्यं समयाति याति ॥५६॥

इन्दुं रिहन्ति महिषा अदब्धाः पदे रेभन्ति कवयो न गृध्राः ।

हिन्वन्ति धीरा दशभिः क्षिपाभिः समञ्जते रूपमपां रसेन ॥५७॥

त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।

तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥५८॥

सायणभाष्यम्

षष्ठेऽनुवाके सप्त सूक्तानि । तत्र अस्य प्रेषा इत्यष्टापञ्चाशदृचं प्रथमं सूक्तं त्रैष्टुभं पवमानसोमदेवताकम् । तत्राद्यस्य तृचस्य मैत्रावरुणो वसिष्ठ ऋषिः । द्वितीयस्येन्द्रप्रमतिर्नाम । तृतीयस्य वृषगणः । चतुर्थस्य मन्युः। पञ्चमस्योपमन्युः । षष्ठस्य व्याघ्रपात् । सप्तमस्य शक्तिः । अष्टमस्य कर्णश्रुत् । नवमस्य मृळीकः । दशमस्य वसुक्रः । एते सर्वे वसिष्ठगोत्राः । एवं त्रिंशदृचो गताः । अथ चतुर्दशानामृचां

शक्तिपुत्रः पराशर ऋषिः । शिष्टानामाङ्गिरसः कुत्सः । तथानुक्रम्यते- अस्य प्रेष्ठाष्टापञ्चाशदाद्यं तृचं वसिष्ठोऽपश्यदुत्तरान्नव पृथग्वसिष्ठा इन्द्रप्रमतिर्वृषगणो मन्युरुपमन्युर्व्याघ्रपाच्छक्तिः कर्णश्रुन्मृळीको वसुक्र इति चतुर्दश पराशरोऽन्त्याः कुत्सः इति । गतो विनियोगः ।।

अ॒स्य प्रे॒षा हे॒मना॑ पू॒यमा॑नो दे॒वो दे॒वेभि॒ः समपृक्त॒ रसं॑म् ।

सु॒तः प॒वित्रं॒ पर्ये॑ति॒ रेभ॑न्मि॒तेव॒ सद्म॑ पशु॒मान्ति॒ होता॑ ॥१

अ॒स्य । प्रे॒षा । हे॒मना॑ । पू॒यमा॑नः । दे॒वः । दे॒वेभिः॑ । सम् । अ॒पृ॒क्त॒ । रसं॑म् ।

सु॒तः । प॒वित्र॑म् । परि॑ । ए॒ति॒ । रेभ॑न् । मि॒ताऽइ॑व । सद्म॑ । प॒शु॒ऽमन्ति॑ । होता॑ ॥१

अस्य । प्रेषा । हेमना । पूयमानः । देवः । देवेभिः। सम् । अपृक्त । रसम् । सुतः । पवित्रम् । परि । एति । रेभन् । मिताइव । सद्म । पशुऽमन्ति । होता ॥ १ ॥

अस्य सोमस्य प्रेषा । प्रेषतिर्गत्यर्थः । क्विपि रूपम् । ' सावेकाचः इति विभक्तेरुदात्तत्वम् । प्रेषा प्रेरकेण हेमना हिरण्येन पूयमानः । ' हिरण्यपाणिरभिषुणोति ' इति हिरण्यसंबन्धः । तादृशः देवः दीप्यमानांशुः रसम् आत्मीयं देवेभिः देवै सह समपृक्त संपर्चयति संयोजयति । ' पृची संपर्के ' । ततः सुतः अभिषुतः सोमः रेभम् शब्दायमानः सन् पवित्रं ऊर्णास्तुकेन निर्मितं पर्येति परिगच्छति । कथमिव । होता देवानामाह्वातर्त्विक् मितेव निर्मितान् पशूमन्ति बद्धपशून् सद्म सदनानि यज्ञगृहान् यथा पर्येति तद्वत् ।।

भ॒द्रा वस्त्रा॑ सम॒न्या॒३॒ वसा॑नो म॒हान्क॒विर्नि॒वच॑नानि॒ शंस॑न्
।

आ व॑च्यस्व च॒म्वोः॑ पू॒यमा॑नो विचक्ष॒णो जागृ॑विर्दे॒ववी॑तौ ॥
२

भ॒द्रा । वस्त्रा॑ । स॒म॒न्या॑ । वसा॑नः । म॒हान् । क॒विः ।
नि॒ऽवच॑नानि । शंस॑न् ।

आ । व॒च्य॒स्व॒ । च॒म्वोः॑ । पू॒यमा॑नः । वि॒ऽच॒क्ष॒णः ।
जागृ॑विः । दे॒वऽवी॑तौ ॥२

भद्रा । वस्त्रा । समन्या । वसानः । महान् । कविः ।
निःवचनानि । शंसन् ।

आ । वच्यस्व । चम्वोः । पूयमानः । विचक्षणः । जागृविः
। देवऽवीतौ ॥ २॥

भद्रा भद्राणि कल्याणानि समन्या समनमिति संग्रामनाम तत्र साधुरिति यत् संग्रामयोग्यानि वस्त्रा वस्त्राणि आच्छादकानि तेजांसि वसानः आच्छादयन् महान् पूज्यः कविः क्रान्तदर्शी अतएव निवचनानि नितरांवक्तव्यानि ऋत्विक्कृतानि स्तोत्राणि शंसन् विचक्षणः विशेषेण सर्वस्यद्रष्टा जागृविर्जागरणशीलः सोमः त्वं देववीतौ देवानां वीतिर्भक्षणं यस्मिन्त्स देववीतिर्यज्ञः तस्मिन् चम्वोरधिषवणफलकयोः आवच्यस्व पात्राण्याविश । वचिर्गत्यर्थः व्यत्ययेन श्यन् पूयमानः सन् ॥ २ ॥

समु॑ प्रि॒यो मृ॑ज्यते॒ सानो॒ अव्ये॑ य॒शस्त॑रो य॒शसां॒ क्षैतो॑ अ॒स्मे ।

अ॒भि स्व॑र॒ धन्वा॑ पू॒यमा॑नो यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥३

सम् । ऊ॒ं इति॑ । प्रि॒यः । मृ॒ज्य॒ते॒ । सानौ॑ । अव्ये॑ ।
य॒शः॒ऽत॑रः । य॒शसा॑म् । क्षैतः᳚ । अ॒स्मे इति॑ ।

अ॒भि । स्व॒र॒ । धन्व॑ । पू॒यमा॑नः । यू॒यम् । पा॒त॒ ।
स्व॒स्तिऽभिः᳚ । सदा॑ । नः॒ ॥३

सम् । ऊं इति । प्रियः । मृज्यते । सानौ । अव्ये ।
यशःऽतरः । यशसाम् । क्षैतः । अस्मे इति ।

अभि । स्वर । धन्व । पूयमानः । यूयम् । पात ।
स्वस्तिऽभिः । सदा । नः ॥३

यशसा यशस्विनां मध्ये यशस्तरः अतिशयेन यशस्वी क्षैतः क्षितौ भवः प्रियः प्रीणयिता सोमः सानौ समुच्छ्रिते अव्ये अविभवे पवित्रे अस्मे अस्मदर्थं सं सृज्यते ऋत्विग्भिः परिपूयते । उ अवधारणे । पूयमानः त्वं धन्व अन्तरिक्षे अभि स्वर अभितः शब्दय । यूयम् । पूजायां बहुवचनम् ।

हे सोम त्वं नः अस्मान् स्वस्तिभिः कल्याणतमैः पालनं सदा सर्वदा पात रक्षत पालयत ।।

प्र गा॑यता॒भ्य॑र्चाम दे॒वान्सोमं॑ हिनोत मह॒ते धना॑य ।

स्वा॒दुः प॑वाते॒ अति॒ वार॒मव्य॒मा सी॑दाति क॒लशं॑ देव॒युर्नः॑ ॥ ४

प्र । गा॒य॒त॒ । अ॒भि । अ॒र्चा॒म॒ । दे॒वान् । सोम॑म् । हि॒नो॒त॒ । म॒ह॒ते । धना॑य ।

स्वा॒दुः । प॒वा॒ते॒ । अति॑ । वार॑म् । अव्य॑म् । आ । सी॒दा॒ति॒ । क॒लश॑म् । दे॒व॒ऽयुः । न॒ः ॥४

प्र । गायत । अभि । अर्चाम । देवान् । सोमम् । हिनोत । महते । धनाय ।

स्वादुः । पवाते । अति । वारम् । अव्यम् । आ । सीदाति । कलशम् । देवऽयुः । नः ॥४

हे स्तोतारः प्र गायत । सोमं प्रकर्षेणाभिष्टुत । तथा देवान् अभ्यर्चाम अभ्यर्चत । पुरुषव्यत्ययः । यद्वा । वयं देवानभिष्टुमः यूयं सोमं स्तुतेति । किंच महते महत् प्रभूतं धनाय धनं प्राप्तुं सोमं हिनोत अभिषवार्थं प्रेरयत । ' क्रियार्थोपपदस्य च कर्मणि स्थानिनः ' इति धनशब्दस्य चतुर्थी । ततः स्वादुः स्वादुकरः सोमः अव्यम् अविभवं वारं बालं पवित्रम् अति पवाते अतीत्य पवते । किंच देवयुः देवान् कामयमानः नः अस्मदीयः सोमः 'कलशं पात्रम् आ सीदाति आसीदति प्रविशति । उभयत्र लेट्याडागमः ।।

इन्दुंर्देवानामुपं सख्यमायन्सहस्रंधारः पवते मदांय ।

नृभि॒ः स्तवा॑नो॒ अनु॒ धाम॒ पूर्व॒मग॒न्निन्द्रं॑ मह॒ते सौभ॑गाय ॥ ५

इन्दुः॑ । दे॒वाना॑म् । उप॑ । स॒ख्यम् । आ॒ऽयन् । स॒हस्र॑ऽधारः । प॒व॒ते॒ । मदा॑य ।

नृऽभिः॑ । स्तवा॑नः । अनु॑ । धाम॑ । पूर्व॑म् । अग॑न् । इन्द्र॑म् । म॒ह॒ते । सौभ॑गाय ॥५

इन्दुः । देवानाम् । उप । सख्यम् । आऽयन् । सहस्रऽधारः । पवते । मदाय ।

नृऽभिः । स्तवानः । अनु । धाम । पूर्वम् । अगन् । इन्द्रम् । महते । सौभगाय ॥५

देवानाम् इन्द्रादीनां सख्यं सखिभावम् उप आयन् उपगच्छन् सहस्रधारः बहुविधधारोपेतः इन्दुः सोमः मदाय देवानां मदार्थं पवते कलशादिषु क्षरति । नृभिः

कर्मनेतृभिः स्तवानः स्तूयमानः सोमःपूर्वं पुरातनं धाम द्युलोकम् अनु गच्छति । तदेवाह । महते प्रभूताय सौभगाय सौभाग्याय इन्द्रम् अगन् गच्छति । सोम इन्द्रेण पीते सति यजमानानां महत् सौभाग्यं भवति खलु ।। अगन् । गमेर्लुङि ' मन्त्रे घस' ' इति च्छेर्लुक् । ' मो नो धातोः ' इति नत्वम् ।। ।। ११ ।।

स्तो॒त्रे रा॒ये हरिं॑रर्षा पुना॒न इन्द्र॒ं मदो॑ गच्छतु ते॒ भरा॑य ।

दे॒वैर्या॑हि स॒रथं॒ राधो॒ अच्छा॑ यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥६

स्तो॒त्रे । रा॒ये । हरिः॑ । अ॒र्ष॒ । पु॒ना॒नः । इन्द्र॑म् । मदः॑ । ग॒च्छ॒तु॒ । ते॒ । भरा॑य ।

दे॒वैः । या॒हि॒ । स॒ऽरथं॑म् । राधः॑ । अच्छं॑ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । न॒ः ॥६

स्तोत्रे । राये । हरिः । अर्ष । पुनानः । इन्द्रम् । मदः । गच्छतु । ते । भराय ।

देवैः । याहि । सऽरथम् । राधः । अच्छ । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥६

हे सोम हरिः हरितवर्णः पुनानः पूयमानस्त्वं स्तोत्रे अस्माभिः क्रियमाणे सति राये धनार्थम् अर्ष आगच्छ । ततः ते त्वदीयः मदः मदकरः रसः भराय । भृ भर्त्सने ' । भर्त्सयन्ति शत्रूनत्र योद्धार इति भरः संग्रामः । तदर्थम् इन्द्रं गच्छतु । किंच सरथं देवैः समानं रथमास्थाय राधः अच्छ अस्माकं धनार्थं याहि आगच्छ । यूयं नः अस्मान् स्वस्तिभिः सदा पात । त्वं रक्ष ।।

प्र काव्य॑मु॒शने॑व ब्रुवा॒णो दे॒वो दे॒वानां॒ जनि॑मा विवक्ति ।

महि॑व्रत॒ः शुचि॑बन्धुः पाव॒कः प॒दा व॑रा॒हो अ॒भ्ये॑ति॒ रेभ॑न् ॥
७

प्र । काव्य॑म् । उ॒शना॑ऽइव । ब्रु॒वा॒णः । दे॒वः । दे॒वाना॑म् ।
जनि॑म । वि॒व॒क्ति॒ ।

महि॑ऽव्रतः । शुचि॑ऽबन्धुः । पा॒व॒कः । प॒दा । व॒रा॒हः । अ॒भि
। ए॒ति॒ । रेभ॑न् ॥७

प्र । काव्यम् । उशनाऽइव । ब्रुवाणः । देवः । देवानाम् ।
जनिम । विवक्ति ।

महिऽव्रतः । शुचिऽबन्धुः । पावकः । पदा । वराहः । अभि
। एति । रेभन् ॥७

उशनेव एतन्नामक ऋषिरिव' काव्यं कविकर्म स्तोत्रं ब्रुवाणः उच्चारयन् देवः स्तोतायमृषिर्वृषगणो नाम देवानाम् इन्द्रादीनां जनिम जन्मानि प्र विवक्ति प्रकर्षेण ब्रवीति । ' वच परिभाषणे ' । व्यत्ययेन विकरणस्य श्लुः । ' बहुलं छन्दसि ' इत्यभ्यासस्येत्वम् । महिव्रतः प्रभूतकर्मा शुचिबन्धुः । बध्नन्ति शत्रूनिति बन्धूनि तेजांसि बलानि वा । दीप्ततेजस्कः पावकः पापानां शोधकः वराहः । वरं च तदहश्च वराहः । ' राजाहः सखिभ्यष्टच्' इति टच् समासान्तः । तस्मिन्नहनि अभिषूयमाणत्वेन तद्वान् । अर्शआदित्वात् मत्वर्थीयोऽच् । तादृशः सोमः रेभन् शब्दं कुर्वन् पदा पदानि स्थानानि पात्राणि अभ्येति अभिगच्छति । यद्वा । यथा कश्चन वराहः पदा पादेन भूमिं विक्रममाणः शब्दं करोति तद्वत् ।।

प्र हं॒सासं॑स्तृ॒पलं॑ म॒न्युमच्छा॒मादस्तं॒ वृषं॑गणा अयासुः ।

आ॒ङ्गू॒ष्यं॑१॒ पव॑मान॒ं सखा॑यो दु॒र्मर्षं॑ सा॒कं प्र व॑दन्ति वा॒णम् ॥८

प्र । ह॒ंसास॑ः । तृ॒पल॑म् । म॒न्युम् । अच्छ॑ । अ॒मात् । अस्त॑म् । वृष॑ऽगणाः । अ॒या॒सुः ।

आ॒ङ्गू॒ष्य॑म् । पव॑मानम् । सखा॑यः । दुः॒ऽमर्ष॑म् । सा॒कम् । प्र । व॒द॒न्ति॒ । वा॒णम् ॥८

प्र । हंसासः । तृपलम् । मन्युम् । अच्छ । अमात् । अस्तम् । वृषऽगणाः । अयासुः ।

आङ्गूष्यम् । पवमानम् । सखायः । दुःऽमर्षम् । साकम् । प्र । वदन्ति । वाणम् ॥८

हंसासः शत्रुभिर्हन्यमाना हंसा इवाचरन्तो वा नृपगणाः एतन्नामका ऋषयः अमात् शत्रूणां बलात् त्रासिताः सन्तः तृपलम् । तृपलशब्दः क्षिप्रवाची । तदुक्तं यास्केन--'

तृपलप्रभर्मा क्षिप्रप्रहारी ' (नि. ५. १२) इति ।
क्षिप्रप्रहारिणं मन्युं शत्रूनभिमन्यमानं सोमम् अच्छ अभिलक्ष्य अस्तं यज्ञगृहं प्र अयासुः प्रायासिषुः प्रगच्छन्ति । ततः सखायः स्तुत्यस्तोतृत्वलक्षणेन संबन्धेन सखिभूताः स्तोतारः आङ्गूष्यं सर्वैरभिगन्तव्यम् । यद्वा । घोशब्दस्य पृषोदरादित्वात् गू इत्यादेशः । आङोऽनुनासिकश्छान्दसः । स्तोत्रार्हं दुर्मर्षं शत्रुभिर्दुर्धरं दुःसहमेवंविधं सोमं पवमानम् उद्दिश्य वाणं वाद्यविशेषं साकं सहैव प्र वदन्ति प्रवादयन्ति । तदुपलक्षितं गानं कुर्वन्तीत्यर्थः ।।

स रं॑हत उरुगा॒यस्य॑ जू॒तिं वृथा॒ क्रीळ॑न्तं मिमते॒ न गावः॑ ।

प॒री॒ण॒सं कृ॑णुते ति॒ग्मशृ॑ङ्गो॒ दिवा॒ हरि॒र्ददृ॑शे॒ नक्त॑मृ॒ज्रः ॥९

सः । र॒ंह॒ते॒ । उ॒रु॒ऽगा॒यस्य॑ । जू॒तिम् । वृथा॑ । क्रीळ॑न्तम् ।
मि॒म॒ते॒ । न । गाव॑ः ।

प॒री॒ण॒सम् । कृ॒णु॒ते॒ । ति॒ग्मऽशृ॑ङ्गः । दिवा॑ । हरि॑ः । ददृ॑शे ।
नक्त॑म् । ऋ॒ज्रः ॥९

सः । रंहते । उरुऽगायस्य । जूतिम् । वृथा । क्रीळन्तम् ।
मिमते । न । गावः ।

परीणसम् । कृणुते । तिग्मऽशृङ्गः । दिवा । हरिः । ददृशे ।
नक्तम् । ऋज्रः ॥९

सः सोमः रंहते । अतिशीघ्रं गच्छतीत्यर्थः । उरुगायस्य बहुभिः स्तुत्यस्यात्मनः जूतिं गतिमनुसरन् । तं वृथा अनायासेन क्रीडन्तं विहरन्तं गच्छन्तं सोमं गावः अन्ये गन्तारः न मिमते न परिच्छिन्दन्ति । तमनुगन्तुं न शक्नुवन्तीत्यर्थः । किंच तिग्मशृङ्गः । शृणन्ति हिंसन्ति

तमांसीति शृङ्गाणि तेजांसि । तीक्ष्णतेजस्कः परीणसम् । बहुनामैतत् । बहुविधं तेजः कृणुते करोति । अन्तरिक्षे वर्तमानो यः सोमः दिवा अहनि हरिः हरितवर्णः ददृशे दृश्यते । न प्रकाशत इत्यर्थः। नक्तं रात्रौ तु ऋज्रः ऋजुगामी विस्पष्टः प्रकाशयुक्तो दृश्यते । दृशेः कर्मणि लिटि रूपम् ।।।

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।

हन्ति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन्वृजनस्य राजा ॥ १०॥

इन्दुः॑ । वा॒जी । प॒व॒ते॒ । गोऽन्यो॑घाः । इन्द्रे॑ । सोमः॑ । सहः॑ । इन्वं॑न् । मदा॑य ।

हन्तिं । रक्षः॑ । बाधंते । परिं । अरांतीः । वरिंवः । कृ॒ण्वन् । वृ॒जनंस्य । राजां ॥१०

इन्दुः । वाजी । पवते । गोऽन्योघाः । इन्द्रे । सोमः । सहः । इन्वन् । मदाय ।

हन्ति । रक्षः । बाधते । परि । अरातीः । वरिवः । कृण्वन् । वृजनस्य । राजा ॥१०

इन्दुः क्षरणशीलः वाजी बलवान् गोन्योघाः गमनशीलनीचीनाग्ररससंघातः इन्द्रे सहः बलकररसम् इन्वन् प्रेरयन् सोमः मदाय तस्य मदार्थं पवते क्षरति । किंच रक्षःकुलं प्रघ्नन्ति हिनस्ति । किंच अरातीः अरातीन् शत्रून् परि बाधते परितः संहरति । कीदृशः । वरिवः वरणीयं धनं कृण्वन् स्तोतॄणां कुर्वन् वृजनस्य बलस्य राजा ईशिता सोम इति ।।

अध॒ धार॑या॒ मध्वा॑ पृचा॒नस्ति॒रो रोम॑ पवते॒ अद्रि॑दुग्धः ।

इन्दु॒रिन्द्र॑स्य स॒ख्यं जु॑षा॒णो दे॒वो दे॒वस्य॑ मत्स॒रो मदा॑य ॥
११

अध॑ । धार॑या । मध्वा॑ । पृ॒चा॒नः । ति॒रः । रोम॑ । प॒व॒ते॒ ।
अद्रि॑ऽदुग्धः ।

इन्दुः॑ । इन्द्र॑स्य । स॒ख्यम् । जु॒षा॒णः । दे॒वः । दे॒वस्य॑ ।
म॒त्स॒रः । मदा॑य ॥११

अध । धारया । मध्वा । पृचानः । तिरः । रोम । पवते ।
अद्रिऽदुग्धः ।

इन्दुः । इन्द्रस्य । सख्यम् । जुषाणः । देवः । देवस्य ।
मत्सरः । मदाय ॥११

अध अथानन्तरम् अद्रिदुग्धः ग्रावभिर्दुग्धोऽभिषुतः सोमः मध्वा मदकारिण्या धारयापृचानः देवान् संपर्चयन् संयोजयन् रोम अविरोमभिः कृतं पवित्रं तिरः तिरस्कृत्य व्यवधायकं कृत्वा पवते कलशेषु क्षरति । किंच इन्द्रस्य सख्यं सखिभावं कर्म वा जुषाणः सेवमानः देवः द्योतमानः मत्सरः मदकरः इन्दुः सोमः देवस्य इन्द्रस्य मदाय मदार्थं पवते ।।

अ॒भि प्रि॒याणिं पवते पुना॒नो दे॒वो दे॒वान्स्वेन॒ रसेंन पृ॒ञ्चन् ।

इन्दु॒र्धर्माण्यृतु॒था वसांनो॒ दश॒ क्षिपों अव्यत॒ सानो॒ अव्यें ॥ १२

अ॒भि । प्रि॒याणिं । प॒व॒ते॒ । पु॒ना॒नः । दे॒वः । दे॒वान् । स्वेनं । रसेंन । पृ॒ञ्चन् ।

इन्दुः॑ । धर्मा॑णि । ऋ॒तु॒ऽथा । वसा॑नः । दश॑ । क्षिपः॑ । अ॒व्य॒त॒ । सानौ॑ । अव्ये॑ ॥१२

अभि । प्रियाणि । पवते । पुनानः । देवः । देवान् । स्वेन । रसेन । पृञ्चन् ।

इन्दुः । धर्माणि । ऋतुऽथा । वसानः । दश । क्षिपः । अव्यत । सानौ । अव्ये ॥१२

प्रियाणि प्रीणयितॄणि धर्माणि धारकाणि तेजांसि ऋतुथा काले काले वसानः आच्छादयन् इन्दुः सोमः पुनानः पूयमानः सन् अभि पवते कलशानभिलक्ष्य क्षरति । कीदृशः । देवः संक्रीडनशीलः स्वेन आत्मीयेन रसेन देवान् इन्द्रादीन् पृञ्चन् संपर्चयन् संयोजयन् । तमिमं दश दशसंख्याकाः क्षिपः । अङ्गुलिनामैतत् । कर्मार्थं प्रेर्यन्त इति । तत्संख्याका अङ्गुलयः सानौ समुच्छ्रिते अव्ये अविभवे पवित्रे अव्यत गमयन्ति । यद्वा । तत्र पवित्रे

पूयमानं सोममव्यत गच्छन्ति । वी गत्यादिषु । लङि व्यत्ययेनात्मनेपदम् ।।

वृषा॒ शोणों अभि॒कनिंक्रद॒द्गा न॒दयंन्नेति पृथि॒वीमु॒त द्याम् ।

इन्द्रंस्येव व॒ग्नुरा शृंण्व आ॒जौ प्रंचे॒तयंन्नर्षति॒ वाच॒मेमाम् ॥ १३

वृषां । शोणः॑ । अ॒भि॒ऽकनिंक्रदत् । गाः । न॒दयंन् । ए॒ति॒ । पृ॒थि॒वीम् । उ॒त । द्याम् ।

इन्द्रंस्यऽइव । व॒ग्नुः । आ । शृ॒ण्वे॒ । आ॒जौ । प्र॒ऽचे॒तयंन् । अ॒र्ष॒ति॒ । वाचंम् । आ । इ॒माम् ॥१३

वृषा । शोणः । अभिऽकनिक्रदत् । गाः । नदयन् । एति । पृथिवीम् । उत । द्याम् ।

इन्द्रस्यऽइव । वग्नुः । आ । शृण्वे । आजौ । प्रऽचेतयन् ।
अर्षति । वाचम् । आ । इमाम् ॥१३

शोणः शोणवर्णः वृषा कश्चिद्वृषभः गाः पशून् अभिकनिक्रदत् अभिलक्ष्य शब्दं करोति । एवं गाः स्तुतीर्विश्रयणार्थं पयसो दोग्ध्रीर्धेनूर्वा अभिकनिक्रददभिशब्दायमानः । तदेवाह । नदयन् शब्दमुत्पादयन् सोमः पृथिवीमुत अपि च द्याम् एतौ लोकौ एति गच्छति । किंच वग्नुः । वाङ्नामैतत् । तस्य वाक् शब्दः आजौ संग्रामे इन्द्रस्येव इन्द्रस्य शब्द इव आ शृण्वे सर्वैः श्रूयते । ततः प्रचेतयन् आत्मानं सर्वेषां प्रज्ञापयन् इमां वाचम् अर्षति समन्ताद्गमयति । उच्चैः शब्दायत इत्यर्थः ।।

र॒साय्य॒ः पयं॑सा॒ पिन्वं॑मान ई॒रयं॑न्नेषि॒ मधुं॑मन्तम॒ंशुम् ।

पव॑मानः संत॒निमे॑षि कृ॒ण्वन्निन्द्रा॑य सोम परिषि॒च्यमा॑नः ॥
१४

र॒साय्यः॑ । पय॑सा । पिन्व॑मानः । ई॒रय॑न् । ए॒षि॒ ।
मधु॑ऽमन्तम् । अं॒शुम् ।

पव॑मानः । स॒म्ऽत॒निम् । ए॒षि॒ । कृ॒ण्वन् । इन्द्रा॑य । सो॒म॒ ।
प॒रि॒ऽसि॒च्यमा॑नः ॥१४

रसाय्यः । पयसा । पिन्वमानः । ईरयन् । एषि ।
मधुऽमन्तम् । अंशुम् ।

पवमानः । सम्ऽतनिम् । एषि । कृण्वन् । इन्द्राय । सोम ।
परिऽसिच्यमानः ॥१४

हे सोम रसाय्यः । रसेरौणादिक आय्यप्रत्ययः । आस्वाद्यः पयसा पिन्वमानः क्षरंस्त्वम् ईरयन् .शब्दं प्रेरयन् मधुमन्तं माधुर्योपेतम् अंशुं रसभावम् एषि प्राप्नोषि। अंशुः

शमष्टमात्रो भवति (निरु. २.५) इति यास्कः । अनेन सोमरसोऽभिधीयते । किंच हे सोम परिषिच्य- मानः अद्भिः परिषिक्तस्त्वं पवमानः पवित्रे पूयमानः सन् संतनिम् । तनु विस्तारे । इप्रत्ययः । संततां धारां कृण्वन् कुर्वन् इन्द्राय इन्द्रार्थम् एषि गच्छसि ।।

ए॒वा पंवस्व मदि॒रो मदा॑योदग्रा॒भस्यं न॒मयंन्वध॒स्नैः ।

परि॒ वर्णं॒ भरंमाणो॒ रुशंन्तं ग॒व्युर्नो॑ अर्ष॒ परिं सोम सि॒क्तः ॥ १५

ए॒व । प॒व॒स्व॒ । म॒दि॒रः । मदा॑य । उ॒द॒ऽग्रा॒भस्यं । न॒मयंन् । व॒ध॒ऽस्नैः ।

परिं । वर्णंम् । भरंमाणः । रुशंन्तम् । ग॒व्युः । न॒ः । अ॒र्ष॒ । परिं । सो॒म॒ । सि॒क्तः ॥१५

एव । पवस्व । मदिरः । मदाय । उदऽग्राभस्य । नमयन् । वधऽस्नैः ।

परि । वर्णम् । भरमाणः । रुशन्तम् । गव्युः । नः । अर्ष । परि । सोम । सिक्तः ॥१५

हे सोम मदिरः मदकरस्त्वम् उदग्राभस्य । क्रियाग्रहणं कर्तव्यम् (पाः सू १ .४. ३२.१) इति कर्मणः संप्रदानसंज्ञा । चतुर्थ्यर्थे बहुलम् (पा. सू २ .३ ६२) इति षष्ठी । उदग्राभ- मुदकप्राहिणं मेघं वधस्नैः हननसाधनैरायुधैः नमयन् वृष्ट्यर्थं प्रह्वीकुर्वन् मदाय मदार्थम् एव पवस्व । एवं पात्रेषु क्षर । किंच रुशन्तम् आरोचमानं श्वेतं वर्णं परि भरमाणः परितो बिभ्रत् सिक्तः पवित्रे सिच्यमानस्त्वं गव्युः नः अस्माकं गा इच्छन् परि अर्ष परिगच्छ ।। ।।

जु॒ष्ट्वी नं इन्दो सु॒पथां सु॒गान्यु॒रौ पंवस्व॒ वरिंवांसि कृ॒ण्वन् ।

घ॒नेव॒ विष्वंग्दुरि॒तानिं वि॒घ्नन्नधि॒ ष्णुनां धन्व॒ सानो॒ अव्यें ॥ १६

जु॒ष्ट्वी । न॒ः । इ॒न्दो॒ इतिं । सु॒ऽपथां । सु॒ऽगानिं । उ॒रौ । प॒व॒स्व॒ । वरिंवांसि । कृ॒ण्वन् ।

घ॒नाऽइंव । विष्वंक् । दु॒ःऽइ॒तानिं । वि॒ऽघ्नन् । अधिं । स्नुनां । ध॒न्व॒ । सानौं । अव्यें ॥१६

जुष्ट्वी । नः । इन्दो इति । सुऽपथा । सुऽगानि । उरौ । पवस्व । वरिवांसि । कृण्वन् ।

घनाऽइव । विष्वक् । दुःऽइतानि । विऽघ्नन् । अधि । स्नुना । धन्व । सानौ । अव्ये ॥१६

हे इन्दो दीप्त पवमान जुष्ट्वी । ' स्नात्व्यादयश्च ' इति निपातितः । स्तुतिभिः प्रीतो भूत्वा नः अस्माकं सुपथानि वैदिकमार्गान् तथा वरिवांसि वरणीयानि धनानि सुगा सुगमनानि सुप्राप्तव्यानि कृण्वन् कुर्वन् उरौ विस्तीर्णे द्रोणकलशे पवस्व क्षर । किंच घनेव घनीभूतेन लोहमयेनायुधेनेव विष्वक् सर्वतः दुरितानि दुष्प्राप्तव्यानि रक्षांसि विघ्नन् हिंसन् सानौ समुच्छ्रिते अव्ये अविभवे स्नुना स्रवता धारासंघेन अधि धन्व अधिगच्छ । धविर्गत्यर्थः ।।

वृ॒ष्टिं नों अर्ष दि॒व्यां जिंग॒त्नुमिळांवतीं शं॒गयीं जी॒रदांनुम् ।

स्तुकेंव वी॒ता धंन्वा विचि॒न्वन्बन्धूँरि॒माँ अवंराँ इन्दो वा॒यून्
॥१७

वृ॒ष्टिम् । नः॒ । अ॒र्ष॒ । दि॒व्याम् । जि॒ग॒त्नुम् । इळा॑ऽवतीम् । श॒म्ऽगयी॑म् । जी॒रऽदा॑नुम् ।

स्तुका॑ऽइव । वी॒ता । ध॒न्व॒ । वि॒ऽचि॒न्वन् । बन्धू॑न् । इ॒मान् । अव॑रान् । इ॒न्दो॒ इति॑ । वा॒यून् ॥१७

वृष्टिम् । नः । अर्ष । दिव्याम् । जिगत्नुम् । इळाऽवतीम् । शम्ऽगयीम् । जीरऽदानुम् ।

स्तुकाऽइव । वीता । धन्व । विऽचिन्वन् । बन्धून् । इमान् । अवरान् । इन्दो इति । वायून् ॥१७

हे सोम नः अस्माकं वृष्टिम् अर्ष गमय । कीदृशीम् । दिव्यां दिवि भवां जिगत्नुं गमनशीलाम् इळावतीम् अन्नवतीं शंगयीं सुखस्य निवासभूतां जीरदानुं क्षिप्रदानोपेताम् । किंच हे इन्दो त्वं स्तुकेव वीता कान्तानि । स्तुकशब्दोऽपत्यवचनः । अपत्यानि यथा विचिनोषि

तद्वत् बन्धून् स्तुत्यस्तोतृत्वेन बन्धुभूतान् अवरान् अवरदेशे स्थितान् पार्थिवान् वायून् त्वामभि- गच्छतः इमान् अस्मान् विचिन्वन् धनादिप्रदानार्थं गवेषमाणः सन् धन्व गच्छ ।।

ग्र॒न्थिं न वि ष्यं ग्रथि॒तं पुंना॒न ऋ॒जुं चं गा॒तुं वृंजि॒नं चं सोम ।

अत्यो॒ न क्रंदो॒ हरि॒रा सृंजा॒नो मर्यो॑ देव धन्व प॒स्त्यांवान् ॥ १८

ग्र॒न्थिम् । न । वि । स्य॒ । ग्र॒थि॒तम् । पु॒ना॒नः । ऋ॒जुम् । च॒ । गा॒तुम् । वृ॒जि॒नम् । च॒ । सो॒म॒ ।

अत्यः॑ । न । क्र॒द॒ः । हरिः॑ । आ । सृ॒जा॒नः । मर्यः॑ । दे॒व॒ । ध॒न्व॒ । प॒स्त्यं॑ऽवान् ॥१८

ग्रन्थिम् । न । वि । स्य । ग्रथितम् । पुनानः । ऋजुम् । च । गातुम् । वृजिनम् । च । सोम ।

अत्यः । न । क्रदः । हरिः । आ । सृजानः । मर्यः । देव । धन्व । पस्त्यऽवान् ॥१८

पुनानः पूयमानस्त्वं ग्रथितं पापैर्बद्धं मां वि ष्य मुञ्च । पापेभ्यो विश्लेषय । कथमिव । ग्रन्थिं न यथा कश्चित् ग्रन्थिं विश्लेषयति । षो अन्तकर्मणि इत्यस्य लोटि रूपम् । किंच हे सोम त्वम् ऋजुम् अवक्रं गातुं मार्गं च वृजिनं बलं च मह्यं देहि । हरिः हरितवर्णस्त्वम् आ सृजानः पात्रेष्वासृज्यमानः सन् अत्यो न अतनशीलोऽश्व इव क्रदः क्रन्दसि शब्दायसे । किंच हे देव मर्यः मनुष्यहितो मारको हिंसको वा शत्रूणां पस्त्यवान् । पस्त्वं गृहम् । तद्वांस्त्वं धन्व मामभिगच्छ कलशान् वा ।।

जुष्टो॒ मदा॑य दे॒वता॑त इन्दो॒ परि॒ ष्णुना॑ धन्व॒ सानो॒ अव्ये॑ ।

स॒हस्र॑धारः सु॒र॒भिरद॑ब्धः॒ परि॑ स्रव॒ वाज॑सातौ नृ॒षह्ये॑ ॥
१९

जुष्टः॑ । मदा॑य । दे॒वऽता॑ते । इ॒न्दो॒ इति॑ । परि॑ । स्नुना॑ ।
ध॒न्व॒ । सानौ॑ । अव्ये॑ ।

स॒हस्र॑ऽधारः । सु॒ऽर॒भिः । अद॑ब्धः । परि॑ । स्र॒व॒ ।
वाज॑ऽसातौ । नृ॒ऽसह्ये॑ ॥१९

जुष्टः । मदाय । देवऽताते । इन्दो इति । परि । स्नुना ।
धन्व । सानौ । अव्ये ।

सहस्रऽधारः । सुऽरभिः । अदब्धः । परि । स्रव ।
वाजऽसातौ । नृऽसह्ये ॥१९

हे इन्दो मदाय जुष्टः पर्याप्तस्त्वं देवताते देवैस्तते यज्ञे सानौ समुच्छ्रिते अव्ये अविभवे पवित्रे स्नुना स्रवणशीलेन धारासंघेन सह परि धन्व परिगच्छ । सहस्रधारः बहुविधधारोपेतः सुरभिः सुगन्धिस्त्वम् अदब्धः न कैश्चिद्धिंसितः सन् वाजसातौ अन्नलाभनिमित्ते नृसह्ये नृभिः सोढव्ये युद्धे परि स्रव परितो गच्छ ।।

अ॒र॒श्मानो॒ ये॑ऽर॒था अयु॑क्ता॒ अत्या॑सो॒ न स॑सृजा॒नास॑ आ॒जौ ।

ए॒ते शु॒क्रासो॑ धन्वन्ति॒ सोमा॒ देवा॑स॒स्ताँ उप॑ याता॒ पिब॑ध्यै ॥२०

अ॒र॒श्मान॑ः । ये । अ॒र॒थाः । अयु॑क्ताः । अत्या॑सः । न । स॒सृ॒जा॒नास॑ः । आ॒जौ ।

ए॒ते । शु॒क्रासः॑ । ध॒न्व॒न्ति॒ । सोमाः॑ । देवा॑सः । तान् । उप॑ । या॒त॒ । पिब॑ध्यै ॥२०

अरश्मानः । ये । अरथाः । अयुक्ताः । अत्यासः । न । ससृजानासः । आजौ ।

एते । शुक्रासः । धन्वन्ति । सोमाः । देवासः । तान् । उप । यात । पिबध्यै ॥२०

अरश्मानः रश्मिवर्जिताः । रज्जुरहिता इति यावत् । अरथाः रथवर्जिताः अयुक्ताः कुत्रापि न नियुक्ताः । अबद्धा इत्यर्थः । एतादृशाः ये आजौ युद्धे ससृजानासः सृज्यमानाः अत्यासो न अश्वा यथा त्वरया लक्ष्यं गच्छन्ति तद्वदाजौ । अजन्ति कर्मकरणार्थमृत्विजोऽत्र इत्याजिर्यज्ञः । तस्मिन् सृज्यमानाः शुक्रा दीप्यमानाः एते सोमाः धन्वन्ति क्षिप्रं कलशानभि- गच्छन्ति । अथ प्रत्यक्षः । हे

देवासः देवाः तान् आगच्छतः सोमान् पिबध्यै पानाय उप
यात उपगच्छत ।। ।।

ए॒वा नं॑ इन्दो अ॒भि दे॒ववी॑तिं॒ परिं॑ स्र॒व नभो॒ अर्णं॑श्च॒मूषुं॑ ।

सोमों॑ अ॒स्मभ्यं॒ काम्यं॑ बृ॒हन्तं॑ र॒यिं दं॑दातु वी॒रवं॑न्तमु॒ग्रम् ॥
२१

ए॒व । न॒ः । इ॒न्दो॒ इतिं॑ । अ॒भि । दे॒वऽवी॑तिम् । परिं॑ । स्र॒व॒ ।
नभः॑ । अर्णः॑ । च॒मूषुं॑ ।

सोमः॑ । अ॒स्मभ्यं॑म् । काम्यं॑म् । बृ॒हन्तं॑म् । र॒यिम् । द॒दा॒तु॒ ।
वी॒रऽवं॑न्तम् । उ॒ग्रम् ॥२१

एव । नः । इन्दो इति । अभि । देवऽवीतिम् । परि । स्रव ।
नभः । अर्णः । चमूषु ।

सोमः । अस्मभ्यम् । काम्यम् । बृहन्तम् । रयिम् । ददातु । वीरऽवन्तम् । उग्रम् ॥२१

हे इन्दो सोम नः अस्मदीयम् एव देववीतिम् । देवानां वीतिर्भक्षणं गमनं वा यस्मिन् स देववीतिर्यज्ञः । तमभिलक्ष्य नभः नभसो द्युलोकात् अर्णः उदकम् । अनेन पवित्रान्निर्गतः सोमरसोऽभिधीयते । तं रसं चमूषु चमसेषु परि स्रव परितः क्षर । ततः सोमः काम्यं काम्यमानं बृहन्तं प्रवृद्धं वीरवन्तं पुत्रयुक्तम् उग्रम् उद्गूर्णबलं रयि धनम् अस्मभ्यं ददातु प्रयच्छतु ।।

तक्ष॒द्यदी॒ मन॑सो॒ वेन॑तो॒ वाग्ज्येष्ठ॑स्य वा॒ धर्म॑णि॒ क्षोरनी॑के ।

आदी॑माय॒न्वर॒मा वा॑वशा॒ना जुष्टं॒ पतिं॑ क॒लशे॒ गाव॒ इन्दु॑म् ॥
२२

तक्षंत् । यदिं । मनंसः । वेनंतः । वाक् । ज्येष्ठंस्य । वा॒ । धर्मंणि । क्षोः । अनींके ।

आत् । ई॒म् । आ॒य॒न् । वरंम् । आ । वा॒व॒शा॒नाः । जुष्टंम् । पतिंम् । क॒लशें । गावः॑ । इन्दुंम् ॥२२

तक्षत् । यदि । मनसः । वेनतः । वाक् । ज्येष्ठस्य । वा । धर्मणि । क्षोः । अनीके ।

आत् । ईम् । आयन् । वरम् । आ । वावशानाः । जुष्टम् । पतिम् । कलशे । गावः । इन्दुम् ॥२२

वेनतः । वेनो वेनतेः कान्तिकर्मणः (निरु. १० ३८) इति यास्कः । कामयमानस्य मनसः । मन्यतेः स्तुतिकर्मणः । स्तोतुः वाक् स्तुतिलक्षणा यदि एनं तक्षत् संस्करोति । वाशब्द उपमार्थे । यथा धर्मणि । निमित्तात्कर्मसंयोगेर (पा. सू. २. ३ ३६. ६) इति सप्तमी । धारकं योगक्षेमबिषयं

कर्मोद्दिश्य क्षोः शब्दायमानस्य अनीके मुखे तत्र स्थितस्य जानपदिकस्य वाक् ज्येष्ठस्य । द्वितीयार्थे षष्ठी । प्रशस्यतमं राजानं यथा स्तौति तथा स्तोतुर्वाक् सोमं स्तौतीत्यर्थः । आत् अनन्तरमेव अवरं वरणीयं जुष्टं देवानां मदाय पर्याप्तं पतिं सर्वस्य पालकं कलशे स्थितम् इन्दुम् ईम् एनं सोमं वावशानाः कामयमानाः गावः आ आयन् । पयसा स्वीयेन मिश्रयितुमागच्छन्ति ।।

प्र दा॑नु॒दो दि॒व्यो दा॑नुपि॒न्व ऋ॒तमृ॒ताय॑ पवते सुमे॒धाः ।

ध॒र्मा भु॑वद्वृज॒न्य॑स्य॒ राजा॒ प्र र॒श्मिभि॑र्द॒शभि॑र्भारि॒ भूम॑ ॥ २३

प्र । दा॒नु॒ऽदः । दि॒व्यः । दा॒नु॒ऽपि॒न्वः । ऋ॒तम् । ऋ॒ताय॑ । प॒व॒ते । सु॒ऽमे॒धाः ।

ध॒र्मा । भु॒व॒त् । वृ॒ज॒न्यं॑स्य । राजा॑ । प्र । र॒श्मिऽभिः॑ ।
द॒शऽभिः॑ । भा॒रि॒ । भूम॑ ॥२३

प्र। दानुऽदः । दिव्यः । दानुऽपिन्वः । ऋतम् । ऋताय ।
पवते । सुमेधाः ।

धर्मा । भुवत् । वृजन्यस्य। राजा । प्र । रश्मिभिः ।
दशऽभिः । भारि । भूम ॥ २३ ॥

दिव्यो दिविभवः दानुदः दातृभ्यो धनादीनां दाता तदेवाह दानुपिन्वः पिवि सेचने कर्मण्यणित्यण् दातृभ्यः कामानां रक्षयिता सुमेधाः शोभनप्रज्ञः सोमः ऋताय सत्यभूतायेन्द्राय तं सत्यभूतमात्मीयं रसं पवते प्रकर्षेण क्षरति । राजा दीप्यमानः सोमः वृजन्यस्य साधुबलस्य धर्मा धारयिता भुवद्भवति । किंच दशभिः एतत्संज्ञकाभीरश्मिभिः कर्मकरणार्थमश्नुवानाभिः

अंगुलिभिः भूम प्रभूतं प्रभारि प्रभार्यते चिणिरूपं ॥ २३
।।

प॒वित्रेँभि॒ः पवंमानो नृ॒चक्षा॒ राजां दे॒वानांमु॒त मर्त्यांनाम् ।

द्वि॒ता भुंवद्रयि॒पतीं रयी॒णामृ॒तं भंर॒त्सुभृंत॒ चार्विन्दुः ॥२४

प॒वित्रेँभिः । पवंमानः । नृ॒ऽचक्षाः । राजां । दे॒वानांम् । उ॒त
। मर्त्यांनाम् ।

द्वि॒ता । भु॒व॒त् । र॒यि॒ऽपतिः । र॒यी॒णाम् । ऋ॒तम् । भ॒र॒त् ।
सुऽभृंतम् । चारुं । इन्दुः ॥२४

पवित्रेभिः । पर्वमानः । नृचक्षाः । राजा । देवानाम् । उत
।। मर्त्यानाम् ।

द्विता । भुवत् । रयिऽपतिः । रयीणाम् । ऋतम् । भरत् । सुभृतम् । चारु । इन्दुः ॥ २४ ॥

पवित्रेभिः पवित्रैः पवमानः पूयमानः नृचक्षाः नृणां फलाफलयोः दृष्टा अथ देवानामिन्द्रादीनां उतापि च मर्यानां मनुष्याणां एवमुभयेषां जनानां राजा रयिपतिः धनस्यपतिः नत्वल्पस्यपतिः किंतु रयीणां बहूनां धनानां स्वामी । वृत्यवृत्तिभ्यां स्वामित्वं बाहुल्यं च विवक्ष्यते । ईदृशः सोमः द्विता द्विधा देवेष्वपि च मनुष्येषु भुवत् भवति । सोयमिन्दुः सोमः सुभृतं संभृतं चारु कल्याणं ऋतमुदकं भरत बिभर्ति ॥ २४ ॥

अर्वाँ इव॒ श्रवंसे सा॒तिमच्छेन्द्रंस्य वा॒योर॒भि वी॒तिमंर्ष ।

स नः॑ स॒हस्रां बृह॒तीरिषों दा॒ भवां सोम द्रविणो॒वित्पुंना॒नः ॥२५

अर्वा॑न्ऽइव । श्रव॑से । सा॒तिम् । अच्छ॑ । इन्द्र॑स्य । वा॒योः । अ॒भि । वी॒तिम् । अ॒र्ष॒ ।

सः । न॒ः । स॒हस्रा॑ । बृ॒ह॒तीः । इषः॑ । दा॒ः । भव॑ । सो॒म॒ । द्र॒वि॒ण॒ःऽवित् । पु॒ना॒नः ॥२५

अर्वान्ऽइव । श्रवसे । सातिम् । अच्छ । इन्द्रस्य । वायोः । अभि । वीतिम् । अर्ष ।

सः । नः । सहस्रा । बृहतीः । इषः । दाः । भव । सोम । द्रविणःऽवित् । पुनानः ॥ २५ ॥ १५ ॥

हे सोम अन्नार्थं युद्धे अर्वानिव अश्वो यथा गच्छति तद्वत् त्वं श्रवसे अस्माकमन्नार्थं तथा सातिमच्छ धनलाभंप्रति इन्द्रस्य वायोश्च वीतिं पानमभ्यर्ष अभिगच्छ । ऐन्द्रवायवग्रहे हि इन्द्रवायू सह सोमं पिबत इति सहोपादानं । सत्वं सहस्रा सहस्राणि बहुविधानि बृहतीः

बृंहितानि प्रवृद्धानि इषोन्नानि नोस्मभ्यं दाः प्रयच्छ । हे सोम पुनानः पूयमानस्त्वं नोस्मभ्यं द्रविणोवित् धनस्य लंभयिता भव । द्रविणशब्दात्सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति सुगागमः ॥ २५ ॥

दे॒वा॒व्यो॑ नः परिषि॒च्यमा॑ना॒ः क्षयं॑ सु॒वीरं॑ धन्वन्तु॒ सोमाः॑ ।

आ॒यु॒ज्यवः॑ सुम॒तिं वि॒श्ववा॑रा॒ होता॑रो॒ न दि॑वि॒यजो॑ म॒न्द्रत॑माः ॥२६

दे॒व॒ऽअ॒व्यः॑ । न॒ः । प॒रि॒ऽसि॒च्यमा॑नाः । क्षयं॑म् । सु॒ऽवीरं॑म् । ध॒न्व॒न्तु॒ । सोमाः॑ ।

आ॒ऽयु॒ज्यवः॑ । सु॒ऽम॒तिम् । वि॒श्वऽवा॑राः । होता॑रः । न । दि॒वि॒ऽयजः॑ । म॒न्द्रऽत॑माः ॥२६

देवऽअव्यः । नः। परिऽसिच्यमानाः । क्षयम् । सुवीरम् । धन्वन्तु । सोमाः ।

आऽयज्यवः । सुऽमतिम् । विश्ववाराः ।। होतारः । न । दिविऽयजः । मन्द्रऽतमाः ॥ २६ ॥

देवाव्यः अवतेस्तर्पणार्थस्य अवितृस्तृतस्त्रिभ्यईरिति ईप्रत्ययः । उदात्तस्वरितयो र्यण इति जसः स्वरितत्वं । देवानां तर्पयितारः परिषिच्यमानाः परितः पात्रेषु सिच्यमानाः सोमाः नोस्माकं सुवीरं शोभनपुत्रं क्षयं गृहं धन्वन्तु प्रेरयन्तु । कीदृशाः सुमतिं शोभनमतिं यजमानं आयज्यवः यष्टुमिच्छवः विश्ववाराः विश्वैर्वरणीयाः होतारो न होतारो यथा देवानिन्द्रादीन् स्तुवन्ति एवं दिवियजः दिवि द्युलोकस्थितानिन्द्रादीन् देवान् यजन्तः । दिव् शब्दे तत्पुरुषेकृतिबहुलमिति सप्तम्याअलुक् । मन्द्रतमाः अत्यन्तंमदकराः ॥ २६॥

ए॒वा दे॑व दे॒वता॑ते पवस्व म॒हे सो॑म॒ प्सर॑से देव॒पान॑ः ।

म॒हश्चि॒द्धि ष्मसि॑ हि॒ताः स॑म॒र्ये कृ॒धि सु॑ष्ठा॒ने रोद॑सी पुना॒नः
॥२७

ए॒व । दे॒व॒ । दे॒वऽता॑ते । प॒व॒स्व॒ । म॒हे । सो॒म॒ । प्सर॑से ।
दे॒व॒ऽपान॑ः ।

म॒हः । चि॒त् । हि । स्मसि॑ । हि॒ताः । स॒ऽम॒र्ये । कृ॒धि ।
सु॒स्था॒ने इति॑ सु॒ऽस्था॒ने । रोद॑सी॒ इति॑ । पु॒ना॒नः ॥२७

एव । देव । देवऽताते । पवस्व । महे । सोम । प्सरसे ।
देवऽपानः ।

महः। चित् । हि । स्मसि । हिताः । सऽमर्ये । कृधि ।
सुस्थाने इति सुस्थाने । रोदसी इति । पुनानः ॥ २७ ॥

हे देव द्योतमान स्तोतव्य वा हे सोम देवपानः देवैः पातव्यस्त्वं देवताते देवैस्तते वितते यज्ञे महे महते प्सरसे भक्षणाय देवानां पानाय एव एवं पवस्व क्षर । ततो वयं हिताः त्वया प्रेरिताः सन्तः समयें मरणधर्मरहिते संग्रामे महश्चित् महतो बलाधिकानपि शत्रून् स्मसिहि अभिभवेम खलु । किंच पुनानः पूयमानस्त्वं रोदसी द्यावापृथिव्यौ सुस्थाने अस्माकं शोभनावासस्थाने सत्यौ कृधि कुरु ॥ २७ ॥

अश्वो॒ नो क्रं॑दो॒ वृषं॑भिर्युजा॒नः सिं॒हो न भी॒मो मनं॑सो॒ जवी॑यान् ।

अ॒र्वा॒चीनैः॑ प॒थिभि॒र्ये रजि॑ष्ठा॒ आ प॑वस्व सौमन॒सं न॑ इन्दो ॥२८

अश्वः॑ । न । क्र॒द॒ः । वृष॑ऽभिः । यु॒जा॒नः । सि॒ंहः । न ।
भी॒मः । मन॑सः । जवी॑यान् ।

अ॒र्वा॒चीनैः॑ । प॒थिऽभिः॑ । ये । रजि॑ष्ठाः । आ । प॒व॒स्व॒ ।
सौ॒म॒न॒सम् । न॒ः । इ॒न्दो॒ इति॑ ॥२८

अश्वः । न । क़दः । वृऽषभिः । युजानः । सिंहः । न ।
भीमः । मनसः । जवीयान् ।

अर्वाचीनैः । पथिऽभिः । ये । रजिष्ठाः । आ। पवस्व ।
सौमनसम् । नः । इन्दो इर्ति ॥ २८ ॥

हे सोम वृषभिर्ऋत्विग्भिः सोममभिषुण्वद्भिः युजानो
योज्यमानस्त्वं अश्वो न अश्वइव क्रदः क्रन्दसि शब्दायसे ।
कीदृशः सिंहो न सिंह इव भीमः शत्रूणां भयंकरः तथा
मनसोपि जवीयान् वेगवत्तरः अर्वाचीनैः अभिमुखैः
पथिभिर्मार्गैः ये मार्गाः रजिष्ठाः अत्यन्तमृजवो भवन्ति

विभाषर्जोश्छन्दसीतिऋकारस्यरादेशः । हे इन्दो दीप्यमान सोम तैर्मार्गैः नोस्माकं सौमनसं सौमनस्य आपवस्व आप्रापय ॥ २८ ॥

श॒तं धारां दे॒वजांता असृग्रन्स॒हस्रंमेनाः क॒वयों मृजन्ति ।

इन्दों स॒नित्रं दि॒व आ पंवस्व पुरए॒तासिं मह॒तो धनंस्य ॥ २९

श॒तम् । धाराः᳚ । दे॒वऽजांताः । अ॒सृ॒ग्र॒न् । स॒हस्रंम् । ए॒नाः॒ । क॒वयः᳚ । मृ॒ज॒न्ति॒ ।

इन्दो॒ इतिं । स॒नित्रंम् । दि॒वः । आ । प॒व॒स्व॒ । पु॒रः॒ऽए॒ता । अ॒सि॒ । म॒ह॒तः । धनंस्य ॥२९

शतम् । धाराः । देवाजाताः । असृग्रन् । सहस्रम् । एनाः । कवयः । मृजन्ति ।

इन्दो इति । सनित्रम् । दिवः । आ। पवस्व । पुरःऽएता।
असि । महतः । धनस्य ॥ २९ ॥

हे सोम देवजाताः देवार्थं प्रादुर्भूताः शतं शतसंख्याकाः त्वदीया धाराः असृग्रन् सृज्यन्ते । ततः कवयः क्रान्तदर्शिनः ऋत्विजः सहस्रं बहुविधाः एनाः त्वदीया धाराः मृजन्ति अलंकुर्वन्ति यद्वा सहस्रमनेकधा मृजन्ति शोधयन्ति । हे इन्दो सनित्रं भजनसाधनं दिवो द्युलोत् अस्माकं पुत्रादीनां च आपवस्व आप्रापय ।
कुतोस्यधनमिति चेत् तत्राह महतः प्रभूतधनस्य पुरएता पुरतो गंतासि भवसि तस्माद्देहि इति ॥ २९ ॥

दि॒वो न सर्गा॑ अससृग्र॒मह्नां॒ राजा॒ न मि॒त्रं प्र मि॑नाति॒ धीरः॑ ।

पि॒तुर्न पु॒त्रः क्रतु॑भिर्यता॒न आ पं॑वस्व वि॒शे अ॒स्या अजी॑तिम् ॥३०

दि॒वः । न । सर्गाः॑ । अ॒स॒सृ॒ग्र॒म् । अह्नां॑म् । राजा॑ । न ।
मि॒त्रम् । प्र । मि॒ना॒ति॒ । धीरः॑ ।

पि॒तुः । न । पु॒त्रः । क्रतु॑ऽभिः । य॒ता॒नः । आ । प॒व॒स्व॒ ।
वि॒शे । अ॒स्यै । अजी॑तिम् ॥३०

दिवः । न । सर्गाः । अससृग्रम् । अह्नाम् । राजा । न ।
मित्रम् । प्र । मिनाति । धीरः ।

पितुः । न । पुत्रः । क्रतुऽभिः । यतानः । आ। पवस्व ।
विशे। अस्यै। अजीतिम् ॥ ३० ॥ १६ ॥

दिवो न यथा दिवो द्योतमानस्य आदित्यस्याह्नां संबन्धिनः सर्गा रश्मयः अससृग्रं विसृज्यन्ते तद्वत् सोमस्य सर्गाः सृज्यन्ते इति सर्गाधाराः विसृज्यन्ते सृजेर्व्यत्ययेन कर्मार्थे लङिबहुलंछन्दसीतिशस्यश्लुः झेरमादेशश्छांदसः । धीरः प्राज्ञो राजा अयं सोमः मित्रं सखायं न प्रमिनाति न

हिनस्ति क्रतुभिः कर्मभिर्यतानो यतमानः पुत्रः पितुर्न पितुर्यथा अपराभवं करोति तद्वत् कर्मभिर्यतमानस्त्वं अस्यै विशे प्रजायै अजीतिं अपराजितं अपराभवं आपवस्व आप्रापय यथा न पराजिता भवन्ति तथा कुर्वित्यर्थः ॥ ३० ॥

प्र ते॒ धारा॒ मधु॑मतीरसृग्र॒न्वारा॒न्यत्पू॒तो अ॒त्येष्यव्या॑न् ।

पव॑मान॒ पव॑से॒ धाम॒ गोनां॑ जज्ञा॒नः सूर्य॑मपिन्वो अ॒र्कैः ॥३१

प्र । ते॒ । धाराः॑ । मधु॑ऽमतीः । अ॒सृ॒ग्र॒न् । वारा॑न् । यत् । पू॒तः । अ॒ति॒ऽएषि॑ । अव्या॑न् ।

पव॑मान । पव॑से । धाम॑ । गोना॑म् । ज॒ज्ञा॒नः । सूर्य॑म् । अ॒पि॒न्वः॒ । अ॒र्कैः ॥३१

प्र । ते । धाराः । मधुमतीः । असृग्रन् । वारान् । यत् ।
पूतः । अतिऽएषि । अव्यान् ।

पवमान । पवसे । धाम । गोनाम् । जज्ञानः । सूर्यम् ।
अपिन्वः । अर्कैः ॥ ३१ ॥

ते तव स्वभूता मधुमतीः मधुमत्यो धाराः प्रासृग्रन् तदा प्रसृज्यन्ते यद्यदा पूतो वसतीवरीभिः त्वं अव्यानविभवान् वारान् वालान् पवित्राण्यत्येषि अतीत्य गच्छसि । किंच हे पवमान गोनां गवां धाम धारकं पयो लक्षीकृत्य पवसे ततः जज्ञानः जायमानस्त्वं अर्कैरर्चनीयैः स्वतेजोभिः सूर्यमादित्यमपिन्वः पूरयसि ॥ ३१ ॥

कनिंक्रदद॒नु॒ पन्थां॑मृ॒तस्यं॑ शु॒क्रो वि भा॑स्य॒मृतं॑स्य॒ धाम॑ ।

स इन्द्राय पवसे मत्स॒रवान्हिन्वा॒नो वाचं म॒तिभिः कवी॒नाम् ॥३२

कनिक्रदत् । अनु । पन्थाम् । ऋ॒तस्य । शु॒क्रः । वि । भा॒सि॒ । अ॒मृतस्य । धाम ।

सः । इन्द्राय । प॒व॒से॒ । म॒त्स॒रऽवान् । हि॒न्वा॒नः । वाचम् । म॒तिऽभिः । क॒वी॒नाम् ॥३२

कनिक्रदत् । अनु । पन्थाम् । ऋतस्य। शुक्रः । वि। भासि। अमृतस्य । धाम ।

सः । इन्द्राय। पवसे । मत्सरऽवान् । हिन्वानः । वाचम् । मतिऽभिः । कवीनाम् ॥ ३२ ॥

अभिषूयमाणः सोमः ऋतस्य सत्यभूतस्य यज्ञस्य पंथां पंथानं मार्गमनु कनिक्रदत् पुनःपुनः शब्दायते । अथ प्रत्यक्षः अमृतस्यामरणधर्मस्य धाम स्थानभूतः

मरणरहितइत्यर्थः । तादृशः शुक्रः शुक्लवर्णः त्वं विभासि विशेषेण राजसि मत्सरवान् मदकररसयुक्तः सत्वं इन्द्रायेन्द्रार्थं पवसे क्षरसि । कीदृशः कवीनां स्तोतॄणां मतिभिः सह वाचं शब्दं हिन्वानः प्रेरयन् पवसे ।। ३२ ॥

दि॒व्यः सु॑प॒र्णोऽव॑ चक्षि सोम॒ पिन्व॒न्धारा॒ः कर्म॑णा दे॒ववी॑तौ ।

एन्दो॑ विश क॒लशं॑ सोम॒धान॒ं क्रन्द॑न्निहि॒ सूर्य॒स्योप॑ र॒श्मिम् ॥३३

दि॒व्यः । सु॒ऽप॒र्णः । अव॑ । च॒क्षि॒ । सो॒म॒ । पिन्व॑न् । धाराः॑ । कर्म॑णा । दे॒वऽवी॑तौ ।

आ । इ॒न्दो॒ इति॑ । वि॒श॒ । क॒लश॑म् । सो॒म॒ऽधान॑म् । क्रन्द॑न् । इ॒हि॒ । सूर्य॑स्य । उप॑ । र॒श्मिम् ॥३३

दिव्यः । सुऽपर्णः। अव । चक्षि । सोम । पिन्वंन् । धाराः
।। कर्मणा । देवऽवीतौ ।

आ । इन्दो इति । विश । कलशम् ।। सोमऽधानम् ।
क्रन्दन् । इहि । सूर्यस्य । उप । रश्मिम् ॥ ३३ ॥

हे सोम दिव्यो दिविभवः सुपर्णः सुपतनस्त्वं अवचक्षि अवस्तात् पश्य च । चष्टेर्लटिसिपिव्यत्ययेन परस्मैपदं । किं कुर्वन् देववीतौ देवानां हविर्भक्षणस्थानेयज्ञे कर्मणा धाराः पिन्वन् क्षरन् । किंच हे इन्दो सोमधानं कलशं आविश क्रन्दन्शब्दायमानस्त्वं सूर्यस्य प्रेरकस्यादित्यस्य रश्मिं कान्तिमुपोहि उपगच्छ ॥ ३३ ॥

ति॒स्रो वाचं ईरयति॒ प्र वह्निंरृ॒तस्यं धी॒तिं ब्रह्मंणो मनी॒षाम् ।

गावों यन्ति॒ गोपंतिं पृ॒च्छमांना॒ः सोमं यन्ति म॒तयों वावशा॒नाः ॥३४

ति॒स्रः । वाचः॑ । ई॒र॒य॒ति॒ । प्र । वह्निः॑ । ऋ॒तस्यं । धी॒तिम् । ब्रह्मं॑णः । म॒नी॒षाम् ।

गावः॑ । य॒न्ति॒ । गोऽपंतिम् । पृ॒च्छमांनाः । सोमंम् । य॒न्ति॒ । म॒तयः॑ । वा॒व॒शा॒नाः ॥३४

तिस्रः । वाचः। ईरयति । प्र । वह्निः । ऋतस्य । धीतिम् । ब्रह्मणः । मनीषाम् ।

गावः । यन्ति । गोऽपतिम् । पृच्छमानाः । सोमम् । यन्ति । मतयः। वावशानाः ॥ ३४ ॥

वह्निर्वोढा यजमानः [१]तिस्रोवाचः ऋग्यजुःसामात्मिकाः स्तुतीः प्रेरयति । तथा ऋतस्य यज्ञस्य धीतिं धारयित्रीं ब्रह्मणः परिवृढस्य सोमस्य मनीषां मनसईशित्रीं कल्याणीं

वाचं च प्रेरयति । किंच गोपतिं वृषभं यथा गावोभिगच्छन्ति तद्वत् । गवां स्वामिनं सोमं गावः पृच्छमानाः पृच्छंत्यः सत्यो यन्ति स्वपयसामिश्रयितुमभिगच्छन्ति । तथा वावशानाः कामयमानाः मतयः स्तोतारः सोमं यन्ति स्तोतुमभिगच्छन्ति ॥ ३४ ॥

सोमं॒ गावो॑ धे॒नवो॑ वावशा॒नाः सोमं॒ विप्रा॑ म॒तिभि॑ः पृ॒च्छमा॑नाः ।

सोम॑ः सु॒तः पू॑यते अ॒ज्यमा॑न॒ः सोमे॑ अ॒र्कास्त्रि॒ष्टुभ॒ः सं न॑वन्ते ॥३५

सोम॑म् । गाव॑ः । धे॒नव॑ः । वा॒व॒शा॒नाः । सोम॑म् । विप्रा॑ः । म॒तिऽभि॑ः । पृ॒च्छमा॑नाः ।

सोमः॑ । सु॒तः । पू॒य॒ते॒ । अ॒ज्यमा॑नः । सोमे॑ । अ॒र्काः ।
त्रि॒ऽस्तुभः॑ । सम् । न॒व॒न्ते॒ ॥३५

सोमम् । गावः । धेनवः । वावशानाः । सोमम् । विप्राः ।
मतिऽभिः । पृच्छमानाः ।

सोमः । सुतः । पूयते । अज्यमानः। सोमे । अर्काः ।
त्रिऽस्तुभः । सम् । नवन्ते ॥ ३५॥ १७ ॥

धेनवः प्रीणयित्र्योगावः सोमं वावशानाः कामयमाना भवन्ति विप्रा मेधाविनः स्तोतारः मतिभिः पृच्छमानाः पृच्छन्तो भवन्ति । अज्यमानः गोभिः सिच्यमानः सुतोभिषुतः सोमः ऋत्विग्भिः परिपूयते । तथा त्रिष्टुभः त्रिष्टुब्रूपाः अर्काः अस्माभिः क्रियमाणाः एते मंत्राः सोमे संनवन्ते संगच्छन्ते ॥ ३५ ॥

ए॒वा नः॑ सोम परिषि॒च्यमा॑न॒ आ पं॑वस्व पू॒यमा॑नः स्व॒स्ति ।

इन्द्र॒मा वि॑श बृह॒ता रवे॑ण व॒र्धया॒ वाचं॑ ज॒नया॒ पुरं॑धिम् ॥
३६

ए॒व । न॒ः । सो॒म॒ । प॒रि॒ऽसि॒च्यमा॑नः । आ । प॒व॒स्व॒ ।
पू॒यमा॑नः । स्व॒स्ति ।

इन्द्र॑म् । आ । वि॒श॒ । बृ॒ह॒ता । रवे॑ण । व॒र्धय॑ । वाच॑म् ।
ज॒नय॑ । पुर॑म्ऽधिम् ॥३६

एव । नः । सोम । परिऽसिच्यमानः । आ । पवस्व ।
पूयमानः । स्वस्ति ।

इन्द्रम् । आ । विश । बृहता । रवेण । वर्धय । वाचम् ।
जनय। पुरम्ऽधिम् ।। ३६ ॥

हे सोम परिषिच्यमानः परितः पात्रेषु सिच्यमानः पूयमानस्त्वं नोस्माकमेव स्वस्ति अविनाशमापवस्व आप्रापय । किंच बृहता महता रवेण शब्देन सह इन्द्रमाविश प्रविश तथा वाचं स्तुतिलक्षणां वर्धय । किंच पुरंधिं बहुधियं प्रज्ञानं जनय अस्मभ्यं उत्पादय । वाक्यभेदादनिघातः ॥ ३६॥

आ जागृ॑वि॒र्विप्र॑ ऋ॒ता म॑ती॒नां सोम॑: पुना॒नो अ॑सदच्च॒मूषु॑ ।

सप॑न्ति॒ यं मि॑थु॒नासो॒ निका॑मा अध्व॒र्यवो॑ रथि॒रास॑:
सु॒हस्ता॑: ॥३७

आ । जागृ॑विः । विप्र॑: । ऋ॒ता । म॒ती॒नाम् । सोम॑: ।
पु॒ना॒नः । अ॒स॒द॒त् । च॒मूषु॑ ।

सपं॑न्ति । यम् । मि॒थु॒नास॑ः । नि॒ऽका॑माः । अ॒ध्व॒र्यव॑ः ।
र॒थि॒रास॑ः । सु॒ऽहस्ता॑ः ॥३७

आ। जागृविः । विप्रः । ऋता । मतीनाम् । सोमः ।
पुनानः। असदत् । चमूषु ।

सपन्ति । यम् । मिथुनासः । निऽकामाः ।। अध्वर्यवः ।
रथिरासः । सुऽहस्ताः ॥ ३७॥

जागृविर्जागरणशीलः ऋता सुपांसुलुगिति षठ्या आकारः । ऋतानां सत्यानां मतीनां स्तुतीनां विप्रो ज्ञाता स सोमः पुनानः पूयमानः सन् चमूषु चमसेष्वासदत् आसीदति । मिथुनासः परस्परं संगताः निकामाः नितरां कामयमानाः रथिरासः यज्ञस्य नेतारः सुहस्ताः कल्याणपाणयः अध्वर्यवः पवित्रे यं सोमं सपन्ति स्पृशन्ति । षष समवाये। सपतिःस्पृशतिकर्मेति नैरुक्ताः ॥३७॥

स पुं॑ना॒न उप॑ सूरे॒ न धातोभे अं॑प्रा॒ रोदं॑सी॒ वि ष आं॑वः ।

प्रि॒या चि॒द्यस्यं॑ प्रिय॒सासं॑ ऊ॒ती स तू धनं॑ का॒रिणे॒ न प्र

यं॑सत् ॥३८

सः । पु॒ना॒नः । उपं॑ । सूरें॑ । न । धातां॑ । आ । उ॒भे इतिं॑ ।

अ॒प्रा॒ः । रोदं॑सी॒ इतिं॑ । वि । सः । आ॒व॒रित्यां॑वः ।

प्रि॒या । चि॒त् । यस्यं॑ । प्रि॒य॒सासः॑ । ऊ॒ती । सः । तु । धनं॑म्

। का॒रिणें॑ । न । प्र । यं॒स॒त् ॥३८

सः। पुनानः । उप । सूरे । न । धाता । आ । उभे इति ।

अप्राः । रोदसी इति । वि । सः । आवरित्यावः ।

प्रिया । चित् । यस्य । प्रियसासः । ऊती । सः । तु । धनम्

। कारिणे । न । प्र ।यंसत् ॥३८॥

पुनानः पूयमानः स सोमः इन्द्रे उपगच्छति । तत्र दृष्टान्तः–सूरेन यथा सूर्ये धाता संवत्सर उपगच्छति । ससंवत्सरोविधातारं । संवत्सरेणैवास्मै प्रजाः प्रजनयतीत्याम्नानात् । किंचोभे रोदसी द्यावापृथिव्यौ आप्राः स्वमहिम्ना आपूरयति । तथा स सोमः व्यावः स्वतेजसा तमांसि विवृणोति । वृणोतेर्मंत्रेघसेतिच्लेर्लुक् छन्दस्यपि दृश्यते इत्यडागमः पूर्वपदादिति स इत्यस्य सांहितिकंषत्वं । प्रिया षष्ठ्याआकारः पियस्य यस्य सोमस्य यद्वा प्रियाणि प्रयच्छतः यस्य सोमस्य प्रियसासः अत्यन्तं प्रियतमाधाराः ऊती ऊत्यै रक्षणाय भवन्ति स तु क्षिप्रं अस्मभ्यं धनं प्रयंसत् प्रयच्छतु । यच्छतेर्लेटिसिप्यडागमः । तत्र दृष्टान्तः–कारिणेन यथा कारिणे च कृतकाय भृतिं प्रयच्छन्ति तद्वत् ॥३८॥

स वं॑र्धि॒ता वर्ध॑नः पू॒यमा॑न॒ः सोमो॑ मी॒ढ्वाँ अ॒भि नो॒

ज्योतिंषावीत् ।

येनां न॒ः पूर्वें पि॒तरः॑ पद॒ज्ञाः स्व॒र्विदों अ॒भि गा
अद्रिंमु॒ष्णन् ॥३९

सः । व॒र्धि॒ता । वर्धंनः । पू॒यमांनः । सोमः॑ । मी॒ढ्वान् ।
अ॒भि । न॒ः । ज्योतिंषा । आ॒वी॒त् ।

येनं । न॒ः । पूर्वें । पि॒तरः॑ । प॒द॒ऽज्ञाः । स्व॒ःऽविदः॑ । अ॒भि ।
गाः । अद्रिंम् । उ॒ष्णन् ॥३९

सः । वर्धिता । वर्धनः । पूयमानः । सोमः । मीढ्वान् ।
अभि । नः। ज्योतिषा। आवीत् ।

येन । नः । पूर्वे । पितरः । पदऽज्ञाः । स्वःऽविदः। अभि ।
गाः । अद्रिम् । उष्णन् ॥ ३९ ॥

वर्धिता देवानां स्वकलाप्रदानेन वर्धयिता वर्धनः स्वयं वर्धमानः पवित्रेण पूयमानः मीढ्वान् कामानां सेक्ता स सोमः नोस्माकं ज्योतिषा स्वतेजसा अभ्यावीत् अभिरक्षतु । येन सोमेन पदज्ञाः पणिभिरपहतानां गवां पदानि जानन्तः स्वर्विदः सर्वज्ञाः सूर्यं जानन्तो वा नोस्माकं पूर्वे चिरन्तनाः पितरोंगिरसः गाः पशूनभिलक्ष्य अद्रिमुष्णन् शिलोच्चयमुष्णन् सोमतेजसा अंधकारावृतं शिलोच्चयं गत्वा पशूनाहरन्नित्यर्थः । उषिरिहमुष्णातिसमानकर्मा । यद्वा मुष्णातेर्लङि वर्णलोपः ॥ ३९ ॥

अक्रांन्त्समु॒द्रः प्रंथ॒मे विधंर्मञ्ज॒नयंन्प्र॒जा भुवंनस्य॒ राजां ।

वृषां प॒वित्रे॒ अधि॒ सानो॒ अव्यें बृ॒हत्सोमों वावृधे सुवा॒न इन्दुः॑ ॥४०

अक्रां॑न् । स॒मु॒द्रः । प्र॒थ॒मे । विऽध॑र्मन् । ज॒नय॑न् । प्र॒ऽजाः । भुव॑नस्य । राजा॑ ।

वृषा॑ । प॒वित्रे॑ । अधि॑ । सानौ॑ । अव्ये॑ । बृ॒हत् । सोम॑ः । व॒वृ॒धे॒ । सु॒वा॒नः । इन्दु॑ः ॥४०

अक्रान् । समुद्रः । प्रथमे । विधर्मन् । जनयन् । प्रऽजाः । भुवनस्य । राजा ।

वृषा । पवित्रे । अधि। सानौ । अव्ये। बृहत् । सोमः । ववृधे । सुवानः । इन्दुः ॥ ४० ॥ १८ ॥

समुद्रः यस्मादापः समुद्द्रवन्ति स समुद्रः अपां वर्षको राजा सोमः प्रथमे विस्तृते भुवनस्योदकस्य विधर्मन् विधारकेन्तरिक्षे प्रजा जनयन् । उत्पादयन् अक्रान् सर्वमतिक्रामति । क्रमतेर्लुङि तिपीडभावे वृद्धौ च कृतायां सिज्लोपे मकारस्य मोनोधातोरिति नकाररूपं । वृषा

कामानां वर्षिता सुवानोभिषूयमाणः इन्दुर्दीप्तः स सोमः अधि अधिकं सानौ समुच्छ्रिते अव्ये अविमये पवित्रे बृहत् प्रभूतं ववृधे वर्धते ॥ ४० ॥

म॒हत्तत्सोमो॑ महि॒षश्च॑कारा॒पां यद्गर्भोऽवृ॑णीत दे॒वान् ।

अद॑धा॒दिन्द्रे॒ पव॑मान॒ ओजोऽज॑नय॒त्सूर्ये॒ ज्योति॒रिन्दुः॑ ॥४१

म॒हत् । तत् । सोमः॑ । म॒हि॒षः । च॒का॒र॒ । अ॒पाम् । यत् । गर्भः॑ । अवृ॑णीत । दे॒वान् ।

अद॑धात् । इन्द्रे॑ । पव॑मानः । ओजः॑ । अज॑नयत् । सूर्ये॑ । ज्योतिः॑ । इन्दुः॑ ॥४१

महत् । तत् । सोमः । महिषः । चकार । अपाम् । यत् । गर्भः । अवृणीत । देवान् ।

अदधात् । इन्द्रे । पवमानः । ओजः । अजनयत् । सूर्ये । ज्योतिः । इन्दुः ॥ ४१ ।।

महिषो महान् पूज्यो वा सोमो महत्प्रभूतं तत्कर्म चकार अकरोत् । किं तत् अपां गर्भः उदकानां गर्भभूतः जनयितृत्वाज्जन्यत्वाच्च स सोमः देवानवृणीत समभजतेति यत् तत्कृतवानिति ।। किंच पवमानः पूयमानः सोमः ओजः सोमपानेन जन्यं बलं इन्द्रे अधात् व्यधात् । तथा इन्दुः सोमः सूर्ये ज्योतिस्तेजः अजनयत् ॥ ११ ॥

मत्सि॑ वा॒युमि॒ष्टये॒ राध॑से च॒ मत्सि॑ मि॒त्राव॑रुणा पू॒यमा॑नः ।

मत्सि॒ शर्धो॒ मारु॑तं॒ मत्सि॑ दे॒वान्मत्सि॒ द्यावा॑पृथि॒वी दे॑व सोम ॥४२

मत्सि॑ । वा॒युम् । इ॒ष्टये॑ । राध॑से । च॒ । मत्सि॑ । मि॒त्रावरु॑णा । पू॒यमा॑नः ।

मत्सि॑ । शर्धः॑ । मारु॑तम् । मत्सि॑ । दे॒वान् । मत्सि॑ । द्यावा॑पृथि॒वी इति॑ । दे॒व॒ । सो॒म॒ ॥४२

मत्सि । वायुम् । इष्टये। राधसे । च । मत्सि । मित्रावरुणा। पूयमानः ।

मत्सि । शर्धः । मारुतम् । मत्सि । देवान् । मत्सि। द्यावापृथिवी इति । देव । सोम ॥ ४२ ।।

हे सोम त्वं वायुं मत्सि मादय । किमर्थं इष्टये अस्माकमेषणाय अन्नाय राधसे धनाय च । तथा पूयमानः पवित्रेण त्वं मित्रावरुणा मित्रावरुणौ च मत्सि तर्पयसि । किंच मारुतं मरुतां स्वभूतं शर्धो बलं च मत्सि। तथा देवानिन्द्रादीन् मत्सि हर्षयसि । हे देव स्तोतव्य हे सोम

द्यावापृथिवी द्यावापृथिव्यौ च मत्सि मादय एतान् हर्षयुक्तान् कृत्वास्मभ्यं धनं प्रयच्छेत्यर्थः ॥४२॥ ।

ऋ॒जुः पव॑स्व वृ॒जि॒नस्य॑ ह॒न्तापामी॑वा॒ बाध॑मानो॒ मृध॑श्च ।

अ॒भि॒श्री॒णन्पय॒ः पय॑सा॒भि गोना॒मिन्द्र॑स्य॒ त्वं तव॑ व॒यं सखा॑यः ॥४३

ऋ॒जुः । प॒व॒स्व॒ । वृ॒जि॒नस्य॑ । ह॒न्ता । अप॑ । अमी॑वाम् । बाध॑मानः । मृधः॑ । च॒ ।

अ॒भि॒ऽश्री॒णन् । पयः॑ । पय॑सा । अ॒भि । गोना॑म् । इन्द्र॑स्य । त्वम् । तव॑ । व॒यम् । सखा॑यः ॥४३

ऋजुः । पवस्व । वृज़िनस्य । हन्ता । अप । अमीवाम् । बाधमानः । मृधः । च ।

अभिऽश्रीणन् । पयः । पयसा । अभि । गोनाम् । इन्द्रस्य । त्वम् । तव । वयम् । सखायः ॥ ४३ ॥

हे सोम ऋजुः ऋजुगमनः सन् पवस्व क्षर। किं कुर्वन् वृजिनस्य उपद्रवस्य हन्ता अमीवां रोगरूपं राक्षसं अपबाधमानः तथा अस्मदीयान् मृधोर्हिंसकान् शत्रूंश्च बाधमानः सन् पवस्व ततः पयआत्मीयंरसं गोनां गवां पयसा क्षीरेण अभिश्रीणन् अभिसंयोजयन् पात्राण्यभिगच्छसि । अपि च त्वं इन्द्रस्य सखासि हे सोम तव वयं सखायः स्तुत्यस्तोतृत्वयष्टृयष्टव्यत्वलक्षणेन सखिभूताः स्मः ॥ ४३ ॥

मध्व॒ः सूदँ पवस्व॒ वस्व॒ उत्सँ वी॒रं चं न॒ आ पंवस्वा॒ भगं च ।

स्वद॒स्वेन्द्रा॑य॒ पव॑मान इन्दो र॒यिं च॑ न॒ आ प॑वस्वा सम॒ुद्रात्
॥४४

मध्व॑ः । सूद॑म् । प॒व॒स्व॒ । वस्व॑ः । उत्स॑म् । वी॒रम् । च॒ । न॒ः
। आ । प॒व॒स्व॒ । भग॑म् । च॒ ।

स्वद॑स्व । इन्द्रा॑य । पव॑मानः । इ॒न्दो॒ इति॑ । र॒यिम् । च॒ ।
न॒ः । आ । प॒व॒स्व॒ । स॒मु॒द्रात् ॥४४

मध्वः । सूदम् । पवस्व । वस्वः । उत्सम् । वीरम् । च। नः
। आ । पवस्व । भगम् । च ।

स्वदस्व । इन्द्राय । पवमानः । इन्दो इति । रयिम् । च ।
नः । आ । पवस्व । समुद्रात् ॥ ४४ ॥

हे सोम मध्वो माधुर्यस्य सूदं क्षारयितारं घनीभूतं आपवस्व । वस्वो वसु धनस्य उत्सं उत्स्यन्दकं रसं पवस्व । किंच नोस्मभ्यं वीरं पुत्रं आपवस्व आप्रापय । तथा भगं

भजनीयं धनं च देहि । हे इन्दो पवमानः पूयमानः सन् इन्द्राय स्वदस्व रुचितो भव । ततस्त्वं नोस्मभ्यं समुद्रादन्तरिक्षात् रयिं धनं पुत्रं वा राति ददाति क्षीरमिति रयिर्गौर्वा तां वा पवस्व देहि ॥४४॥

सोमः॑ सु॒तो धार॒यात्यो॒ न हित्वा॒ सिन्धु॒र्न नि॒म्नम॒भि वा॒ज्यं॑क्षाः ।

आ योनिं॒ वन्यं॑मसदत्पुना॒नः समिन्दु॒र्गोभि॑रसर॒त्सम॒द्भिः ॥ ४५

सोमः॑ । सु॒तः । धारं॑या । अत्यः॑ । न । हित्वा॑ । सिन्धुः॑ । न । नि॒म्नम् । अ॒भि । वा॒जी । अ॒क्षा॒रिति॑ ।

आ । योनि॑म् । वन्यं॑म् । अ॒स॒द॒त् । पु॒ना॒नः । सम् । इन्दुः॑ । गोभिः॑ । अ॒स॒र॒त् । सम् । अ॒त्ऽभिः ॥४५

सोमः । सुतः । धारया। अत्यः । न । हित्वा । सिन्धुः । न । निम्नम् । अभि ।वाजी । अक्षारिति ।

आ । योनिम्। वन्यम् । असदत् । पुनानः । सम् । इन्दुः । गोभिः । असरत् । सम् । अत्ऽभिः ।। ४५ ॥ १९ ॥

सुतोभिषुतः सोमो धारया स्वीयया अत्यो न अतनशीलोश्व इव हित्वा गत्वा हिनोतेः क्वनिपिरूपं । किंच वाजी बलवान् सोमः सिन्धुर्न यथा सिन्धुः स्यन्दमाना नदी निम्नं प्रदेशमभिगच्छति तद्वत् निम्नमधरभाविनं कलशमभ्यक्षाः अभिक्षरति । ततः पुनानः पूयमानः सोमः वन्यं वृक्षभवं योनिं योनिस्थानं कलशं आसदत् आसीदति । सोयमिन्दुः सोमः गीर्भिर्गोविकारैः क्षीरादिभिः श्रयणैः सं असरत संसरति तथा अद्भिर्वसतीवरीभिश्च संगच्छते ॥ ४५ ॥

इति सप्तमस्य चतुर्थे एकोनविंशोवर्गः ॥ १९ ॥

ए॒ष स्य ते॑ पवत इन्द्र॒ सोम॑श्च॒मूषु॒ धीर॑ उश॒ते तव॑स्वान् ।

स्व॑र्चक्षा रथि॒रः स॒त्यशु॑ष्म॒ः कामो॒ न यो दे॑वय॒तामस॑र्जि ॥
४६

ए॒षः । स्यः । ते॒ । प॒व॒ते॒ । इ॒न्द्र॒ । सोमः॑ । च॒मूषु॑ । धीरः॑ ।
उ॒श॒ते । तव॑स्वान् ।

स्वः॑ऽचक्षाः । र॒थि॒रः । स॒त्यऽशु॑ष्मः । कामः॑ । न । यः ।
दे॒व॒ऽय॒ताम् । अस॑र्जि ॥४६

एषः । स्यः । ते । पवते । इन्द्र। सोमः । चमूषु । धीरः ।
उशते । तवस्वान् ।

स्वःऽचक्षाः । रथिरः । सत्यऽशुष्मः । कामः । न । यः ।
देवऽयताम् । असर्जि ॥ ४६॥

हे इन्द्र उशते कामयमानाय ते तुभ्यं त्वदर्थं धीरः प्राज्ञः तवस्वान् वेगवान् स्यः स एष सोमः चमूषु चमसेषु पवते क्षरति स्वर्चक्षाः सर्वदर्शिनः रथिरो रथवान् सत्यशुष्मः यथार्थबलो यः सोमः देवयतां देवानिच्छतां यजमानानां कामो न कामदइवासर्जि असृज्यत अदीयत इत्यर्थः ॥ ४६॥

ए॒ष प्र॒त्नेन॒ वयं॑सा पुना॒नस्ति॒रो वर्पां॑सि दुहि॒तुर्दधा॑नः ।

वसा॑न॒ः शर्म॑ त्रि॒वरू॑थम॒प्सु होते॑व याति॒ सम॑नेषु॒ रेभ॑न् ॥ ४७

ए॒षः । प्र॒त्नेन॑ । वयं॑सा । पु॒ना॒नः । ति॒रः । वर्पां॑सि । दु॒हि॒तुः । दधा॑नः ।

वसा॑नः । शर्म॑ । त्रि॒ऽवरू॑थम् । अ॒प्ऽसु । होता॑ऽइव ।
या॒ति॒ । सम॑नेषु । रेभ॑न् ॥४७

एषः । प्रत्नेन । वयंसा । पुनानः । तिरः । वर्पांसि। दुहितुः
।। दधानः ।

वसानः । शर्मं । त्रिवरूथम् । अऽप्सु । होताऽइव । याति ।
समनेषु । रेभन् । ४७॥

प्रत्नेन पूर्वकालीनेन वयसा अन्नेन पुनानः पूयमानः
अन्नात्मिकया धारया क्षरन्नित्यर्थः तादृशः दुहितुः
सर्वस्यदोग्ध्र्याः पृथिव्यां वर्पांसि वर्प इति रूपनाम वृणोति
शरीरमिति रूपाणि तिरोदधानः स्वतेजसा तिरस्कुर्वन्
आच्छादयन् तथा त्रिवरूथं विभूमिकोपेतं यद्वा त्रयः
शीतातपवर्षाः तेषां निवारकं शर्म यज्ञगृहं वसानः
आच्छादयन् अप्सु वसतीवरीषुस्थितः एष सोमः होतेव
यथा होता स्तुतिध्वनिं कुर्वन् यज्ञेषु याति तद्वत् रेभन्

शब्दायमानः सन् समनेषु समन्ति कर्माणिधृष्टाः प्रगल्भायंत्यत्रेति समना यज्ञाः तेषु याति गच्छति ॥ १७ ॥

नू न॒स्त्वं र॑थि॒रो दे॑व सोम॒ परि॑ स्रव च॒म्वोः᳚ पू॒यमा॑नः ।

अ॒प्सु स्वादि॑ष्ठो॒ मधु॑माँ ऋ॒तावा॑ दे॒वो न यः स॑वि॒ता स॒त्यम॑न्मा ॥४८

नु । न॒ः । त्वम् । र॒थि॒रः । दे॒व॒ । सो॒म॒ । परि॑ । स्र॒व॒ । च॒म्वोः᳚ । पू॒यमा॑नः ।

अ॒प्ऽसु । स्वादि॑ष्ठः । मधु॑ऽमान् । ऋ॒तऽवा॑ । दे॒वः । न । यः । स॒वि॒ता । स॒त्यऽम॑न्मा ॥४८

नु । नः । त्वम् । रथिरः । देव । सोम । परि । स्रव। चम्वोः । पूयमानः ।

अप्सु । स्वादिष्ठः । मधुऽमान् ।। ऋतऽवा । देवः । न । यः । सविता । सत्यऽमन्मा ॥ ४८ ॥

हे देव काम्यमान हे सोम रथिरो रथवांस्त्वं नोस्माकं स्वभूते यज्ञे चम्वोरधिषवणफलकयोः पूयमानः सन् अप्सु वसतीवरीषु नु क्षिप्रं परिस्रव परितः क्षर । स्वादिष्ठः स्वादुतमः अतएव मधुमान् माधुर्ययुक्तः ऋतावा ऋतवान् यज्ञवान् सविता सर्वस्य प्रेरको यस्त्वं देवो न देव इव सत्यमन्मा सत्यस्तुतिको भवसि सत्वं परिस्रवेति ॥ १८ ॥

अ॒भि वा॒युं वी॒त्य॑र्षा गृणा॒नो॒३॒ऽभि मि॒त्रावरु॑णा पू॒यमा॑नः ।

अ॒भी नरं॑ धी॒जव॑नं रथे॒ष्ठाम॒भीन्द्रं॒ वृष॑णं॒ वज्र॑बाहुम् ॥४९

अ॒भि । वा॒युम् । वी॒ती । अ॒र्ष॒ । गृ॒णा॒नः । अ॒भि । मि॒त्रावरु॑णा । पू॒यमा॑नः ।

अ॒भि । नर॑म् । धी॒ऽजव॑नम् । र॒थे॒ऽस्थाम् । अ॒भि । इन्द्र॑म् । वृष॑णम् । वज्र॑ऽबाहुम् ॥४९

अभि । वायुम् । वीती। अर्ष । गृणानः । अभि । मित्रावरुणा । पूयमानः ।

अभि । नरम् । धीऽजवनम् । रथेऽस्थाम् । अभि । इन्द्रम् । वृषणम् । वज्रबाहुम् ॥ ४९ ॥

हे सोम गृणानः स्तूयमानः त्वं वीती सुपांसुलुगिति चतुर्थ्याः पूर्वसवर्णदीर्घः । वीत्यै पानाय वायुमभ्यर्ष अभिगच्छ। तथा पवित्रेण पूयमानस्त्वं मित्रावरुणा मित्रावरुणौ च पानायाभिगच्छ । किंच नरं सर्वस्य नेतारं धीजवनं बुध्यासमंवेगं कुर्वाणं रथेष्ठां रथेस्थां रथे तिष्ठन्तं अनेनाश्विनावभिधीयेते । एकवचनं प्रत्येकविवक्षया समुदायविवक्षया वा। एतादृशावश्विनौ चाभिगच्छ। तथा

वृषणं कामानां वर्षकं वज्रबाहुं वज्रयुक्तबाहुं इन्द्रं च त्वं पानायाभिगच्छ॥४९॥

अ॒भि वस्त्रा॑ सुवस॒नान्य॑र्षा॒भि धे॒नूः सु॒दुघाः॑ पू॒यमा॑नः ।

अ॒भि च॒न्द्रा भर्त॑वे नो॒ हिर॑ण्या॒भ्यश्वा॑न्र॒थिनो॑ देव सोम ॥५०

अ॒भि । वस्त्रा॑ । सु॒ऽव॒स॒नानि॑ । अ॒र्ष॒ । अ॒भि । धे॒नूः । सु॒ऽदुघाः॑ । पू॒यमा॑नः ।

अ॒भि । च॒न्द्रा । भर्त॑वे । न॒ः । हिर॑ण्या । अ॒भि । अश्वा॑न् । र॒थिनः॑ । दे॒व॒ । सो॒म॒ ॥५०

अभि । वस्त्रा । सुऽवसनानि । अर्ष । अभि । धेनूः । सुऽदुघाः । पूयमानः ।

अभि । चन्द्रा । भर्तवे । नः । हिरण्या। अभि। अश्वान् ।
रथिनः । देव । सोम ॥ ५० ॥ २० ॥

हे सोम त्वमस्माकं सुवसनानि सुपरिधानानि वस्त्रा वस्त्राणि अभ्यर्ष अभिगमय । यद्वा सुवसनानि शोभनवस्त्रसहितानि वस्त्रा आच्छादकानि धनान्यभिगमय । किंच पूयमानः पवित्रेण त्वं सुदुघाः सुष्टुपयसोदोग्ध्रीः धेनूः नवप्रसूतिका गाः अभिप्रापय । अपि च चन्द्रा चन्द्राण्याह्लादकानि हिरण्या हिरण्यानि भर्तवे भरणाय पोषणाय नोस्माकमभिगमय । तथा हे देव स्तोतव्य हे सोम रथिनो रथवतोश्वान् अस्माकमभिप्रापय ॥ ५० ॥

अ॒भी नों अर्ष दि॒व्या वसू॑न्य॒भि विश्वा॒ पार्थि॑वा पू॒यमा॑नः ।

अ॒भि येन॒ द्रवि॑णम॒श्नवा॑मा॒भ्या॑र्षे॒यं जं॑मदग्नि॒वन्नः॑ ॥५१

अ॒भि । न॒ः । अ॒र्ष॒ । दि॒व्या । वसू॑नि । अ॒भि । विश्वा॑ ।
पार्थि॑वा । पू॒यमा॑नः ।

अ॒भि । येन॑ । द्रवि॑णम् । अ॒श्नवा॑म । अ॒भि । आ॒र्षे॒यम् ।
ज॒म॒द॒ग्नि॒ऽवत् । न॒ः ॥५१

अभि । नः । अर्ष । दिव्या । वसूनि । अभि । विश्वा ।
पार्थिवा। पूयमानः ।

अभि । येन । द्रविणम् । अश्नवाम । अभि । आर्षेयम् ।
जमदग्निऽवत् । नः ॥ ५१ ॥

हे सोम पवित्रेण पूयमानस्त्वं दिव्या दिव्यानि दिविभवानि
वसूनि धनानि नोस्माकमभ्यर्ष अभिगमय । तथा पार्थिवा
पार्थिवानि पृथिव्यांभवानि विश्वा सर्वाणि धनान्यभिगमय।
तथा येन त्वदीयेन सामर्थ्येन द्रविणं धनं वयमभ्यश्नवाम
अभिव्याप्नुयाम तत्सामर्थ्यमभिगमय । किंच आर्षेयं

आर्षाणामृषिपुत्राणां योग्यं धनं जमदग्निवत् जमदग्नेर्यथा त्वं प्रापयः एवं नोस्माकमपि अभ्यर्ष । यद्वा आर्षेयं आर्षाणां योग्यं मंत्रं जमदग्नेःस्वभूतमंत्रं यथा स्वादुतममकार्षीः एवमस्माकं तादृशं मंत्रं स्वादुतमं कुर्विति कुत्सो नाम ऋषिः प्रार्थयते ॥ ५१ ॥

अ॒या प॒वा पंवस्वै॒ना वसूंनि माँश्च॒त्व इं॑न्दो॒ सरं॑सि॒ प्र धं॑न्व ।

ब्र॒ध्नश्चि॒दत्र॒ वातो॒ न जू॒तः पुं॑रु॒मेधं॑श्चि॒त्तकं॑वे॒ नरं॑ दात् ॥५२

अ॒या । प॒वा । प॒व॒स्व॒ । ए॒ना । वसूंनि । मा॒ँश्च॒त्वे । इ॒न्दो॒ इतिं । सरं॑सि । प्र । ध॒न्व॒ ।

ब्र॒ध्नः । चि॒त् । अत्रं॑ । वातः॑ । न । जू॒तः । पु॒रु॒ऽमेधः॑ । चि॒त् । तकं॑वे । नरं॑म् । दा॒त् ॥५२

अया। पवा । पवस्व । एना । वसूनि । मांश्चत्वे । इन्दो इति । सरसि । प्र। धन्व।

ब्रध्नः । चित् । अत्र । वातः । न । जूतः । पुरुमेधः । चित् । तकवे । नरम् । दात् ॥ ५२ ॥

हे सोम अया अनया पवा पवमानया धारया सह एना एनानि वसूनि धनानि पवस्व क्षर । पवा पूङ्पवने अन्येभ्यो दृश्यन्त इति विच्प्रत्ययः आर्धधातुकलक्षणोगुणः सावेका च इति तृतीयाया उदात्तत्वं । तथा हे इन्दो तथा त्वं मांश्चत्वे मन्यमानानां चातके सरसि उदके वसतीवर्याख्ये प्रधन्व प्रगच्छ । ततः अत्र अस्मिन्सोमे पूयमाने सति ब्रध्नः चित् सर्वेषां प्रज्ञापकः मूलभूतो वा आदित्योपि वातो न वात इव जूतः वेगितः सन् किं च पुरुमेधःचित बहुविधयज्ञइन्द्रश्चित् इन्द्रोपि तकवे तकतिर्गतिकर्मसुपठितः अस्मादौणादिकऊन्प्रत्ययः

सोममभिगच्छते स्तुतिभिः मह्यं नरं कर्मनेतारं पुत्रं दात्
प्रयच्छतु हे सोम त्वया तर्पितौ सन्ताविन्द्रादित्यौ मह्यं पुत्रं
प्रयच्छतामित्यर्थः ॥ ५२ ॥

उ॒त नं॑ ए॒ना पं॑व॒या पं॑व॒स्वाधिं॑ श्रु॒ते श्र॒वाय्यं॑स्य ती॒र्थे ।

ष॒ष्टिं स॒हस्रा॑ नैगु॒तो वसू॑नि वृ॒क्षं न प॒क्वं धू॑नव॒द्रणा॑य ॥५३

उ॒त । न॒ः । ए॒ना । प॒व॒या । प॒व॒स्व॒ । अधि॑ । श्रु॒ते ।
श्र॒वाय्यं॑स्य । ती॒र्थे ।

ष॒ष्टिम् । स॒हस्रा॑ । नै॒गु॒तः । वसू॑नि । वृ॒क्षम् । न । प॒क्वम् ।
धू॒न॒व॒त् । रणा॑य ॥५३

उत । नः । एना। पवया । पवस्व । अधि। श्रुते ।
श्रवाय्यंस्य । तीर्थे ।

षष्टिम् । सहस्रा । नैगुतः । वसूनि । वृक्षम् । न । पक्वम् । धूनवत् । रणाय ।। ५३ ॥

हे सोम उतापि च श्रवाय्यस्य सर्वैः श्रवणीयस्य सोमस्य तव श्रुते प्रसिद्धौ यद्वा षष्ठ्यर्थे चतुर्थी श्रुतः शब्दस्य तीर्थे स्थाने नोस्माकं स्वभूते यज्ञे एना अनया पवया पूयमानया धारया अधि अधिकं पवस्व क्षर। नैगुतः नीचीनं गवन्ते शब्दायन्त इति निगुतः शत्रवः । तेषां हन्तृत्वेन संबन्धी सोयं सोमः षष्टिं सहस्रा षष्टिसंख्याकानि सहस्राणि वसूनि धनानि रणाय शत्रूणां जयार्थं धूनवत् अस्माकमकंपयत् प्रायच्छदिति यावत् । कथमिव वृक्षं न पक्वं पक्वफलं वृक्षं यथा कंपयति फलार्थी तद्वत् ॥ ५३॥ ।

म॒ही॒मे अ॑स्य॒ वृष॒नाम॑ शू॒षे माँश्च॑त्वे वा॒ पृश॑ने वा॒ वध॑त्रे ।

अस्वा॑पयन्नि॒गुत॑ः स्ने॒हय॒च्चापा॒मित्राँ॒ अपा॒चितो॑ अचे॒तः ॥
५४

महि॑ । इ॒मे इति॑ । अ॒स्य॒ । वृष॒नाम॑ । शू॒षे इति॑ । माँ॒श्चं॑त्वे ।
वा॒ । पृशं॑ने । वा॒ । वधं॑त्रे॒ इति॑ ।

अस्वा॑पयत् । नि॒ऽगुत॑ः । स्ने॒हयं॑त् । च॒ । अपं॑ । अ॒मित्रा॑न् ।
अपं॑ । अ॒चित॑ः । अ॒च॒ । इ॒तः ॥५४

महिं । इमे इति । अस्य । वृषनाम । शूषे इति । मांश्चत्वे ।
वा। पृशने । वा। वधत्रे इति ।

अस्वापयत्। निगुतः ।। स्नेहयत् । च। अप । अमित्रान् ।
अप । अचितः । अच । इतः ॥५४॥

महि महती प्रभूते वृषनाम सुपांसुलुगिति सुपो लुक्
वृषनामनी वर्षणनमने शराणां वर्षणं शत्रूणां नमनं इमे एते
द्वे कर्मणी अस्य सोमस्य शूषे सुखकरेभवतः । ये च

कर्मणी मांश्चत्वे अश्वनामैतत् । मक्षू चरतीति अश्वैः क्रियमाणे युद्धे तत्साध्यत्वात् युद्धमिह गृह्यते । वा अपि वा पृशने स्पर्शनसाध्ये बाहुयुद्धे वधवे शत्रूणां हिंसनशीले भवतः सोयं निगुतः नीचैः शब्दायमानान शत्रून् अस्वापयत् ताभ्यामसूषुपत् । अवधीदित्यर्थः । किंच स्नेहयत् प्राद्रवयत संग्रामाच्छत्रून् । अथ प्रत्यक्षतः हे सोम सत्वं अमित्रान् शत्रून् अपाच अपागमय । तथा अचितः अग्निचयनमकुर्वतो नास्तिकांश्च इतोस्मत्सकाशात् अपाच अपगमय अचतिर्गतिकर्मा ॥ ५४॥

सं त्री प॒वित्रा॒ वितंतान्ये॒ष्यन्वेकं धावसि पू॒यमांनः ।

असि॒ भगो॒ असिं दा॒त्रस्यं दा॒तासिं म॒घवां म॒घवंद्भ्य इन्दो ॥५५

सम् । त्री । प॒वित्रां । विऽतंतानि । ए॒षि॒ । अनुं । एकंम् । धा॒व॒सि॒ । पू॒यमांनः ।

असिं । भगः॑ । असिं । दा॒त्रस्यं । दा॒ता । असिं । म॒घऽवां । म॒घवंत्ऽभ्यः । इ॒न्दो॒ इतिं ॥५५

सम् । त्री। पवित्रा । विऽततानि । एषि । अनु । एकम् । धावसि । पूयमानः ।

असि । भगः । असि । दात्रस्य । दाता । असि । मघऽवा । मघवत्भ्यः । इन्दो इति ॥ ५५ ॥ २१ ॥

हे सोम विततानि विस्तृतानि त्री त्रीणि पवित्रा अग्निवायुसूर्यात्मकानि पवित्राणि समेषि सम्यक्प्राप्नोषि । किंच पूयमानस्त्वं एकमविवालकृतंपवित्रं अनुधावसि अनुगच्छसि । किंच त्वं भगो भजनीयोसि तथा दात्रस्य देयस्य धनस्य दातासि । कथमस्य धनदत्वमिति

चेत्तदुच्यते । हे इन्दो सोम मघवद्भ्योन्येभ्योपि त्वं मघवासि अतिशयेन धनवान्भवसि ॥ ५५ ॥

ए॒ष वि॑श्व॒वित्प॑वते मनी॒षी सोमो॒ विश्व॑स्य॒ भुव॑नस्य॒ राजा॑ ।

द्र॒प्साँ ई॒रय॑न्वि॒दथे॒ष्विन्दु॒र्वि॑ वार॒मव्य॑ं स॒मयाति॑ याति ॥५६

ए॒षः । वि॒श्व॒ऽवित् । प॒व॒ते॒ । म॒नी॒षी । सोमः॑ । विश्व॑स्य । भुव॑नस्य । राजा॑ ।

द्र॒प्सान् । ई॒रय॑न् । वि॒दथे॑षु । इन्दुः॑ । वि । वार॑म् । अव्य॑म् । स॒मया॑ । अति॑ । या॒ति॒ ॥५६

एषः । विश्वऽवित् । पवते । मनीषी । सोमः । विश्वस्य । भुवंनस्थ । राजा ।

द्रप्सान् । ईरयन् । विदथेषु । इन्दुः । वि । वारम् । अव्यम् । समया अर्ति । याति ॥ ५६ ॥

विश्ववित् सर्वस्य वेत्ता अतएव मनीषी मेधावी विश्वस्य भुवनस्य सर्वस्य लोकस्य राजा स्वामी एष सोमः पवते क्षरति । एतदेव विवृणोति । विदथेषु विन्दन्ति जानंत्यत्र देवानिति । यद्वा विन्दन्ति लभन्ते विदथा यज्ञास्तेषु द्रप्सान् रसकणान् ईरयन् प्रेरयन् । इन्दुः सोमः अव्यं अविभवं वारं वालं पवित्रं समया उभयतः व्यतियाति व्यतीत्य गच्छति ॥५६॥

इन्दुं रिहन्ति महिषा अदंब्धाः पदे रेंभन्ति कवयो न गृध्राः ।

हिन्वन्ति धीरां दशभिः क्षिपांभिः समंञ्जते रूपमपां रसेंन ॥५७

इन्दु॑म् । रि॒ह॒न्ति॒ । म॒हि॒षाः । अद॑ब्धाः । प॒दे । रे॒भ॒न्ति॒ ।
क॒वयः॑ । न । गृध्राः॑ ।

हि॒न्वन्ति॑ । धीराः॑ । द॒शऽभिः॑ । क्षिपा॑भिः । सम् । अ॒ञ्ज॒ते॒
। रू॒पम् । अ॒पाम् । रसे॑न ॥५७

इन्दुम् । रिहन्ति । महिषाः । अदब्धाः । पदे । रेभन्ति ।
कवयः। न । गृध्राः ।

हिन्वन्ति । धीराः । दशभिः । क्षिपाभिः । सम् । अञ्जते ।
रूपम् । अपाम् । रसेन ॥ ५७ ॥

महिषा महान्तः पूज्या वा अतएवादब्धाः कैश्चिदप्यहिंसिता देवा इन्दुं सोमं रिहन्ति लिहंत्यास्वादयन्ति । किंच देवाः सोममुशन्तः सन्तः पदे तस्यास्य सोमस्य धारास्थाने रेभन्ति शब्दायन्ते । तत्र दृष्टान्तः कवयो न गृध्राः धनमभिकांक्षमाणाः कवयः

स्तोतारो यथा स्तुवन्तः शब्दायन्ते तद्वत् धीराः कर्मणि कुशला ऋत्विजः दशभिः एतत्संख्याकाभिः क्षिपाभिरंगुलीभिः तमिमं सोमं हिन्वंति अभिषवार्थं प्रेरयन्ति । अपि च रूपं अंशु अपां वसतीवर्याख्यानां रसेन समंजते सम्यक्सेवयन्ति ॥ ५७ ॥

त्वयां व॒यं पवमानेन सोम॒ भरें कृ॒तं वि चिंनुयाम॒ शश्वंत् ।

तन्नों मि॒त्रो वरुंणो मामहन्ता॒मदिंति॒ः सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥५८

त्वयां । व॒यम् । पवमानेन । सो॒म॒ । भरें । कृ॒तम् । वि । चि॒नु॒या॒म॒ । शश्वंत् ।

तत् । न॒ः । मि॒त्रः । वरुंणः । म॒म॒ह॒न्ता॒म् । अदिंतिः । सिन्धुः॑ । पृ॒थि॒वी । उ॒त । द्यौः ॥५८

त्वया । वयम् । पवमानेन । सोम। भरे । कृतम् । वि । चिनुयाम् । शश्वत् ।

तत् । नः। मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ५८ ॥ २२ ॥

हे सोम पवमानेन पवित्रेण पूयमानेन त्वया सहायेन भरे संग्रामनाम संग्रामे शश्वद्बहु कृतं कर्तव्यं वयं विचिनुयाम विशेषेण कुर्याम । यस्मात्तवसहायेन कर्माणि कुर्मः तत्तस्मात् नोस्मान् मित्रो वरुणः अदितिः एतन्नामका सिंधुः एतदभिधाना च पृथिवी उतापि च द्यौः एते मित्रादयो नोस्मान् मामहंतां पूजयन्तु धनादिदानेन ॥ ५८ ॥

टिप्पणी

१०-१२ ऋषिः -- वासिष्ठः मन्युः

- द्र. मन्योरुपरि टिप्पणी (https://puranastudy.wordpress.com/%E0%A4%AE%E0%A4%A8%E0%A5%8D%E0%A4%AE%E0%A4%A5-%E0%A4%AE%E0%A4%AF/%E0%A4%AE%E0%A4%A8%E0%A5%8D%E0%A4%AF%E0%A5%81/)

१३-१५ ऋषिः वासिष्ठः उपमन्युः

-
    - द्र. उपमन्योरुपरि टिप्पणी (https://sites.google.com/site/puranicsubjectindex/unnata-upavarsha/upamanyu)

९.९७.७ प्र काव्यमुशनेव इति

रेभ/रम्भोपरि टिप्पणी (https://vedastudy.tripod.com/pur_index25/rambha.htm)

वराहोपरि टिप्पणी (http://puranastudy.byethost14.com/pur_index26/varaah2.htm)

वाराहम् (https://sa.wikisource.org/s/2xm6) (ऊहगानम्)

वाराहाणि चत्वारि (https://sa.wikisource.org/s/2i75) (ग्रामगेयः)

साम ३३३६ (https://sa.wikisource.org/s/3kk)

९.९७.१० इन्दुर्वाजी पवते इति

दाशस्पत्यानि (https://sa.wikisource.org/s/2h7d) (ग्रामगेयः)

दाशस्पत्यम् (https://sa.wikisource.org/s/2h7c)

९.९७.३४ तिस्रो वाचः ईरयति इति

तिस्रो वाच ईरयति प्रवह्निरिति तृतीयस्याह्नो रूपं तेन तृतीयमहरारभन्ते - तां.ब्रा. १२.३ (https://sa.wikisource.org/s/tvr)

अग्निर्वैश्वानरः (https://sa.wikisource.org/s/2xlf)

अङ्गिरसां संक्रोशः (https://sa.wikisource.org/s/1z99)

९.९७.३७ आ जागृविर्विप्र इति

गौरीवितम् (https://sa.wikisource.org/s/1zwh)

औशनम् (https://sa.wikisource.org/s/2mow)

९.९७.४० अक्रान्त्समुद्रः इति

साम १२५३ (https://sa.wikisource.org/s/3km)

समुद्रोपरि टिप्पणी (https://sites.google.com/site/vedastudy/saptavinsati-samunnata/%E0%A4%B8%E0%A4%AE%E0%A4%A6%E0%A4%B0)

९.९७.५२ अया पवा पवस्वैना वसूनि

द्र. श्नौष्ठम् (https://sa.wikisource.org/s/1z81)

मण्डल ९

सूक्तं ९.१	सूक्तं ९.३१	सूक्तं ९.६१	सूक्तं ९.९१
सूक्तं ९.२	सूक्तं ९.३२	सूक्तं ९.६२	सूक्तं ९.९२
सूक्तं ९.३	सूक्तं ९.३३	सूक्तं ९.६३	सूक्तं ९.९३
सूक्तं ९.४	सूक्तं ९.३४	सूक्तं ९.६४	सूक्तं ९.९४
सूक्तं ९.५	सूक्तं ९.३५	सूक्तं ९.६५	सूक्तं ९.९५
सूक्तं ९.६	सूक्तं ९.३६	सूक्तं ९.६६	सूक्तं ९.९६
सूक्तं ९.७	सूक्तं ९.३७	सूक्तं ९.६७	सूक्तं ९.९७
सूक्तं ९.८	सूक्तं ९.३८	सूक्तं ९.६८	सूक्तं ९.९८
सूक्तं ९.९	सूक्तं ९.३९	सूक्तं ९.६९	सूक्तं ९.९९
सूक्तं ९.१०	सूक्तं ९.४०	सूक्तं ९.७०	सूक्तं ९.१००

[सूक्तं १.३१](#)[सूक्तं १.४१](#)[सूक्तं १.७१](#)[सूक्तं १.१०१](#)

[सूक्तं १.३२](#)[सूक्तं १.४२](#)[सूक्तं १.७२](#)[सूक्तं १.१०२](#)

[सूक्तं १.३३](#)[सूक्तं १.४३](#)[सूक्तं १.७३](#)[सूक्तं १.१०३](#)

[सूक्तं १.३४](#)[सूक्तं १.४४](#)[सूक्तं १.७४](#)[सूक्तं १.१०४](#)

[सूक्तं १.३५](#)[सूक्तं १.४५](#)[सूक्तं १.७५](#)[सूक्तं १.१०५](#)

[सूक्तं १.३६](#)[सूक्तं १.४६](#)[सूक्तं १.७६](#)[सूक्तं १.१०६](#)

[सूक्तं १.३७](#)[सूक्तं १.४७](#)[सूक्तं १.७७](#)[सूक्तं १.१०७](#)

[सूक्तं १.३८](#)[सूक्तं १.४८](#)[सूक्तं १.७८](#)[सूक्तं १.१०८](#)

[सूक्तं १.३९](#)[सूक्तं १.४९](#)[सूक्तं १.७९](#)[सूक्तं १.१०९](#)

[सूक्तं १.२०](#)[सूक्तं १.५०](#)[सूक्तं १.८०](#)[सूक्तं १.११०](#)

[सूक्तं १.२१](#)[सूक्तं १.५१](#)[सूक्तं १.८१](#)[सूक्तं १.१११](#)

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

1. *द्र. मा.श. ७.१.२.२१ (https://sa.wikisource.org/s/ecl)*

ऋग्वेदः सूक्तं ९.९८

ऋग्वेदः - मण्डल ९
← सूक्तं ९.९७ | सूक्तं ९.९८ | सूक्तं ९.९९ →

अम्बरीषो वार्षागिरः, ऋजिश्वा भारद्वाजश्च

दे. पवमानः सोमः। अनुष्टुप्, ११ बृहती

अभि नो वाजसातमं रयिमर्ष पुरुस्पृहम् ।

इन्दो सहस्रभर्णसं तुविद्युम्नं विभ्वासहम् ॥१॥

परि ष्य सुवानो अव्ययं रथे न वर्माव्यत ।

इन्दुरभि द्रुणा हितो हियानो धाराभिरक्षाः ॥२॥

परि ष्य सुवानो अक्षा इन्दुरव्ये मदच्युतः ।

धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः ॥३॥

स हि त्वं देव शश्वते वसु मर्ताय दाशुषे ।

इन्दो सहस्रिणं रयिं शतात्मानं विवाससि ॥४॥

वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः ।

नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो ॥५॥

द्विर्यं पञ्च स्वयशसं स्वसारो अद्रिसंहतम् ।

प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त्यूर्मिणम् ॥६॥

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।

यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥७॥

अस्य वो ह्यवसा पान्तो दक्षसाधनम् ।

यः सूरिषु श्रवो बृहद्दधे स्वर्ण हर्यतः ॥८॥

स वां यज्ञेषु मानवी इन्दुर्जनिष्ट रोदसी ।

देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि ॥९॥

इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।

नरे च दक्षिणावते देवाय सदनासदे ॥१०॥

ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन् ।

अपप्रोथन्तः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः ॥११॥

तं सखायः पुरोरुचं यूयं वयं च सूरयः ।

अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ॥१२॥

सायणभाष्यम्

' अभि नः' इति द्वादशर्चं द्वितीयं सूक्तम् । वृषागिरो राज्ञः पुत्रोऽम्बरीषो भरद्वाजपुत्र ऋजिश्वोभौ सहितावस्यर्षी। इदमुत्तराणि च त्रीण्यानुष्टुभानि । अत्र त्वेकादशी बृहती। पवमानः सोमो देवता । तथा चानुक्रम्यते--' अभि नो द्वादशाम्बरीष ऋजिश्वा चानुष्टुभं ह बृहत्युपान्त्या ' इति । गतो विनियोगः ॥

अ॒भि नो॑ वाज॒सात॑मं र॒यिम॑र्ष पुरु॒स्पृह॑ं ।

इंदो॑ स॒हस्र॑भर्णसं तुविद्यु॒म्नं वि॑भ्वा॒सह॑ं ॥१

अ॒भि । न॒: । वा॒ज॒ऽसात॑मम् । र॒यिम् । अ॒र्ष॒ । पु॒रु॒ऽस्पृह॑म्
।

इन्दो॒ इति॑ । स॒हस्र॑ऽभर्णसम् । तु॒वि॒ऽद्यु॒म्नम् । वि॒भ्व॒ऽसह॑म्
॥१

अभि । नः । वाजऽसातमम् । रयिम् । अर्ष । पुरुऽस्पृहम्
।

इन्दो इति । सहस्रऽभर्णसम् । तुविऽद्युम्नम् । विभ्वऽसहम्
॥१

हे "इन्दो दीप्त "वाजसातमम् अत्यन्तं बलप्रदमन्नप्रदं वा "रयिं धनं पुत्रं वा "नः अस्माकम् "अभि “'अर्ष अभिगमय । कीदृशम् । "पुरुस्पृहं बहुभिः स्पृहणीयं "सहस्रभर्णसं बहुविधभरणम् । अनेकपोषणयुक्तमित्यर्थः। “तुविद्युम्नम् । ‘द्युम्नं द्योततेर्यशो वान्नं वा ' (निरु. ५.५) इति यास्कः । बह्वन्नं बहुयशोयुक्तं वा "विभ्वसहम् । विभ्व इति महन्नाम । महतोऽभिभवितारम् ॥

परि॒ ष्य सुं॒वा॒नो अ॒व्यय॑ं रथे॒ न वर्मा॑व्यत ।

इंदु॑र॒भि द्रुणा॑ हि॒तो हिं॒या॒नो धारा॑भिरक्षाः ॥२

परिं । स्यः । सु॒वा॒नः । अ॒व्ययं॑म् । रथें । न । वर्मं । अ॒व्य॒त॒ ।

इन्दुः॑ । अ॒भि । द्रुणा॑ । हि॒तः । हि॒या॒नः । धारा॑भिः ।
अ॒क्षा॒रिति॑ ॥२

परि । स्यः । सुवानः । अव्ययम् । रथे । न । वर्म । अव्यत
।

इन्दुः । अभि । द्रुणा । हितः । हियानः । धाराभिः ।
अक्षारिति ॥२

“सुवानः सूयमानः "स्यः स सोमः "अव्ययम् अविमयं पवित्रं "परि पवते । तत्र दृष्टान्तः । “रथे “न यथा रथे स्थितः पुरुषः “वर्म कवचम् "अव्यत परिव्ययति । व्ययतेर्लुङि वर्णलोपछान्दसः । "अभि "हितः अभितः प्रेरितः यद्वा स्तोतृभिरभिष्टुतः सः “इन्दुः सोमः “द्रुणा द्रुममयेन द्रोणकलशेन “हियानः । ‘हि गतौ वृद्धौ च'। तेन पूर्यमाणः सन् “धाराभिः "अक्षाः क्षरति । क्षरतेर्लुङि रूपम्
॥

परि॒ ष्य सुं॑वा॒नो अं॑क्षा॒ इंदु॒रव्ये॒ मदं॑च्युतः ।

धारा॒ य ऊ॒र्ध्वो अं॑ध्व॒रे भ्रा॒जा नैतिं॑ गव्य॒युः ॥३

परिं । स्यः । सु॒वा॒नः । अ॒क्षा॒रितिं । इन्दुः॑ । अव्यें ।
मदं॑ऽच्युतः ।

धारां । यः । ऊ॒र्ध्वः । अ॒ध्व॒रे । भ्रा॒जा । न । एतिं ।
ग॒व्य॒ऽयुः ॥३

परि । स्यः । सुवानः । अक्षारिति । इन्दुः । अव्ये ।
मदऽच्युतः ।

धारा । यः । ऊर्ध्वः । अध्वरे । भ्राजा । न । एति ।
गव्यऽयुः ॥३

“सुवानः सूयमानः अस्यः "स्यः सः "इन्दुः सोमः "मदच्युतः मदार्थं देवैः प्रेरितः सन् "अव्ये अविभवे पवित्रे "परि “अक्षाः परितः क्षरति । "अध्वरे “ऊर्ध्वः समुच्छ्रितः सर्वेषां मुख्यः "यः सोमः “गव्ययुः गोकामः यद्वा क्षीरादिकं कामयमानः सन् “धारा धारया सह “एति गच्छति । “भ्राजा “न भ्राजमानया दीप्त्या यथान्तरिक्षे गच्छति तद्वत् ॥

स हि त्वं दे॑व॒ शश्व॑ते॒ वसु॒ मर्ता॑य दा॒शुषे॑ ।

इंदो॑ सह॒स्रिणं॑ र॒यिं श॒तात्मा॑नं विवाससि ॥४

सः । हि । त्वम् । दे॒व॒ । शश्व॑ते । वसुं । मर्ता॑य । दा॒शुषे॑ ।

इन्दो॒ इति॑ । स॒ह॒स्रिणं॑म् । र॒यिम् । श॒तऽआ॑त्मानम् । वि॒वा॒स॒सि॒ ॥४

सः । हि । त्वम् । देव । शश्वते । वसु । मर्ताय । दाशुषे ।

इन्दो इति । सहस्रिणम् । रयिम् । शतऽआत्मानम् । विवाससि ॥४

हे “देव सोम "सः त्वं "शश्वते पुत्रादिमत्त्वेन बहवे “मर्त्याय मनुष्याय "दाशुषे हविर्दत्तवते यजमानाय “वसु धनं मह्यं च “विवाससि प्रेरयसि । एकवाक्यतापक्षे हि तिङन्तस्य हियोगादनिघातः स्यात् ॥

व॒यं ते॑ अ॒स्य वृं॑त्रह॒न्वसो॒ वस्वः॑ पुरु॒स्पृहः॑ ।

नि नेदिं॑ष्ठतमा इ॒षः स्याम॑ सु॒म्नस्यां॑ध्रिगो ॥५

व॒यम् । ते॒ । अ॒स्य । वृ॒त्र॒ऽह॒न् । वसो॒ इति॑ । वस्वः॑ । पु॒रु॒ऽस्पृहः॑ ।

नि । नेदिंष्ठऽतमाः । इ॒षः । स्याम॑ । सु॒म्नस्यं । अ॒ध्रि॒गो॒ इत्यंध्रिऽगो ॥५

वयम् । ते । अस्य । वृत्रऽहन् । वसो इति । वस्वः । पुरुऽस्पृहः ।

नि । नेदिष्ठऽतमाः । इषः । स्याम । सुम्नस्य । अध्रिगो इत्यध्रिऽगो ॥५

हे "वृत्रहन् शत्रूणां हन्तः सोम “अस्य एतादृशस्य “ते तव स्वभूताः “वयं स्मः । ततो हे “वसो वासयितः “पुरुस्पृहः बहुभिः स्पृहणीयस्य “वस्वः वसुनः धनस्य त्वया दीयमानस्य वयं "नि नितरां "नेदिष्ठतमाः अत्यन्तमन्तिकतमाः स्याम । तथा “इषः अन्नस्य किंच हे "अध्रिगो अधृतगमन सोम सुम्नस्य सुखस्य वयमन्तिकतमाः "स्याम भवेम ॥

द्विर्यं पंच॒ स्वयं॑शस॒ं स्वसा॑रो॒ अद्रिं॑संहतं ।

प्रि॒यमिं॑द्रस्य॒ काम्यं॑ प्रस्ना॒पयं॑त्यू॒र्मिणं॑ ॥६

द्विः । यम् । पञ्च॑ । स्वऽयं॑शसम् । स्वसा॑रः ।
अद्रिं॑ऽसंहतम् ।

प्रि॒यम् । इन्द्र॑स्य । काम्यं॑म् । प्र॒ऽस्ना॒पयं॑न्ति । ऊ॒र्मिणं॑म् ॥
६

द्विः । यम् । पञ्च । स्वऽयशसम् । स्वसारः ।
अद्रिऽसंहतम् ।

प्रियम् । इन्द्रस्य । काम्यम् । प्रऽस्नापयन्ति । ऊर्मिणम् ॥
६

“द्विः "पञ्च दशसंख्याकाः "स्वसारः कर्मकरणार्थमितस्ततो गच्छन्त्योऽङ्गुलयः "स्वयशसं स्वभूतयशस्कम् "अद्रिसंहतं ग्रावभिरभिषुतम् “इन्द्रस्य "प्रियं "काम्यं सर्वैः काम्यमानम् "ऊर्मिण धाराभिस्तद्वन्तं "यं सोमं “प्रस्नापयन्ति वसतीवरीभिः प्रकर्षेण सेचयन्ति यजमानाः तं पुनन्तीत्युत्तरत्र संबन्धः ॥ ॥ २३ ॥

परि॒ त्यं ह॑र्य॒तं हरिं॑ ब॒भ्रुं पुं॑नंति॒ वारे॑ण ।

यो दे॒वान्विश्वाँ॒ इत्परि॒ मदे॑न स॒ह गच्छं॑ति ॥७

परिं । त्यम् । ह॒र्य॒तम् । हरिं॑म् । ब॒भ्रुम् । पु॒न॒न्ति॒ । वारे॑ण ।

यः । दे॒वान् । विश्वां॑न् । इत् । परिं । मदे॑न । स॒ह । गच्छं॑ति ॥७

परि । त्यम् । हर्यतम् । हरिम् । बभ्रुम् । पुनन्ति । वारेण ।

यः । देवान् । विश्वान् । इत् । परि । मदेन । सह । गच्छति ॥७

“हर्यतं सर्वैः स्पृहणीयं "हरिं हरितवर्णं "बभ्रुं बभ्रुवर्णं च “त्यं तं सोमं “वारेण वालेन पवित्रेण "परि "पुनन्ति परिशोधयन्ति । "यः सोमः विश्वान् सर्वानिन्द्रादीन् "देवान् "इत् देवानेव “मदेन मादकेन रसेन "सह "परि "गच्छति ॥

अ॒स्य वो॒ ह्यव॑सा॒ पांतो॑ दक्ष॒साधं॑नं ।

यः सू॒रिषु॒ श्रवो॑ बृ॒हद्द॒धे स्व१॒॑र्ण हं॒र्य॒तः ॥८

अ॒स्य । व॒ः । हि । अव॑सा । पान्त॑ः । द॒क्ष॒ऽसाधं॑नम् ।

यः । सू॒रिषु॑ । श्रव॑ः । बृ॒हत् । द॒धे । स्व॑ः । न । ह॒र्य॒तः ॥८

अस्य । वः । हि । अवसा । पान्तः । दक्षऽसाधनम् ।

यः । सूरिषु । श्रवः । बृहत् । दधे । स्वः । न । हर्यतः ॥८

"वः । छान्दसो वसादेशः । हिरवधारणे । वो यूयम् "अस्य सोमस्य “अवसा रक्षणेन "दक्षसाधनं बलस्य साधनं रसं “पान्तः पिबन्तो भवथ । "स्वर्ण आदित्य इव “हर्यतः सर्वैः काम्यमानः "यः अयं सोमः "सूरिषु स्तोत्राणि प्रेरयत्सु स्तोतृषु "बृहत् महत् प्रभूतं “श्रवः अन्नं "दधे विदधे । स्थापयतीति यावत् ॥

स वां य॒ज्ञेषुं मानवी॒ इंदुंर्जनिष्ट रोदसी ।

दे॒वो देंवी गिरि॒ष्ठा अस्रेंधु॒तं तुंवि॒ष्वणिं ॥९

सः । वा॒म् । य॒ज्ञेषुं । मा॒न॒वी॒ इतिं । इन्दुः । ज॒नि॒ष्ट । रो॒द॒सी॒ इतिं ।

दे॒वः । दे॒वी॒ इति॑ । गि॒रि॒ऽस्थाः । अस्रे॑धन् । तम् । तु॒वि॒ऽस्वनि॑ ॥९

सः । वाम् । यज्ञेषु । मानवी इति । इन्दुः । जनिष्ट । रोदसी इति ।

देवः । देवी इति । गिरिऽस्थाः । अस्रेधन् । तम् । तुविऽस्वनि ॥९

हे "मानवी मानव्यौ मनोः स्वभूते हे "देवी द्योतमाने हे "रोदसी द्यावापृथिव्यौ "वां युवयोः "यज्ञेषु "सः "इन्दुः सोमः "जनिष्ट अजनि अन्तरिक्षे “देवः स्वतेजसा सर्वं प्रकाशयन् पृथिव्यां “गिरिष्ठाः ग्रावसु तिष्ठन् । "तं जातं सोमं “तुविष्वणि बहुस्वने उपरे यज्ञे वा “अस्रेधन् ऋत्विजो ग्रावभिरघ्नन् । अभ्यषुण्वन्निति यावत् ॥

इंद्रा॑य सोम॒ पात॑वे वृत्र॒घ्ने परि॑ षिच्यसे ।

नरे॑ च॒ दक्षि॑णावते दे॒वाय॑ सदना॒सदे॑ ॥१०

इन्द्रा॑य । सो॒म॒ । पात॑वे । वृ॒त्र॒ऽघ्ने । परि॑ । सि॒च्य॒से॒ ।

नरे॑ । च॒ । दक्षि॑णाऽवते । दे॒वाय॑ । स॒द॒न॒ऽसदे॑ ॥१०

इन्द्राय । सोम । पातवे । वृत्रऽघ्ने । परि । सिच्यसे ।

नरे । च । दक्षिणाऽवते । देवाय । सदनऽसदे ॥१०

हे “सोम “वृत्रघ्ने वृत्रस्य हन्त्रे “इन्द्राय । षष्ठ्यर्थे चतुर्थी । इन्द्रस्य "पातवे पानार्थं "परि “षिच्यसे परितः पात्रेषु सिच्यसे । वसतीवरीभिर्वा । किंच "दक्षिणावते ऋत्विग्भ्यो दक्षिणादानेन तद्वते "देवाय देवार्थं हवींषि दातुं "सदनसदे

यज्ञगृहे सीदते "नरे मनुष्याय यजमानाय तस्मै फलप्रदानार्थं परिषिच्यसे ॥

ते प्र॒त्नासो॒ व्यु॑ष्टिषु॒ सोमाः॑ प॒वित्रे॑ अक्षरन् ।

अ॒प॒प्रोथ॑न्तः सनु॒तर्हु॑र॒श्चितः॑ प्रा॒तस्ताँ अप्र॑चेतसः ॥११

ते । प्र॒त्नासः॑ । विऽउ॑ष्टिषु । सोमाः॑ । प॒वित्रे॑ । अ॒क्ष॒र॒न् ।

अ॒प॒ऽप्रोथ॑न्तः । स॒नु॒तः । हु॒रः॒ऽचितः॑ । प्रा॒तरिति॑ । तान् । अप्र॑ऽचेतसः ॥११

ते । प्रत्नासः । विऽउष्टिषु । सोमाः । पवित्रे । अक्षरन् ।

अपऽप्रोथन्तः । सनुतः । हुरःऽचितः । प्रातरिति । तान् । अप्रऽचेतसः ॥११

“व्युष्टिषु उषसां व्युच्छनेषु प्रकाशनेषु "प्रत्नासः प्रत्नाः “ते "सोमाः "पवित्रे “अक्षरन् क्षरन्ति । ये सोमाः "सनुतः अन्तर्हितान् "अप्रचेतसः प्रज्ञानरहितान् "हुरश्चितः । स्तेननामैतत् । कौटिल्येन चिन्वन्तीति । “तान् मायाविनः स्तेनान् “प्रातः प्रातःकाल एव "अपप्रोथन्तः । अपप्रोथनं चापप्रेरणम् । अपप्रेरयन्तः शब्देन निराकुर्वन्तो भवन्ति । ते क्षरन्तीति समन्वयः ॥

तं संखायः पुरो॒रुचं॑ यू॒यं व॒यं च॑ सू॒रयः॑ ।

अ॒श्याम॒ वाजं॑गंध्यं स॒नेम॒ वाजं॑पस्त्यं ॥१२

तम् । स॒खा॒य॒ः । पु॒र॒ःऽरुचं॑म् । यू॒यम् । व॒यम् । च॒ । सू॒रयः॑ ।

अ॒श्यामं॑ । वाजं॑ऽगन्ध्यम् । स॒नेमं॑ । वाजं॑ऽपस्त्यम् ॥१२

तम् । सखायः । पुरःऽरुचम् । यूयम् । वयम् । च । सूरयः ।

अश्याम । वाजऽगन्ध्यम् । सनेम । वाजऽपस्त्यम् ॥१२

हे "सखायः स्तोतारः "सूरयः प्राज्ञाः "यूयं "वयं "च यजमानाः "पुरोरुचं पुरतो रोचमानं “वाजगन्ध्यं बलकरसाधुगन्धोपेतं सोमम् "अश्याम अश्नीयाम पिबेम । किंच "वाजपस्त्यम् अन्नयुक्तगृहसहितं यद्वा बलकरं सोमं “सनेम संभजेमहि । सोमेन बलान्नगृहादीनि भवन्तीत्यर्थः ॥ ॥२४॥

टिप्पणी

९.९८.१ अभि नो वाजसातमम् इति

रयिशब्दोपरि टिप्पणी (http://vedastudy.tripod.com/pur_index25/rayi.htm)

अभी नो वाजसातमम् इत्य् अभीति भवति रथन्तरस्य रूपम्। राथन्तरम् एतद् अहः। रयिम् अर्ष शतस्पृहम्। इन्द्रो सहस्रभर्णसं तुविद्युम्नं विभासहम्॥ इति। यद् वै शतवत् सहस्रवत् तच् छन्दोमानां रूपम्। पशवो वै छन्दोमाः। परि स्य स्वानो अक्षरद् इन्दुर् अव्ये मदच्युत इति मद्वतीर् भवन्ति। अभिपूर्वम् एवैतत् तृतीयसवने रसं मदं दधति। वयं ते अस्य राधसो वसोर् वसो पुरुस्पृहः। नि नेदिष्ठतमा इष स्याम सुम्ने ते अध्रिगो॥ इति गोमतीः पशुमतीर् भवन्ति, पशूनाम् एवावरुद्ध्यै। पशवो हि छन्दोमाः। तासु गौरिवीतम् उक्तब्राह्मणम्॥जै.ब्रा. 3.227 (https://sa.wikisource.org/s/eeo) ॥

ऽऽअभी नो वाजसातमम्ऽऽ इत्यभीति रथन्तरस्य रूपं राथन्तरं ह्येतदहः - तांब्रा. १४.११.४ (https://sa.wikisource.org/s/tvi)

जैमिनीयब्राह्मणे एवं पञ्चविंशब्राह्मणेपि एषां लक्षणानां उल्लेखं दशरात्रे अष्टमे अह्नि अर्थात् द्वितीये छन्दोमदिवसे अस्ति। किन्तु स्वतन्त्रचिन्तनेन रथन्तरस्थितिः प्रथमे छन्दोमे भवति। किं रहस्यमस्ति, अन्वेषणीयः।

द्र. गौरीवितम् (https://sa.wikisource.org/s/1zwx)

ऐडं कौत्सम् (https://sa.wikisource.org/s/2ho9)

पदनिधनशुद्धाशुद्धीयम् (https://sa.wikisource.org/s/2hol)

क्रौञ्चम् (https://sa.wikisource.org/s/2hom)

रयिष्ठम् (https://sa.wikisource.org/s/2hon)

औदलम् (https://sa.wikisource.org/s/2hoo)

९.९८.७ परि त्यं हर्यतं इति

गौरीवितम् (https://sa.wikisource.org/s/1zwz)

निहवम् (https://sa.wikisource.org/s/2hv3)

यद्वाहिष्ठीयोत्तरम् (https://sa.wikisource.org/s/2hv4)

आसिताद्यम् (https://sa.wikisource.org/s/2hv6)

साध्रम् (https://sa.wikisource.org/s/2hv8)

आकूपारम् (https://sa.wikisource.org/s/2hv9)

मण्डल ९

सूक्तं १.३१सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.३२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.३३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.३४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.३५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.३६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.३७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.३८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.३९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

२६ जून् २०२२ (तमे) दिनाङ्के २१:५२ समये अन्तिमपरिवर्तनं जातम् •

ऋग्वेदः सूक्तं ९.९९

← सूक्तं ९.९८

ऋग्वेदः - मण्डल ९

सूक्तं ९.९९

रेभसूनू काश्यपौ

सूक्तं ९.१०० →

दे. पवमानः सोमः। अनुष्टुप्, १ बृहती

आ हर्यताय धृष्णवे धनुस्तन्वन्ति पौंस्यम् ।

शुक्रां वयन्त्यसुराय निर्णिजं विपामग्रे महीयुवः ॥१॥

अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते ।

यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ॥२॥

तमस्य मर्जयामसि मदो य इन्द्रपातमः ।

यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥३॥

तं गाथया पुराण्या पुनानमभ्यनूषत ।

उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥४॥

तमुक्षमाणमव्यये वारे पुनन्ति धर्णसिम् ।

दूतं न पूर्वचित्तय आ शासते मनीषिणः ॥५॥

स पुनानो मदिन्तमः सोमश्चमूषु सीदति ।

पशौ न रेत आदधत्पतिर्वचस्यते धियः ॥६॥

स मृज्यते सुकर्मभिर्देवो देवेभ्यः सुतः ।

विदे यदासु संददिर्महीरपो वि गाहते ॥७॥

सुत इन्दो पवित्र आ नृभिर्यतो वि नीयसे ।

इन्द्राय मत्सरिन्तमश्चमूष्वा नि षीदसि ॥८॥

सायणभाष्यम्

‘ आ हर्यताय' इत्यष्टर्चं तृतीयं सूक्तम् । कश्यपगोत्रौ रेभसूनू एतत्संज्ञौ द्वावृषी । आद्या बृहती सप्तानुष्टुभः। पवमानसोमो देवता । तथा चानुक्रान्तम्-' आ हर्यतायाष्टौ रेभसूनू काश्यपौ बृहत्याद्या ' इति । गतो विनियोगः ॥

आ ह॑र्य॒ताय॑ धृ॒ष्णवे॒ धनु॑स्तन्व॑न्ति॒ पौंस्य॑ं ।

शु॒क्रां व॑य॒न्त्यसु॑राय नि॒र्णिज॑ं वि॒पामग्रे॑ मही॒युवः॑ ॥१

आ । ह॒र्य॒ताय॑ । धृ॒ष्णवे॑ । धनुः॑ । त॒न्व॒न्ति॒ । पौंस्य॑म् ।

शु॒क्राम् । व॒य॒न्ति॒ । असु॑राय । निः॒ऽनिज॑म् । वि॒पाम् । अग्रे॑ । म॒ही॒युवः॑ ॥१

आ । हर्यताय । धृष्णवे । धनुः । तन्वन्ति । पौंस्यम् ।

शुक्राम् । वयन्ति । असुराय । निःऽनिजम् । विपाम् । अग्रे । महीयुवः ॥१

"हर्यताय सर्वैः स्पृहणीयाय “धृष्णवे शत्रूणां धर्षणशीलाय सोमाय “पौंस्यं पुंस्त्वस्याभिव्यञ्जकं “धनुः “आ “तन्वन्ति । धनुषि ज्यां कुर्वन्तीति । सोमस्य धाराविसर्गार्थं वितायमानं पवित्रमभिधीयते । तदेव विवृणोति । “महीयुवः पूजाकामा ऋत्विजः "विपां मेधाविनां देवानाम् "अग्रे पुरस्तात् “शुक्रां शुक्लवर्णां "निर्णिजं यथा सोमो निर्णिज्यते ताम् "असुराय बलवते "वयन्ति वितन्वन्ति । दशापवित्रं विस्तारयन्तीत्यर्थः । वयतिर्गतिकर्मा ॥

अधं क्षपा परिंष्कृतो वाजाँ अभि प्र गांहते ।

यदीं विवस्वंतो धियो हरिं हिन्वंति यातंवे ॥२

अधं । क्ष॒पा । परिंऽकृतः । वाजां॑न् । अ॒भि । प्र । गा॒ह॒ते॒ ।

यदिं । वि॒वस्वंतः । धियः॑ । हरिंम् । हि॒न्वन्तिं । यातंवे ॥२

अध । क्षपा । परिऽकृतः । वाजान् । अभि । प्र । गाहते ।

यदि । विवस्वतः । धियः । हरिम् । हिन्वन्ति । यातवे ॥२

“क्षपा । 'सुपां सुलुक्' इति पञ्चम्या आकारः । क्षपाया रात्रेः "अध अनन्तरं प्रातःकाले “परिष्कृतः । भूषणार्थे ' संपर्युपेभ्यः' इति करोतेः सुडागमः । अद्भिरलंकृतः । यद्वा । क्षपयित्र्यां सेनायामलंकृतः । सोमः "वाजान् अन्नानि बलानि वाभिलक्ष्य “प्र “गाहते प्रगच्छति । "विवस्वतः परिचरणवतो यजमानस्य "धियः कर्मसाधनभूता अङ्गुलयः "हरिं हरितवर्णमेतमंशुं “यातवे पात्राण्यभिगमनाय "यदि “हिन्वन्ति प्रेरयन्ति तर्हि सवनानि गच्छतीति ॥

तमस्य मर्जयामसि मदो य इंद्रपातमः ।

यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥३

तम् । अस्य । मर्जयामसि । मदः । यः । इन्द्रऽपातमः ।

यम् । गावः । आसऽभिः । दधुः । पुरा । नूनम् । च ।
सूरयः ॥३

तम् । अस्य । मर्जयामसि । मदः । यः । इन्द्रऽपातमः ।

यम् । गावः । आसऽभिः । दधुः । पुरा । नूनम् । च ।
सूरयः ॥३

"अस्य सोमस्य "तं रसं “मर्जयामसि मर्जयामः शोधयामः । अलंकुर्मो वा। “यः "मदः मदको रसः "इन्द्रपातमः इन्द्रेणात्यन्तं पातव्यो भवति । किंच “गावः गन्तारः

"सूरयः स्तोतारः “पुरा “च "नूनम् इदानीं च "यं सोमरसम् "आसभिः आस्यैः "दधुः धारयन्ति । पिबन्तीति यावत् । यद्वा । गावो धेनवो यं सोमं तृणादिष्ववस्थितमासभिरास्यैर्दधुर्धारयन्ति तृणरूपेण भक्षयन्ति ॥

तं गाथंया पुरा॒ण्या पुंना॒नम॒भ्यंनूषत ।

उ॒तो कृंपंत धी॒तयों दे॒वाना॒ं नाम॒ बिभ्रंतीः ॥४

तम् । गाथंया । पु॒रा॒ण्या । पु॒ना॒नम् । अ॒भि । अ॒नू॒ष॒त॒ ।

उ॒तो इतिं । कृ॒प॒न्त॒ । धी॒तयः॑ । दे॒वानां॑म् । नाम॑ । बिभ्रंतीः ॥४

तम् । गाथया । पुराण्या । पुनानम् । अभि । अनूषत ।

उतो इति । कृपन्त । धीतयः । देवानाम् । नाम । बिभ्रतीः ॥४

“पुनानं पूयमानं "तं सोमं "पुराण्या पुरा कृतया "गाथया स्तुत्या "अभ्यनूषत स्तोतारः अभिष्टुवन्ति । 'नू स्तवने'। लुङि रूपम् । "उतो अपि च "नाम कर्मार्थं नमनं "बिभ्रतीः बिभ्राणाः “धीतयः "अङ्गुलयः "देवानां सोमरूपहविष्प्रदानाय "कृपन्त कल्पयन्ति समर्था भवन्ति । ‘ कृपू सामर्थ्ये ' ॥

तमु॒क्षमा॑णम॒व्यये॒ वारे॑ पुनंति धर्ण॒सिं ।

दू॒तं न पू॒र्वचि॑त्तय॒ आ शा॑सते मनी॒षिण॑ः ॥५

तम् । उ॒क्षमा॑णम् । अ॒व्यये॑ । वारे॑ । पु॒न॒न्ति॒ । ध॒र्ण॒सिम् ।

दू॒तम् । न । पू॒र्वऽचि॑त्तये । आ । शा॒स॒ते॒ । म॒नी॒षिण॑ः ॥५

तम् । उक्षमाणम् । अव्यये । वारे । पुनन्ति । धर्णसिम् ।

दूतम् । न । पूर्वऽचित्तये । आ । शासते । मनीषिणः ॥५

“उक्षमाणम् अद्भिः सिच्यमानं “धर्णसिं सर्वस्य धारकं "तं सोमम् "अव्यये अविमये "वारे वाले पवित्रे “पुनन्ति शोधयन्ति । ततः "मनीषिणः मेधाविनो यजमानाः तमिमं सोमं "दूतं “न दूतमिव "पूर्वचित्तये देवानां पूर्वमेव प्रज्ञापनाय “आ “शासते प्रार्थयन्ते ॥ ॥ २५ ॥

स पुंना॒नो म॒दिंतंम॒ः सोमं॑श्च॒मूषुं सीदति ।

प॒शौ न रेतं आ॒दध॒त्पतिं॑र्वचस्यते धि॒यः ॥६

सः । पु॒ना॒नः । म॒दिन्ऽतंमः । सोमः॑ । च॒मूषुं । सी॒द॒ति॒ ।

प॒शौ । न । रेतः॑ । आ॒ऽदधं॑त् । पतिः॑ । व॒च॒स्य॒ते॒ । धि॒यः ॥
६

सः । पुनानः । मदिन्ऽतमः । सोमः । चमूषु । सीदति ।

पशौ । न । रेतः । आऽदधत् । पतिः । वचस्यते । धियः ॥
६

“मदिन्तमः अत्यन्तं मादयिता “सः "सोमः "पुनानः पूयमानः सन् “चमूषु चमसेषु “सीदति । ततः "पशौ "न यथा पशौ कश्चिद्वृषभो रेत आदधाति तद्वच्चमसादिषु "रेतः स्वीयं रसम् “आदधत् आदधानः "धियः कर्मणः "पतिः पालयितायं सोमः “वचस्यते अभिष्टूयते ॥

स मृंज्यते सु॒कर्म॑भिर्दे॒वो दे॒वेभ्यः॑ सु॒तः ।

वि॒दे यदा॑सु संद॒दिर्म॒हीर॒पो वि गा॑हते ॥७

सः । मृ॒ज्य॒ते॒ । सु॒कर्म॑ऽभिः । दे॒वः । दे॒वेभ्यः॑ । सु॒तः ।

वि॒दे । यत् । आ॒सु॒ । स॒म्ऽद॒दिः । म॒हीः । अ॒पः । वि । गा॒ह॒ते॒ ॥७

सः । मृज्यते । सुकर्मऽभिः । देवः । देवेभ्यः । सुतः ।

विदे । यत् । आसु । सम्ऽददिः । महीः । अपः । वि । गाहते ॥७

“देवेभ्यः देवार्थं “सुतः अभिषुतः “देवः द्योतमानः स्तोतव्यो वा "सः सोमः "सुकर्मभिः ऋत्विग्भिः "मृज्यते परिपूयते । "यत् यदायं सोमः “आसु प्रजासु "संददिः सम्यग्धनदानशील इति “विदे ज्ञायते तदानीं "महीः महतीः "अपः वसतीवरीः "वि “गाहते विशेषेणाभिगच्छति । यदा सोममभिषुण्वन्ति तदा तेभ्यो धनं प्रयच्छतीत्यर्थः ॥

सुत इंदो पवित्र आ नृभिर्यतो वि नीयसे ।

इंद्राय मत्सरिंतमश्चमूष्वा नि षीदसि ॥८

सुतः । इन्दो इति । पवित्रे । आ । नृऽभिः । यतः । वि ।
नीयसे ।

इन्द्राय । मत्सरिन्ऽतमः । चमूषु । आ । नि । सीदसि ॥८

सुतः । इन्दो इति । पवित्रे । आ । नृऽभिः । यतः । वि ।
नीयसे ।

इन्द्राय । मत्सरिन्ऽतमः । चमूषु । आ । नि । सीदसि ॥८

हे “इन्दो “सुतः अभिषुतः “यतः आयतः सर्वतो विस्तृतस्त्वं “नृभिः कर्मनेतृभिर्ऋत्विग्भिः “पवित्रे “वि “नीयसे विशेषेण नीयमानो भवसि । ततः “मत्सरिन्तमः

अतिशयेन मादयिता त्वम् “इन्द्राय इन्द्रार्थं “चमूषु चमसेषु “आ “नि “षीदसि ॥ ॥ २६ ॥

मण्डल ९

सूक्तं ९.१	सूक्तं ९.३१	सूक्तं ९.६१	सूक्तं ९.९१
सूक्तं ९.२	सूक्तं ९.३२	सूक्तं ९.६२	सूक्तं ९.९२
सूक्तं ९.३	सूक्तं ९.३३	सूक्तं ९.६३	सूक्तं ९.९३
सूक्तं ९.४	सूक्तं ९.३४	सूक्तं ९.६४	सूक्तं ९.९४
सूक्तं ९.५	सूक्तं ९.३५	सूक्तं ९.६५	सूक्तं ९.९५
सूक्तं ९.६	सूक्तं ९.३६	सूक्तं ९.६६	सूक्तं ९.९६
सूक्तं ९.७	सूक्तं ९.३७	सूक्तं ९.६७	सूक्तं ९.९७
सूक्तं ९.८	सूक्तं ९.३८	सूक्तं ९.६८	सूक्तं ९.९८
सूक्तं ९.९	सूक्तं ९.३९	सूक्तं ९.६९	सूक्तं ९.९९
सूक्तं ९.१०	सूक्तं ९.४०	सूक्तं ९.७०	सूक्तं ९.१००

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.१००

← सूक्तं ९.९९

ऋग्वेदः - मण्डल ९

सूक्तं ९.१००

रेभसूनू काश्यपौ

सूक्तं ९.१०१ →

दे. पवमानः सोमः। अनुष्टुप्

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।

वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥१॥

पुनान इन्दवा भर सोम द्विबर्हसं रयिम् ।

त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे ॥२॥

त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः ।

त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥३॥

परि ते जिग्युषो यथा धारा सुतस्य धावति ।

रंहमाणा व्यव्ययं वारं वाजीव सानसिः ॥४॥

क्रत्वे दक्षाय नः कवे पवस्व सोम धारया ।

इन्द्राय पातवे सुतो मित्राय वरुणाय च ॥५॥

पवस्व वाजसातमः पवित्रे धारया सुतः ।

इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥६॥

त्वां रिहन्ति मातरो हरिं पवित्रे अद्रुहः ।

वत्सं जातं न धेनवः पवमान विधर्मणि ॥७॥

पवमान महि श्रवश्चित्रेभिर्यासि रश्मिभिः ।

शर्धन्तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ॥८॥

त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।

प्रति द्रापिममुञ्चथाः पवमान महित्वना ॥९॥

सायणभाष्यम्

‘ अभी नवन्ते' इति नवर्चं चतुर्थं सूक्तम् । पूर्ववदृषिदेवते । सर्वा अनुष्टुभः । तथा चानुक्रम्यते’ अभी नवन्ते नव' इति । गतो विनियोगः ॥

अ॒भी नंवन्ते अ॒द्रुहः॑ प्रि॒यमिन्द्रं॑स्य॒ काम्यं॑ ।

व॒त्सं न पूर्व॒ आयु॑नि जा॒तं रिं॑हन्ति मा॒तरः॑ ॥१

अ॒भि । न॒व॒न्ते॒ । अ॒द्रुहः॑ । प्रि॒यम् । इन्द्रं॑स्य । काम्यं॑म् ।

व॒त्सम् । न । पूर्वे॑ । आयु॑नि । जा॒तम् । रि॒ह॒न्ति॒ । मा॒तरः॑ ॥ १

अभि । नवन्ते । अद्रुहः । प्रियम् । इन्द्रस्य । काम्यम् ।

वत्सम् । न । पूर्वे । आयुनि । जातम् । रिहन्ति । मातरः ॥ १

यथा “मातरः गावः “पूर्वे प्रथमे “आयुनि वयसि “जातं “वत्सं “रिहन्ति लिहन्ति तथा “अद्रुहः अद्रोहा वसतीवर्याख्या आपः “इन्द्रस्य “प्रियं “काम्यं सर्वैः काम्यमानं सोमम् “अभि “नवन्ते अभिगच्छन्ति ॥

पु॒ना॒न इ॑न्द॒वा भ॑र॒ सोम॑ द्वि॒बर्ह॑सं र॒यिं ।

त्वं वसू॑नि पुष्यसि॒ विश्वा॑नि दा॒शुषो॑ गृ॒हे ॥२

पु॒ना॒नः । इ॒न्दो॒ इति॑ । आ । भ॒र॒ । सोम॑ । द्वि॒ऽबर्ह॑सम् । र॒यिम् ।

त्वम् । वसूॅनि । पु॒ष्य॒सि॒ । विश्वा॑नि । दा॒शुषः॑ । गृ॒हे ॥२

पुनानः । इन्दो इति । आ । भर । सोम । द्विऽबर्हसम् । रयिम् ।

त्वम् । वसूनि । पुष्यसि । विश्वानि । दाशुषः । गृहे ॥२

हे “इन्दो दीप्यमान हे “सोम “पुनानः पूयमानस्त्वं “द्विबर्हसं द्वयोः स्थानयोः परिबृंहणशीलं “रयिं धनमस्मभ्यम् “आ “भर आहर देहि । “त्वं हि “दाशुषः हविर्दत्तवतो यजमानस्य “गृहे स्थित्वा “विश्वानि सर्वाणि “वसूनि धनानि “पुष्यसि पोषयसि ।।

त्वं धियं॑ मनो॒युजं॑ सृ॒जा वृ॒ष्टिं न तं॑न्य॒तुः ।

त्वं वसूॅनि॒ पार्थि॑वा दि॒व्या चं॑ सोम पुष्यसि ॥३

त्वम् । धियंम् । म॒न॒ःऽयुजंम् । सृ॒ज । वृ॒ष्टिम् । न । त॒न्य॒तुः ।

त्वम् । वसूंनि । पार्थिंवा । दि॒व्या । च॒ । सो॒म॒ । पु॒ष्य॒सि॒ ॥ ३

त्वम् । धियम् । मनःऽयुजम् । सृज । वृष्टिम् । न । तन्यतुः ।

त्वम् । वसूनि । पार्थिवा । दिव्या । च । सोम । पुष्यसि ॥ ३

हे “सोम “त्वं “मनोयुजं मनसा युज्यमानां मनोवेगां “धियं ध्यातव्यां धारां “सृज पात्रेषु विसृज । तत्र दृष्टान्तः । "वृष्टिं “न “तन्यतुः । ‘ तनु विस्तारे'।' ऋतन्यञ्जि°' इत्यादिना यतुच्प्रत्ययः । तनोति विस्तारयतीति तन्यतुर्मेघः । यथा मेघो वृष्टिं सृजति तद्वत् । ततो हे सोम “त्वं “पार्थिवा

पृथिव्यां भवानि “वसूनि धनानि तथा दिव्यानि दिवि भवानि धनानि “च “पुष्यसि अस्मभ्यं पोषयसि । प्रयच्छसीत्यर्थः ॥

परि॑ ते जि॒ग्युषो॑ यथा॒ धारा॑ सु॒तस्य॑ धावति ।

रंह॑माणा॒ व्य१॒॑व्यय॒ं वार॑ं वा॒जीव॑ सान॒सिः ॥४

परि॑ । ते॒ । जि॒ग्युषः॑ । य॒था॒ । धारा॑ । सु॒तस्य॑ । धा॒व॒ति॒ ।

रंह॑माणा । वि । अ॒व्यय॑म् । वार॑म् । वा॒जीऽइ॑व । सा॒न॒सिः ॥४

परि । ते । जिग्युषः । यथा । धारा । सुतस्य । धावति ।

रंहमाणा । वि । अव्ययम् । वारम् । वाजीऽइव । सानसिः ॥४

“सुतस्य “ते त्वदीया “सानसिः संभजनशीला यद्वा स्तोतृभिः संभजनीया “रंहमाणा वेगं कुर्वाणा “धारा “अव्ययम् अविमयं “वारं वालं पवित्रं “वि “परि “धावति विशेषेण परितो गच्छति । तत्र दृष्टान्तः । “जिग्युषः शत्रूणां जेतुर्वीरस्य “वाजीव अश्वो यथा युद्धं परितो धावति तद्वत् । जयतेः क्वसौ ‘सन्लिटोर्जेः' इति कुत्वम् । "यथा इति पूरकः ॥

क्रत्वे॒ दक्षा॑य नः कवे॒ पव॑स्व सोम॒ धार॑या ।

इन्द्रा॑य॒ पात॑वे सु॒तो मि॒त्राय॒ वरु॑णाय च ॥५

क्रत्वें । दक्षा॑य । नः॒ । क॒वे॒ । पव॑स्व । सो॒म॒ । धार॑या ।

इन्द्रा॑य । पात॑वे । सु॒तः । मि॒त्राय॑ । वरु॑णाय । च॒ ॥५

क्रत्वे । दक्षाय । नः । कवे । पवस्व । सोम । धारया ।

इन्द्राय । पातवे । सुतः । मित्राय । वरुणाय । च ॥५

हे "कवे क्रान्तदर्शिन् हे "सोम "नः अस्माकं "क्रत्वे प्रज्ञानाय "दक्षाय बलाय च त्वं "धारया "पवस्व क्षर । कीदृशः। "इन्द्राय "पातवे पानार्थं तथा "मित्राय "वरुणाय "च "सुतः अभिषुतः खलु ॥ ॥ २७ ॥

पवं॑स्व वाज॒सात॑मः प॒वित्रे॒ धार॑या सु॒तः ।

इन्द्रा॑य सोम॒ विष्ण॑वे दे॒वेभ्यो॒ मधु॑मत्तमः ॥६

पवं॑स्व । वा॒ज॒ऽसात॑मः । प॒वित्रें । धार॑या । सु॒तः ।

इन्द्रा॑य । सो॒म॒ । विष्ण॑वे । दे॒वेभ्य॑ः । मधु॑मत्ऽतमः ॥६

पवस्व । वाजऽसातमः । पवित्रे । धारया । सुतः ।

इन्द्राय । सोम । विष्णवे । देवेभ्यः । मधुमत्ऽतमः ॥६

हे “सोम “वाजसातमः अतिशयेनान्नस्य दाता “सुतः अभिषुतस्त्वं “पवित्रे “धारया सह “पवस्व क्षर। ततो हे सोम त्वम् “इन्द्राय "विष्णवे चान्येभ्यो मित्रादिभ्यः “देवेभ्यः च “मधुमत्तमः अतिशयेन माधुर्योपेतो भव ॥

त्वां रिंहन्ति मा॒तरो॒ हरिं॑ प॒वित्रे॑ अ॒द्रुहः॑ ।

व॒त्सं जा॒तं न धे॒नवः॒ पव॑मान॒ विध॑र्मणि ॥७

त्वाम् । रि॒ह॒न्ति॒ । मा॒तरः॑ । हरि॑म् । प॒वित्रे॑ । अ॒द्रुहः॑ ।

व॒त्सम् । जा॒तम् । न । धे॒नवः॑ । पव॑मान । विऽध॑र्मणि ॥७

त्वाम् । रिहन्ति । मातरः । हरिम् । पवित्रे । अद्रुहः ।

वत्सम् । जातम् । न । धेनवः । पवमान । विऽधर्मणि ॥७

हे “पवमान सोम “विधर्मणि विविधं हविषां धारके यज्ञे “अद्रुहः द्रोहवर्जिताः “मातरः मातृभूता वसतीवर्यः “हरिं हरितवर्णं “त्वां “पवित्रे स्थितं “रिहन्ति लिहन्ति आस्वादयन्ति । कथमिव । यथा “धेनवः "जातं “वत्सं लिहन्ति तथा ॥

पवमान महि श्रवश्चित्रेभिर्यासि रश्मिभिः ।

शर्धन्तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ॥८

पवमान । महि । श्रवः । चित्रेभिः । यासि । रश्मिऽभिः ।

शर्धन् । तमांसि । जिघ्नसे । विश्वानि । दाशुषः । गृहे ॥८

पवमान । महि । श्रवः । चित्रेभिः । यासि । रश्मिऽभिः ।

शर्धन् । तमांसि । जिघ्नसे । विश्वानि । दाशुषः । गृहे ॥८

हे “पवमान “महि महत् “श्रवः श्रवणीयमन्तरिक्षं “चित्रेभिः चित्रैर्नानाविधैश्चायनीयैर्वा “रश्मिभिः परि “यासि परिगच्छसि । तथा “शर्धन् वेगं कुर्वंस्त्वं “दाशुषः हविर्दत्तवतो यजमानस्य “गृहे स्थित्वा “विश्वानि सर्वाणि “तमांसि तमोरूपाणि रक्षांसि “जिघ्नसे हंसि । एवं द्यावापृथिव्योः वर्तस इत्यर्थः ॥

त्वं द्यां च॑ महिव्रत पृथि॒वीं चाति॑ जभ्रिषे ।

प्रति॑ द्रा॒पिम॑मुंचथा॒ः पव॑मान महि॒त्व॒ना ॥९

त्वम् । द्याम् । च॒ । म॒हि॒ऽव्र॒त॒ । पृ॒थि॒वीम् । च॒ । अति॑ । ज॒भ्रि॒षे॒ ।

प्रति॑ । द्रा॒पिम् । अ॒मु॒ञ्च॒था॒ः । पव॑मान । म॒हि॒ऽत्व॒ना ॥९

त्वम् । द्याम् । च । महिऽव्रत । पृथिवीम् । च । अति । जभ्रिषे ।

प्रति । द्रापिम् । अमुञ्चथाः । पवमान । महिऽत्वना ॥९

हे “महिव्रत महाकर्मन् बहुविधकर्मन् सोम “त्वं “द्यां द्युलोकं च पृथिवीं “च "अति “जभ्रिष अत्यन्तं बिभर्षि ।' डुभृञ् धारणपोषणयोः । तस्य छान्दसे लिटि सर्वविधीनां छन्दसि विकल्पितत्वादत्रेडागमः । अन्तरिक्षे सोमात्मनेति पृथिव्यां लतारूपेणेत्येवं लोकद्वयवर्तित्वम्। हे “पवमान क्षरन् सोम त्वं “महित्वना महत्त्वेन युक्तः सन् "द्रापिं कवचं “प्रति "अमुञ्चथाः प्रतिमुञ्चसि संवृणोषि ॥ ॥ २८ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति
श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क भूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके चतुर्थोऽध्यायः समाप्तः ॥

टिप्पणी

९.१००.१ अभी नवन्ते इति

द्र. पार्जन्यं साम (https://sa.wikisource.org/s/28qi)

९.१००.६-९ पवस्व वाजसातये इति

द्र. शाक्वरऋषभम् साम (https://sa.wikisource.org/s/1zbe)

मण्डल ९

सूक्तं ९.११	सूक्तं ९.४१	सूक्तं ९.७१	सूक्तं ९.१०१
सूक्तं ९.१२	सूक्तं ९.४२	सूक्तं ९.७२	सूक्तं ९.१०२
सूक्तं ९.१३	सूक्तं ९.४३	सूक्तं ९.७३	सूक्तं ९.१०३
सूक्तं ९.१४	सूक्तं ९.४४	सूक्तं ९.७४	सूक्तं ९.१०४
सूक्तं ९.१५	सूक्तं ९.४५	सूक्तं ९.७५	सूक्तं ९.१०५
सूक्तं ९.१६	सूक्तं ९.४६	सूक्तं ९.७६	सूक्तं ९.१०६
सूक्तं ९.१७	सूक्तं ९.४७	सूक्तं ९.७७	सूक्तं ९.१०७
सूक्तं ९.१८	सूक्तं ९.४८	सूक्तं ९.७८	सूक्तं ९.१०८
सूक्तं ९.१९	सूक्तं ९.४९	सूक्तं ९.७९	सूक्तं ९.१०९
सूक्तं ९.२०	सूक्तं ९.५०	सूक्तं ९.८०	सूक्तं ९.११०
सूक्तं ९.२१	सूक्तं ९.५१	सूक्तं ९.८१	सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.१०१

ऋ. १-३ अन्धीगुः श्यावाश्विः, ४-६ ययातिर्नाहुषः, ७-९ नहुषो मानवः, १०-१२ मनुः सांवरणः, १३-१६ वैश्वामित्रो वाच्यो वा प्रजापतिः।

दे. पवमानः सोमः। अनुष्टुप्, २-३ गायत्री

पुरोजिती वो अन्धसः सुताय मादयित्नवे ।

अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥१॥

यो धारया पावकया परिप्रस्यन्दते सुतः ।

इन्दुरश्वो न कृत्व्यः ॥२॥

तं दुरोषमभी नरः सोमं विश्वाच्या धिया ।

यज्ञं हिन्वन्त्यद्रिभिः ॥३॥

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।

पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥४॥

इन्दुरिन्द्राय पवत इति देवासो अब्रुवन् ।

वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ॥५॥

सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।

सोमः पती रयीणां सखेन्द्रस्य दिवेदिवे ॥६॥

अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।

पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥७॥

समु प्रिया अनूषत गावो मदाय घृष्वयः ।

सोमासः कृण्वते पथः पवमानास इन्दवः ॥८॥

य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् ।

यः पञ्च चर्षणीरभि रयिं येन वनामहै ॥९॥

सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।

मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥१०॥

सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि ।

इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥११॥

एते पूता विपश्चितः सोमासो दध्याशिरः ।

सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥१२॥

प्र सुन्वानस्यान्धसो मर्तो न वृत तद्वचः ।

अप श्वानमराधसं हता मखं न भृगवः ॥१३॥

आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः ।

सरज्जारो न योषणां वरो न योनिमासदम् ॥१४॥

स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी ।

हरिः पवित्रे अव्यत वेधा न योनिमासदम् ॥१५॥

अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि ।

कनिक्रदद्वृषा हरिरिन्द्रस्याभ्येति निष्कृतम् ॥१६॥

सायणभाष्यम्

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

विज्ञातवेदगाम्भीर्यस्तुर्यं व्याख्याय सप्तमे।

सायणार्यस्ततोऽध्यायं पञ्चमं व्याचिकीर्षति ॥

तत्र ' पुरोजिती वः' इति षोडशर्चमनुवाकापेक्षया पञ्चमं सूक्तम् । आद्यस्य तृचस्य श्यावाश्वपुत्रोऽन्धीगुर्नामर्षिः। द्वितीयस्य नहुषस्य राज्ञः पुत्रो ययातिर्नाम । तृतीयस्य मनोः पुत्रो नहुषो नाम राजर्षिः । चतुर्थस्य संवरणाख्यस्य

राज्ञः पुत्रो मनुः । एवं द्वादश गताः । शिष्टस्य चतुर्ऋचस्य वाचः पुत्रो वैश्वामित्रो वा प्रजापतिर्ऋषिः । द्वितीयतृतीये गायत्र्यौ शिष्टाश्चतुर्दशानुष्टुभः । तथा चानुक्रम्यते’ पुरोजिती षोळश श्यावाश्विरन्धीगुर्ययातिर्नाहुषो नहुषो मानवो मनुः सांवरण इति तृचाः शेषे प्रजापतिरुपाद्ये गायत्र्यौ' इति । गतः सूक्तविनियोगः ॥

पु॒रोजिं॑ती वो॒ अंधं॑सः सु॒ताय॑ मादयि॒त्नवे॑ ।

अप॒ श्वानं॑ श्नथिष्टन॒ सखा॑यो दीर्घजि॒ह्व्यं॑ ॥१

पु॒रः॒ऽजिं॑ती । व॒ः । अन्धं॑सः । सु॒ताय॑ । मा॒द॒यि॒त्नवे॑ ।

अपं॑ । श्वानं॑म् । श्न॒थि॒ष्ट॒न॒ । सखा॑यः । दी॒र्घ॒ऽजि॒ह्व्यं॑म् ॥१

पुरःऽजिती । वः । अन्धसः । सुताय । मादयित्नवे ।

अप । श्वानम् । श्नथिष्टन । सखायः । दीर्घऽजिह्व्यम् ॥१

हे "सखायः सखिभूताः समानख्याना वा हे स्तोतारः "वः यूयं "पुरोजिती। षष्ठ्याः पूर्वसवर्णदीर्घः । पुरःस्थितजयस्य "अन्धसः अदनीयस्य सोमस्य स्वभूताय "सुताय अभिषुताय "मादयित्नवे अत्यन्तं मदकराय रसाय "दीर्घजिह्वयम् । दीर्घा जिह्वा यस्य सः। दीर्घजिह्वी च च्छन्दसि' (पा. सू. ४. १. ५९) इति ङीषन्तत्वेन निपातितः । तादृशं "श्वानम् "अप "श्नथिष्टन अपश्नथयत अपबाधध्वम् । यथा श्वा राक्षसा वा सुतं सोमं न लिहन्ति तथा कुरुतेत्यर्थः ॥

पवित्रेष्ट्यां द्वितीयस्याज्यभागस्य ' यो धारया' इत्येषानुवाक्या। सूत्रितं च- पावकवन्तावाज्यभागावग्नी

रक्षांसि सेधति यो धारया पावकया' (आश्व. श्रौ. २. १२) इति ॥

यो धारंया पाव॒कयां परिप्र॒स्यंदंते स॒ुतः ।

इंद॒ुरश्व॒ो न कृत्व्यः॑ ॥२

यः । धारंया । पा॒व॒कयां । प॒रि॒ऽप्र॒स्यन्दंते । स॒ुतः ।

इन्दुः॑ । अश्वः॑ । न । कृत्व्यः॑ ॥२

यः । धारया । पावकया । परिऽप्रस्यन्दते । सुतः ।

इन्दुः । अश्वः । न । कृत्व्यः ॥२

“सुतः अभिपुतः “कृत्व्यः । कृत्वीति कर्मनाम । कर्मणि साधुः “यः "इन्दुः सोमः “पावकया पापानां शोधयित्र्या

“धारया “परिप्रस्यन्दते परितः प्रक्षरति । कथमिव । “अश्वो “न अश्वो यथा वेगेन प्रगच्छति तद्वत् ॥

तं दु॒रोषं॑म॒भी नर॒ः सोमं॑ वि॒श्वाच्यां॑ धि॒या ।

य॒ज्ञं हिं॑न्व॒ं॑त्यद्रिं॑भिः ॥३

तम् । दु॒रोषं॑म् । अ॒भि । नरः॑ । सोमं॑म् । वि॒श्वाच्यां॑ । धि॒या ।

य॒ज्ञम् । हि॒न्व॒न्ति॒ । अद्रिं॑ऽभिः ॥३

तम् । दुरोषम् । अभि । नरः । सोमम् । विश्वाच्या । धिया ।

यज्ञम् । हिन्वन्ति । अद्रिऽभिः ॥३

“नरः कर्मनेतार ऋत्विजः “दुरोषम् । रोषतेर्हिंसार्थस्य रेफलोपे दीर्घाभाव ओषतेर्दाहार्थस्य वा खलि रूपमिति संदेहादनवग्रहः । “तं दुर्दहं दुर्वधं वा “यज्ञं यष्टव्यं तं “सोमं “विश्वाच्या सर्वान् कामानञ्चित्र्या “धिया बुद्ध्या "अद्रिभिः ग्रावभिः “अभि “हिन्वन्ति अभिप्रेरयन्ति । अभिषुण्वन्तीति यावत् ॥

सु॒तासो॒ मधु॑मत्तमाः॒ सोमा॒ इंद्रा॑य मं॒दिनः॑ ।

प॒वित्रं॑वंतो अक्षरंदे॒वान्ग॑च्छंतु वो॒ मदाः॑ ॥४

सु॒तासः॑ । मधु॑मत्ऽतमाः । सोमाः॑ । इन्द्रा॑य । म॒न्दिनः॑ ।

प॒वित्रं॑ऽवन्तः । अ॒क्ष॒र॒न् । दे॒वान् । ग॒च्छ॒न्तु॒ । वः॒ । मदाः॑ ॥ ४

सुतासः । मधुमत्ऽतमाः । सोमाः । इन्द्राय । मन्दिनः ।

पवित्रऽवन्तः । अक्षरन् । देवान् । गच्छन्तु । वः । मदाः ॥ ४

“मधुमत्तमाः अतिशयेन माधुर्योपेता अत एव “मन्दिनः मदकराः "सुतासः अभिषुताः “सोमाः “पवित्रवन्तः पवित्रे वर्तमानाः सन्तः “इन्द्राय इन्द्रार्थम् “अक्षरन् पात्रेषु क्षरन्ति । अथ प्रत्यक्षकृतः। “वः युष्माकं “मदाः मदहेतवो रसाः "देवान् इन्द्रादीन् “गच्छन्तु ॥

इंदु॒रिंद्रा॑य पवत॒ इति॑ दे॒वासो॑ अब्रुवन् ।

वा॒चस्पति॑र्मखस्यते॒ विश्व॒स्येशा॑न॒ ओजं॑सा ॥५

इन्दुः॑ । इन्द्रा॑य । प॒व॒ते॒ । इति॑ । दे॒वासः॑ । अ॒ब्रु॒व॒न् ।

वा॒चः । पतिः॑ । म॒ख॒स्य॒ते॒ । विश्वं॑स्य । ईशा॑नः । ओजं॑सा ॥५

इन्दुः । इन्द्राय । पवते । इति । देवासः । अब्रुवन् ।

वाचः । पतिः । मखस्यते । विश्वस्य । ईशानः । ओजसा ॥५

“इन्दुः सोमः “इन्द्राय इन्द्रार्थं “पवते कलशे क्षरति “इति "देवासः स्तुतिकारिणः स्तोतारः “अब्रुवन् वदन्ति । यदा स्तोतार एवं वदन्ति तदानीं “वाचः स्तुतेः “पतिः पालयिता । यद्वा । शब्दस्य स्वामी अत्यन्तं शब्दायमान इत्यर्थः। तादृशः सोमः “मखस्यते स्तुतिभिः पूजामिच्छति । लालसायां सुगागमः । कीदृशः । "ओजसा बलेन “विश्वस्य सर्वस्य “ईशानः प्रभुः ॥ ॥ १ ॥

स॒हस्रं॑धारः पवते समु॒द्रो वां॑चमीं॑ख॒यः ।

सोम॒ः पतीं॑ रयी॒णां सखें॑द्रं॑स्य दि॒वेदिं॑वे ॥६

स॒हस्रं॑ऽधारः । प॒व॒ते॒ । स॒मु॒द्रः । वा॒च॒म्ऽई॒ङ्ख॒यः ।

सोमः॑ । पतिः॑ । र॒यी॒णाम् । सखा॑ । इन्द्रं॑स्य । दि॒वेऽदिं॑वे ॥
६

सहस्रऽधारः । पवते । समुद्रः । वाचम्ऽईङ्खयः ।

सोमः । पतिः । रयीणाम् । सखा । इन्द्रस्य । दिवेऽदिवे ॥
६

“सहस्रधारः बहुविधधारोपेतः “सोमः “पवते क्षरति । कीदृशः । “समुद्रः । यस्मात्समुद्द्रवन्ति रसाः । सरःस्थानीयः “वाचमीङ्खयः । ईङ्खतेर्ण्यन्तस्य सुप्युपपदे खच्प्रत्ययः । स्तुतीनां प्रेरयिता “रयीणां धनानां “पतिः प्रभुः । यद्वा । रयीणां हविषो दातॄणां यजमानानां पतिः पालयिता । “दिवेदिवे प्रत्यहम् “इन्द्रस्य “सखा मित्रभूतः सोमः पवते ॥

अ॒यं पू॒षा र॒यिर्भग॒ः सोमः᳚ पुना॒नो अ॑र्षति ।

पति॒र्विश्व॑स्य॒ भूम॑नो॒ व्य॑ख्य॒द्रोद॑सी उ॒भे ॥७

अ॒यम् । पू॒षा । र॒यिः । भगः᳚ । सोमः᳚ । पु॒ना॒नः । अ॒र्ष॒ति॒ ।

पतिः᳚ । विश्व॑स्य । भूम॑नः । वि । अ॒ख्य॒त् । रोद॑सी॒ इति॑ ।
उ॒भे इति॑ ॥७

अयम् । पूषा । रयिः । भगः । सोमः । पुनानः । अर्षति ।

पतिः । विश्वस्य । भूमनः । वि । अख्यत् । रोदसी इति ।
उभे इति ॥७

“पूषा पोषकः सर्वेषां "भगः भजनीयः “रयिः धनहेतुः “अयं “सोमः “पुनानः पवित्रेण पूयमानः सन् “अर्षति कलशमभिगच्छति । तथा “विश्वस्य सर्वस्य “भूमनः

भूतजातस्य “पतिः पालयिता सोमः “उभे “रोदसी द्यावापृथिव्यौ “व्यख्यत् स्वतेजसा प्रकाशयति । अनेन लोकद्वयवर्तित्वं सूचितम् ॥

समु॑ प्रि॒या अ॑नूषत॒ गावो॒ मदा॑य॒ घृष्व॑यः ।

सोमा॑सः कृण्वते प॒थः पव॑मानास॒ इन्द॑वः ॥८

सम् । ऊ॒ं इति॑ । प्रि॒याः । अ॒नू॒ष॒त॒ । गावः॑ । मदा॑य । घृष्व॑यः ।

सोमा॑सः । कृ॒ण्व॒ते॒ । प॒थः । पव॑मानासः । इन्द॑वः ॥८

सम् । ऊं इति । प्रियाः । अनूषत । गावः । मदाय । घृष्वयः ।

सोमासः । कृण्वते । पथः । पवमानासः । इन्दवः ॥८

“प्रियाः प्रियतमाः “घृष्वयः अत्यन्तं दीप्ताः। यद्वा । अहं प्रथमतः स्तौमि अहं पुरस्तात् स्तौमीति परस्परं स्पर्धमानाः । "गावः स्तुतिलक्षणा वाचः सोमस्य मदार्थं “सम् “अनूषत संस्तुवन्ति । उः प्रसिद्धौ । यद्वा । गावो धेनवः सोमस्य मदाय शब्दायन्ते । ततः “पवमानासः पूयमानाः “इन्दवः दीप्ताः “सोमासः सोमाः “पथः मार्गान् “कृण्वते क्षरणार्थं कुर्वन्ति ।

य ओजिंष्ठ॒स्तमा भंर॒ पवंमान श्र॒वाय्यंम् ।

यः पञ्चं चर्ष॒णीर॒भि र॒यिं येन॒ वनांमहै ॥९

यः । ओजिंष्ठः । तम् । आ । भ॒र॒ । पवंमान । श्र॒वाय्यंम् ।

यः । पञ्चं । च॒र्ष॒णीः । अ॒भि । र॒यिम् । येनं । वनांमहै ॥९

यः । ओजिष्ठः । तम् । आ । भर । पवमान । श्रवाय्यम् ।

यः । पञ्च । चर्षणीः । अभि । रयिम् । येन । वनामहै ॥९

हे “पवमान पूयमान सोम “ओजिष्ठः ओजस्वितमः “यः त्वदीयो रसोऽस्ति “तं “श्रवाय्यं श्रवणीयं रसम् “आ “भर अस्मभ्यमाहर। किंच “यः रसः “पञ्च “चर्षणीः पञ्च जनान्निषादपञ्चमांश्चतुरो वर्णान् “अभि तिष्ठति । अपि च “येन रसेन वयं “रयिं धनं च “वनामहै संभजामहै । यद्वा । येन त्वां रयिं याचामहै तमा भर ॥

सोमा॑ः पवन्त॒ इन्द॑वो॒ऽस्मभ्यं॑ गातु॒वित्त॑माः ।

मि॒त्राः सु॑वा॒ना अ॑रे॒पसः॑ स्वा॒ध्यः॑ स्व॒र्विदः॑ ॥१०

सोमाः॑ । प॒व॒न्ते॒ । इन्द॑वः । अ॒स्मभ्य॑म् । गा॒तु॒वित्ऽत॑माः ।

मि॒त्राः । सु॒वा॒नाः । अ॒रे॒पसः॑ । सु॒ऽआ॒ध्यः॑ । स्व॒ःऽविदः॑ ॥
१०

सोमाः । पवन्ते । इन्दवः । अस्मभ्यम् । गातुवित्ऽतमाः ।

मित्राः । सुवानाः । अरेपसः । सुऽआध्यः । स्वःऽविदः ॥
१०

“गातुवित्तमाः अतिशयेन मार्गस्य लम्भकाः “इन्दवः दीप्ताः “सोमाः “पवन्ते “अस्मभ्यम् अस्मदर्थं क्षरन्त्यागच्छन्ति वा । कीदृशाः । “मित्राः देवानां सखिभूताः “सुवानाः अभिषूयमाणाः “अरेपसः पापरहिताः अत एव “स्वाध्यः शोभनध्यानाः “स्वर्विदः सर्वज्ञाः स्वर्गप्रापका वा ॥ ॥२॥

सु॒ष्वा॒णासो॒ व्यद्रि॑भि॒श्चिता॑ना॒ गोरधि॑ त्व॒चि ।

इषं॑म॒स्मभ्यं॑म॒भित॒ः सम॑स्वरन्वसु॒विदः॑ ॥११

सु॒स्वा॒नासः॑ । वि । अद्रिं॑ऽभिः । चिता॑नाः । गोः । अधिं । त्व॒चि ।

इषं॑म् । अ॒स्मभ्यं॑म् । अ॒भितः॑ । सम् । अ॒स्व॒र॒न् । व॒सु॒ऽविदः॑ ॥११

सुस्वानासः । वि । अद्रिऽभिः । चितानाः । गोः । अधि । त्वचि ।

इषम् । अस्मभ्यम् । अभितः । सम् । अस्वरन् । वसुऽविदः ॥११

“गोः अनडुहः “अधि “त्वचि अधिषवणचर्मणि “चितानाः ज्ञायमानाः "अद्रिभिः ग्रावभिर्विविधं “सुष्वाणासः सूयमानाः “वसुविदः वसुनो लम्भका एते सोमाः “अस्मभ्यम् “इषम् अन्नम् “अभितः “समस्वरन् सम्यक् शब्दयन्ति । प्रयच्छन्तीति यावत् ॥

ए॒ते पू॒ता वि॑प॒श्चित॒ः सोमा॑सो॒ दध्या॑शिरः ।

सूर्या॑सो॒ न द॑र्श॒तासो॑ जिग॒त्नवो॑ ध्रु॒वा घृ॒ते ॥१२

ए॒ते । पू॒ताः । वि॒प॒ःऽचित॑ः । सोमा॑सः । दधि॑ऽआशिरः ।

सूर्या॑सः । न । द॒र्श॒तास॑ः । जि॒ग॒त्नव॑ः । ध्रु॒वाः । घृ॒ते ॥१२

एते । पूताः । विपःऽचितः । सोमासः । दधिऽआशिरः ।

सूर्यासः । न । दर्शतासः । जिगत्नवः । ध्रुवाः । घृते ॥१२

“पूताः पवित्रेण परिपूताः “विपश्चितः मेधाविनः “दध्याशिरः दध्यामिश्रणाः “घृते वसतीवर्याख्य उदके “जिगत्नवः गमनशीलाः “ध्रुवाः तत्र स्थैर्येण वर्तमानाः “एते “सोमासः सोमाः “सूर्यासो “न सूर्या इव “दर्शतासः पात्रेषु सर्वैर्दर्शनीया भवन्ति ।

प्र सुं॒न्वा॒नस्यांधंसो॒ मर्तो॒ न वृं॒त तद्वचः॑ ।

अप॒ श्वानंमरा॒धसं॑ ह॒ता म॒खं न भृगंवः ॥१३

प्र । सु॒न्वा॒नस्यं । अन्धंसः । मर्तः॑ । न । वृ॒त॒ । तत् । वचः॑ ।

अपं । श्वानंम् । अ॒रा॒धसंम् । ह॒त । म॒खम् । न । भृगंवः ॥
१३

प्र । सुन्वानस्य । अन्धसः । मर्तः । न । वृत । तत् । वचः ।

अप । श्वानम् । अराधसम् । हत । मखम् । न । भृगवः ॥
१३

“सुन्वानस्य अभिषूयमाणस्य “अन्धसः अदनीयस्य सोमस्य “तत् प्रसिद्धं “वचः वचनं घोषं “मर्तः मारकः कर्मविघ्नकारी श्वा “न “प्र “वृत न भजताम् । न

शृणोत्विति यावत् । तथा हे स्तोतारः “अराधसं संसाधककर्मरहितं तं “श्वानम् “अप “हत । तत्र दृष्टान्तः । "मखं “न । यथा पुरापराद्धं मखमेतन्नामानं "भृगवः अपहतवन्तः तथापहतेत्यर्थः ।।

आ जा॒मिरत्के॑ अव्यत भु॒जे न पु॒त्र ओ॒ण्यो॑ः ।

सर॑ज्जा॒रो न योषं॑णां व॒रो न योनिं॑मा॒सदं॑ ॥१४

आ । जा॒मिः । अत्के॑ । अ॒व्य॒त॒ । भु॒जे । न । पु॒त्रः । ओ॒ण्यो॑ः ।

सर॑त् । जा॒रः । न । योषं॑णाम् । व॒रः । न । योनि॑म् । आ॒ऽसदं॑म् ॥१४

आ । जामिः । अत्के । अव्यत । भुजे । न । पुत्रः । ओण्योः ।

सरत् । जारः । न । योषणाम् । वरः । न । योनिम् । आऽसदम् ॥१४

"जामिः बन्धुभूतो देवानां सोमः "अत्के आच्छादके पवित्रे “आ “अव्यत आवृणोति । संबद्धो भवति । तत्र दृष्टान्तः । “भुजे “न यथा “ओण्योः रक्षकयोर्मात्रापित्रोः भुजे “पुत्रः आवृणोति तद्वत् । ततः सोऽयं सोमः “योनिं स्वस्थानभूतं कलशम् “आसदम् आसत्तुं "सरत् सरति । तत्र दृष्टान्तद्वयम् । “जारो “न यथा जारः “योषणाम् असतीं स्त्रियं प्राप्तुं सरति । यथा वा “वरः कन्यां प्राप्तुं गच्छति तद्वत् ॥

स वी॒रो द॑क्ष॒साध॑नो॒ वि यस्त॒स्तम्भ॒ रोद॑सी ।

हरि॑: प॒वित्रे॑ अव्यत वे॒धा न योनि॑मा॒सद॑ ॥१५

सः । वी॒रः । द॒क्ष॒ऽसाध॑नः । वि । यः । त॒स्तम्भ॑ । रोद॑सी॒ इति॑ ।

हरिः॑ । प॒वित्रे॑ । अ॒व्य॒त॒ । वे॒धाः । न । योनि॑म् । आ॒ऽसद॑म् ॥१५

सः । वीरः । दक्षऽसाधनः । वि । यः । तस्तम्भ । रोदसी इति ।

हरिः । पवित्रे । अव्यत । वेधाः । न । योनिम् । आऽसदम् ॥१५

“दक्षसाधनः बलसाधनः “सः सोमः “वीरः समर्थो भवति । “यः सोमः "रोदसी द्यावापृथिव्यौ “वि “तस्तम्भ स्वतेजसा व्यस्तभ्नात् । आच्छादयतीत्यर्थः । किंच “हरिः हरितवर्णः सोमः "वेधा “न विधाता यजमानो यथा स्वगृहमासीदति

तद्वत् “योनिं स्वस्थानं कलशम् “आसदम् आसत्तुं पवित्रे “अव्यत आवृणोति । संबद्धो भवति ॥

अव्यो॒ वारे॑भिः पवते॒ सोमो॒ गव्ये॒ अधि॑ त्व॒चि ।

कनि॑क्रद॒द्वृषा॒ हरि॒रिन्द्र॑स्या॒भ्ये॑ति निष्कृ॒तं ॥१६

अव्यः॑ । वारे॑भिः । प॒व॒ते॒ । सोमः॑ । गव्ये॑ । अधि॑ । त्व॒चि ।

कनि॑क्रदत् । वृषा॑ । हरिः॑ । इन्द्र॑स्य । अ॒भि । ए॒ति॒ ।
नि॒ःऽकृ॒तम् ॥१६

अव्यः । वारेभिः । पवते । सोमः । गव्ये । अधि । त्वचि ।

कनिक्रदत् । वृषा । हरिः । इन्द्रस्य । अभि । एति ।
निःऽकृतम् ॥१६

अयं “सोमः “अव्यः अवेः “वारेभिः वालैः पवित्रैः तेभ्यः “पवते कलशं प्रति क्षरति । किंच “गव्ये आनडुहे “अधि “त्वचि चर्मणि “कनिक्रदत् शब्दायमानः “वृषा कामानां वर्षकः “हरिः हरितवर्णः सोमः “इन्द्रस्य स्वभूतं “निष्कृतं संस्कृतं स्थानम् “अभ्येति अभिगच्छति ॥ ॥ ३ ॥

टिप्पणी

९.१०१.१ पुरोजिती वो इति

द्र. अर्चनाना-पुत्र श्यावाश्वोपरि आख्यानम् (https://sa.wikisource.org/s/13zk) ,

श्यावाश्वम् (https://sa.wikisource.org/s/1z6b) ,

आन्धीगवम् (https://sa.wikisource.org/s/1z6c) ,

रौद्रम् (https://sa.wikisource.org/s/28qk)

कार्तयशम् (https://sa.wikisource.org/s/2hlu)

श्यावशबलयोरुपरि टिप्पणी (http://vipin110012.tripod.com/pur_index28/shyavashabala.htm)

त्रीणि यज्ञे ऽन्धांसीति ह स्म पूर्वे ब्राह्मणा मीमांसन्ते उच्चा ते जातम् अन्धसा॥ वसोर् मन्दानम् अन्धसः॥ पुरोजिती वो अन्धसः इति। त्रयः पशुषु भोगाः प्रातर् मध्यंदिने सायम्। तान्

एवैतेनावरुन्द्धे॥ - जैब्रा. १.११६ (https://sa.wikisource.org/s/eh9)

९.१०१.४ सुतासो मधुमत्तमाः इति

द्र. साम ८७२ (https://sa.wikisource.org/s/3kg) , त्र्यन्तं त्वाष्ट्रीसाम (https://sa.wikisource.org/s/1z9f) , गौरीवितम् (https://sa.wikisource.org/s/1zbq) इत्यादि।

९.१०१.७ अयं पूषा इति।

पूषाशब्दोपरि टिप्पणी (https://puranastudy.webnode.com/puurnamaasa-prithu/pusha/) पठनीयः अस्ति। शूक्लयजुर्वेदे ८.५४

कथनमस्ति यत् यावत् क्रीयमाणः सोमः सोमक्रयण्यां गवां वसति, तावत् अस्य संज्ञा पूषा अस्ति। अस्य पूष्णः सोमस्य द्विर्विभाजनं भविष्यति। एकः भागः रयिः भविष्यति। उपनिषदानुसारेण एकः प्राणः अस्ति, एकः रयिः। एकः सूर्यः अस्ति, एकः चन्द्रमा। रयिशब्दोपरि टिप्पणी (http://vedastudy.tripod.com/pur_index25/rayi.htm) पठनीयः अस्ति। भगशब्दविषये भगोपरि टिप्पणी (http://puranastudy.ultimatefreehost.in/pur_index21/bhaga.htm) पठनीयः अस्ति। कर्मकाण्डे ग्रावस्तुत् ऋत्विक् भगदेवत्यः भवति (तांब्रा. २५.१८.४ (https://sa.wikisource.org/s/tvs))। ग्रावस्तुत् ऋत्विक् विषस्य अपनयनं कर्तुं शक्नोति। भगस्य वर्धनं भर्गरूपे, सूर्यरूपे भविष्यति।

द्र. गौरीवितम् (https://sa.wikisource.org/s/1z9x) गौरीवितम् (https://sa.wikisource.org/s/1zx3)

द्र. क्रौञ्चानि त्रीणि (https://sa.wikisource.org/s/258o)

द्र. तृतीयं क्रौञ्चम् (https://sa.wikisource.org/s/1z9r)

भर्गः (https://sa.wikisource.org/s/2lls)

बैदत्रिरात्राणि -- अयं पूषा रयिर्भग (सा० ८१८-१०) इति दीर्घतमसोऽर्कः (र० ३. २. ११) - आर्षेयकल्पः पृ. ३२५ (https://sa.wikisource.org/s/1av4)

९.१०१.१० सोमाः पवन्त इन्दवो इति।

मधुश्च्युन्निधनम् (https://sa.wikisource.org/s/1z89)

वाङ्निधनं क्रौञ्चम् (https://sa.wikisource.org/s/1z8b)

९.१०१.१३ प्र सुन्वानाय अन्धस इति

गौरीवितम् (https://sa.wikisource.org/s/1za4)

औदलम् (https://sa.wikisource.org/s/2kos)

मण्डल ९

सूक्तं ९.११ सूक्तं ९.४१ सूक्तं ९.७१ सूक्तं ९.१०१

सूक्तं ९.१२ सूक्तं ९.४२ सूक्तं ९.७२ सूक्तं ९.१०२

सूक्तं ९.१३ सूक्तं ९.४३ सूक्तं ९.७३ सूक्तं ९.१०३

सूक्तं ९.१४ सूक्तं ९.४४ सूक्तं ९.७४ सूक्तं ९.१०४

सूक्तं ९.१५ सूक्तं ९.४५ सूक्तं ९.७५ सूक्तं ९.१०५

सूक्तं ९.१६ सूक्तं ९.४६ सूक्तं ९.७६ सूक्तं ९.१०६

सूक्तं ९.१७ सूक्तं ९.४७ सूक्तं ९.७७ सूक्तं ९.१०७

सूक्तं ९.१८ सूक्तं ९.४८ सूक्तं ९.७८ सूक्तं ९.१०८

सूक्तं ९.१९ सूक्तं ९.४९ सूक्तं ९.७९ सूक्तं ९.१०९

सूक्तं ९.२० सूक्तं ९.५० सूक्तं ९.८० सूक्तं ९.११०

सूक्तं ९.२१ सूक्तं ९.५१ सूक्तं ९.८१ सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.१०२

ऋग्वेदः - मण्डल ९
← सूक्तं ९.१०१
सूक्तं ९.१०२
त्रित आप्त्यः।
सूक्तं ९.१०३ →

दे. पवमानः सोमः। उष्णिक्।

क्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम् ।

विश्वा परि प्रिया भुवदध द्विता ॥१॥

उप त्रितस्य पाष्योरभक्त यद्गुहा पदम् ।

यज्ञस्य सप्त धामभिरध प्रियम् ॥२॥

त्रीणि त्रितस्य धारया पृष्ठेष्वेरया रयिम् ।

मिमीते अस्य योजना वि सुक्रतुः ॥३॥

जज्ञानं सप्त मातरो वेधामशासत श्रिये ।

अयं ध्रुवो रयीणां चिकेत यत् ॥४॥

अस्य व्रते सजोषसो विश्वे देवासो अद्रुहः ।

स्पार्हा भवन्ति रन्तयो जुषन्त यत् ॥५॥

यमी गर्भमृतावृधो दृशे चारुमजीजनन् ।

कविं मंहिष्ठमध्वरे पुरुस्पृहम् ॥६॥

समीचीने अभि त्मना यह्वी ऋतस्य मातरा ।

तन्वाना यज्ञमानुषग्यदञ्जते ॥७॥

क्रत्वा शुक्रेभिरक्षभिरृणोरप व्रजं दिवः ।

हिन्वन्नृतस्य दीधितिं प्राध्वरे ॥८॥

सायणभाष्यम्

'क्राणा शिशुः' इत्यष्टर्चं षष्ठं सूक्तमाप्त्स्य त्रितस्यार्षम् । इदमुत्तराणि चत्वारि सूक्तान्यौष्णिहानि । पवमानः सोमो

देवता। तथा चानुक्रम्यते- क्राणाष्टौ त्रित औष्णिहं वै' इति । गतो विनियोगः ॥

क्रा॒णा शिशु॑र्म॒हीनां॑ हि॒न्वन्नृ॒तस्य॒ दीधि॑तिम् ।

विश्वा॒ परि॑ प्रि॒या भु॑व॒दध॑ द्वि॒ता ॥१

क्रा॒णा । शिशुः॑ । म॒हीना॑म् । हि॒न्वन् । ऋ॒तस्य॑ । दीधि॑तिम् ।

विश्वा॑ । परि॑ । प्रि॒या । भु॒व॒त् । अध॑ । द्वि॒ता ॥१

क्राणा । शिशुः । महीनाम् । हिन्वन् । ऋतस्य । दीधितिम् ।

विश्वा । परि । प्रिया । भुवत् । अध । द्विता ।। १ ।।

“क्राणा। करोतेः शानचि ‘बहुलं छन्दसि ' इति विकरणस्य लुक् । ‘सुपां सुलुक् इति सुप आकारादेशः । यज्ञं कुर्वाणः “महीनां महतीनां मंहनीयानां वा अपां “शिशुः पुत्रस्थानीयः सोमः “ऋतस्य यज्ञस्य “दीधितिं प्रकाशकं धारकं वा स्वीयं रसं “हिन्वन् प्रेरयन् “विश्वा सर्वाणि “प्रिया प्रियाणि हवींषि “परि “भुवत् परिभवति व्याप्नोति । “अध अपि च "द्विता द्विधा भवति । दिवि च पृथिव्यां च वर्तत इत्यर्थः ॥

उपं त्रि॒तस्यं पा॒ष्यो॒३॒रभंक्त॒ यद्गुहां प॒दम् ।

य॒ज्ञस्यं स॒प्त धामंभि॒रधं प्रि॒यम् ॥२

उपं । त्रि॒तस्यं । पा॒ष्योः॑ । अभंक्त । यत् । गुहां । प॒दम् ।

य॒ज्ञस्यं । स॒प्त । धामंऽभिः । अधं । प्रि॒यम् ॥२

उप । त्रितस्य । पाष्योः । अभक्त । यत् । गुहा। पदम् ।

यज्ञस्य । सप्त । धामऽभिः । अध । प्रियम् ॥ २ ॥

“त्रितस्य मम यज्ञे “गुहा गुहायां हविर्धाने वर्तमानयोः “पाष्योः पाषाणवद्दृढयोरधिषवणफलकयोः “पदं स्थानं सोमः “यत् यदा "उप “अभक्त समभजत “अध अनन्तरं “यज्ञस्य “धामभिः धारकैः “सप्त सप्तभिश्छन्दोभिर्गायत्र्यादिभिः “प्रियं प्रीणयितारं सोममभिष्टुबन्ति ऋत्विजः । अपि वा । सप्त सर्पणशीलैर्वसतीवर्यादिभिरुदकैः सोममभिषुण्वन्ति ॥

त्रीणिं त्रि॒तस्य॒ धारंया पृ॒ष्ठेष्वेरंया र॒यिम् ।

मिमींते अस्य॒ योजंना॒ वि सु॒क्रतुः॑ ॥३

त्रीणिं । त्रि॒तस्यं । धारंया । पृ॒ष्ठेषुं । आ । ई॒र॒य॒ । र॒यिम् ।

मिमींते । अ॒स्य॒ । योजं॑ना । वि । सु॒ऽक्रतुः॑ ॥३

त्रीणि । त्रितस्य । धारया । पृष्ठेषु । आ । ईरय । रयिम् ।

मिमीते । अस्य । योजना । वि । सुऽक्रतुः ।। ३ ।।

हे सोम "त्रितस्य मम यज्ञस्य स्वभूतानि “त्रीणि सवनानि “धारया आत्मीयया विधारय । किंच "पृष्ठेषु सामसु रयिं दातारमिन्द्रम् “आ “ईरय आगमय । “सुक्रतुः सुप्रज्ञः स्तोता “अस्य इन्द्रस्य “योजना योजनानि योजनकारीणि स्तोत्राणि "वि “मिमीते करोति । यस्मादेवं तस्मादिन्द्रं सामसु प्रेरयेत्यर्थः ॥

ज॒ज्ञा॒नं स॒प्त मा॒तरों वे॒धामंशासत श्रि॒ये ।

अ॒यं ध्रु॒वो रं॑यी॒णां चिकें॑त॒ यत् ॥४

ज॒ज्ञा॒नम् । स॒प्त । मा॒तरः॑ । वे॒धाम् । अ॒शा॒स॒त॒ । श्रि॒ये ।

अ॒यम् । ध्रु॒वः । र॒यी॒णाम् । चिके॑त । यत् ॥४

जज्ञानम् । सप्त । मातरः । वेधाम् । अशासत । श्रिये ।

अयम् । ध्रुवः। रयीणाम् । चिकेत । यत् ॥४॥

"जज्ञानं प्रादुर्भूतं "वेधां कर्मणो विधातारं सोमं “सप्त सप्तसंख्याकाः “मातरः गङ्गाद्या नद्यः सप्त छन्दांसि वा "श्रिये यजमानानामैश्वर्यार्थम् “अशासत अनुशासति अनुशासनं कुर्वन्ति । शास्तेर्लङि व्यत्ययेनात्मनेपदम् । “यत् यस्मात् “ध्रुवः “अयं सोमः “रयीणां धनानि “चिकेत जानाति तस्मादस्यानुशासने कृते यजमानानां धनादिसमृद्धिर्भवति ॥

अ॒स्य व्र॒ते स॒जोष॑सो॒ विश्वे॑ दे॒वासो॑ अ॒द्रुहः॑ ।

स्पा॒र्हा भ॑वन्ति॒ रन्त॑यो जु॒षन्त॒ यत् ॥५

अ॒स्य । व्र॒ते । स॒ऽजोष॑सः । विश्वे॑ । दे॒वासः॑ । अ॒द्रुहः॑ ।

स्पा॒र्हाः । भ॒व॒न्ति॒ । रन्त॑यः । जु॒षन्त॑ । यत् ॥५

अस्य । व्रते । सऽजोषसः । विश्वे । देवासः। अद्रुहः।

स्पार्हाः। भवन्ति। रन्तयः। जुषन्त । यत्॥५॥

“अद्रुहः द्रोहवर्जिताः "विश्वे सर्वे “देवासः देवाः “अस्य सोमस्य “व्रते कर्मणि “सजोषसः संगताः सन्तः "स्पार्हाः स्पृहणीयाः “भवन्ति । “रन्तयः रमणशीला देवाः सुतमेनं सोमं “यत् यदि “जुषन्त सेवन्ते तर्हि स्पृहणीया भवन्ति ॥ ॥ ४ ॥

यमी॒ गर्भ॑मृता॒वृधो॑ दृ॒शे चारु॒मजी॑जनन् ।

क॒विं मंहिं॑ष्ठमध्व॒रे पु॑रु॒स्पृह॑म् ॥६

यम् । ई॒मिति॑ । गर्भ॑म् । ऋ॒त॒ऽवृधः॑ । दृ॒शे । चारु॑म् ।
अजी॑जनन् ।

क॒विम् । मंहि॑ष्ठम् । अ॒ध्व॒रे । पु॒रु॒ऽस्पृह॑म् ॥६

यम् । ईमिति । गर्भम् । ऋतऽवृधः । दृशे । चारुम् ।
अजीजनन् ।

कविम् । मंहिष्ठम् । अध्वरे । पुरुऽस्पृहम् ॥ ६ ॥

"ऋतावृधः यज्ञस्य वर्धयित्र्यो वसतीवर्याख्या आपः "गर्भं गर्भस्थानीयम् "ईम् एनं "यं सोमम् "अध्वरे यज्ञे "दृशे दर्शनाय "अजीजनन् उदपादयन् । कीदृशम् । "चारुं सर्वेषां कल्याणरूपं "कविं क्रान्तप्रज्ञं "मंहिष्ठं पूज्यतमं दातृतमं वा अत एव "पुरुस्पृहं बहुभिः स्पृहणीयं सोमं देवाः सेवन्त इति पूर्वेण समन्वयः ॥

स॒मी॒ची॒ने अ॒भि त्मनां य॒ह्वी ऋ॒तस्यं मा॒तरां ।

त॒न्वा॒ना य॒ज्ञमांनु॒षग्यदंञ्ज॒ते ॥७

स॒मी॒ची॒ने इतिं स॒म्ऽई॒ची॒ने । अ॒भि । त्मनां । य॒ह्वी इतिं । ऋ॒तस्यं । मा॒तरां ।

त॒न्वा॒नाः । य॒ज्ञम् । अ॒नु॒षक् । यत् । अ॒ञ्ज॒ते ॥७

समीचीने इति सम्ऽईचीने । अभि । त्मना । यह्वी इति । ऋतस्य । मातरा ।

तन्वानाः । यज्ञम् । आनुषक् । यत् । अञ्जते ॥ ७ ॥

स सोमः "समीचीने परस्परं संगते "यह्वी महत्यौ "ऋतस्य यज्ञस्य "मातरा निर्मात्र्यौ द्यावापृथिव्यौ "त्मना आत्मना स्वयमेव तदा "अभि गच्छति। "यत् यदा "यज्ञं "तन्वानाः

अध्वर्यवः “आनुषक् अनुषक्तं वसतीवरीभिः “अञ्जते सोमं मिश्रयन्ति तदा स्वयमभिगच्छति ॥

क्रत्वा॑ शु॒क्रेभि॑र॒क्षभि॑रृ॒णोरप॑ व्र॒जं दि॒वः ।

हि॒न्वन्नृ॒तस्य॒ दीधि॑तिं॒ प्राध्व॒रे ॥८

क्रत्वा॑ । शु॒क्रेभिः॑ । अ॒क्षऽभिः॑ । ऋ॒णोः । अप॑ । व्र॒जम् । दि॒वः ।

हि॒न्वन् । ऋ॒तस्य॑ । दीधि॑तिम् । प्र । अ॒ध्व॒रे ॥८

क्रत्वा । शुक्रेभिः । अक्षऽभिः । ऋणोः । अप । व्रजम् । दिवः ।।

हिन्वन् । ऋतस्य । दीधितिम् । प्र । अध्वरे ।। ८ ॥

हे सोम त्वं “क्रत्वा कर्मणा ज्ञानेन वा “शुक्रेभिः शुक्रैर्दीप्यमानैः "अक्षभिः अक्षैरिन्द्रियैरिवाश्नुवानैः स्वतेजोभिः “व्रजम् अन्धकारसमूहं “दिवः अन्तरिक्षात् "अप “ऋणोः अपगमय विनाशय । ऋणु गतौ' । तानादिकः । किं कुर्वन् । “अध्वरे हिंसारहिते यज्ञे “ऋतस्य यज्ञस्य "दीधितिं धारकं स्वीयं रसं “प्र “हिन्वन् प्रेरयन् । अनेन लोकद्वयवर्तित्वमभिहितम् ॥ ॥ ५ ॥

टिप्पणी

९.१०२.१ प्राणा शिशुर्महीनां इति

त्रैतम् (https://sa.wikisource.org/s/2ho8)

क्रोशम् (https://sa.wikisource.org/s/1z8p)

मण्डल ९

सूक्तं ९.३१सूक्तं ९.४१सूक्तं ९.७१सूक्तं ९.१०१

सूक्तं ९.३२सूक्तं ९.४२सूक्तं ९.७२सूक्तं ९.१०२

सूक्तं ९.३३सूक्तं ९.४३सूक्तं ९.७३सूक्तं ९.१०३

सूक्तं ९.३४सूक्तं ९.४४सूक्तं ९.७४सूक्तं ९.१०४

सूक्तं ९.३५सूक्तं ९.४५सूक्तं ९.७५सूक्तं ९.१०५

सूक्तं ९.३६सूक्तं ९.४६सूक्तं ९.७६सूक्तं ९.१०६

सूक्तं ९.३७सूक्तं ९.४७सूक्तं ९.७७सूक्तं ९.१०७

सूक्तं ९.३८सूक्तं ९.४८सूक्तं ९.७८सूक्तं ९.१०८

सूक्तं ९.३९सूक्तं ९.४९सूक्तं ९.७९सूक्तं ९.१०९

सूक्तं ९.२०सूक्तं ९.५०सूक्तं ९.८०सूक्तं ९.११०

सूक्तं ९.२१सूक्तं ९.५१सूक्तं ९.८१सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.१०३

दे. पवमानः सोमः। उष्णिक्

प्र पुनानाय वेधसे सोमाय वच उद्यतम् ।

भृतिं न भरा मतिभिर्जुजोषते ॥१॥

परि वाराण्यव्यया गोभिरञ्जानो अर्षति ।

त्री षधस्था पुनानः कृणुते हरिः ॥२॥

परि कोशं मधुश्चुतमव्यये वारे अर्षति ।

अभि वाणीरृषीणां सप्त नूषत ॥३॥

परि णेता मतीनां विश्वदेवो अदाभ्यः ।

सोमः पुनानश्चम्वोर्विशद्धरिः ॥४॥

परि दैवीरनु स्वधा इन्द्रेण याहि सरथम् ।

पुनानो वाघद्वाघद्भिरमर्त्यः ॥५॥

परि सप्तिर्न वाजयुर्देवो देवेभ्यः सुतः ।

व्यानशिः पवमानो वि धावति ॥६॥

सायणभाष्यम्

‘प्र पुनानाय' इति षडृचं सप्तमं सूक्तमाप्त्यस्य द्वितस्यार्षम्। पूर्ववच्छन्दोदेवते । तथा चानुक्रम्यते-‘प्र पुनानाय षड् द्वित आप्त्यः' इति । गतो विनियोगः ॥

प्र पुंना॒नायं वे॒धसे॒ सोमां॑य॒ वच॒ उद्यंतम् ।

भृ॒तिं न भंरा म॒तिभि॒र्जुजोंषते ॥१

प्र । पु॒ना॒नायं । वे॒धसें । सोमांय । वचः॑ । उत्ऽयंतम् ।

भृ॒तिम् । न । भ॒र॒ । म॒तिऽभिः॑ । जुजोंषते ॥१

प्र । पुनानाय । वेधसे । सोमाय । वचः । उत्ऽयतम् ।।

भृतिम् । न । भर । मतिऽभिः । जुजोषते ॥ १ ॥

द्वितो नामर्षिः स्वात्मानं प्रत्याह। “पुनानाय पवित्रेण पूयमानाय "वेधसे कर्मणो विधात्रे “मतिभिः स्तुतिभिः “जुजोषते प्रीयमाणाय । यद्वा मतिभिः स्तोतृभिः सह जुजोषते प्रीणयित्रे । “सोमाय "उद्यतम् उद्युक्तं वचः “प्र

“भर प्रकर्षेण संपादय । अभिष्टुहीत्यर्थः । तत्र दृष्टान्तः । "भृतिं “न । यथा भृतका भृतिं संपादयन्ति तद्वत् ॥

परि॒ वारां॑ण्य॒व्यया॒ गोभिं॑रञ्जा॒नो अं॑र्षति ।

त्री ष॒धस्था॑ पुना॒नः कृं॑णुते॒ हरिः॑ ॥२

परिं । वारां॑णि । अ॒व्यया॑ । गोभिः॑ । अ॒ञ्जा॒नः । अ॒र्ष॒ति॒ ।

त्री । स॒धऽस्था॑ । पु॒ना॒नः । कृ॒ण॒ुते॒ । हरिः॑ ॥२

परि । वाराणि । अव्यया । गोभिः । अञ्जानः । अर्षति ।।

त्री । सधऽस्था । पुनानः । कृणुते । हरिः ॥ २ ॥

“गोभिः गोविकारैः क्षीरादिभिः अञ्जानः अज्यमानः सोमः “अव्यया अविमयानि "वाराणि वालानि पवित्राणि

"परि “अर्षति परिगच्छति । अपि च “हरिः हरितवर्णः सोमः पुनानः पूयमानः सन् “त्री त्रीणि सधस्था। सह तिष्ठन्यत्रेति सधस्थं स्थानम् । द्रोणकलशाधवनीयपूतभृदात्मकानि त्रीणि स्थानानि "कृणुते करोति ॥

परि॒ कोशं॑ मधु॒श्चुतं॑म॒व्यये॒ वारे॑ अर्षति ।

अ॒भि वाणी॒रृषी॑णां स॒प्त नूं॑षत ॥३

परि॑ । कोशं॑म् । म॒धु॒ऽश्चुतं॑म् । अ॒व्यये॑ । वारे॑ । अ॒र्ष॒ति॒ ।

अ॒भि । वाणीः॑ । ऋषीं॑णाम् । स॒प्त । नू॒ष॒त॒ ॥३

परि । कोशम् । मधुऽश्चुतम् । अव्यये । वारे । अर्षति ।।

अभि । वाणीः । ऋषीणाम् । सप्त । नूषत ।। ३ ॥

स सोमः "अव्यये अविमये “वारे वाले पवित्रे “मधुश्चतं मधुररसस्य च्यावयितारं द्रोणकलशं प्रत्यात्मीयं रसं “परि “अर्षति गमयति । तमिमं सोमं “ऋषीणां “सप्त वाणीः छन्दांसि "अभि “नूषत अभिष्टुवन्ति । ‘नू स्तवने' । कुटादिः ॥

परि॑ णे॒ता म॑ती॒नां वि॒श्वदे॑वो॒ अदा॑भ्यः ।

सोमः॑ पुना॒नश्च॒म्वो॑र्विश॒द्धरिः॑ ॥४

परि॑ । ने॒ता । म॒ती॒नाम् । वि॒श्वऽदे॑वः । अदा॑भ्यः ।

सोमः॑ । पु॒ना॒नः । च॒म्वोः॑ । वि॒श॒त् । हरिः॑ ॥४

परि। नेता। मतीनाम् । विश्वऽदेवः । अदाभ्यः ।

सोमः । पुनानः । चम्वोः । विशत् । हरिः॥४॥

हरिः हरितवर्णः सः सोमः पुनानः पूयमानः सन् “चम्वोः अधिषवणफलकयोः परि “विशत् परिविशति । कीदृशः । "मतीनां स्तुतीनां नेता यद्वा मतीनां स्तोतॄणां स्वकर्मण्युपनेता “विश्वदेवः सर्वदेवः । सोमेऽभिषूयमाणे सतीन्द्रादयः सर्वे देवाः सोमं प्रत्यागच्छन्ति खलु । तस्मात् सर्वदेवोपेतः अत एव “अदाभ्यः अहिंसितः कैश्चिदपि ॥

परि॒ दैवी॒रनु॑ स्व॒धा इन्द्रे॑ण याहि स॒रथ॑म् ।

पु॒ना॒नो वा॒घद्वा॒घद्भि॒रम॑र्त्यः ॥५

परि॑ । दैवीः॑ । अनु॑ । स्व॒धाः । इन्द्रे॑ण । या॒हि॒ । स॒ऽरथ॑म् ।

पु॒ना॒नः । वा॒घत् । वा॒घत्ऽभिः॑ । अम॑र्त्यः ॥५

परि। दैवीः । अनु । स्वधाः । इन्द्रेण । याहि। सऽरथम् ।

पुनानः। वाघत्। वाघत्ऽभिः।अमर्त्यः॥५॥

हे सोम त्वम् इन्द्रेण सरथं समानं रथमारुह्य दैवीः देवानां संबन्धीनि स्वधाः बलानि “अनु देवसेनाः “परि “याहि परिगच्छ । कीदृशः। “पुनानः पूयमानः “वाघद्भिः । वाघत इति ऋत्विङ्नाम । हविषां प्रेरकैर्ऋत्विग्भिः "वाघत् ऊह्यमानः “अमर्त्यः मनुष्यधर्मरहितः । यद्वा। वाघद्भिर्ऋत्विग्भिः पुनानः पूयमानो वाघत् स्तोतॄणां यष्टॄणां धनादीनि प्रापयन् परिगच्छ ।

परि॒ सप्ति॒र्न वा॑ज॒युर्दे॒वो दे॒वेभ्यः॑ सु॒तः ।

व्या॒न॒शिः पव॑मानो॒ वि धा॑वति ॥६

परि॑ । सप्तिः॑ । न । वा॒ज॒ऽयुः । दे॒वः । दे॒वेभ्यः॑ । सु॒तः ।

वि॒ऽआ॒न॒शिः । पव॑मानः । वि । धा॒व॒ति॒ ॥६

परि । सप्तिः । न । वाजऽयुः । देवः । देवेभ्यः । सुतः ।

विऽआनशिः । पवमानः। वि। धावति॥६॥

“सप्तिर्न अश्व इव “वाजयुः युद्धमिच्छन् "देवः दीप्यमानः “देवेभ्यः देवार्थं "सुतः अभिषुतः “व्यानशिः पात्रेषु व्यापी “पवमानः पवित्रेण पूयमानः एतादृशः सोमः “परि “धावति परितः पात्राण्यभिगच्छति ॥ व्यानशिः। ‘अशू व्याप्तौ'। ‘आदृगमहन' इत्यत्र उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' इति किप्रत्ययः । अश्नोतेश्च' इति नुडागमः ॥ ॥ ६ ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.१०४

ऋग्वेदः - मण्डल ९

← सूक्तं ९.१०३ सूक्तं ९.१०४ सूक्तं ९.१०५ →

पर्वतनारदौ काण्वौ, काश्यप्यौ शिखण्डिन्यावप्सरसौ वा।

दे. पवमानः सोमः। उष्णिक्।

सखाय आ नि षीदत पुनानाय प्र गायत ।

शिशुं न यज्ञैः परि भूषत श्रिये ॥१॥

समी वत्सं न मातृभिः सृजता गयसाधनम् ।

देवाव्यं मदमभि द्विशवसम् ॥२॥

पुनाता दक्षसाधनं यथा शर्धाय वीतये ।

यथा मित्राय वरुणाय शंतमः ॥३॥

अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत ।

गोभिष्टे वर्णमभि वासयामसि ॥४॥

स नो मदानां पत इन्दो देवप्सरा असि ।

सखेव सख्ये गातुवित्तमो भव ॥५॥

सनेमि कृध्यस्मदा रक्षसं कं चिदत्रिणम् ।

अपादेवं द्वयुमंहो युयोधि नः ॥६॥

सायणभाष्यम्

सप्तमेऽनुवाक एकादश सूक्तानि । तत्र ‘ सखायः' इति षड़ृचं प्रथमं सूक्तम् । काण्वौ पर्वतनारदावृषी । अथवा कश्यपस्य पुत्र्यौ शिखण्डिन्याख्ये द्वे अप्सरसावस्य सूक्तस्य दृष्ट्यौ । पूर्ववच्छन्दोदेवते। तथा चानुक्रम्यते-

सखायः पर्वतनारदौ काश्यप्यौ द्वे शिखण्डिन्यौ वाप्सरसौ ' इति । गतः सूक्तविनियोगः ॥

सखा॑य॒ आ नि षी॑दत पुना॒नाय॒ प्र गा॑यत ।

शिशुं॒ न य॒ज्ञैः परि॑ भूषत श्रि॒ये ॥१

सखा॑यः । आ । नि । सी॒द॒त॒ । पु॒ना॒नाय॑ । प्र । गा॒य॒त॒ ।

शिशु॑म् । न । य॒ज्ञैः । परि॑ । भू॒ष॒त॒ । श्रि॒ये ॥१

सखायः । आ । नि । सीदत । पुनानाय । प्र । गायत ।

शिशुम् । न । यज्ञैः । परि । भूषत । श्रिये ॥१

हे “सखायः सखिभूताः स्तोतार ऋत्विजः “आ “नि “षीदत स्तोतुमुपविशत । अथ “पुनानाय पूयमानाय सोमाय “प्र “गायत प्रकर्षेण गायत । तमभिष्टुत ।

ततोऽभिषुतं सोमं “यज्ञैः यजनीयैः हविर्भिः मिश्रणैश्च “श्रिये शोभार्थं “परि “भूषत परितोऽलंकुरुत । तत्र दृष्टान्तः । “शिशुं “न यथा शिशुं बालं पुत्रं पितर आभरणैरलंकुर्वन्ति तद्वत् ॥

प्रवर्ग्येऽभिष्टवे 'समी वत्सम् ' इत्येका । सूत्रितं च - समी वत्सं न मातृभिः सं वत्स इव मातृभिः' (आश्व. श्रौ. ४, ७) इति ॥

समीं व॒त्सं न मा॒तृभिः॑ सृ॒जता॑ गय॒साध॑नं ।

दे॒वा॒व्यं१॒॑ मद॑म॒भि द्विश॑वसं ॥२

सम् । ई॒मिति॑ । व॒त्सम् । न । मा॒तृऽभिः॑ । सृ॒जत॑ । ग॒य॒ऽसाध॑नम् ।

दे॒व॒ऽअ॒व्य॑म् । मद॑म् । अ॒भि । द्विऽश॑वसम् ॥२

सम् । ईमिति । वत्सम् । न । मातृऽभिः । सृजत । गयऽसाधनम् ।

देवऽअव्यम् । मदम् । अभि । द्विऽशवसम् ॥२

हे ऋत्विजः “गयसाधनं गृहस्य साधनम् “ईम् एनं सोमं “मातृभिः मातृभूताभिर्वसतीवरीभिः “सं “सृजत संमिश्रयत । कथमिव । “वत्सं “न यथा वत्सं “मातृभिः गोभिः संयोजयन्ति तद्वत् । कीदृशम् । “देवाव्यं देवानां रक्षकं “मदं मदनहेतुं “द्विशवसं द्विगुणवेगमतिशयितबलं वा । यद्वा द्वयोर्लोकयोस्तत्र स्थिता देवमनुष्या इत्यर्थः । तेषां हविर्धनप्रदानेन वर्धयितारम् । तं सोमम् “अभि सं सृजत ॥

पु॒नाता॑ दक्ष॒साध॑नं॒ यथा॒ शर्धा॑य वी॒तये॑ ।

यथा॑ मि॒त्राय॒ वरु॑णाय॒ शंत॑मः ॥३

पु॒नात॑ । द॒क्ष॒ऽसाध॑नम् । यथा॑ । शर्धा॑य । वी॒तये॑ ।

यथा॑ । मि॒त्राय॑ । वरु॑णाय । शम्ऽत॑मः ॥३

पुनात । दक्षऽसाधनम् । यथा । शर्धाय । वीतये ।

यथा । मित्राय । वरुणाय । शम्ऽतमः ॥३

“दक्षसाधनं बलस्य साधनं धनादिवृद्धेर्वा साधकं सोमं “पुनात पवित्रेण पुनीत ॥ ‘पूञ् पवने क्र्यादिः । तस्माल्लोटि ' तसनप्तनथनाश्च' इति तस्य तबादेशः । पित्त्वादीत्वाभावः । असौ सोमः “शर्धाय वेगार्थं “वीतये देवानां पानार्थं “यथा भवति “यथा वा “मित्राय “वरुणाय च “शंतमः अतिशयेन सुखं करोति तथा पुनीतेत्यर्थः ॥

अ॒स्मभ्यं॑ त्वा वसु॒विदं॑म॒भि वाणी॑रनूषत ।

गोभिं॑ष्टे॒ वर्णं॑म॒भि वा॑सयामसि ॥४

अ॒स्मभ्यं॑म् । त्वा॒ । व॒सु॒ऽविदं॑म् । अ॒भि । वाणीः॑ । अ॒नू॒ष॒त॒ ।

गोभिः॑ । ते॒ । वर्णं॑म् । अ॒भि । वा॒स॒या॒म॒सि॒ ॥४

अस्मभ्यम् । त्वा । वसुऽविदम् । अभि । वाणीः । अनूषत ।

गोभिः । ते । वर्णम् । अभि । वासयामसि ॥४

हे सोम “वसुविदं धनस्य दातारं “त्वा त्वाम् “अस्मभ्यं धनादिप्रदानार्थं “वाणीः अस्मदीया वाचः "अभि “अनूषत अभिष्टुवन्ति । 'नू स्तवने' । वयं “ते तव “वर्णम् आवरकं

रसं “गोभिः गोविकारैः क्षीरादिभिः "अभि “वासयामसि अभिवासयामः । अभित आच्छादयामः ॥

स नों मदानां पत॒ इंदों दे॒वप्सरा असि ।

सखेंव॒ सख्यें गातु॒वित्तंमो भव ॥५

सः । न॒ः । म॒दा॒ना॒म् । प॒ते॒ । इन्दो॒ इतिं । दे॒वऽप्संराः । अ॒सि॒ ।

सखांऽइव । सख्यें । गा॒तु॒वित्ऽतंमः । भ॒व॒ ॥५

सः । नः । मदानाम् । पते । इन्दो इति । देवऽप्सराः । असि ।

सखाऽइव । सख्ये । गातुवित्ऽतमः । भव ॥५

“नः अस्मदीयानां “मदानां मदकानां “पते स्वामिन हे “इन्दो सोम “सः त्वं “देवप्सरा “असि । प्सर इति रूपनाम । दीप्तरूपो भवसि । स त्वं “सखेव यथा सखा सुहृत् “सख्ये मित्राय सत्यं मार्गं ज्ञापयति तद्वदस्माकमपि “गातुवित्तमः अत्यन्तं मार्गस्य लम्भकः "भव ज्ञापको भव ॥

सनें॑मि कृ॒ध्य१॒॑स्मदा र॒क्षस॒ं कं चिं॑द॒त्रिणं॑ ।

अपादें॑वं द्व॒युमंहों॑ युयोधि नः ॥६

सनें॑मि । कृ॒धि । अ॒स्मत् । आ । र॒क्षसं॑म् । कम् । चि॒त् । अ॒त्रिणं॑म् ।

अपं॑ । अदें॑वम् । द्व॒युम् । अंहः॑ । यु॒यो॒धि॒ । न॒ः ॥६

सनेमि । कृधि । अस्मत् । आ । रक्षसम् । कम् । चित् । अत्रिणम् ।

अप । अदेवम् । द्वयुम् । अंहः । युयोधि । नः ॥६

हे सोम “अस्मत् अस्मासु “सनेमि । पुराणनामैतत् । पुराणं सख्यं “कृधि कुरु। “आ अपि च “अत्रिणम् अदनशीलं “कं “चित् “रक्षसम् “अप युध्यस्व । कीदृशम् । “अदेवम् अदेवनशीलं “द्वयुं द्वयवन्तं सत्यानृतयुक्तं बाह्याभ्यन्तरमायायुक्तं वा । किंच “नः अस्माकम् “अंहः पापं चाप “युयोधि संप्रहर । युध्यतेः ' बहुलं छन्दसि' इति शपः श्लुः । ' वा छन्दसि' इति हेर्ङित्त्वाभावाद्गुणः । धलोपश्छान्दसः । यौतेर्वा श्लौ पूर्ववद्रूपम् ॥ ॥ ७ ॥

टिप्पणी

९.१०४.१ सखाय आ नि षीदत इति

प्लवः (https://sa.wikisource.org/s/2go3)

शौक्तानि (https://sa.wikisource.org/s/2ijj) (ग्रामगेयः)

शौक्तम् (https://sa.wikisource.org/s/1z9h)

पौष्कलम् (https://sa.wikisource.org/s/2iiw)

मण्डल ९

सूक्तं १.३१ सूक्तं १.४१ सूक्तं १.७१ सूक्तं १.१०१

सूक्तं १.३२ सूक्तं १.४२ सूक्तं १.७२ सूक्तं १.१०२

सूक्तं १.३३ सूक्तं १.४३ सूक्तं १.७३ सूक्तं १.१०३

सूक्तं १.३४ सूक्तं १.४४ सूक्तं १.७४ सूक्तं १.१०४

सूक्तं १.३५ सूक्तं १.४५ सूक्तं १.७५ सूक्तं १.१०५

सूक्तं १.३६ सूक्तं १.४६ सूक्तं १.७६ सूक्तं १.१०६

सूक्तं १.३७ सूक्तं १.४७ सूक्तं १.७७ सूक्तं १.१०७

सूक्तं १.३८ सूक्तं १.४८ सूक्तं १.७८ सूक्तं १.१०८

सूक्तं १.३९ सूक्तं १.४९ सूक्तं १.७९ सूक्तं १.१०९

सूक्तं १.२० सूक्तं १.५० सूक्तं १.८० सूक्तं १.११०

सूक्तं १.२१ सूक्तं १.५१ सूक्तं १.८१ सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.१०५

← सूक्तं ९.१०४

ऋग्वेदः - मण्डल ९

सूक्तं ९.१०५

पर्वतनारदौ काण्वौ।

सूक्तं ९.१०६ →

दे. पवमानः सोमः। उष्णिक्।

तं वः सखायो मदाय पुनानमभि गायत ।

शिशुं न यज्ञैः स्वदयन्त गूर्तिभिः ॥१॥

सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते ।

देवावीर्मदो मतिभिः परिष्कृतः ॥२॥

अयं दक्षाय साधनोऽयं शर्धाय वीतये ।

अयं देवेभ्यो मधुमत्तमः सुतः ॥३॥

गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धन्व ।

शुचिं ते वर्णमधि गोषु दीधरम् ॥४॥

स नो हरीणां पत इन्दो देवप्सरस्तमः ।

सखेव सख्ये नर्यो रुचे भव ॥५॥

सनेमि त्वमस्मदाँ अदेवं कं चिदत्रिणम् ।

साह्वाँ इन्दो परि बाधो अप द्वयुम् ॥६॥

सायणभाष्यम्

'तं वः' इति षडृचं द्वितीयं सूक्तं पर्वतनारदयोरार्षम् । अन्यत् पूर्ववत् । ' तं वः' इत्यनुक्रान्तम् । गतः सूक्तविनियोगः ॥

तं वः॑ सखायो॒ मदा॑य पुना॒नम॒भि गा॑यत ।

शिशु॒ं न य॒ज्ञैः स्व॑दयंत गू॒र्तिभिः॑ ॥१

तम् । वः॒ । स॒खा॒यः॒ । मदा॑य । पु॒ना॒नम् । अ॒भि । गा॒य॒त॒ ।

शिशु॑म् । न । य॒ज्ञैः । स्व॒द॒य॒न्त॒ । गू॒र्तिऽभिः॑ ॥१

तम् । वः । सखायः । मदाय । पुनानम् । अभि । गायत ।

शिशुम् । न । यज्ञैः । स्वदयन्त । गूर्तिऽभिः ॥१

हे “सखायः ऋत्विजः “वः यूयं “मदाय देवानां मदार्थं “पुनानं पूयमानं “तं सोमम् “अभि “गायत अभिष्टुत । तमिमं सोमं “शिशुं “न शिशुमिवालंकारैः क्षीरादिभिश्च यथा स्वादूकुर्वन्ति तद्वत् “यज्ञैः हविर्भिर्मिश्रणैः “गूर्तिभिः स्तुतिभिश्च “स्वदयन्त स्वादूकुर्वन्ति ॥

प्रवर्ग्येऽभिष्टवे ‘सं वत्स इव मातृभिः' इत्येका। सूत्रं च ' समी वत्सम्' इत्यनया सहोक्तम् ॥

सं व॒त्स इं॑व मा॒तृभि॒रिन्दुं॑र्हिन्वा॒नो अं॑ज्यते ।

दे॒वा॒वीर्मदों॑ म॒तिभि॒ः परिं॑ष्कृतः ॥२

सम् । व॒त्सःऽइं॑व । मा॒तृऽभिः॑ । इन्दुः॑ । हि॒न्वा॒नः । अ॒ज्य॒ते॒ ।

दे॒व॒ऽअ॒वीः । मदः॑ । म॒तिऽभिः॑ । परिं॑ऽकृतः ॥२

सम् । वत्सःऽइव । मातृऽभिः । इन्दुः । हिन्वानः । अज्यते ।

देवऽअवीः । मदः । मतिऽभिः । परिऽकृतः ॥२

“हिन्वानः प्रेर्यमाणः “इन्दुः सोमो वसतीवरीभिः “सम् “अज्यते । सम्यक् सिक्तो भवति । तत्र दृष्टान्तः । “वत्सइव वत्सो यथा “मातृभिः गोभिः समक्तो भवति तद्वत् । कीदृशः । “देवावीः देवानां रक्षकः “मदः मदकरः “मतिभिः स्तुतिभिः “परिष्कृतः अलंकृतः ॥ भूषणार्थे ' संपर्युपेभ्यः इति सुडागमः। ‘परिनिविभ्यः' (पा. सू. ८. ३. ७०) इति सुटः षत्वम् ॥ अयं दक्षय साधनोऽयं शर्धय वीतये । अयं देवेभ्यो मधुमत्तमः सुतः ॥ ३ ॥ अयम् । दर्धाय । साधनः। अयम् । शर्धाय । वीतये । अयम् । देवेभ्यः। मधुमत्त मः। सुतः ॥३॥

अ॒यं दक्षा॑य॒ साध॑नो॒ऽयं शर्धा॑य वी॒तये॑ ।

अ॒यं दे॒वेभ्यो॒ मधु॑मत्तमः सु॒तः ॥३

अ॒यम् । दक्षा॑य । साध॑नः । अ॒यम् । शर्धा॑य । वी॒तये॑ ।

अ॒यम् । दे॒वेभ्यः॑ । मधुं॑मत्ऽतमः । सु॒तः ॥३

अयम् । दक्षाय । साधनः । अयम् । शर्धाय । वीतये ।

अयम् । देवेभ्यः । मधुमत्ऽतमः । सुतः ॥३

“अयं सोमः “दक्षाय बलाय वर्धनाय वा “साधनः साधयिता भवति । तथा “अयं सोमः “शर्धाय वेगार्थं “वीतये देवानां भक्षणार्थं च भवति । “सुतः अभिषुतः “अयं सोमः “देवेभ्यः इन्द्रादिभ्यः “मधुमत्तमः अतिशयेन माधुर्ययुक्तो भवति । अत्यन्तं मदकरो भवतीति वा ॥

गोमं॑न्न इंदो॒ अश्वं॑वत्सु॒तः सुं॑दक्ष धन्व ।

शुचिं॑ ते॒ वर्ण॒मधि॒ गोषुं॑ दीधरं ॥४

गोऽमंत् । नः । इन्दो इतिं । अश्वंऽवत् । सुतः । सुऽदक्ष । धन्व ।

शुचिंम् । ते । वर्णंम् । अधिं । गोषुं । दीधरम् ॥४

गोऽमत् । नः । इन्दो इति । अश्वऽवत् । सुतः । सुऽदक्ष । धन्व ।

शुचिम् । ते । वर्णम् । अधि । गोषु । दीधरम् ॥४

हे “सुदक्ष सुबल हे “इन्दो सोम “सुतः अभिषुतस्त्वं “नः अस्माकं “गोमत् यज्ञसाधनगोयुक्तम् “अश्ववत् अश्वयुक्तं धनं “धन्व गमय । धविर्गत्यर्थो भूवादिः । ततोऽहं “शुचिं पूतं दीप्यमानं वा “ते तव “वर्णं रसं “गोषु गव्येषु क्षीरादिषु “अधि “दीधरम् अधिधारयामि मिश्रयामि ॥

स नों हरीणां पत इंदों देवप्संरस्तमः ।

सखेव सख्ये नर्यो रुचे भव ॥५

सः । नः । हरीणाम् । पते । इन्दो इति । देवप्सरःऽतमः ।

सखाऽइव । सख्ये । नर्यः । रुचे । भव ॥५

सः । नः । हरीणाम् । पते । इन्दो इति । देवप्सरःऽतमः ।

सखाऽइव । सख्ये । नर्यः । रुचे । भव ॥५

हे “हरीणां “पते “नः अस्मदीयानां हरितवर्णानां पशूनां स्वामिन् हे “इन्दो सोम “देवसरस्तमः अतिशयेन दीप्तरूपोपेतः “सः त्वं “नर्यः कर्मनेतृभ्य ऋत्विग्भ्यो हितः स त्वं “नः अस्माकं “रुचे "भव दीप्तिकरो भव । किमिव । “सखेव यथा सखा “सख्ये मित्राय दीप्तिकरो भवति तद्वत् ॥

सनेमि त्वमस्मदाँ अदेवं कं चिदत्रिणं ।

साह्वाँ इंदो परि बाधो अपं द्वयुं ॥६

सनेमि । त्वम् । अस्मत् । आ । अदेवम् । कम् । चित् । अत्रिणंम् ।

सह्वान् । इन्दो इतिं । परिं । बाधः । अपं । द्वयुम् ॥६

सनेमि । त्वम् । अस्मत् । आ । अदेवम् । कम् । चित् । अत्रिणम् ।

सह्वान् । इन्दो इति । परि । बाधः । अप । द्वयुम् ॥६

हे सोम “त्वं “सनेमि पुराणं सख्यम् “अस्मत् अस्मासु कुरु । “आ अपि च “अदेवम् अदेवनशीलं "कं “चित् अपि “अत्रिणम् अदनशीलं राक्षसमस्मदस्मत्तोऽपगमय । किंच

हे “इन्दो “साह्वान् शत्रूनभिभवन् “बाधः बाधमानान् “परि जहि । तथा “द्वयुं द्वयवन्तं सत्यानृतयुक्तं बाह्याभ्यन्तरमायाद्वयोपेतं वा राक्षसमस्मत्तोऽपगमय ॥ ॥ ८ ॥

टिप्पणी

९.१०५.१ तं वः सखायो इति

कार्णश्रवसम् (https://sa.wikisource.org/s/1z8c)

मण्डल ९

सूक्तं ९.११सूक्तं ९.४१सूक्तं ९.७१सूक्तं ९.१०१

सूक्तं ९.१२सूक्तं ९.४२सूक्तं ९.७२सूक्तं ९.१०२

सूक्तं ९.१३सूक्तं ९.४३सूक्तं ९.७३सूक्तं ९.१०३

सूक्तं ९.१४सूक्तं ९.४४सूक्तं ९.७४सूक्तं ९.१०४

सूक्तं ९.१५सूक्तं ९.४५सूक्तं ९.७५सूक्तं ९.१०५

सूक्तं ९.१६सूक्तं ९.४६सूक्तं ९.७६सूक्तं ९.१०६

सूक्तं ९.१७सूक्तं ९.४७सूक्तं ९.७७सूक्तं ९.१०७

सूक्तं ९.१८सूक्तं ९.४८सूक्तं ९.७८सूक्तं ९.१०८

सूक्तं ९.१९सूक्तं ९.४९सूक्तं ९.७९सूक्तं ९.१०९

सूक्तं ९.२०सूक्तं ९.५०सूक्तं ९.८०सूक्तं ९.११०

सूक्तं ९.२१सूक्तं ९.५१सूक्तं ९.८१सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.१०६

दे. पवमानः सोमः। उष्णिक्।

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।

श्रुष्टी जातास इन्दवः स्वर्विदः ॥१॥

अयं भराय सानसिरिन्द्राय पवते सुतः ।

सोमो जैत्रस्य चेतति यथा विदे ॥२॥

अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णीत सानसिम् ।

वज्रं च वृषणं भरत्समप्सुजित् ॥३॥

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव ।

द्युमन्तं शुष्ममा भरा स्वर्विदम् ॥४॥

इन्द्राय वृषणं मदं पवस्व विश्वदर्शतः ।

सहस्रयामा पथिकृद्विचक्षणः ॥५॥

अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः ।

सहस्रं याहि पथिभिः कनिक्रदत् ॥६॥

पवस्व देववीतय इन्दो धाराभिरोजसा ।

आ कलशं मधुमान्सोम नः सदः ॥७॥

तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः ।

त्वां देवासो अमृताय कं पपुः ॥८॥

आ नः सुतास इन्दवः पुनाना धावता रयिम् ।

वृष्टिद्यावो रीत्यापः स्वर्विदः ॥९॥

सोमः पुनान ऊर्मिणाव्यो वारं वि धावति ।

अग्रे वाचः पवमानः कनिक्रदत् ॥१०॥

धीभिर्हिन्वन्ति वाजिनं वने क्रीळन्तमत्यविम् ।

अभि त्रिपृष्ठं मतयः समस्वरन् ॥११॥

असर्जि कलशाँ अभि मीळ्हे सप्तिर्न वाजयुः ।

पुनानो वाचं जनयन्नसिष्यदत् ॥१२॥

पवते हर्यतो हरिरति ह्वरांसि रंह्या ।

अभ्यर्षन्स्तोतृभ्यो वीरवद्यशः ॥१३॥

अया पवस्व देवयुर्मधोर्धारा असृक्षत ।

रेभन्पवित्रं पर्येषि विश्वतः ॥१४॥

सायणभाष्यम्

'इन्द्रमच्छ ' इति चतुर्दशर्चं तृतीयं सूक्तमौष्णिहं पवमानसोमदेवताकम् । प्रथमस्य तृचस्य

चक्षुराख्यपुत्रोऽग्निर्ऋषिः । द्वितीयस्य मनुपुत्रश्चक्षुर्नामा । अप्सुनाम्नः पुत्रो मनुस्तृतीयस्य । एवं नवर्चो गताः । शिष्टानामपि पञ्चानां चाक्षुषोऽग्निः । तथा चानुक्रम्यते--- इन्द्रमच्छ षळूनाग्निश्चाक्षुषश्चक्षुर्मानवो मनुराप्सव इति तृचाः पञ्चाग्निः' इति । गतो विनियोगः ॥

इन्द्र॒मच्छं सु॒ता इ॒मे वृषं॑णं यन्तु॒ हरं॑यः ।

श्रु॒ष्टी जा॒तास॒ इन्दं॑वः स्व॒र्विदः॑ ॥१

इन्द्रं॑म् । अच्छं॑ । सु॒ताः । इ॒मे । वृषं॑णम् । य॒न्तु॒ । हरं॑यः ।

श्रु॒ष्टी । जा॒तासः॑ । इन्दं॑वः । स्व॒ःऽविदः॑ ॥१

इन्द्रम् । अच्छ । सुताः । इमे । वृषणम् । यन्तु । हरयः ।

श्रुष्टी । जातासः । इन्दवः । स्वःऽविदः ॥१

“श्रुष्टी । श्रुष्टीति क्षिप्रनाम । क्षिप्रं “जातासः जाताः “इन्दवः पात्रेषु क्षरन्तः “स्वर्विदः। सर्वज्ञाः “हरयः हरितवर्णाः “सुताः अभिषुताः “इमे सोमाः “वृषणं कामानां सेक्तारम् “इन्द्रमच्छ “यन्तु अभिगच्छन्तु ॥

अ॒यं भरा॑य सान॒सिरिन्द्रा॑य पवते सु॒तः ।

सोमो॒ जैत्र॑स्य चेतति॒ यथा॑ वि॒दे ॥२

अ॒यम् । भरा॑य । सा॒न॒सिः । इन्द्रा॑य । प॒व॒ते॒ । सु॒तः ।

सोमः॑ । जैत्र॑स्य । चे॒त॒ति॒ । यथा॑ । वि॒दे ॥२

अयम् । भराय । सानसिः । इन्द्राय । पवते । सुतः ।

सोमः । जैत्रस्य । चेतति । यथा । विदे ॥२

“भराय संग्रामाय तदर्थं “सानसिः भजनीयः “सुतः अभिषुतः “अयं “सोमः “इन्द्राय इन्द्रार्थं “पवते ग्रहादिषु क्षरति । ततः “सोमः "जैत्रस्य ॥ ‘ क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानसंज्ञा । ‘ चतुर्थ्यर्थे बहुलम् ' इति षष्ठी ॥ जयशीलमिन्द्रं “चेतति जानाति । “यथा इन्द्रः “विदे लोकैर्ज्ञायते तथा जानाति ॥

अ॒स्येदिंद्रो॒ मदे॒ष्वा ग्रा॒भं गृं॑भ्णीत सा॒न॒सिम् ।

वज्रं॑ च॒ वृषं॑णं भर॒त्सम॑प्सु॒जित् ॥३

अ॒स्य । इत् । इन्द्रः॑ । मदे॑षु । आ । ग्रा॒भम् । गृ॒भ्णी॒त॒ । सा॒न॒सिम् ।

वज्र॑म् । च॒ । वृषं॑णम् । भ॒र॒त् । सम् । अ॒प्सु॒ऽजित् ॥३

अस्य । इत् । इन्द्रः । मदेषु । आ । ग्राभम् । गृभ्णीत । सानसिम् ।

वज्रम् । च । वृषणम् । भरत् । सम् । अप्सुऽजित् ॥३

“आ अनन्तरम् “इन्द्रः “अस्येत् अस्य सोमस्यैव “मदेषु संजातेषु “सानसिं सर्वैः संभजनीयं “ग्राभं ग्राहं ग्रहीतव्यं धनुः “गृभ्णीत गृह्णाति । ‘ हृग्रहोर्भः° ' इति भत्वम् । किंच “अप्सुजित् उदकार्थं वृत्रस्य जेता । यद्वा आप इत्यन्तरिक्षनाम । अन्तरिक्षेऽहिनामकस्य जेता। इन्द्रः “वृषणं वर्षितारं “वज्रं “च “सं "भरत् संबिभर्तु । बिभर्तेर्लेट्यडागमः ॥

प्र धं॑न्वा सोम॒ जागृ॑विरि॒न्द्रा॑येन्दो॒ परि॑ स्रव ।

द्यु॒मन्तं॒ शुष्म॒मा भ॑रा स्व॒र्विदं॑ ॥४

प्र । ध॒न्व॒ । सो॒म॒ । जाग॑ृविः । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ।

द्यु॒ऽमन्त॑म् । शुष्म॑म् । आ । भ॒र॒ । स्व॒ःऽविद॑म् ॥४

प्र । धन्व । सोम । जागृविः । इन्द्राय । इन्दो इति । परि । स्रव ।

द्युऽमन्तम् । शुष्मम् । आ । भर । स्वःऽविदम् ॥४

हे “सोम "जागृविः जागरणशीलस्त्वं “प्र “धन्व प्रक्षर । हे “इन्दो सोम “इन्द्राय "परि “स्रव परितः पात्रेषु क्षर । किंच “द्युमन्तं दीप्तियुक्तं “स्वर्विदं सर्वस्य लम्भकं “शुष्मं शत्रूणां शोषकं बलम् “आ “भर आहर ॥

इन्द्रा॑य॒ वृष॑णं॒ मद॑ं॒ पव॑स्व वि॒श्वद॑र्शतः ।

स॒हस्रं॑यामा पथि॒कृद्विं॑चक्ष॒णः ॥५

इन्द्रां॑य । वृषं॑णम् । मदं॑म् । पवं॑स्व । वि॒श्वऽदं॑र्शतः ।

स॒हस्रं॑ऽयामा । प॒थि॒ऽकृत् । वि॒ऽच॒क्ष॒णः ॥५

इन्द्राय । वृषणम् । मदम् । पवस्व । विश्वऽदर्शतः ।

सहस्रऽयामा । पथिऽकृत् । विऽचक्षणः ॥५

हे सोम त्वं “वृषणं वर्षितारं “मदं मदहेतुं रसम् “इन्द्राय इन्द्रार्थं “पवस्व क्षर । कीदृशः। “विश्वदर्शतः सर्वैर्दर्शनीयः “सहस्रयामा बहुमार्गः “पथिकृत् यजमानानां सन्मार्गकरणशीलः “विचक्षणः सर्वस्य विद्रष्टा ॥ ॥ ९ ॥

अ॒स्मभ्यं॑ गातु॒वित्तं॑मो दे॒वेभ्यो॒ मधुं॑मत्तमः ।

स॒हस्रं॑ याहि प॒थिभि॒ः कनि॑क्रदत् ॥६

अ॒स्मभ्यं॑म् । गा॒तु॒वित्ऽत॑मः । दे॒वेभ्यः॑ । मधु॑मत्ऽतमः ।

स॒हस्रं॑म् । या॒हि॒ । प॒थिऽभिः॑ । कनि॑क्रदत् ॥६

अस्मभ्यम् । गातुवित्ऽतमः । देवेभ्यः । मधुमत्ऽतमः ।

सहस्रम् । याहि । पथिऽभिः । कनिक्रदत् ॥६

हे सोम "अस्मभ्यं “गातुवित्तमः अत्यन्तं मार्गस्य लम्भकः तथा “देवेभ्यः च “मधुमत्तमः अत्यन्तं स्वादुकारी त्वं "कनिक्रदत् शब्दं कुर्वन् “सहस्रं “पथिभिः बहुभिर्मार्गैः “याहि कलशमागच्छ ॥

पवं॑स्व दे॒ववी॑तय॒ इन्दो॒ धारा॑भि॒रोजं॑सा ।

आ क॒लश॒ं मधु॑मान्त्सोम नः सदः ॥७

पव॑स्व । दे॒वऽवी॑तये । इन्दो॒ इति॑ । धारा॑भिः । ओज॑सा ।

आ । क॒लश॑म् । मधु॑ऽमान् । सो॒म॒ । न॒ः । स॒द॒ः ॥७

पवस्व । देवऽवीतये । इन्दो इति । धाराभिः । ओजसा ।

आ । कलशम् । मधुऽमान् । सोम । नः । सदः ॥७

हे "इन्दो सोम "देववीतये देवानां भक्षणाय "ओजसा बलेन "धाराभिः आत्मीयाभिः "पवस्व क्षर । हे "सोम "मधुमान् मदकररसवांस्त्वं "नः अस्मदीयं कलशं द्रोणाभिधानम् ॥ "आ "सदः । सदेर्लुङि रूपम् । आसीद ॥

तवं द्र॒प्सा उं॑द॒प्रुत॒ इन्द्र॒ं मदा॑य वावृधुः ।

त्वां दे॒वासो॑ अ॒मृता॑य॒ कं प॑पुः ॥८

तव॑ । द्र॒प्साः । उ॒द॒ऽप्रुतः॑ । इन्द्र॑म् । मदा॑य । व॒वृ॒धुः॒ ।

त्वाम् । दे॒वासः॑ । अ॒मृता॑य । कम् । प॒पुः॒ ॥८

तव । द्रप्साः । उदऽप्रुतः । इन्द्रम् । मदाय । ववृधुः ।

त्वाम् । देवासः । अमृताय । कम् । पपुः ॥८

"उदप्रुतः वसतीवर्याख्यमुदकं प्रति गच्छन्तः । यद्वा । उदकस्य निर्गमयितारः। “तव स्वभूताः “द्रप्साः द्रुतगामिनो रसाः “मदाय मदार्थम् “इन्द्रं “वावृधुः वर्धयन्ति । ततः “देवासः देवा इन्द्रादयः “कं सुखकरं “त्वाम् “अमृताय अमरणार्थं 'पपुः पिबन्ति ॥

आ नः॑ सुतास इन्दवः पुना॒ना धा॑वता र॒यिं ।

वृ॒ष्टिद्या॑वो रीत्यापः स्व॒र्विद॑ः ॥९

आ । न॒ः । सु॒ता॒स॒ः । इ॒न्द॒व॒ः । पु॒ना॒नाः । धा॒व॒त॒ । र॒यिम् ।

वृ॒ष्टिऽद्या॑वः । री॒ति॒ऽआ॒प॒ः । स्व॒ःऽविद॑ः ॥९

आ । नः । सुतासः । इन्दवः । पुनानाः । धावत । रयिम् ।

वृष्टिऽद्यावः । रीतिऽआपः । स्वःऽविदः ॥९

हे "सुतासः अभिषूयमाणा हे “इन्दवः दीप्ताः पात्रेषु क्षरन्तो वा हे “रीत्यापः यैः पृथिवीं प्रति स्रवणशीला आपः कृताः तादृशा हे सोमाः “पुनानाः पूयमाना यूयं “नः अस्मभ्यं “रयिम् “आ “धावत आगमयत । कीदृशाः । “वृष्टिद्यावः । वृष्टिमभि द्यौर्यैः क्रियते । वृष्ट्यभिमुखद्युलोकवन्तः “स्वर्विदः सर्वस्य लम्भकाः ॥

सोमः॑ पुना॒न ऊ॒र्मिणाव्यो॒ वारं॒ वि धा॑वति ।

अग्रे॑ वा॒चः पव॑मान॒ः कनि॑क्रदत् ॥१०

सोमः॑ । पु॒ना॒नः । ऊ॒र्मिणा॑ । अव्यः॑ । वार॑म् । वि । धा॒व॒ति॒ ।

अग्रे॑ । वा॒चः । पव॑मानः । कनि॑क्रदत् ॥१०

सोमः । पुनानः । ऊर्मिणा । अव्यः । वारम् । वि । धावति ।

अग्रे । वाचः । पवमानः । कनिक्रदत् ॥१०

“पुनानः पूयमानः “सोमः “ऊर्मिणा स्वीयया धारया “अव्यः अवेः “वारं वालं पवित्रं “वि “धावति विविधं गच्छति । कीदृशः सोमः । “पवमानः पूतः “वाचः स्तोत्रस्य

“अग्रे “कनिक्रदत् पुनःपुनः शब्दं कुर्वन् वि धावति ॥ ॥ १० ॥

धी॒भिर्हि॑न्वंति वा॒जिनं॒ वने॒ क्रीळं॑त॒मत्यं॑विं ।

अ॒भि त्रि॑पृ॒ष्ठं म॒तयः॒ सम॑स्वरन् ॥११

धी॒भिः । हि॒न्व॒न्ति॒ । वा॒जिन॑म् । वने॑ । क्रीळ॑न्तम् । अति॑ऽअविम् ।

अ॒भि । त्रि॒ऽपृ॒ष्ठम् । म॒तयः॑ । सम् । अ॒स्व॒र॒न् ॥११

धीभिः । हिन्वन्ति । वाजिनम् । वने । क्रीळन्तम् । अतिऽअविम् ।

अभि । त्रिऽपृष्ठम् । मतयः । सम् । अस्वरन् ॥११

“वाजिनं बलवन्तं “वने वननीये वसतीवर्याख्य उदके “क्रीळन्तं संक्रीडमानम् “अत्यविम् । अविशब्देन तद्रोमकृतं पवित्रमभिधीयते । अतिक्रान्तपवित्रं सोममृत्विजः “धीभिः स्तुतिभिः “हिन्वन्ति वर्धयन्ति । यद्वा । धीभिः । वर्णलोपश्छान्दसः। धीतिभिरङ्गुलीभिर्हिन्वन्ति प्रेरयन्ति । ‘ हि गतौ वृद्धौ च ' स्वादिः। किंच “त्रिपृष्ठम् । त्रीणि पवित्राणि द्रोणकलशाधवनीय पूतभृदाख्यानि पात्राणि स्पृशतीति त्रीणि सवनानि वा स्पृशतीति स तथोक्तः । तं सोमं “मतयः स्तुतयः “अभि “समस्वरन् अभितः संस्तुवन्ति ॥

असंर्जि क॒लशाँ अ॒भि मी॒ळ्हे सप्ति॒र्न वांज॒युः ।

पु॒ना॒नो वाचं ज॒नयंन्नसिष्यदत् ॥१२

असं॑र्जि । क॒लशा॑न् । अ॒भि । मी॒ळ्हे । सप्ति॑ः । न ।
वा॒ज॒ऽयुः ।

पु॒ना॒नः । वाचं॑म् । ज॒नयं॑न् । अ॒सि॒स्य॒द॒त् ॥१२

असर्जि । कलशान् । अभि । मीळ्हे । सप्तिः । न ।
वाजऽयुः ।

पुनानः । वाचम् । जनयन् । असिस्यदत् ॥१२

“वाजयुः यजमानानामन्नमिच्छन् स सोमः “कलशान् अभिलक्ष्य कलशेषु "असर्जि सृज्यते । तत्र दृष्टान्तः । “सप्तिर्न यथाश्वः “मीळ्हे। संग्रामनामैतत् । संग्रामे सृज्यते तद्वत्। ततः “पुनानः पूयमानः सोमः “वाचं शब्दं “जनयन् उत्पादयन् “असिष्यदत् पात्रेषु स्यन्दते ॥

पव॑ते हर्य॒तो हरि॒रति॒ ह्वरां॑सि॒ रंह्या॑ ।

अ॒भ्यर्ष॑न्त्स्तो॒तृभ्यो॑ वी॒रव॒द्यशः॑ ॥१३

पव॑ते । ह॒र्य॒तः । हरिः॑ । अति॑ । ह्वरां॑सि । रंह्या॑ ।

अ॒भि॒ऽअर्ष॑न् । स्तो॒तृऽभ्यः॑ । वी॒रऽव॑त् । यशः॑ ॥१३

पवते । हर्यतः । हरिः । अति । ह्वरांसि । रंह्या ।

अभिऽअर्षन् । स्तोतृऽभ्यः । वीरऽवत् । यशः ॥१३

“हर्यतः स्पृहणीयः “हरिः हरितवर्णः सोमः “रंह्या । तृतीयाया आकारः । साधुवेगेन “ह्वरांसि कुटिलान्यनृजूनि पवित्राणि “अति “पवते अतीत्य गच्छति । किं कुर्वन् । “स्तोतृभ्यो “वीरवत् पुत्रयुक्तं “यशः “अभ्यर्षन् अभिगमयन् पवते ॥

अ॒या प॑वस्व देव॒युर्मधो॒र्धारा॑ असृक्षत ।

रेभंन्प॒वित्रं॒ पर्ये॑षि वि॒श्वतः॑ ॥१४

अ॒या । प॒व॒स्व॒ । दे॒व॒ऽयुः । मधोः॑ । धाराः॑ । अ॒सृ॒क्ष॒त॒ ।

रेभंन् । प॒वित्रंम् । परिं । ए॒षि॒ । वि॒श्वतः॑ ॥१४

अया । पवस्व । देवऽयुः । मधोः । धाराः । असृक्षत ।

रेभन् । पवित्रम् । परि । एषि । विश्वतः ॥१४

हे सोम “देवयुः देवान् कामयमानस्त्वम् “अया अनया धारया “पवस्व क्षर । ततः “मधोः मदकरस्य तव “धाराः आत्मीयाः “असृक्षत सृज्यन्ते । अनन्तरं “रेभन् शब्दायमानः “पवित्रं “विश्वतः "पर्येषि सर्वतः परिगच्छसि ॥ ॥ ११ ॥

टिप्पणी

चक्षु उपरि टिप्पणी (http://puranastudy.000space.com/pur_index10/chakshu.htm)

९.१०६.१ इन्द्रमच्छ सुता इमे इति

श्रोत्र उपरि टिप्पणी (https://vipin110012.tripod.com/pur_index28/shrotra.htm)

रोहितकूलीयम् (https://sa.wikisource.org/s/2hvo)

श्रुध्यम् (https://sa.wikisource.org/s/1zh3)

सुज्ञानम् (https://sa.wikisource.org/s/1z9t)

पौष्कलम् (https://sa.wikisource.org/s/1z6a)

विशोविशीयम् (https://sa.wikisource.org/s/2jw7)

पदे (https://sa.wikisource.org/s/2i2s)
(ग्रामगेयः)

इन्द्रं अच्छ सुता इम इतीन्द्रियस्य वीर्यस्यावरुध्यै - पञ्च.ब्रा. ११.१०.४ (https://sa.wikisource.org/s/tvz)

९.१०६.७ पवस्व देववीतये इति
वैयश्वम्(वैश्वमनसम्) (https://sa.wikisource.org/s/2huz)

९.१०६.१० सोमः पुनान ऊर्मिणेति

आतीषादीयम् (https://sa.wikisource.org/s/1z93)

९.१०६.१३ पवते हर्यतो हरि इति

यशांसि त्रीणि (https://sa.wikisource.org/s/2gvw)

उद्भिदम् (https://sa.wikisource.org/s/20ir)

मण्डल ९

सूक्तं १.११ सूक्तं १.४१ सूक्तं १.७१ सूक्तं १.१०१

सूक्तं १.१२ सूक्तं १.४२ सूक्तं १.७२ सूक्तं १.१०२

सूक्तं १.१३ सूक्तं १.४३ सूक्तं १.७३ सूक्तं १.१०३

सूक्तं १.१४ सूक्तं १.४४ सूक्तं १.७४ सूक्तं १.१०४

सूक्तं १.१५ सूक्तं १.४५ सूक्तं १.७५ सूक्तं १.१०५

सूक्तं १.१६ सूक्तं १.४६ सूक्तं १.७६ सूक्तं १.१०६

सूक्तं १.१७ सूक्तं १.४७ सूक्तं १.७७ सूक्तं १.१०७

सूक्तं १.१८ सूक्तं १.४८ सूक्तं १.७८ सूक्तं १.१०८

सूक्तं १.१९ सूक्तं १.४९ सूक्तं १.७९ सूक्तं १.१०९

सूक्तं १.२० सूक्तं १.५० सूक्तं १.८० सूक्तं १.११०

सूक्तं १.२१ सूक्तं १.५१ सूक्तं १.८१ सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९


सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.१०७

ऋषयः - सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः, ४ भौमोऽत्रिः, ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, ७ मैत्रावरुणिर्वासिष्ठः)।

दे. पवमानः सोमः। प्रगाथः (१,४, ६,८,९, १०, १२, १४, १७ बृहती, २, ५,७, ११, १२, १५, १८ सतोबृहती) ३, १६ द्विपदा विराट्, १९-२६ प्रगाथः (विषमा बृहती, समा सतोबृहती)।



सप्तर्षि saptarshi



Sapta Rishi statue

परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।

दधन्वाँ यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥१॥

नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिन्तरः ।

सुते चित्त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् ॥२॥

परि सुवानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥३॥

पुनानः सोम धारयापो वसानो अर्षसि ।

आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः ॥४॥

दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् ।

आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः ॥५॥

पुनानः सोम जागृविरव्यो वारे परि प्रियः ।

त्वं विप्रो अभवोऽङ्गिरस्तमो मध्वा यज्ञं मिमिक्ष नः ॥६॥

सोमो मीढ्वान्पवते गातुवित्तम ऋषिर्विप्रो विचक्षणः ।

त्वं कविरभवो देववीतम आ सूर्यं रोहयो दिवि ॥७॥

सोम उ षुवाणः सोतृभिरधि ष्णुभिरवीनाम् ।

अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥८॥

अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।

समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥९॥

आ सोम सुवानो अद्रिभिस्तिरो वाराण्यव्यया ।

जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे ॥१०॥

स मामृजे तिरो अण्वानि मेष्यो मीळ्हे सप्तिर्न वाजयुः ।

अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिरृक्वभिः ॥११॥

प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।

अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥१२॥

आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।

तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ॥१३॥

अभि सोमास आयवः पवन्ते मद्यं मदम् ।

समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः ॥१४॥

तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।

अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥१५॥

नृभिर्येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः ॥१६॥

इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।

सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥१७॥

पुनानश्चमू जनयन्मतिं कविः सोमो देवेषु रण्यति ।

अपो वसानः परि गोभिरुत्तरः सीदन्वनेष्वव्यत ॥१८॥

तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।

पुरूणि बभ्रो नि चरन्ति मामव परिधीँरति ताँ इहि ॥१९॥

उताहं नक्तमुत सोम ते दिवा सख्याय बभ्र ऊधनि ।

घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम ॥२०॥

मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।

रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥२१॥

मृजानो वारे पवमानो अव्यये वृषाव चक्रदो वने ।

देवानां सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि ॥२२॥

पवस्व वाजसातयेऽभि विश्वानि काव्या ।

त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ॥२३॥

स तू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः ।

त्वां विप्रासो मतिभिर्विचक्षण शुभ्रं हिन्वन्ति धीतिभिः ॥२४॥

पवमाना असृक्षत पवित्रमति धारया ।

मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥२५॥

अपो वसानः परि कोशमर्षतीन्दुर्हियानः सोतृभिः ।

जनयञ्ज्योतिर्मन्दना अवीवशद्गाः कृण्वानो न निर्णिजम् ॥२६॥

सायणभाष्यम्

‘परीतः' इति षड्विंशत्यृचं चतुर्थं सूक्तम् । ‘त्वं सोमासि' (ऋ. सं. ९. ६७) इत्यत्रोक्ता भरद्वाजकश्यपाद्याः सप्तर्षयः । आद्या बृहती द्वितीया सतोबृहती। अयमेकः प्रगाथः । 'परि सुवानः इत्येषा तृतीयैकविंशत्यक्षरा भुरिग्विराड् द्विपदा । 'नृभिर्येमानः' इति षोडशी विंशत्यक्षरा द्विपदा विराट् । चतुर्थ्यादिद्वौ प्रगाथौ । दशम्यादित्रयः सप्तदश्यादिपञ्च प्रगाथाः । पवमानः सोमो देवता । तथा चानुक्रम्यते – “परीतः षड्विंशतिः सप्तर्षयः प्रागाथं तृतीयाषोळश्यौ द्विपदे अष्टम्याद्ये बृहत्यौ' इति । गतः सूक्तविनियोगः ॥

परी॒तो षिं॑ञ्चता सु॒तं सोमो॒ य उं॑त्त॒मं ह॒विः ।

द॒ध॒न्वाँ यो नर्यो॑ अ॒प्स्व१॒॑न्तरा सु॒षाव॒ सोम॒मद्रि॑भिः ॥१

परि॑ । इ॒तः । सि॒ञ्च॒त॒ । सु॒तम् । सोमः॑ । यः । उ॒त्ऽत॒मम् । ह॒विः ।

द॒ध॒न्वान् । यः । नर्यः॑ । अ॒प्ऽसु । अ॒न्तः । आ । सु॒साव॑ । सोम॑म् । अद्रि॑ऽभिः ॥१

परि । इतः । सिञ्चत । सुतम् । सोमः । यः । उत्ऽतमम् । हविः ।

दधन्वान् । यः । नर्यः । अप्ऽसु । अन्तः । आ । सुसाव । सोमम् । अद्रिऽभिः ॥१

हे ऋत्विजः “सुतम् अभिषुतं सोमम् “इतः अस्मात् कर्मण ऊर्ध्वमथवास्मात्प्रदेशादूर्ध्वं “परि “षिञ्चत वसतीवरीभिः ॥ ‘ इतो षिञ्चत ' इत्यत्र संहितायां ' छन्दसि ' इति रोरुत्वम्। आदेशप्रत्यययोः' इति षत्वम् ॥ “यः “सोमः

देवानाम् “उत्तम प्रशस्यं “हविः भवति ॥ “आ अपि च।
“नर्यः मनुष्यहितः “यः च सोमः “ अप्सु
वसतीवरीष्वन्तरिक्षे वा “अन्तः दधन्वान् गच्छन् भवति तं
“सोममद्रिभिः ग्रावभिरध्वर्युः “सुषाव अभिषुतं चकार । तं
परि षिञ्चतेति समन्वयः ॥

नू॒नं पुं॑ना॒नोऽविं॑भि॒ः परिं स्र॒वादं॑ब्धः सुर॒भिन्तं॑रः ।

सु॒ते चिं॑त्त्वा॒प्सु मं॑दामो॒ अन्धं॑सा श्री॒णन्तो॒ गोभि॒रुत्तं॑रम् ॥२

नू॒नम् । पु॒ना॒नः । अविं॑ऽभिः । परिं । स्र॒व॒ । अदं॑ब्धः ।
सु॒र॒भिम्ऽतं॑रः ।

सु॒ते । चि॒त् । त्वा॒ । अ॒प्ऽसु । म॒दा॒म॒ः । अन्धं॑सा ।
श्री॒णन्तः॑ । गोभिः॑ । उत्ऽतं॑रम् ॥२

नूनम् । पुनानः । अविऽभिः । परि । स्रव । अदब्धः । सुरभिम्ऽतरः ।

सुते । चित् । त्वा । अप्ऽसु । मदामः । अन्धसा । श्रीणन्तः । गोभिः । उत्ऽतरम् ॥२

हे सोम “अदब्धः कैश्चिदप्यहिंसितः “सुरभिंतरः अत्यन्तं सुगन्धिस्त्वं “नूनम् इदानीं “पुनानः पूयमानः सन् "अविभिः अविवालकृतैः पवित्रैस्तेभ्यः “परि “स्रव परितः क्षर। “सुते “चित् अभिषुते सति “अन्धसा सक्तुलक्षणेनान्नेन “गोभिः गोविकारैः क्षीरैः क्षीरादिभिः “श्रीणन्तः मिश्रयन्तो वयम् “उत्तरम् उद्गततरम् “अप्सु वसतीवरीषु संस्थितं त्वां “मदामः मन्दामहे स्तुमः ॥

परिं सुवा॒नश्च॒क्षंसे देव॒मादंन॒ः क्रतु॒रिन्दुं॒र्विचक्ष॒णः ॥३

परिं । सु॒वा॒नः । चक्षंसे । दे॒व॒ऽमादंनः । क्रतुः॑ । इन्दुः॑ । वि॒ऽच॒क्ष॒णः ॥३

परि । सुवानः । चक्षसे । देवऽमादनः । क्रतुः । इन्दुः । विऽचक्षणः ॥३

“सुवानः अभिषूयमाणः सोमः “चक्षसे सर्वेषां दर्शनाय “परि स्रवति । कीदृशः । “देवमादनः देवानां तर्पयिता “क्रतुः कर्ता “इन्दुः पात्रेषु क्षरणशीलो दीप्तो वा “विचक्षणः सर्वस्य विद्रष्टा ॥

पु॒ना॒नः सोंम॒ धारंया॒पो वसांनो अर्षसि ।

आ रंत्न॒धा योनिंमृ॒तस्यं सीद॒स्युत्सों देव हिर॒ण्ययः॑ ॥४

पु॒ना॒नः । सो॒म॒ । धारंया । अ॒पः । वसांनः । अ॒र्ष॒सि॒ ।

आ । र॒त्न॒ऽधाः । योनिं॑म् । ऋ॒तस्यं॑ । सी॒द॒सि॒ । उत्सः॑ ।
दे॒व॒ । हि॒र॒ण्ययः॑ ॥४

पुनानः । सोम । धारया । अपः । वसानः । अर्षसि ।

आ । रत्नऽधाः । योनिम् । ऋतस्य । सीदसि । उत्सः ।
देव । हिरण्ययः ॥४

हे “सोम “पुनानः पूयमानस्त्वम् “अपः उदकानि वसतीवर्याख्यानि “वसानः आच्छादयन् “धारया “अर्षसि पवित्रं गच्छसि । ततः “रत्नधाः रत्नानां दाता त्वम् “ऋतस्य सत्यभूतस्य यज्ञस्य “योनिं स्थानम् “आ “सीदसि । हे देव द्योतमान सोम “उत्सः प्रस्यन्दनशीलस्त्वं “हिरण्ययः हिरण्मयो हिरण्यस्योत्पत्तिस्थानं खलु । यद्वा देवानां हितरमणीयो भवसि ॥

दु॒हा॒न ऊध॑र्दि॒व्यं मधु॑ प्रि॒यं प्र॒त्नं स॒धस्थ॒मास॑दत् ।

आ॒पृच्छ्यं॑ ध॒रुणं॑ वा॒ज्य॑र्षति॒ नृभि॑र्धू॒तो वि॑चक्ष॒णः ॥५

दु॒हा॒नः । ऊधः॑ । दि॒व्यम् । मधु॑ । प्रि॒यम् । प्र॒त्नम् ।
स॒धऽस्थ॑म् । आ । अ॒स॒द॒त् ।

आ॒ऽपृच्छ्य॑म् । ध॒रुण॑म् । वा॒जी । अ॒र्ष॒ति॒ । नृऽभिः॑ । धू॒तः
। वि॒ऽच॒क्ष॒णः ॥५

दुहानः । ऊधः । दिव्यम् । मधु । प्रियम् । प्रत्नम् ।
सधऽस्थम् । आ । असदत् ।

आऽपृच्छ्यम् । धरुणम् । वाजी । अर्षति । नृऽभिः । धूतः
। विऽचक्षणः ॥५

“मधु मदकरं “प्रियं प्रीणनकारि “दिव्यं दिवि भवम् “ऊधः सोमवल्लीलक्षणं “दुहानः सोमः “प्रत्नं पुरातनं “सधस्थम् । सह तिष्ठन्त्यत्रेति सधस्थं स्थानम्। अन्तरिक्षम् “आसदत् आसीददति । सदेर्लुङि रूपम् । ततः “आपृच्छ्यं कर्मण्याप्रष्टव्यं “धरुणं कर्मणो धारयितारं यजमानं "वाजी अन्नवान् सोमः “अर्षति । तस्मा अन्नं दातुमभिगच्छति । कीदृशः । “नृभिः कर्मनेतृभिर्ऋत्विग्भिः “धूतः अदाभ्यगृहे परिशोधितः । तैरेनं चतुराधूनोति पञ्चकृत्वः सप्तकृत्वो वा' इत्यापस्तम्बेन सूत्रितम् । “विचक्षणः सर्वस्य विद्रष्टा ॥ ॥ १२ ॥

पु॒ना॒नः सो॑म॒ जागृ॑वि॒रव्यो॒ वारे॒ परि॑ प्रि॒यः ।

त्वं विप्रो॑ अभ॒वोऽङ्गि॑रस्तमो॒ मध्वा॑ य॒ज्ञं मि॑मिक्ष नः ॥६

पु॒ना॒नः । सो॒म॒ । जागृ॑विः । अव्यः॑ । वारे॑ । परि॑ । प्रि॒यः ।

त्वम् । विप्रः॑ । अ॒भ॒व॒ः । अङ्गि॑रःऽतमः । मध्वा॑ । य॒ज्ञम् । मि॒मि॒क्ष॒ । न॒ः ॥६

पुनानः । सोम । जागृविः । अव्यः । वारे । परि । प्रियः ।

त्वम् । विप्रः । अभवः । अङ्गिरःऽतमः । मध्वा । यज्ञम् । मिमिक्ष । नः ॥६

हे “सोम “जागृविः जागरणशीलः “प्रियः प्रीणयिता त्वं “पुनानः पूयमानः सन् “अव्यः अवेः “वारे वाले पवित्रे "परि क्षरसि । किंच “विप्रः मेधावी “त्वम् “अङ्गिरस्तमः अङ्गिरसां वरिष्ठः पितॄणां नेता “अभवः भवसि । स त्वं “नः अस्मदीयं “यज्ञं “मध्वा मधुनात्मीयेन रसेन “मिमिक्ष सिञ्च । मिहेः सेचनार्थस्य सनि रूपम् ॥

सोमो॑ मी॒ढ्वान्पं॑वते गातु॒वित्त॑म॒ ऋषि॒र्विप्रो॑ विचक्ष॒णः ।

त्वं क॒विरं॑भवो देव॒वीत॑म॒ आ सूर्यं॑ रोहयो दि॒वि ॥७

सोमः॑ । मी॒ढ्वान् । प॒व॒ते॒ । गा॒तु॒वित्ऽत॑मः । ऋषिः॑ । विप्रः॑ । वि॒ऽच॒क्ष॒णः ।

त्वम् । क॒विः । अ॒भ॒व॒ः । दे॒व॒ऽवीत॑मः । आ । सूर्य॑म् । रो॒ह॒य॒ः । दि॒वि ॥७

सोमः । मीढ्वान् । पवते । गातुवित्ऽतमः । ऋषिः । विप्रः । विऽचक्षणः ।

त्वम् । कविः । अभवः । देवऽवीतमः । आ । सूर्यम् । रोहयः । दिवि ॥७

“मीढ्वान् कामानां सेक्ता “सोमः “पवते क्षरति । कीदृशः । “गातुवित्तमः अत्यन्तं मार्गस्य लम्भकः “ऋषिः सर्वस्य प्रदर्शकः “विप्रः मेधावी “विचक्षणः विद्रष्टा । किंच “कविः क्रान्तप्रज्ञः “त्वं “देववीतमः अत्यन्तं देवकामः “अभवः

भवसि । अपि च “दिवि द्युलोके “सूर्यम् “आ “रोहयः प्रादुर्भावयसि ॥

सोमं उ षुवा॒णः सो॒तृभि॒रधि॒ ष्णुभि॒रवीं॑नाम् ।

अश्वं॑येव ह॒रितां॑ याति॒ धारं॑या म॒न्द्रयां॑ याति॒ धारं॑या ॥८

सोमः॑ । ऊं॒ इति॑ । सु॒वा॒नः । सो॒तृऽभिः॑ । अधि॑ । स्नुऽभिः॑ । अवीं॑नाम् ।

अश्वं॑याऽइव । ह॒रितां॑ । या॒ति॒ । धारं॑या । म॒न्द्रयां॑ । या॒ति॒ । धारं॑या ॥८

सोमः । ऊं इति । सुवानः । सोतृऽभिः । अधि । स्नुऽभिः । अवीनाम् ।

अश्वयाऽइव । हरिता । याति । धारया । मन्द्रया । याति । धारया ॥८

"सोतृभिः अभिषुण्वद्भिर्ऋत्विग्भिः “सुवानः अभिषूयमाणः “सोमः “अवीनां स्नुभिः । ‘ मांस्पृत्स्नूनामुपसंख्यानम् ' (पा. सू. ६. १. ६३. १) इति सानुशब्दस्य स्नुभावः । समुच्छ्रितैर्वालैः पवित्रैः “अधि “याति अधिकं गच्छति । “उ इति प्रसिद्धौ । “अश्वयेव वडवयेव “हरिता हरितवर्णया “धारया “याति । “मन्द्रया मदकारिण्या “धारया द्रोणकलशमभिगच्छति॥

अ॒नू॒पे गोमा॒न्गोभिं॑रक्षा॒ः सोमों॑ दु॒ग्धाभिं॑रक्षाः ।

स॒मु॒द्रं न सं॒वरं॑णान्यग्मन्म॒न्दी मदा॑य तोशते ॥९

अ॒नू॒पे । गोऽमा॑न् । गोभिः॑ । अ॒क्षा॒रिति॑ । सोमः॑ । दु॒ग्धाभिः॑ । अ॒क्षा॒रिति॑ ।

स॒मु॒द्रम् । न । स॒म्ऽवर॑णानि । अ॒ग्म॒न् । म॒न्दी । मदा॑य । तो॒श॒ते॒ ॥९

अनूपे । गोऽमान् । गोभिः । अक्षारिति । सोमः । दुग्धाभिः । अक्षारिति ।

समुद्रम् । न । सम्ऽवरणानि । अग्मन् । मन्दी । मदाय । तोशते ॥९

“गोमान् गोयुक्तः सोमः “अनूपे निम्ने देशे कलशे “गोभिः गोविकारैः क्षीरादिभिः सह “अक्षाः क्षरति । तदेवोच्यते । सः “सोमः आत्मनो मिश्रणार्थं “दुग्धाभिः गोभिः सह “अक्षाः क्षरति । क्षरतेर्लुङि रूपम् । किंच “समुद्रं “न यथा समुद्रमुदकानि गच्छन्ति तद्वत् "संवरणानि संभजनीयानि

रसरूपाण्यन्नानि द्रोणकलशम् “अग्मन् गच्छन्ति । गमेर्लुङि च्लेर्लुकि रूपम् । किंच “मन्दी मदकरः सोमः “मदाय मदार्थं "तोशते हन्यतेऽभिषूयते । तोशतिर्वधकर्मा ॥

आ सोम सुवा॒नो अद्रिं॑भिस्ति॒रो वारां॑ण्य॒व्यया॑ ।

जनो॒ न पु॒रि च॒म्वो॑र्विश॒द्धरि॒ः सदो॒ वने॑षु दधिषे ॥१०

आ । सो॒म॒ । सु॒वा॒नः । अद्रिं॑ऽभिः । ति॒रः । वारां॑णि । अ॒व्यया॑ ।

जनः॑ । न । पु॒रि । च॒म्वोः॑ । वि॒श॒त् । हरिः॑ । सदः॑ । वने॑षु । द॒धि॒षे॒ ॥१०

आ । सोम । सुवानः । अद्रिऽभिः । तिरः । वाराणि । अव्यया ।

जनः । न । पुरि । चम्वोः । विशत् । हरिः । सदः । वनेषु । दधिषे ॥१०

हे “सोम “अद्रिभिः ग्रावभिः “सुवानः अभिषूयमाणस्त्वम् “अव्यया अविमयानि “वाराणि वालानि पवित्राणि "तिरः कुर्वन् व्यवधायकानि कुर्वाणः सन् “आ पवस इति शेषः । "हरिः हरितवर्णः स सोमः “चम्वोः अधिषवणफलकयोः उपरि स्थिते कलशे “विशत् प्रविशति । तत्र दृष्टान्तः । "जनो “न यथा जनः “पुरि पुरे प्रविशति । स त्वं “वनेषु काष्ठनिर्मितेषु पात्रेषु “सदः स्थानं “दधिषे करोषि ॥ ॥ १३ ॥

स मा॑मृजे ति॒रो अण्वा॑नि मे॒ष्यो॑ मी॒ळ्हे सप्ति॒र्न वा॑ज॒युः ।

अ॒नु॒माद्य॒ः पव॑मानो मनी॒षिभि॒ः सोमो॒ विप्रे॑भि॒रृक्व॑भिः ॥११

सः । म॒मृ॒जे॒ । ति॒रः । अण्वा॑नि । मे॒ष्यः॑ । मी॒ळ्हे । सप्तिः॑ । न । वा॒ज॒ऽयुः ।

अ॒नु॒ऽमाद्यः॑ । पव॑मानः । म॒नी॒षिऽभिः॑ । सोमः॑ । विप्रे॑भिः । ऋक्व॑ऽभिः ॥११

सः । ममृजे । तिरः । अण्वानि । मेष्यः । मीळ्हे । सप्तिः । न । वाजऽयुः ।

अनुऽमाद्यः । पवमानः । मनीषिऽभिः । सोमः । विप्रेभिः । ऋक्वऽभिः ॥११

“वाजयुः अन्नकामः “अण्वानि अणूनि सूक्ष्माणि “मेष्यः मेष्या अवे रोमाणि पवित्राणि “तिरः कुर्वन् “सः “सोमः “ममृजे परिशोध्यते । अलंक्रियते वा । तत्र दृष्टान्तः । “सप्तिर्न यथा जयकामैरश्वो “मीळ्हे संग्रामेऽलंक्रियते तद्वत् । कीदृशः । “अनुमाद्यः अनुमोदनीयः सर्वैः

“पवमानो “मनीषिभिः ऋत्विग्भिः पूयमानः तथा “ऋक्वभिः । ‘ छन्दसीवनिपौ' इति वनिप्। स्तुतिमद्भिर्विप्रैर्मेधाविभिः अभिष्टुतो मृज्यते ॥

प्र सोम॑ दे॒ववी॑तये॒ सिन्धु॒र्न पिं॑प्ये॒ अर्ण॑सा ।

अं॒शोः पय॑सा मदि॒रो न जागृ॑वि॒रच्छा॒ कोशं॑ मधु॒श्चुत॑म् ॥ १२

प्र । सो॒म॒ । दे॒वऽवी॑तये । सिन्धुः॑ । न । पि॒प्ये॒ । अर्ण॑सा ।

अं॒शोः । पय॑सा । म॒दि॒रः । न । जागृ॑विः । अच्छ॑ । कोश॑म् । म॒धु॒ऽश्चुत॑म् ॥१२

प्र । सोम । देवऽवीतये । सिन्धुः । न । पिप्ये । अर्णसा ।

अंशोः । पयसा । मदिरः । न । जागृविः । अच्छ । कोशम् । मधुऽश्चुतम् ॥१२

हे “सोम “देववीतये देवानां पानाय तदर्थम् “अर्णसा वसतीवर्याख्येनोदकेन “प्र “पिप्ये प्रप्यायसे । तत्र दृष्टान्तः । “सिन्धुर्न । यथा सिन्धुरुदकेन प्रपिप्ये प्रप्यायते तद्वत् । प्यायतेर्लिटि ‘ लिड्यङोश्च ' इति पीभावः । ततः स त्वं “मदिरो “न मदकरः सुरादिरिव “जागृविः जागरणशीलः। यद्वा । नः संप्रत्यर्थे । इदानीं मदकरो जागरणशीलस्त्वम्। “अंशोः लताखण्डस्य “पयसा रसेन “मधुश्चुतं मधुररसस्य क्षारयितारं “कोशं द्रोणकलशम् “अच्छ अभिगच्छसि ॥

आ हर्य॒तो अर्जु॑ने॒ अत्के॑ अव्यत प्रि॒यः सू॒नुर्न मर्ज्यः॑ ।

तमीं॑ हिन्वन्त्य॒पसो॒ यथा॒ रथं॑ न॒दीष्वा गभ॑स्त्योः ॥१३

आ । ह॒र्य॒तः । अर्जु॑ने । अत्के॑ । अ॒व्य॒त॒ । प्रि॒यः । सू॒नुः । न । मर्ज्यः॑ ।

तम् । ई॒म् । हि॒न्व॒न्ति॒ । अ॒पसः॑ । यथा॑ । रथ॑म् । न॒दीषु॑ । आ । गभ॑स्त्योः ॥१३

आ । हर्यतः । अर्जुने । अत्के । अव्यत । प्रियः । सूनुः । न । मर्ज्यः ।

तम् । ईम् । हिन्वन्ति । अपसः । यथा । रथम् । नदीषु । आ । गभस्त्योः ॥१३

“हर्यतः स्पृहणीयः “प्रियः प्रीणयिता “सूनुर्न सूनुरिव “मर्ज्यः मार्जनीयः सोमः “अर्जुने अर्जुनवर्णे “अत्के रूपे पवित्रे “आ “अव्यत आवृणोति । “तमीम् एनं सोममङ्गुलयः “नदीषु नदमानासु वसतीवरीषु “गभस्त्योः बाह्वोः “आ आभिमुख्येन “हिन्वन्ति प्रेरयन्ति । तत्र

दृष्टान्तः । “अपसो “यथा वेगवन्तो जनाः “रथं संग्रामेषु प्रेरयन्ति तद्वत् ॥

अ॒भि सोमा॑स आ॒यव॒ः पव॑न्ते॒ मद्यं॒ मद॑म् ।

स॒मु॒द्रस्याधि॑ वि॒ष्टपि॑ मनी॒षिणो॑ मत्स॒रासः॑ स्व॒र्विदः॑ ॥१४

अ॒भि । सोमा॑सः । आ॒यवः॑ । पव॑न्ते । मद्य॑म् । मद॑म् ।

स॒मु॒द्रस्य॑ । अधि॑ । वि॒ष्टपि॑ । म॒नी॒षिणः॑ । म॒त्स॒रासः॑ । स्व॒ःऽविदः॑ ॥१४

अभि । सोमासः । आयवः । पवन्ते । मद्यम् । मदम् ।

समुद्रस्य । अधि । विष्टपि । मनीषिणः । मत्सरासः । स्वःऽविदः ॥१४

“आयवः गमनशीलाः “सोमासः सोमाः “मद्यं मदकरं “मदम् आत्मीयं रसम् “अभि "पवन्ते । अभितो निर्गमयन्ति । कुत्रेत्युच्यते । “समुद्रस्य अन्तरिक्षस्य “अधि “विष्टपि अधिकं समुच्छ्रिते पवित्रे। यद्वा । समुद्रस्य । समुद्रवन्त्यस्माद्रसाः । तस्य कलशस्याध्युपरि विष्टपि स्थाने पवित्रे निर्गमयन्ति । कीदृशाः । “मनीषिणः मनस ईशितारः “मत्सरासः मदकराः “स्वर्विदः सर्वस्य लम्भकाः ॥

तरं॑त्समु॒द्रं पव॑मान ऊ॒र्मिणा॒ राजा॑ दे॒व ऋ॒तं बृ॒हत् ।

अर्षा॑न्मि॒त्रस्य॒ वरु॑णस्य॒ धर्म॑णा॒ प्र हि॑न्वा॒न ऋ॒तं बृ॒हत् ॥१५

तरं॑त् । स॒मु॒द्रम् । पव॑मानः । ऊ॒र्मिणा॑ । राजा॑ । दे॒वः । ऋ॒तम् । बृ॒हत् ।

अर्ष॑त् । मि॒त्रस्य॑ । वरु॑णस्य । धर्म॑णा । प्र । हि॒न्वा॒नः ।
ऋ॒तम् । बृ॒हत् ॥१५

तरत् । समुद्रम् । पवमानः । ऊर्मिणा । राजा । देवः ।
ऋतम् । बृहत् ।

अर्षत् । मित्रस्य । वरुणस्य । धर्मणा । प्र । हिन्वानः ।
ऋतम् । बृहत् ॥१५

“पवमानः पूयमानः "देवः द्योतमानः "बृहत् अत्यन्तम् “ऋतं सत्यभूतो “राजा सोमः “समुद्रम् अन्तरिक्षं कलशं वा “ऊर्मिणा धारया “तरत् तरति ।”हिन्वानः प्रेर्यमाणः “ऋतं “बृहत् अत्यन्तं सत्यभूतः स सोमः “मित्रस्य “वरुणस्य मित्रावरुणयोः “धर्मणा धारणार्थं “प्र “अर्षत् प्रगच्छति ॥ ॥१४॥

नृभिर्येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः ॥१६

नृऽभिः । येमानः । हर्यतः । विऽचक्षणः । राजा । देवः ।
समुद्रियः ॥१६

नृऽभिः । येमानः । हर्यतः । विऽचक्षणः । राजा । देवः ।
समुद्रियः ॥१६

“नृभिः कर्मनेतृभिः “येमानः नियम्यमानः “हर्यतः स्पृहणीयः “विचक्षणः विद्रष्टा “देवः दीप्यमानः “समुद्रियः अन्तरिक्षे भवः “राजा सोम इन्द्रार्थं पवत इत्युत्तरेण संबन्धः॥ ‘समुद्राभ्राद्धः इति भवार्थे घप्रत्ययः ।।

इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।

सहस्रधारो अत्यव्यमर्षति तमीं मृजन्त्यायवः ॥१७

इन्द्राय । पवते । मदः । सोमः । मरुत्वते । सुतः ।

सहस्रऽधारः । अति । अव्यम् । अर्षति । तम् । ईमिति ।
मृजन्ति । आयवः ॥१७

इन्द्राय । पवते । मदः । सोमः । मरुत्वते । सुतः ।

सहस्रऽधारः । अति । अव्यम् । अर्षति । तम् । ईमिति ।
मृजन्ति । आयवः ॥१७

“मदः मादकः “सुतः अभिषुतः “सोमः “मरुत्वते
मरुद्भिस्तद्वते “इन्द्राय इन्द्रार्थं “पवते क्षरति । ततः
“सहस्रधारः बहुधारोपेतः सोमः “अव्यम् अविमयं पवित्रम्
“अति “अर्षति अतिगच्छति । “तम् इमं सोमम् "आयवः
मनुष्या ऋत्विजः “मृजन्ति शोधयन्ति ॥

पुनानश्चमू जनयंन्मतिं कविः सोमों देवेषुं रण्यति ।

अ॒पो वसा॑न॒ः परि॒ गोभि॒रुत्त॑र॒ः सीद॒न्वने॑ष्वव्यत ॥१८

पु॒ना॒नः । च॒मू इति॑ । ज॒नय॑न् । म॒तिम् । क॒विः । सोम॑ः । दे॒वेषु॑ । र॒ण्य॒ति॒ ।

अ॒पः । वसा॑नः । परि॑ । गोभि॑ः । उत्ऽत॑रः । सीद॑न् । वने॑षु । अ॒व्य॒त॒ ॥१८

पुनानः । चमू इति । जनयन् । मतिम् । कविः । सोमः । देवेषु । रण्यति ।

अपः । वसानः । परि । गोभिः । उत्ऽतरः । सीदन् । वनेषु । अव्यत ॥१८

“चमू । सप्तम्याः पूर्वसवर्णदीर्घः। चम्वोरधिषवणफलकयोः “पुनानः पूयमानोऽभिषूयमाणः “मतिं स्तुतिं “जनयन् उत्पादयन् “कविः क्रान्तप्रज्ञ एतादृशः “सोमः “देवेषु इन्द्रादिषु “रण्यति। किंच “अपः

वसतीवरीः “वसानः आच्छादयन् “वनेषु काष्ठेषु पात्रेषु “सीदन् सोमः “गोभिः गोविकारैः क्षीरादिभिः “परि “अव्यत परिदीयते । आच्छाद्यते ॥

तवा॒हं सोम॑ रारण स॒ख्य इ॑न्दो दि॒वेदि॑वे ।

पु॒रूणि॑ बभ्रो॒ नि च॑रन्ति॒ मामव॑ परि॒धीँर॑ति॒ ताँ इ॑हि ॥१९

तव॑ । अ॒हम् । सो॒म॒ । र॒र॒ण॒ । स॒ख्ये । इ॒न्दो॒ इति॑ । दि॒वेऽदि॑वे ।

पु॒रूणि॑ । ब॒भ्रो॒ इति॑ । नि । च॒र॒न्ति॒ । माम् । अव॑ । प॒रि॒ऽधीन् । अति॑ । तान् । इ॒हि॒ ॥१९

तव । अहम् । सोम । ररण । सख्ये । इन्दो इति । दिवेऽदिवे ।

पुरूणि । बभ्रो इति । नि । चरन्ति । माम् । अव । परिऽधीन् । अति । तान् । इहि ॥१९

हे “इन्दो हे “सोम “तव “सख्ये सखिकर्मणि “अहं “दिवेदिवे अन्वहं “रारण। रणेः लिट्युत्तमे णलि रूपम् । हे “बभ्रो बभ्रुवर्ण सोम “पुरूणि बहूनि रक्षांसि “मां तव सख्ये स्थितं “नि “अव “चरन्ति नीचीनं चरन्ति बाधन्ते । ये मां बाधन्ते “तान् “परिधीन राक्षसांस्त्वम् “अति “इहि अतीत्य गच्छ। जहीति यावत् ॥

उ॒ताहं नक्त॑मु॒त सो॑म ते॒ दिवा॑ स॒ख्याय॑ बभ्र॒ ऊध॑नि ।

घृ॒णा तप॑न्त॒मति॒ सूर्यं॑ प॒रः श॑कु॒ना इ॑व पप्तिम ॥२०

उ॒त । अ॒हम् । नक्त॑म् । उ॒त । सो॒म॒ । ते॒ । दिवा॑ । स॒ख्याय॑ । ब॒भ्रो॒ इति॑ । ऊध॑नि ।

घृ॒णा । तपं॑न्तम् । अति॑ । सूर्यं॑म् । प॒रः । श॒कु॒नाःऽइं॑व । प॒प्ति॒म॒ ॥२०

उत । अहम् । नक्तम् । उत । सोम । ते । दिवा । सख्याय । बभ्रो इति । ऊधनि ।

घृणा । तपन्तम् । अति । सूर्यम् । परः । शकुनाःऽइव । पप्तिम ॥२०

हे “बभ्रो बभ्रुवर्ण हे "सोम “उत अपि च “नक्तम् “उत अपि च “दिवा अहोरात्रयोः “सख्याय सख्यार्थं तव “ऊधनि समीपे “अहं रम इति शेषः । ते वयं “घृणा दीप्त्या “तपन्तं ज्वलन्तं “परः परमस्थानस्थितं “सूर्यं तदात्मकं त्वाम् “अति “पप्तिम । तत्र स्थितं त्वां प्राप्तुमतिपेतिम । कथमिव । “शकुनाइव । यथा सुपर्णादयः पक्षिणः सूर्यमतिगच्छन्ति तद्वत् ॥ ‘ पत्लृ गतौ । अस्माच्छान्दसे लिटि ‘ तनिपत्योश्छन्दसि' इत्युपधालोपः ॥ ॥ १५ ॥

मृ॒ज्यमा॑नः सुहस्त्य समु॒द्रे वाच॑मिन्वसि ।

र॒यिं पि॒शङ्गं॑ बहु॒लं पु॑रु॒स्पृहं॒ पव॑माना॒भ्य॑र्षसि ॥२१

मृ॒ज्यमा॑नः । सु॒ऽह॒स्त्य॒ । स॒मु॒द्रे । वाच॑म् । इ॒न्व॒सि॒ ।

र॒यिम् । पि॒शङ्ग॑म् । ब॒हु॒लम् । पु॒रु॒ऽस्पृह॑म् । पव॑मान ।
अ॒भि । अ॒र्ष॒सि॒ ॥२१

मृज्यमानः । सुऽहस्त्य । समुद्रे । वाचम् । इन्वसि ।

रयिम् । पिशङ्गम् । बहुलम् । पुरुऽस्पृहम् । पवमान ।
अभि । अर्षसि ॥२१

हे “सुहस्त्य। हस्ते भवा हस्त्या अङ्गुलयः । शोभनाङ्गुलिक सोम “मृज्यमानः शोध्यमानस्त्वं “समुद्रे अन्तरिक्षे कलशे वा “वाचं शब्दम् “इन्वसि प्रेरयसि । किंच हे “पवमान

पूयमान सोम “पिशङ्गं हिरण्यैः पिशङ्गवर्णं “बहुलं प्रभूतं “पुरुस्पृहं बहुभिः स्पृहणीयं “रयिं (https://vedastudy.tripod.com/pur_index25/rayi.htm) धनम् “अभ्यर्षसि स्तोतृणामभिक्षरसि प्रयच्छसि ॥

मृजानो वारे पवमानो अव्यये वृषाव चक्रदो वने ।

देवानां सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि ॥२२

मृजानः । वारे । पवमानः । अव्यये । वृषा । अव । चक्रदः । वने ।

देवानाम् । सोम । पवमान । निःऽकृतम् । गोभिः । अञ्जानः । अर्षसि ॥२२

मृजानः । वारे । पवमानः । अव्यये । वृषा । अव । चक्रदः । वने ।

देवानाम् । सोम । पवमान । निःऽकृतम् । गोभिः ।
अञ्जानः । अर्षसि ॥२२

हे "सोम “वृषा वर्षिता त्वं “मृजानः वसतीवरीभिर्मृज्यमानोऽलंक्रियमाणः “अव्यये अविमये “वारे वाले पवित्रे “पवमानः पूयमानः सन् “वने वननीय उदके काष्ठे कलशे वा “अव “चक्रदः अवक्रन्दसि शब्दायसे । ततो हे “सोम हे “पवमान त्वं “गोभिः गव्यैः क्षीरादिभिः “अञ्जानः अज्यमानः सन् "निष्कृतं संस्कृतं “देवानां स्थानम् “अर्षसि गच्छसि ॥

पवस्व वाजसातयेऽभि विश्वानि काव्या ।

त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ॥२३

पवस्व । वाजऽसातये । अभि । विश्वानि । काव्या ।

त्वम् । स॒मु॒द्रम् । प्र॒थ॒मः । वि । धा॒र॒य॒ः । दे॒वेभ्यः॑ । सो॒म॒ । म॒त्स॒रः ॥२३

पवस्व । वाजऽसातये । अभि । विश्वानि । काव्या ।

त्वम् । समुद्रम् । प्रथमः । वि । धारयः । देवेभ्यः । सोम । मत्सरः ॥२३

हे सोम “विश्वानि सर्वाणि “काव्या कविकर्माणि स्तोत्राण्यभिलक्ष्य “वाजसातये अन्नलाभाय “पवस्व क्षर । हे “सोम “देवेभ्यः देवानां “मत्सरः मदकरः “प्रथमः सर्वदेवानां मुख्यः “त्वं “समुद्रम् अन्तरिक्षं कलशं वा “वि “धारयः विशेषेण धारयसि ॥

स तू पं॑वस्व॒ परि॒ पार्थि॑वं॒ रजों दि॒व्या चं॑ सोम॒ धर्म॑भिः ।

त्वां विप्रा॑सो म॒तिभि॑र्विचक्षण शु॒भ्रं हि॑न्वन्ति धी॒तिभिः॑ ॥ २४

सः । तु । प॒व॒स्व॒ । परि॑ । पार्थि॑वम् । रजः॑ । दि॒व्या । च॒ । सो॒म॒ । धर्म॑ऽभिः ।

त्वाम् । विप्रा॑सः । म॒तिऽभिः॑ । वि॒ऽच॒क्ष॒ण॒ । शु॒भ्रम् । हि॒न्व॒न्ति॒ । धी॒तिऽभिः॑ ॥२४

सः । तु । पवस्व । परि । पार्थिवम् । रजः । दिव्या । च । सोम । धर्मऽभिः ।

त्वाम् । विप्रासः । मतिऽभिः । विऽचक्षण । शुभ्रम् । हिन्वन्ति । धीतिऽभिः ॥२४

हे “सोम “सः तादृशस्त्वं “पार्थिवं “रजः लोकं प्रति दिव्यानि “च रजांसि प्रति “धर्मभिः धारकैः सह “तु क्षिप्रं “परि “पवस्व परितः क्षर। हे “विचक्षण विद्रष्टः सोम

“विप्रासः विप्रा मेधाविनः “मतिभिः स्तुतिभिः “धीतिभिः अङ्गुलीभिश्च “शुभ्रं श्वेतवर्णं “त्वां “हिन्वन्ति प्रेरयन्ति ।

पवमाना असृक्षत पवित्रमति धारया ।

मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥२५

पवमानाः । असृक्षत । पवित्रम् । अति । धारया ।

मरुत्वन्तः । मत्सराः । इन्द्रियाः । हयाः । मेधाम् । अभि । प्रयांसि । च ॥२५

पवमानाः । असृक्षत । पवित्रम् । अति । धारया ।

मरुत्वन्तः । मत्सराः । इन्द्रियाः । हयाः । मेधाम् । अभि । प्रयांसि । च ॥२५

“पवमानाः पूयमानाः सोमाः “धारया आत्मीयया “पवित्रम् अतीत्य “असृक्षत सृज्यन्ते । कीदृशाः । “मरुत्वन्तः मरुद्भिर्युक्ताः “मत्सराः मदकराः “इन्द्रियाः इन्द्रजुष्टाः। “मेधां स्तुतिं “प्रयांसि अन्नानि “च अभिलक्ष्य स्तोतृभ्यः उभयं कर्तुं वा “हयाः गन्तार एते सृज्यन्ते ॥

अ॒पो वसा॑न॒ः परि॒ कोश॑मर्ष॒तीन्दु॑र्हिया॒नः सो॒तृभि॑ः ।

ज॒नय॒ञ्ज्योति॑र्म॒न्दना॑ अवीवश॒द्गाः कृ॑ण्वा॒नो न नि॒र्णिज॑म् ॥२६

अ॒पः । वसा॑नः । परि॑ । कोश॑म् । अ॒र्ष॒ति॒ । इन्दु॑ः । हि॒या॒नः । सो॒तृऽभि॑ः ।

ज॒नय॑न् । ज्योति॑ः । म॒न्दनाः॑ । अ॒वी॒व॒श॒त् । गाः । कृ॒ण्वा॒नः । न । नि॒ःऽनिज॑म् ॥२६

अपः । वसानः । परि । कोशम् । अर्षति । इन्दुः । हियानः । सोतृऽभिः ।

जनयन् । ज्योतिः । मन्दनाः । अवीवशत् । गाः । कृण्वानः । न । निःऽनिजम् ॥२६

“अपः वसतीवरीः “वसानः आच्छादयन् “सोतृभिः अभिषुण्वद्भिः “हियानः प्रेर्यमाणः “इन्दुः सोमः “कोशं कलशं “परि “अर्षति प्रति गच्छति । किंच “ज्योतिः दीप्तिं "जनयन् उत्पादन “गाः गव्यानि क्षीरादीनि “निर्णिजम् आत्मनो रूपं “कृण्वानः कुर्वन् मिश्रयन् सोऽयं सोमः । नः संप्रत्यर्थे । इदानीं “मन्दनाः स्तुतीः “अवीवशत् कामयते । ‘वश कान्तौ । लुङि चङि रूपम् ॥ ॥१६॥

टिप्पणी

९.१०७.१ परीतो षिञ्चता सुतमिति

कौकिलसौत्रामणी -- श्यामाकसक्तूंस्त्रेधा विभज्य सुरायामुपरि विकीर्य तदुपरि दुग्धपरिषेचनार्थो अयं मन्त्रः - परीतो षिञ्चता सुतमिति - तै.ब्रा. २.६.१.१ (https://sa.wikisource.org/s/iyd) , आप.श्रौ.सू. १९.५.११ (https://sa.wikisource.org/s/24r8)

एकस्याः पयसाऽपाकृतेनाऽश्विनेन परिषिञ्चति परीतो षिञ्चतेति २३ शष्पचूर्णानि चाऽवपति २४ सारस्वतेन द्वयोः प्रातः २५ तोक्मचूर्णानि च २६ ऐन्द्रेणोत्तमे तिसृणाम् २७ लाजचूर्णानि च २८ १ कात्यायनश्रौसू. १९.१.२८ (https://sa.wikisource.org/s/15nv)

परीतो षिञ्चता सुतम्"इति परिवत्यो भवन्त्यन्तो वै नवममहस्तस्यैताः पर्याप्त्यै - तांब्रा. १५.३.३ (https://sa.wikisource.org/s/tvt)

अच्छिद्रम् (https://sa.wikisource.org/s/2gtc) १-१५(ग्रामगेयः)

अर्कपुष्पम् (https://sa.wikisource.org/s/2gt8)

दैर्घश्रवसम् (https://sa.wikisource.org/s/1z7l)

यशः (https://sa.wikisource.org/s/2gvt)

कौल्मलबर्हिषम् (https://sa.wikisource.org/s/2htj)

वैयश्वम् (https://sa.wikisource.org/s/2htm)

देवस्थानम् (https://sa.wikisource.org/s/2hty)

सङ्कृति (https://sa.wikisource.org/s/2htz)

भर्गः (https://sa.wikisource.org/s/2hu0)

विश्वामित्र (http://puranastudy.byethost14.com/pur_index26/vishwaa1.htm)
उपरि टिप्पणी

जमदग्नि (http://vipin48.tripod.com/pur_index11/jamadagni.htm) उपरि टिप्पणी

९.१०७.४ पुनानः सोम धारया इति

[आयास्यम्](https://sa.wikisource.org/s/2ibt) (ग्रामगेयः)

[कण्वरथन्तरम्](https://sa.wikisource.org/s/2hlp)

[गौङ्गवम्](https://sa.wikisource.org/s/2hlq)

[साप्तमिकमायास्यम्](https://sa.wikisource.org/s/2hlr)

[निषेधः](https://sa.wikisource.org/s/2hvr)

यज्ञायज्ञीयम् (https://sa.wikisource.org/s/2hvs)

उत्सेधः (https://sa.wikisource.org/s/2hvt)

भर्गः (https://sa.wikisource.org/s/2llu)

अन्तरिक्षम् (https://sa.wikisource.org/s/1zb5)

९.१०७.८ सोम उ षुवाणः इति

सोमसामानि षट् (https://sa.wikisource.org/s/2h43) (ग्रामगेयः)

मानवोत्तरम् (https://sa.wikisource.org/s/1zw2)

आनूपम् (https://sa.wikisource.org/s/2h44)

वाम्रम् (https://sa.wikisource.org/s/2h46)

अग्नेस्त्रिणिधनम् (https://sa.wikisource.org/s/2h47)

९.१०७.१२ प्र सोम देववीतये इति

त्रीणिधनमाग्नेयम् (https://sa.wikisource.org/s/2ic3)

९.१०७.१४ अभि सोमास आयवः इति

पौरुमद्गम् (https://sa.wikisource.org/s/1z6l)

अभि सोमास आयव इत्य् अभीति भवति रथन्तरस्य रूपम्। राथन्तरम् एतद् अहः॥ ...... जै.ब्रा. ३.४० (https://sa.wikisource.org/s/eie)

द्विहिङ्कारवामदेव्यम् (https://sa.wikisource.org/s/2hmz)

गायत्रपार्श्वम् (https://sa.wikisource.org/s/2hn3)

पौरुहन्मनम् (https://sa.wikisource.org/s/2hn4)

द्वैगतम् (https://sa.wikisource.org/s/2hn5)

हारायणम् (https://sa.wikisource.org/s/2hna)

अच्छिद्रम् (https://sa.wikisource.org/s/2hnd)

आनूपम् (https://sa.wikisource.org/s/2nq8)

९.१०७.१९ तवाहं सोम रारण इति

आष्टादंष्ट्रमोत्तरम् (https://sa.wikisource.org/s/1z8t)

आभीशवोत्तरम् (https://sa.wikisource.org/s/1z8v)

स्वऽपृष्ठम् (https://sa.wikisource.org/s/1z8z)

महादिवाकीर्त्यानि (https://sa.wikisource.org/s/1zxg)

महावैराजे (https://sa.wikisource.org/s/2nlf)

९.१०७.२१ मृज्यमानः सुहस्त्या इति

औक्ष्णोरन्ध्राणि (https://sa.wikisource.org/s/2iag). (ग्रामगेयः)

औक्ष्णोरन्ध्रम् (https://sa.wikisource.org/s/2hgu).

वाजजित् (https://sa.wikisource.org/s/1z7y).

वरुणसाम (https://sa.wikisource.org/s/1z7z).

अङ्गिरसां गोष्ठः (https://sa.wikisource.org/s/1z80).

रयि उपरि टिप्पणी (https://vedastudy.tripod.com/pur_index25/rayi.htm).

९.१०७.२५ पवमाना असृक्षत इति

पवित्रम् (https://sa.wikisource.org/s/2jwm)

मण्डल ९

सूक्तं १.३१सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.३२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.३३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.३४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.३५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.३६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.३७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.३८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.३९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.१०८

ऋग्वेदः - मण्डल ९

← सूक्तं ९.१०७

सूक्तं ९.१०८

[[लेखकः :|]]

सूक्तं ९.१०९ →

ऋ. १-२ गौरिवीतिः शाक्त्यः, ३, १४-१६ शक्तिर्वासिष्ठः, ४-५ ऊरुराङ्गिरसः, ६-७ ऋजिश्वा भारद्वाजः, ८-९ ऊर्ध्वसद्मा आङ्गिरसः, १०-११ कृतयशा आङ्गिरसः, १२-१३ ऋणंचयो राजर्षिः।

दे. पवमानः सोमः। काकुभः प्रगाथः - (विषमा ककुप्, समा सतोबृहती), १३ यवमध्या गायत्री।

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।

महि द्युक्षतमो मदः ॥१॥

यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीता स्वर्विदः ।

स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥२॥

त्वं ह्यङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।

अमृतत्वाय घोषयः ॥३॥

येना नवग्वो दध्यङ्ङपोर्णुते येन विप्रास आपिरे ।

देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्यानशुः ॥४॥

एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिन्तमः ।

क्रीळन्नूर्मिरपामिव ॥५॥

य उस्रिया अप्या अन्तरश्मनो निर्गा अकृन्तदोजसा ।

अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ॥६॥

आ सोता परि षिञ्चताश्वं न स्तोममप्तुरं रजस्तुरम् ।

वनक्रक्षमुदप्रुतम् ॥७॥

सहस्रधारं वृषभं पयोवृधं प्रियं देवाय जन्मने ।

ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥८॥

अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुः ।

वि कोशं मध्यमं युव ॥९॥

आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः ।

वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः ॥१०॥

एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवो दुहुः ।

विश्वा वसूनि बिभ्रतम् ॥११॥

वृषा वि जज्ञे जनयन्नमर्त्यः प्रतपञ्ज्योतिषा तमः ।

स सुष्टुतः कविभिर्निर्णिजं दधे त्रिधात्वस्य दंससा ॥१२॥

स सुन्वे यो वसूनां यो रायामानेता य इळानाम् ।

सोमो यः सुक्षितीनाम् ॥१३॥

यस्य न इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।

आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥१४॥

इन्द्राय सोम पातवे नृभिर्यतः स्वायुधो मदिन्तमः ।

पवस्व मधुमत्तमः ॥१५॥

इन्द्रस्य हार्दि सोमधानमा विश समुद्रमिव सिन्धवः ।

जुष्टो मित्राय वरुणाय वायवे दिवो विष्टम्भ उत्तमः ॥१६॥

सायणभाष्यम्

‘ पवस्व' इति षोडशर्चं पञ्चमं सूक्तम् । आद्यद्वृचस्य गौरिवीतिर्नाम शक्तिपुत्र ऋषिः । तृतीयायाः शक्तिर्नाम वासिष्ठः । ततः पञ्चानां द्वृचानामूरुर्नामाङ्गिरस ऋजिश्वा नाम भारद्वाज ऊर्ध्वसद्मा नामाङ्गिरसः कृतयशा नाम कश्चित् सोऽप्याङ्गिरस ऋणंचयो नाम राजर्षिरित्येते क्रमेणर्षयः । एवं त्रयोदश गताः । ततस्तिसृणा वासिष्ठः शक्तिः। प्रथमातृतीयाद्या अयुजः ककुभः । द्वितीयाचतुर्थ्याद्या युजः सतोबृहत्यः। स सुन्वे यो वसूनाम्' इत्येषा तु यवमध्या गायत्री । पवमानः सोमो देवता । तथा चानुक्रम्यते-- पवस्व षोळश गौरिवीतिर्द्वृचं

शक्तिरेकामुरुर्ऋजिश्वोर्ध्वसद्मा कृतयशा ऋणंचय इत्यृषयो द्वृचास्तिस्रः शक्तिः काकुभाः प्रगाथाः स सुन्वे गायत्री यवमध्या' इति । गतो विनियोगः ॥

पवं॑स्व॒ मधुं॑मत्तम॒ इन्द्रा॑य सोम क्रतु॒वित्तं॑मो॒ मदः॑ ।

महिं॑ द्यु॒क्षतं॑मो॒ मदः॑ ॥१

पवं॑स्व । मधुं॑मत्ऽतमः । इन्द्रा॑य । सो॒म॒ । क्र॒तु॒वित्ऽतं॑मः ।
मदः॑ ।

महिं॑ । द्यु॒क्षऽतं॑मः । मदः॑ ॥१

पवस्व । मधुमत्ऽतमः । इन्द्राय । सोम । क्रतुवित्ऽतमः ।
मदः ।

महि । द्युक्षऽतमः । मदः ॥१

हे "सोम "मधुमत्तमः अतिशयेन माधुर्योपेतस्त्वम् "इन्द्राय इन्द्रार्थं "मदः मदकरः सन् “पवस्व क्षर। कीदृशः । "क्रतुवित्तमः अत्यन्तं प्रज्ञायाः कर्मणो वा लम्भकः "महि महान् मंहनीयो वा "द्युक्षतमः अत्यन्तं दीप्तः “मदः मदहेतुः ॥

यस्यं ते पी॒त्वा वृ॑ष॒भो वृ॑षा॒यते॒ऽस्य पी॒ता स्व॒र्विदः॑ ।

स सु॒प्रके॑तो अ॒भ्यं॑क्रमी॒दिषोऽच्छा॒ वाजं॒ नैतं॑शः ॥२

यस्यं । ते॒ । पी॒त्वा । वृ॒ष॒भः । वृ॒ष॒ऽयते॑ । अ॒स्य । पी॒ता । स्व॒:ऽविदः॑ ।

सः । सु॒ऽप्रके॑तः । अ॒भि । अ॒क्र॒मी॒त् । इषः॑ । अच्छं । वाजं॑म् । न । एतं॑शः ॥२

यस्य । ते । पीत्वा । वृषभः । वृषऽयते । अस्य । पीता ।
स्वःऽविदः ।

सः । सुऽप्रकेतः । अभि । अक्रमीत् । इषः । अच्छ ।
वाजम् । न । एतशः ॥२

“वृषभः कामानां वर्षक इन्द्रः "यस्य यं "ते त्वां "पीत्वा "वृषायते वृषभ इवाचरति । किंच “स्वर्दृशः सर्वस्य दर्शकस्य “अस्य ते तव "पीता पाने सति “सुप्रकेतः सुप्रज्ञः "सः इन्द्रः "इषः शत्रूणामन्नानि "अभ्यक्रमीत् अभिक्रामति । तत्र दृष्टान्तः। “वाजं “नैतशः । एतश इत्यश्वनाम । यथाश्वो वाजं संग्राममभिगच्छति तद्वत् ॥

त्वं ह्यं१॒ग दैव्या॒ पवं॑मान॒ जनिं॑मानि द्यु॒मत्तं॑मः ।

अ॒मृ॒त॒त्वाय॑ घो॒षयः॑ ॥३

त्वम् । हि । अ॒ङ्ग । दैव्यां । पवंमान । जनिंमानि । द्यु॒मत्ऽतंमः ।

अ॒मृ॒त॒ऽत्वायं । घो॒षयः॑ ॥३

त्वम् । हि । अङ्ग । दैव्या । पवमान । जनिमानि । द्युमत्ऽतमः ।

अमृतऽत्वाय । घोषयः ॥३

हे "पवमान पूयमान सोम “द्युमत्तमः अतिशयेन दीप्तिमान् "त्वं "हि त्वमेव "दैव्या देवसंबन्धीनि "जनिमानि जन्मानि । देवानित्यर्थः । तानभिलक्ष्य “अमृतत्वाय तेषाममरणाय “अङ्ग क्षिप्रं “घोषयः शब्दायसे ॥ ‘ घुषिर् विशब्दने' । ण्यन्तस्य लेटि रूपम् । हियोगादनिघातः ॥

येना॒ नवंग्वो द॒ध्यङ्ङंपोर्णु॒ते येन॒ विप्रांस आपि॒रे ।

दे॒वानां॑ सु॒म्ने अ॒मृत॑स्य॒ चारु॑णो॒ येन॒ श्रवां॑स्यान॒शुः ॥४

येन॑ । नव॑ऽग्वः । द॒ध्यङ् । अ॒प॒ऽऊ॒र्णु॒ते । येन॑ । विप्रा॑सः । आ॒पि॒रे ।

दे॒वाना॑म् । सु॒म्ने । अ॒मृत॑स्य । चारु॑णः । येन॑ । श्रवां॑सि । आ॒न॒शुः ॥४

येन । नवऽग्वः । दध्यङ् । अपऽऊर्णुते । येन । विप्रासः । आपिरे ।

देवानाम् । सुम्ने । अमृतस्य । चारुणः । येन । श्रवांसि । आनशुः ॥४

“नवग्वः नवनीयगतिः यद्वा नवभिर्मासैः सत्रस्यानुष्ठाता “दध्यङ् एतन्नामकोऽङ्गिराः "येन सोमेन पणिभिरपहृतानां गवां द्वारम् "अपोर्णुते अपाच्छादयति विवृतमकार्षीत् । "विप्रासः तन्मुखाः सर्वे मेधाविनोऽङ्गिरसः "येन च सोमेन

"आपिरे एतैरपहृता गरे आप्नुवन् । किंच "देवानाम् इन्द्रादीनां “सुम्ने सुखे यज्ञेन संजाते सति “चारुणः कल्याणस्य "अमृतस्य उदकस्य संबन्धीनि "श्रवांसि अन्नानि "येन च सोमेन यजमानाः "आनशुः व्याप्नुवन् अलभन्त । स त्वं देवानाममृतत्वाय शब्दायस इति पूर्वेण समन्वयः ॥

ए॒ष स्य धारं॑या सु॒तोऽव्यो॒ वारे॑भिः पवते म॒दिं॑तंमः ।

क्रीळं॑न्नू॒र्मिर॒पामिं॑व ॥५

ए॒षः । स्यः । धारं॑या । सु॒तः । अव्यः॑ । वारे॑भिः । प॒व॒ते॒ । म॒दिन्ऽतं॑मः ।

क्रीळं॑न् । ऊ॒र्मिः । अ॒पाम्ऽइं॑व ॥५

एषः । स्यः । धारया । सुतः । अव्यः । वारेभिः । पवते । मदिन्ऽतमः ।

क्रीळन् । ऊर्मिः । अपाम्ऽइव ॥५

”स्यः सः "एषः "सुतः अभिषुतः सोमः "अव्यः अवेः "वारेभिः वालैस्तेभ्यः पवित्रेभ्यः “धारया आत्मीयया "पवते कलशमभिलक्ष्य क्षरति । कीदृशः । “मदिन्तमः मादयितृतमः "अपामिव उदकानाम् “ऊर्मिः संघात इव “क्रीळन् इतस्ततः संक्रीडमानः पवते ॥ ॥ १७ ॥

य उ॒स्रिया॒ अप्या॑ अ॒न्तरश्म॑नो॒ निर्गा अकृ॑न्त॒दोज॑सा ।

अ॒भि व्र॒जं त॑त्निषे॒ गव्य॒मश्व्यं॑ व॒र्मीव॑ धृष्ण॒वा रु॑ज ॥६

यः । उ॒स्रियाः॑ । अप्याः॑ । अ॒न्तः । अश्म॑नः । निः । गाः । अकृ॑न्तत् । ओज॑सा ।

अ॒भि । व्र॒जम् । त॒त्नि॒षे॒ । गव्यं॑म् । अश्व्यं॑म् । व॒र्मीऽइं॑व ।
धृ॒ष्णो॒ इति॑ । आ । रु॒ज॒ ॥६

यः । उस्रियाः । अप्याः । अन्तः । अश्मनः । निः । गाः ।
अकृन्तत् । ओजसा ।

अभि । व्रजम् । तत्निषे । गव्यम् । अश्व्यम् । वर्मीऽइव ।
धृष्णो इति । आ । रुज ॥६

“यः सोमः “उस्रियाः उत्सरणशीलाः "अप्याः । अप इत्यन्तरिक्षनाम । तस्मात् भवे छन्दसि ' इति यत् । अन्तरिक्षस्था अहिप्रभृतिभिरसुरैरपहृत्य निहिताः "गाः अपः "अश्मनः । मेघनामैतत् । मेघात् "अन्तः “ओजसा बलेन “निः अकृन्तत् निरच्छिनत् निरगमयत् । अन्तरिक्षात् वृष्टिमकार्षीदित्यर्थः । स त्वमसुरैरपहृतं "गव्यं गोसंबन्धिनम् "अश्व्यम् अश्वेषु भवं "व्रजं समूहम् “अभि "तत्निषे अभितो व्याप्नोषि ॥ ‘ तनु विस्तारे'।

छान्दसे लिटि' तनिपत्योश्छन्दसि ' इत्युपधालोपः । किंच हे “धृष्णो शत्रुधर्षणशील सोम स त्वं "वर्मीव कवचीव शूरः “आ “रुज असुरानाजहि ॥

आ सो॑ता॒ परि॑ षिंच॒ताश्वं॒ न स्तोमं॑म॒प्तुरं॑ रज॒स्तुरं॑ ।

व॒न॒क्र॒क्षमुं॑द॒प्रुतं॑ ॥७

आ । सो॒त॒ । परि॑ । सि॒ञ्च॒त॒ । अश्वं॑म् । न । स्तोमं॑म् ।
अ॒प्ऽतुरं॑म् । र॒जः॒ऽतुरं॑म् ।

व॒न॒ऽक्र॒क्षम् । उ॒द॒ऽप्रुतं॑म् ॥७

आ । सोत । परि । सिञ्चत । अश्वम् । न । स्तोमम् ।
अप्ऽतुरम् । रजःऽतुरम् ।

वनऽक्रक्षम् । उदऽप्रुतम् ॥७

हे ऋत्विजः “आ “सोत सोममभिषुणुत ॥ ‘ षुञ् अभिषवे' । लोटि छान्दसो विकरणस्य लुक् । ‘ तप्तनप्तनथनाश्च ' इति तस्य तबादेशः ॥ किंच “परि “षिञ्चत परितस्तं वसतीवर्यादिभिः सिञ्चत । कीदृशम् । "अश्वं “न अश्वमिव वेगिनं "स्तोमं (https://puraana.tripod.com/pur_index30/stoma.htm) स्तोतव्यम् "अप्तुरम् अन्तरिक्षस्थितानामुदकानां प्रेरकं "रजस्तुरं तेजसां च प्रेरकम् । "वनक्रक्षम् उदकानां कर्षकम् । यद्वा । काष्ठेषु पात्रेषु विप्रकीर्णम् । “उदप्रुतम् उदके गच्छन्तं प्लवमानं सोममभिषुणुताभिषिञ्चत च ॥

स॒हस्रं॑धारं वृष॒भं पं॑यो॒वृधं॑ प्रि॒यं दे॒वाय॒ जन्मं॑ने ।

ऋ॒तेन॒ य ऋ॒तजा॑तो विवावृ॒धे राजा॑ दे॒व ऋ॒तं बृ॒हत् ॥८

स॒हस्रं॑ऽधारम् । वृ॒ष॒भम् । प॒य॒ःऽवृधं॑म् । प्रि॒यम् । दे॒वायं ।
जन्मं॑ने ।

ऋ॒तेनं॑ । यः । ऋ॒तऽजां॑तः । वि॒ऽव॒वृ॒धे । राजा॑ । दे॒वः ।
ऋ॒तम् । बृ॒हत् ॥८

सहस्रऽधारम् । वृषभम् । पयःऽवृधम् । प्रियम् । देवाय ।
जन्मने ।

ऋतेन । यः । ऋतऽजातः । विऽववृधे । राजा । देवः ।
ऋतम् । बृहत् ॥८

"सहस्रधारं बहुधारोपेतं "वृषभं कामानां वर्षकं “पयोवृधम् उदकानां वर्धकं "प्रियं प्रीणयितारं तं सोमं “देवाय देवसंबन्धिने "जन्मने देवेभ्यस्तदर्थमभिषुणुत । “ऋतजातः उदकाज्जातः यः “राजा सोमः “ऋतेन वसतीवर्याख्येनोदकेन "विववृधे विशेषेण वर्धते । कीदृशः

। “देवः द्योतमानः स्तोतव्यो वा “ऋतं सत्यभूतः सन्
"बृहत् महान् तमासुनुतेति पूर्वेण समन्वयः ॥

अ॒भि द्यु॒म्नं बृ॒हद्यश॒ इषं॑स्पते दिदी॒हि दें॑व देव॒युः ।

वि कोशं॑ मध्य॒मं यु॑व ॥९

अ॒भि । द्यु॒म्नम् । बृ॒हत् । यशः॑ । इषः॑ । प॒ते॒ । दि॒दी॒हि ।
दे॒व॒ । दे॒व॒ऽयुः ।

वि । कोशं॑म् । म॒ध्य॒मम् । यु॒व॒ ॥९

अभि । द्युम्नम् । बृहत् । यशः । इषः । पते । दिदीहि ।
देव । देवऽयुः ।

वि । कोशम् । मध्यमम् । युव ॥९

हे “इषस्पते अन्नस्य पते हे “देव स्तोतव्य सोम “देवयुः देवकामस्त्वं “द्युम्नं द्योतमानं “बृहत् प्रभूतं "यशः अन्नमस्मभ्यम् "अभि "दिदीहि आभिमुख्येन प्रकाशय। प्रयच्छेत्यर्थः । आमन्त्रितस्याविद्यमानवत्त्वेन पादादित्वादनिघातः । किंच "मध्यमम् अन्तरिक्षस्थितं "कोशं मेघं “वि “युव वृष्ट्यर्थं विगमय विश्लेषय ॥

आ वं॑च्यस्व सुदक्ष च॒म्वोः॑ सु॒तो वि॒शां वह्नि॒र्न वि॒श्पतिः॑ ।

वृ॒ष्टिं दि॒वः पं॑वस्व री॒तिम॒पां जिन्वा॒ गवि॑ष्टये॒ धियः॑ ॥१०

आ । व॒च्य॒स्व॒ । सु॒ऽद॒क्ष॒ । च॒म्वोः॑ । सु॒तः । वि॒शाम् । वह्निः॑ । न । वि॒श्पतिः॑ ।

वृ॒ष्टिम् । दि॒वः । प॒व॒स्व॒ । री॒तिम् । अ॒पाम् । जिन्वं॑ । गोऽइं॑ष्टये । धियः॑ ॥१०

आ । वच्यस्व । सुऽदक्ष । चम्वोः । सुतः । विशाम् । वह्निः । न । विश्पतिः ।

वृष्टिम् । दिवः । पवस्व । रीतिम् । अपाम् । जिन्व । गोऽइष्टये । धियः ॥१०

हे "सुदक्ष सुवल सोम “चम्वोः अधिषवणफलकयोः "सुतः अभिषुतः विशां प्रजानां "वह्निर्न वोढा "विश्पतिः राजेव सर्वासां प्रजानां वोढा त्वम् “आ “वच्यस्व आगच्छ। कलशमापवस्व । वचेर्गत्यर्थस्य व्यत्ययेन श्यनि रूपम्। किंच त्वं “वृष्टिं वृष्यमाणाम् "अपाम् उदकानां "रीतिं गतिं “दिवः द्युलोकात् "पवस्व कुरु। ततः “गविष्टये गामात्मन इच्छते यजमानाय “धियः कर्माणि “जिन्व आपूरयः ॥ ॥ १८ ॥

ए॒तमु॒ त्यं मं॑द॒च्युतं॑ स॒हस्र॑धारं वृष॒भं दिवो॑ दुहुः ।

विश्वा॒ वसू॑नि॒ बिभ्र॑तं ॥११

ए॒तम् । ओ॒ इति॑ । त्यम् । म॒द॒ऽच्यु॑त॑म् । स॒हस्र॑ऽधारम् । वृ॒ष॒भम् । दिवः॑ । दु॒हुः॒ ।

विश्वा॑ । वसू॑नि । बिभ्र॑तम् ॥११

एतम् । ओं इति । त्यम् । मदऽच्युतम् । सहस्रऽधारम् । वृषभम् । दिवः । दुहुः ।

विश्वा । वसूनि । बिभ्रतम् ॥११

“दिवः देवान् कामयमाना ऋत्विजः "एतं "त्यं तमिमं सोममेव “दुहुः दुदुहुः दुहन्ति । ‘ ग्रावाणो वत्सा ऋत्विजो दुहन्ति' (तै. सं. ६. २. ११. ४) इति तैत्तिरीयकब्राह्मणम् । कीदृशं सोमम् । “मदच्युतं मदस्य प्रेरकं "सहस्रधारं बहुधारं "वृषभं कामानां वर्षकं “विश्वा सर्वाणि “वसूनि धनानि “बिभ्रतं धारयन्तं सोमं दुहन्ति ।

वृषा॒ वि जं॑ज्ञे ज॒नय॒न्नमं॑र्त्यः प्र॒तप॒ञ्ज्योति॑षा॒ तमः॑ ।

स सुष्टु॑तः क॒विभि॑र्नि॒र्णिजं॑ दधे त्रि॒धात्व॑स्य॒ दंस॑सा ॥१२

वृषा॑ । वि । ज॒ज्ञे॒ । ज॒नय॑न् । अम॑र्त्यः । प्र॒ऽतप॑न् ।
ज्योति॑षा । तमः॑ ।

सः । सुऽस्तु॑तः । क॒विऽभिः॑ । निः॒ऽनिजं॑म् । द॒धे॒ ।
त्रि॒ऽधातु॑ । अ॒स्य॒ । दंस॑सा ॥१२

वृषा । वि । जज्ञे । जनयन् । अमर्त्यः । प्रऽतपन् ।
ज्योतिषा । तमः ।

सः । सुऽस्तुतः । कविऽभिः । निःऽनिजम् । दधे ।
त्रिऽधातु । अस्य । दंससा ॥१२

“वृषा कामानां वर्षकः "अमर्त्यः मनुष्यधर्मरहितः सोमः "वि “जज्ञे विज्ञायते । किं कुर्वन् । “जनयन् शब्दं ज्योतिर्वोत्पादयन् "ज्योतिषा स्वीयेन “तमः "प्रतपन् प्रज्वलयन् विनाशयन् प्रादुर्भवति । ततः "कविभिः मेधाविभिः स्तोतृभिः "सुष्टुतः "सः सोमः "निर्णिजं निर्णेजनहेतुं मिश्रणं गव्यं "दधे धारयति । अथ "त्रिधातु त्रिषु सवनेषु देवानां पोषकम् । यद्वा । त्रयः सोमधारका द्रोणकलशादयो यस्मिन् । तद्यज्ञार्थं कर्म "अस्य सोमस्य “दंससा कर्मणा ध्रियते खलु ॥

स सुं॒न्वे यो वसूं॒नां यो रा॒यामां॒ने॒ता य इळांनां ।

सोमो॒ यः सुं॒क्षिती॒नां ॥१३

सः । सु॒न्वे॒ । यः । वसूंनाम् । यः । रा॒याम् । आ॒ऽने॒ता । यः । इळांनाम् ।

सोमः॑ । यः । सु॒ऽक्षि॒ती॒नाम् ॥१३

सः । सुन्वे । यः । वसूनाम् । यः । रायाम् । आऽनेता । यः । इळानाम् ।

सोमः । यः । सुऽक्षितीनाम् ॥१३

“सः सोमः "सुन्वे अभिसुषुव ऋत्विग्भिः । "यः सोमः “वसूनां धनानाम् "आनेता "यः च "रायाम् । रान्ति प्रयच्छन्ति क्षीरादिकमिति रायो गावः । तेषामानेता "यः च “इळानाम् अन्नानां च "यः च "सोमः "सुक्षितीनां सुनिवासानां शोभनमनुष्ययुक्तानां गृहाणामानेता विद्यते सोऽभिषुतोऽभूदिति ॥

यस्यं न॒ इन्द्रः॒ पिबा॒द्यस्यं म॒रुतो॒ यस्यं वार्य॒मणा॒ भगः॑ ।

आ येनं मि॒त्रावरुं॑णा॒ करां॑मह॒ एन्द्र॒मवं॑से म॒हे ॥१४

यस्यं । न॒ः । इन्द्रः॑ । पिबा॑त् । यस्यं । म॒रुतः॑ । यस्यं । वा॒ । अ॒र्य॒मणा॑ । भगः॑ ।

आ । येनं । मि॒त्रावरुं॑णा । करा॑महे । आ । इन्द्रं॑म् । अवं॑से । म॒हे ॥१४

यस्य । नः । इन्द्रः । पिबात् । यस्य । मरुतः । यस्य । वा । अर्यमणा । भगः ।

आ । येन । मित्रावरुणा । करामहे । आ । इन्द्रम् । अवसे । महे ॥१४

“नः अस्मदीयं "यस्य यं सोमम् "इन्द्रः "पिबात् पिबति । 'पा पाने'। लेट्याडागमः। यं च सोमं “मरुतः पिबन्ति "वा अपि च "अर्यमणा एतन्नामकेन देवेन सह “भगः देवः यं सोमं पिबति "येन सोमेन “मित्रावरुणा मित्रावरुणौ वयम् "आ “करामहे अभिमुखीकुर्महे तथा “महे महते “अवसे

रक्षणाय येन च सोमेन “इन्द्रम् अभिमुखीकुर्महे स सोमोऽभिषूयते ॥

इन्द्रा॑य सोम॒ पात॑वे॒ नृभि॑र्य॒तः स्वा॑यु॒धो म॒दिं॑त॑मः ।

पव॑स्व॒ मधुं॑मत्तमः ॥१५

इन्द्रा॑य । सो॒म॒ । पात॑वे । नृऽभि॑ः । य॒तः । सु॒ऽआ॒यु॒धः ।
म॒दिन्ऽत॑मः ।

पव॑स्व । मधुं॑मत्ऽतमः ॥१५

इन्द्राय । सोम । पातवे । नृऽभिः । यतः । सुऽआयुधः ।
मदिन्ऽतमः ।

पवस्व । मधुमत्ऽतमः ॥१५

हे “सोम "मधुमत्तमः अतिशयेन माधुर्योपेतस्त्वम् "इन्द्राय “पातवे पानार्थं "पवस्व कलशे क्षर । कीदृशः । "नृभिः कर्मनेतृभिर्ऋत्विग्भिः "यतः संयतः "स्वायुधः शोभनस्फ्यकपालाद्यायुधोपेतः “मदिन्तमः मादयितृतमः ॥

इन्द्र॑स्य॒ हार्दि॑ सोम॒धान॒मा वि॑श समु॒द्रमि॑व॒ सिंध॑वः ।

जुष्टो॑ मि॒त्राय॒ वरु॑णाय वा॒यवे॑ दि॒वो वि॑ष्टं॒भ उ॑त्त॒मः ॥१६

इन्द्र॑स्य । हार्दि॑ । सो॒म॒ऽधान॑म् । आ । वि॒श॒ । स॒मु॒द्रम्ऽइ॑व । सिन्ध॑वः ।

जुष्टः॑ । मि॒त्राय॑ । वरु॑णाय । वा॒यवे॑ । दि॒वः । वि॒ष्ट॒म्भः । उ॒त्ऽत॒मः ॥१६

इन्द्रस्य । हार्दि । सोमऽधानम् । आ । विश । समुद्रम्ऽइव । सिन्धवः ।

जुष्टः । मित्राय । वरुणाय । वायवे । दिवः । विष्टम्भः । उत्ऽतमः ॥१६

हे सोम त्वम् "इन्द्रस्य "हार्दि, हृदयंगमं हृदयभूतं वा "सोमधानम् । सोमो निधीयते अस्मिन्निति सोमधानः कलशः । तम् "आ "विश प्रविश । तत्र दृष्टान्तः । "समुद्रमिव यथा समुद्रं "सिन्धवः नद्यः प्रविशन्ति तद्वत्। कीदृशस्त्वम् । "मित्राय वरुणाय "वायवे एतेभ्यः "जुष्टः पर्याप्तः "दिवः द्युलोकस्य विष्टम्भः विष्टम्भयिता स्थापयिता "उत्तमः सर्वेषामुत्कृष्टतमस्त्वं कलशमाविश ॥ ॥ १९ ॥

टिप्पणी

९.१०८.१ पवस्व मधुमत्तम इति

सफ (https://sa.wikisource.org/s/1z69)

शङ्कु (https://sa.wikisource.org/s/2mr3) (संवत्सरपर्व)

९.१०८.३ त्वं ह्याङ्ग दैव्या इति

शैतोष्माणि चत्वारि (https://sa.wikisource.org/s/2gzt)

बृहत्कम् (https://sa.wikisource.org/s/1zop)

स्वारं सौपर्णम् (https://sa.wikisource.org/s/2huy)

९.१०८.५ एष स्य धारया इति

शार्करम् (https://sa.wikisource.org/s/2hlw)

९.१०८.९ अभि द्युम्नं बृहद्यश इति

ऐषिरम् (https://sa.wikisource.org/s/2ho7)

मण्डल ९

सूक्तं ९.११सूक्तं ९.४१सूक्तं ९.७१सूक्तं ९.१०१

सूक्तं ९.१२सूक्तं ९.४२सूक्तं ९.७२सूक्तं ९.१०२

सूक्तं ९.१३सूक्तं ९.४३सूक्तं ९.७३सूक्तं ९.१०३

सूक्तं ९.१४सूक्तं ९.४४सूक्तं ९.७४सूक्तं ९.१०४

सूक्तं ९.१५सूक्तं ९.४५सूक्तं ९.७५सूक्तं ९.१०५

सूक्तं ९.१६सूक्तं ९.४६सूक्तं ९.७६सूक्तं ९.१०६

सूक्तं ९.१७सूक्तं ९.४७सूक्तं ९.७७सूक्तं ९.१०७

सूक्तं ९.१८सूक्तं ९.४८सूक्तं ९.७८सूक्तं ९.१०८

सूक्तं ९.१९सूक्तं ९.४९सूक्तं ९.७९सूक्तं ९.१०९

सूक्तं ९.२०सूक्तं ९.५०सूक्तं ९.८०सूक्तं ९.११०

सूक्तं ९.२१सूक्तं ९.५१सूक्तं ९.८१सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

२७ मार्च् २०२२ (तमे) दिनाङ्के ००:३१ समये अन्तिमपरिवर्तनं जातम् •

ऋग्वेदः सूक्तं ९.१०९

ऋग्वेदः - मण्डल ९
← सूक्तं ९.१०८
सूक्तं ९.१०९
अग्नयो धिष्ण्या ऐश्वरयः।
सूक्तं ९.११० →

दे. पवमानः सोमः। द्विपदा विराट्।

परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥१॥

इन्द्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ॥२॥

एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥३॥

पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥४॥

शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै ॥५॥

दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥६॥

पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः ॥७॥

नृभिर्येमानो जज्ञानः पूतः क्षरद्विश्वानि मन्द्रः स्वर्वित् ॥८॥

इन्दुः पुनानः प्रजामुराणः करद्विश्वानि द्रविणानि नः ॥९॥

पवस्व सोम क्रत्वे दक्षायाश्वो न निक्तो वाजी धनाय ॥१०॥

तं ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥११॥

शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥१२॥

इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥१३॥

बिभर्ति चार्विन्द्रस्य नाम येन विश्वानि वृत्रा जघान ॥१४॥

पिबन्त्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य ॥१५॥

प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम् ॥१६॥

स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥१७॥

प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ॥१८॥

असर्जि वाजी तिरः पवित्रमिन्द्राय सोमः सहस्रधारः ॥१९॥

अञ्जन्त्येनं मध्वो रसेनेन्द्राय वृष्ण इन्दुं मदाय ॥२०॥

देवेभ्यस्त्वा वृथा पाजसेऽपो वसानं हरिं मृजन्ति ॥२१॥

इन्दुरिन्द्राय तोशते नि तोशते श्रीणन्नुग्रो रिणन्नपः ॥२२॥

सायणभाष्यम्

‘परि प्र' इति द्वाविंशत्यृचे द्वैपदं षष्ठं सूक्तम् । यज्ञे सदस्यवस्थितहोत्रीयादिधिष्ण्योपेता अग्नयो नामेश्वरपुत्रा ऋषयः । विंशतिका द्विपदा विराजः । पवमानः सोमो देवता । तथा चानुक्रान्तं -- परि प्र द्व्यधिकाग्नयो धिष्ण्या ऐश्वर द्वैपदम्' इति । गतो विनियोगः ॥

परि॒ प्र ध॒न्वेंद्रा॑य सोम स्वा॒दुर्मि॒त्राय॑ पू॒ष्णे भगा॑य ॥१

परिं । प्र । धन्व । इन्द्रांय । सोम । स्वादुः । मित्रायं । पूष्णे । भगांय ॥१

परि । प्र । धन्व । इन्द्राय । सोम । स्वादुः । मित्राय । पूष्णे । भगाय ॥१

हे "सोम "स्वादुः स्वादुरसस्त्वम् "इन्द्राय “मित्राय “पूष्णे “भगाय एतेभ्यो देवेभ्यः “परि “प्र “धन्व परितः पात्रेषु प्रक्षर ॥

इंद्रंस्ते सोम सुतस्यं पेयाः क्रत्वे दक्षांय विश्वें च देवाः ॥२

इन्द्रः । ते । सोम । सुतस्यं । पेयाः । क्रत्वें । दक्षांय । विश्वें । च । देवाः ॥२

इन्द्रः । ते । सोम । सुतस्य । पेयाः । क्रत्वे । दक्षाय । विश्वे । च । देवाः ॥२

हे “सोम "सुतस्य अभिषुतस्य “ते तव स्वं भागम् "इन्द्रः "पेयाः पेयात् पिबतु ॥ पातेराशीर्लिङि रूपम् । पुरुषव्यत्ययः ॥ किमर्थम् । "क्रत्वे क्रतवे प्रज्ञानाय “दक्षाय बलाय च । किंच अमी “विश्वे सर्वे देवाः “च त्वदीयमंशं पिबन्तु ॥

ए॒वामृता॑य म॒हे क्षया॑य॒ स शु॒क्रो अ॑र्ष दि॒व्यः पी॒यूषः॑ ॥३

ए॒व । अ॒मृता॑य । म॒हे । क्षया॑य । सः । शु॒क्रः । अ॒र्ष॒ । दि॒व्यः । पी॒यूषः॑ ॥३

एव । अमृताय । महे । क्षयाय । सः । शुक्रः । अर्ष । दिव्यः । पीयूषः ॥३

हे सोम “शुक्रः दीप्तः “दिव्यः दिवि भवः "पीयूषः देवैः पातव्यः "सः त्वम् "अमृताय अमरणाय "महे महते

"क्षयाय निवासाय च “एव “अर्ष एवं पवस्व क्षर ॥

पवं॑स्व सोम म॒हान्त्सं॑मु॒द्रः पि॒ता दे॒वानां॒ विश्वा॒भि धाम॑ ॥४

पवं॑स्व । सो॒म॒ । म॒हान् । स॒मु॒द्रः । पि॒ता । दे॒वानां॑म् ।
विश्वा॑ । अ॒भि । धाम॑ ॥४

पवस्व । सोम । महान् । समुद्रः । पिता । देवानाम् ।
विश्वा । अभि । धाम ॥४

हे “सोम “महान् देवेभ्यो दीयमानत्वेन महत्त्वयुक्तः "समुद्रः समुन्दनः । यस्मात् समुद्द्रवन्ति रसास्तादृशः। "पिता सर्वेषां पालयिता त्वं "देवानां "विश्वा विश्वानि सर्वाणि “धाम धामानि शरीराण्यभिलक्ष्य “पवस्व ।।

शु॒क्रः पं॑वस्व दे॒वेभ्यः॑ सोम दि॒वे पृं॑थि॒व्यै शं च॑ प्र॒जायै॑ ॥५

शु॒क्रः । प॒व॒स्व॒ । दे॒वेभ्यः॑ । सो॒म॒ । दि॒वे । पृ॒थि॒व्यै । शम् । च॒ । प्र॒ऽजायै॑ ॥५

शुक्रः । पवस्व । देवेभ्यः । सोम । दिवे । पृथिव्यै । शम् । च । प्रऽजायै ॥५

हे सोम “शुक्रः दीप्तस्त्वं देवेभ्यः देवार्थं पवस्व क्षर । किंच “दिवे “पृथिव्यै च द्यावापृथिवीभ्यां च ततः “प्रजायै प्रजाभ्यश्च “शं सुखं “च कुरु ।।

दि॒वो ध॒र्तासि॑ शु॒क्रः पी॒यूषः॑ स॒त्ये विध॑र्मन्वा॒जी प॑वस्व ॥६

दि॒वः । ध॒र्ता । अ॒सि॒ । शु॒क्रः । पी॒यूषः॑ । स॒त्ये । विऽध॑र्मन् । वा॒जी । प॒व॒स्व॒ ॥६

दिवः । धर्ता । असि । शुक्रः । पीयूषः । सत्ये । विऽधर्मन् । वाजी । पवस्व ॥६

हे सोम “शुक्रः दीप्तः “पीयूषः पातव्यस्त्वं “दिवः द्युलोकस्य “धर्ता धारकः “असि । “वाजी बलवान् स त्वं “सत्ये सत्यभूते “विधर्मन् विधेर्मणि । विविधकर्माण ऋत्विजो यस्मिन् । यद्वा । विविधसोमादिहविषा धारके । अस्मिन् यज्ञे “पवस्व क्षर ॥

पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः ॥७

पवस्व । सोम । द्युम्नी । सुऽधारः । महाम् । अवीनाम् । अनु । पूर्व्यः ॥७

पवस्व । सोम । द्युम्नी । सुऽधारः । महाम् । अवीनाम् । अनु । पूर्व्यः ॥७

हे सोम “द्युम्नी । 'द्युम्नं द्योततेर्यशो वान्नं वा ' इति यास्कः । अन्नवान् यशस्वी वा “सुधारः शोभनधारायुक्तः पूर्व्यः

पुरातनस्त्वं “महां महताम् “अवीनां रोम्णां रोमभ्यः सकाशादनुक्रमेण “पवस्व क्षर ।।

नृभिर्येमा॒नो जज्ञा॒नः पू॒तः क्षर॒द्विश्वा॑नि म॒न्द्रः स्व॒र्वित् ॥८

नृऽभिः॑ । ये॒मा॒नः । ज॒ज्ञा॒नः । पू॒तः । क्षर॑त् । विश्वा॑नि । म॒न्द्रः । स्वः॒ऽवित् ॥८

नृऽभिः । येमानः । जज्ञानः । पूतः । क्षरत् । विश्वानि । मन्द्रः । स्वःऽवित् ॥८

“नृभिः कर्मनेतृभिर्ऋत्विग्भिः “येमानः नियम्यमानः “जज्ञानः जायमानः “पूतः पवित्रेण शोधितः “मन्द्रः मोदमानः “स्वर्वित सर्वज्ञः एतादृशः सोमः “विश्वानि सर्वाणि धनान्यस्मभ्यं “क्षरत् क्षरतु ददातु ॥

इंदुः॑ पुना॒नः प्र॒जामु॑रा॒णः कर॒द्विश्वा॑नि॒ द्रवि॑णानि नः ॥९

इन्दुः॑ । पु॒ना॒नः । प्र॒ऽजाम् । उ॒रा॒णः । कर॑त् । विश्वा॑नि । द्रवि॑णानि । न॒ः ॥९

इन्दुः । पुनानः । प्रऽजाम् । उराणः । करत् । विश्वानि । द्रविणानि । नः ॥९

“पुनानः पूयमानः “उराणः । ' उराण उरु कुर्वाणः ' (निरु. ६. १७) इति यास्कः । देवान् बहु कुर्वाणः “इन्दुः सोमः “नः अस्माकं “प्रजाम् अपत्यादिका “विश्वानि व्याप्तानि द्रविणानि धनानि च “करत् करोतु । करोतेर्लेङि रूपम् ॥

पव॑स्व सोम॒ क्रत्वे॒ दक्षा॒याश्वो॒ न नि॒क्तो वा॒जी धना॑य ॥१०

पवं॑स्व । सो॒म॒ । क्रत्वे॑ । दक्षा॑य । अश्वः॑ । न । नि॒क्तः ।
वा॒जी । धना॑य ॥१०

पवस्व । सोम । क्रत्वे । दक्षाय । अश्वः । न । निक्तः ।
वाजी । धनाय ॥१०

हे “सोम “अश्वो “न अश्व इव “निक्तः
वसतीवरीभिरद्भिर्निक्त:२ “वाजी वेगवांस्त्वं “क्रत्वे क्रतवे
प्रज्ञानाय “दक्षाय बलाय “धनाय धनार्थं च “पवस्व क्षर ॥
॥ २० ॥

तं तें॑ सो॒तारो॒ रसं॒ मदा॑य पु॒नंति॒ सोमं॑ म॒हे द्यु॒म्नायं॑ ॥११

तम् । ते॒ । सो॒तारः॑ । रसं॑म् । मदा॑य । पु॒नन्ति॑ । सोमं॑म् ।
म॒हे । द्यु॒म्नायं॑ ॥११

तम् । ते । सोतारः । रसम् । मदाय । पुनन्ति । सोमम् ।
महे । द्युम्नाय ॥११

सोतारः अभिषोतार ऋत्विजो हे सोम “ते तव स्वभूतं “रसं “मदाय मदार्थं “पुनन्ति । तदेवोच्यते । "महे महते “द्युम्नाय । “द्युम्नं द्योततेर्यशो वान्नं वा । अन्नाय यशसे वा सोमं पुनन्ति शोधयन्ति । यद्वा । सोमममभिषूयमाणं तं रसं पुनन्तीत्येकवाक्यतया योजनीयम् ॥

शिशुं जज्ञानं हरिं मृजंति पवित्रे सोमं देवेभ्य इंदुं ॥१२

शिशुंम् । जज्ञानम् । हरिंम् । मृजन्ति । पवित्रें । सोमंम् ।
देवेभ्यः । इन्दुंम् ॥१२

शिशुम् । जज्ञानम् । हरिम् । मृजन्ति । पवित्रे । सोमम् ।
देवेभ्यः । इन्दुम् ॥१२

"शिशुम् अपां पुत्रभूतं "जज्ञानं जायमानं “हरिं हरितवर्णम् “इन्दुं दीप्तं “सोमं “देवेभ्यः देवार्थं “पवित्रे “मृजन्ति ऋत्विजो मार्जयन्ति ।

इंदुः॑ पवि॒ष्ट चारु॒र्मदा॑या॒पामु॒पस्थे॑ क॒विर्भगा॑य ॥१३

इन्दुः॑ । प॒वि॒ष्ट॒ । चारुः॑ । मदा॑य । अ॒पाम् । उ॒पऽस्थे॑ । क॒विः । भगा॑य ॥१३

इन्दुः । पविष्ट । चारुः । मदाय । अपाम् । उपऽस्थे । कविः । भगाय ॥१३

“चारुः कल्याणरूपः “कविः क्रान्तप्रज्ञः “इन्दुः सोमः "अपाम् उदकानाम् “उपस्थे उपस्थानेऽन्तरिक्षे पवित्रे वा "मदाय मदार्थं "भगाय भजनीयधनार्थं च “पविष्ट पवते ॥

बिभ॑र्ति॒ चार्विंद्र॑स्य॒ नाम॒ येन॒ विश्वा॑नि वृ॒त्रा ज॒घान॑ ॥१४

बिभ॑र्ति । चारु॑ । इन्द्र॑स्य । नाम॑ । येन॑ । विश्वा॑नि । वृ॒त्रा । ज॒घान॑ ॥१४

बिभर्ति । चारु । इन्द्रस्य । नाम । येन । विश्वानि । वृत्रा । जघान ॥१४

स सोमः "चारु कल्याणम् “इन्द्रस्य “नाम शरीरं “बिभर्ति धारयति पोषयति । “येन शरीरेणेन्द्रः “विश्वानि सर्वाणि वृत्राणि पापरूपाणि रक्षांसि जघान हतवान् ।

पिबं॑त्यस्य॒ विश्वे॑ दे॒वासो॒ गोभि॑ः श्री॒तस्य॒ नृभि॑ः सु॒तस्य॑ ॥१५

पिबं॑न्ति । अ॒स्य॒ । विश्वे॑ । दे॒वासः॑ । गोभिः॑ । श्री॒तस्यं॑ । नृऽभिः॑ । सु॒तस्यं॑ ॥१५

पिबन्ति । अस्य । विश्वे । देवासः । गोभिः । श्रीतस्य । नृऽभिः । सुतस्य ॥१५

“विश्वे सर्वे "देवासः देवाः “गोभिः गोविकारैः "श्रीतस्य मिश्रितं "नृभिः कर्मनेतृभिर्ऋत्विग्भिः “सुतस्य अभिषुतम् “अस्य अमुं सोमं “पिबन्ति । द्वितीयार्थे षष्ठ्यः ॥

प्र सुं॑वा॒नो अं॑क्षाः स॒हस्रं॑धारस्ति॒रः प॒वित्रं॒ वि वा॒रमव्यं॑ ॥१६

प्र । सु॒वा॒नः । अ॒क्षा॒रितिं॑ । स॒हस्रं॑ऽधारः । ति॒रः । प॒वित्रं॑म् । वि । वारं॑म् । अव्यं॑म् ॥१६

प्र । सुवानः । अक्षारिति । सहस्रऽधारः । तिरः । पवित्रम् । वि । वारम् । अव्यम् ॥१६

“सुवानः अभिषूयमाणः अत एव “सहस्रधारः बहुधारायुक्तः सोमः “अव्यम् अविभवं “वारं वालं "पवित्रं “तिरः व्यवधायकं कुर्वन् “प्र “अक्षाः विविधं प्रक्षरति । क्षरतेर्लुङि रूपम् ॥

स वा॒ज्यं॑क्षाः स॒हस्रं॑रेता अ॒द्भिर्मृं॑जा॒नो गोभिः॑ श्रीणा॒नः ॥ १७

सः । वा॒जी । अ॒क्षा॒रिति॑ । स॒हस्रं॑ऽरेताः । अ॒त्ऽभिः । मृ॒जा॒नः । गोभिः॑ । श्री॒णा॒नः ॥१७

सः । वाजी । अक्षारिति । सहस्रऽरेताः । अत्ऽभिः । मृजानः । गोभिः । श्रीणानः ॥१७

“वाजी वेगवान् बलवान् वा “सः सोमः "अक्षाः क्षरति । कीदृशः । “सहस्ररेताः बहुरेतस्को बहूदकः “अद्भिः

वसतीवरीभिः "मृजानः मृज्यमानः “गोभिः गोविकारैः क्षीरादिभिः “श्रीणानः श्रीयमाणः ॥

प्र सोम॑ या॒ही॑द्र॑स्य कु॒क्षा नृभि॑र्ये॑म॒नो अद्रि॑भिः सु॒तः ॥१८

प्र । सो॒म॒ । या॒हि॒ । इन्द्र॑स्य । कु॒क्षा । नृऽभि॑ः । ये॒मा॒नः । अद्रि॑ऽभिः । सु॒तः ॥१८

प्र । सोम । याहि । इन्द्रस्य । कुक्षा । नृऽभिः । येमानः । अद्रिऽभिः । सुतः ॥१८

हे “सोम “नृभिः ऋत्विग्भिः "येमानः नियम्यमानः “अद्रिभिः ग्रावभिः “सुतः अभिषुतः त्वम् “इन्द्रस्य “कुक्षा ॥ सप्तम्या डादेशः ॥ कुक्षावुदरभूते कलशे वा “प्र “याहि प्रकर्षेण गच्छ ॥

अस॑र्जि वा॒जी ति॒रः प॒वित्र॒मिंद्रा॑य॒ सोमः॑ स॒हस्र॑धारः ॥१९

अस॑र्जि । वा॒जी । ति॒रः । प॒वित्र॑म् । इन्द्रा॑य । सोमः॑ । स॒हस्र॑ऽधारः ॥१९

असर्जि । वाजी । तिरः । पवित्रम् । इन्द्राय । सोमः । सहस्रऽधारः ॥१९

“वाजी बलवान् वेगवान् वा “पवित्रं तिरस्कुर्वन् “सहस्रधारः बहुधारः “सोमः “इन्द्राय इन्द्रार्थम् "असर्जि सृज्यते ॥

अ॒जंत्ये॑न॒ं मध्वो॒ रसे॒नेंद्रा॑य॒ वृष्ण॒ इंदु॒ं मदा॑य ॥२०

अ॒ञ्जन्ति॑ । ए॒न॒म् । मध्वः॑ । रसे॑न । इन्द्रा॑य । वृष्णे॑ । इन्दु॑म् । मदा॑य ॥२०

अञ्जन्ति । एनम् । मध्वः । रसेन । इन्द्राय । वृष्णे । इन्दुम् । मदाय ॥२०

"वृष्णे कामानां वर्षित्रे “इन्द्राय इन्द्रस्य “मदाय मदार्थं “मध्वः मधुनः “रसेन गव्येन “एनम् “इन्दुं सोममृत्विजः “अञ्जन्ति संयोजयन्ति ॥

दे॒वेभ्यं॑स्त्वा॒ वृथा॒ पाजं॑से॒ऽपो वसा॑नं॒ हरिं॑ मृजंति ॥२१

दे॒वेभ्यः॑ । त्वा॒ । वृथा॑ । पाजं॑से । अ॒पः । वसा॑नम् । हरिं॑म् । मृ॒ज॒न्ति॒ ॥२१

देवेभ्यः । त्वा । वृथा । पाजसे । अपः । वसानम् । हरिम् । मृजन्ति ॥२१

हे सोम “अपः उदकानि “वसानम् आच्छादयन्तं “हरिं हरितवर्णं “त्वा त्वां “वृथा अनायासेन ऋत्विजः “मृजन्ति

शोधयन्ति । किमर्थम् । “देवेभ्यः देवानां पानार्थं “पाजसे तेषां बलार्थम् ॥

इंदु॒रिंद्रा॑य तोशते॒ नि तो॑शते श्री॒णन्नु॒ग्रो रि॒णन्न॒पः ॥२२

इन्दुः॑ । इन्द्रा॑य । तो॒श॒ते॒ । नि । तो॒श॒ते॒ । श्री॒णन् । उ॒ग्रः । रि॒णन् । अ॒पः ॥२२

इन्दुः । इन्द्राय । तोशते । नि । तोशते । श्रीणन् । उग्रः । रिणन् । अपः ॥२२

“इन्दुः सोमः “इन्द्राय इन्द्रार्थं “तोशते हन्यते अभिषूयते । “नि “तोशते नितरामभिषूयते । तोशतिर्वधकर्मा । कीदृशः । “श्रीणन् गव्यैः क्षीरादिभिः श्रीयमाणः तानि मिश्रयन् वा “उग्रः उद्गूर्णबलः “अपः उदकानि वसतीवरीः “रिणन् प्रेरयन् सोमोऽभिषूयते ॥ ॥ २१ ॥

टिप्पणी

९.१०९.१ परि प्र धन्व इति

वाङ्निधनसौहविषम् (https://sa.wikisource.org/s/2hvl)

स्वर्न्निधनसौहविषम् (https://sa.wikisource.org/s/2jso)

इन्द्रस्य संक्रमे द्वे (https://sa.wikisource.org/s/2i67) (ग्रामगेयः)

९.१०९.४ पवस्व सोम महान्त्समुद्रः इति

धर्म (https://sa.wikisource.org/s/2f2e)

धर्मधाम (https://sa.wikisource.org/s/2a4g)

९.१०९.७ पवस्व सोम द्युम्नी इति

पवित्रम् (https://sa.wikisource.org/s/2jwn)

९.१०९.१० पवस्व सोम क्रत्वे दक्षाय इति

विधर्म (https://sa.wikisource.org/s/2f2g)

विधर्म सामनी (https://sa.wikisource.org/s/2f2f)

९.१०९.१६ प्र सुवानो अक्षाः इति

सौहविषम् (https://sa.wikisource.org/s/2hlv)

मण्डल ९

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.११०

ऋग्वेदः - मण्डल ९

← सूक्तं ९.१०९

सूक्तं ९.११०

त्र्यरुणस्त्रैवृष्ण्यः त्रसदस्युः पौरुकुत्स्यः

सूक्तं ९.१११ →

दे. पवमानः सोमः। १-३ पिपीलिकामध्या अनुष्टुप्, ४-९ ऊर्ध्वबृहती, १०-१२ विराट् ।

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।

द्विषस्तरध्या ऋणया न ईयसे ॥१॥

अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।

वाजाँ अभि पवमान प्र गाहसे ॥२॥

अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।

गोजीरया रंहमाणः पुरंध्या ॥३॥

अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः ।

सदासरो वाजमच्छा सनिष्यदत् ॥४॥

अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।

शर्याभिर्न भरमाणो गभस्त्योः ॥५॥

आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।

वारं न देवः सविता व्यूर्णुते ॥६॥

त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।

स त्वं नो वीर वीर्याय चोदय ॥७॥

दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत ।

इन्द्रमभि जायमानं समस्वरन् ॥८॥

अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।

यूथे न निष्ठा वृषभो वि तिष्ठसे ॥९॥

सोमः पुनानो अव्यये वारे शिशुर्न क्रीळन्पवमानो अक्षाः ।

सहस्रधारः शतवाज इन्दुः ॥१०॥

एष पुनानो मधुमाँ ऋतावेन्द्रायेन्दुः पवते स्वादुरूर्मिः ।

वाजसनिर्वरिवोविद्वयोधाः ॥११॥

स पवस्व सहमानः पृतन्यून्सेधन्रक्षांस्यप दुर्गहाणि ।

स्वायुधः सासह्वान्सोम शत्रून् ॥१२॥

सायणभाष्यम्

“पर्यु षु' इति द्वादशर्चं सप्तमं सूक्तम् । त्र्यरुणत्रसदस्यू राजर्षी अस्य सूक्तस्य द्रष्टारौ । आदितस्तिस्रः पिपीलिकमध्या अनुष्टुभो द्वादशकाष्टकद्वादशकवत्यः । ततः षडूर्ध्वबृहत्यो द्वादशकत्रयवत्यः । अथ दशम्याद्यास्तिस्रो विराजः । पवमानः सोमो देवता । तथा

चानुक्रान्तं- पर्यू षु द्वादश त्र्यरुणत्रसदस्यू तिस्रोऽनुष्टुभः पिपीलिकमध्याः षडूर्ध्वबृहत्यस्तिस्रश्च विराजः' इति ।
गतो विनियोगः ।।

पर्यू॒ षु प्र धंन्व॒ वाजंसातये॒ परिं वृ॒त्राणिं स॒क्षणिः॑ ।

द्वि॒षस्त॒रध्यां ऋ॒ण॒या नं ईयसे ॥१

परिं । ऊ॒ इतिं । सु । प्र । ध॒न्व॒ । वाजंऽसातये । परिं । वृ॒त्राणिं । स॒क्षणिः॑ ।

द्वि॒षः । त॒रध्यैं । ऋ॒ण॒ऽयाः । न॒ः । ई॒य॒से॒ ॥१

परि । ऊं इति । सु । प्र । धन्व । वाजऽसातये । परि । वृत्राणि । सक्षणिः ।

द्विषः । तरध्यै । ऋणऽयाः । नः । ईयसे ॥१

हे सोम “सु सुष्ठु “वाजसातये अस्मभ्यमन्नदानायैव “परि “प्र “धन्व परितः प्रगच्छ । यद्वा । वाजसातयेऽन्नलाभाय संग्रामं प्रगच्छ । किंच “सक्षणिः सहनशीलस्त्वं “वृत्राणि शत्रून् “परि गच्छ। तदेवोच्यते । “नः अस्माकम् “ऋणयाः ऋणानां यापयिता विनाशयिता त्वं “द्विषः शत्रून् “तरध्यै तरीतुं हन्तुम् “ईयसे परिगच्छसि ।।

अनु॒ हि त्वा॑ सु॒तं सो॑म॒ मदा॑मसि म॒हे सं॑मर्य॒राज्ये॑ ।

वाजाँ॑ अ॒भि प॑वमान॒ प्र गा॑हसे ॥२

अनु॑ । हि । त्वा॒ । सु॒तम् । सो॒म॒ । मदा॑मसि । म॒हे । स॒म॒र्य॒ऽराज्ये॑ ।

वाजा॑न् । अ॒भि । प॒व॒मा॒न॒ । प्र । गा॒ह॒से॒ ॥२

अनु । हि । त्वा । सुतम् । सोम । मदामसि । महे । समर्यऽराज्ये ।

वाजान् । अभि । पवमान । प्र । गाहसे ॥२

हे “सोम “सुतम् अभिषुतं “त्वा त्वां वयम् “अनु “मदामसि “हि अनुमदामः । अनुक्रमेणाभिष्टुमः खलु । हे “पवमान सोम स त्वं “महे महति “समर्यराज्ये महत् समनुष्यं त्वदीयं राज्यमनुपालयितुं “वाजान् शत्रुबलान्यभिलक्ष्य “प्र “गाहसे प्रगच्छसि ॥

अजी॑जनो॒ हि प॑वमान॒ सूर्यं॑ वि॒धारे॒ शक्म॑ना॒ पयः॑ ।

गोजी॑रया॒ रंह॑माणः॒ पुरं॑ध्या ॥३

अजी॑जनः । हि । प॒व॒मा॒न॒ । सूर्य॑म् । वि॒ऽधारे॑ । शक्म॑ना । पयः॑ ।

गोऽजीरया । रंहंमाणः । पुरंम्ऽध्या ॥३

अजीजनः । हि । पवमान । सूर्यम् । विऽधारे । शक्मना । पयः ।

गोऽजीरया । रंहमाणः । पुरम्ऽध्या ॥३

हे “पवमान सोम त्वं “पयः पयसः उदकस्य “विधारे विधारकेऽन्तरिक्षे “शक्मना समर्थेन बलेन “सूर्यम् "अजीजनो “हि उत्पादितवान् भवसि खलु । कीदृशः । “गोजीरया स्तोतृभ्यो गवां प्रेरकेण । स्तोतॄणां प्रेरितपशुकेनेत्यर्थः। तादृशेन “पुरंध्या बहुविधप्रज्ञानेन युक्तः “रंहमाणः वेगं कुर्वाणस्त्वं सूर्येमजीजनः ।।

अजींजनो अमृत॒ मर्त्ये॒ष्वाँ ऋ॒तस्य॑ धर्म॑न्न॒मृतं॑स्य॒ चारुं॑णः ।

सदा॑सरो॒ वाज॒मच्छा॒ सनिं॑ष्यदत् ॥४

अजीं॑जनः । अ॒मृ॒त॒ । मर्त्ये॑षु । आ । ऋ॒तस्यं॑ । धर्म॑न् ।
अ॒मृतं॑स्य । चारुं॑णः ।

सदा॑ । अ॒स॒रः॒ । वाजं॑म् । अच्छं॑ । सनिं॑स्यदत् ॥४

अजीजनः । अमृत । मर्त्येषु । आ । ऋतस्य । धर्मन् ।
अमृतस्य । चारुणः ।

सदा । असरः । वाजम् । अच्छ । सनिस्यदत् ॥४

हे “अमृत मरणधर्मरहित सोम त्वम् “ऋतस्य सत्यभूतस्य “चारुणः कल्याणस्य “अमृतस्य उदकस्य “धर्मन् धारकेऽन्तरिक्षे सूर्यम् "अजीजनः । किमर्थम् । “मर्त्येष्वा मनुष्येष्वभिमुखीभवनाय। किंच “सनिष्यदत् संभजन स त्वं “वाजमच्छ संग्राममभिलक्ष्य “सदा “असरः सरसि गच्छसि ।।

अ॒भ्यं॑भि॒ हि श्रव॑सा त॒तर्दि॒थोत्सं॒ न कं चि॑ज्जन॒पान॒मक्षि॑तं ।

शर्या॑भि॒र्न भर॑माणो॒ गभ॑स्त्योः ॥५

अ॒भिऽअ॑भि । हि । श्रव॑सा । त॒तर्दि॑थ । उत्स॑म् । न । कम् । चि॒त् । ज॒न॒ऽपान॑म् । अक्षि॑तम् ।

शर्या॑भिः । न । भर॑माणः । गभ॑स्त्योः ॥५

अभिऽअभि । हि । श्रवसा । ततर्दिथ । उत्सम् । न । कम् । चित् । जनऽपानम् । अक्षितम् ।

शर्याभिः । न । भरमाणः । गभस्त्योः ॥५

हे सोम त्वं “श्रवसा अन्नेन हेतुना “अभ्यभि “ततर्दिथ “हि पवित्रमभितृण्णवानसि छिन्नवानसि । तत्र दृष्टान्तद्वयम्' ।

“उत्सं “न यथा कश्चित् “जनपानम् । अस्मिन् जना उदकं पिबन्ति । तम् “अक्षितम् अक्षीणं “कं “चित् कंचन उत्समुत्सरणशीलं वाप्यादिकमभितृणत्ति । अथवा कश्चित् “गभस्त्योः बाह्वोः "शर्याभिः अङ्गुलीभिः “भरमाणः उदकं संभरन् कंचिदभितृणत्ति तद्वत् ॥

आदीं के चित्पश्यंमानास आप्यं वसुरुचों दिव्या अभ्यंनूषत ।

वारं न देवः संविता व्यूंर्णुते ॥६

आत् । ईम् । के । चित् । पश्यंमानासः । आप्यंम् । वसुऽरुचः । दिव्याः । अभि । अनूषत ।

वारंम् । न । देवः । सविता । वि । ऊर्णुते ॥६

आत् । ईम् । के । चित् । पश्यमानासः । आप्यम् ।
वसुऽरुचः । दिव्याः । अभि । अनूषत ।

वारम् । न । देवः । सविता । वि । ऊर्णुते ॥६

“आत् अनन्तरं “पश्यमानासः एनं पश्यन्तः “दिव्याः दिवि भवाः “वसुरुचः नाम “के “चित् “आप्यं बन्धुं साधुम् “ईम् एनं सोमम् “अभ्यनूषत अभ्यस्तुवन् । कस्मादनन्तरमिति उच्यते । “देवः द्योतमानः “सविता सर्वस्य प्रेरकः सूर्यः “वारम् आवरकमन्धकारं “न “व्यूर्णुते नापगमयति तदैनमस्तुवन् । सूर्योदयात् प्रागेव हि सोमं स्तुवन्ति खलु ॥ ॥ २२ ॥

त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।

स त्वं नो वीर वीर्याय चोदय ॥७

त्वे इतिं । सो॒म॒ । प्र॒थ॒माः । वृ॒क्तऽबंर्हिषः । म॒हे । वाजांय । श्रवंसे । धियंम् । द॒धुः ।

सः । त्वम् । न॒ः । वी॒र॒ । वी॒र्यांय । चो॒द॒य॒ ॥७

त्वे इति । सोम । प्रथमाः । वृक्तऽबर्हिषः । महे । वाजाय । श्रवसे । धियम् । दधुः ।

सः । त्वम् । नः । वीर । वीर्याय । चोदय ॥७

हे "सोम “प्रथमाः पुरातनाः । यद्वा । यष्टृत्वेन सर्वेषां जनानां मुख्याः । “वृक्तबर्हिषः। वृक्तं छिन्नं बर्हिर्यैर्यज्ञार्थमिति वृक्तबर्हिषो यजमानाः । “महे महते “वाजाय बलाय “श्रवसे अन्नाय च “धियं बुद्धिं “त्वे त्वयि “दधुः निहितवन्तः । तस्मात् हे “वीर समर्थ सोम “सः तादृशः “त्वं “नः अस्मानपि संग्रामे “वीर्याय सामर्थ्याय

“चोदय प्रेरय । यद्वा । वीर्याय वीरे पुत्रे भवाय सुखायास्मान् प्रेरय ॥

दि॒वः पी॒यूषं॑ पू॒र्व्यं॑ यदु॒क्थ्यं॑ म॒हो गा॒हाद्दि॒व आ निरं॑धुक्षत ।

इं॒द्रं॑म॒भि जाय॑माना॒ सम॑स्वरन् ॥८

दि॒वः । पी॒यूषं॑म् । पू॒र्व्य॑म् । यत् । उ॒क्थ्यं॑म् । म॒हः । गा॒हात् । दि॒वः । आ । निः । अ॒धु॒क्ष॒त॒ ।

इन्द्रं॑म् । अ॒भि । जाय॑मानम् । सम् । अ॒स्व॒र॒न् ॥८

दिवः । पीयूषम् । पूर्व्यम् । यत् । उक्थ्यम् । महः । गाहात् । दिवः । आ । निः । अधुक्षत ।

इन्द्रम् । अभि । जायमानम् । सम् । अस्वरन् ॥८

“दिवः द्युलोकात् तत्र स्थितैर्देवैः “पीयूषं पातव्यं “पूर्व्यं प्रत्नं “यत् सोमरूपमन्नम् “उक्थ्यं प्रशस्यमस्ति तं सोमं “महः महतः “गाहात् गहनात् "दिवः द्युलोकात् “निरधुक्षत आभिमुख्येन निर्दुहन्ति । ततो दुग्धम् “इन्द्रम् अभिलक्ष्य “जायमानं तं सोमं “समस्वरन् स्तोतारः संस्तुवन्ति ।

अध॒ यदि॒मे पव॑मान॒ रोद॑सी इ॒मा च॒ विश्वा॒ भुव॑ना॒भि म॒ज्मना॑ ।

यू॒थे न नि॒ष्ठा वृ॑ष॒भो वि ति॑ष्ठसे ॥९

अध॑ । यत् । इ॒मे इति॑ । प॒व॒मा॒न॒ । रोद॑सी॒ इति॑ । इ॒मा । च॒ । विश्वा॑ । भुव॑ना । अ॒भि । म॒ज्मना॑ ।

यू॒थे । न । नि॒ःऽस्थाः । वृ॒ष॒भः । वि । ति॒ष्ठ॒से॒ ॥९

अध । यत् । इमे इति । पवमान । रोदसी इति । इमा । च । विश्वा । भुवना । अभि । मज्मना ।

यूथे । न । निःऽस्थाः । वृषभः । वि । तिष्ठसे ॥९

हे “पवमान सोम “अध अनन्तरं “यत् यथा “इमे “रोदसी द्यावापृथिव्यौ “इमा इमानि “विश्वा विश्वानि “भुवना भूतजातानि “च “मज्मना बलेन “अभि तिष्ठसि स त्वं तथा कुर्वन् भुवनेषु “वि “तिष्ठसे । तत्र दृष्टान्तः । “यूथे “न यथा कश्चित् “वृषभः गवां यूथे' वृन्दे “निःष्ठाः निःष्ठितो वर्तते तद्वद्यूथस्थानीयेषु भूतजातेषु निःष्ठितो भवसि ।।

सोमः॑ पुना॒नो अ॒व्यये॒ वारे॒ शिशु॒र्न क्रीळ॒न्पवं॑मानो अक्षाः ।

स॒हस्रं॑धारः श॒तवा॑ज॒ इंदुः॑ ॥१०

सोमः॑ । पु॒ना॒नः । अ॒व्यये॑ । वारे॑ । शिशुः॑ । न । क्रीळ॑न् ।
पव॑मानः । अ॒क्षा॒रिति॑ ।

स॒हस्र॑ऽधारः । श॒तऽवा॑जः । इन्दुः॑ ॥१०

सोमः । पुनानः । अव्यये । वारे । शिशुः । न । क्रीळन् ।
पवमानः । अक्षारिति ।

सहस्रऽधारः । शतऽवाजः । इन्दुः ॥१०

“पुनानः पूयमानः “पवमानः पूतः “सोमः “अव्यये अविमये “वारे वाले पवित्रे “शिशुर्न शिशुरिव “क्रीळन् इतस्ततः संक्रीडमानः सन् “अक्षाः क्षरति । कीदृशः । “सहस्रधारः बहुधारायुक्तः “शतवाजः बहुबलः “इन्दुः दीप्तः ॥

ए॒ष पु॑ना॒नो मधु॑माँ ऋ॒तावें॑द्रा॒येंदुः॑ पवते स्वा॒दुरू॒र्मिः ।

वा॒ज॒सनि॑र्वरिवो॒विद्व॑यो॒धाः ॥११

ए॒षः । पु॒ना॒नः । मधु॑ऽमान् । ऋ॒तऽवा॑ । इन्द्रा॑य । इन्दु॑ः ।
प॒व॒ते॒ । स्वा॒दुः । ऊ॒र्मिः ।

वा॒ज॒ऽसनि॑ः । व॒रि॒वः॒ऽवित् । व॒यः॒ऽधाः ॥११

एषः । पुनानः । मधुऽमान् । ऋतऽवा । इन्द्राय । इन्दुः ।
पवते । स्वादुः । ऊर्मिः ।

वाजऽसनिः । वरिवःऽवित् । वयःऽधाः ॥११

“पुनानः पूयमानः “मधुमान् माधुर्योपेतः “ऋतवा ऋतवान् यज्ञवान् “इन्दुः क्षरणशीलः “स्वादुः स्वादुकरः “ऊर्मिः “एषः रसधारासंघः “इन्द्राय इन्द्रार्थं "पवते क्षरति । कीदृशः । “वाजसनिः अन्नस्य दाता “वरिवोवित् धनस्य लम्भकः “वयोधाः आयुषो दाता ॥

स पंवस्व सहंमानः पृतन्यून्त्सेधन्रक्षांस्यपं दुर्गहांणि ।

स्वायुधः सांसह्वान्त्सोंम शत्रूंन् ॥१२

सः । पवस्व । सहंमानः । पृतन्यून् । सेधंन् । रक्षांसि ।
अपं । दुःऽगहांनि ।

सुऽआयुधः । ससह्वान् । सोम । शत्रूंन् ॥१२

सः । पवस्व । सहमानः । पृतन्यून् । सेधन् । रक्षांसि ।
अप । दुःऽगहानि ।

सुऽआयुधः । ससह्वान् । सोम । शत्रून् ॥१२

हे सोम "सः तादृशस्त्वं "पवस्व । किं कुर्वन् । "पृतन्यून् ॥
'कव्यध्वरपृतनस्यर्चि लोपः। इति क्यचि परतोऽकारलोपः
॥ संग्रामकामान् शत्रून् "सहमानः अभिभवन् तथा

“दुर्गहाणि कैश्चिदपि दुर्गमाणि "रक्षांसि “अप “सेधन् अपगमयन् हिंसन् । किंच “स्वायुधः शोभनायुधः सन् “शत्रून् “सासह्वान् अभिभवन्नभितपन् पवस्व ॥ ॥ २३ ॥

टिप्पणी

वाजोपरि संदर्भाः (http://puranastudy.byethost14.com/pur_index26/vaajah.htm)

९.११०.१ पर्यूषु प्र धन्व इति

श्यावाश्वम् (https://sa.wikisource.org/s/2hvn)

आन्धीगवम् (https://sa.wikisource.org/s/2hvm)

बाकानि त्रीणि (https://sa.wikisource.org/s/2i69) (ग्रामगेयः)

मण्डल ९

सूक्तं १.११
सूक्तं १.१२
सूक्तं १.१३
सूक्तं १.१४
सूक्तं १.१५
सूक्तं १.१६
सूक्तं १.१७
सूक्तं १.१८
सूक्तं १.१९
सूक्तं १.२०
सूक्तं १.२१
सूक्तं १.४१
सूक्तं १.४२
सूक्तं १.४३
सूक्तं १.४४
सूक्तं १.४५
सूक्तं १.४६
सूक्तं १.४७
सूक्तं १.४८
सूक्तं १.४९
सूक्तं १.५०
सूक्तं १.५१
सूक्तं १.७१
सूक्तं १.७२
सूक्तं १.७३
सूक्तं १.७४
सूक्तं १.७५
सूक्तं १.७६
सूक्तं १.७७
सूक्तं १.७८
सूक्तं १.७९
सूक्तं १.८०
सूक्तं १.८१
सूक्तं १.१०१
सूक्तं १.१०२
सूक्तं १.१०३
सूक्तं १.१०४
सूक्तं १.१०५
सूक्तं १.१०६
सूक्तं १.१०७
सूक्तं १.१०८
सूक्तं १.१०९
सूक्तं १.११०
सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

१५ जून् २०२१ (तमे) दिनाङ्के २३:३० समये अन्तिमपरिवर्तनं जातम् •

ऋग्वेदः सूक्तं ९.१११

← सूक्तं ९.११०

ऋग्वेदः - मण्डल ९

सूक्तं ९.१११

अनानतः पारुच्छेपिः।

सूक्तं ९.११२ →

दे. पवमानः सोमः। अत्यष्टिः।

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः ।

धारा सुतस्य रोचते पुनानो अरुषो हरिः ।

विश्वा यद्रूपा परियात्यृक्वभिः सप्तास्येभिरृक्वभिः ॥१॥

त्वं त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे ।

परावतो न साम तद्यत्रा रणन्ति धीतयः ।

त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥२॥

पूर्वामनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।

अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन् ।

वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥३॥

सायणभाष्यम्

‘ अया रुचा' इति तृचमष्टमं सूक्तं परुच्छेपपुत्रस्यानानताख्यस्यार्षमत्यष्टिच्छन्दकं पवमानसोमदेवताकम् । तथा चानुक्रम्यते-‘अया रुचा तृचमनानतः पारुच्छेपिरात्यष्टम्' इति । गतो विनियोगः ।।

अ॒या रु॒चा हरि॑ण्या पुना॒नो विश्वा॒ द्वेषां॑सि तरति
स्व॒युग्व॑भि॒ः सूरो॒ न स्व॒युग्व॑भिः ।

धारा॑ सु॒तस्य॑ रोचते पुना॒नो अ॑रु॒षो हरिः॑ ।

विश्वा॒ यद्रू॒पा प॑रि॒यात्यृक्व॑भिः स॒प्तास्ये॑भि॒र्ऋक्व॑भिः ॥१

अ॒या । रु॒चा । हरि॑ण्या । पु॒ना॒नः । विश्वा॑ । द्वेषां॑सि । त॒र॒ति॒
। स्व॒युग्व॑ऽभिः । सूरः॑ । न । स्व॒युग्व॑ऽभिः ।

धारा॑ । सु॒तस्य॑ । रो॒च॒ते॒ । पु॒ना॒नः । अ॒रु॒षः । हरिः॑ ।

विश्वा॑ । यत् । रू॒पा । प॒रि॒ऽयाति॑ । ऋक्व॑ऽभिः ।
स॒प्तऽआ॑स्येभिः । ऋक्व॑ऽभिः ॥१

अया । रुचा । हरिण्या । पुनानः । विश्वा । द्वेषांसि । तरति
। स्वयुग्वऽभिः । सूरः । न । स्वयुग्वऽभिः ।

धारा । सुतस्य । रोचते । पुनानः । अरुषः । हरिः ।

विश्वा । यत् । रूपा । परिऽयाति । ऋक्वऽभिः ।
सप्तऽआस्येभिः । ऋक्वऽभिः ॥१

“पुनानः पूयमानः सोमः "हरिण्या हरितवर्णया "अया अनया “रुचा रोचमानया धारया “विश्वा सर्वाणि “द्वेषांसि द्वेष्टॄणि रक्षांसि “तरति विनाशयति । तत्र दृष्टान्तः । “सूरो “न यथा सूर्यः “स्वयुग्वभिः स्वयं युक्तै रश्मिभिस्तमांसि हिनस्ति तद्वत् । “स्वयुग्वभिः इति द्विरुक्तिरादरार्था। यद्वा । धारया युक्तः सोमः स्वीयैर्युक्तैस्तेजोभी रक्षांसि तरति । तस्य “सुतस्य अभिषुतस्य सोमस्य “धारा “रोचते दीप्यते । “पुनानः पूयमानः “हरिः हरितवर्णः सोमः “अरुषः अरोचमानो भवति । “यत् यः सोमः “सप्तास्येभिः रसहरणशीलास्यैः “ऋक्वभिः स्तुतिमद्भिः “ऋक्वभिः

तेजोभिः “विश्वा विश्वानि व्याप्तानि "रूपा रूपाणि नक्षत्राणि “परियाति गच्छति व्याप्नोति ॥

त्वं त्यत्पंणी॒नां विंदो॒ वसु॒ सं मा॒तृभिं॑र्मर्जयसि॒ स्व आ दमं ऋ॒तस्यं धी॒तिभि॒र्दमें ।

प॒रा॒वतो॒ न साम॒ तद्यत्रा॒ रणं॑ति धी॒तयः॑ ।

त्रि॒धातुं॑भि॒ररुं॑षीभि॒र्वयों दधे॒ रोचं॑मानो॒ वयों दधे ॥२

त्वम् । त्यत् । प॒णी॒नाम् । वि॒दः॒ । वसुं । सम् । मा॒तृऽभिः॑ । म॒र्ज॒य॒सि॒ । स्वे । आ । दमें । ऋ॒तस्यं । धी॒तिऽभिः॑ । दमें ।

प॒रा॒ऽवतः॑ । न । सामं । तत् । यत्रं । रणं॑न्ति । धी॒तयः॑ ।

त्रि॒धातुं॑ऽभिः । अरुं॑षीभिः । वयः॑ । द॒धे॒ । रोचं॑मानः । वयः॑ । द॒धे ॥२

त्वम् । त्यत् । पणीनाम् । विदः । वसु । सम् । मातृऽभिः । मर्जयसि । स्वे । आ । दमे । ऋतस्य । धीतिऽभिः । दमे ।

पराऽवतः । न । साम । तत् । यत्र । रणन्ति । धीतयः ।

त्रिधातुऽभिः । अरुषीभिः । वयः । दधे । रोचमानः । वयः । दधे ॥२

हे सोम “त्वं “त्यत् "पणीनां “वसु पणिभिरपहृतं गवात्मकं धनं “विदः अलभथाः। “आ अपि च “ऋतस्य यज्ञस्य “धीतिभिः धात्रीभिः "मातृभिः वसतीवरीभिः "स्वे आत्मीये “दमे गृहभूते “दमे यज्ञे “सं “मर्जयसि सम्यक् शुद्धो भवसि । “परावतो “न दूरस्थाद्देशाद्यथा “साम सामध्वनिः श्रूयते तथा तव “तत् सामध्वनिः सर्वैः श्रूयते । असौ सोमाभिषवाभिप्रायेणोक्तः । “यत्र यस्मिन् शब्दे “धीतयः कर्मणो धर्तारो यजमानाः “रणन्ति रमन्ते । “रोचमानः सोमः “त्रिधातुभिः त्रयाणां लोकानां

धारयित्रीभिर्मातृभिर्वसतीवरीभिः “अरुषीभिः आरोचमानाभिर्दीप्तिभिः “वयः अन्नं “दधे स्तोतृभ्यः प्रयच्छति । पुनः “वयो “दधे इत्यादरार्थम् ॥

पूर्वा॒मनु॑ प्र॒दिशं॑ याति॒ चेकि॑त॒त्सं र॒श्मिभि॑र्यतते दर्श॒तो रथो॒ दैव्यो॑ दर्श॒तो रथः॑ ।

अग्म॑न्नु॒क्थानि॒ पौंस्येंद्रं॒ जैत्रा॑य हर्षयन् ।

वज्र॑श्च॒ यद्भव॑थो॒ अन॑पच्युता स॒मत्स्वन॑पच्युता ॥३

पूर्वा॑म् । अनु॑ । प्र॒ऽदिश॑म् । या॒ति॒ । चेकि॑तत् । सम् । र॒श्मिऽभिः॑ । य॒त॒ते॒ । द॒र्श॒तः । रथः॑ । दैव्यः॑ । द॒र्श॒तः । रथः॑ ।

अग्म॑न् । उ॒क्थानि॑ । पौंस्या॑ । इन्द्र॑म् । जैत्रा॑य । ह॒र्ष॒य॒न् ।

वज्रः॑ । च॒ । यत् । भव॑थः । अन॑पऽच्युता । स॒मत्ऽसु॑ । अन॑पऽच्युता ॥३

पूर्वाम् । अनु । प्रऽदिशम् । याति । चेकितत् । सम् । रश्मिऽभिः । यतते । दर्शतः । रथः । दैव्यः । दर्शतः । रथः ।

अग्मन् । उक्थानि । पौंस्या । इन्द्रम् । जैत्राय । हर्षयन् ।

वज्रः । च । यत् । भवथः । अनपऽच्युता । समत्ऽसु । अनपऽच्युता ॥३

"चेकितत् जानानः सोमः "पूर्वां प्राचीं "प्रदिशं प्रकृष्टां दिशम् "अनु "याति अनुगच्छति । किंच "दर्शतः सर्वैर्दर्शनीयः "दैव्यः देवेषु भवस्तव "रथः सूर्यरश्मिभिः "सं "यतते संगच्छते । पुनः "दर्शतो "रथः इत्यादरार्थम् । ततः "पौंस्या पुंस्त्वावगमानि "उक्थानि स्तोत्राणि "अग्मन् इन्द्रं

गच्छन्ति । तथा “जैत्राय जयार्थं तानि स्तोत्राणि “इन्द्रं “हर्षयन् हर्षयन्ति । तथा तस्य “वज्रश्च तमिन्द्रं गच्छति । “यत् यदा “समत्सु संग्रामेषु “अनपच्युता अनपच्युतौ शत्रुभिरपराजितौ सोम त्वं चेन्द्रश्च युवां सह “भवथः तदा स्तोत्रागमनादीनि भवन्ति । पुनः "अनपच्युता इत्यादरार्थम् ॥ ॥ २४ ॥

टिप्पणी

९.१११.१ अया रुचा हरिण्या इति

विषमानि त्रीणि (https://sa.wikisource.org/s/2k5v) (ग्रामगेयः)

मण्डल ९

सूक्तं ९.३१सूक्तं ९.४१सूक्तं ९.७१सूक्तं ९.१०१

सूक्तं ९.३२सूक्तं ९.४२सूक्तं ९.७२सूक्तं ९.१०२

सूक्तं ९.३३सूक्तं ९.४३सूक्तं ९.७३सूक्तं ९.१०३

सूक्तं ९.३४सूक्तं ९.४४सूक्तं ९.७४सूक्तं ९.१०४

सूक्तं ९.३५सूक्तं ९.४५सूक्तं ९.७५सूक्तं ९.१०५

सूक्तं ९.३६सूक्तं ९.४६सूक्तं ९.७६सूक्तं ९.१०६

सूक्तं ९.३७सूक्तं ९.४७सूक्तं ९.७७सूक्तं ९.१०७

सूक्तं ९.३८सूक्तं ९.४८सूक्तं ९.७८सूक्तं ९.१०८

सूक्तं ९.३९सूक्तं ९.४९सूक्तं ९.७९सूक्तं ९.१०९

सूक्तं ९.२०सूक्तं ९.५०सूक्तं ९.८०सूक्तं ९.११०

सूक्तं ९.२१सूक्तं ९.५१सूक्तं ९.८१सूक्तं ९.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.११२

दे. पवमानः सोमः। पङ्क्तिः।

नानानं वा उ नो धियो वि व्रतानि जनानाम् ।

तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥१॥

जरतीभिरोषधीभिः पर्णेभिः शकुनानाम् ।

कार्मारो अश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥२॥

कारुरहं ततो भिषगुपलप्रक्षिणी नना ।

नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परि स्रव ॥३॥

अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः ।

शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छतीन्द्रायेन्दो परि स्रव ॥४॥

सायणभाष्यम्

‘नानानम्' इति चतुर्ऋचं नवमं सूक्तमाङ्गिरसस्य शिशुनाम्न आर्षम् । पञ्चपदा पङ्क्तिश्छन्दः । पवमानः सोमो देवता । तथा चानुक्रान्तं -- नानानं चतुष्कं शिशुः पाङ्क्तं हि' इति । गतो विनियोगः ॥

ना॒ना॒नं वा उं नो॒ धियो॒ वि व्र॒तानि॒ जना॑नाम् ।

त॒क्षा रि॒ष्टं रु॒तं भि॒षग्ब्र॒ह्मा सु॒न्वन्तं॑मिच्छ॒तीन्द्रा॑येन्द॒ो परि॑ स्रव ॥१

ना॒ना॒नम् । वै । उ॒ इति॑ । न॒: । धिय॑: । वि । व्र॒तानि॑ । जना॑नाम् ।

तक्षा॑ । रि॒ष्टम् । रु॒तम् । भि॒षक् । ब्र॒ह्मा । सु॒न्वन्त॑म् । इ॒च्छ॒ति॒ । इन्द्रा॑य । इ॒न्द॒ो इति॑ । परि॑ । स्र॒व॒ ॥१

नानानम् । वै । ऊँ इति । नः । धियः । वि । व्रतानि । जनानाम् ।

तक्षा । रिष्टम् । रुतम्। भिषक् । ब्रह्मा । सुन्वन्तम् । इच्छति । इन्द्राय । इन्दो इति। परि । स्रव ।।१

ऋषिरेतदादिभिस्त्रिभिः सूक्तैः अपरिस्रवतः सोमस्याजामित्वाय मनसो विनोदनं कुर्वन्नाह । हे सोम “नः अस्माकं “धियः कर्माणि नानानं नानाजातीयकानि

बहूनि भवन्ति । वैशब्दः प्रसिद्ध्यर्थं द्योतनार्थः। “उ इति पूरणः । तथान्येषामपि “जनानां “व्रतानि कर्माणि विविधानि भवन्ति । “तक्षा त्वष्टा “रिष्टं दारुतक्षणम् “इच्छति । तथा “भिषक् वैद्यश्चिकित्सकः “रुतं रोगमिच्छति । “ब्रह्मा ब्राह्मणः “सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानमिच्छति । तथाहं त्वत्परिस्रवणमिच्छामि । तस्माद्धे “इन्दो सोम “इन्द्राय इन्द्रार्थं परि स्रव परितः क्षर ॥

जरंतीभि॒रोषंधीभिः प॒र्णेभिः॑ शकु॒नानां॑म् ।

का॒र्मा॒रो अश्मंभि॒र्द्युभि॒र्हिरंण्यवन्तमिच्छ॒तीन्द्रां॑येन्दो॒ परिं स्रव ॥२

जरंतीभिः । ओषंधीभिः । प॒र्णेभिः॑ । श॒कु॒नानां॑म् ।

का॒र्मा॒रः । अश्मं॑ऽभिः । द्युऽभिः॑ । हिरं॑ण्यऽवन्तम् ।
इ॒च्छ॒ति॒ । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥२

जरतीभिः । ओषधीभिः । पर्णेभिः । शकुनानाम् । ।

कार्मारः। अश्मऽभिः। द्युऽभिः । हिरण्यऽवन्तम् । इच्छति । इन्द्राय । इन्दो इति । परिस्रव ॥२

"जरतीभिः जीर्णाभिः ”ओषधीभिः “इषवः क्रियन्ते । तथा “शकुनाना “पर्णेभिः इषूणां पक्षभूतैः पर्णैश्च क्रियन्ते । तथा “द्युभिः दीप्ताभिरिषूणां तेजनार्थाभि: “अश्मभिः शिलाभिश्च क्रियन्ते । एतैः “कार्मारः अयस्कारः हिरण्यवन्तम् आढ्यं पुरुषम् “इच्छति । तथाहं त्वत्परिस्रवणमिच्छामि । तस्मात् “इन्दो “इन्द्राय “परि “स्रव ॥

का॒रुर॒हं त॒तो भि॒षगु॑पलप्र॒क्षिणीं न॒ना ।

नाना॑धियो वसू॒यवोऽनु॒ गा इ॑व तस्थि॒मेन्द्रा॑येन्दो॒ परिं स्रव ॥
३

का॒रुः । अ॒हम् । त॒तः । भि॒षक् । उ॒प॒ल॒ऽप्र॒क्षिणीं । न॒ना ।

नाना॑ऽधियः । व॒सु॒ऽयवः॑ । अनु॑ । गाःऽइ॑व । त॒स्थि॒म॒ ।
इन्द्रा॑य । इ॒न्दो॒ इतिं । परिं । स्र॒व॒ ॥३

कारुः । अहम् । ततः । भिषक् । उपलऽप्रक्षिणी । नना।

नानाऽधियः । वसुऽयवः । अनु । गाः इव । तस्थिम ।
इन्द्राय । इन्दो इति । परि । स्रव ॥३

ऋषिः प्रवृत्तसोमयागः सन् दशापवित्रात् सोमे क्षरति
प्रतिबन्धकपापापनुत्तये

पुरश्चरितानुकीर्तनपुरःसरमध्येषणां चकार । तावत् “अहं “कारुः स्तोमानां कर्तास्मि । “ततः इति संताननाम । तन्यतेऽस्मादिति ततः पिता । तन्यतेऽसाविति वा ततः पुत्रः । भिषक् भेषजकृत् । यज्ञस्य ब्रह्मेत्यर्थः। 'सर्वं त्रय्या विद्यया भिषज्यति' इति श्रुतेः । तथा “उपलप्रक्षिणी । उपलेषु वालुकासु प्रक्षिणोति यवान् हिनस्ति भृज्जतीति । यद्वा । दृषदादिषूपलेषु भृष्टान् यवान् हिनस्ति चूर्णयतीति । अथवा धानासक्तुकरम्भादीनां कारिका वा । असौ “नना माता दुहिता वा । नमनक्रियायोग्यत्वात्। माता खल्वपत्यं प्रति स्तनपानादिना नमनशीला भवति । दुहिता वा शुश्रूषार्थम् । एवं सर्वेषां परिचरणेन “नानाधियः नानाकर्माणः “वसूयवः धनकामा वयम् “अनु “तस्थिम लोकमन्वास्थिताः स्मः । तत्र दृष्टान्तः । “गाइव । छान्दसो जसः शसादेशः। गावो यथा गोष्ठमनुतिष्ठन्ति स्वपयःप्रदानेन परिचरन्ति वा एवं वयमपि परिचरामः । एतज्ज्ञात्वा हे “इन्दो सोम “इन्द्राय “परि “स्रव

दशापवित्रात् क्षर । एवमेषाध्येषणा सत्कारपूर्विका व्यापारणा । अत्र निरुक्तम्-’उपलप्रक्षिणीत्युपलेषु प्रक्षिणात्युपलप्रक्षेपिणी वा । कारुरहमस्मि कर्ता स्तोमानां ततो भिषक् । तत इति संताननाम पितुर्वा पुत्रस्य वा । उपलप्रक्षिणी सक्तुकारिका नना नमतेर्माता वा दुहिता वा। नानाधियो नानाकर्माणो वसूयवो वसुकामा अन्वास्थिताः स्मो गाव इव लोकम् ' (निरु. ६. ५-६) इति ॥

अश्वो॒ वो॑ळ्हा॑ सु॒खं रथं॑ हस॒नामु॑पम॒न्त्रिणः॑ ।

शेपो॒ रोम॑ण्वन्तौ भे॒दौ वारिन्म॒ण्डूकं॑ इच्छ॒तीन्द्रा॑येन्दो॒ परि॑ स्रव ॥४

अश्वः॑ । वो॑ळ्हा॑ । सु॒ऽखम् । रथ॑म् । ह॒स॒नाम् । उ॒प॒ऽम॒न्त्रिणः॑ ।

शेपः॑ । रोम॑ण्ऽवन्तौ । भे॒दौ । वाः । इत् । म॒ण्डूकः॑ । इ॒च्छ॒ति॒ । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥४

अश्वः । वोळ्हा। सुऽखम् । रथम् । हसनाम् । उपऽमन्त्रिणः ।

शेपः । रोमण्ऽवन्तौ । भेदौ । वाः। इत् । मण्डूकः। इच्छति । इन्द्राय । इन्दो इति । परि । स्रव।।४

“वोळ्हा लक्ष्यं देशं प्रापयन् “अश्वः “सुखं कल्याणं “रथम् “इच्छति । “उपमन्त्रिणः । उपमन्त्रवन्तो नर्मसचिवाः “हसनाम् उपहसनां वाचमिच्छन्ति । तथा “शेपः । ‘शेपो वैतस इति पुंस्प्रजननस्य' (निरु. ३.२१) इति यास्कः । यथा शेपः “रोमण्वन्तौ “भेदौ इच्छति । मण्डूकः “वारित् । इदवधारणे । उदकमेवेच्छति । तथाहं त्वत्परिस्रवणमिच्छामि। तस्मात् इन्द्रायेन्दो “परि “स्रव इति ॥ ॥ २५ ॥

टिप्पणी

सूक्तस्य ऋषिः शिशुराङ्गिरसः अस्ति।

अयं वाव शिशुर्योऽयं मध्यमः प्राणः तस्येदमेवाधानमिदं प्रत्याधानं प्राण स्थूणान्नं दाम तमेताः सप्ताक्षितय उपतिष्ठन्ते - माश १४.५.२.[२]

अयं प्रतीयते यत् शिशोः पूर्वावस्था शिक्षुः, शिष्यः अस्ति। यदा शिक्षुः कस्मिंश्चिद् विषये अध्ययनं आरभति, तदा तस्य नाना धियः सन्ति। पुराणेषु शिशोः द्वयौ स्थितयौ आस्ताम् - शिशुपालः एवं शिशुमारः। शिशुपालः राजसूये कृष्णोपरि आक्षेपः करोति। कृष्णस्य भगवत्तायाः दर्शनं कर्तुं सः न शक्नोति। अयं आक्षेपः अस्य सूक्तस्य शेपः (शेपो

रोमण्वन्तौ भेदौ) प्रतीयते। शेपस्य धीः बृहती धी नास्ति।

शतपथ ब्राह्मणे शिशोः विशेषणं मध्यमः प्राणः अस्ति। ब्रह्माण्डपुराणे परशुरामः मध्यपुष्करे मृगमृग्योः वार्तालापं श्रवणे सक्षमः भवति। मध्यमप्रकारस्य भक्तस्य विषये भागवतपुराणस्य ११.२.४६ कथनमस्ति - ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च। प्रेम मैत्री कृपोपेक्षा यः करोति स मध्यमः।। किमेते चत्वारः स्थितयः अस्मिन् सूक्ते प्रकटितानि सन्ति, अयं अन्वेषणीयः। अयं प्रतीयते यत् अश्वस्य स्थितिः प्रेमपूर्णा स्थितिः अस्ति।

इतः परं एवं परतरं सूक्तं मारीचेः कश्यपस्यार्षं भवति। कश्यपः अर्थात् समाधितः व्युत्थानस्य स्थितिः। प्रस्तुतसूक्तस्य परवर्तीसूक्तद्वयाभ्यां सह

किं सम्बन्धमस्ति। शतपथब्राह्मणस्य शिशुब्राह्मणस्य अवसानं अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपम्। तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति अस्ति। ऋग्वेदे ९.११४.३ सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः इति उल्लेखमस्ति। सोमयागे सप्तहोतारः भवन्ति (ताण्ड्य ब्रा. २५.४.२)। महाभारते आश्वमेधिकपर्वे २२ सामान्यावस्थायां घ्राण, चक्षु, वागादि सप्तहोतृणां किं न्यूनत्वं अस्ति, अस्य निदर्शनं अस्ति। कथनमस्ति यत् घ्राणः येषां भूतानां ग्रहणं करोति, तान् चक्षुरादीनि अन्यानि होतारः न जानन्ति। तेषां सप्तानां मध्ये कोपि सम्बन्धः नास्ति। यदा एते होतारः सप्तऋषयः भविष्यन्ति, तदैव तेषां मध्ये सम्बन्धः भवितुं शक्यते। आदर्शस्थितिः सा भवति यत्र सर्वेषां होतृणां विलयनं एकहोतरि भवति।

वर्तमानसूक्तस्य ऋषिः शिशुराङ्गिरसः अस्ति। अयं संभवमस्ति यत् अयं समाधिं प्रति प्रस्थानस्य स्थितिरस्ति।

शिशुरुपरि प्राथमिकटिप्पणी (https://vipin110012.tripod.com/pur_index28/shishu.htm)

इन्दु उपरि प्राथमिकटिप्पणी (http://puranastudy.freeoda.com/pur_index3/indu1.htm)

इन्दुरुपरि डा. सुकर्मपालसिंहतोमरस्य प्रबन्धः (https://veda-samsthana.tripod.com/fatah/indu2.htm)

९.११२.३ कारुरहं ततो भिषक् इति

उपलोपरि टिप्पणी एवं संदर्भाः (https://sites.google.com/view/puranic-subject-index/unnata-upavarsha/%E0%A4%89%E0%A4%AA%E0%A4%B2-upala)

९.११२.४ अश्वो वोळ्हा सुखं रथं इति

शेपो रोमण्वन्तौ -- शीङ् धातोर्नाम्नीति फस् प्रत्ययः इति शब्दकल्पद्रुमकोशे। शेपस्य लौकिकमर्थं शिश्नः अस्ति। काशकृत्स्न-धातुव्याख्याने कथनमस्ति -- शीङ् स्वप्ने - निद्रायाम्। सर्वेषां जीवानां देहरूपायां गुहायां शेते शिवः - प्राणलिङ्गः। शुनःशेपः साधनायाः एकान्तिका, कठोरतपसः स्थितिः भवति। तत्र माधुर्यजननस्य आवश्यकता भवति।

मण्डूकः केषां प्रकाराणां वारीणां इच्छति। अत्र वारि शब्दस्य साम्यं वाल, वाल्मीकिरामायणस्य वालि

वानरतः प्रतीयते। वालि वानरः यस्य दर्शनं करोति, तस्य बलं आहरति। अयं स्थितिः अरिष्टनेमिः सदृशं अस्ति, यत्र महापुरुषाणां परितः एकः मण्डलस्य सर्जनं भवति यस्मिन् कोपि हिंसा संभवं नास्ति। किं मण्डूकः मण्डलस्य उपयोगं शीतकाले विश्रमणार्थं करोति, अन्वेषणीयः अस्ति।

मण्डूकोपरि टिप्पणी

आयुर्वेदानुसारेण मण्डूकोपरि टिप्पणी (https://puranastudy.wordpress.com/%e0%a4%ae%e0%a4%a3%e0%a4%bf%e0%a4%95%e0%a5%81%e0%a4%a3%e0%a5%8d%e0%a4%a1%e0%a4%b2-%e0%a4%ae%e0%a4%a3%e0%a5%8d%e0%a4%a1%e0%a5%82%e0%a4%95/%e0%a4%a

e%e0%a4%a3%e0%a5%8d%e0%a4%a1%e0%a5%82%e0%a4%95/)

अश्वो वोळ्हा -- द्र. स्कन्दपुराणे ६.१६५.३४ एवं लक्ष्मीनारायणसंहितायां (१.५०६.१७) ऋचीकेन सूक्तस्य जपेन अश्वानां प्राप्तिः।

मण्डल ९

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

ऋग्वेदः सूक्तं ९.११३

← सूक्तं ९.११२

ऋग्वेदः - मण्डल ९

सूक्तं ९.११३

कश्यपो मारीचः

सूक्तं ९.११४ →

दे. पवमानः सोमः। पङ्क्तिः।

शर्यणावति सोममिन्द्रः पिबतु वृत्रहा ।

बलं दधान आत्मनि करिष्यन्वीर्यं महदिन्द्रायेन्दो परि स्रव ॥१॥

आ पवस्व दिशां पत आर्जीकात्सोम मीढ्वः ।

ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परि स्रव ॥२॥

पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहिताभरत् ।

तं गन्धर्वाः प्रत्यगृभ्णन्तं सोमे रसमादधुरिन्द्रायेन्दो परि स्रव ॥३॥

ऋतं वदन्नृतद्युम्न सत्यं वदन्सत्यकर्मन् ।

श्रद्धां वदन्सोम राजन्धात्रा सोम परिष्कृत इन्द्रायेन्दो परि स्रव ॥४॥

सत्यमुग्रस्य बृहतः सं स्रवन्ति संस्रवाः ।

सं यन्ति रसिनो रसाः पुनानो ब्रह्मणा हर इन्द्रायेन्दो परि स्रव ॥५॥

यत्र ब्रह्मा पवमान छन्दस्यां वाचं वदन् ।

ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन्निन्द्रायेन्दो परि स्रव ॥६॥

यत्र ज्योतिरजस्रं यस्मिँल्लोके स्वर्हितम् ।

तस्मिन्मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परि स्रव ॥७॥

यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।

यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥८॥

यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।

लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥९॥

यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम् ।

स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥१०॥

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।

कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥११॥

सायणभाष्यम्

‘शर्यणावति' इत्येकादशर्चं दशमं सूक्तं मारीचस्य कश्यपस्यार्षम् । पूर्वत्र ‘हि' इत्युक्तत्वादिदमुत्तरं च पाङ्क्तम् । पवमानसोमदेवताकम् । तथा चानुक्रम्यते- शर्यणावत्येकादश कश्यपः' इति । गतो विनियोगः ॥

श॒र्य॒णाव॑ति॒ सोम॒मिन्द्रः॑ पिबतु वृत्र॒हा ।

बलं॒ दधा॑न आ॒त्मनि॑ करि॒ष्यन्वी॒र्यं॑ म॒हदिन्द्रा॑येन्दो॒ परि॑ स्रव ॥१

श॒र्य॒णाऽव॑ति । सोम॑म् । इन्द्रः॑ । पि॒ब॒तु॒ । वृ॒त्र॒ऽहा ।

बलंम् । दधांनः । आ॒त्मनिं । क॒रि॒ष्यन् । वी॒र्यंम् । म॒हत् । इन्द्रांय । इ॒न्दो॒ इतिं । परिं । स्र॒व॒ ॥१

शर्यणाऽवति । सोमंम् । इन्द्रः । पिबतु । वृत्रऽहा।।

बलम् । दधानः । आत्मनि । करिष्यन् । वीर्यम् । महत् । इन्द्राय । इन्दो इति । परि । स्रव ।।१।।

“शर्यणावति । शर्यणावन्नाम कुरुक्षेत्रस्य जघनार्धे सरः । तत्र स्थितं सोमं “वृत्रहा "इन्द्रः “पिबतु । कीदृशः । “आत्मनि “बलं दधानः बलं निदधानः अत एव “महत् "वीर्यं करिष्यन् शत्रून् प्रति । तस्मात् “इन्द्रायेन्दो “परि स्रव ॥

आ पंवस्व दिशां पत आर्जी॒कात्सोंम मीढ्वः ।

ऋ॒त॒वा॒केन॑ स॒त्येन॑ श्र॒द्धया॒ तप॑सा सु॒त इन्द्रा॑येन्दो॒ परि॑ स्रव ॥२

आ । प॒व॒स्व॒ । दि॒शा॒म् । प॒ते॒ । आ॒र्जी॒कात् । सो॒म॒ । मी॒ढ्व॒ः ।

ऋ॒त॒ऽवा॒केन॑ । स॒त्येन॑ । श्र॒द्धया॑ । तप॑सा । सु॒तः । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥२

आ। पवस्व । दिशाम् । पते । आर्जीकात् । सोम। मीढ्वः ।।

ऋतऽवाकेन । सत्येन । श्रद्धया । तपसा । सुतः । इन्द्राय । इन्दो इति । परि । स्रव ।। २ ।।

हे "दिशां “पते प्राच्यादीनां दिशां प्रकाशकत्वेन स्वामिन् हे "मीढ्वः कामानां सेक्तर्हे “सोम "आर्जीकात् । ऋजीकानामदूरभव आर्जीको जनपदः । तस्मात् "आ

“पवस्व अस्मद्यज्ञं प्रत्यागच्छ । यद्वा । आर्जीकादृजोरकुटिलात् पवित्रात् क्षर। कीदृशः । “ऋतवाकेन ऋतस्य वचनेन "सत्येन । सत्यर्तयोरल्पो भेदो द्रष्टव्यः । “श्रद्धया “तपसा युक्तैर्दीक्षितैः “सुतः अभिषुतस्त्वं पवस्व ॥

प॒र्जन्य॑वृद्धं महि॒षं तं सूर्य॑स्य दुहि॒ताभ॑रत् ।

तं ग॑न्ध॒र्वाः प्रत्य॑गृभ्ण॒न्तं सोमे॒ रस॒माद॑धु॒रिन्द्रा॑येन्दो॒ परि॑ स्रव ॥३

प॒र्जन्य॑ऽवृद्धम् । म॒हि॒षम् । तम् । सूर्य॑स्य । दु॒हि॒ता । आ । अ॒भ॒र॒त् ।

तम् । ग॒न्ध॒र्वाः । प्रति॑ । अ॒गृ॒भ्ण॒न् । तम् । सोमे॑ । रस॑म् । आ । अ॒द॒धुः॒ । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥३

पर्जन्यऽवृद्धम् । महिषम् । तम् । सूर्यस्य । दुहिता । आ । अभरत् ।

तम् । गन्धर्वाः । प्रति । अगृभ्णन् । तम् । सोमे । रसम् । आ । अदधुः ।। इन्द्राय । इन्दो इति । परि । स्रव ॥ ३ ॥

“सूर्यस्य “दुहिता श्रद्धा नाम । ‘श्रद्धा वै सूर्यस्य दुहिता' (श. ब्रा. १२. ७. ३. ११) इति वाजसनेयकम्। सा “पर्जन्यवृद्धं पर्जन्यवत् समर्थम् । यद्वा । पर्जन्येन तत्कार्यत्वेनोदकेन प्रवृद्धम्। "महिषं महान्तं पूज्यं वा “तं सोमम् आभरत् आहरत्। द्युलोकादाहृतवती । “तम् आहियमाणं सोमं “गन्धर्वाः विश्वावसुप्रभृतयः प्रत्यगृभ्णन् प्रत्यगृह्णन् । प्रतिगृहीतवन्तः। दृग्रहोर्भः । ततो गन्धर्वाः प्रतिगृहीतं “रसं “सोमे प्रत्यक्षम् आदधुः । दधातेर्लङि । तस्मात् “परि "स्रव ॥ ।

ऋ॒तं वद॑न्नृतद्युम्न स॒त्यं वद॑न्सत्यकर्मन् ।

श्र॒द्धां वद॑न्सोम राजन्धा॒त्रा सो॑म॒ परि॑ष्कृत॒ इन्द्रा॑येन्दो॒ परि॑ स्रव ॥४

ऋ॒तम् । वद॑न् । ऋ॒त॒ऽद्यु॒म्न॒ । स॒त्यम् । वद॑न् ।
स॒त्य॒ऽक॒र्म॒न् ।

श्र॒द्धाम् । वद॑न् । सो॒म॒ । रा॒ज॒न् । धा॒त्रा । सो॒म॒ ।
परि॑ऽकृतः । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥४

ऋतम् । वदन् । ऋतऽद्युम्न । सत्यम् । वदन् ।
सत्यऽकर्मन् ।

श्रद्धाम् । वदन् । सोम । राजन् । धात्रा । सोम।
परिऽकृतः । इन्द्राय । इन्दो इति । परि । स्रव।।४।।

हे “ऋतद्युम्न ऋतेन द्योतमान सत्ययशस्क वा "सत्यकर्मन् यथार्थकर्मन् हे "सोम अभिषूयमाण “राजन् सर्वेषां यज्ञनिष्पादकत्वेन स्वामिन् हे सोम “ऋतं यज्ञं “वदन् "सत्यं वदन् उच्चारयन् “श्रद्धां यजमानानामात्मनोपेक्षितां “वदन् “धात्रा कर्मणां धारकेण देवानां पोषकेण वा यजमानेन “परिष्कृतः अलंकृतस्त्वम् “इन्द्राय “परि "स्रव । ‘संपर्युपेभ्यः' इति भूषणार्थे करोतेः सुट् ॥

स॒त्यमु॑ग्रस्य बृह॒तः सं स्र॑वन्ति संस्र॒वाः ।

सं य॑न्ति र॒सिनो॒ रसाः॑ पुना॒नो ब्रह्म॑णा हर॒ इन्द्रा॑येन्दो॒ परि॑ स्रव ॥५

स॒त्यम्ऽउ॒ग्रस्य । बृ॒ह॒तः । सम् । स्र॒व॒न्ति॒ । स॒म्ऽस्र॒वाः ।

सम् । य॒न्ति॒ । र॒सिनः॑ । रसाः॑ । पु॒ना॒नः । ब्रह्म॑णा । ह॒रे॒ ।
इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥५

सत्यम्ऽउग्रस्य । बृहतः । सम् । स्रवन्ति । सम्ऽस्रवाः ।।

सम् । यन्ति । रसिनः । रसाः । पुनानः । ब्रह्मणा । हरे ।
इन्द्राय । इन्दो इति । परि ।स्रव ॥५॥

“सत्यमुग्रस्य संग्रामे सत्येन शत्रूणामुद्गारयितुः । यद्वा उद्गूर्णसत्यस्य । यद्वा । यथार्थभूतमुद्गूर्णं बलं यस्य तस्य । पृषोदरादित्वाद्रूपसिद्धिः। “बृहतः महतः सोमस्य तव “संस्रवाः सम्यक्स्रवणशीला' धाराः "सं "स्रवन्ति सम्यक् गच्छन्ति । किंच "रसिनः रसवतस्तव स्वभूताः “रसाः “सं "यन्ति संगच्छन्ते । तस्माद्धे “हरे हरितवर्ण सोम “ब्रह्मणा ब्राह्मणेन मन्त्रेण वा “पुनानः पूयमानः स त्वमिन्द्रार्थं “परि "स्रव ॥ ॥ २६ ॥

यत्रं ब्र॒ह्मा पंवमान छन्द॒स्यां॒३॒ वाचं॒ वदंन् ।

ग्राव्णा॒ सोमें मही॒यते॒ सोमेंना॒न॒न्दं ज॒नय॒न्निन्द्रां॑येन्दो॒ परिं स्रव ॥६

यत्रं । ब्र॒ह्मा । प॒व॒मा॒न॒ । छ॒न्द॒स्यां॑म् । वाचं॑म् । वदं॑न् ।

ग्राव्णां । सोमें । म॒ही॒यतें । सोमें॑न । आ॒ऽन॒न्दम् । ज॒नयं॑न् । इन्द्रां॑य । इ॒न्दो॒ इतिं । परिं । स्र॒व॒ ॥६

यत्र । ब्रह्मा । पवमान । छन्दस्याम् । वाचम् । वदन् ।

ग्राव्णा । सोमे । महीयते । सोमेन । आऽनन्दम् । जनयन्। इन्द्राय । इन्दो इति। परि । स्रव॥६॥

हे “पवमान पूयमान सोम त्वदर्थं “छन्दस्यां सप्तच्छन्दोभिः कृतां तेषु भवां “वाचं स्तुतिं वदन्

उच्चारयन् “सोमे सोमाभिषवार्थं "ग्रावणा अभिषवं कुर्वता युक्तस्तेनाभिषुतेन “सोमेन देवानाम् "आनन्दं संतोषं “जनयन् उत्पादयन् “ब्रह्मा ब्राह्मणः “यत्र यस्मिन् देशे “महीयते देवैः पूज्यते तत्र हे सोम स्वं “परि “स्रव ॥

यत्र॒ ज्योति॒रजं॑स्र॒ं यस्मिँ॑ल्लो॒के स्व॑र्हि॒तम् ।

तस्मि॒न्मां धे॑हि पवमाना॒मृते॑ लो॒के अक्षि॑त॒ इन्द्रा॑येन्दो॒ परि॑ स्रव ॥७

यत्र॑ । ज्योतिः॑ । अजं॑स्रम् । यस्मि॑न् । लो॒के । स्वः॑ । हि॒तम् ।

तस्मि॑न् । माम् । धे॒हि॒ । प॒व॒मा॒न॒ । अ॒मृते॑ । लो॒के । अक्षि॑ते । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥७

यत्र । ज्योतिः । अजस्रम् । यस्मिन् । लोके । स्वः । हितम् ।

तस्मिन् । माम् । धेहि । पवमान । अमृते । लोके । अक्षिते । इन्द्राय । इन्दो इति । परि । स्रव ॥७॥

हे “पवमान “यत्र यस्मिँल्लोके “ज्योतिः सर्वं तेजः “अजस्रं सर्वदाविनश्वरं वर्तते । यस्मिन् च “लोके “स्वः आदित्याख्यं ज्योतिः “हितं निहितमस्ति । “तस्मिन् "अमृते मरणधर्मरहिते अत एव "अक्षिते अक्षीणे “लोके मां सोमाभिषवं कुर्वन्तं "धेहि निधेहि । तस्मात् मामुत्तमलोकं प्रापयितुं त्वम् इन्द्राय "पंरि “स्रव ॥

यत्र॒ राजा॑ वैवस्व॒तो यत्रा॑व॒रोध॑नं दि॒वः ।

यत्रा॒मूर्य॒ह्वती॒राप॒स्तत्र॒ माम॒मृतं॑ कृ॒धीन्द्रा॑येन्दो॒ परिं॑ स्रव ॥८

यत्र॑ । राजा॑ । वै॒व॒स्व॒तः । यत्र॑ । अ॒व॒ऽरोध॑नम् । दि॒वः ।

यत्र॑ । अ॒मूः । य॒ह्वतीः॑ । आपः॑ । तत्र॑ । माम् । अ॒मृत॑म् ।
कृ॒धि॒ । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥८

यत्र । राजा । वैवस्वतः । यत्र । अवरोधनम् । दिवः ।।

यत्र । अमूः । यहृतीः । आपः । तत्र। माम्। अमृतम् ।
कृधि। इन्द्राय । इन्दो इति । परि । स्रव ॥८॥

“यत्र यस्मिँल्लोके वैवस्वतः विवस्वत्पुत्रः "राजा भवति । “यत्र च लोके “दिवः आदित्यस्य “अवरोधनं भूतानां प्रवेशनम् । किंच यत्र लोके यह्वतीः महत्यः “अमूः इमा गङ्गाद्याः "आपः। तिष्ठन्ति । तत्र तादृशे लोके “माममृतं मरणधर्मरहितं कृधि कुरु । मम देवत्वं प्रापयेत्यर्थः । ततः कारणात् “परि “स्रव ॥

यत्रा॑नुका॒मं चर॑णं त्रिना॒के त्रि॑दि॒वे दि॒वः ।

लो॒का यत्र॒ ज्योति॑ष्मन्त॒स्तत्र॒ माम॒मृतं॑ कृ॒धीन्द्रा॑येन्दो॒ परि॑ स्रव ॥९

यत्र॑ । अ॒नु॒ऽका॒मम् । चर॑णम् । त्रि॒ऽना॒के । त्रि॒ऽदि॒वे । दि॒वः ।

लो॒काः । यत्र॑ । ज्योति॑ष्मन्तः । तत्र॑ । माम् । अ॒मृत॑म् । कृ॒धि॒ । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥९

यत्र । अनुऽकामम् । चरणम् । त्रिऽनाके । त्रिऽदिवे । दिवः ।

लोकाः। यत्र । ज्योतिष्मन्तः । तत्र । माम् । अमृतम् । कृधि । इन्द्राय । इन्दो इति । परि स्रव॥९॥

“यत्र “त्रिदिवे तृतीयस्थां दिवि द्युलोके “त्रिनाके । तत्राधरमध्यमोत्तमभावेन त्रीणि स्थानानि सन्ति । तत्र तृतीये नाके उत्तमे स्थाने “दिवः आदित्यस्य “अनुकामं कामानुगुणं “चरणम् अस्ति । किंच “यत्र यस्मिँल्लोके “लोकाः "ज्योतिष्मन्तः ज्योतिर्युक्तास्तिष्ठन्ति । “तत्र तादृशे लोके माममृतं “कृधि । यथा ममोत्तमलोको भवति तथा त्वम् “इन्द्राय "परि “स्रव ॥

यत्र॒ कामा॑ निका॒माश्च॒ यत्र॑ ब्र॒ध्नस्य॑ वि॒ष्टप॑म् ।

स्व॒धा च॒ यत्र॒ तृप्ति॑श्च॒ तत्र॒ माम॒मृतं॑ कृ॒धीन्द्रा॑येन्दो॒ परि॑ स्रव ॥१०

यत्र॑ । कामाः॑ । नि॒ऽका॒माः । च॒ । यत्र॑ । ब्र॒ध्नस्य॑ । वि॒ष्टप॑म् ।

स्व॒धा । च॒ । यत्रं । तृप्तिः॑ । च॒ । तत्रं । माम् । अ॒मृतंम् । कृ॒धि॒ । इन्द्रां॑य । इ॒न्दो॒ इतिं । परिं । स्र॒व॒ ॥१०

यत्र । कामाः । नि॒ऽकामाः । च । यत्र । ब्रध्नस्य । विष्टपम्।

स्वधा । च । यत्र । तृप्तिः । च । तत्र । माम् । अमृतम् । कृधि । इन्द्राय । इन्दो इति।परि । स्रव॥१०॥

"यत्र यस्मिँल्लोके कामाः काम्यमाना देवाः "निकामाः नितरामवश्यं प्रार्थ्यमाना इन्द्रादयः "च विद्यन्ते । यद्वा कामा निकामा अभिलाषा निकामाश्च यत्र विद्यन्ते । "यत्र लोके "ब्रध्नस्य सर्वेषां प्रज्ञापकस्य । यद्वा । सूर्येण विना कर्माणि न घटन्त इति सर्वेषां कर्मणां मूलभूतस्यादित्यस्य "विष्टपं सहस्थानं यत्र विद्यते तत्र लोके । "स्वधा अन्नं स्वधाकारेण वा दत्तमन्नं "तृप्तिः तर्पणं हर्षणं हर्षः "च "यत्र विद्यते "तत्र लोके "माममृतं कृधि ॥

यत्रा॑न॒न्दाश्च॒ मोदा॑श्च॒ मुदः॑ प्र॒मुद॒ आस॑ते ।

काम॑स्य॒ यत्रा॒प्ताः कामा॒स्तत्र॒ माम॒मृतं॑ कृ॒धीन्द्रा॑येन्दो॒ परि॑ स्रव ॥११

यत्र॑ । आ॒न॒न्दाः । च॒ । मोदाः॑ । च॒ । मुदः॑ । प्र॒ऽमुदः॑ । आस॑ते ।

काम॑स्य । यत्र॑ । आ॒प्ताः । कामाः॑ । तत्र॑ । माम् । अ॒मृत॑म् । कृ॒धि॒ । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥११

यत्र । आऽनन्दाः । च । मोदः । च । मुदः । प्रऽमुदः । आसते ।

कामस्य । यत्र । आप्ताः । कामाः । तत्र । माम् । अमृतम् । कृधि । इन्द्राय । इन्दो इति । परि । स्रव ॥ ११ ॥

यत्र यस्मिँल्लोके आनन्दादयः “आसते । तेषामल्पो भेदो द्रष्टव्यः । “यत्र च लोके “कामस्य काम्यमानस्य देवस्य सर्वे “कामाः। “आप्ताः प्राप्त भवन्ति “तत्र “माममृतं “कृधि । एतत्तु त्वया विना न घटत इति हे सोम एवं “परि “स्रव ॥ ॥ २७ ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं १.२२सूक्तं १.५२सूक्तं १.८२सूक्तं १.११२

सूक्तं १.२३सूक्तं १.५३सूक्तं १.८३सूक्तं १.११३

सूक्तं १.२४सूक्तं १.५४सूक्तं १.८४सूक्तं १.११४

सूक्तं १.२५सूक्तं १.५५सूक्तं १.८५

सूक्तं १.२६सूक्तं १.५६सूक्तं १.८६

सूक्तं १.२७सूक्तं १.५७सूक्तं १.८७

सूक्तं १.२८सूक्तं १.५८सूक्तं १.८८

सूक्तं १.२९सूक्तं १.५९सूक्तं १.८९

सूक्तं १.३०सूक्तं १.६०सूक्तं १.९०

प्रतिप्राप्तम्

विकिस्रोतः

३ आगस्ट् २०१९ (तमे) दिनाङ्के ०६:३४ समये अन्तिमपरिवर्तनं जातम् •

ऋग्वेदः सूक्तं ९.११४

ऋग्वेदः - मण्डल ९
← सूक्तं ९.११३

सूक्तं ९.११४

कश्यपोऽसितो देवलो वा।

दे. पवमानः सोमः। उष्णिक्।

य इन्दोः पवमानस्यानु धामान्यक्रमीत् ।

तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इन्द्रायेन्दो परि स्रव ॥१॥

ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः ।

सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिन्द्रायेन्दो परि स्रव ॥२॥

सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ।

देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इन्द्रायेन्दो परि स्रव ॥३॥

यत्ते राजञ्छृतं हविस्तेन सोमाभि रक्ष नः ।

अरातीवा मा नस्तारीन्मो च नः किं चनाममदिन्द्रायेन्दो परि स्रव ॥४॥

सायणभाष्यम्

‘य इन्दोः' इति चतुर्ऋचमेकादशं सूक्तम् । ऋष्याद्याः : पूर्ववत् । तथा चानुक्रम्यते -- य इन्दोश्चतुष्कम्' इति । गतः सूक्तविनियोगः ॥

य इन्दो॒ः पव॑मान॒स्यानु॒ धामा॒न्यक्र॑मीत् ।

तमा॑हुः सुप्र॒जा इति॒ यस्ते॑ सो॒मावि॑ध॒न्मन॒ इन्द्रा॑येन्दो॒ परि॑ स्रव ॥१

यः । इन्दोः॑ । पव॑मानस्य । अनु॑ । धामा॑नि । अक्र॑मीत् ।

तम् । आ॒हुः॒ । सु॒ऽप्र॒जाः । इति॑ । यः । ते॒ । सो॒म॒ ।
अवि॑धत् । मनः॑ । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥१

यः । इन्दोः । पवमानस्य । अनु । धामानि । अक्रमीत् ॥

तम् । आहुः । सुप्रजाः ।। इति । यः । ते । सोम ।
अविधत् । मनः । इन्द्राय । इन्दो इति । परि । स्रव ।। १
।।

“पवमानस्य पूयमानस्य “इन्दोः सोमस्य “धामानि स्थानानि द्रोण कलशादीनि यद्वा धामानि तेजांसि “यः ब्राह्मणः “अनु "अक्रमीत् अनुक्रामति अनुगच्छति “तं जनं “सुप्रजाः शोभनप्रजननः कल्याणपुत्रादिप्रजायुक्त इत्याहुः । ‘नित्यमसिच् प्रजामेधयोः' इत्यसिच् समासान्तः । यः सौममभिषुणोति स पुत्रादियुक्तो भवतीत्यर्थः । किंच हे

“सोम “यः मनुष्यः “ते त्वदर्थं “मनः “अविधत् करोति । यद्वा । ते त्वदीयं मनोऽविधत् परिचरति । विधतिः परिचरणकर्मा। तमपि कल्याणजननमित्याहुः । तस्मात्त्वं “परि “स्रव ॥

ऋषे॑ मन्त्र॒कृता॒ं स्तोमै॒ः कश्य॑पोद्व॒र्धय॒न्गिर॑ः ।

सोम॑ं नमस्य॒ राजा॑नं॒ यो ज॒ज्ञे वी॒रुधा॒ं पति॒रिन्द्रा॑येन्दो॒ परि॑ स्रव ॥२

ऋषे॑ । म॒न्त्र॒ऽकृता॑म् । स्तोमै॑ः । कश्य॑प । उ॒त्ऽव॒र्धय॑न् । गिर॑ः ।

सोम॑म् । न॒म॒स्य॒ । राजा॑नम् । यः । ज॒ज्ञे । वी॒रुधा॑म् । पति॑ः । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥२

ऋषे । मन्त्रऽकृताम् । स्तोमैः । कश्यप । उत्ऽवर्धयत् । गिरः ।

सोमम् । नमस्य । राजानम् । यः । जज्ञे । वीरुधाम् । पतिः । इन्द्राय । इन्दो इति । परि । स्रव ॥ २ ॥

ऋषिः स्वात्मानं प्रत्याह । हे “ऋषे सूक्तद्रष्टर्हे “कश्यप आत्मन् त्वं “मन्त्रकृतां ऋषीणां “स्तोमैः स्तोत्रैः “गिरः स्तुतिरूपा वाचः “उद्वर्धयन् उपर्युपरि वर्धयन् “राजानं सर्वेषां स्वामिनं तं “सोमं “नमस्य पूजयः। नमसः पूजयां 'नमोवरिव' इति क्यच् । “यः सोमः “वीरुधां वनस्पतीनां पतिः पालकः "जज्ञे जातः तं नमस्य । हे सोम यथात्मना सुतो भवसि तथा परि स्रव ॥

स॒प्त दिशो॒ नानां॑सूर्याः स॒प्त होता॑र ऋ॒त्विजः॑ ।

दे॒वा आ॑दि॒त्या ये स॒प्त तेभि॑ः सोमा॒भि र॑क्ष न॒ इन्द्रा॑येन्दो॒ परि॑ स्रव ॥३

स॒प्त । दिश॑ः । नाना॑ऽसूर्याः । स॒प्त । होता॑रः । ऋ॒त्विज॑ः ।

दे॒वाः । आ॒दि॒त्याः । ये । स॒प्त । तेभि॑ः । सो॒म॒ । अ॒भि । र॒क्ष॒ । न॒ः । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥३

सप्त । दिशः । नानाऽसूर्याः । सप्त । होतारः । ऋत्विजः ।।

देवाः । आदित्याः । ये । सप्तः । तेभिः । सोम । अभि । रक्ष। नः ।। इन्द्राय । इन्दो इति । परि । स्रव ॥ ३ ॥

“सप्त “दिशः । सोमो यस्यां दिशि वर्तते तद्व्यतिरिक्ताः सप्त भवन्ति । “नानासूर्याः नानाविधैः सूर्यैरधिष्ठिता ऋतवो भवन्ति । नानालिङ्गत्वादृतूनां नानासूर्यत्वम् '(तै. आ. १.७) इत्याम्नानात् । यद्वा । नानासूर्या इति

दिग्विशेषणम् । तथा “होतारः वषट्कर्तारो होत्रादयः “सप्त “ऋत्विजः भवन्ति । किंच “आदित्याः अदितेः पुत्रा धात्रादयो मार्तण्डवर्जिताः "ये "सप्त "देवाः सन्ति । एतत्तु ‘अष्टौ पुत्रासो अदितेः' (ऋ. सं. १०.७२. ८) इत्यत्र प्रपञ्चयिष्यते । हे “सोम “तेभिः तैर्दिगादिभिः सर्वैः नः अस्मान् अभि "रक्ष । एतत्तु त्वया विना न घटत इति तस्मात् “इन्द्राय "इन्दो “परि “स्रव ।।

उपाकरणोत्सर्जनयोर्मण्डलाद्यन्तहोमे ‘यत्ते राजन् ' इत्येषा। सूत्रितं च -- यत्ते राजञ्छृतं हविरिति द्व्यृचाः समानी व आकूतिरित्येका' (आश्व. गृ. ३. ५. ७-८) इति ॥

यत्तें राजञ्छृ॒तं ह॒विस्तेनं सोमा॒भि रं॑क्ष नः ।

अ॒रा॒ती॒वा मा न॑स्तारी॒न्मो च॑ न॒ः किं च॒नाम॑म॒दिन्द्रा॑येन्दो॒ परि॑ स्रव ॥४

यत् । ते॒ । रा॒ज॒न् । शृ॒तम् । ह॒विः । तेन॑ । सो॒म॒ । अ॒भि । र॒क्ष॒ । न॒ः ।

अ॒रा॒ति॒ऽवा । मा । न॒ः । ता॒री॒त् । मो इति॑ । च॒ । न॒ः । किम् । च॒न । आ॒म॒म॒त् । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥४

यत् । ते । राजन् । शृतम् । हविः । तेन । सोम । अभि । रक्ष । नः ।

अरातिऽवा । मा। नः । तारीत् । मो इति । च । नः । किम् । चन । आममत् । इन्द्राय । इन्दो इति । परि । स्रव ॥ ४ ॥

हे “राजन् सर्वेषां कर्मसाधनत्वेन स्वामिन् हे "सोम ते त्वदर्थं “शृतं पक्वं “यत् "हविः अस्ति ।' शृतं पाके' (पा.

सू. ६. १. २७) इति निष्ठायां निपातितः । “तेन हविषा “नः अस्मान् अभि "रक्ष। अभिपालय । तस्मात्वदभिरक्षितानस्मान् "अरातीवा अरातित्ववाञ्शत्रुः “नः अस्मान् “मा “तारीत् मा वधीत् । किंच "नः अस्माकं “किं “चन किंचिदपि धनादिकं शत्रुः “मो “आममत् मा हिंसीत् । यदेतदेतैः सूक्तैरुक्तं तद्यथास्माकं भवति तथा हे “इन्दो “इन्द्राय "परि “स्रव । एवं स्वादिष्ठया' इत्यादिभिरेतदन्तैः सूक्तैर्बहुविधं सोममाहात्म्यमभ्यधायि तस्मादैहिकामुष्मिकफलसिद्धये सोमयागः करणीय इत्युक्तं भवति ॥ ॥ २८ ॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे दाशतय्या नवमे मण्डले सप्तमोऽनुवाकः समाप्तं च नवमं मण्डलम् ॥

मण्डल ९

सूक्तं १.११सूक्तं १.४१सूक्तं १.७१सूक्तं १.१०१

सूक्तं १.१२सूक्तं १.४२सूक्तं १.७२सूक्तं १.१०२

सूक्तं १.१३सूक्तं १.४३सूक्तं १.७३सूक्तं १.१०३

सूक्तं १.१४सूक्तं १.४४सूक्तं १.७४सूक्तं १.१०४

सूक्तं १.१५सूक्तं १.४५सूक्तं १.७५सूक्तं १.१०५

सूक्तं १.१६सूक्तं १.४६सूक्तं १.७६सूक्तं १.१०६

सूक्तं १.१७सूक्तं १.४७सूक्तं १.७७सूक्तं १.१०७

सूक्तं १.१८सूक्तं १.४८सूक्तं १.७८सूक्तं १.१०८

सूक्तं १.१९सूक्तं १.४९सूक्तं १.७९सूक्तं १.१०९

सूक्तं १.२०सूक्तं १.५०सूक्तं १.८०सूक्तं १.११०

सूक्तं १.२१सूक्तं १.५१सूक्तं १.८१सूक्तं १.१११

सूक्तं ९.२२सूक्तं ९.५२सूक्तं ९.८२सूक्तं ९.११२

सूक्तं ९.२३सूक्तं ९.५३सूक्तं ९.८३सूक्तं ९.११३

सूक्तं ९.२४सूक्तं ९.५४सूक्तं ९.८४सूक्तं ९.११४

सूक्तं ९.२५सूक्तं ९.५५सूक्तं ९.८५

सूक्तं ९.२६सूक्तं ९.५६सूक्तं ९.८६

सूक्तं ९.२७सूक्तं ९.५७सूक्तं ९.८७

सूक्तं ९.२८सूक्तं ९.५८सूक्तं ९.८८

सूक्तं ९.२९सूक्तं ९.५९सूक्तं ९.८९

सूक्तं ९.३०सूक्तं ९.६०सूक्तं ९.९०

प्रतिप्राप्तम्
